न्यायविशारदन्यायाचार्यश्रीमद्‌यशोविजयसंशोधितः
श्रीमन्मानविजयमहोपाध्यायप्रणीतः
स्वोपज्ञवृत्तिविभूषितः

# धर्मसंग्रहः

## [ भाग-१ ]

• ग्रन्थकारः •

परमपूज्यपण्डितश्रीशान्तिविजयगणिवरशिष्यरत्न-
परममपूज्यमहोपाध्यायश्रीमानविजयजीगणिवरः

• संशोधकः •

परमपूज्यन्यायविशारद-न्यायाचार्यमहोपाध्याय-
श्रीयशोविजयजीगणिवरः

• पूर्वसम्पादकः •

प्रथमावृत्तिः - पंन्यासश्रीआनन्दसागरजीमहाराजः
द्वितीयावृत्तिः - मुनिश्रीमुनिचन्द्रविजयजीमहाराजः

• नवीनसंस्करणसम्पादिका •

परमपूज्यव्याख्यानवाचस्पतिआचार्यभगवन्तश्रीमद्विजय-
रामचन्द्रसूरीश्वराणां साम्राज्यवर्ती
परमपूज्यप्रवर्तिनी श्रीरोहिताश्रीजीमहाराजस्य शिष्यरत्ना च
साध्वी चन्दनबालाश्री

• पूर्वप्रकाशकः •
प्रथमावृत्तिः-देवचन्द्र लालभाई पुस्तकोद्धारसंस्थान-मुंबइ
वि.सं. १९७१, १९७४, इ.स. १९१५, १९१८
द्वितीयावृत्तिः-जिनशासन आराधना ट्रस्ट-मुंबइ
वि.सं. २०४०, २०४३, इ.स. १९८४, १९८७

• नवीनसंस्करणप्रकाशकः •
भद्रंकर प्रकाशन-अहमदाबाद
वि.सं. २०६७, इ.स. २०११

| | | |
|---|---|---|
| ग्रन्थनाम | : | धर्मसंग्रहः [ भाग-१ ] |
| ग्रन्थकारनाम | : | परमपूज्यमहोपाध्यायश्रीमानविजयजीगणिवरः |
| ग्रन्थसंशोधक | : | परमपूज्यमहोपाध्यायश्रीयशोविजयजीगणिवरः |
| नवीनसंस्करणसम्पादिका | : | साध्वी चन्दनबालाश्री |
| नवीनसंस्करणप्रकाशक | : | भद्रंकर प्रकाशन - अहमदाबाद |
| नवीनसंस्करण | : | वि.सं. २०६७, इ.स. २०११ |
| मूल्य | : | रु. ७५०/- (भाग १+२) |
| पत्र | : | ४०+४६० |
© : BHADRANKAR PRAKASHAN, 2011

## प्राप्तिस्थान

अहमदाबाद : भद्रंकर प्रकाशन
४९/१, महालक्ष्मी सोसायटी,
शाहीबाग, अहमदाबाद-३८०००४
फोन : ०७९-२२८६०७८५

अहमदाबाद : सरस्वती पुस्तक भंडार
हाथीखाना, रतनपोल, अहमदाबाद-३८०००१
फोन : ०७९-२५३५६६९२

अक्षरांकन : विरति ग्राफिक्स, अहमदाबाद
फोन : ०७९-२२६८४०३२

मुद्रक : तेजस प्रिन्टर्स, अहमदाबाद
फोन : ०७९-२२१७२२७१
(मो.) ९८२५३ ४७६२०

न्यायविशारदन्यायाचार्यश्रीमद्‌यशोविजयसंशोधितः
श्रीमन्मानविजयमहोपाध्यायप्रणीतः
स्वोपज्ञवृत्तिविभूषितः

# धर्मसंग्रहः

## [ भाग-१ ]

दिव्याशीर्वाददाता

परमपूज्य-परमाराध्यपाद-व्याख्यानवाचस्पति-
श्रीमद्विजयरामचन्द्रसूरीश्वरजीमहाराजसाहेब

तथा

परमपूज्य-अध्यात्मयोगी-नमस्कारमहामन्त्राराधक-
पंन्यासप्रवरश्रीभद्रंकरविजयजीमहाराजसाहेब

प्रेरणादाता

परमपूज्य-परार्थरसिक-पंन्यासप्रवरश्रीवज्रसेनविजयजीम.सा.
परमपूज्य-वर्द्धमानतपोनिधि-गणिवर्यश्रीनयभद्रविजयजीम.सा.

# સમર્પણ

જેઓશ્રીના વરદ હસ્તે વિ.સં. ૨૦૨૭માં
અજારી તીર્થમાં રજોહરણની પ્રાપ્તિ થઈ તે દીક્ષાદાતા
પરમપૂજ્ય, પરમોપકારી, પરમારાધ્યપાદ,
સન્માર્ગદર્શક, બાળદીક્ષાસંરક્ષક, સુવિહિતશિરોમણિ,
વ્યાખ્યાનવાચસ્પતિ, સુવિશાલગચ્છાધિપતિ,
શ્રીમદ્વિજયરામચંદ્રસૂરીશ્વરજીમહારાજસાહેબની
પુણ્યસ્મૃતિને
આ ધર્મસંગ્રહગ્રંથનું નવીસંસ્કરણરૂપ સુમન
સાદર સમર્પણ !!

પ.પૂ. પ્રવર્ત્તિની સા. રોહિતાશ્રીજીમહારાજની
શિષ્યાણુ સા. ચંદનબાલાશ્રી

# શ્રુતભક્તિ-અનુમોદના

## લાભાર્થી

પરમપૂજ્ય, પરમોપકારી, સુવિશાલગચ્છાધિપતિ, વ્યાખ્યાનવાચસ્પતિ, પૂજ્યપાદ આચાર્યભગવંતશ્રીમદ્વિજય રામચંદ્રસૂરીશ્વરજીમહારાજસાહેબના શિષ્યરત્ન અધ્યાત્મયોગી, પૂજ્યપાદ પંન્યાસપ્રવર શ્રીભદ્રંકરવિજયજીમહારાજસાહેબના શિષ્યરત્ન હાલારદેશે સદ્ધર્મરક્ષક, પૂજ્યપાદ આચાર્યભગવંત શ્રીમદ્વિજય કુંદકુંદસૂરીશ્વરજીમહારાજસાહેબના શિષ્યરત્ન વર્ધમાનતપોનિધિ ૧૦૦+૭૨ ઓળીના આરાધક પૂજ્યપાદ ગણિવર્ય શ્રીનયભદ્રવિજયમહારાજસાહેબના સદુપદેશથી

**શ્રી નવાડીસા શ્વેતાંબર મૂર્તિપૂજક તપગચ્છ જૈનસંઘના**
**અંતર્ગત શ્રી નેમિનાથનગરના શ્રાવિકા બહેનોના**
**ઉપાશ્રયમાં થયેલી જ્ઞાનખાતાની ઉપજમાંથી**

આ ધર્મસંગ્રહગ્રંથ ભાગ-૧ના પ્રકાશનનો સંપૂર્ણ લાભ લીધેલ છે.

આપે કરેલી શ્રુતભક્તિની હાર્દિક અનુમોદના કરીએ છીએ અને ભવિષ્યમાં પણ આપ ઉત્તરોત્તર ઉત્તમકક્ષાની શ્રુતભક્તિ કરતાં રહો એવી શુભેચ્છા પાઠવીએ છીએ.

લિ. ભદ્રંકર પ્રકાશન

# ગ્રન્થપરિચય

ધર્મસંગ્રહ નામનો આ ગ્રંથ અપેક્ષાએ સ્યાદ્વાદનો દરીયો છે. સ્યાદ્વાદી એવા પરમપૂજ્ય મહોપાધ્યાય શ્રીમાનવિજયજીમહારાજસાહેબ એના કર્તા છે અને મહાસ્યાદ્વાદી એવા મહોપાધ્યાય શ્રીયશોવિજયજીમહારાજસાહેબ એના સંશોધનકર્તા તથા ટિપ્પણકાર છે. એ કારણે એમાં ધર્મના પ્રત્યેક અંગોનો સંગ્રહ થવા ઉપરાંત પ્રત્યેક અંગના ઔચિત્ય - અનૌચિત્યનો પૂર્ણતયા વિવેક કરવામાં આવ્યો છે.

કઈ ભૂમિકાવાળા જીવ માટે કયો અને કેટલો ધર્મ કેવી રીતે મોક્ષનો હેતુ બને છે, તથા પોતપોતાના સ્થાને ધર્મના પ્રત્યેક અંગો કેટલું મહત્વ ધરાવે છે, તેનું સ્પષ્ટ વિવેચન આ ગ્રંથમાં મળી રહે છે.

ગ્રંથકારશ્રીએ ગ્રંથમાં નવું કંઈ જ કહ્યું નથી. પૂર્વ મહર્ષિઓએ જે વાતો કહી છે, તેની તે જ કહી છે. તો પણ તેની સંકલના એવી સુંદર રીતે કરી આપી છે કે આ એક જ ગ્રંથને ભણવાથી કે વાંચવાથી ચારે અનુયોગનો સાર સમજાઈ જાય છે. ધર્મના ચારે અંગો દાન, શીલ, તપ અને ભાવ અથવા દર્શન, જ્ઞાન, ચારિત્ર અને તપ સંબંધી આવશ્યક સઘળીય આ ગ્રંથમાં માહિતી મળી રહે છે. વધારે મહત્વની વાત તો તે છે કે આગમશૈલી અને યોગશૈલીનું મિલાન કેવી રીતે થાય તેને સમજવા માટે આ ગ્રંથ એક અન્ય ભોમિયાની ગરજ સારે છે.

પં. શ્રી ભદ્રંકરવિજયગણી

[ ધર્મસંગ્રહ ભાષાંતર ભા. ૨ની ‘ભૂમિકા’માંથી સાભાર ]

●●●

# પ્રકાશકીય

અનાદિકાળથી સંસારમાં દુઃખથી પીડાતો પ્રાણીગણ દુઃખમુક્તિ અને સુખપ્રાપ્તિ માટે સતત ઉદ્યમ કરે છે આમ છતાં ઘણો મોટો વર્ગ સુખ મેળવી શક્યો નથી. 'શાસ્ત્ર દરેક વિષયમાં એક દિવ્ય ચક્ષુ સમાન છે અને સર્વકાર્યોની સિદ્ધિ માટે શાસ્ત્ર સાધનરૂપ છે, આથી જ કરુણાસમુદ્ર તારક શ્રીતીર્થંકરદેવો દ્વારા ત્રિપદી પામીને શ્રુતનિધિ શ્રીગણધરદેવોએ સુખાર્થી જગતને શાસ્ત્રની અમૂલ્ય ભેટ આપી છે. એ જ અમૂલ્ય શાસ્ત્રસંપત્તિને તે તે કાળે માનવીને ઉપકારક બને તે રીતિએ પૂર્વમહર્ષિઓએ તેમાંના તત્ત્વોને અખંડ સાચવીને એક યા બીજારૂપે વિકસાવી છે. આ **'ધર્મસંગ્રહ'** નામનો ગ્રંથ પણ એવા જ ઉદ્દેશથી રચાયેલી એક અપૂર્વ કૃતિ છે.

પ.પૂ.ઉપાધ્યાય શ્રી**માનવિજયજી** ગણિવર આ ગ્રંથરત્નના રચયિતા છે. આ ગ્રંથરત્ન તેઓશ્રીએ વિ.સં. ૧૭૩૧ના વૈશાખ સુદ-૩ અક્ષયતૃતીયાના દિને રચ્યો છે. આ ગ્રંથનું પ્રકાશન સૌ પ્રથમ **'જૈનધર્મવિદ્યાપ્રસારકવર્ગ'** નામની સંસ્થા દ્વારા વિ.સં. ૧૯૬૦માં થયેલ, **ધર્મસંગ્રહ** ભાગ-૧ તરીકે પ્રસિદ્ધ થયેલા આ સંસ્કરણમાં પ્રસ્તુત ગ્રંથની ૨૯ ગાથાઓ ટીકા અને તેનું ભાષાંતર પ્રકાશિત થયેલ. ત્યારપછી આ ગ્રંથનું સંપૂર્ણ પ્રકાશન સુરતના શેઠ **દેવચંદ લાલભાઈ જૈન પુસ્તકોદ્ધારસંસ્થાન** તરફથી બે વિભાગમાં કરવામાં આવેલું છે. તેમાંનો પહેલો વિભાગ વિ.સં. ૧૯૭૧માં અને બીજો વિભાગ વિ.સં. ૧૯૭૪માં પ્રકાશિત થયો છે. તેનું સંશોધન તે સમયના પંન્યાસ શ્રી**આનંદસાગરજીમહારાજ** કે જેઓ પછી આચાર્ય શ્રી**સાગરાનંદ-સૂરિમહારાજ** થયા હતા તેઓએ કરેલું છે. ત્યારપછી અનેક પ્રાચીન હસ્તલિખિત પ્રતો અને બીજા અનેક ગ્રંથોના આધારે આ ગ્રંથનું સંશોધન-સંપાદન કાર્ય પરમપૂજ્ય**મુનિચંદ્રવિજય-મહારાજ** કે જેઓ પછી આચાર્યશ્રી**મુનિચંદ્રસૂરિમહારાજ** થયા તેમના દ્વારા થયું અને વિ.સં. ૨૦૪૦માં પહેલો વિભાગ અને ત્રીજો વિભાગ તથા વિ.સં. ૨૦૪૩માં બીજો વિભાગ શ્રી**જિનશાસન આરાધના ટ્રસ્ટ** દ્વારા પ્રકાશિત કરવામાં આવેલ છે. તથા પ્રસ્તુત **ધર્મસંગ્રહ** ગ્રંથનું ભાષાંતર ભા.૧ અને ભા.૨માં પરમપૂજ્ય મુનિશ્રી**ભદ્રંકરવિજયમહારાજ** કે જેઓ પછી પ.પૂ. આચાર્યભગવંત શ્રી**ભદ્રંકરસૂરિમહારાજ** થયા તેમના દ્વારા સંપાદિત થઈને એની અનેક આવૃત્તિઓ અદ્યાવધિ પ્રકાશિત થયેલ છે, તે જ આ ગ્રંથની અત્યંત ઉપયોગિતાને પૂરવાર કરે છે.

પ્રસ્તુત ગ્રંથનું પ્રાકૃત-સંસ્કૃતમાં અદ્યાવધિ પુસ્તકાકારે પ્રકાશન પ્રકાશિત થયેલ ન હોવાથી આ ગ્રંથનું નવીનસંસ્કરણનું સંપાદન કાર્ય પરમપૂજ્ય, પરમારાધ્યપાદ

શ્રીમદ્વિજય**રામચંદ્રસૂરીશ્વરજીમહારાજ**ના શિષ્યરત્ન, પરમપૂજ્ય, અધ્યાત્મયોગી, પંન્યાસપ્રવર શ્રી**ભદ્રંકરવિજયજીમહારાજ**ના શિષ્યરત્ન હાલારના હીરલા, પરમપૂજ્ય, આચાર્યભગવંત શ્રી**કુંદકુંદસૂરીશ્વરજીમહારાજ**ના શિષ્યરત્ન પરમપૂજ્ય, પંન્યાસપ્રવર શ્રી**વજ્રસેનવિજયજી-મહારાજ** તથા તેઓશ્રીના ગુરુબંધુવર્યશ્રી**નયભદ્રવિજયજીમહારાજ**ની શુભપ્રેરણાથી પરમપૂજ્ય, વ્યાખ્યાનવાચસ્પતિ, આચાર્યભગવંત શ્રીમદ્વિજય**રામચંદ્રસૂરીશ્વરજીમહારાજ**ના સામ્રાજ્યવર્તી તથા પરમપૂજ્ય, સરળસ્વભાવી, પ્રવર્તિની સાધ્વી શ્રી**રોહિતાશ્રીજીમહારાજ**ના શિષ્યરત્ના વિદુષી સાધ્વી શ્રી**ચંદનબાલાશ્રીજીમહારાજે** પોતાની અસ્વસ્થ રહેતી તબીયતમાં પણ અત્યંત શ્રમસાધ્ય કાર્ય કરીને અમારી સંસ્થાને પુસ્તકાકારે ભાગ ૧-૨માં દશ પરિશિષ્ટોથી સમુદ્ધ એવો આ ગ્રંથ પ્રકાશિત કરવાનો જે લાભ આપ્યો તે બદલ અમારી સંસ્થા તેમની ઋણી છે. તેમના દ્વારા ભવિષ્યમાં પણ આવા ઉત્તમ ગ્રંથો સંપાદિત થઈને પ્રકાશિત થતાં રહે અને અમારી સંસ્થાને પ્રકાશિત કરવાનો લાભ મળતો  રહે એવી અમે અભિલાષા રાખીએ છીએ.

આ **ધર્મસંગ્રહ** ગ્રંથ ભાગ-૧ ના નવીનસંસ્કરણના પ્રકાશન માટે પરમપૂજ્ય સુવિશાલ-ગચ્છાધિપતિ, આચાર્યભગવંત શ્રીમદ્વિજય**રામચંદ્રસૂરીશ્વરજીમહારાજ**ના સામ્રાજ્યવર્તી પરમપૂજ્ય, હાલારદેશે સદ્ધર્મરક્ષક, આચાર્યભગવંત શ્રીમદ્વિજય**કુંદકુંદસૂરીશ્વરજીમહારાજ**ના શિષ્યરત્ન, વર્દ્ધમાનતપોનિધિ ૧૦૦+૭૨મી વર્દ્ધમાનતપની ઓળીના આરાધક, પરમપૂજ્ય, ગણિવર્યશ્રી**નયભદ્રવિજયજીમહારાજ**ની શુભપ્રેરણાથી **શ્રી નવાડીસા શ્વેતાંબર મૂર્તિપૂજક તપગચ્છજૈનસંઘ અંતર્ગત શ્રીનેમિનાથનગરના શ્રાવિકા બહેનોના ઉપાશ્રયમાં થયેલી જ્ઞાનખાતાની ઉપજમાંથી આ ધર્મસંગ્રહગ્રંથ ભાગ-૧ ના પ્રકાશનનો સંપૂર્ણ લાભ લીધેલ છે.** તે બદલ અમારી સંસ્થા તેમનો આભાર માને છે.

આ નવીનસંસ્કરણ પ્રકાશનના સુઅવસરે અમે પૂર્વના પ્રકાશક શ્રી**દેવચંદ લાલચંદ પુસ્તકોદ્ધારસંસ્થા**નો તથા શ્રી**જિનશાસન આરાધના ટ્રસ્ટ**નો તથા **કોબા કૈલાસસાગર જ્ઞાનભંડારમાંથી** મુદ્રિત પ્રતો અમને પ્રાપ્ત થઈ તેમનો, નવીનસંસ્કરણના પુસ્તકાકારે પ્રકાશન માટે અને આર્થિકસહયોગ માટે પ્રેરણા કરનાર શ્રી**ગણિવર્યશ્રી**નો, આ કાર્યના અક્ષરમુદ્રાંકન કાર્ય માટે **વિરતિ ગ્રાફિક્સ**વાળા **અખિલેશ મિશ્રા**એ કાળજીપૂર્વક સુંદર કાર્ય કરી આપેલ છે અને પ્રીન્ટીંગના કામ માટે **તેજસ પ્રીન્ટર્સ**વાળા **તેજસભાઈ**એ ખંતપૂર્વક સુંદર કાર્ય કરી આપેલ છે તે બદલ તેમનો ખૂબ ખૂબ આભાર માનીએ છીએ.

આવા ઉત્તમ **ધર્મસંગ્રહ**ગ્રંથનું વાચન કરીને સૌ કોઈ ભવ્યાત્માઓ સમ્યગ્દર્શન-જ્ઞાન-ચારિત્રરૂપ સદ્ધર્મનું આરાધન કરીને કેવળજ્ઞાન પ્રાપ્ત કરી અષ્ટકર્મનો ક્ષય કરીને મુક્તિસુખના ભાગી બનીએ એ જ શુભભાવના !!

**– ભદ્રંકર પ્રકાશન**

●●●

# विजयन्ते सदा विश्वे गणेशाः सूत्रकारकाः ।।

समाददतु भव्या भाविभव्या पूर्वमुनीश्वरगुम्फितमेतं गुम्फमनूनधर्मसंग्रहणक्रियया यथार्था-भिधानं **धर्मसंग्रहं** संस्थाकार्यवाहकद्वारा श्रेष्ठि**देवचन्द्रलालभाइ**नामकभाण्डागाराधिपेनोपदी-क्रियमाणं करकमलेऽत्यल्पतमेन पण्येन, समादानाच्चार्वाग् अवश्यमेव विचारणीयमेतत् यदुत सान्वर्थाभिधानोऽप्ययं ग्रन्थो निखिलानामास्तिकदर्शनानां धर्मार्थित्वात् कतमेन धर्मेण संग्रहोऽत्र ?, जैनेन चेत् तत्रापि अनगारेतरादिभेदैरनेकधा भेदभाजि तस्मिन् केन प्रकारेणात्र संग्रहः के च कारकाः कदा च भूमण्डलं मण्डयामासुः पवित्रपत्कमलैरिति ?, प्रवृत्तायां चैवं विचारश्रेणौ यावन्नोन्मूलमियृयात्तद्विषया शङ्कातति‍र्न तावत् निःशङ्कां प्रवृत्तिमातन्यात् कृतीति विचार्यैव **श्रीमद्भिर्मानविजयोपाध्यायैः** प्रथमतः सर्वेषामगार्यनगाराणां धर्माविर्भावनाय सामान्येनैवाभिधा चक्रे **धर्मसंग्रह** इति, तथा च वाचकपाठकश्रोतॄणां सुखेनावगमो भविष्यति निर्बाधं यदुताद्यावधिमुद्रिता ये ग्रन्था एतद्भाण्डागारकार्यवाहकैरन्याभिश्च संस्थाभिः परं तेषु सर्वेषु ग्रन्थोऽयमेव मूर्धाभिषिक्तो यतोऽगारानगारोभयधर्मप्रतिपादनपरताऽस्य, अन्यच्च विधातारोऽस्य यतोऽर्वाक्कालीनास्ततः परःशतानां ग्रन्थानां ग्रन्थकाराणां च हार्दमवतारयितुमत्रालम्भूष्णव इति नायं कदाचनापि अर्वाक्कालीनजाततयाऽवज्ञास्पदं यायात्, ग्रन्थानां ग्रन्थकाराणां च येषां हार्दमवातारि तत्तेषामभिधानावलिनिरीक्षणतः स्वयमेव समेष्यति दृष्टिपथे पटुप्रज्ञानां, अन्यच्च प्रस्तुत-ग्रन्थसौधसूत्रणसूत्रधारसन्निभा महोपाध्याया न केवलं स्वमनीषोज्जृम्भितमाविर्भावयामासुः किन्तु **काशी**विबुधविजयावाप्तयथार्थाभिधानान् **श्रीयशोविजयमहोपाध्याया**न् प्रति शोधनायापि समर्पयामासुर्यथा प्राक् **श्रीमदभयदेवपादाः** श्रीमतो **द्रोणाचार्या**नभि, एतदेव भवभीरुतादिसद्-गुणाढ्यताचिह्नं यद् मा भूद् स्वग्रन्थपाठपीनप्रज्ञानां भवभ्रमः सूत्रविरोधविषमिश्रिततया बोधाभासेनेति, सूत्रसिद्धं चैतत्, यतो न निःशङ्कमिव ब्रूयात् शङ्काऽर्हं, तथा च ये केचन सूत्रविरुद्धं स्वीयमज्ञानमेव मूर्त्तिमद् ग्रन्थद्वारा विस्तारयन्ति अन्यैरशोधयित्वा ते गतिं कामधिगन्तारस्तन्नर्ते सर्वज्ञादिकमवसातुं शक्यमितरैः, अलमप्रस्तुतेन, महोपाध्यायास्तु ग्रन्थमेनं पूर्वर्षिग्रन्थानु-सारिणमप्यतियत्नेन शोधयित्वा अन्यान्यग्रन्थान् योजयित्वा चाविर्भावयामासुः, तदेतत् प्रस्तुत-ग्रन्थरत्नप्रशस्तौ ''**तर्कप्रमाणनयमुख्यविवेचनेन, प्रोद्बोधितादिममुनिश्रुतकेवलित्वाः । चक्रु-**

**र्यशोविजयवाचकराजिमुख्या, ग्रन्थेऽत्र मय्युपकृतिं परिशोधनाद्यैः (किल योजनाद्यैः)''** ॥१॥ दर्शनात् स्पष्टमेवोन्नीयते, तच्चास्माभिः [ ] चिह्नयुतं कृतं, अन्यच्च **श्रीमद्विजयदेवसूरीणां श्रीमद्विजयानन्दसूरीणां** चाभूद्वैमनस्यं पारम्पर्यगमिति किंवदन्त्यपि ग्रन्थस्यास्य समीक्षणात् अवभासिष्यते निर्मूला, यतः **मानविजयोपाध्यायाः श्रीमदानन्दसूरि**पारम्पर्यानुसारिणः श्रीमन्न्यायाचार्यास्तु **श्रीमद्विजयदेवा**नुसारिणः, ततो विभाव्यमेतत् प्रशस्तिगतमविरोधेनासितव्यं सुकरमेवोभयानुगानामपि । किं च संग्रहशब्दाङ्कितताम् सान्वर्थां कुर्वतां प्रस्तुतसद्ग्रन्थस्य महाशयानां यद्यपि न किञ्चित् स्वकीयमतिवैभवविस्पन्दितं तथापि 'योजकस्तत्र दुर्लभ' इति न्यायसमर्थनं यथावच्चक्रुः पूज्याः, एतद्ग्रन्थगताभिधेयपर्यालोचनयेदं स्पष्टमेवावगमपथमायास्यति शास्त्रायासवतां सहसेत्यनुमिमीमहे । विशेषेण वीक्षणीयाश्चेमे पदार्थाः पटूनां पाटवस्मृतिदायकाः —

१. धर्मलक्षणे तावत् वचनाद्यनुष्ठानमित्यादिश्लोकं विवेचयद्भिः सार्वत्रिकं संस्कृतं लक्षणं यतो न स्यात् प्रीत्यनुष्ठानादिष्वव्याप्त्यादि (पृष्ठे-६)

२. न्यायसंपन्नविभवताप्रभृतीनां शास्त्रेषु साक्षादनवलोकनात् कथं विधेयता ? तद्भावे च कथं मार्गानुसारिगुणत्वमित्याशङ्क्य दोषतानवलब्धशिष्टत्वानां शिष्टानामाचारविषयतया तेषा-मुन्नयनेन पारमर्षानुसारिता ध्वनितैषां (पृष्ठे-२०)

३. ऐदंयुगीनां साध्वाभासाः श्रावकाभासाश्च निश्चयं व्यवहारं च व्याहृत्य यथारुचि क्रियालोपं ज्ञानलोपं च स्वप्रमादाद्यपह्नवाय व्यङ्ग्येन ध्वनिना व्याख्यान्ति विमुग्धानां पुरतस्तेषां द्वयेषामप्य-वलोकनीयं निश्चयव्यवहारधर्मस्वरूपं यथायथं **श्रीधर्मसंग्रहणीश्रीउपदेशपदा**दिगतैरभिप्रायैः निवेदितं प्रवचनवेदिभिः ( पृष्ठे-२१-२२)

४. श्रीम**ज्जिनभद्रक्षमा**श्रमणश्रीम**त्सिद्धसेनदिवाकरयोः** परस्परं विसंवदतोः कथमिव नाभिनिवेशः कथमिव चान्येषां स इत्युपपादितमुपपत्तिनिपुणैः ( पृष्ठे-७०-७१)

५. नानुमन्वते तुर्ये गुणस्थाने ये विरतिक्रियां तेषामपि मनः समाहितं युक्तिपुरस्सरं तत्र तस्याः करणीयत्वेन, क्रियाया गुणस्थानके गुणार्हत्वात् ( पृष्ठे-८८)

६. ये केचित् श्रावकाभासाः भूत्वोपदेशकाः आचारशून्याः अनन्तकायाद्यभक्ष्यमाहत्य श्रद्धालूंश्चापि च्यावयन्ति धर्मात् तेषां हितायैवाख्यातं ख्यातकीर्तिभिर्यदुत प्रातिवेश्मिकगृहराद्धम-चित्तमपि वर्ज्यमेवानन्तकायिकमिति पूज्यपक्षः (पृष्ठे-१३४)

७. सामायिकस्य विधानं प्रतिपादयद्भि**रावश्यकपञ्चाशक**प्रभृत्यनेकग्रन्थानुगतमेवानूदितं, दृष्ट्वा च तत् केचित् पूर्वापरालोचनाहीनाः मिथ्यापोषं पुष्णन्ति स्वमतं तैः परं विचारणीयमेतत् यदुतालोचनाद्यनुगमे तत् सामायिकविधानं ते पश्चान्निर्दिश्यमानेर्यापथिकी न सामायिकप्रतिबद्धा किन्तु वन्दनादिप्रतिबद्धा, सामायिकं तु विधायैवेर्यां विदधे, यतः श्री**मदुत्तराध्यय**नेषु **एकोन**त्रिंशत्तमेऽध्ययने ''सामायिकं च प्रतिपत्तुकामेन तत्प्रणेतारः स्तोतव्यास्ते च तत्त्वतस्तीर्थकृत

एवे''त्यादि, अत्र स्पष्टमेवाविर्भावितं श्री**शान्तिसूरि**भिः सामायिकं प्रतिपद्यमानस्यादौ चतुर्विंशतिस्तवकथनमाख्यातृभिः प्रागीर्यापथिकीप्रतिक्रमणं, सामायिकचतुर्विंशतिस्तववन्दन-प्रतिक्रमणकायोत्सर्गप्रत्याख्यानवर्णनाच्च न श्रावकाणां विधिर्न वा न तत्रावधारिता, किं च परःशतानामपि हस्तानां दूरतः समागतानां श्राद्धानामपि या नेरितेर्याप्रतिक्रान्तिरावश्यकादौ तत् ज्ञापयति यदुत न संबद्धेर्योदितिरत्र, अत एव च प्रतिक्रमणकालग्रहणविध्यादौ चावश्यके नेर्याभणितिः, अत एव **पञ्चाशक**चूर्णौ **संघाचार**भाष्यवृत्त्यादौ च सामायिकादर्वागेवेर्यायाः करणं कथितं करुणापरीतैः, कथं च साधुक्रियामनुकृत्य त्रिः सामायिकोच्चारं कारयितृभिर्न साधुवत् प्राग् ईर्या प्रतिक्राम्यते सामायिकात् ? ए तदपि ईर्याप्रतिक्रान्तिमन्तरा निखिलक्रियानिषेधक-श्री**महानिशीथदशवैकालिकबृहद्वृत्ति**वाक्यपर्यालोचनेन विचार्यं, यतः समेष्यति प्रतिभागोचारं प्रतिक्रियामादावीर्यायाः करणं, अत एवात्रैव स्पष्टमुदितं पृष्ठे २५१तमे यदन्या अपि प्रतिक्रमणादिकाः क्रिया ईर्याप्रतिक्रमणपूर्विकाः शुध्यन्ति, तथा च श्रद्धेयमेतदेव ( पृष्ठे १४९-१५०)

८. यत् सावद्यप्रत्याख्यानप्रवणानपि अपर्वणि निषेधयन्ति ये श्रावकान् भञ्जन्ति च स्वकीयां त्रिविधं त्रिविधेन सर्वं सावद्यं प्रत्याख्यामीति प्रतिज्ञां तैः पौषधोपवासेन सहगतमेवातिथिसंविभागः किमिति नापर्वणि निषिध्यते, किं च प्रकरणज्ञानहीनत्वं तेषां स्पष्टमेव, यत आवश्यकादौ मर्यादादर्शकतां पाठस्यानालोच्य प्रकरणानुगतां कुतस्त्येयं विधिकालतोररीकृता ?, अत एवात्र पूज्यैरुपाध्यायैः पौषधस्य सर्वतिथिविधेयता स्पष्टं निष्टङ्किता, विशेषस्त्वत्रान्यत्र च ग्रन्थार्थयोर-वेक्षणात् पर्यालोचनीयः ( पृष्ठे १६४-१६५)

९. अत्र श्रीजिनेश्वराणां स्त्रीभिरष्टभेदादिकां पूजां विदधानाभिरवश्यं वस्त्रत्रयं रक्ष्यमिति प्रतिपादयितृभिः अर्धलुम्पकानां स्त्रीपूजामपलपतां निरस्तं मतं, न च सम्यग्दर्शनक्रियारूपायाः पूजाया निषेधं स्त्रीणां विहाय जिनदत्तीयान् कोऽप्यपरो गच्छानुगोऽप्युररीकुर्यात्, शतशः शास्त्रोक्तिसिद्धत्वात्, आशातनाकरणं तु पुरुषैरपि वर्जनीयमेव, परमाशातनाविरहकाले न कार्यं धर्मकार्यं धर्मार्थिभिरित्यूचानस्य कैवानूचानतेति समीक्ष्यं समीक्षकैः इत्यादयोऽनेकेऽत्र प्रेक्षणीयाः प्रेक्षावतां विषयाः, यतो ज्ञानदर्शनचारित्राणामनतिचारता प्रकर्षप्रकर्षतरशुद्ध्यधिगमश्च स्यातां

ग्रन्थे चात्राधिकारचतुष्टयमातेने, तत्राद्योऽधिकारः सामान्यगृहस्थधर्मवर्णनचणः, द्वितीयः सम्यक्त्वमूलकद्वादशव्रतादिवर्णनेन विशेषश्रावकधर्मवर्णकः, तृतीयः सापेक्षनिरपेक्षयतिधर्म-स्वरूपनिवेदकः, तुर्यस्तु निरपेक्षयतिधर्मविवेचनचतुरः, अत्र चाद्ययोराविर्भावमाधायोपरतं यत् तत्र कारणं श्रीमदागमानां तत्समितिद्वारा यन्मुद्रणं प्रारेभे तत्सभासद्भिस्तत्र यावद्वाचनं मुद्रणस्या-शक्यत्वेऽपि किञ्चित् साहाय्यं विधातुमेतत्संस्थाधिकारिभिः अन्यन्मुद्रणं गौणीकृत्याग-मानामेवोन्मुद्रणमिव मुद्रणं व्यधायि, वाचकेभ्यः समर्पणमप्यागमानां समितावुपविष्टेभ्यः कृतमत

एव उभयतोऽपि कार्यमाणे मुद्रणे यदा यावद्वाचनं मुद्रयितुं नापारि तदा सार्द्धवर्षद्वयं वाचयित्वा साधुसमित्या सार्धवर्षद्वयस्य गृहीतो विराम आगमवाचनायां, भविष्यति चोदयः षट्सप्तत्यधिकै-कान्नविंशतौ शतेषु श्रीसिद्धाद्र्यधित्यकायां वैशाखशुक्लषष्ठ्यां अधिनिवेशनेनेति च निर्णीतं साधुसमित्या, तत एव शेषाधिकारद्वयमयमुत्तरार्द्धमिदमाविर्भावितं चिरकालेन तत् क्षन्तव्यमेत-त्पूर्वभागग्राहकैः, अत्र चोद्धारे श्रीमतां **सिद्धिविजया**भिधानां प्रज्ञांशवर्याणां पुस्तकं शुद्धप्रायं श्रीमद्भि**र्यशोविजयो**पाध्यायैः स्वयं टिप्पितटिप्पणयुतं प्राप्यानायासेनैव मुद्रणमेतत् जातं, द्वितीयं तु जैनानन्दकोशगं प्रायः शुद्धं नूतनं च, लब्धाभ्यामाभ्यां कृतेऽपि स्वमत्यनुसारेण शोधनकर्मणि स्खलनाप्रचुरत्वात् छद्मस्थताया विशेषतोऽस्मादृशां प्रमादमग्नानामिति ज्ञापनीया अस्मभ्यं स्खलना यतो द्वितीयावृत्तावुन्मार्जयिष्यामस्ताः । श्रीमहोपाध्यायाः श्री**मद्धीरसूरि**तः—

**श्रीहीरसूरयः**

↓

**विजयसेनः**

↓

**विजयतिलकः**

↓

**विजयानन्दः**

↓

**विजयराजः**

एवं पट्टनुक्रमेण जातेषु श्रीविजय**राजसूरि**षु तेषां राज्ये चक्रुर्ग्रन्थमेनं, श्रीमन्तश्च श्री**विजया-नन्द**सूर्यन्तेवासिनां श्रीमतां **शान्तिविजया**भिधानं पण्डितोत्तमानामन्तिषद उपाध्यायपदलङ्करिष्णवः, सत्ता च श्रीमतां प्रशस्तिनिर्दिष्टया "**वर्षे पृथ्वीगुणमुनिचन्द्र [ १७३१ ] प्रमिते च माधवे मासे। शुद्धतृतीयादिवसे, यत्नः सफलोऽयमजनिष्ट**" ॥२॥ इत्यार्यया स्पष्टतम एवाष्टादश-शतकस्याद्या भागे, श्रीमतां च विहारः प्राचुर्येण **गौर्जरत्रा**यामेव जातोऽवसीयते, ग्रन्थश्चाय-**महम्मादावादा**भिजनश्री**शान्तिदासश्रेष्ठि**प्रार्थनया व्यधायीत्यपि प्रशस्तितः स्पष्टतममेव, ग्रन्थ-स्यास्य मानं तु द्व्यधिकषट्शत्या युतानि चतुर्दश सहस्राणीत्यपि "**प्रत्यक्षरं गणनया, ग्रन्थेऽत्र स्युरनुष्टुभाम् । चतुर्दश सहस्राणि, षट्शती च द्विकोत्तरा**" ॥३॥ इति श्लोकेन स्पष्टमेव, शेषं ग्रन्थावलोकनविचारणावेद्यमित्यर्थयन्ते उदन्वद**न्तानन्दाः** श्रमणसङ्घमनघरङ्गम् ।

**श्रीसुरतद्रंगे फाल्गुनशुक्लपंचम्यां वे**[४]**द**[७]**मुन्यङ्के**[९]**न्दु**[१]**मिते वैक्रमेऽब्दे**

●●●

D1-t.pm5 3rd proof

# कृति अने कृतिकार[1]

મહામહોપાધ્યાય શ્રી માનવિજય ગણિવર રચિત સ્વોપજ્ઞવૃત્તિ વિભૂષિત અને મહો-મહોપાધ્યાય શ્રીમદ્ **યશોવિજયજી** દ્વારા સંશોધિત શ્રી **ધર્મસંગ્રહ** ગ્રંથનો પ્રથમ ભાગ પ્રાચીન હસ્ત-લિખિત પ્રતોના આધારે સંશોધિત/સમ્પાદિત કરી વિદ્વાનોના કરકમલમાં મૂકતાં આનંદ થાય છે.

**ધર્મસંગ્રહ** ગ્રંથ નામ પ્રમાણે શ્રાવકધર્મ અને સાધુધર્મના સામાન્ય તથા વિશેષ નિરૂપણથી સમૃદ્ધ બનેલ આકર ગ્રંથ છે.

**પૂર્વ પ્રકાશનો–**

પ્રસ્તુત ગ્રંથનું પ્રકાશન સૌ પ્રથમ **'જૈનધર્મવિદ્યાપ્રસારકવર્ગ'** નામની સંસ્થા દ્વારા વિ.સં. ૧૯૬૦માં થયું. ધર્મસંગ્રહ ભા.૧ તરીકે પ્રસિદ્ધ થયેલા આ સંસ્કરણમાં પ્રસ્તુત ગ્રંથની ૨૯ ગાથાઓ ટીકા અને તેનું ભાષાંતર પ્રસિદ્ધ થયા છે. આ પછી આગળ પ્રકાશન થયેલ જણાતું નથી.

ત્યારબાદ આ ગ્રંથ સંપૂર્ણ સટીક બે ભાગમાં શ્રી **દેવચંદ્ર લાલભાઈ પુસ્તકોદ્ધાર** ફંડ દ્વારા અનુક્રમે વિ.સં. ૧૯૭૧ અને ૧૯૭૪માં પ્રસિદ્ધ થયો. આ ગ્રંથનું સંશોધન-સંપાદન પ.પૂ. પંન્યાસ શ્રી **આનંદસાગરજી** મહારાજ (**સાગરાનંદસૂરિ** મહારાજા) દ્વારા થયું.

**પ્રસ્તુત સંસ્કરણ–**

ઘણા સમયથી દુર્લભ બનેલા આ ગ્રંથને ત્રણ વિભાગોમાં વિભક્ત કરી સુંદર રીતે છપાવીને પ્રસિદ્ધ કરાવવાનું કાર્ય **શ્રી જિનશાસન આરાધના ટ્રસ્ટે** પ્રારંભ્યું. અને વિ.સં. ૨૦૪૦માં પ્રથમભાગ અને તૃતીયભાગ તથા વિ.સં. ૨૦૪૩માં દ્વિતીયભાગ પ્રસિદ્ધ થયો.

**સંપાદનમાં ઉપયુક્ત હસ્તપ્રતો–**

પ્રસ્તુત સંપાદનમાં ઉપર્યુક્ત હસ્તપ્રતોનો પરિચય આ પ્રમાણે છે :–

[૧] C સંજ્ઞક પ્રતિ :-

જૈન વિદ્યાશાળા (દોશીવાડાની પોળ, અમદાવાદ-૩૮૦૦૦૧)માં આવેલ આચાર્યદેવ શ્રીમદ્વિજયસિદ્ધિસૂરીશ્વરજી શાસ્ત્રસંગ્રહની આ પ્રતિ છે.

ડાભડા ક્રમાંક ૨૭, પ્રતિ ક્રમાંક ૨૨૨.

પત્ર સંખ્યા :-૩૨૭

દરેક પત્રની બંને બાજુ પંક્તિઓ લગભગ ૧૫

દરેક પંક્તિમાં અક્ષરો લગભગ ૫૦.

**નોંધ :-** પૂજ્ય સાગરજી મહારાજે પણ પોતાના સંપાદનમાં આ પ્રતનો ઉપયોગ કર્યો છે. દે.લા.પુ.ફંડ દ્વારા પ્રકાશિત ધર્મસંગ્રહ ઉત્તરાર્ધમાં આ પ્રતના પત્ર ક્રમાંક ૨૧૩નો ફોટો છાપવામાં આવેલ છે.

આ પ્રત પ્રથમાદર્શ હોય તેમ માનવામાં આવે છે.

---

૧. આ લખાણ જિનશાસન આરાધના ટ્રસ્ટથી પ્રકાશિત થયેલ ધર્મસંગ્રહ ભા.૧ અને ભા.૨માંથી સાભાર લીધેલ છે.

[૨] L સંજ્ઞક પ્રતિ :-

આ પ્રતિ લાલભાઈ દલપતભાઈ ભારતીયસંસ્કૃતિવિદ્યામંદિર (અમદાવાદ-૩૮૦૦૦૯)ની છે.

ક્રમાંક : A ૨૯૧/૧૦૩૧૯.

પત્ર સંખ્યા :-૩૭૮.

દરેક પત્રની બંને બાજુ પંક્તિઓ લગભગ ૧૫.

દરેક પંક્તિમાં અક્ષર લગભગ ૪૮.

વિશેષ : અંત ભાગમાં આ પ્રમાણે લખાણ છે...

''संवत् १७४४ वर्षे पोषमासे शुक्लपक्षे त्रयोदशीतिथौ
गुरुवासरे लषितं स्थम्भतीर्थ बिन्दरे.''

[૩] P સંજ્ઞક પ્રતિ :-

આ પ્રતિ 'શ્રી સંવેગીનો ઉપાશ્રય, જૈન જ્ઞાનભંડાર (હાજાપટેલની પોળ, અમદાવાદ-૩૮૦૦૦૧)ની છે.

ડાભડા ક્રમાંક : ૧૭, પ્રતિ ક્રમાંક : ૧૬૮૮.

પત્ર સંખ્યા : ૩૯૧.

પત્રની બંને બાજુ પંક્તિઓ લગભગ ૧૫.

દરેક પંક્તિમાં અક્ષરો લગભગ ૪૫.

વિશેષ : પ્રતના અંતે આ પ્રમાણે લખાણ છે :

**''भूयुगमुनीन्दु प्रमिते लिखिता श्री राजसंज्ञके नगरे ।**
**धर्मसङ्ग्रहवृत्तिः सूत्रान्विता हस्तरुचिनैषा''** ॥२॥
समाप्तश्चायं सवृत्तिधर्मसङ्ग्रहग्रन्थः श्रीरस्तु शुभं भवतु ॥

**સમનામી કૃતિઓ–**

ધર્મસંગ્રહ નામની બીજી બે કૃતિઓ જુદા જુદા સમયે જુદા જુદા મહર્ષિઓએ રચેલી મળે છે :

[૧] ધર્મસંગ્રહ : ૧૪૦૦૦ શ્લોક પ્રમાણ આ કૃતિના કર્તા શ્રી વિજયાનંદસૂરિ છે.

[૨] ધર્મસંગ્રહ : ૪૫૦૦ શ્લોક પ્રમાણ આ કૃતિ શ્રી મુનિશેખરસૂરિજીઓ રચેલી છે.

આ બંને ગ્રંથો હજુ સુધી અપ્રકાશિત છે.

આ ઉપરાંત પણ એક અજ્ઞાતકર્તૃક ધર્મસંગ્રહ મળે છે.

**પ્રસ્તુત કૃતિ–**

સ્વોપજ્ઞવૃત્તિ સહિત શ્રી **ધર્મસંગ્રહ** (પ્રસ્તુત ગ્રંથ)ના રચયિતા મહામહોપાધ્યાય શ્રી **માનવિજયજી** છે.

શ્લોક પ્રમાણ : ચૌદ હજાર છસો બે.

પ્રસ્તુત ગ્રંથની રચના અમદાવાદના શ્રેષ્ઠિ શ્રી **શાંતિદાસ**ની વિનંતિથી મહોપાધ્યાયજીએ કરી છે.

ગ્રંથ બે વિભાગમાં વિભક્ત છે. અને બંને વિભાગો પણ બે બે અધિકારોમાં વહેંચાયેલા હોવાથી ગ્રંથ ચાર અધિકારમય છે :-

[૧] સામાન્ય ગૃહસ્થધર્મવર્ણન અધિકાર ગાથા : ૧-૨૦
[૨] વિશેષ ગૃહસ્થધર્મવર્ણન અધિકાર ગાથા : ૨૧-૭૦
[૩] સાપેક્ષ યતિધર્મવર્ણન અધિકાર ગાથા : ૭૧-૧૫૩
[૪] નિરપેક્ષ યતિધર્મવર્ણન અધિકાર ગાથા : ૧૫૪-૧૫૯

ગ્રંથમાં આવતાં વિષયોની વિગતવાર સૂચિ વિષયાનુક્રમમાં આપી છે.

**કૃતિકાર મહર્ષિ–**

ગ્રંથકાર શ્રી **માનવિજય** મહોપાધ્યાયની પટ્ટપરંપરા જગદ્ગુરુ શ્રી**હીરસૂરિ** મહારાજાથી આ પ્રમાણે છે :

૧ શ્રી**સેનસૂરિ** મહારાજા
૨ શ્રી**તિલકસૂરિ** મહારાજા
૩ શ્રી**આનંદસૂરિ** મહારાજા
૪ શ્રી**શાન્તિવિજય** મહારાજા
૫ શ્રી**માનવિજય** મહોપાધ્યાય

**પ્રસ્તુત સંપાદન–**

(૧) પ્રસ્તુત ગ્રંથના સંપાદન માટે આગળ જણાવી તે ત્રણ હસ્તલિખિત પ્રતો C L અને P તથા જૈનધર્મવિદ્યાપ્રસારક દ્વારા પ્રકાશિત ધર્મસંગ્રહ ભા.૧-જેની અમોએ J સંજ્ઞા રાખી છે—અને દે.લા.પુ. ફંડ દ્વારા પ્રકાશિત ધર્મસંગ્રહ પૂર્વાર્ધ અને ઉત્તરાર્ધ—જેની અમે મુ. સંજ્ઞા રાખી છે-તેનો ઉપયોગ કર્યો છે.

(૨) જ્યારે જ્યારે અમને હસ્તલિખિત પ્રત કે પ્રતોનો પાઠ વધુ સારો લાગ્યો છે ત્યારે તેવા પાઠ સ્વીકારી દે. લા. સંસ્કરણનો પાઠ નીચે ટીપ્પણમાં મુ. સંકેત સાથે આપ્યો છે. જે પ્રત કે પ્રતોના આધારે પાઠ સુધાર્યો છે તેનો નિર્દેશ પણ મોટો ભાગ ટિપ્પણમાં નીચે આપી દીધો છે. અને આવો અમે સ્વીકારેલો પાઠ બીજા ગ્રંથમાં જોવામાં આવ્યો હોય તો તેનો પણ નિર્દેશ આપ્યો છે. [જુઓ પત્ર ૧૫ ટિ. ૧][૨].

(૩) સંગ્રહાત્મક આ ગ્રંથમાં અનેક ગ્રંથોની છાયા જોવામાં આવે છે. આવા અનેક સ્થળે અમે ટિપ્પણમાં તુલા-કરી તે તે ગ્રંથોના નામ અને સ્થળ જણાવ્યા છે.

(૪) હસ્તલિખિત પ્રતમાં ક્યારેક એક પાઠ લખ્યા પછી એને ભુંસીને કે સુધારીને નવો પાઠ લેખકે અથવા સંશોધકે કર્યો હોય છે. આવા સ્થળે જ્યારે બંને પાઠ વાંચી શકાતા હોય છે. ત્યારે પહેલાના મૂળ પાઠને મૂલ સંકેતથી અને પછીના સંશોધિત પાઠને સંશો. સંકેતથી ટિપ્પણમાં આપ્યા છે. [જુઓ પત્ર ૧૨ ટિ. ૧ વગેરે].

---

૨. પત્ર અને ટિપ્પણનંબર અમે આ લખાણમાં પ્રસ્તુત નવીનસંસ્કરણ મુજબ આપેલ છે. સમ્પા.

(૫) જ્યારે કોઈ સ્થળે દે. લા. સંસ્કરણમાં પાઠ છૂટી ગયો હોય અને અમે હસ્તલિખિત પ્રત કે પ્રતોના આધારે ઉમેર્યો છે, ત્યારે ઉમેરેલા પાઠની આગળ પાછળ ** ચિહ્ન મૂકીને ટિપ્પણમાં નિર્દેશ કર્યો છે. [જુઓ પત્ર ૧૮ ટિ. ૨].

(૬) પ્રસ્તુત ગ્રંથમાં ગ્રંથકારે સ્થળે સ્થળે વિપુલ પ્રમાણમાં ઉદ્ધરણો-ક્યારેક ગ્રંથના નામોલ્લેખ સાથે અને ક્યારેક ગ્રંથના નામોલ્લેખ વિના આપ્યા છે. આવા તમામ ઉદ્ધરણો પ્રસ્તુત સંસ્કરણમાં ભિન્ન ટાઈપમાં મુદ્રિત કરવામાં આવ્યા છે અને જેટલા ઉદ્ધરણોના સ્થળ મળી શક્યા છે તે તમામની પાછળ ગ્રંથ અને સ્થળ ચોરસ કૌંસમાં [બ્રેકેટમાં] આપ્યા છે.

(૭) પૂજ્યપાદ આચાર્યદેવ શ્રીમદ્‌વિજય**ભદ્રંકરસૂરીશ્વરજી** મહારાજાએ સંપૂર્ણ સટીક ધર્મસંગ્રહનું સુંદર ભાષાંતર કર્યું છે. જે બે ભાગમાં શ્રી સુબાજી રવચંદ જૈનવિદ્યાશાળા તરફથી બે ભાગમાં બહાર પડ્યું છે. એની ઘણી આવૃત્તિઓ પણ થઈ છે. આ સંસ્કરણમાં મોટા ભાગના ઉદ્ધરણો અને તેના સ્થાન વગેરે આપવામાં આવ્યા છે.

પૂજ્ય મુનિરાજ શ્રી **જમ્બૂવિજયજી** મ.સા.એ સટીક યોગશાસ્ત્રનું અનેક પાઠભેદો તુલનાત્મક ટિપ્પણો આપવાપૂર્વક સંપાદન કર્યું છે. આ ગ્રંથો અને આ ઉપરાંત પણ કોડીબંધ ગ્રંથોનો (લગભગ ૫૦-૬૦ જેટલા) અમે આ સંસ્કરણના સંપાદનમાં ઉપયોગ કર્યો છે. તે બધાના સંપાદક-પ્રકાશક વગેરેનો અમે હૃદયપૂર્વક આભાર માનીએ છીએ.

**ગ્રંથકાર–**

ગ્રંથકારશ્રીએ પોતાની ગુરુપરંપરા ગ્રંથને અંતે પ્રશસ્તિમાં આ રીતે આપી છે. આચાર્ય વિજય**હીરસૂરિજી,** આચાર્ય વિજય**સેનસૂરિજી,** આચાર્ય વિજય**તિલકસૂરિજી,** આચાર્ય વિજય**આનન્દસૂરીજી, શાન્તિવિજયજી, માનવિજયજી.** (જુઓ : પ્રશસ્તિ, શ્લોક : ૧થી ૩/૭થી૯)

ગ્રંથકારના સમનામી અન્ય ઘણા ગ્રંથકારો થયા છે. તપાગચ્છમાં પાંચ અને ખરતગચ્છમાં બે **માનવિજયજી** થયાનો ઉલ્લેખ 'જૈન સાહિત્યનો સંક્ષિપ્ત ઇતિહાસ' (પૃ. ૮૬૨)માં છે.

'જૈનગૂર્જરસાહિત્યરત્નો અને તેમની કાવ્યપ્રસાદી' (પૃ. ૧૧૩)માં શ્રી મોહનલાલ દલીચંદ દેસાઈ લખે છે–

''મહોપાધ્યાય શ્રી **માનવિજયજી** (ધર્મસંગ્રહના રચયિતા)નો જન્મ તથા સ્વર્ગારોહણની તિથિ મળતી નથી.'' તેઓ મહાવિદ્વાન હતા. અમદાવાદના પ્રસિદ્ધ આગેવાન શેઠ **શાન્તિદાસ** (ઝવેરી શાન્તિદાસથી ભિન્ન)ની પ્રાર્થનાથી સં. ૧૭૩૧માં તેઓશ્રીએ **'ધર્મસંગ્રહ'** નામનો એક અદ્‌ભુત ગ્રંથ બનાવ્યો. જે ગ્રંથને મહોપાધ્યાય શ્રીમદ્ **યશોવિજયજી**ની પાસે તેઓને શ્રુતકેવલી માનીને શોધાવ્યો હતો.

''તેઓશ્રીની ગુજરાતી ભાષામાં બનાવેલી ચોવીસીની રચના ઘણી સુંદર છે.

''તેઓશ્રીની સાહિત્યરચના નીચે મુજબ છે. (૧) ગજસુકુમારરાસ, (૨) નયવિચાર-રાસ, સં. ૧૭૩૧, (૩) સિદ્ધચક્રસ્તવન, (૪) નવતત્ત્વપ્રકરણ વિવરણ, સં. ૧૭૩૫, (૫) સુમતિકુમતિસ્તવન, સં. ૧૭૨૮, (૬) ગુરુતત્ત્વપ્રકાશ (૭) ધર્મસંગ્રહ, સં. ૧૭૩૧, (૮) ચોવીશી, સં. ૧૭૨૫ આસપાસ.

**ગ્રંથ પરિચય–**

ગ્રંથનું નામકરણ સૂચવે છે તેમ ધર્મ(ચરણ-કરણાનુયોગ)ને લગતી લગભગ સઘળી હકીકતોનો સંગ્રહ આ એક જ ગ્રંથમાં કરવામાં આવ્યો છે.

**શૈલી :** પ્રતિપાદ્ય વિષયનું નિરૂપણ કરતી મૂલ ગાથાઓ સૂત્રાત્મક શૈલીએ સંક્ષેપમાં છે. જ્યારે સ્વોપજ્ઞવૃત્તિમાં એ વિષયનું સર્વાંગીણ વિવેચન કરવામાં આવ્યું છે. ભલે ગમે તેટલું લંબાણ થાય પરંતુ વિષયને સંપૂર્ણતયા આવરવાનો ગ્રંથકાર મહાપુરુષનો આશય સાકાર બન્યો છે. (ઉદાહરણરૂપે : ૬૨મી ગાથાનું વિવેચન ૮૬ પૃષ્ઠોમાં વિસ્તરેલું છે અને એ રીતે, પ્રથમ વિભાગની ૭૧ ગાથાઓનું વિવરણ આઠ હજારથી વધુ શ્લોક પ્રમાણ ટીકારૂપે આપણને મળે છે. પૂરા ગ્રંથનું પ્રમાણ ૧૪૬૦૨ શ્લોક જેટલું છે.)

ગ્રંથકારનું વિપુલ જ્ઞાન પ્રતિપાદ્ય વિષયોનું વિવેચન કરતી વખતે પૂર્વાચાર્ય ભગવંતોના તે તે વિષયના અનેક ગ્રંથો ગ્રંથકારની નજર સામે છે. પોતાના નિરૂપણમાં સ્થળે સ્થળે તે તે ગ્રંથોની સાક્ષીઓ વિપુલ પ્રમાણમાં તેઓશ્રી ટાંકે છે. ઘણી વખત તો પ્રતિપાદ્ય વિષયનું વિવેચન પણ અન્ય ગ્રંથો કે ગ્રંથોની ટીકામાંથી લગભગ અક્ષરશઃ ગ્રંથકાર અવતરિત કરે છે. અને એટલે જ, યોગશાસ્ત્રવૃત્તિ, શ્રાદ્ધવિધિવૃત્તિ અને ધર્મબિંદુવૃત્તિ વગેરે સાથે ધર્મસંગ્રહ ટીકાનું લખાણ પાનાઓનાં પાનાં સુધી અક્ષરશઃ એક સરખું જોવા મળે છે, ક્યારેક પચાસ-સાંઈઠ પાના જેટલું લખાણ નહિવત્ ફેરફાર સાથે સરખું હોય છે. આવા અનેક સ્થળોએ અમે ટિપ્પણમાં તે તે ગ્રંથના સમાન પાઠોની તુલના આપી છે.

બીજું એકાદ ગ્રંથનો આધાર લઈ પ્રતિપાદ્ય વિષયનું વિવેચન કરી ગ્રંથકાર મહર્ષિ સંતોષ ધારણ કરતા નથી. પરંતુ ભિન્ન ભિન્ન અનેક ગ્રંથોમાં તે વિષય પર થયેલી ચર્ચાઓ, મતભેદો વગેરેનો પણ તેઓ ઉલ્લેખ આપતા રહે છે.

આ સાથે, પોતાના સમયમાં ભિન્ન માન્યતા ધરાવનારાઓની સમાલોચના પણ ગ્રંથકારશ્રી અવસરે કરે જ છે અને અકાટ્ય પ્રમાણોથી એમના આચરણને શાસ્ત્રવિરુદ્ધ સાબિત પણ કરે છે.

**ગ્રંથની મહત્તા–**

દે. લા. સંસ્કરણમાં એના સંપાદક પૂ. આ. શ્રી **સાગરાનન્દસૂરિ** મહારાજે (તે વખતે પંન્યાસપદ પર) **ધર્મસંગ્રહ**ની સંસ્કૃત પ્રસ્તાવનામાં લખ્યું છે. આજ સુધીમાં આ સંસ્થા (દે. લા. પુ. ફંડ) તથા અન્ય સંસ્થાઓ દ્વારા પ્રસિદ્ધ થયેલા ગ્રંથોમાં આ ગ્રંથ મહત્ત્વપૂર્ણ

અને મોખરાના સ્થાન પર બિરાજે તેવો છે અને તેથી જ અન્ય મુદ્રણને ગૌણ કરીને આગમ જેવા ઉપયોગી આ ગ્રંથનું મુદ્રણ પ્રસ્તુત સંસ્થાએ કરાવ્યું છે.

**દોહન : કેટલું ગહન !–**

શ્રાવકની દિનચર્યા, આચાર આદિનું નિરૂપણ કરતાં પ્રસ્તુત ગ્રંથના ૧લા અને ૨જા અધિકારમાં યોગશાસ્ત્રવૃત્તિ, શ્રાદ્ધવિધિવૃત્તિ, શ્રાદ્ધદિનકૃત્યવૃત્તિ આદિ ગ્રંથોની છાયા મુખ્યરૂપે દેખાય છે.

મુનિઓના આચાર જોડે સંબંધવાળા ૩જા અને ૪થા અધિકારમાં ઓઘનિર્યુક્તિ, પંચવસ્તુકપ્રકરણ, યતિદિનચર્યા, પ્રવચનસારોદ્ધાર આદિ ગ્રંથોના ઉદ્ધરણો સ્થળે સ્થળે ગ્રંથકાર આપતા રહે છે.

એક તો યોગશાસ્ત્રાદિ ગ્રંથો પોતે જ ગ્રંથદોહન/શાસ્ત્રાર્ક જેવાં, અને તેમાં મહોપાધ્યાયશ્રી **માનવિજયજી** એ અર્કનો પણ અર્ક કાઢે. એક ગ્રંથમાં કેટલું બધું મળી જાય ?

વિસ્તૃત વિષયાનુક્રમ પર નજર નાખવાથી જ તમને **'ધર્મસંગ્રહ'**ની ગાગરમાં ઘૂમરાતો સાગર જોવા મળશે. તે તે ભાગમાં વિસ્તૃત વિષયાનુક્રમ આપવા સાથે ગ્રંથના દરેક પૃષ્ઠ ઉપર તે તે પૃષ્ઠમાં આવતા વિષયનો નિર્દેશ પણ કર્યો છે જ.

**ગ્રંથરચના માટે પ્રેરણા–**

પ્રશસ્તિમાં જણાવ્યા પ્રમાણે અમદાવાદમાં શ્રીમાલી **મનિઆ** નામના દાનેશ્વરી શેઠના પુત્ર **શાન્તિદાસે**[3] જેઓ **જગડૂશા**ની પેઠે દાનવીર હતા-વૃદ્ધાવસ્થામાં ઘરનો ભાર પુત્રને સોંપીને સિદ્ધાન્ત શ્રવણ ધર્મકાર્યોમાં મન પરોવ્યું હતું...તેમની પ્રાર્થનાથી આ ગ્રંથની રચના વિ. સં. ૧૭૩૧માં કરવામાં આવી છે.

આ ગ્રંથનો પ્રથમાદર્શ શ્રી **કાન્તિવિજય** ગણીએ તૈયાર કર્યો છે.

**ઉદ્ધરણો / સાક્ષીપાઠો–**

આગળ કહ્યું તેમ ઉદ્ધરણો અને સાક્ષીપાઠો અહીં ડગલે ને પગલે ટંકાયેલા છે. ગ્રંથકારે નામોલ્લેખપૂર્વક આપેલ ઉદ્ધરણો શતાધિક ગ્રંથોના છે.

ગ્રંથ કે ગ્રંથકારના નામોલ્લેખ વિનાના ઉદ્ધરણોમાંથી સંપાદકને જેમના મૂળસ્થાનો પ્રાપ્ત થયા છે તેનો તેનો નિર્દેશ તે તે પાઠ પછી ચોરસ કૌંસમાં આપ્યો છે. આવા ગ્રંથોની સંખ્યાનો આંકડો પણ મોટો છે.

સંપાદકે તે તે સ્થળની તુલના આદિ માટે જે જે ગ્રંથોનો ઉલ્લેખ કર્યો છે તે સાથે (ગ્રંથકાર દ્વારા ઉદ્ધૃત અને સંપાદક દ્વારા ઉપયુક્ત) ગ્રંથોની સંખ્યા સવા બસોથી પણ વધુ થાય છે.

---

૩. આ શાન્તિદાસ શેઠના વંશજો નરોત્તમ મયાભાઈ, કલ્યાણભાઈ મયાભાઈ આદિનો પરિવાર આજે હાજાપટેલની પોળ, અમદાવાદમાં વસે છે. તેઓ સોમકરણ મનિયાસા તરીકે પ્રસિદ્ધ છે. આ ગ્રંથના સંપાદન માટે તેમના સૌજન્યથી અમને સંવેગી ઉપાશ્રય (હાજાપટેલની પોળ, પગથિયાનો ઉપાશ્રય)ની હસ્તલિખિત પ્રત મળી છે જેની અમે P સંજ્ઞા રાખી છે.

અને આમ છતાં, સેંકડો ઉદ્ધરણો એવા છે, જેના સંદર્ભસ્થળો મેળવી શકાયા નથી. આ બાબત એ વાતનો ખ્યાલ આપી જાય છે કે ગ્રંથકાર કેટલા બહુશ્રુત હતા !

**સંશોધન–**

ધર્મસંગ્રહ પ્રશસ્તિના શ્લોક ૧૦, ૧૧, ૧૨ અને C પ્રતમાં બાજુમાં ઉમેરેલા ૧૩ A શ્લોકમાં સ્પષ્ટ કરવામાં આવ્યું છે કે આ ગ્રંથનું સંશોધન ન્યાયાચાર્ય મહોપાધ્યાય શ્રીમદ્ **યશોવિજયજી** મહારાજ અને મહોપાધ્યાયશ્રી **લાવણ્યવિજયજી**એ કર્યું છે.

**ન્યાયચાર્ય યશોવિજયજી–**

પ્રશસ્તિનો ૧૧મો શ્લોક કહે છે–

''**तर्कप्रमाणनयमुख्यविवेचनेन प्रोद्बोधितदिममुनिश्रुतकेवलित्वा ।**
**चक्रुर्यशोविजयवाचकराजिमुख्याः ग्रन्थेऽत्र मय्युपकृतिं परिशोधनाद्यैः**'' ॥

આ શ્લોકનું છેલ્લું પદ परिशोधनाद्यैः છે તેના ઉપર C પ્રતમાં [૪]અર્થસૂચક = આવી બે લીટીઓ કરી બાજુના હાંસિયામાં किल योजनाद्यैः લખ્યું છે.

પૂજ્ય સાગરજી મહારાજે આ બાજુના લખાણને દે. લા. સંસ્કરણમાં બ્રેકેટમાં મૂક્યું છે અને તેઓએ योजनात् પદ પરથી પ્રસ્તુત ગ્રંથમાં ન્યાયાચાર્યજીએ સંશોધન ઉપરાંત ટિપ્પણરૂપે લખાણ ક્યાંક ક્યાંક જોડ્યું છે એમ અનુમાન કર્યું છે.

ધર્મસંગ્રહ સટીકનું સંપૂર્ણ ભાષાંતર અનેક સાક્ષીપાઠોના સંદર્ભસ્થાન દર્શાવવાપૂર્વક-પૂ. આ.શ્રી વિજય**ભદ્રંકરસૂરિ** મહારાજે બે વોલ્યુમ્સમાં કર્યું છે. ઉપરોક્ત સંસ્કરણમાં તેઓ શ્રી જણાવે છે : આવા [ ] કાટખૂણાવાળું લખાણ પૂ. મહોપાધ્યાય શ્રી**યશોવિજય** ગણિવરનું હોવાની માન્યતા છે. (ભા. ૧, પૃ. ૭)

'ધર્મસંગ્રહની સ્વોપજ્ઞવૃત્તિના સંશોધકો અને ટિપ્પણકાર' નામના લેખમાં **પ્રો. હીરાલાલ ર. કાપડિયા** લખે છે : ''ટિપ્પણકાર ન્યાયાચાર્ય જ છે એમ કહેવા માટે મને કોઈ પ્રબલ પ્રમાણ જેમ મળ્યું નથી તેમ એ ટિપ્પણો અન્યકર્તૃક છે એમ કહેવા માટે પણ કોઈ વિશિષ્ટ પૂરાવો હજુ સુધી મળ્યો નથી.'' (આત્માનન્દપ્રકાશ, વર્ષ ૫૫, અંક ૯) ''ધર્મસંગ્રહની સ્વોપજ્ઞવૃત્તિની હાથપોથીઓ અને તે પણ લિપિકાલના ઉલ્લેખવાળી તપાસાય તો ટિપ્પણકાર કોણ છે તે ઉપર પ્રકાશ પડવા સંભવ છે.'' એમ તેઓ પ્રસ્તુત લેખમાં ઉમેરે છે.

**હસ્તલેખિત પ્રતિઓનો અંતરંગ પરિચય–**

અમે ઉપયોગમાં લીધેલ ત્રણે હસ્તપ્રતો પ્રાચીન છે. રચનાકાળ પછી નજીકના સમયમાં

---

૪. આ પ્રતિમાં અન્યત્ર પણ ક્યાંક ક્યાંક અઘરા શબ્દો પર આવી રેખાઓ કરી બાજુના હાંસિયામાં અર્થ લખેલા જોવા મળે છે. અમે ક્યાંક ક્યાંક આનો નિર્દેશ ટિપ્પણમાં કર્યો છે. જુઓ– ભા. ૧, પૃ. ૨૨૪, ટિ. ૫.

લખાયેલી. આમાં પણ C સંજ્ઞક પ્રત તો પ્રથમાદર્શ જણાય છે. આ પ્રથમાં જે સુધારાઓ/ ચેકચાક થયા છે તે ગ્રંથકારે સ્વયં કર્યા હોય એમ જણાય છે.

ક્યારેક મૂળ ગાથા અને એની ટીકા લખ્યા પછી ગ્રંથકારને મૂળ ગાથાના લખાણને ફેરવવાનો વિચાર આવ્યો હોવાથી એ લખાણ પર પીળો રંગ કરીને ઉપર નવું લખાણ કર્યું હોય છે. એની ટીકામાં ગાથાના પ્રતીકો આપ્યા હોય તે પણ મૂળ ગાથાના પદ બદલ્યા પછી બદલવા પડે તે સ્વાભાવિક છે એટલે તે પ્રતીકો વગેરે રદ કરી નવા પ્રતીકો અને એની વ્યાખ્યા કરી હોવાનું જોવા મળે છે.

કેટલાક સ્થળે C પ્રતના સુધારેલી અને હાંસિયામાં ઉમેરેલા પાઠો P પ્રતમાં સુધારેલા કે સળંગ લખાણમાં લખેલા જોવા મળે છે. તો કેટલાક સ્થળે C ની જેમ જ મૂળપાઠ અને પછી સંશોધિતપાઠ લખેલો જોવા મળે છે. Cમાં બાજુમાં ઉમેરેલો પાઠ Pમાં પણ બાજુમાં ઉમેરેલો જોવા મળે છે. સંશોધનનું કામ કેટલાક વર્ષો સુધી ચાલ્યું હોય અને એ દરમિયાન ગ્રંથની પ્રતિલિપિઓ થતી રહી હોય એમ અનુમાન આ ઉપરથી થાય છે.

L.P. પ્રતોમાં, જિ.આ.ટ્ર.પ્રત ભા.૩, પૃ. ૩૭૪થી ૩૮૨માં છપાયેલ, પ્રસ્તુતસંસ્કરણમાં ભા.૨ પૃ.૭૧૪થી ૭૧૮માં વિહારસ્વરૂપના વર્ણનનો પાઠ છે. C પ્રતમાં એ નથી. પૂજ્ય સાગરજીમહારાજે ઉપયોગમાં લીધેલ C સિવાયની બીજી પ્રતોમાં પણ આ પાઠ છે. એટલે દે. લા. સંસ્કરણમાં આ પાઠ ભા. ૨, પૃ. ૧૪૮ Bથી ૧૫૧ પત્ર ઉપર આપવામાં આવ્યો છે પણ આ પાઠ C પ્રતમાં ન હોવાથી તેમને એ પ્રક્ષિપ્ત લાગ્યો.

બની શકે કે તેમણે વાપરેલ બીજી પ્રતો અર્વાચીન હોય અને તેથી આવું અનુમાન કર્યું હોય, પરંતુ અમે ઉપયોગમાં લીધેલ L અને P પ્રતો (અનુક્રમે વિ.સં. ૧૭૪૪ અને ૧૭૫૫માં લખાયેલ) પ્રાચીન છે. તેમાં આ પાઠ સળંગ લખાણ તરીકે છે એટલે એમ લાગે છે કે પાછળથી પાઠો ઉમેરવાનું કામ લાંબો સમય સુધી ચાલ્યું હશે અને એ વખતે ગ્રંથકાર કે સંશોધક પાસે જે પ્રત હાજર હશે તેમાં ઉમેરો કર્યો હશે.[૫] તેથી કેટલાક ઉમેરા L.P.માં છે અને Cમાં નથી. ભા. ૧, પૃ. ૩૮૧માં પણ C કરતાં L.P.માં વધુ પાઠ હોવાનું જોવા મળે છે.

**ન્યાયાચાર્યજીના ટિપ્પણ–**

દે. લા. સંસ્કરણમાં એના સંપાદકશ્રીએ ન્યાયાચાર્યજીનું ઉમેરણ સમજીને જે જે પાઠો ચોરસ કૌંસમાં આપ્યા છે. તેનું અમે મહ્દ અંશે અનુકરણ કર્યું છે. જ્યાં નથી કર્યું ત્યાં પણ પ્રાયઃ ટિપ્પણમાં નિર્દેશ આપ્યો છે.

---

૫. અમે ઉપયોગમાં લીધેલી પ્રતોમાં L પ્રત અમે પાઠભેદો નોંધીને લા.દ. વિદ્યામન્દિરને પરત કરી હતી એનું ઝીણવટથી નિરીક્ષણ કરી શકાયું નથી C અને P પ્રતો લાંબા સમય સુધી અમારી પાસે રહેલ છે.

આ બધા કૌંસના પાઠો ગ્રંથના કયા કયા પૃષ્ઠ ઉપર છે, તે પાઠો કઈ કઈ હસ્તલિખિતપ્રતોમાં હાંસિયામાં છે તે અને આ પાઠો પાછળથી ઉમેરેલા છે કે લેખકના પ્રમાદથી છૂટી ગયા છે વગેરે બાબતો અમે પરિશિષ્ટમાં [પ્રસ્તુત સંસ્કરણમાં પરિશિષ્ટ-૧૦માં] જણાવી છે. જિજ્ઞાસુઓએ ત્યાં જોઈ લેવું.

**મહોપાધ્યાય લાવણ્યવિજયજી–**

C સંજ્ઞક પ્રતિમાં પ્રશસ્તિના ૧૨મા શ્લોક પછી ઉમેરવા માટેનું પદચિહ્ન (ઘોડી) કરીને બાજુમાં એક શ્લોક આ રીતે ઉમેરેલો જોવા મળ્યો :

''**सिद्धान्तव्याकरणच्छन्दः काव्यादिशास्त्रनिष्णातैः ।**
**लावण्यविजयवाचकशक्रैः समशोधि शास्त्रमिदम्**'' ॥

આ શ્લોક અમે ઉપયોગમાં લીધેલ L.P. પ્રતમાં નથી. C પ્રતમાં પણ પાછળથી આ ગાથા લખવામાં આવી છે એટલે એમ લાગે છે કે C પ્રત લખાઈ ગયા પછી થોડાક સમય બાદ વાચક **લાવણ્યવિજયજી**ને આ પ્રત સુધારવા માટે અપાઈ હશે અને કૃતજ્ઞતા દર્શાવવા ગ્રંથકારે એમના સંશોધન કાર્યનો નિર્દેશ કર્યો હશે. આ દરમિયાન પ્રતિલિપિ કરવાનું કામ થયું હશે, જેથી L.P. પ્રતમાં આ શ્લોક ન આવ્યો.

પ્રશસ્તિના ૧૨મા અને ત્યારપછી C પ્રતમાં ઉમેરાયેલા ૧૩ A શ્લોક પરથી અનુમાન થાય કે, ન્યાયાચાર્ય મહોપાધ્યાય શ્રીમદ્ **યશોવિજયજી**એ સામાચારીના દુર્ગમ વિષયમાં સૂચન, માર્ગદર્શન, સંશોધન દ્વારા સહાય કરી છે અને ઉપાધ્યાયશ્રી **લાવણ્યવિજયજી**એ વ્યાકરણ, છંદ વગેરેની દૃષ્ટિએ ગ્રંથનું સંશોધન કર્યું છે.

વિ.સં. ૧૭૪૪માં દ્રવ્યસપ્તતિકા સટીકની રચનાકાર પંન્યાસ **ભાનુવિજયજી**ના શિષ્ય મહોપાધ્યાય **લાવણ્યવિજયજી ધર્મસંગ્રહ**ના સંશોધક હોવાની પ્રબળ સંભાવના છે. એમણે વિ.સં. ૧૭૨૮માં ચોવીસીની પણ રચના કરી છે.

**પૂજ્યપાદ આચાર્યદેવશ્રીમદ્વિજય**
**ભદ્રસૂરીશ્વરજી મહારાજના**
**શિષ્યરત્ન પૂજ્યમુનિરાજ**
**શ્રીજિનચંદ્રવિજય**
**શિષ્યાણુ મુનિ**
**મુનિચન્દ્રવિજય**

●●●

# સંપાદકીય[1]

જગતના સંસ્કારજીવનને ઉજાસ આપનાર જો કોઈ પ્રકાશ હોય તો તે જ્ઞાનપ્રકાશ છે. અસંખ્ય સૂર્યના કે દીવાબત્તીના પ્રકાશો કરતાંય જ્ઞાનપ્રકાશના એક કિરણનું મહત્ત્વ અતિ ઘણું વધી જાય છે. સૂર્યનો કે દીવાબત્તીનો પ્રકાશ રાત્રિના અંધારાને ભલે દૂર કરી શકે, પરંતુ આત્મામાં ભરેલા અજ્ઞાનઅંધારાને તો જ્ઞાનપ્રકાશ જ ઉલેચી શકે, કે જે વિના આદરેલી અનંતની-મોક્ષની મુસાફરી કોઈ પણ પ્રાણીથી પૂરી થઈ શકતી જ નથી. ધન્ય છે તે અનંતજ્ઞાની મહાપુરુષોને, કે જેઓશ્રી તીર્થંકરો તરીકે આ પૃથ્વી ઉપર અવતર્યા હતા. તેઓશ્રીએ આ જગતનાં ભાવ દારિદ્રોને નિવારવા કાજે જ જ્ઞાનનાં અમૂલ્ય દાન કરેલાં છે. આ શ્રી **'ધર્મસંગ્રહ'** ગ્રંથ તેનો જ એક અંશ છે.

**ગ્રંથકર્તા[2]–**

ઉપાધ્યાય શ્રી**માનવિજય** ગણિવર આ ગ્રંથરત્નના રચયિતા છે. પૂજ્યપાદ તપાગચ્છીય, વિશ્વવિશ્રુત, અકબરબાદશાહ પ્રતિબોધક જગદ્ગુરુ શ્રી**હીરસૂરીશ્વરજી**મહારાજસાહેબની પાટે બાદશાહ અકબરે આપેલ 'સવાઈહીરલા'નું બિરૂદ ધારણ કરનારા પૂ. આચાર્ય શ્રીવિજય**સેન**-

---

૧. સંપાદકીય આ લખાણમાં **ધર્મસંગ્રહ ભાગ-૧** ભાષાંતરમાં આપેલ **'ઉદ્બોધન'**માંથી કેટલુંક લખાણ સાભાર ઉદ્ધૃત કરીને લીધેલ છે.

૨. સં. ૧૭૩૧માં ત. **વિજયાનંદસૂરિ-શાંતિવિજય**શિ.**માનવિજયે** અમદાવાદમાં ત્યાંના એક પ્રસિદ્ધ આગેવાન **શાંતિદાસ** (પ્રસિદ્ધ ઓસવાળ ઝવેરી શાંતિદાસથી ભિન્ન)ની પ્રાર્થનાથી વૃત્તિ સહિત ત્રણ અધિકારમાં ધર્મસંગ્રહ નામનો મોટો ગ્રંથ સંસ્કૃતમાં રચ્યો તેમાં શ્રાવક અને સાધુધર્મ સંબંધી ઘણી બાબતોનો સંગ્રહ કરવામાં આવ્યો છે. [થોડો ભાગ ગૂ. ભા.સા.પ્ર. જૈનવિદ્યાપ્રસાકર વર્ગ] [આ. ભદ્રંકરસૂરિ મ.ના સંપૂર્ણ ગુ.અનુ. સાથે બે ભાગમાં પ્ર. જૈન વિદ્યાશાળા] મૂળ આખો ગ્રંથ બે ભાગમાં પ્ર.દે.લા. નં. ૨૯ અને ૪૫ [જિ.આ.ટ્ર.દ્વારા ત્રણ ભાગમાં સં. મુનિચંદ્રવિ.] આ ગ્રંથનું સંશોધન શ્રી**યશોવિજય** ઉપાધ્યાયે કર્યું ને તેનો પ્રથમાદર્શ **કાંતિવિજય**ગણિએ લખ્યો. ઉક્ત શાંતિદાસના પિતા શ્રીમાલી વણિક નામે મતિઆ હતા કે જેમણે હંમેશા ગૃહને દાનશાલા બનાવી તીર્થરાજ આદિની યાત્રા કરી સાતે ક્ષેત્રમાં વિત્ત વાપર્યું હતું અને આ શાંતિદાસ પોતે પણ ઉદાર હતા અને તેમણે ગૂજરાતમાં પડેલા દુકાળમાં રંકોને અન્ન, વસ્ત્ર, ઔષધ આપી જગડુશા જેવી ખ્યાતિ મેળવી હતી, વળી સાધર્મિકોમાં બહુ દાન કરી છેવટે પુત્રને પોતાનાં ઘરને કારભાર સૌપી નિવૃત્ત થઈને સિદ્ધાંત શ્રવણાદિ ધર્મ કરવામાં પ્રવૃત્ત થયા હતાં, તે સમયે આ ગ્રંથ રચવાની પ્રાર્થના કરી હતી. [જૈ.સા.સં.ઈ.નવી આવૃત્તિ પેરા ૯૬૩ પૃ. ૪૩૧]

**સૂરિજી**મહારાજસાહેબ થયા. તેઓની પાટે એક આચાર્ય પૂ.આચાર્યશ્રીવિજય**દેવસૂરિજી**-મહારાજસાહેબ થયા અને બીજા આચાર્ય પૂ. આચાર્યશ્રીવિજય**તિલકસૂરિજી**મહારાજસાહેબ થયા. આ આચાર્ય શ્રીવિજય**તિલકસૂરિજી**મહારાજસાહેબની પાટે પૂ. આચાર્યશ્રી વિજય**આનંદ-સૂરીજી**મહારાજસાહેબ થયા અને તેઓના એક શિષ્ય પંડિત શ્રી**શાંતિવિજયજી**ગણિવર થયા. તેમના શિષ્ય તે પ્રસ્તુત મૂલ ગ્રંથના કર્તા મહામહોપાધ્યાય શ્રી**માનવિજયજી**ગણિવર થયા.[૩]

**રચના સમય–**

પ્રશસ્તિના શ્લોક-૧૩માં આ ગ્રંથ તેઓશ્રીએ વિ.સં. ૧૭૩૧ના વૈશાખ સુદ-૩-અક્ષયતૃતીયાના દિને રચ્યો છે એમ સ્પષ્ટ જણાવેલું છે.[૪] આ ઉપરથી તેઓશ્રીના સમયનું

---

૩. श्रीमद्वीरजिनेन्द्रपट्टपदवीसीमन्तिनीमण्डनं,
प्रख्यावानजनिष्ट **हीरविजयः** सूरिः सतामग्रणीः ।
ये**नाकब्बर**राट् प्रबोध्य विहितो दुष्कर्मकर्त्ताऽप्यहो;
धर्मोक्त्या त्रिदिवस्य **केशिगणिने**वार्हः **प्रदेशी** नृपः ॥१॥

अमलमलमकार्षीत् सद्गुरोस्तस्य पट्टं, विजयि**विजयसेनः** सूरिरुग्रप्रतापः ।
महति सदसि शाहेर्वादिनो निष्प्रतापान् , रविरिव निजगोभिस्तारकान् यश्चकार ॥२॥

**विजयतिलकसूरि**र्भूरिसूरिप्रकृष्टो, दिनमणिरुदयाद्रौ तस्य पट्टे बभूव ।
कुमततिमिरमुग्रं प्रास्य शुद्धोपदेशप्रसृमरकिरणैर्यो बूबुधद् भव्यपद्मान् ॥३॥

तदीये पट्टेऽभूद् विजयि**विजयानन्द**सुगुरुर्यशस्वी तेजस्वी मधुरवचनः सौम्यवदनः ।
कषायैर्निर्मुक्तः प्रशमगुणयुक्तः सुविहितस्तपागच्छाधीशः सकलवसुधाधीशमहितः ॥४॥

जयति **विजयराजः** सूरिरेतस्य पट्टे, सकलगुणगरिष्ठः शिष्टलोकैः प्रशस्यः ।
प्रथितपृथुजयश्रीरुग्रपुण्यप्रभावः, कलितसकलशास्त्रः प्रास्तमिथ्यात्वजालः ॥५॥

तदनुपट्टपतिर्विहितोऽधुना **विजयराज**तपागणभूभुजा ।
**विजयमान** इति प्रथिताह्वयो विजयतेऽतुलभाग्यनिधिः सुधीः ॥६॥

इतश्च **विजयानन्द**सूरीणां, विनेया विनयान्विताः ।
श्री**शान्तिविजया**ह्वानाः, शोभन्ते पण्डितोत्तमाः ॥७॥

आजन्मादपि शीलसत्यमृदुताक्षान्त्यार्जवाद्या गुणा,
भूयांसो गुरुभक्तता च विपुला येषु प्रकृष्टा भृशम् ।
प्रोत्साहाय गुणार्थिनां स्वगुरुभिर्व्यक्तीकृता भूतले;
सर्वत्राखिलगच्छकार्यविनियोगेन प्रसन्नात्मभिः ॥८॥

तेषां विनेय उदितादरतो विवव्रे, ग्रन्थं च **मानविजया**भिधवाचकोऽमुम् ।
क्षुण्णं यदत्र मतिमन्दतया भवेत् तन्मेधाविभिर्मयि कृपां प्रणिधाय शोध्यम् ॥९॥

૪. वर्षे पृथ्वीगुण**मुनिचन्द्र** १७३१ प्रमिते च माधवे मासे ।
शुद्धतृतीयादिवसे यत्नः सफलोऽयमजनिष्ट ॥१३॥

ઐતિહ્ય પ્રમાણ પણ સત્તરમા સૈકાના ઉત્તરાર્ધથી માંડી અઢારમા સૈકાના પૂર્વાર્ધ સુધીમાં હોવાનું નિઃશંક પ્રતીત થાય છે. તેઓશ્રીની વ્યાખ્યાન છટા ખૂબ રસભરપૂર હતી. મહાન્ જ્યોતિર્ધર ઉપાધ્યાયજી શ્રી**યશોવિજયજી** ગણિવર પણ તેઓનાં વ્યાખ્યાનો પ્રત્યે આકર્ષાયાં હોવાનું કેટલીક કિંવદંતીઓ આપણને કહી જાય છે. ઉપાધ્યાયજી શ્રી**યશોવિજયજી**મહારાજની દીક્ષા વિ.સં. ૧૬૮૮ અને સ્વર્ગવાસ વિ.સં. ૧૭૪૩ના છે. તેઓશ્રીએ પ્રસ્તુત ગ્રંથનું સંશોધનાદિ કાર્ય પણ કરેલું છે. મતલબ કે-આ બંને મહાત્માઓ સમકાલીન હતા એટલું જ નહિ પણ ઉપાધ્યાયજી શ્રી**વિનયવિજયજી**ગણી તથા ઉપાધ્યાય શ્રી**મેઘવિજયજી**ગણી આદિ મહાપુરુષો પણ તેઓશ્રીના સમકાલીન હતા.

**ગ્રંથના સંશોધકો–**

આ ગ્રંથમાં સ્થળે સ્થળે પૂ.વાચકવર શ્રી**યશોવિજયજી**મહારાજે કરેલાં ઉપયોગી ટીપ્પણો જે [ ] આવા બ્રેકેટમાં લીધેલાં છે. તે ઉપરથી સમજી શકાશે કે આ ગ્રંથમાં તેઓશ્રીનો કેટલો બધા કિંમતી ફાળો છે. ખુદ ગ્રંથકાર મહાત્મા પ્રશસ્તિના ૧૧-૧૨માં શ્લોકોમાં આ હકીકતની ખૂબ કૃતજ્ઞતાપૂર્વક નોંધ લેતાં જણાવે છે કે–''જેમણે તર્ક, પ્રમાણ અને નયપ્રમુખ ગહન વિચારોનાં પણ સમર્થ વિવેચનો કરીને શ્રીશ્રુતકેવલી આદિ પૂર્વ મુનિમહારાજોને યાદ કરાવ્યા છે, તે વાચકરાજ શ્રી**યશોવિજયજી**મહારાજે મારા ઉપર ઉપકાર કરી આ ગ્રંથનું પરિશોધન આદિ કરેલું છે.(૧૧)[૫] ''આ ગ્રંથમાં અતિ દુર્ગમ એવી પણ સાધુ અને શ્રાવક આદિને લગતી વિવિધ પ્રકારની સામાચારીઓનું આલેખન કરવામાં બાલકના જેવી મંદગતિવાળો પણ હું જે ગતિમાન-શક્તિમાન થઈ શક્યો છું, તે તેમના હસ્તાવલંબન-ટેકાને જે આભારી છે. (૧૨)''[૬] આ ઉપરાંત વાચક શ્રી**લાવણ્યવિજયજી**મહારાજે પણ આ ગ્રંથનું સંશોધન કર્યું છે. તેનો ઉલ્લેખ પ્રશસ્તિના ૧૩Aમા શ્લોકમાં ગ્રંથકારશ્રીએ કર્યો છે.[૭]

**ગ્રંથનિર્માણ શાથી થયું ?**

આપણે જોયું કે–પ્રૌઢ સાહિત્યસ્વામીઓ સાહિત્યના રસથાળ જેમ સ્વયં સ્ફુરણાથી જનતાના ઉપકાર અર્થે પીરસે છે, તેમ ક્યારેક સ્વશિષ્યાદિની વિનંતિ વગેરે પ્રેરણા પામીને પણ તેઓ ગ્રંથ નિર્માણ કરે છે. પ્રસ્તુત ગ્રંથનિર્માણ પણ ગ્રંથકારમહર્ષિ જેઓશ્રીની પ્રાર્થનાથી પ્રયત્નશીલ બન્યા, તેઓ હતા અમદાવાદનગરના હાજાપટેલની પોળમાં રહેતા

---

૫. तर्कप्रमाणनयमुख्यविवेचनेन प्रोद्बोधितादिममुनिश्रुतकेवलित्वाः ।
चक्रुर्**यशोविजय**वाचकराजिमुख्या, ग्रन्थेऽत्रमय्युपकृतिं परिशोधनाद्यैः ॥११॥

૬. बाल इव मन्दगतिरपि सामाचारीविचारदुर्गम्ये ।
अत्राभूवं गतिमांस्तेषां हस्तावलम्बेन ॥१२॥

૭. [सिद्धान्तव्याकरणच्छन्दःकाव्यादिशास्त्रनिष्णातैः ।
**लावण्यविजय**वाचकशक्रैः समशोधि शास्त्रमिदम् ॥१३A॥]

વીશ શ્રીમાળી જ્ઞાતિના શેઠ **આણંદજીકલ્યાણજી**ની પેઢીના પ્રતિનિધિ સુપ્રસિદ્ધ ધર્મનિષ્ઠ શેઠ **મયાભાઈ સાંકળચંદ**ના પૂર્વજ શેઠ શ્રી**શાન્તિદાસ.** તેઓ **મતિઆ** શેઠના પુત્ર હતા.[૮] આ પિતા-પુત્ર કેવા ધર્મિષ્ઠ, ઉદાર, શાસનસેવી, તત્ત્વવિલાસી મહાનુભાવો હતા તેની પણ પ્રશસ્તિ ગ્રંથકારશ્રીએ શ્લોક ૧૪-૧૫-૧૬-૧૭માં બરાબર ગાયેલી છે.[૯]

**પ્રથમાદર્શના લખનાર–**

જ્ઞાન, દર્શન, ચારિત્ર અને તપને સાધે તે સાધુ, જ્ઞાનાદિ ગુણોની આરાધના માટે જેમ શ્રમણો ગ્રંથરચના વગેરે કરતા હતા, તેમ રચાયેલા ગ્રંથની પ્રથમ શુદ્ધ નકલ લખવાનું કાર્ય પણ તેઓ કરતા હતા અને તે પણ એક મોટું માનપ્રદ-યાદગાર સેવાના કાર્ય તરીકે ગણાતું હતું. તેમનો 'પ્રથમાદર્શ'ના લેખક તરીકે ઉલ્લેખ કરાતો હતો. મોટો ભાગે આ સુયશના ભાગીદાર ગ્રંથરચયિતાના શિષ્ય અથવા નિકટવર્તી ભક્તજન બનતા હતા. આ શ્રી**ધર્મસંગ્રહ**ગ્રંથના પ્રથમાદર્શના લેખક મુનિ શ્રી**કાંતિવિજયજી**ગણિવર હતા, જેઓ ગ્રંથકાર મહાત્માના શિષ્ય હોવાનો પૂરો સંભવ છે. ગ્રંથકારશ્રીએ આ હકીકતની નોંધ પ્રશસ્તિના ૧૮મા શ્લોકમાં કરી છે.[૧૦]

**ગ્રંથમાં કહેવાયેલી વસ્તુ–**

ગ્રંથકાર મહર્ષિએ વિષયપ્રતિપાદનની સરળતા માટે પ્રસ્તુત ગ્રંથને ચાર વિભાગોમાં વહેંચી નાખેલ છે. પહેલા વિભાગમાં ગૃહસ્થનો સામાન્યધર્મ કહેવામાં આવ્યો છે. બીજા વિભાગમાં ગૃહસ્થનો વિશેષધર્મ કહેવામાં આવ્યો છે. ત્રીજા વિભાગમાં સાપેક્ષ યતિધર્મ

---

૮. किञ्च समग्रदेशोत्तमगुर्जरेषु, **अहम्मदाबाद**पुरे प्रधाने ।
श्रीवंशजन्मा **मनिआ**भिधानो, वणिग्वरोऽभूच्छुभकर्मकर्त्ता ॥१४॥

૯. नित्यं गेहे दानशाला विशाला, तीर्थोन्नत्या तीर्थराजादियात्रा ।
सप्तक्षेत्र्यां वित्तवापश्च यस्य, स्तोतुं प्रायो ह्यस्मदाद्यैरशक्यः ॥१५॥

साधुः श्री**शान्तिदासः** प्रवरगुणनिधिस्तत्सुतोऽभूदुदारो,
धात्र्यां विख्यातनामा **जगडु**समधिकाऽनेकसत्कृत्यकृत्या(कर्त्ता) ।
रङ्कानामन्नवस्त्रौषधसुवितरणाद् येन दुष्कालनाम,
प्रध्वस्तं शस्तभूता बहुविधिमहिता ज्ञातिसाधर्मिकाश्च ॥१६॥

पुत्रन्यस्तसमस्तगेहकरणीयस्य स्फुटं वार्द्धके,
सिद्धान्तश्रवणादिधर्मकरणे बद्धस्पृहस्यानिशम् ।
सद्धर्मद्वयसंविधानरचनाशुश्रूषणोत्कण्ठिनस्तस्य;
प्रार्थनयाऽस्य गुम्फनविधौ जातः प्रयत्नो मम ॥१७॥

૧૦. ज्ञानाराधनमतिना, विनयादिगुणान्वितेन वृत्तिरियम् ।
प्रथमादर्शे लिखिता, गणिना **कान्त्यादिविजयेन** ॥१८॥

કહેવામાં આવ્યો છે અને ચોથા વિભાગમાં નિરપેક્ષ યતિધર્મ કહેવામાં આવ્યો છે. પ્રાણીમાત્રને સુખની અભિલાષા સ્વાભાવિક રહેલી છે, પણ તેને અનાદિકાલીન જન્મ-મરણાદિ ફળ આપનારા કર્મરોગનો એવો તો પક્ષાઘાત લાગુ પડેલો છે કે—અભિલાષા સુખ મેળવવાની હોવા છતાં મેળવે છે દુઃખ જ. બેભાન, બીમાર અને મદોન્મત્ત મનુષ્યની ચેષ્ટાઓ જગતમાં જેવી જણાય છે, તેવી ચેષ્ટાઓ કર્મના રોગથી ઘેરાયેલા સંસારી આત્માઓની હોય છે. રોગને મીટાવવાની એક જે રામબાણ દવા છે, તેનું જ નામ ધર્મ છે. અનેક વસ્તુઓના સ્વભાવગત અનેક ધર્મો હોય છે, તેનું પરિશોધન કરીને આપણે તો ચેતન આત્માના સ્વભાવગત ધર્મને જ્યારે આચરતા થઈશું, ત્યારે જ મુક્તાત્માઓના આંશિક સુખને ચાખી શકીશું. આ ગ્રંથમાં એવા ધર્મનું શુદ્ધસ્વરૂપ અને તને હાંસલ કરવાના ક્રમિક ઉપાયો-આ તમામનું ગ્રંથકારશ્રીએ ખૂબ વિસ્તારથી પ્રતિપાદન કર્યું છે.

**સામાન્ય ધર્મ—**

પહેલા વિભાગમાં ગૃહસ્થે 'ન્યાયથી ધન ઉપાર્જન કરવું' વગેરે પાંત્રીશ નિયમોનું વર્ણન કરવામાં આવ્યું છે. દાર્શનિક કિંવા આર્ય-અનાર્ય દૃષ્ટિએ પણ આ વાત માનવમાત્રના હિતની છે. એમ સૌ કોઈને કબૂલ કરવું પડે તેમ છે અને એથી જ એ સૌને માટે આદર કરી શકાય તેવો માનવતાના પાયાનો ધર્મ હોવાથી, તેને 'ગૃહસ્થના સામાન્યધર્મ' તરીકે ઓળખાવવામાં આવ્યો છે.

**વિશેષધર્મ—**

બીજા વિભાગમાં ગૃહસ્થનો વિશેષધર્મ બતાવવામાં આવ્યો છે. એકડિયા અને બાળપોથી ભણતાં બાળકે જેમ પહેલા ધોરણ વગેરેમાં ક્રમે ક્રમે આગળ વધવાનું છે, તેમ સર્વોદયની પરાકાષ્ઠાને સિદ્ધ કરવા માટે ગૃહસ્થે સામાન્યધર્મરૂપી બીજસેવનમાંથી વિશેષધર્મરૂપી વિકાસક્રમમાં આગળ વધવું જોઈએ. આથી જ હવે ગૃહસ્થે પ્રથમ પોતાની શ્રદ્ધાવૃત્તિનો ઝોક જે અસત્ય, અસ્થિરતા, અસંદિગ્ધતા, અણસમજ અને કદાગ્રહ આદિ કચરા તરફ વળેલો હતો, તેને સત્ય, સ્થિરતા, નિશ્ચય, સમજ અને સદાગ્રહ આદિ તરફ વાળવો રહ્યો. આ રીતિએ શ્રીવીતરાગ આદિની પ્રતીતિ કરીને તેઓશ્રીની પૂજા-ભક્તિપૂર્વક 'સ્થૂલથી હિંસાત્યાગ' આદિ વિશેષ વ્રતોનું પરિશીલન પણ કરવું રહ્યું. આનું નામ છે 'ગૃહસ્થનો વિશેષ ધર્મ.' આ વિભાગમાં ગ્રંથકાર મહારાજે યોગદૃષ્ટિઓનું, શ્રાવકના સમ્યક્ત્વમૂલક બાર વ્રતોનું, તેમાં ન લગાડવા જોઈતા અતિચારોનું, ગૃહસ્થે નિત્ય કરવા લાયક શ્રીજિનપૂજા આદિનું, દેવવંદન-પ્રતિક્રમણાદિ નિત્ય ક્રિયાના સૂત્રોનું તથા તેના અર્થોનું, ભક્ષ્યાભક્ષ્યનું, દેવદ્રવ્યાદિ દાન વ્યવસ્થાનું, ગુરુવંદનનું, સાંજ-સવારના પચ્ચક્ખાણોનું, પર્વ-વાર્ષિક તથા જન્માદિ કૃત્યો વગેરેનું ખૂબ ઝીણવટથી વર્ણન કરેલું છે.

**જગત્શાંતિનો ઉપાય–**

આજે જગતમાં અશાંતિનો મોટો હુતાશન સળગી રહ્યો છે, તેનું કારણ છે મનુષ્યોની ભૌતિક લાલસા અને તદર્થે જીવાતું સ્વૈરજીવન. આ ગ્રંથમાં ઉપર્યુક્ત વિશેષધર્મનું જે પ્રતિપાદન કરવામાં આવ્યું છે, તે મુજબ જૈન અને જૈનેતર ગૃહસ્થો સ્વજીવન જીવવાનો જો નિશ્ચય કરે, તો જગતમાં આજે શાંતિનું સ્વર્ગ ઉતરી શકે તેવું છે. વર્તમાનયુગનો આ જ ખરો નાગરિકધર્મ સમજવો જોઈએ. તે જ્યારે સમજાશે, ત્યારે જ સ્વ અને પરને વિનાશની ગર્તામાં ફેંકી દેનારી હિંસા અને પરિગ્રહવાદની પાછળ આજે જે આંધળી દોટ મૂકાઈ છે તેનો અંત આવશે.

**યતિધર્મ–**

યતિધર્મ બે પ્રકારનો છે. એક સાપેક્ષ એટલે સ્થવિરકલ્પી કે જે ગચ્છની મર્યાદામાં વર્તનારો હોય, બીજો નિરપેક્ષ એટલે જિનકલ્પી આદિ, કે જેને ગચ્છ આદિ કશાની અપેક્ષા ન હોવાથી યોગ્યતા પ્રાપ્ત કરીને કેવળ ઉત્સર્ગ માર્ગે વર્તનારો હોય. જીવનપર્યંત સંસારના સર્વ આરંભ, પરિગ્રહ, સ્ત્રીસંગ વગેરેનો ત્યાગ કરીને સર્વથી અહિંસા આદિ મહાવ્રતો અંગીકાર કરવાં, તેનું નામ યતિધર્મ કિંવા સાધુધર્મ છે. એનું બીજું નામ 'સંન્યાસયોગ' પણ છે. એના જેવું ભૂતોપકારક, શાંત, દાંત અને અવશ્ય ગ્રાહ્ય બીજું એક પણ ઉત્તમ જીવન નથી. જેઓ આ જીવન સ્વીકારી કર્મ સામે સંગ્રામ માંડે છે અને તેને છેલ્લી લપડાક મારી હત-પ્રહત કરી નાખે છે, તેઓને આ સંસારના જન્મોજન્મના અતિ કટુ પરાભવો ભોગવવા પડતા નથી, મૂળ ગ્રંથના ત્રીજા અને ચોથા વિભાગોમાં ગ્રંથકારશ્રીએ છેવટના સારભૂત સુરાસુરાદિ વંદ્ય એવા આ યતિધર્મનું પ્રાયશ્ચિત્તાદિ સમગ્રવિધિ સાથે વર્ણન કરેલું છે.

**ગ્રંથનું કલેવર–**

આ શ્રી **ધર્મસંગ્રહ** ગ્રંથનો શબ્દદેહ મૂલ અને ટીકા ઉભયાત્મક છે અને તે ઉભયના રચયિતા ઉપાધ્યાયજી શ્રી**માનવિજયજી**ગણિવર છે, તેથી આ ગ્રંથ સ્વોપજ્ઞવૃત્તિયુત શ્રી**ધર્મસંગ્રહ**ના નામે જે ઓળખાય છે તે યથાર્થ છે. આ ગ્રંથનું મૂલ સંસ્કૃત પદ્યમાં છે અને ટીકા સંસ્કૃત ગદ્યમાં છે. મૂલની એકંદર ગાથાઓ ૧૫૯ છે, કે જેમાં પહેલા અને બીજા અધિકારને આવરી લેતી ગાથાઓ ૭૦ છે. અને ત્રીજા અને ચોથા અધિકારને આવરી લેતી ગાથાઓ ૭૧થી ૧૫૯ છે. ભાષા સંસ્કૃત છતાં રોચક, સરળ અને પ્રસન્ન છે.

**શ્લોક પ્રમાણ–**

આખા ગ્રંથનું સૂત્ર તેમજ વૃત્તિસહિત અનુષ્ટુભ્માં ગણાતું શ્લોકપ્રમાણ ગ્રંથને અંતે ૧૪૬૦૨ આપેલું છે. ગ્રંથનો પહેલો ભાગ કે જેમાં ગૃહસ્થના સામાન્ય અને વિશેષ ધર્મસ્વરૂપ બે અવાંતર વિભાગો છે. તેનું એકંદર શ્લોકપ્રમાણ તે ભાગની વૃત્તિને અંતે

૯૪૨૩નું લખેલું છે. આથી સમજી શકાશે કે–ગૃહસ્થધર્મને આશ્રીને ઉત્તરવિભાગ કરતાં મૂલ ગાથાનું પ્રમાણ ઓછું રાખવા છતાં, ટીકાગ્રંથનું પ્રમાણ ગ્રંથકારશ્રીએ દ્વિગુણથી પણ અધિક એવું ખાસું વિસ્તૃત બનાવેલું છે.

**વિષયનિરૂપણ–**

આ ગ્રંથનું વિષયનિરૂપણ સ્વરૂપોદર્શક છે, તે પોતાની સાથે વાચકોને ઘણી ઘણી બાબતોની માહિતી અને ઉપદેશ આપતું જાય છે. તે ક્યાંય પણ અલ્પોક્તિ કે અધિકોક્તિ કરતું નથી. તેનું ધ્યેય આગમ, પંચાંગી અને તદનુસારી પૂર્વાચાર્યોની શાસ્ત્રવાણીથી સિદ્ધ થતી સુવિશુદ્ધ સામાચારી કિંવા પરંપરામાર્ગનું પ્રતિપાદન કરવાનું છે. કપડું સીવનારા એક કારીગર દરજીને જેમ કપડું કાપ્યા વિના સીવી શકાતું નથી, તેમ ગ્રંથકારશ્રી આ ગ્રંથમાં ક્યાંક શંકા-સમાધાન કરતાં તો ક્યાંક ચર્ચા કરતાં, ક્યાંક સત્યપક્ષનું સ્થાપન કરતાં તો ક્યાંક પરવાદીઓની અપ્રામાણિક માન્યતાઓનું ખંડન કરતાં સારી રીતિએ જોવાય છે. આ પ્રમાણે યાવત્ પરમ આપ્તપુરુષોની વચનમર્યાદામાં રહેલું તેઓશ્રીનું વિષયનિરૂપણ અસ્ખલિત પ્રવાહસ્વરૂપે વહેતું રહી પોતાના ધ્યેયસાગરમાં વિલીન થઈ જાય છે.

**ગ્રંથકારશ્રીનો બોધ–**

આ ગ્રંથનું અવલોકન કરતાં એ સહજમાં માલુમ પડી જાય છે કે–ગ્રંથકારશ્રીનો બોધ ઘણો વિશાળ હતો. વ્યાકરણ, તર્ક, સાહિત્ય, પ્રકરણ આદિ દરેક વિષયના તલસ્પર્શી બોધ ઉપરાંત તેમના ઊંડા દાર્શનિક જ્ઞાનનો આ ગ્રંથમાં ધોધ વહી રહ્યો છે, એમ કહીએ તો તે જરાય ખોટું નથી. ગ્રંથકારમહારાજે, એકલે હાથે આ એક જ ગ્રંથમાં શ્રીઆચારાંગ આદિ અંગસૂત્રો, ઉવવાઈ, રાયપસેણી આદિ ઉપાંગસૂત્રો, નિશીથ, બૃહત્કલ્પાદિ છેદસૂત્રો, પયન્નાસૂત્રો, આવશ્યકાદિમૂલસૂત્રો, તથા નંદ્યાદિસૂત્રો ઉપરાંત શ્રીધર્મબિંદુ, ષોડશક, અષ્ટકપ્રકરણ, યોગદૃષ્ટિસમુચ્ચય, યોગબિંદુ, પંચાશકજી, ઉપદેશપદ, લલિતવિસ્તરા, પંચવસ્તુ, યોગશાસ્ત્ર, વીતરાગસ્તોત્ર, ધર્મરત્નપ્રકરણ, શ્રાદ્ધવિધિ, શ્રાદ્ધદિનકૃત્ય, હિતોપદેશમાલા આદિ પૂર્વાચાર્યોના અનેક મનનીય ગ્રંથોનો અને નિર્યુક્તિ, ભાષ્ય, ચૂર્ણિ, ટીકા, અવચૂરિ આદિ મોટા ભાગના શાસ્ત્રસમુદ્રનો નિષ્કર્ષ આપેલો છે.

**ગ્રંથશૈલિ–**

પરમપૂજ્ય પૂર્વધર શ્રી**ઉમાસ્વાતિમહારાજે** **'શ્રાવકધર્મવિધિપ્રકરણ'** લખેલું છે. એ સિવાય સાધુધર્મ ઉપર પણ જુદાં જુદાં અનેક પ્રકરણો લખાયેલાં છે, પરંતુ ગૃહસ્થધર્મ અને સાધુધર્મઉભયનું એક કડીબદ્ધ અથથી ઇતિ સુધી નિરૂપણ કરવાની પહેલ જો આપણે ભૂલતા ન હોઈએ તો પ્રાચીન યાકિનીમહત્તરાસૂનુ પૂ. આચાર્યશ્રી**હરિભદ્રસૂરિજી**મહારાજના **'ધર્મબિંદુ'** ગ્રંથમાં દૃષ્ટિગોચર થાય છે. તે પછી શ્રી**શાંતિસૂરિજી**મહારાજનું **'ધર્મરત્નપ્રકરણ'** અને પૂ.કલિકાલસર્વજ્ઞ શ્રીમદ્ **હેમચંદ્રસૂરિજી**મહારાજનું **'યોગશાસ્ત્ર'** આવે છે. સામાન્યતઃ

જોતાં પ્રસ્તુત ગ્રંથકારશ્રીએ આ ગ્રંથમાં એ જ મહાપુરુષોની શૈલી અપનાવેલી જણાય છે. તેઓશ્રીનો ભાષા ઉપરનો કાબૂ ખરેખર દીલચશ્પ છે.

**ગૂર્જર કવિ તરીકે ગ્રંથકારશ્રીની અન્ય કૃતિઓ–**

અઢારમી શતાબ્દીના ગુર્જર કવિ તરીકેની પ્રસિદ્ધિ પણ આપણા ગ્રંથકાર મહાત્માની ઉચ્ચ કક્ષાની છે. 'જૈનગુર્જર કવિઓ-ભાગ-૨માં **'નયવિચાર'** એટલે **'સાત નયનો રાસ'** કે જેનું ગ્રંથ પ્રાણ ૨૪૦ છે, તે તેમણે વિ.સં. ૧૭૨૮ આસપાસ બનાવ્યું લખે છે. **સુમતિ કુમતિ જિનપ્રતિમાસ્તવન** પણ એ જ અરસામાં તેમણે રચેલું છે. તેમની **'ભગવતી રાસ** યાને **સજ્ઝાય સંગ્રહપોથી'** વિ. સં. ૧૭૪૩માં લખાયેલી છે. તેઓશ્રીની **ચોવીશી** અને **આઠમદની સજ્ઝાય** વગેરે કૃતિઓ તો, આજે પણ ગાનાર અને સાંભળનાર સૌનાં દિલ હરી લે તેવી રસિક અને ભક્તિ આદિ ભાવોથી પરિપૂર્ણ છે.

**સમાન નામધારી અન્ય કવિઓ–**

ગ્રંથકારશ્રીના સમકાલે જ બીજા પણ **'માનવિજયજી'** નામના ત્રણ કવિઓ વિદ્યમાન હતા. તેમાંના બે તો તપાગચ્છીય જ હતા અને એક ખરતરગચ્છીય હતા. આ ઉપરાંત એક **માનમુનિ** નામના પણ સાધુ હતા. (જુઓ જૈન ગૂર્જર કવિઓ ભાગ.૨) તેમણે અનુક્રમે શ્રી **શ્રીપાલરાસ, વિક્રમાદિત્યરાસ, પાંડવચરિત્રરાસ** આદિની રચનાઓ કર્યાનું જણાય છે.

**પૂર્વપ્રકાશન અંગે–**

આ ગ્રંથનું પ્રકાશન સૌ પ્રથમ **જૈનધર્મવિદ્યાપ્રસારકવર્ગ** નામની સંસ્થા દ્વારા વિ.સં. ૧૯૬૦માં થયેલ. તે પ્રકાશનમાં પ્રસ્તુગ્રંથની ૨૯ ગાથાઓ ટીકા અને તેનું ભાષાંતર પ્રકાશિત થયેલ. ત્યારપછી આ મૂલગ્રંથનું સ્વોપજ્ઞવૃત્તિ સહિત પ્રકાશન સુરતના શેઠ **દેવચંદ લાલભાઈ જૈનપુસ્તકોદ્ધારસંસ્થા** તરફથી પ્રતાકારે બે વિભાગોમાં કરવામાં આવેલું છે. તેમાંનો પહેલો વિભાગ વિ.સં. ૧૯૭૧માં ગ્રંથાંક-૨૬ તરીકે પ્રસિદ્ધ થયો છે અને બીજો વિભાગ વિ.સં. ૧૯૭૪માં ગ્રંથાંક-૪૫ તરીકે પ્રસિદ્ધ થયો છે. તેનું સંશોધન તે સમયના પંન્યાસ શ્રી**આનંદસાગરજી**મહારાજસાહેબ, કે જેઓ પછીથી આચાર્ય શ્રી**સાગરાનંદસૂરિ**-મહારાજસાહેબ થયા હતા તેઓએ કરેલું છે. તે સંપાદનમાં તેઓના તરફથી પ્રસ્તાવના સંસ્કૃતમાં આપવામાં આવેલ છે તે પ્રસ્તુત નવીનસંસ્કરણમાં આપેલ છે. ત્યારપછી અનેક પ્રાચીન હસ્તલિખિત પ્રતો અને બીજા અનેક ગ્રંથોના આધારે પ્રસ્તુત ધર્મસંગ્રહ ગ્રંથનું પુનઃ સંશોધનસંપાદન કાર્ય પરમપૂજ્ય વિદ્વાન મુનિરાજ શ્રી**મુનિચંદ્રવિજયજી**મહારાજસાહેબ કે જેઓ પછીથી શ્રી**મુનિચંદ્રસૂરિ**મહારાજસાહેબ થયા તેઓએ પ્રતાકારે ત્રણ વિભાગમાં કરેલ છે. તેમાંનો પહેલો અને બીજો ભાગ વિ.સં. ૨૦૪૦માં અને ત્રીજો ભાગ વિ.સં. ૨૦૪૩માં શ્રી**જિનશાસન આરાધના ટ્રસ્ટ** દ્વારા પ્રકાશિત થયેલ છે. પ્રસ્તુત ગ્રંથનું ભાષાંતર પણ પ.પૂ. વિદ્વાન મુનિરાજશ્રી**ભદ્રંકરવિજયજી**મહારાજસાહેબ કે જેઓ પછીથી પરમપૂજ્ય

આચાર્ય**ભદ્રંકરસૂરિ**મહારાજ થયા તેમના દ્વારા થયેલું છે અને શેઠ **સુબાજી રવચંદ જેચંદ જૈનવિદ્યાશાળા ટ્રસ્ટ** તરફથી તે ભાષાંતરની અનેક આવૃત્તિઓ પ્રકાશિત થયેલી છે. તથા **ધર્મસંગ્રહસારોદ્ધાર**રૂપે શ્રાવકજીવન અને શ્રમણજીવન એમ બે ભાગમાં પ.પૂ. આચાર્ય**કીર્તિયશસૂરિ**મહારાજ દ્વારા સંપાદિત થઈને **સન્માર્ગ પ્રકાશન** તરફથી પ્રકાશિત થયેલ છે. તે જ આ ગ્રંથની પરમોપયોગિતા સૂચને છે.

**નવીનસંસ્કરણ અંગે–**

પ્રસ્તુત સ્વોપજ્ઞવૃત્તિ સહિત **ધર્મસંગ્રહ**ગ્રંથની અદ્યાવધિ પુસ્તકાકારે કોઈ પણ આવૃત્તિ પ્રકાશિત થયેલ ન હોવાથી પરમપૂજ્ય પરમારાધ્યપાદ **રામચંદ્ર-ભદ્રંકર-કુંદકુંદસૂરીશ્વરજી**-મહારાજસાહેબના શિષ્યરત્ન પરમપૂજ્ય વર્ધમાનતપોનિધિ ૧૦૦+૭૨મી ઓળીના આરાધક ગણિવર્ય શ્રી**નયભદ્રવિજયજી**મહારાજસાહેબની શુભ પ્રેરણાથી ભાગ ૧-૨માં આ નવીનસંસ્કરણ તૈયાર કરીને **ભદ્રંકરપ્રકાશન**થી પ્રકાશિત કરવામાં આવે છે. પ્રસ્તુત પ્રકાશનમાં ભાગ-૧માં પ્રથમ અધિકારમાં ગૃહસ્થનો સામાન્યધર્મ અને દ્વિતીય અધિકારમાં ગૃહસ્થનો વિશેષધર્મ બંને મળીને કુલ ૭૦ શ્લોકોનું વિવરણ કરવામાં આવેલ છે અને ભાગ-૨માં તૃતીય અધિકારમાં સાપેક્ષયતિધર્મ અને ચતુર્થ અધિકારમાં નિરપેક્ષયતિધર્મ બંને મળીને કુલ ૭૧થી ૧૫૯ શ્લોકોનું વિવરણ કરવામાં આવેલ છે અને અંતે ૧થી ૨૧ શ્લોકોમાં ગ્રંથકારશ્રીની પ્રશસ્તિ આપવામાં આવેલ છે.

પ્રસ્તુત નવીનસંસ્કરણમાં ૧૦ પરિશિષ્ટો તૈયાર કરેલ હોવાથી ગ્રંથ વિશેષ સમૃદ્ધ બનેલ છે. મૂળશ્લોક, શ્લોકોનો અકારાદિક્રમ, સંપૂર્ણ ગ્રંથમાં આવેલા અનેક ગ્રંથોના ઉદ્ધરણરૂપ સાક્ષીપાઠોનો વિસ્તૃત અકારાદિક્રમ, ગ્રંથમાં આવતાં ગ્રંથ અને ગ્રંથકારોના નામોનો અકારાદિક્રમ, વ્યાકરણ, ન્યાયવિમર્શ આદિ પરિશિષ્ટો તૈયાર કરેલ છે. તથા અમુક ઉદ્ધરણસ્થાનો **શાસ્ત્રસંદેશમાલા** અકારાદિક્રમગ્રંથમાંથી પ્રાપ્ત થયા તે નવા ઉમેર્યા છે જ્યાં જ્યાં અશુદ્ધપાઠો જણાયા ત્યાં ત્યાં મૂળ ગ્રંથોમાંથી તે તે સ્થાનો મેળવી શુદ્ધિકરણ પણ યથશક્ય કરેલ છે. અમે આ નવીનસંસ્કરણનું સંપાદન **જિનશાસન આરાધના ટ્રસ્ટ**થી પ્રકાશિત પ્રતોના આધારે કરેલ હોવાથી ટિપ્પણીઓ તે પ્રતો મુજબ જ આ નવીનસંસ્કરણમાં આપેલ છે. હસ્તપ્રતોનો પરિચય વગેરે **'કૃતિ અને કૃતિકાર'** શીર્ષક હેઠળ લખાણમાં આપેલ હોવાથી જિજ્ઞાસુઓએ તેમાં જોઈ લેવો. પ્રસ્તુત પ્રકાશનમાં યથાશક્ય શુદ્ધિકરણ માટે ઘણી કાળજી રાખેલ છે આમ છતાં મુદ્રણાદિદોષથી કે દૃષ્ટિદોષથી કે અનાભોગથી જે કોઈ ક્ષતિઓ રહી ગયેલ હોય તેનું મિચ્છા મિ દુક્કડં આપવા પૂર્વક વાચકવર્ગ તેનું પરિમાર્જન કરીને વાંચે એવી ખાસ ભાલમણ કરું છું.

**ઉપકારસ્મરણ–**

આ **ધર્મસંગ્રહ** ગ્રંથ પુસ્તકાકારે ભાગ-૧/૨ના નવીનસંસ્કરણના પ્રકાશનમાં હું તો માત્ર

નિમિત્તરૂપ છું, આ નવીનસંસ્કરણના પ્રકાશનનું સઘળું શ્રેયઃ પૂર્વના પ્રકાશકોના અને સંપાદકોના ફાળે જાય છે. પરમપૂજ્ય **સાગરાનંદસૂરિ**મહારાજસાહેબ તથા પરમપૂજ્ય **મુનિચંદ્રસૂરિ**મહારાજસાહેબે અથાક પરિશ્રમ કરીને ક્રમે પ્રથમાવૃત્તિ અને દ્વિતીયાવૃત્તિનું સંપાદન તૈયાર કરેલ છે તે સંપાદનના આધારે જ આ નવીનસંસ્કરણ તૈયાર કરવામાં આવેલ છે. ઉદ્ધરણના અનેક સ્થાનો **ધર્મસંગ્રહ** ભાષાંતર ભાગ ૧-૨માં આપેલ હોવાથી તે સ્થાનો મેળવવા માટે પરમપૂજ્ય **ભદ્રંકરસૂરિ**મહારાજસાહેબનો પણ તે અંગે મહત્ત્વનો ફાળો છે. આ સિવાય પ્રસ્તુત નવીનસંસ્કરણના પ્રૂફવાંચન માટે પરમપૂજ્ય ગણિવર્યશ્રી **નયભદ્રવિજયજી**-મહારાજસાહેબ અને તેઓશ્રીના શિષ્યરત્નોએ ઝીણવટભરી દૃષ્ટિએ જોઈને શુદ્ધિકરણ કરી આપેલ છે. પ્રૂફવાચન કરતાં જ્યાં જ્યાં અશુદ્ધ પાઠો જણાયાં ત્યાં ત્યાં મૂળગ્રંથો સાથે મેળવી તેમણે શુદ્ધિકરણ કરેલ છે. આ સર્વના ઉપકારોનું કૃતજ્ઞભાવે સ્મરણ કરું છું. આ સિવાય મારી સંયમ સાધનામાં જે કોઈ પણ પ્રત્યક્ષ યા પરોક્ષ સહાયક બની રહ્યા છે તે સૌના ઉપકારોથી ઉપકૃત હોવાથી તેઓનું સ્મરણ કરી કૃતજ્ઞતા દાખવું છું. સૌથી વિશેષ તો એ છે કે, વર્ધમાનતપોનિધિ પરમપૂજ્ય ગણિવર્ય શ્રી**નયભદ્રવિજયજી**મહારાજસાહેબે આ ગ્રંથ ચતુર્વિધ-સંઘને સાધના માટે અત્યંત ઉપયોગી હોવાથી આ ગ્રંથનું પુસ્તકાકારે નવીસંસ્કરણ તૈયાર કરવા માટે મને જે શુભપ્રેરણા કરી અને સાધનામાર્ગ માટે ઉપયોગી આવા ઉત્તમ ગ્રંથના સ્વાધ્યાયનો મને જે ઉત્તમ લાભ મળ્યો તે બદલ હું તેમની અત્યંત ઋણી છું.

પ્રાંતે અંતરની એ જ શુભેચ્છા છે કે ધર્મમાં કે વ્યવહારમાં મનુષ્યો જે અનેક પ્રકારના વિચારવચન કે પ્રવૃત્તિદોષો સેવતાં જણાય છે તે કેવલ આપણાં સૌની અજ્ઞાનતા આદિને આભારી છે. આપણે સૌ સમ્યગ્જ્ઞાન પામીએ એ માટે જ મહાપુરુષો આવા ઉત્તમ પ્રકારનાં સાહિત્યનું સર્જન કરે છે. તેમાંથી એક આ ગ્રંથનો વાચકો આદર કરે, આદર કરીને માનવતાના મંદિરમાં અધ્યાત્મભાવનાનાં દીપ સળગાવે, તેના પ્રકાશમાં પોતાનું જીવન આદર્શ જૈનપણાના રંગથી રંગે, રંગીને સ્વ-પરના અભ્યુદય તેમજ નિઃશ્રેયસની સાધનામાં કદમ કદમ આગળ વધે અને આગળ વધીને આપણે સૌ કોઈ મૈત્ર્યાદિ ભાવયુક્ત વિશ્વશાંતિકર શ્રીસર્વજ્ઞધર્મના નિર્દોષ અનુષ્ઠાનોનો જગતમાં જયજયકાર બોલાવી આપણા સૌનું અંતિમ લક્ષ્ય અષ્ટકર્મવિનિર્મુક્ત બની શાશ્વતસિદ્ધિસુખના ભોક્તા બનીએ એ જ શુભકામના !!

**શિવમસ્તુ સર્વજગતઃ**

**– સાધ્વી ચંદનબાલાશ્રી**

**એફ-૨, જેઠાભાઈ પાર્ક,**
**નારાયણનગર રોડ,**
**પાલડી, અમદાવાદ-૭**
**માગસર વદ-૧૦, વિ.સં. ૨૦૬૭,**
**ગુરુવાર, તા. ૩૦-૧૨-૨૦૧૦.**

●●●

# विषयानुक्रमणिका


| | | |
|---|---|---|
| | પ્રકાશકીય | ७-८ |
| | विजयन्ते सदा विश्वे गणेशाः सूत्रकारकाः ॥ | ९-१२ |
| | कृति अने कृतिकार | १३-२१ |
| | સંપાદકીય | ૨૩-૩૨ |
| | विषयानुक्रमणिका | ३३-३६ |
| | उद्धरणसङ्केतसूचिः | ३७-४० |
| गाथा | विषयः | पृष्ठ |
| **१-२०** | **प्रथमाधिकारः** | **१-५३** |
| १ | मङ्गलाचरणम् | १-२ |
| २ | अभिधेयम् | १ |
| ३ | धर्मस्वरूपम् | ४-५ |
| ४ | धर्मभेदाः | ७ |
| ५-१४ | ३५ मार्गानुसारिगुणाः | ७-२२ |
| १६ | धर्मबीजानि | २२-२३ |
| १७ | आदिधार्मिकस्वरूपम् | २४-२५ |
| | अपुर्बन्धकस्वरूपम् | २५ |
| १८ | आदिधार्मिकस्य देशनायोग्यत्वम् मित्रादि दृष्टयः ८ | २५-२९ |
| १९ | धर्मदेशनाप्रदानविधिः | ३०-५० |
| २० | सद्धर्मग्रहणयोग्यता | ५० |
| | २१ गुणाः धर्मग्रहणयोगस्य | ५०-५१ |
| | सद्धर्मग्रहणाधिकारिणः | ५२-५३ |
| | यतिधर्माधिकारिणः | ५३ |
| **२१-५९** | **द्वितीयाधिकारः प्रथमखण्डः** | **५४-२१४** |
| २१ | सम्यक्त्वस्वरूपम् | ५४-५५ |
| २२ | सम्यक्त्वभेदाः | ५६ |
| | औपशमिकसम्यक्त्वम् | ५८-५९ |
| | सम्यक्त्वस्वरूपम् | ५९-६१ |
| | एकविधादिसम्यक्त्वभेदाः | ६१-७० |
| | मिथ्यात्वभेदाः | ७०-७१ |
| | सम्यक्त्वोच्चरणविधिः | ७१-७२ |
| | सम्यक्त्वलक्षणानि ५ | ७३-७५ |
| २२ | सम्यक्त्वभेदाः ६७ | ७६ |
| | चतुःश्रद्धानम् | ७७ |
| | त्रिलिङ्गम् | ७८ |
| | दशविनयः | ७८ |
| | तिस्रः शुद्धयः | ७८-७९ |
| | अष्टप्रभावकाः | ७९ |
| | भूषणपञ्चकम् | ७९-८० |
| | षड्विधयतना | ८० |
| | आकाराष्टकम् | ८०-८१ |
| | षड्भावनाः | ८१ |
| | षट्स्थानानि | ८१-८२ |
| | भावश्रावकस्वरूपम् | ८३-८७ |
| | विरतेरभ्यासः | ८७-९० |
| २३ | व्रतग्रहणविधिः | ९०-९४ |
| २४ | अणुव्रतस्वरूपम् | ९४-९५ |
| | श्रावकव्रतभङ्गस्वरूपम् | ९५-९९ |
| | श्रावकव्रतभङ्गस्थापनाः | १००-१११ |
| २५ | प्रथमाऽणुव्रतस्वरूपम् | ११२-११४ |
| २६ | द्वितीयाऽणुव्रतस्वरूपम् | ११४-११६ |
| २७ | तृतीयाऽणुव्रतस्वरूपम् | ११६-११७ |
| २८ | चतुर्थाऽणुव्रतस्वरूपम् | ११७-११९ |
| २९ | पञ्चमाणुव्रतस्वरूपम् | ११९-१२२ |
| ३० | प्रथमगुणव्रतस्वरूपम् | १२३-१२४ |
| ३१ | द्वितीयगुणव्रतस्वरूपम् | १२४-१२६ |
| ३२-३३-३४ | २२ अभक्ष्यस्वरूपम् | १४३ |
| | ३२ अनन्तकायस्वरूपम् | १३२-१३४ |
| | सचित्ताऽचित्तादिस्वरूपम् | १३६-१४२ |
| | १४ नियमस्वरूपम् | १४२-१४३ |
| ३५ | तृतीयगुणव्रतस्वरूपम् | १३६-१४४ |

| | | |
|---|---|---|
| ३६ | अनर्थदण्डभेदाः | १४४-१४८ |
| ३७ | प्रथमशिक्षाव्रतस्वरूपम् | १४९-१५३ |
| ३८ | द्वितीयशिक्षाव्रतस्वरूपम् | १५३-१५५ |
| ३९ | तृतीयशिक्षाव्रतस्वरूपम् | १५५-१६४ |
| | पोषधस्य अशीतिभङ्ग-स्वरूपम् | १५७-१५९ |
| ४० | चतुर्थशिक्षाव्रतस्वरूपम् | १६५-१६८ |
| ४१ | अतिचारस्वरूपम् | १६८-१७० |
| ४२ | समकितातिचारस्वरूपम् | १७०-१७१ |
| | ३६३ पाखण्डिभेदाः | १७१-१७५ |
| ४३ | प्रथमव्रतातिचारस्वरूपम् | १७५-१७८ |
| ४४ | द्वियीयव्रतातिचारस्वरूपम् | १७८-१८० |
| ४५ | तृतीयव्रतातिचारस्वरूपम् | १८०-१८२ |
| ४६ | चतुर्थव्रतातिचारस्वरूपम् | १८२-१८५ |
| ४७-४८ | पञ्चमव्रतातिचारस्वरूपम् | १८५-१८८ |
| ४९ | षष्ठव्रतातिचारस्वरूपम् | १८८-१८९ |
| ५० | सप्तमव्रतातिचारस्वरूपम् | १८९-१९२ |
| ५१-५३ | १५ कर्मादानस्वरूपम् | १९२-१९७ |
| ५४ | अष्टमव्रतातिचारस्वरूपम् | १९८-१९९ |
| ५५ | नवमव्रतातिचारस्वरूपम् | १९९-२०२ |
| ५६ | दशमव्रतातिचारस्वरूपम् | २०२-२०३ |
| ५७ | एकादशमव्रतातिचार-स्वरूपम् | २०३-२०४ |
| ५८ | द्वादशतमव्रतातिचारस्वरूपम् | २०४-२०७ |
| ५९ | व्रतातिचारयोजना | २०७ |
| | सप्तक्षेत्रस्वरूपम् | २०७-२१४ |
| | श्रावकशब्दव्याख्या | २१४ |
| ६०-७० | **द्वितीयाधिकारः द्वितीयखण्डः** | **२१५-४५७** |
| ६० | महाश्रावकस्य दिनचर्या | २१५-२२१ |
| | जागरणविधिः | २१५ |
| | नमस्कारगणनविधिः | २१५-२१६ |
| | जापविधिः | २१६-२१७ |
| | धर्मजागरिकास्वरूपम् | २१८-२१९ |
| | प्राभातिककर्तव्यम् | २१९-२२० |
| | प्रत्याख्यानकरणम् | २२० |
| | प्रत्याख्यानकरणकालः | २२० |
| | चैत्यपूजनम् | २२१ |
| | चैत्यभेदाः ५ | २२१ |
| ६१ | जिनपूजाविधिः | २२१-२८१ |
| | स्नानविधिः | २२२-२२५ |
| | द्रव्यस्नानस्वरूपम् | २२२-२२५ |
| | पूजार्थं वस्त्रविधिः | २२५-२२६ |
| | जिनस्नपनादिविधिः | २२६-२२९ |
| | अङ्गपूजास्वरूपम् | २२९-२३० |
| | अग्रपूजास्वरूपम् | २३१ |
| | चैत्यवन्दनस्वरूपम् | २३१-२३५ |
| | अवस्थात्रयभावना | २३५-२३६ |
| | पूजाभेदाः | २३६-२३९ |
| | गृहचैत्यपूजाविधिः | २४० |
| | जिनगृहगमनविधिः | २४०-२४१ |
| | पञ्चविधाभिगमः | २४१ |
| | नैषिधिकीत्रयम् | २४१ |
| | प्रदक्षिणात्रयम् | २४१ |
| | जिनपूजाविधिः | २४२-२४४ |
| | स्नात्रपूजाविधिः | २४४-२४८ |
| | ऋद्धिरहितश्राद्धकर्तव्यम् | २४८-२४९ |
| | जिनदर्शनफलम् | २४९ |
| | दशत्रिकस्वरूपम् | २५० |
| | 'इरियावहिया' सूत्रविवरणम् | २५१-२५४ |
| | 'मिच्छा मि दुक्कडं' भङ्गाः | २५३-२५४ |
| | 'तस्स उत्तरी' सूत्रविवरणम् | २५४-२५५ |
| | 'अन्नत्थ' सूत्रविवरणम् | २५५-२५६ |
| | कायोत्सर्गदोषाः १९ | २५६-२५७ |
| | चैत्यवन्दनविधिः | २५८-२८९ |
| | 'नमुत्थुणं' सूत्रविवरणम् | २५९-२७० |
| | 'अरिहतचेइयाणं' सूत्रविवरणम् | २७०-२७२ |
| | 'लोगस्स' सूत्रविवरणम् | २७२-२७८ |
| | 'पुक्खवरदी' सूत्रविवरणम् | २७८-२८१ |
| | 'सिद्धाणं बुद्धाणं' सूत्रविवरणम् | २८१-२८७ |

| | | |
|---|---|---|
| | 'वेयावच्चगराणं' सूत्रविवरणम् | २८७-२८८ |
| | 'जयवीयराय' सूत्रविवरणम् | २८८-२८९ |
| ६२-६९ | **महाश्रावकस्य दिनचर्या** | **२८९-४५६** |
| | आशातनास्वरूपम् | २८९-२९३ |
| | देवद्रव्यरक्षणस्वरूपम् | २९४ |
| | देवद्रव्यविषये सङ्घकर्तव्यम् | २९५-२९६ |
| | ज्ञानद्रव्य-गुरुद्रव्यविषये सङ्घकर्तव्यम् | २९६ |
| | धर्मद्रव्यविषये विवेकः | २९६-२९७ |
| | जिर्णोद्धारफलम् | २९७-२९८ |
| | प्रत्याख्यानकरणम् | २९८ |
| | गुरुवन्दनविधिः | २९८-३१८ |
| | गुरुवन्दने १९८ स्थानानि | २९८-३०९ |
| | देहप्रतिलेखनाः २५ | ३०० |
| | आवश्यकानि २५ | ३००-३०१ |
| | षट्स्थानानि शिष्यस्य | ३०१ |
| | षड्गुरुवचांसि | ३०१ |
| | षड्गुणाः | ३०२ |
| | वन्दनार्हाः पञ्च | ३०२ |
| | अवन्द्याः पञ्च | ३०२-३०४ |
| | उदाहरणानि पञ्च | ३०४ |
| | अवग्रहः | ३०४ |
| | अभिधानानि पञ्च | ३०४ |
| | निषेधाः पञ्च | ३०४ |
| | दोषाः ३२ | ३०५-३९८ |
| | कारणानि ८ | ३०८-३०९ |
| | दोषाः ६ ३०९ | |
| | 'द्वादशावर्तवन्दन' सूत्रं सविवरणम् | ३०९-३१६ |
| | आशातनाः ३३ | ३१३-३१५ |
| | गुरुवन्दनविधिः | ३१६-३१८ |
| | 'इच्छामि ठामि' सूत्रं सविवरणम् | ३१८-३२० |
| | 'सववस्स वि' सूत्रं सविवरणम् | ३२०-३२१ |
| | 'अब्भुट्ठिओ' सूत्रं सविवरणम् | ३२१-३२२ |
| | प्रत्याख्यानस्वरूपम् | ३२४-३४२ |
| | प्रत्याख्यानभेदाः | ३२४-३२५ |
| | उच्चारस्थानानि | ३२६ |
| | आकाराः | ३२६-३३६ |
| | अशनादिस्वरूपम् | ३२८-३२९ |
| | पौरुषीस्वरूपम् | ३३०-३३२ |
| | विकृतिगतस्वरूपम् | ३३६-३३९ |
| | प्रत्याख्यानशुद्धिस्वरूपम् | ३४०-३४१ |
| | प्रत्याख्यानफलम् | ३४१ |
| ६३ | धर्मोपदेशश्रवणविधिः | ३४२-३४३ |
| | अशनादिनिमन्त्रणम् गुरोः | ३४३ |
| | सुखशातापृच्छा | ३४३ |
| | गुरुवन्दनम् | ३४४ |
| | पार्श्वस्थादीनां वन्दनविधिः | ३४४-३४६ |
| | जिनमन्दिरे अवस्थानविचारः | ३४७-३४८ |
| | अर्थार्जनादिविचारः | ३४६-३५२ |
| | व्यवहारशुद्धिस्वरूपम् | ३५२ |
| | देशकालविरुद्धस्वरूपम् | ३५२ |
| | राजविरुद्ध-लोकविरुद्ध-स्वरूपम् | ३५३ |
| | धर्मविरुद्धस्वरूपम् | ३५३ |
| | औचित्यं नवविधम् | ३५४-३६० |
| ६४ | मध्याह्नकृत्यम् | ३६०-३६७ |
| | सुपात्रदानविधिः | ३६५ |
| ६५ | सान्ध्यकृत्यम् | ३६७-४१४ |
| | प्रतिक्रमणस्वरूपम् | ३६८-३७१ |
| | प्रतिक्रमणसमयः | ३६९ |
| | प्रतिक्रमणविधिः | ३७१ |
| | स्थापनाचार्यस्थापनम् | ३७१-३७२ |
| | दैवसिकप्रतिक्रमणविधिः | ३७२-३८० |
| | रात्रिकप्रतिक्रमणविधिः | ३८१ |
| | पाक्षिकप्रतिक्रमणविधिः | ३८२-३८३ |
| | चातुर्मासिक-संवत्सरिक-प्रतिक्रमणे | ३८४ |

कायोत्सर्गस्वरूपम् ३८७-३९०
प्रतिक्रमणकरणावश्यकता ३९०
श्रावकस्य प्रतिक्रमण करणयुक्तत्वम् ३९०-३९१
'वंदित्तु' सूत्रं सविवरणम् ३९३-४११
'आयरिअउवज्झाए' सूत्रं सविवरणम् ४११-४१२
'सुअदेवया' सविवरणम् ४१२
'नमोस्तु' सूत्रं सविवरणम् ४१२
'विशाललोचन०' सूत्रं सविवरणम् ४१३
'वरकनक०' सूत्र सविवरणम् ४१३
प्रतिक्रमणानन्तरकर्तव्यम् ४१४
६६ रात्रिकर्तव्यम् ४१४-४१६
६७ निद्राक्षये कर्तव्यम् ४१६-४१८
६८ पर्वादिकृत्यानि ४१८
चातुर्मासीकृत्यानि ४२२-४२४
वार्षिककृत्यानि ११ ४२४-४४१
सङ्घपूजा १ ४२४
साधर्मिकवात्सल्यम् २ ४२५-४२६
यात्रात्रिकम् ३ ४२६-४२७
रथयात्रास्वरूपम् ४२७-४२९
तीर्थयात्रास्वरूपम् ४२९-४३०
स्नात्रादिकर्तव्यानि ४-१० ४३१-४३१
आलोचनास्वरूपम् ११ ४३३
आलोचनादायकगुणाः ८ ४३४-४३५
आलोचकदोषाः १० ४३९-४४०
आलोचनागुणाः ८ ४४०
जन्मकृत्यानि ७ ४४१-४५३
चैत्यनिर्माणविधिः १ ४४१-४४५
जिर्णोद्धारमहत्त्वम् ४४५
जिनबिम्बनिर्माणादि स्वरूपम् २ ४४५-४४७
प्रतिष्ठास्वरूपम् ३ ४४७-४५२
दीक्षादापनादिकृत्यानि ४-७ ४५२-४५३
६९ ११ श्रावकप्रतिमाः ४५३-४५६
७० गृहिधर्मोपसंहारः ४५६-४५७


• • •

# उद्धरणसङ्केतसूचिः ॥

| | |
|---|---|
| अ.द्वा. | अनुयोगद्वारसूत्र |
| अ.ना. | अनेकार्थनाममाला |
| अ.प.<br>अध्या.प. | अध्यात्ममतपरीक्षा |
| अ.प्र. | अष्टकप्रकरण |
| अ.सं. | अनेकार्थसंग्रह |
| अर्हद.पर्व. | अर्हदभिषेकपर्व |
| आ.उ. | आचारोपदेश |
| आ.चू.<br>आव.चू. | आवश्यकचूर्णि |
| आ.नि.<br>आव.नि. | आवश्यकनिर्युक्ति |
| आ.नि.वृ. | आवश्यकनिर्युक्तिवृत्ति |
| आ.प. | आराहणापडागा |
| आ.भा.प्र. | आवश्यकभाष्ये प्रक्षिप्तगाथा |
| आ.मू.सू.<br>आव.मूलसू. | आवश्यकमूलसूत्र |
| आ.वृ. | आवश्यकवृत्ति |
| आ.सू.<br>आव.सू. | आवश्यकसूत्र |
| आचा.<br>आचा.सू. | आचाराङ्गसूत्र |
| आव.प्रत्या. | आवश्यकप्रत्याख्यान |
| आव.भा. | आवश्यकभाष्य |
| आव.मू. | आवश्यकमूलसूत्र |
| उ.त. | उपदेशतरङ्गिणी |
| उ.नि.<br>उत्त.नि. | उत्तराध्ययननिर्युक्ति |
| उ.प.<br>उप.प. | उपदेशपद |
| उ.मा.<br>उप.मा. | उपदेशमाला |
| उ.सा. | उपदेशसार |
| उत्त.<br>उत्त.सू. | उत्तराध्ययनसूत्र |
| उप.र.<br>उ.र. | उपदेशरत्नाकर |
| उपा.द.<br>उपा. | उपासकदशाङ्ग |
| उपा.द.वृ. | उपासकदशाङ्गवृत्ति |
| ओ.नि.<br>ओघ.<br>ओघ.नि.<br>ओघनि. | ओघनिर्युक्ति |
| ओ.नि.भा.<br>ओघ.नि.भा | ओघनिर्युक्तिभाष्य |
| क.बृ.भा. | कल्पबृहद्भाष्य |
| क.भा. | कल्पभाष्य |
| क.वृ. | कल्पवृत्ति |
| कल्पपञ्चा. | कल्पपञ्चाशक |
| ग.प्र. | गच्छाचारप्रकीर्णक |
| ग.वि. | गणिविद्या |
| गा.स.<br>गाथा. | गाथासहस्त्री |
| गु.भा.<br>गुरु. | गुरुवन्दनभाष्य |
| गु.वि. | गुरुतत्त्वविनिश्चय |
| च.प्र. | चतु:शरणप्रकीर्णक |
| चरमावर्त्तविं.<br>च.वि. | चरमावर्त्तविंशिका |
| चा.म. | चारित्रमनोरथमाला |
| चे.वं.म.<br>चे.म. | चेइअवंदणमहाभास |
| चै.बृ.<br>चै.बृ.भा. | चैत्यवन्दनबृहद्भाष्य |
| चै.मू.भा.<br>चै.भा.<br>चैत्य.भा. | चैत्यवन्दमूलभाष्य |
| चै.वं.भा.<br>चैत्य. | चैत्यवन्दनभाष्य |
| जी.स. | जीवसमास |

| | |
|---|---|
| जीव.प्र. | जीवविचारप्रकरण |
| जीवा.सू. | जीवाभिगमसूत्र |
| त.सू.<br>तत्त्वा.सू.<br>तत्त्वार्थसू. | तत्त्वार्थसूत्र |
| तत्त्वा.सं. | तत्त्वार्थसंबधकारिका |
| त्रि.श.<br>त्रि.प. | त्रिषष्टिशलाकापुरुषचरित्र |
| द.प्र.<br>द.शु.प्र. | दर्शनशुद्धिप्रकरण |
| द.वै.<br>दशवै.<br>दश. | दशवैकालिकसूत्र |
| द.वै.नि.<br>दशवै.नि.<br>दश.नि. | दशवैकालिकनिर्युक्ति |
| दा.मा. | दानमाला |
| दे.य.दि. | देवसूरिकृतयतिदिनचर्या |
| दे.श. | देशनाशतक |
| द्वा.भा. | द्वादशभावना |
| ध.बि.<br>ध.बिं. | धर्मबिन्दुप्रकरण |
| ध.बिं.वृ. | धर्मबिन्दुवृत्ति |
| ध.र.<br>धर्मरत्न.<br>ध.र.प्र. | धर्मरत्नप्रकरण |
| ध.सं.णी | धर्मसंग्रहणी |
| धा.पा. | धातुपाठ |
| ध्या.श. | ध्यानशतक |
| न.प्र.<br>नव. प्र. | नवपदप्रकरण |
| न.फ.कु. | नमस्कारफलकुलक |
| नाग.प्रत्या.भा. | नागपुरीयप्रत्याख्यानभाष्य |
| नि.चू. | निशीथचूर्णि |
| नि.पी. | निशीथपीठ |
| नि.भा. | निशीथभाष्य |
| नि.सू. | निशीथसूत्र |

| | |
|---|---|
| नी.शा. | नीतिशास्त्र |
| प.क.बृ.<br>प.क.भा. | पञ्चकल्पबृहद्भाष्य |
| प.कु. | पडिलेहणाविचारकुलक |
| प.च. | पद्मचरित्र |
| प.प. | परिशिष्टपर्व |
| प.व.<br>पञ्चव.<br>पञ्च. | पञ्चवस्तुक |
| प.सू. | पञ्चसूत्र |
| प.सू. | पक्खीसूत्र |
| पं.क.भा. | पञ्चकल्पभाष्य |
| पञ्च.सं.<br>प.सं. | पञ्चसंग्रह |
| पञ्चनि. | पञ्चनिर्ग्रन्थीप्रकरण |
| पञ्चा. | पञ्चाशकप्रकरण |
| पञ्चा.वृ. | पञ्चाशकवृत्ति |
| पा. | पाणिनीयव्याकरण |
| पा.सू. | पाक्षिकसूत्र |
| पि.नि.<br>पिण्ड.<br>पिण्डनि. | पिण्डनिर्युक्ति |
| पि.वि.<br>पिण्ड. | पिण्डविशुद्धि |
| पु.मा. | पुष्पमाला |
| पू.वि. | पूजाविधि |
| पूजा. | पूजाविधिप्रकरण |
| पूजा.प. | पूजाविधिपञ्चाशक |
| प्र.आ.चू. | प्रत्याख्यानावश्यकचूर्णि |
| प्र.आ.सू. | प्रत्याख्यानावश्यकसूत्र |
| प्र.तृ.सं. | प्रज्ञापनातृतीयपदसंग्रहणी |
| प्र.र.<br>प्रश.र.<br>प्रश.<br>प्रशम. | प्रशमरतिप्रकरण |
| प्र.वा. | प्रमाणवार्तिक |
| प्र.वि. | प्रमाणविनिश्चय |
| प्र.वि.कु. | प्रवज्याविधानकुलक |

| | |
|---|---|
| प्र.स. | प्रतिक्रमणसमाचारी |
| प्र.सा.<br>प्रव.सा.<br>प्रवसा.<br>प्रव. | प्रवचनसारोद्धार |
| प्र.सा.वृ. | प्रवचनसारोद्धारवृत्ति |
| प्र.सू.<br>प्रज्ञा. | प्रज्ञापनासूत्र |
| प्रत्या.<br>प्र.भा. | प्रत्याख्यानस्वरूपम् |
| प्रत्या.भा. | प्रत्याख्यानभाष्य |
| प्रमा.स.स्वा. | प्रमाणसमुच्चयस्वार्थानुमानपरिच्छेद |
| प्रा.सा.<br>प्राचीनसामा. | प्राचीनसामाचारी |
| बि.प. | बिम्बपरीक्षाप्रकरण |
| बृ.क.भा.<br>बृह. | बृहत्कल्पभाष्य |
| बृ.वं.भा. | बृहद्वन्दनकभाष्य |
| बृ.सं. | बृहत्संग्रहणी |
| भ.सू.<br>भग.सू. | भगवतीसूत्र |
| म.नि. | महानिशीथसूत्र |
| म.भा. | मनोनिग्रहभावना |
| म.स्मृ. | मनुस्मृति |
| मूल.प्र.<br>मू.शु.प्र. | मूलशुद्धिप्रकरण |
| य.दि. | यतिदिनचर्या |
| य.स. | यतिलक्षणसमुच्चय |
| यति.भाव.<br>भा.यति. | भावदेवसूरीयायतिदिनचर्या |
| या.त. | यापनीयतन्त्र |
| यो.बिं.<br>यो.बिं, | योगबिन्दु |
| यो.श.<br>योग.श. | योगशतक |
| यो.शा.<br>योग. | योगशास्त्र |
| यो.शा.आं. | योगशास्त्र-आन्तरश्लोक |
| यो.शा.वृ. | योगशास्त्रवृत्ति |
| यो.स.<br>यो.दृ.<br>यो.दृ.स. | योगदृष्टिसमुच्चयः |
| र.सं. | रत्नसंचय |
| लो.नि. | लोकनिर्णय |
| वं.सू. | वंदित्तुसूत्र |
| वन्द.चू.<br>व.चू. | वन्दनकचूर्णि |
| वि.चू. | विवाहचूलिका |
| वि.नि. | वन्दनकनिर्युक्ति |
| वि.भा.<br>विशे.भा.<br>विशेषा.भा. | विशेषावश्यकभाष्य |
| वि.वि. | विवेकविलास |
| वि.स. | विचारसप्ततिका |
| वि.सं. | विचारामृतसंग्रह |
| वि.सा. | विचारसार |
| विं.विं. | विंशतिविंशिका |
| विपा.श्रुत.<br>विपा.श्रु. | विपाकश्रुताङ्ग |
| वी.स्तो. | वीतरागस्तोत्र |
| वी.स्त. | वीतरागस्तव |
| वृ.सा. | वृद्धसामाचारी |
| व्य.चू. | व्यवहारचूर्णि |
| व्य.चू. | व्यवहारचूलिका |
| व्य.भा. | व्यवहारभाष्य |
| व्य.शा. | व्यवहारशास्त्र |
| व्य.सू. | व्यवहारसूत्र |
| व्यव.पी. | व्यवहारपीठिका |
| श.चू. | शतकचूर्णि |
| श.बृ.चू. | शतकबृहच्चूर्णि |
| श.स्त | शक्रस्तव |
| शा.भा. | शाबरभाष्य |
| शा.वा.<br>शा.स.<br>शा.वा.समु.<br>शा.वा.स. | शास्त्रवार्तासमुच्चय |
| शि.पु.<br>शिवपु. | शिवपुराण |

| | |
|---|---|
| श्रा.कृ. | श्राद्धदिनकृत्य |
| श्राद्ध.कृ. | |
| श्रा.जी. | श्राद्धजीतकल्प |
| श्रा.दि. | श्रावकदिनकृत्य |
| श्राव.कृ. | |
| श्राद्ध. | श्राद्धधर्मविधिप्रकरण |
| श्रा.ध.वि. | |
| श्रा.ध.वि. | श्रावकधर्मविधिप्रकरण |
| श्राव.ध.वि. | |
| श्रा.प्र. | श्रावकप्रज्ञप्ति |
| श्रा.प्र.सू.चू. | श्रावकप्रतिक्रमणसूत्रचूर्णि |
| श्रा.वि. | श्राद्धविधिप्रकरण |
| श्राद्धवि. | |
| श्रा.वि.वृ. | श्राद्धविधिवृत्ति |
| श्राद्ध.वृ. | |
| श्रा.व्र.भ.प्र. | श्रावकव्रतभङ्गप्रकरण |
| श्राव.व्रत.भ.प्र. | |
| श्रावकव्रतभङ्गप्र. | |
| श्रीसि. | श्रीसिद्धहेमलघुवृत्ति |
| ष.स. | षड्दर्शनसमुच्चय |
| षोड. | षोडशकप्रकरण |
| षो.प्र. | |
| स.च. | समरादित्यचरित्र |
| स.वा. | समवायाङ्ग |
| स.वा.वृ. | समवायाङ्गवृत्ति |
| सं.पो. | संथारापोरिसीसूत्र |
| सं.पो.सू. | |
| सं.प्र. | सम्मतिप्रकरण |
| सं.प्र. | सम्बोधप्रकरण |
| सम्बो.प्र. | |
| सं.प्र.आ. | सम्बोधप्रकरणालोचनाधिकार |
| सं.प्र.गु. | सम्बोधप्रकरणगुरुतत्त्वाधिकार |
| सं.प्र.गुरु. | |
| सं.प्र.दे. | सम्बोधप्रकरणदेवाधिकार |
| सं.प्र.देवा. | |
| सं.प्र.श्रा. | सम्बोधप्रकरणश्रावकव्रताधिकार |
| सं.प्र.श्रा.व्र. | सम्बोधप्रकरणश्राद्धव्रताधिकार |
| सं.प्र.श्रा.व्रता. | |
| सम्बो.प्र.श्रा.व्रता. | |
| सम्बोधप्र.श्राद्ध. | |
| सं.प्र.स. | सम्बोधप्रकरणसम्यक्त्वाधिकार |
| सं.प्र.सम्य. | |
| सम्बो.प्र.सम्य. | |
| सं.प्र.सुगुरु. | सम्बोधप्रकरणसुगुरुतत्त्वाधिकार |
| सं.स. | सम्बोधसत्तरी |
| सम्बो.स. | |
| संघा.वृ. | सङ्घाचारवृत्ति |
| सद्धर्मवि. | सद्धर्मविंशिका |
| स.वि. | |
| सम्य.प्र. | सम्यक्त्वस्तवप्रकरण |
| सामा. | सामाचारीप्रकरण |
| सामा.प्र. | |
| सि.द्वा. | सिद्धसेनद्वात्रिंशिका |
| सि.प्र. | सिद्धप्राभृत |
| सि.हे. | |
| सिद्ध हे. | सिद्धहेमलघुवृत्ति |
| सु.अ. | सुभाषिताष्टक |
| सु.सि. | सुमिणसित्तरी |
| सू.कृ. | सूत्रकृताङ्ग |
| सूत्रकृ. | |
| सू.मु. | सूक्तमुक्तावली |
| सूत्र.नि. | सूत्रकृताङ्गनिर्युक्ति |
| सूय. | सूयगडांग |
| सौ.न. | सौन्दरनन्द |
| स्क.पु. | स्कन्दपुराण |
| स्त्री.मु.प्र. | स्त्रीमुक्तिप्रकरण |
| स्त्रीमुक्तिप्र. | |
| स्था. | स्थानाङ्गसूत्र |
| स्था.सू. | |
| स्था.सू.वृ. | स्थानांगवृत्ति |
| स्ना.अ. | स्नानाष्टक |
| हारि.अ | हारिभद्राष्टक |
| हि.मा. | हितोपदेशमाला |
| है.धा.पा. | हैमधातुपाठ |

● ● ●

D1-t.pm5 3rd proof

# धर्मसंग्रहः ॥

[ भाग-१ ]

D:\new/d-1.pm5\3rd proof

## न्यायविशारदन्यायाचार्यश्रीमद्यशोविजयप्रणीतान्तर्गतटिप्पणीसमेतः
## श्रीमन्मानविजयमहोपाध्यायप्रणीतः
## स्वोपज्ञवृत्तिविभूषितः

# धर्मसंग्रहः ॥

## प्रथमाधिकारः ॥

**ऐं[१] नमः ॥**

**प्रणम्य विश्वेश्वरवीरदेवं, विश्वातिशायिप्रथितप्रभावम् ।**

**शास्त्रानुसृत्या किल धर्मसंग्रहं, सुखावबुद्ध्यै विवृणोमि लेशतः ॥१॥**

अत्र ग्रन्थकृत् प्रथमं श्लोकद्वयेन मङ्गलं समाचरन् श्रोतृप्रवृत्तये [२]स्वाभिधेयं प्रतिजानीते —

**प्रणम्य प्रणताशेषसुरासुरनरेश्वरम् ।**
**तत्त्वज्ञं तत्त्वदेष्टारं महावीरं जिनोत्तमम् ॥१॥**
**श्रुताब्धेः सम्प्रदायाच्च, ज्ञात्वा स्वानुभवादपि ।**
**सिद्धान्तसारं ग्रथ्नामि, धर्मसङ्ग्रहमुत्तमम् ॥२॥ युग्मम् ॥**

अहं **श्रुताब्धेः** सकाशात्, तथा **सम्प्रदायाद्**-गुरुपारम्पर्यात्, तथा **स्वानुभवाच्च**-स्वकीयश्रुतचिन्तोत्तरोत्पन्नभावनाज्ञानाच्च, **ज्ञात्वा** निर्णीय, धर्ममिति शेषः । **सिद्धान्तसारम्** आगमस्य सारभूतम्, **उत्तमं** च लोकोत्तरधर्मनिरूपकत्वात्, **धर्मसंग्रहं**-धर्मसंग्रहनामकं शास्त्रम् । तत्र संगृह्य**तेऽनेने**ति संग्रहः, "**पुंनाम्नि**" [ सि.हे. ५-३-१३० ] इति करणे घः, धर्मस्य वक्ष्यमाणलक्षणस्य संग्रहो धर्मसंग्रह इति । यद्वा धर्मस्य संग्रहो यत्र स **धर्मसंग्रह** इति व्युत्पत्ति**स्तं ग्रथ्नामि** रचयामीति क्रियाकारकसण्टङ्कः । किं कृत्वा ? विशेषेण ईरयति क्षिपति तत्तत्कर्माणीति वीरः ।

---

१. ऐं नमः । श्रीप्रवचनाय । प्रणम्य-P. । ऐं नमः श्री जिनाय नमः । प्रणम्य-L. ।
२. स्वाभिप्रायं-मु० । स्वाभियं-C. ।

**''विदारयति यत्कर्म, तपसा च विराजते ।**
**तपोवीर्येण युक्तश्च, तस्माद्वीर इति स्मृतः''** ॥ [ ]

इति लक्षणनिरुक्ताद्वा वीरः । महाँश्चासावितरवीरापेक्षया वीरश्च **महावीरः** । वीरत्वं च दानयुद्धधर्मभेदात्त्रिधा । यदाहुः –

**''कृत्वा हाटककोटिभिर्जगदसद्दारिद्र्यमुद्राकथं हत्वा,**
**गर्भशयानपि स्फुरदरीन् मोहादिवंशोद्भवान् ।**
**तप्त्वा दुस्तपमस्पृहेण मनसा कैवल्यहेतुं,**
**तपस्त्रेधा वीरयशो दधद्विजयतां वीरस्त्रिलोकीगुरुः''** ॥१॥ [ ]

तं **प्रणम्य** प्रकर्षेण भावपूर्वकं मनोवाक्कायैर्नत्वेति सम्बन्धः । शेषाणि महावीरपदविशेषणानि, तैस्तु सद्भूतार्थप्रतिपादनपरैश्चत्वारो भगवदतिशयाः प्रकाश्यन्ते । तत्र पूर्वार्धेन पूजातिशयः [१]**तत्त्वज्ञमि**त्यनेन ज्ञानातिशयः, तत्त्वं सकलपर्यायोपेतसकलवस्तुस्वरूपं जानातीति व्युत्पत्तेः । **तत्त्वदेष्टारमि**त्यनेन तु वचनातिशयः, तत्त्वं दिशतीति व्युत्पत्तिसिद्धेः, **जिनोत्तममि**त्यनेन [२]च अपायापगमातिशयः, अपायभूता हि रागादयस्तदपगमेन भगवतः स्वरूपलाभः, स च जयति रागद्वेषमोहरूपान्तरङ्गान् रिपूनिति शब्दार्थात् सिद्धः । तदेवं चतुरतिशयप्रतिपादनद्वारेण भगवतो महावीरस्य पारमार्थिकी स्तुतिरभिहितेति भाव इति श्लोकयुग्मार्थः ॥१-२॥

अथ धर्मपदवाच्यमाह –

**वचनादविरुद्धाद् यदनुष्ठानं यथोदितम् ।**
**मैत्र्यादिभावसम्मिश्रं, तद्धर्म इति कीर्त्यते ॥३॥**

उच्यते इति **वचनमा**गम**स्तस्माद्व**चनमनुसृत्येत्यर्थः, **यत् अनुष्ठानम्** इहलोकपरलोकावपेक्ष्य हेयोपादेययोरर्थयोरिहैव शास्त्रे वक्ष्यमाणलक्षणयोर्हानोपादानलक्षणा प्रवृत्तिरिति '**तद्धर्म इति कीर्त्यते**' इत्युत्तरेण योगः । कीदृशाद्वचनाद् ? इत्याह –'**अविरुद्धात्**' कषच्छेदतापेषु अविघटमानात् तत्र विधिप्रतिषेधयोर्बाहुल्येनोपवर्णनं कषशुद्धिः । पदे पदे तद्योगक्षेमकारिक्रियोपदर्शनं छेदशुद्धिः । विधिप्रतिषेधतद्विषया[३]णां जीवादिपदार्थानां च स्याद्वादपरीक्षया याथात्म्येन समर्थनं तापशुद्धिः । तदुक्तं **धर्मबिन्दौ** –

**''विधिप्रतिषेधौ कषः''** ॥ [ सू० ९३ ] **''तत्संभवपालनाचेष्टोक्तिश्छेदः''** ॥ [ सू० ९४ ] **''उभयनिबन्धनभाववादस्ताप''** ॥ [ सू० ९५ ] इति ।

---

१. तत्त्वज्ञमित्यन्येन–मु० C । २. तु–मु० सि० मूल । ३. ०नां– P.L. ।

तच्चाविरुद्धं वचनं जिनप्रणीतमेव, निमित्तशुद्धेः, वचनस्य हि वक्ता निमित्त-मन्तरङ्गम्, तस्य च रागद्वेषमोहपारतन्त्र्यमशुद्धिस्तेभ्यो वितथवचनप्रवृत्तेः, न चैषाऽशुद्धिर्जिने भगवति, जिनत्वविरोधात्, जयति रागद्वेषमोहरूपान्तरङ्गान् रिपूनिति-शब्दार्थानुपपत्तेः । तपनदहनादिशब्दवदन्वर्थतया चास्याभ्युपगमाद् । निमित्तशुद्ध्य-भावान्नाजिनप्रणीतवचनमविरुद्धम्, यतः कारणस्वरूपानुविधायि कार्यम्, तन्न, दुष्ट-कारणारब्धं कार्यमदुष्टं भवितुमर्हति निम्बबीजादिवेक्षुयष्टिरिति । अन्यथा कारणव्यवस्थो-परमप्रसङ्गात् । यच्च यदृच्छाप्रणयनप्रवृत्तेषु तीर्थान्तरीयेषु रागादिमत्स्वपि घुणाक्षरो-त्किरणव्यवहारेण क्वचित्किञ्चिदविरुद्धमपि वचनमुपलभ्यते, मार्गानुसारिबुद्धौ वा प्राणिनि क्वचित्, तदपि जिनप्रणीतमेव, तन्मूलत्वात् तस्य । तदुक्त**मुपदेशपदे** –

''**सव्वप्पवायमूलं, दुवालसंगं जाओ जिणक्खायं ।**
**रयणागरतुल्लं खलु, तो सव्वं सुन्दरं तम्मि**'' ॥ [ उप.प.गा./६९४ ] त्ति ॥

कीदृशमनुष्ठानं धर्मः ? इत्याह – '**यथोदितं**' यथा येन प्रकारेण कालाद्याराधनानु-साररूपेण उदितम् प्रतिपादितम्, तत्रैवाविरुद्धे वचने इति गम्यम्, अन्यथाप्रवृत्तौ तु तद्द्वेषित्वमेवापद्यते न तु धर्मः । यथोक्तम् –

''**तत्कारी स्यात् स नियमात्, तद्द्वेषी चेति यो जडः ।**
**आगमार्थे तमुल्लङ्घ्य, तत एव प्रवर्त्तते**'' ॥ [ यो.बिं./श्लो.२४० ] इति ॥

**धर्मदासक्षमाश्रमणै**रप्युक्तम् –

''**जो जहवायं न कुणइ, मिच्छद्दिट्ठी[१] तओ उ को अन्नो ।**
**वड्ढेई मिच्छत्तं, परस्स संकं जणेमाणो त्ति** ॥ [ उ.मा.गा./५०४ ]

पुनरपि कीदृशम्? इत्याह –'**मैत्र्यादिभावसंमिश्रं**' मैत्र्यादयः मैत्री-मुदिता-करुणा-माध्यस्थ्यलक्षणा ये भावा-अन्तःकरणपरिणामाः तत्पूर्वकाश्च बाह्यचेष्टाविशेषाः सत्त्वगुणाऽधिकक्लिश्यमानाऽविनेयेषु, तैः संमिश्रं-संयुक्तम्, मैत्र्यादिभावानां निःश्रेयसाभ्युदयफलधर्मकल्पद्रुममूलत्वेन शास्त्रान्तरेषु प्रतिपादनात् ।

[[२]तत्र समस्तसत्त्वविषयः स्नेहपरिणामो मैत्री १। [३]नमनप्रसादादिभिर्गुणाधि-केष्वभिव्यज्यमानान्तर्भक्तिरनुरागः प्रमोदः २। दीनादिष्वनुकम्पा करुणा ३। [४]अराग-

१. मिच्छादिट्ठी-मु० । L.P.C. उपदेशमालायामपि मिच्छद्दिट्ठी इति । २. तुला-योगाशास्त्रवृत्तिः ४।११७, प. ९४९ । ३. वदनप्रसादा० इति योगशास्त्रवृत्तौ प. ९४९ । ४. अरागद्वेषभावो-मु० C. । 'मध्यस्थः अरागद्वेषवृत्तिः, तद्भावो माध्यस्थ्यम्' इति योगशास्त्रवृत्तौ प. ९४९ ।

द्वेषवृत्तिभावो माध्यस्थ्यमिति ४।] **तदे**वंविधमनुष्ठानं '**धर्म इति**' दुर्गतिपतज्जन्तुजातधारणात् स्वर्गादिसुगतौ धानाच्च धर्म इत्येवंरूपत्वेन '**कीर्त्त्यते**' शब्द्यते सकलाऽकल्पितभावकल्पनाकल्पनकुशलैः सुधीभिरिति ।

[नन्वेवं वचनानुष्ठानं धर्म इति प्राप्तम् , तथा च प्रीतिभक्त्यसङ्गानुष्ठानेष्वव्याप्तिरिति चेत् ? न, वचनव्यवहारक्रियारूपधर्मस्यैवात्र लक्ष्यत्वेनाव्याप्त्यभावादिति। वस्तुतः प्रीतिभक्तित्वे इच्छागतजातिविशेषौ, तद्वज्जन्यत्वेन प्रीतिभक्त्यनुष्ठानयोर्भेदः, वचनानुष्ठानत्वं वचनस्मरणनियतप्रवृत्तिकत्वम् , एतत्त्रितयभिन्नानुष्ठानत्वम् असङ्गानुष्ठानत्वं निर्विकल्पस्वरसवाहिप्रवृत्तिकत्वं वा । इह तु वचनादित्यत्र वेदात् प्रवृत्तिरित्यत्रैव प्रयोज्यत्वार्थिका पञ्चमी, तथा च—वचनप्रयोज्यप्रवृत्तिकत्वं लक्षणमिति न कुत्राप्यव्याप्तिदोषावकाशः[१]। प्रीतिभक्त्यसङ्गानुष्ठानानामपि वचनप्रयोज्यत्वानपायात् ।][२]

''**धर्मश्चित्तप्रभवो, यतः क्रियाधिकरणाश्रयं कार्यम् ।**
**मलविगमेनैतत् खलु, पुष्ट्यादिमदेष विज्ञेयः ॥१॥ [ षोड.३/२ ]**
**रागादयो मलाः खल्वागमसद्योगतो विगम एषाम् ।**
**तदयं क्रियात एव हि, पुष्टिश्चित्तस्य शुद्धस्य[३] ( शुद्धिश्च चित्तस्य ) ॥२॥ [ षोड.३/३ ]**
**पुष्टिः पुण्योपचयः, शुद्धिः पापक्षयेण निर्मलता ।**
**अनुबन्धिनि द्वयेऽस्मिन् , क्रमेण मुक्तिः परा ज्ञेया'' ॥३॥ [ षोड.३/४ ]**

इत्यादि **षोडशकग्र**[४]न्थानुसारेण तु पुष्टिशुद्धिमच्चित्तं भावधर्मस्य लक्षणम्। तदनुगता क्रिया च व्यवहारधर्मस्येति पर्यवसन्नम् । प्रतिपादितं चेत्थमेव महोपाध्याय**श्रीयशोविजयगणि**भिरपि स्वकृत**द्वात्रिंशिका**याम्। इत्थं च शुद्धानुष्ठानजन्या कर्ममलापगमलक्षणा सम्यग्दर्शनादिनिर्वाणबीजलाभफला जीवशुद्धिरेव धर्मः । यच्चेहाविरुद्धवचनादनुष्ठानं धर्म इत्युच्यते तत्तूपचारात् । [५]यथानड्वलोदकं पादरोगः । एतेन व्यवहारभावधर्मयोरुभयोरपि लक्षणे उपपादिते भवतः, भावलक्षणस्य द्रव्ये उपचारेणैव संभवात्। अन्योन्यानुगतत्वं च तयोस्तत्र तत्र प्रसिद्धमिति ? ॥३॥

---

१. °श्यम्-L ॥ २. इदं तु ध्येयम्—यद्यपि मुद्रिते महोपाध्यायश्रीमद्यशोविजयगणिवरप्रणीतटीप्पणीस्थानोपलक्षणस्य कोष्ठकस्य समाप्तिः तृतीयगाथाविवरणप्रान्ते कृता अस्ति किन्तु इत अग्रेतनांशे आयातस्य '**श्रीयशोविजयगणिभिरपि**' इत्याद्युल्लेखस्य टीप्पण्यंशासम्भवेन अस्माभिरिहैव कोष्ठकसमाप्तिः कृता अस्ति ॥ ३. शुद्धस्यः (शुद्धिश्च चित्तस्य)-मु० । शुद्धस्य-P.L.C. । पुष्टिः शुद्धिश्च चित्तस्य-इति षोडशके, 'पुष्टिः शुद्धिश्च वक्ष्यमाणा चित्तस्य सम्भवति'-इति तत्रैव महोपाध्यायवृत्तौ ॥ ४. षोडशग्रन्था P.L.C. ॥ ५. यथा तण्डुलो० L.C. । यथा तन्दुलो० P. ॥

प्रदर्शितं धर्मलक्षणम् अथामुमेव धर्मं भेदतः प्रभेदतश्च बिभणिषुराह –

**[१]स द्विधा स्यादनुष्ठातृगृहिव्रतिविभागतः ।**
**सामान्यतो विशेषाच्च, गृहिधर्मोऽप्ययं द्विधा ॥४॥**

'**सः**' यः पूर्वं प्रवक्तुमिष्टो धर्मो '**द्विधा**' द्वाभ्यां प्रकाराभ्यां '**स्याद्**' भवेत्, कुतः ? इत्याह –'**अनुष्ठातृगृहिव्रतिविभागतः**' इति अनुष्ठातारौ धर्मानुष्ठायकौ यौ गृहिव्रतिनौ तयोर्विभागतो विशेषात्, गृहस्थधर्मो यतिधर्मश्चेति भावः । तत्र गृहमस्यास्तीति गृही, तद्धर्मश्च नित्यनैमित्तिकानुष्ठानरूपः, व्रतानि महाव्रतानि विद्यन्ते यस्मिन् स व्रती, तद्धर्म्मश्च चरणकरणरूपः । तत्र च गृहिधर्म विशिनष्टि –'**गृहिधर्मोऽपीति**' '**अयं**' साक्षादेव हृदि वर्त्तमानतया प्रत्यक्षो गृहिधर्म उक्तलक्षणः, किं पुनः सामान्यधर्मः ? इत्यपिशब्दार्थः '**द्विधा**' द्विभेदः, द्वैविध्यं दर्शयति –'**सामान्यतो विशेषाच्च**' इति तत्र सामान्यतो नाम [२]सर्वविशिष्टजनसाधारणानुष्ठानरूपः, विशेषात् सम्यग्दर्शनाणुव्रतादिप्रतिपत्तिरूपः, चकार उक्तसमुच्चय इति ॥४॥

तत्राद्यं भेदं दशभिः श्लोकैर्दर्शयति –

**[३]तत्र सामान्यतो गेहिधर्मो [१]न्यायार्जितं धनम् ।**
**[२]वैवाह्यमन्यगोत्रीयैः, कुलशीलसमैः समम् ॥५॥**
**[३]शिष्टाचारप्रशंसा[४]रिषड्वर्गत्यजनं तथा ।**
**[५]इन्द्रियाणां जय [६]उपप्लुतस्थानविवर्ज्जनम् ॥६॥**
**[७]सुप्रातिवेश्मिके स्थानेऽनतिप्रकटगुप्तके ।**
**अनेकनिर्गमद्वारं गृहस्य विनिवेशनम् ॥७॥**
**[८]पापभीरूकता [९]ख्यातदेशाचारप्रपालनम् ।**
**[१०]सर्वेष्वनपवादित्वं नृपादिषु विशेषतः ॥८॥**
**[११]आयोचितव्ययो [१२]वेषो, विभवाद्यनुसारतः ।**
**[१३]मातापित्रर्चनं [१४]सङ्गः [१५]सदाचारैः कृतज्ञता ॥९॥**

---

१. तुला-धर्मबिन्दुः सू० १।२ ॥ २. सर्वविशिष्टः जन्यसा० L. । सर्वजन सा० इति धर्मबिन्दुवृत्तौ प० ३ A ॥ ३. इत आरभ्य सवृत्तिकधर्मबिन्दुग्रन्थस्य [सू० १।३–५६, प. ३तः], सवृत्तिकयोगशास्त्रस्य [१।४७–५६, प. १४४ तः] च तुला कार्या ।

**[16]अजीर्णेऽभोजनं [17]काले भुक्तिः सात्म्यादलौल्यतः ।**
**[18]वृत्तस्थज्ञानवृद्धार्हा [19]गर्हितेष्वप्रवर्त्तनम् ॥१०॥**
**[20]भर्त्तव्यभरणं [21]दीर्घदृष्टि[22]र्धर्मश्रुति[23]र्दया ।**
**[24]अष्टबुद्धिगुणैर्योगः [25]पक्षपातो गुणेषु च ॥११॥**
**[26]सदाऽनभिवेशश्च, [27]विशेषज्ञानमन्वहम् ।**
**[28]यथार्हमतिथौ साधौ दीने च प्रतिपन्नता ॥१२॥**
**[29]अन्योऽन्यानुपघातेन त्रिवर्गस्यापि साधनम् ।**
**[30]अदेशाकालाऽचरणं [31]बलाबलविचारणम् ॥१३॥**
**[1][32]यथार्हलोकयात्रा च [33]परोपकृतिपाटवम् ।**
**[34]ह्री [35]सौम्यता चेति जिनैः प्रज्ञप्तो हितकारिभिः ॥१४॥ दशभिः कुलकम् ॥**

'**तत्र**' तयोः सामान्यविशेषरूपयोः गृहस्थधर्मयोर्वक्तुमुपक्रान्तयोर्मध्ये '**सामान्यतो [2]गेहिधर्मः**'' '**इति**' अमुना प्रकारेण '**हितकारिभिः**' परोपकरणशीलैर्जिनैरर्हद्भिः '**प्रज्ञप्तः**' प्ररूपित इत्यन्तेन संबन्धः । स च यथा –'**न्यायार्जितं धनम्**' इत्यादि ।

तत्र स्वामिद्रोहमित्रद्रोहविश्वसितवञ्चनचौर्यादिगर्ह्यार्थोपार्जनपरिहारेणार्थोपार्जनोपायभूतः स्वस्ववर्णानुरूपः सदाचारो न्यायस्तेनार्जितं संपादितं धनम्, अयमेव धर्मः, न्यायार्जितं हि धनम् अशङ्कनीयतया स्वशरीरेण तत्फलभोगान्मित्रस्वजनादौ संविभागकरणाच्चेह लोकहिताय । यदाह –

> ''**सर्वत्र शुचयो धीराः, स्वकर्मबलगर्विताः ।**
> **[3]स्वकर्मनिन्दितात्मानः, पापाः सर्वत्र शङ्किताः**'' ॥१॥ [ ]

सत्पात्रेषु विनियोगात् दीनादौ कृपया वितरणाच्च परलोकहिताय, पठ्यते च धार्मिकस्य धनस्य शास्त्रान्तरे दानस्थानम् । यथा –

> ''**पात्रे दीनादिवर्गे च, दानं विधिवदिष्यते ।**
> **पोष्यवर्गाविरोधेन, न विरुद्धं स्वतश्च यत्**'' ॥१॥ [ **यो.बिं./श्लो.१२१** ]

अन्यायोपात्तं तु लोकद्वयेऽप्यहितायैव, इहलोके विरुद्धकारिणो वधबन्धादयो दोषाः, परलोके नरकादिगमनादयः । यद्यपि कस्यचित् पापानुबन्धिपुण्यानुभावादैहलोकिकी विपन्न दृश्यते तथाप्यायत्यामवश्यम्भाविन्येव । यतः –

---

१. यथार्हं–मु० ॥ २. गृहिधर्मः–P.C । गृहधर्मः L ॥ ३. कुकर्म० इति योगशास्त्रवृत्तौ प. १४६ ॥

**"पापेनैवार्थरागान्धः, फलमाप्नोति यत् क्वचित् ।**
**बडिशामिषवत् तत् , तमविनाश्य न जीर्यति"** ॥ [ ]

इति न्याय एव परमार्थतोऽर्थोपार्जनोपायोपनिषत् यदाह –

**"निपानमिव मण्डूकाः, सरः पूर्णमिवाण्डजाः ।**
**शुभकर्माणमायान्ति, विवशाः सर्वसम्पदः"** ॥१॥ [ ]

ईदृशं धनं च गार्हस्थ्ये प्रधानकारणत्वेन धर्मतयाऽऽदौ निर्दिष्टम् , अन्यथा तदभावे निर्वाहविच्छेदेन गृहस्थस्य सर्वश्रुतक्रियोपरमप्रसङ्गादधर्म एव स्यात् । पठ्यते च –

**"वित्तीविच्छेयम्मि य, गिहिणो सीयंति सव्वकिरियाउ ।**
**निरविक्खस्स[1] उ जुत्तो, संपुन्नो संजमो चेव"** ॥१॥ [ पञ्चा.४।७ ] त्ति[2] १।

तथा गोत्रं नाम तथाविधैकपुरुषभवो वंशः, अन्यच्च तद् गोत्रं चान्यगोत्रम् , तत्र भवा अन्यगोत्रीयाः, अतिचिरकालव्यवधानवशेन त्रुटितगोत्रसम्बन्धास्तै**रन्यगोत्रीयैः,** कीदृशैस्तैः ? **कुलशीलसमैः** तत्र[3] कुलं पितृपितामहादिपूर्वपुरुषवंशः, शीलं मद्यमांसनिशाभोजनादिपरिहाररूपो व्यवहारः, ताभ्यां समैस्तुल्यैः **'समं'** सार्द्धम् , किम् ? इत्याह –**'वैवाह्यं'** विवाह एव तत्कर्म वा वैवाह्यम् , सामान्यतो गृहस्थधर्म इति प्रकृतं अग्रेऽपि सर्वत्र ज्ञेयम् । अत्र **लौकिकनीतिशास्त्र**मिदम् –

**द्वादशवर्षा स्त्री, षोडशवर्षः पुमान् , तौ विवाहयोग्यौ, विवाहपूर्वो व्यवहारः कुटुम्बोत्पादनपरिपालनारूपश्चतुरो वर्णान् कुलीनान् करोति, युक्तितो वरणविधानम् , अग्निदेवादिसाक्षिकं च पाणिग्रहणं विवाहः । स[4] च लोकेऽष्टविधः । तत्र अलङ्कृत्य कन्यादानं ब्राह्मयो[5] विवाहः १। विभवविनियोगेन कन्यादानं प्राजापत्यः २। गोमिथुनदानपूर्वमार्षः ३। यत्र[6] यज्ञार्थमृत्विजः कन्याप्रदानमेव दक्षिणा स दैवः ४। एते धर्म्या विवाहाश्चत्वारः, गृहस्थोचितदेवपूजनादिव्यवहाराणामेतदन्तरङ्गकारणत्वात् । मातुः पितुर्बन्धूनां चाप्रामाण्यात् परस्परानुरागेण समवायाद् गान्धर्वः ५। पणबन्धेन कन्याप्रदानमासुरः ६। प्रसह्य कन्याग्रहणाद्राक्षसः ७। सुप्तप्रमत्तकन्याग्रहणात् पैशाचः ८। एते च चत्वारोऽधर्म्याः ।**

---

१. नरवक्खस्स C.P.L. । २. इति–मु० ॥ ३. तत्र L.P.नास्ति ॥ ४. तुला–श्राद्धविधिवृत्तिः प. १७४ ॥ ५. ब्राह्मो–इति–धर्मबिन्दु–योगशास्त्र–श्राद्धविधिवृत्तिषु ॥ ६. त(य)त्र–मु । धर्मबिन्दु–योगशास्त्र–श्राद्धविधिवृत्तिषु C.P.L. प्रतिषु च यत्र–इति पाठः ।

**यदि वधूवरयोरनपवादं परस्परं रुचिरस्ति तदा अधर्म्या अपि धर्म्याः । शुद्धकलत्रलाभफलो विवाहः, तत्फलं च सुजातसुतसन्ततिरनुपहता चित्तनिर्वृत्तिर्गृहकृत्यसुविहितत्वमाभिजात्याचारविशुद्धत्वं देवातिथिबान्धवसत्कारानवद्यत्वं चेति । कुलवधूरक्षणोपायास्त्वेते गृहकर्मविनियोगः, परिमितोऽर्थसंयोगः, अस्वातन्त्र्यम् , [1]सदा च मातृतुल्यस्त्रीलोकावरोधनमिति ।२ ॥५॥**

तथा शिष्यन्ते स्म **शिष्टा** वृत्तस्थज्ञानवृद्धसेवोपलब्धविशुद्धशिक्षा मनुजविशेषास्**तेषामाचार**श्चरितं यथा —

**''लोकापवादभीरुत्वं, दीनाभ्युद्धरणादरः ।**
**कृतज्ञता सुदाक्षिण्यं, सदाचारः प्रकीर्त्तितः ॥१॥ [ यो.बिं./श्लो.१२६ ]**
**सर्वत्र निन्दासंत्यागो, वर्णवादश्च साधुषु ।**
**आपद्यदैन्यमत्यन्तं, तद्वत् सम्पदि नम्रता ॥२॥ [ यो.बिं./श्लो.१२७ ]**
**प्रस्तावे मितभाषित्वमविसंवादनं तथा ।**
**प्रतिपन्नक्रिया [2]चेति, कुलधर्मानुपालनम् ॥३॥ [ यो.बिं./श्लो.१२८ ]**
**असद्व्ययपरित्यागः, स्थाने चैव क्रिया सदा ।**
**प्रधानकार्ये निर्बन्धः, प्रमादस्य विवर्ज्जनम् ॥४॥ [ यो.बिं./श्लो.१२९ ]**
**लोकाचारानुवृत्तिश्च, [3]सर्वत्रोचितपालनम् ।**
**प्रवृत्तिर्गर्हिते नेति प्राणैः कण्ठगतैरपि'' ॥५॥ [ यो.बिं./श्लो.१३० ]** इत्यादि,

**तस्य प्रशंसा** प्रशंसनं पुरस्कार इत्यर्थः तथा —

**''गुणेषु यत्नः क्रियतां, किमाटोपैः प्रयोजनम् ।**
**विक्रीयन्ते न घण्टाभिर्गावः क्षीरविवर्जिताः'' ॥१॥ [ ]**

तथा- **''शुद्धा प्रसिद्धमायान्ति, लघवोऽपीह नेतरे ।**
**तमस्यपि विलोक्यन्ते, दन्तिदन्ता न दन्तिनः'' ॥२॥ [ ]** इति ॥

तथा **अरयः** शत्रवस्तेषां **षड्वर्गो**ऽयुक्तितः प्रयुक्ताः कामक्रोधलोभमानमदहर्षाः, यतस्ते शिष्टगृहस्थानामन्तरङ्गाऽरिकार्यम् कुर्वन्ति तत्र —परपरिगृहीतास्वनूढासु वा स्त्रीषु

---

१. सदाचारमातृ० मु० । धर्मबिन्दु-योगशास्त्र[प. १४८]श्राद्धविधि[प. ६ A]वृत्तिषु P.L.C. प्रतिष्वपि सदा च मातृ० इति पाठः ॥ २. चैतत्—इति योगबिन्दौ ॥ ३. सर्वत्रौचित्यपालनम्—इति योगबिन्दौ धर्मबिन्दुवृत्तौ च प. ६ B ॥

दुरभिसन्धिः कामः । अविचार्य परस्यात्मनो [१]वापायहेतुर(म)न्तर्बहिर्वा स्फुरणात्मा क्रोधः । दानार्हेषु स्वधनाप्रदानम् अकारणपरधनग्रहणं च लोभः । दुरभिनिवेशारोहो युक्तोक्ताग्रहणं वा मानः । कुलबलैश्वर्यविद्यारूपादिभिरहङ्कारकरणं परप्रधर्षनिबन्धनं वा मदः । निर्निमित्तमन्यस्य दुःखोत्पादनेन स्वस्य द्यूतपापर्द्ध्यानर्थसंश्रयेण वा मनःप्रमोदो हर्षः । ततोऽस्यारिषड्वर्गस्य **त्यजनम**नासेवनम् । एतेषां च त्यजनीयत्वमपायहेतुत्वात् । यदाह –

''**दाण्डक्यो नाम भोजः कामात् ब्राह्मणकन्यामभिमन्यमानः सबन्धुराष्ट्रो विननाश, करालश्च वैदेहः १। क्रोधाज्जनमेजयो ब्राह्मणेषु विक्रान्तस्तालजङ्घश्च भृगुषु २। लोभा-दैलश्चातुर्व[२]र्ण्यमभ्याहारायमाणः, सौवीरश्चाजबिन्दुः ३। मानाद्रावणः परदारान् प्रार्थयन्, दुर्योधनो [३]राज्यादंशं च ४। मदाद्दम्भोद्भवो भूतावमानी, हैहयश्चार्जुनः ५। हर्षाद्वातापिरग-स्त्यमभ्यासादयन्, वृष्णिसङ्घश्च द्वैपायनम्**''[ **कौटिलीयमर्थशास्त्रम् १।६** ] इति ६।४ ।

[४]तथा इन्द्रियाणां श्रोत्रादीन्द्रियाणां जय अत्यन्ताऽऽसक्तिपरिहारेण स्वस्वविकार-निरोधः । इन्द्रियजयो हि पुरुषाणां परमसम्पदे भवति । यदाह –

''**आपदां कथितः पन्था, इन्द्रियाणामसंयमः ।**
**तज्जयः सम्पदां मार्गो, येनेष्टं तेन गम्यताम्** ॥१॥ [ ]
**इन्द्रियाण्येव तत्सर्वं, यत्स्वर्गनरकावुभौ ।**
**[५]निगृहीतानि सृष्टानि, स्वर्गाय नरकाय च**'' ॥२॥ [ ] इति ।

सर्वथेन्द्रियजयस्तु यतीनामेव, इह तु सामान्यतो गृहस्थधर्म एवाधिकृतस्तेनैवमुक्तं युक्तमिति ५। तथा **उपप्लुतं** स्वचक्रपरचक्रविक्षोभात् दुर्भिक्षमारीतिजनविरोधादेश्चास्वस्थीभूतं यत् **स्थानं** ग्रामनगरादि तस्य **विवर्ज्जनं** परिहरणम्, अत्यज्यमाने हि तस्मिन् धर्मार्थकामानां पूर्वार्जितानां विनाशेन [६]नव्यानां चानुपार्जनेनोभयलोकभ्रंश एव स्यात् ६ ॥६॥

तथा न विद्यन्ते **नैकानि** बहूनि निर्गमद्वाराणि निःसरणमार्गा यत्र यथा स्यात्तथा, **गृहस्य** अगारस्य, **विनिवेशनं** स्थापनम्, बहुषु हि निर्गमेषु अनुपलक्ष्यमाणनिर्गमप्रवेशानां दुष्टलोकानामापाते स्त्रीद्रविणादिविप्लवः स्यात् । [अत्र [७]चानेकद्वारतायाः प्रतिषेधेन

१. वापायहेतुरन्तर्बहिर्वा–P.L. ॥ २. °मत्याहा° इति योगशास्त्रवृत्तौ । [प० १५९] पाठः ॥ ३. राज्याद् भ्रंशं च ४ मदादम्भो० मु० । P.L. प्रत्योः कौटीलीयार्थशास्त्रे योगशास्त्रवृत्तौ [प० १५९] च राज्यादंशं च मदाद्दम्भो० इति ॥ ४. (तथा) मु० ॥ ५. निगृहीतविसृष्टानि–इति योगशास्त्रवृत्तौ प० १६०॥ ६. नवानां–इति धर्मबिन्दुवृत्तौ प० ७ A, योगशास्त्रवृत्तौ १५१ च ॥ ७. चानेकद्वारताया निषेध(धे)न विधि० मु० । चानेकद्वारतायाः प्रतिषेधेन विधिराक्षिप्यते–इति योगशास्त्रवृत्तौ प० १४९ ॥

विरोधिविधिराक्षिप्यते, ततः प्रतिनियतद्वारसुरक्षितगृहे गृहस्थः स्यादिति लभ्यते[1] ?] । तथाविधमपि गृहं **स्थान** एव निवेशितुं युक्तम्, नास्थाने । स्थानं तु शल्यादिदोषरहितं बहल–दूर्वाप्रवाल–कुशस्तम्ब–प्रशस्तवर्णगन्धमृत्तिका–सुस्वादुजलोद्गमनिधानादिमच्च । स्थानगुणदोषपरिज्ञानं च शकुनस्वप्नोपश्रुतिप्रभृतिनिमित्तादिबलेन । स्थानमेव विशिनष्टि '**सुप्रातिवेश्मिके**' इति, शोभनाः शीलादिसंपन्नाः प्रातिवेश्मिका यत्र तस्मिन्, कुप्रातिवेश्मिकत्वे पुनः "**संसर्गजा दोषगुणा भवन्ति**" [ ] इति वचनात् निश्चितं गुणहानिरुत्पद्यत इति तन्निषेधः, दुष्प्रातिवेश्मिकास्त्वेते शास्त्रप्रसिद्धाः ।

"**खरिआ तिरिक्खजोणी, तालायरसमणमाहण सुसाणा ।**
**वग्गुरि अहवा गुम्मिअ, हरिएस पुलिंद मच्छंधा**[2]" ॥१॥ [ ओघ.नि./गा.७६७ ]

पुनः किम्भूते स्थाने ? '**अनतिप्रकटगुप्तके**' अतिप्रकटमसन्निहितगृहान्तरतयाऽतिप्रकाशम्, अतिगुप्तं गृहान्तरैरेव सर्वतः सन्निहितैरनुपलक्ष्यमाणद्वारादिविभागतयातीव प्रच्छन्नम्, तदेवातिगुप्तकं स्वार्थे[3] कः नातिप्रकटम् अनतिप्रकटम्, नातिगुप्तकमनतिगुप्तकम्, ततोऽनतिप्रकटं चाऽनतिगुप्तकं चेति द्वन्द्वस्तस्मिन्। अतिप्रकटे स्थाने क्रियमाणं गृहं परिपार्श्वतो निरावरणतया चौरादयो निःशङ्कमनसोऽभिभवेयुः । अतिगुप्ते[4] च सर्वतो गृहान्तरैर्निरुद्धत्वान्न स्वशोभां लभते। प्रदीपनाद्युपद्रवेषु च दुःखनिर्गमप्रवेशं च स्यात् ७ ॥७॥

तथा **पापानि** दृष्टादृष्टापायकारणानि कर्माणि तेभ्यो **भीरुकता** भयम्, तत्र दृष्टापायकारणानि चौर्यपारदारिकत्वद्यूतरमणादीनि इहलोकेऽपि सकललोकसिद्धविडम्बनानि, अदृष्टापायकारणानि मद्यमांससेवनादीनि शास्त्रनिरूपितनरकादियातनाफलानि भवन्तीति दृष्टादृष्टापायहेतुभ्यो दूरमात्मनो व्यावर्त्तनमिति तात्पर्यम् ।८।

तथा **ख्यातस्य** प्रसिद्धस्य तथाविधापरशिष्टसंमततया दूरं रूढिमागतस्य **देशाचारस्य** सकलमण्डलव्यवहाररूपस्य भोजनाच्छादनादिचित्रक्रियात्मकस्य **प्रपालन**मनुवर्त्तनं तदाचारातिलङ्घने तद्देशवासिजनतया सह विरोधसंभवेनाकल्याणलाभः स्यादिति । पठन्ति चात्र **लौकिकाः –**

"**यद्यपि सकलां योगी, छिद्रां पश्यति मेदिनीम् ।**
**तथापि लौकिकाचारं, मनसापि च लङ्घयेत्**" ॥१॥ [ ] इति ९ ॥

---

१. लभ्येत–म० C P । लभ्यत–L मू०–लभेत–L सं० । लभ्यते–इति योगशास्त्रवृत्तौ प० १४९ ॥ २. मच्छिदा–मु० C. ॥ ३. स्वार्थिकः कः (कोऽण्)–मु० । स्वार्थिकोण–P.L.C. ॥ ४. अतिगुप्तं–L धर्मबिन्दुवृत्तौ [प० ७ B] च ॥

तथा **सर्वेषु** जघन्योत्तममध्यमभेदेषु जन्तुषु अपवादोऽश्लाघा तं करोतीत्येवंशीलोऽपवादी तत्प्रतिषेधा**दनपवादी तस्य भावस्तत्त्वम्** अपवादाभाषणमित्यर्थः । परापवादो हि बहुदोषः । यदाह **वाचकचक्रवर्त्ती –**

''**परपरिभवपरिवादादात्मोत्कर्षाच्च बध्यते कर्म ।**
**नीचैर्गोत्रं प्रतिभवमनेकभवकोटिदुर्मोचम्**'' ॥१॥ [ **प्रशम. का./१००** ]

तदेवं सकलजनगोचरोऽप्यवर्णवादो न श्रेयान्, किं पुनः नृपामात्यपुरोहितादिषु बहुजनमान्येषु । नृपाद्यवर्णवादात्तु प्राणनाशादिरपि दोषः स्यात् । अत उक्तं – ''**नृपादिषु विशेषत**'' इति १० ॥८॥

तथा **आयस्य** वृद्ध्यादिप्रयुक्तधनधान्याद्युपचयरूपस्**योचित**श्चतुर्भागादितया योग्यो वित्तस्य **व्ययो** भर्त्तव्यभरणस्वभोग-देवा-ऽतिथिपूजनादिषु प्रयोजनेषु विनियोजनम् । तथा च **नीतिशास्त्रम् –**

''**पादमायान्निधिं कुर्यात्, पादं वित्ताय घट्टयेत्**[1] **।**
**धर्मोपभोगयोः पादं, पादं भर्त्तव्यपोषणे**'' ॥१॥ [ ]

केचित् त्वाहुः –

''**आयादर्द्धं नियुञ्जीत, धर्मे समधिकं ततः ।**
**शेषेण शेषं कुर्वीत, यत्नतस्तुच्छमैहिकम्**'' ॥१॥ [ ]

आयानुचितो हि व्ययो रोग इव [2]शरीरे(रं) कृशीकृत्य विभवसारमखिलव्यवहारासमर्थं पुरुषं करोति । पठ्यते च –

''**आयव्ययमनालोच्य, यस्तु वैश्रमणायते ।**
**अचिरेणैव कालेन, सोऽत्र वै** [3]**श्रमणायते**'' ॥**११**॥ [ ] ११ इति ।

तथा **विभवादीनां** वित्तवयोऽवस्थानिवासस्थानादीना**मनुसारत** आनुरूप्येण **वेषो** वस्त्राभरणादिभोगः । लोकपरिहासाद्यनास्पदतया योग्यो वेषः कार्य इति भावः । यो हि सत्यप्याये कार्प्पण्याद् व्ययं न करोति, [4]सत्यपि वित्ते कुचेलत्वादिधर्मा भवति, स लोकगर्हितो धर्मेऽप्यनधिकारी स्यात् । प्रसन्ननेपथ्यो हि पुमान् मङ्गलमूर्त्तिर्भवति मङ्गलाच्चश्रीसमुत्पत्तिः । यथोक्तम् –

---

१. खट्टये–इति योगशास्त्रवृत्तौ प० १५२ ॥ २. शरेरे–P.L. । शरीरं–इति योगशास्त्रवृत्तौ प० १५२ ॥ ३. श्रवणायते–इति धर्मबिन्दु[प० ८ B] योगशास्त्र[प० १५२)वृत्त्योः ॥ ४. सत्यपि (च) वित्ते–मु० । C.P.L. प्रतिषु योगशास्त्रवृत्तापि [प० १५१] च–नास्ति ।

''**श्रीर्मङ्गलात् प्रभवति, प्रागल्भ्याच्च प्रवर्द्धते ।**
**दाक्ष्यात्तु कुरुते मूलं, संयमात् प्रतितिष्ठति**'' ॥१॥ [ ]

मूलमित्यनुबन्धनम् , प्रतितिष्ठतीति प्रतिष्ठां लभत इति १२ ।

तथा माता च पिता च मातापितरौ ''**आ द्वन्द्वे**'' [ **सिद्ध हे० ३-२-३९** ] इत्यात्त्वम् , मातुश्चाभ्यर्हितत्वात् पूर्वनिपातः । यन्**मनुः** –

''**उपाध्याया दशाचार्य, आचार्याणां शतं पिता ।**
**सहस्त्रं तु पितुर्माता, गौरवेणातिरिच्यते**'' ॥ [ **मनुस्मृतिः २।१४५** ] इति ।

**माता** जननी **पिता** जनकस्या**रर्चनम्** पूजनम् , त्रिसन्ध्यं प्रणामकरणेन परलोकहितानुष्ठाननियोजनेन सकलव्यापारेषु तदाज्ञया प्रवृत्त्या वर्णगन्धादिप्रधानस्य पुष्पफलादिवस्तुन उपढौकनेन तद्भोगे भोगेन चान्नादीनां तदीयव्रतविशेषोल्लङ्घनव्यापारादिलक्षणौचित्यातिक्रमवर्जनेनेति १३।

तथा सत् शोभन आचार इहपरलोकहितावहा प्रवृत्तिर्येषां ते **सदाचारास्तैः** सह सङ्गः सङ्गतिः । असत्सङ्गे हि सपदि शीलं विलीयेत । यदाह –

''**यदि सत्संगनिरतो, भविष्यसि भविष्यसि ।**
**अथासज्जनगोष्ठीषु , पतिष्यसि पतिष्यसि**'' ॥१॥ [ ] इति ।

तथा-''**सङ्गः सर्वात्मना त्याज्यः, स चेत् त्यक्तुं न शक्यते ।**
**स सद्भिः सह कर्त्तव्यः, सन्तः सङ्गस्य भेषजम्**'' ॥२॥ [ ] इति च १४ ।

तथा **कृतस्य ज्ञता** ज्ञानम् अनिह्नवः, एवं हि तस्य महान् कुशललाभो भवति, अत एव कृतोपकारं शिरसि भारमिव मन्यमानाः कदापि न विस्मरन्ति साधवस्तदुक्तम् –

''**प्रथमवयसि पीतं तोयमल्पं स्मरन्तः,**
**शिरसि निहितभारा नालिकेरा नराणाम् ।**
**उदकममृतकल्पं दद्युराजीवितान्तं,**
**न हि कृतमुपकारं साधवो विस्मरन्ति**'' ॥१॥ [ ] इति १५ ॥९॥

तथा **अजीर्णे**ऽजरणे पूर्वभोजनस्य, अथवाऽर्जीणे परिपाकमनागते पूर्वभोजनेऽर्द्धजीर्णे इत्यर्थः, **अभोजनं** भोजनत्यागः । अजीर्णभोजने हि सर्वरोगमूलस्य वृद्धिरेव कृता भवति । यदाह –''**अजीर्णप्रभवा रोगाः**'' [ ] इति । तत्राजीर्णं चतुर्विधम् –

''**आमं विदग्धं विष्टब्धं, रसशेषं तथा परम् ।**
**आमे तु द्रवगन्धित्वं विदग्धे धूमगन्धिता**'' ॥१॥ [ ]

[1]विष्टब्धे गात्रभङ्गोऽत्र, रसशेषे तु जाड्यता'' । [ ]

द्रवगन्धित्वमिति द्रवस्य गूथस्य कुथिततक्रादेरिव गन्धो यस्यास्ति तत्तथा तद्भावस्तत्त्वमिति ।

''मलवातयोर्विगन्धो, विड्भेदो गात्रगौरवमरौच्यम् ।
अविशुद्धश्चोद्गारः [2]षडजीर्णव्यक्तलिङ्गानि ॥१॥ [ ]
मूर्छा, प्रलापो, वमथुः, प्रसेकः, सदनं, भ्रमः ।
उपद्रवा भवन्त्येते, मरणं वाप्यजीर्णतः'' ॥२॥ [ ]

प्रसेक इति अधिकनिष्ठीवनप्रवृत्तिः, सदनमिति अङ्गग्लानिरिति १६।

तथा **काले** बुभुक्षोदयावसरलक्षणे **सात्म्यात्** ।

''पानाहारादयो [3]यस्याऽ( स्य )विरुद्धाः प्रकृतेरपि ।
[4]सुखित्वाय च [5]कल्प्यन्ते, तत्सात्म्यमिति गीयते'' ॥१॥ [ ]

इत्येवंलक्षणा**दलौल्यतश्च,** चकारो गम्यः, आकाङ्क्षातिरेकादधिकभोजनलक्षणलौल्यत्यागात् **भुक्ति**र्भोजनम् , अयमभिप्रायः—आजन्म सात्म्येन भुक्तं विषमपि पथ्यं भवति । परम् असात्म्यमपि पथ्यं सेवेत न पुनः सात्म्यप्राप्तमप्यपथ्यम् । सर्वं बलवतः पथ्यमिति मन्वानः कालकूटं खादन्सुशिक्षितो हि विषतन्त्रज्ञो म्रियत एव कदाचिद्विषात् । सात्म्यमपि च लौल्यपरिहारेण यथाग्निबलमेव भुञ्जीत, अतिरिक्तभोजनं हि वमन-विरेचन-मरणादिना न साधु भवति । **''यो हि मितं भुङ्क्ते स बहु भुङ्क्ते''** [ ] अक्षुधितेन ह्यमृतमपि भुक्तं भवति विषम् , तथा क्षुत्कालातिक्रमादन्नद्वेषो देहसादश्च भवति, विध्यातेऽग्नौ किं नामेन्धनं कुर्यादिति १७।

तथा वृत्तमनाचारपरिहारः सम्यगाचारपालनं च तत्र तिष्ठन्तीति **वृत्तस्थाः** । ज्ञानं हेयोपादेयवस्तुनिश्चयस्तेन **वृद्धा** महान्तः । वृतस्थाश्च ते ज्ञानवृद्धाश्च तेषा**मर्हा** सेवाऽभ्युत्थानादिलक्षणा । गुणभाजो हि पुरुषाः सम्यक् सेव्यमाना नियमात् कल्पतरव इव सदुपदेशादिफलैः फलन्ति । यथोक्तम् —

१. विष्टब्धे (च) गात्रभङ्गा, रसशेषे–मु० । C.L. प्रत्योः धर्मबिन्दुवृत्तावपि [५. १२ A] विष्टब्धे गात्रभङ्गोऽत्र रसशेषे–इति पाठः । विष्टब्धेर्गात्रभङ्गोऽत्र० P ॥ २. षडजीर्णे–मु० । C.L.P. योगशास्त्र[प० १५४]धर्मबिन्दु[प० ४३]वृत्त्योरपि-षडजीर्ण० इति ॥ ३. यस्यावि० P.L.C. । यस्य-इति धर्मबिन्दु-योगशास्त्रवृत्त्योः [प० ११ B/प० १५४] यस्माद्विरुद्धाः-इति श्राद्धविधिप्रकरणवृत्तौ प० ३१० ॥ ४. सुखित्वायावलोक्यन्ते–इति धर्मबिन्दुवृत्तौ ॥ ५. कल्प्यन्ते–मु० । कल्पन्ते–इति योगशास्त्रवृत्तौ प० १५४ ॥

**''उपदेशः शुभो नित्यं, दर्शनं धर्मचारिणाम् ।**

**स्थाने विनय इत्येतत्साधुसेवाफलं महत्'' ॥१॥** इति [ **शास्त्र.वा./श्लो. ७** ] १८।

तथा **गर्हितेषु** लोकलोकोत्तरयोरनादरणीयतया निन्दनीयेषु मद्यमांससेवनपर-रामाभिगमनादिपापस्थानेषु [१]**अप्रवृत्ति**र्गाढं मनोवाक्कायानामनवतारः । आचारशुद्धौ हि सामान्यायामपि कुलाद्युत्पत्तौ पुरुषस्य माहात्म्यमुपपद्यते । यथोक्तम् –

**''न [२]कुलं हीनवृत्तस्य, प्रमाणमिति मे मतिः ।**

**अन्त्येष्वपि हि जातानां, वृत्तमेव विशिष्यते'' ॥१॥** [ ] इति १९।

तथा **भर्त्तव्यानां** भर्त्तुं योग्यानां मातापितृगृहिण्यपत्यसमाश्रितस्वजनलोकतथा-विधभृत्यप्रभृतीनां **भरणं** पोषणम् , तत्र त्रीण्यवश्यं भर्त्तव्यानि, मातापितरौ सती भार्या अलब्धबलानि चापत्यानीति । यत उक्तम् –

**''वृद्धौ च मातापितरौ, सतीं भार्यां सुतान् शिशून् ।**

**अप्यकर्मशतं कृत्वा, भर्त्तव्यान् मनुरब्रवीत्'' ॥१॥** [ ]

विभवसम्पत्तौ चान्यानपि । अन्यत्राप्युक्तम् –

**''चत्वारि ते तात गृहे वसन्तु , श्रियाभिजुष्टस्य गृहस्थधर्मे ।**

**सखा दरिद्रो भगिनी व्यपत्या, जातिश्च वृद्धो विधनः कुलीनः'' ॥१॥**[ ]इति २०।

तथा दीर्घकालभावित्वा**द्दीर्घस्या**र्थस्यानर्थस्य च **दृष्टिः** पर्यालोचनं सुविमृश्य-कारित्वमित्यर्थः । अविमृश्यकारित्वे हि महादोषसम्भवात् । यत उक्तम् –

**''सहसा विदधीत न, क्रियामविवेकः परमापदां पदम् ।**

**वृणुते हि विमृश्यकारिणं, गुणलुब्धाः स्वयमेव सम्पदः'' ॥१॥** [ ] २१ इति ।

तथा **धर्मस्या**भ्युदयनिःश्रेयसहेतोरिहैव शास्त्रे वक्तुं प्रस्तावितस्य कान्तकान्ता-समेतयुवजनकिन्नरारब्धगीताकर्णनोदाहरणेन **श्रुतिः** श्रवणम् , तस्माच्च मनःखेदापनोदादि गुणः स्यात् । यदाह –

**''[३]क्लान्तमपोज्झति खेदं, तप्तं निर्वाति बुध्यते मूढम् ।**

**स्थिरतामेति व्याकुलमुपयुक्तसुभाषितं चेतः'' ॥१॥** [ ]

---

१. अप्रवृत्तिर्गा(वर्त्तनं गाढं) मनो० मु० ॥ २. कुलं वृत्तहीनस्य–इति धर्मबिन्दुवृत्तौ प० २७॥ ३. क्लान्तमपोह्यति-मु० । क्लान्तमपोज्झति–इति धर्मबिन्दु[प० ५५]योगशास्त्र[प० १५३] वृत्त्योः ॥

प्रत्यहं धर्मश्रवणं चोत्तरोत्तरगुणप्रतिपत्तिसाधनत्वात्प्रधानमिति २२।

तथा **दया**[१]-दुःखितजन्तुदुःखत्राणाभिलाषः, दयालुर्हि सर्वसत्त्वहितकाङ्क्षितया परमयतनावान् सर्वमेव धर्मं क्षमादिसारमाराधयति । तदुक्तम्—"**धर्मस्य दया मूलम्**" **[ प्रशमरति का०/१६८ ]** इत्यादि २३ ।

तथा **अष्टभिर्बुद्धिगुणैर्योगः** समागमः, बुद्धिगुणाः शुश्रूषादयः । ते त्वमी—

"**शुश्रूषा श्रवणं चैव, ग्रहणं धारणं तथा ।**
**ऊहोऽपोहोऽर्थविज्ञानं, तत्त्वज्ञानं च धीगुणाः" ॥१॥ [ आ.उ./श्लो.४३ ]**

तत्र शुश्रूषा-श्रोतुमिच्छा, श्रवणमाकर्णनम्, ग्रहणं-शास्त्रार्थोपादानम्, धारणम्-अविस्मरणम्, ऊहो—विज्ञातमर्थमवलम्ब्य अन्येषु तथाविधेषु व्याप्त्या वितर्कणम्, अपोह—उक्ति-युक्तिभ्यां विरुद्धादर्थात् हिंसादिकात् प्रत्यपायसम्भावनया व्यावर्त्तनम्, अथवा ऊहः सामान्यज्ञानमपोहो विशेषज्ञानम्, अर्थविज्ञानमूहापोहयोगान्मोह-सन्देहविपर्यासव्युदासेन ज्ञानम्, तत्त्वज्ञानमूहापोहविशुद्धमिदमित्थमेवेति निश्चयः । शुश्रूषादिभिर्हि [२]उपाहितप्रज्ञाप्रकर्षः पुमान्न कदाचिदकल्याणमाप्नोति । एते च बुद्धिगुणा यथासंभवं द्रष्टव्याः २४।

तथा **गुणेषु** सौजन्यौदार्य-धैर्य-दाक्षिण्य-स्थैर्य-प्रिय-प्रथमाभिभाषणादिषु स्वपरयोरुपकारकारणेष्वात्मधर्मेषु **पक्षपातो** बहुमानं[३] तत्प्रशंसासाहाय्यदानादिनानुकूला प्रवृत्तिः । गुणपक्षपातिनो हि जीवा अवन्ध्यपुण्यबीजनिषेकेणेहामुत्र च गुणग्रामसम्पद-मारोहन्ति २५। ॥११॥

तथा **अनभिनिवेशो**ऽभिनिवेशराहित्यम्, अभिनिवेशश्च नीतिपथमनागतस्यापि पराभिभवपरिणामेन कार्यस्यारम्भः, स च नीचानां भवति । यदाह—

"**दर्पः श्रमयति नीचान्निष्फलनयविगुणदुष्करारम्भैः ।**
**स्त्रोतोविलोमतरणव्यसनिभिरायस्यते मत्स्यैः" ॥१॥ [ ]**

अनभिनिवेशश्च कादाचित्कः शाठ्यान्नीचानामपि सम्भवत्यत आह—'**सदा**' इति २६।

तथा [वस्त्व][४]वस्तुनोः कृत्या-कृत्ययोः स्वपरयो**र्विशेषस्यान्**तरस्य **ज्ञानं** निश्चयः ।

---

१. दया-मु० नास्ति ॥ २. उपाहितप्रकर्षः-मु० । उपादितप्रकर्षः-P । उपाहितप्रज्ञाप्रकर्षणं प्रकर्षः L । उपाहितप्रज्ञाप्रकर्षः पुमान्न-इति योगशास्त्रवृत्तौ प० १५३ ॥ ३. ०न-धर्मबिन्दुवृत्तौ [प० ५७] योगशास्त्रवृत्तौ [प० १५७] च ॥ ४. वस्तुनोः-मु० L.P.C. । वस्त्ववस्तुनोः-इति योगशास्त्रवृत्तौ [प० १५८] ॥

अविशेषज्ञो हि नरः पशोर्नातिरिच्येत, अथवा वि[१]शेषस्यात्मन एव गुणदोषाधिरोह-लक्षणस्य ज्ञानम् । यदाह –

''**प्रत्यहं प्रत्यवेक्षेत, नरश्चरितमात्मनः ।**
**किं नु मे पशुभिस्तुल्यं, किं नु सत्पुरुषैरिति !**'' ॥ [ ]

तच्च कदाचिदितरस्यापि भवतीत्यत आह –'**अन्वहम्**' इति निरन्तरमित्यर्थः २७।

तथा न विद्यते सततप्रवृत्तातिविशदैकाकारानुष्ठानतया तिथ्यादिदिनविभागो यस्य सोऽतिथिः । यथोक्तम् –

''**तिथिपर्वोत्सवाः सर्वे, त्यक्ता येन महात्मना ।**
**अतिथिं तं विजानीयाच्छेषमभ्यागतं विदुः**'' ॥१॥ [ ]

**साधुः** शिष्टाचाररतः सकललोकाविगीतः, **दीनो** ''**दीङ् क्षये**'' [ **दिवादौ धा० १०१** ] इतिवचनात् क्षीणसकलधर्मार्थकामाराधनशक्तिः, तेषु **प्रतिपन्नता** प्रतिपत्तिरन्न-पानादिरूपोपचार इतियावत् । कथं ? **यथार्हम्** औचित्यानतिक्रमेण *[२]औचित्यं च यस्यातिथ्यादेरुत्तममध्यमजघन्यरूपाप्रतिपत्तिरित्यर्थः, तस्यानुल्लङ्घनेन, तदुल्लङ्घने हि शेषाः सन्तोऽपि गुणा असन्त इव भवन्ति । यदाह –*

''**औचित्यमेकमेकत्र, गुणानां कोटिरेकतः ।**
**विषायते गुणग्राम, औचित्यपरिवर्जितः**'' ॥ [ ] इति २८ ॥१२॥

तथा त्रिवर्गो धर्मार्थकामास्तत्र यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः, यतः सर्व-प्रयोजनसिद्धिः सोऽर्थः, यत आभिमानिकरसानुविद्धा सर्वेन्द्रियप्रीतिः स कामः । ततो-**ऽन्योऽन्यस्य** परस्परस्या**ऽनुपघातेना**पीडनेन **त्रिवर्गस्यापि** उक्तस्वरूपस्य न त्वेकैक-स्येत्यपिशब्दार्थः, साधनं सेवनम् । त्रिवर्गसाधनविकलस्योभयभवभ्रष्टत्वेन जीवन-नैरर्थक्यात् । यदाह –

''**यस्य त्रिवर्गशून्यानि, दिनान्यायान्ति यान्ति च ।**
**स लोहकारभस्त्रेव, श्वसन्नपि न जीवति**'' ॥१॥ [ ]

तत्र धर्मार्थयोरुपघातेन तादात्विकविषयसुखलुब्धो वनगज इव को नाम न

---

१. विशेषमात्मन–इति योगशास्त्रवृत्तौ [प० १५७] ॥ २. ** चिह्नद्वयमध्यवर्ती पाठः मु० नास्ति । तुला–''तदौचित्यबाधनमुत्तममुनिदर्शनेनेति ॥४०॥ तेषां देवादीनामौचित्यं–योग्यत्वं यस्य देवादेरुत्तममध्यमजघन्यरूपा या प्रतिपत्तिरित्यर्थः तस्य 'अबाधनम्' अनुल्लङ्घने शेषाः सन्तोऽपि गुणा असन्त इव भवन्ति यत उक्तम्–औचित्य''....धर्मबिन्दुवृत्तिः प० ११ A ॥

भवत्यास्पदमापदाम् । न च तस्य धनं धर्मः शरीरं वा यस्य कामेऽत्यन्ताशक्तिः । धर्मकामातिक्रमाद् धनमुपार्जितं परे अनुभवन्ति । स्वयं तु परं पापस्य भाजनम्, सिंह इव सिन्धुरवधात् । अर्थकामातिक्रमेण च धर्मसेवा यतीनामेव धर्मो न गृहस्थानाम् । न च धर्मबाधयार्थकामौ सेवेत । बीजभोजिनः कुटुम्बिन इव नास्त्यधार्मिकस्यायत्यां किमपि कल्याणम् । स खलु सुखी योऽमुत्रसुखाविरोधेनेहलोकसुखमनुभवति । तस्माद्धर्माबाधनेन कामार्थयोर्मतिमता यतितव्यम् । एवमर्थबाधया धर्मकामौ सेवमानस्य ऋणाधिकत्वम्, कामबाधया धर्मार्थौ सेवमानस्य गार्हस्थ्याभावः स्यात् ।

एवं च तादात्विक –मूलहर–कदर्येषु धर्मार्थकामानामन्योऽन्यबाधा सुलभैव। तथाहि– यः किमप्यसञ्चित्योत्पन्नमर्थमपव्येति स तादात्विकः, यः पितृपैतामहमर्थमन्यायेन भक्षयति स मूलहरः, यो भृत्यात्मपीडाभ्यामर्थं सञ्चिनोति न तु क्वचिदपि व्ययते स कदर्यः । तत्र तादात्विक–मूलहरयोरर्थभ्रंशेन धर्म कामयोर्विनाशान्नास्ति कल्याणम्, कदर्यस्य त्वर्थसङ्ग्रहो राज–दायाद–तस्कराणां निधिः न तु धर्मकामयोर्हेतुरिति । अनेन त्रिवर्गबाधा गृहस्थस्य कर्त्तुमनुचितेति प्रतिपादितम्, यदा तु दैववशाद् बाधा सम्भवति तदोत्तरोत्तरबाधायां पूर्वस्य पूर्वस्य बाधा रक्षणीया । तथाहि–कामबाधायां धर्मार्थयोर्बाधा रक्षणीया, तयोः सतोः कामस्य सुकरोत्पादत्वात्, कार्मार्थयोस्तु बाधायां धर्मो रक्षणीयः धर्ममूलत्वादर्थकामयोः । उक्तं च –

''**धर्मश्चेन्नावसीदेत, कपालेनापि जीवतः ।**
**आढ्योऽस्मीत्यवगन्तव्यं, धर्मवित्ता हि साधवः**'' ॥१॥ [ ] २९ ॥१३॥

तथा प्रतिषिद्धो देशोऽदेशः, प्रतिषिद्धः कालोऽकालः, तयो**रदेशाकालयोरचरणं** चरणाभावः, अदेशाकालचारी हि चौरादिभ्योऽवश्यमुपद्रवमाप्नोति ३०।

तथा **बलं** शक्तिः, स्वस्य परस्य वा द्रव्य–क्षेत्र–काल–भावकृतं सामर्थ्यम्, **अबलम**पि तथैव, तयो**र्विचारणं**–पर्यालोचनम् । बलाबलपरिज्ञाने हि सर्वः सफल आरम्भः, अन्यथा तु विपर्ययः । यदाह –

''**स्थाने शमवतां शक्त्या, व्यायामे वृद्धिरङ्गिनाम् ।**
**अयथाबलमारम्भो, निदानं क्षयसम्पदः**'' ॥१॥ [ ] इति ।

अत एव च पठ्यते –

''**कः कालः ? कानि मित्राणि ? को देशः कौ व्ययागमौ ? ।**
**कश्चाहं ? का च मे शक्तिरिति चिन्त्यं मुहुर्मुहुः** ॥१॥'' [ ] इति ३१।

तथा **यथार्हा** या यस्योचिता **लोकयात्रा** लोकचित्तानुवृत्तिरूपो व्यवहारः सा विधेया । यथार्हलोकयात्रातिक्रमे हि लोकचित्तविराधनेन तेषामात्मन्यनादेयतया[१](ता) परिणामापादनेन स्वलाघवमेवोत्पादितं भवति । एवं चान्यस्यापि स्वगतस्य सम्यगाचारस्य लघुत्वमेवोपनीतं स्यादिति । उक्तं च –

**''लोकः खल्वाधारः, सर्वेषां धर्मचारिणां यस्मात् ।**
**तस्माल्लोकविरुद्धं, धर्मविरुद्धं च संत्याज्यम्''** ॥१॥ [ प्रश.र./श्लो.१३१ ] ३२॥

तथा **परोपकृतौ** परोपकारे **पाटवं** पटुत्वम्, परोपकारपरो हि पुमान् सर्वस्य नेत्रामृताञ्जनम् ३३।

तथा **ह्री**र्लज्जा वैयात्याभावः इतियावत् । लज्जावान् हि प्राणप्रहाणेऽपि न प्रतिज्ञातमपजहाति । यथाह –

**''लज्जां गुणौघजननीं जननीमिवार्थामत्यन्तशुद्धहृदयामनुवर्त्तमानाः ।**
**तेजस्विनः सुखमसूनपि संत्यजन्ति, सत्यस्थितिव्यसनिनो न पुनः प्रतिज्ञाम्''** ॥१॥[ ]३४॥

तथा **सौम्यता** अक्रूराकारः, क्रूरो हि लोकस्योद्वेगकारणं सौम्यश्च सर्वजनसुखाराध्यो भवतीति ३५ ॥१६॥

उक्तः सप्रभेदः सामान्यतो गृहिधर्मः । अत्रेदमवधेयम्–[१ न्यायार्जितधनसुस्थानगृहनिवेशनमातापित्रर्चनादीनां सिद्धान्ते कर्त्तव्यताबोधकप्रत्यक्षवचनानुपलम्भेन धर्मलक्षणस्य योजयितुमशक्यत्वेऽपि तत्तदधिकारिशिष्टाचारमहिम्ना तादृश२विधिवचनानामुन्नयनान्नासंलग्नता दोष इति । एवमप्यप्राप्तांश एव विधिप्रवृत्तेः प्राप्तेषु धनादिषु न्यायार्जितत्वाद्यंशानामेव विधेयत्वाद् विशिष्टे कथं धर्मत्वम् ? विध्यस्पर्शादिति चेत् ? सत्यम्, अनद्यूताविधेयतयोर्विषयताविशेषयोः प्राप्त्यप्राप्तिनियत्वेऽपि इष्टसाधनत्वादिरूपविध्यर्थस्य विशिष्ट एवं सम्भवात् । कथं तर्हि सतताभ्यास-विषयाभ्यास-भावाभ्यासानां मध्ये भावाभ्यासस्यैव धर्मानुष्ठानत्वमनुमत**मुपदेशपदे,** सतताभ्यासविषयाभ्यासयोश्च निषिद्धम् इति चेत् ? न कथञ्चित् सम्यग्दर्शनाद्यनुगतभावग्राहिनिश्चयनयाभिप्रायेणैव तन्निषेधाद्, अपुनर्बन्धकाद्युचितभावलेशग्राहिव्यवहारनयाभिप्रायेण तत्समर्थनादेव । तथा च तद्ग्रन्थः –

**''अन्ने भणंति तिविहं, सययविसयभावजोगओ णवरं ।**
**धम्मंमि अणुट्ठाणं, जहुत्तरपहाणरूवं तु** ॥१॥ [ उ.प./गा.९४९ ]

---

१. ०नादेयतया–P.L.C. । ०नादेयता–इति धर्मबिन्दुवृत्तौ प० ४६॥

**एअं च ण जुत्तिखमं, णिच्छयणयजोगओ जओ विसए।**
**भावेण य परिहीणं, धम्माणुट्ठाणमो किह णु ॥२॥** [ उप.प.गा./९५० ]
**ववहारओ उ जुज्जइ, तहा तहा अपुणबंधगाईसु त्ति''** [ उप.प.गा./९५१पू. ]

एतदर्थो यथा –अन्ये आचार्या, ब्रुवते[2], त्रिविधं त्रिप्रकारं सततविषयभावयोगतः योगशब्दस्य प्रत्येकमभिसम्बन्धात् सततादिपदानां सतताभ्यासादौ लाक्षणिकत्वात् सतताभ्यास-विषयाभ्यास-भावाभ्यासयोगादित्यर्थः । नवरं केवलम्, धर्मेऽनुष्ठानं यथोत्तरं प्रधानरूपं तुरेवकारार्थः यद्यदुत्तरं तदेव ततः[3] प्रधानमित्यर्थः । तत्र सतताभ्यासो नित्यमेव मातापितृविनयादिवृत्तिः, विषयाभ्यासो मोक्षमार्गनायकेऽर्हल्लक्षणे पौनःपुन्येन पूजनादिप्रवृत्तिः, भावाभ्यासो भावानां सम्यग्दर्शनादीनां भवोद्वेगेन भूयो भूयः परिशीलनम् ॥१॥

एतच्च द्विविधमनुष्ठानम्, न युक्तिक्षमं नोपपत्तिसहम्, निश्चयनययोगेन निश्चयनयाभिप्रायेण, यतो मातापित्रादिविनयस्वभावे सतताभ्यासे सम्यग्दर्शनाद्यनाराधनारूपे धर्मानुष्ठानं दूरापास्तमेव, विषय इत्यनन्तरम् अपिगम्यः, विषयेऽपि अर्हदादिपूजालक्षणे विषयाभ्यासेऽपि, भावेन भववैराग्यादिना परिहीणं धर्मानुष्ठानम्, कथं नु ? न कथञ्चिदित्यर्थः, उकारः[4] प्राकृतत्वात्, परमार्थोपयोगरूपत्वाद् धर्मानुष्ठानस्य, निश्चयनयमते भावाभ्यास एव धर्मानुष्ठानं नान्यद्वयमिति निगर्वः ।

व्यवहारतस्तु व्यवहारनयादेशात्तु । युज्यते द्वयमपि, तथा २ तेन २ प्रकारेणापुनर्बन्धकादिषु अपुनर्बन्धकप्रभृतिषु । तत्रापुनर्बन्धकः पापं न तीव्रभावात् करोतीत्याद्युक्तलक्षणः, आदिशब्दादपुनर्बन्धकस्यैव विशिष्टोत्तरावस्थाविशेषभाजौ मार्गाभिमुखमार्गपतितौ अविरतसम्यग्दृष्ट्यादयश्च गृह्यन्त इति । ननु तथापि **धर्मसंग्रहिण्यां** निश्चयनयमतेन शैलेशीचरमसमय एव धर्म उक्तः, तत्पूर्वसमयेषु तु[5] तत्साधनस्यैव सम्भवः –

''**सो उभयक्खयहेऊ, सीलेसीचरमसमयभावी जो ।**
**सेसो पुण णिच्छयओ, तस्सेव पसाहगो भणिउ''॥** [ ध.सं.गा./२६ ] त्ति वचनात् ।

अत्र तु निश्चयतो धर्मानुष्ठानसम्भवश्चाप्रमत्तसंयतानामेवेति कथं न विरोधः ? इति चेत्, न, **धर्मसंग्रहिण्यां** धर्मस्यैवाभिधित्सितत्वेन तत्र धर्मपदव्युत्पत्तिनिमित्तग्राहकैवम्भूतरूपनिश्चयनयस्य शैलेशीचरमसमय एव प्रवृत्तिसम्भवात् । अत्र तु धर्मानुष्ठानपदव्युत्पत्तिनिमित्तग्राहकैवम्भूतरूपनिश्चयनयस्याप्रमत्तसंयत एव प्रवृत्तिसम्भवेन विरोधलेशस्याप्य-

---

१. ०न्ति-मु० ॥ २. भणन्ति-मु० ॥ ३. ततं (तत्तदेव) प्रधान० मु० ॥ ४. ओकारः-मु० ॥ ५. (तु)-मु० । तु-सि० नास्ति ॥

नवकाशात् । हन्तैवं निरुपचरितो भावाभ्यासोऽप्रमत्तसंयतस्यैव, प्रमत्तसंयतदेशविरता-विरतसम्यग्दृशां त्वापेक्षिकत्वेनौपचारिक एव प्राप्त इत्यपुनर्बन्धकस्यैवौपचारिक इति कथं युज्यते ? इति चेद्, यथा पर्यवनयव्युत्क्रान्तार्थग्राही द्रव्योपयोगः परमाणावेवापश्चिम-विकल्पनिर्वचनः, तथा निश्चयनयव्युत्क्रान्तार्थग्राही व्यवहारनयोऽप्यपुनर्बन्धक एव तथेत्यभिप्रायादिति गृहाण । अत एव –

''**अपुनर्बन्धकस्यायं, व्यवहारेण तात्त्विकः ।**
**अध्यात्मभावनारूपो, निश्चयेनोत्तरस्य तु**'' ॥ इत्युक्तं **योगबिन्दौ** । [ श्लो.३६९ ]

यत्त्वत्रापुनर्बन्धकस्याप्युपलक्षणत्वात् सम्यग्दृष्ट्यादीनामपि वृत्तौ ग्रहणं कृतम्, तदपेक्षयैवेति तत्त्वम् । तदयं परमार्थः–निश्चयेनानुपचरितं धर्मानुष्ठानमप्रमत्तसंयतानामेव, प्रमत्तसंयतादीनां त्वपेक्षया निश्चयव्यवहाराभ्याम्, अपुनर्बन्धकस्य तु व्यवहारेणैव, तेन सामान्यतो गृहिधर्मो व्यवहारेणापुनर्बन्धकापेक्षयैवेति स्थितमिति] ॥१४॥

सप्रभेदं सामान्यतो गृहिधर्ममभिधाय साम्प्रतं तत्फलं दर्शयन्नाह –

**एतद्युतं सुगार्हस्थ्यं, यः करोति नरः सुधीः ।**
**लोकद्वयेऽप्यसौ भूरि, सुखमाप्नोत्यनिन्दितम् ॥१५॥**

**एतेना**नन्तरोदितेन सामान्यगृहिधर्मेण **संयुतं**[१] सहितं '**सुगार्हस्थ्यं**' शोभनगृहस्थभावं '**यः**' कश्चित् पुण्यसम्पन्नः '**सुधीः**' प्रशस्तबुद्धिः '**नरः**', पुमान् '**करोति**' विदधाति '**असौ**' सुगार्हस्थ्यकर्त्ता '**लोकद्वयेऽपि**' इहलोकपरलोकरूपे, किं पुनरिहलोक एवेत्यपिशब्दार्थः '**अनिन्दितं**' शुभानुबन्धितयाऽगर्हणीयम्, '**भूरि**' प्रचुरं '**सुखं**' शर्म '**आप्नोति**' लभते ॥१५॥

इति प्रतिपादितं सामान्यतो गृहिधर्मफलम्, अथ एतद्गुणयुक्तस्य पुंसः सदृष्टान्त-मुत्तरोत्तरगुणवृद्धियोग्यतां दर्शयति –

**तस्मिन् प्रायः प्ररोहन्ति, धर्मबीजानि गेहिनि ।**
**विधिनोप्तानि बीजानि, विशुद्धायां यथा भुवि ॥१६॥**

'**प्रायो**' बाहुल्येन '**धर्मबीजानि**' लोकोत्तरधर्मकारणानि, तानि चामूनि **योगदृष्टि-समुच्चये** प्रतिपादितानि –

''**जिनेषु कुशलं चित्तं, तन्नमस्कार एव च ।**
**प्रणामादि च संशुद्धं, योगबीजमनुत्तमम्**'' ॥१॥ [ यो.दृ.स./श्लो.२३ ]

---

१. सं० मु० नास्ति ॥

D:\new/d-1.pm5\3rd proof

**उपादेयधियाऽत्यन्तं, संज्ञाविष्कम्भणान्वितम् ।**
**फलाभिसन्धिरहितं, संशुद्धं, ह्येतदीदृशम् ॥२॥** [ यो.दृ.स./श्लो.२५ ]

**आचार्यादिष्वपि ह्येतद्विशुद्धं भावयोगिषु ।**
**वैयावृत्त्यं च विधिवच्छुद्धाशयविशेषतः ॥३॥** [ यो.दृ.स./श्लो.२६ ]

**भवोद्वेगश्च सहजो, द्रव्याभिग्रहपालनम् ।**
**तथा सिद्धान्तमाश्रित्य, विधिना लेखनादि च ॥४॥** [ यो.दृ.स./श्लो.२७ ]

**[1]लेखनापूजनाभ्यां च, श्रवणं वाचनोद्ग्रहः ।**
**प्रकाशनाऽथ [2]स्वाध्यायश्चेतना भावनेति च ॥५॥** [ यो.दृ.स./श्लो.२८ ]

**दुःखितेषु [3]दयाऽत्यन्तमद्वेषो गुणवत्सु च ।**
**[4]औचित्यासेवनं चैव, सर्वत्रैवाविशेषतः ॥६॥** [ यो.दृ.स./श्लो.२९ ] इति ।

'**तस्मिन्**' पूर्वोक्तगुणभाजने '**गेहिनि**' गृहस्थे '**प्ररोहन्ति**' प्रकर्षेण स्वफलावन्ध्यकारणत्वेन रोहन्ति धर्मचिन्तादिलक्षणङ्कुरादिमन्ति जायन्ते । उक्तं च –

"**वपनं धर्मबीजस्य, सत्प्रशंसादि तद्गतम् ।**
**तच्चिन्ताद्यङ्कुरादि स्यात् , फलसिद्धिस्तु निर्वृतिः**" ॥१॥ [ ]

**चिन्तासच्छ्रुत्यनुष्ठानदेवमानुषसम्प[5]दः ।**
**क्रमेणाङ्कुरसत्काण्डनालपुष्पसमा मताः ॥२॥** [ ]

कीदृशानि सन्ति प्ररोहन्ति ? इत्याह –'**विधिना**' देशनार्हबालादिपुरुषौचित्यलक्षणेन '**उप्तानि**' निक्षिप्तानि, अनिक्षिप्तेषु हि तेषु कथमपि धर्मस्यानुदयात् । यत **उपदेशपदे** –

"**अकए बीजक्खेवे, जहा सुवासे वि न भवई सस्सं ।**
**तह धम्मबीजविरहे, न सुस्समाए वि तस्सस्सं**" ॥ [ उ.प.गा./२२४ ] ति ॥

**यथे**ति दृष्टान्तार्थः '**बीजानि**' शाल्यादीनि '**विशुद्धायाम्**' अनुपहतायां '**भुवि**' पृथिव्यां विधिनोप्तानि सन्ति, प्रायोग्रहणादकस्मादेव पक्वतथाभव्यत्वे क्वचि**न्मरुदेव्या**दावन्यथाभावेऽपि न विरोध इति ॥१६॥

---

१. लेखनापूजनादानं श्रवणं-इति योगदृष्टिसमुच्चये ॥ २. स्वाध्यायश्चिन्तना-इति योगदृष्टिसमुच्चये ॥ ३. दयात्यन्तं न द्वेषो L ॥ ४. औचित्यात् सेवनं-इति योगदृष्टिसमुच्चये ॥ ५. ०दा०- L.P.C. ॥

अथ पूर्वोक्तगुणवत एव संज्ञाविशेषविधिं तदवस्थाविशेषविधिं चाह –

**स आदिधार्मिकश्चित्रस्तत्तत्तन्त्रानुसारतः ।**
**इह तु स्वागमापेक्षं, लक्षणं परिगृह्यते ॥१७॥**

'**सः**' पूर्वोक्तगुणैरुत्तरोत्तरगुणवृद्धियोग्यतावान् '**आदिधार्मिकः**' [1]प्रथममेवारब्ध-स्थूलधर्माचारत्वेनादिधार्मिकसंज्ञया प्रसिद्धः, स च **तानि** २ **तन्त्राणि** शास्त्राणि **तदनुसारत**श्चित्रो विचित्राचारो भवति । भिन्नाचारस्थितानामप्यन्तःशुद्धिमतामपुनर्बन्ध-कत्वाविरोधात् । अपुनर्बन्धकस्य हि नानास्वरूपत्वात् तत्तत्तन्त्रोक्ताऽपि मोक्षार्था क्रिया घटते । तदुक्तं **योगबिन्दौ** –

''**अपुनर्बन्धकस्यैवं, सम्यग् नीत्योपपद्यते ।**
**तत्तत्तन्त्रोक्तमखिलमवस्थाभेदसंश्रयाद्**'' ॥१॥ [ **यो.बि./श्लो.२५१** ] इति ।

'**इह तु**' प्रक्रमे '**स्वागमापेक्षं**' स्वागमानुसारि '**लक्षणं**' व्यञ्जकं प्रक्रमादादिधार्मिकस्य '**परिगृह्यते**' आश्रीयते । यो ह्यन्यैः शिष्टबोधि-सत्त्वनिवृत्त-प्रकृत्याधिकारादिशब्दैरभिधीयते स एवास्माभिरादिधार्मिकाऽपुनर्बन्धकादिशब्दैरिति भावः । लक्षणमित्यत्रैकवचनं जात्यपेक्षम् , तल्लक्षणसम्पादनविधिश्चायमुक्तो **ललितविस्तरायाम्** –

''**परिहर्त्तव्योऽकल्याणमित्रयोगः, सेवितव्यानि कल्याणमित्राणि, न लङ्घनीयो-चितस्थितिः, अपेक्षितव्यो लोकमार्गः, माननीया गुरुसंहतिः, भवितव्यमेतत्तन्त्रेण, प्रवर्त्तितव्यं दानादौ, कर्त्तव्योदारपूजा भगवताम् , निरूपणीयः साधुविशेषः, श्रोतव्यं विधिना धर्मशास्त्रम् , भावनीयं महायत्नेन, प्रवर्त्तितव्यं विधानतः, अवलम्बनीयं धैर्यम् , पर्यालोचनीया आयतिः, अवलोकनीयो मृत्युः, भवितव्यं परलोकप्रधानेन, सेवितव्यो गुरुजनः, कर्त्तव्यं योगपटदर्शनम् , स्थापनीयं तद्रूपादि चेतसि, निरूपयितिव्या धारणा, परिहर्त्तव्यो विक्षेपमार्गः, यतितव्यं योगसिद्धौ, कारयितव्या भगवत्प्रतिमा, लेखनीयं भुवनेश्वरवचनम् , कर्त्तव्यो मङ्गलजापः, प्रतिपत्तव्यं चतुःशरणम् , गर्हितव्यानि दुष्कृतानि अनुमोदनीयं कुशलम् , पूजनीया मन्त्रदेवताः श्रोतव्यानि सच्चेष्टितानि, भावनीयमौदार्यम् , वर्त्तितव्यमुत्तमज्ञाने( ते )न[2] । एवम्भूतस्य येह प्रवृत्तिः सा सर्वैव साध्वी । मार्गानुसारी ह्ययं नियमादपुनर्बन्धकादिः । तदस्यैवम्भूतगुणसम्पदा( दो )भावात्[3] , अत आदित आरभ्यास्य प्रवृत्तिः सत्प्रवृत्तिरेव नैगमानुसारेण चित्रापि प्रस्थकप्रवृत्तिकल्पा । तदेतदधिकृत्याहुः –**

---

१. प्रथममेवारब्धं–P.L. ॥ २. ०ज्ञानेन–C.P.L. । ज्ञातेन–इति ललितविस्तरायाम् ॥ ३. सम्यदो भावात्–ल० वि० । सम्पदाभावात्–P.L.C. ॥

**''कुठारादिप्रवृत्तिरपि रूपनिर्माणप्रवृत्तिरेव ।'' [ ]**

**तद्वदादिधार्मिकस्य धर्मे कात्स्न्र्येन तद्गामिनी न तद्बाधिनीतिहार्द्दाः[1] तत्त्वाविरोधकं हृदयमस्य, ततः समन्तभद्रता, तन्मूलत्वात् सकलचेष्टितस्य, एवमतोऽपि विनिर्गतं[2] तत्तद्दर्शनानुसारतः सर्वमिह योज्यं सुप्तमण्डितप्रबोधदर्शनादि। न ह्येवं प्रवर्त्तमानो नेष्टसाधक इति। भग्नोऽप्येतद्यत्नलिङ्गोऽपुनर्बन्धक इति तं प्रत्युपदेशसाफल्यम्। नानिवृत्ताधिकारायां प्रकृतावेवम्भूत इति कापिलाः न अनवाप्तभवविपाक इति च सौगताः, अपुनर्बन्धकास्त्वेवंभूता इति जैना इति''। [ ललितविस्तरायां प्रान्ते ]**

अपुनर्बन्धकलक्षण चेदं प्रसङ्गेनात्रावसेयम् –

**''पावं ण तिव्वभावा, कुणइ ण बहु मन्नई भवं घोरं ।**
**उचिअट्ठिइं च सेवइ, सव्वत्थ वि अपुणबंधो त्ति'' ॥१॥ [ पञ्चा. ३।४, यो.श.गा. १३ ]**

**एतद्वृत्ति**र्यथा –''पापमशुद्धं कर्म तत्कारणत्वाद्धिंसाद्यपि पापं तत्, 'न' नैव, तीव्रभावाद् गाढसङ्क्लिष्टपरिणामात्, 'करोति' अत्यन्तोत्कटमिथ्यात्वादिक्षयोपशमेन लब्धात्मनैर्मल्यविशेषत्वात्, तीव्रेतिविशेषणादापन्नम् अतीव्रभावात् करोत्यपि तथाविधकर्मदोषात्। तथा 'न बहु मन्यते' न बहुमानविषयीकरोति, 'भवं' संसारं, 'घोरं' रौद्रं, घोरत्वावगमात्, तथा उचितस्थितमनुरूपप्रतिपत्तिं, चशब्दः समुच्चये, 'सेवते' भुजते कर्मलाघवात्, सर्वत्राप्यास्तामेकत्र देशकालावस्थापेक्षया समस्तेष्वपि देवाऽतिथि–माता–पितृप्रभृतिषु, मार्गानुसारिताभिमुखत्वे मयूरशिशुदृष्टान्ताद्। 'अपुनर्बन्धक' उक्तनिर्वचनो जीवः, 'इति' एवंविधक्रियालिङ्गो भवतीत्यलं प्रसङ्गेन'' **[ पञ्चाशकवृत्तिः प० ५४ ]** ॥१७॥

अथोक्तस्वरूपस्यादिधार्मिकस्य सद्धर्मदेशनायोग्यत्वं दर्शयति –

**स धर्मदेशनायोग्यो[3], मध्यस्थत्वाज्जिनैर्मतः ।**
**योगदृष्ट्युदयात् सार्थं, यद् गुणस्थानमादिमम् ॥१८॥**

'**सः**' पूर्वोक्तगुणसम्पत्त्या प्रसिद्ध आदिधार्मिको '**धर्मदेशनायोग्यः**' लोकोत्तरधर्मप्रज्ञापनार्हः '**जिनैः**, अर्हद्भिः '**मतः**' उपदिष्टः। कालतश्चायं चरमावर्त्तवर्त्येवेत्यनुक्तमपि ज्ञेयम्। यत उक्तम् **उपदेशपदे –**

**''घणमिच्छत्तो कालो, एत्थ अकालो उ होइ णायव्वो ।**
**कालो अ अपुणबंधगपभिई धीरेहिं[4] णिद्दिट्ठो'' ॥१॥ [ उ.प./गा.४३२ ]**

१. ०र्द्दम्–मु० । ०र्द्दाः–C.P. ललितवि० । हार्द्दा–L ॥ २. ०त–ल०वि० ॥ ३. ०ग्यः–मु० ॥ ४. ०हि–मु० ॥

**''णिच्छयओ पुण एसो, विन्नेओ गंठिभेअकालंमि[1] ।**
**एयंमि विहिसयपालणाउ[2] आरोग्गमेयाउ** ॥२॥ [ उ.प./गा.४३३ ]

एतद्वृत्तिर्यथा –घनं मिथ्यात्वं यत्र स तथा, कालोऽचरमावर्त्तलक्षणो 'अत्र' वचनौषधप्रयोगे 'अकालस्तु' अनवसर एव भवति विज्ञेयः। चरमावर्त्तलक्षणस्तु तथाभव्यत्व-परिपाकतो बीजाधानबीजोद्भेदबीजपोषणादिषु स्यादपि काल इति। अत एवाह –'कालस्तु' अवसरः पुनरपुनर्बन्धकप्रभृतिस्तत्रादिशब्दान्मार्गाभिमुखमार्गपतितौ गृह्येते । तत्र मार्गश्चेत-सोऽवक्रगमनं भुजङ्गनलिकायामतुल्यो[3] विशिष्टगुणस्थानावाप्तिप्रवणः स्वरसवाही क्षयोपशम-विशेषो हेतुस्वरूपफलशुद्धयभिमुख इत्यर्थस्तत्र पतितो भव्यविशेषो मार्गपतित इत्युच्यते । तदादिभावापन्नश्च मार्गाभिमुख इति । एतौ[4] चरमयथाप्रवृत्तकरणभागभाजावेव ज्ञेयौ । अपुनर्बन्धकोऽपुनर्बन्धककालः प्रभृतिर्यस्य स तथा, धीरैर्निर्दिष्टो व्यवहारत इति ।१।

निश्चयतस्तु कालो ग्रन्थिभेदकाल एव, यस्मिन् कालेऽपूर्वकरणाऽनिवृत्तिकरणाभ्यां ग्रन्थिभिन्नो भवति तस्मिन्नेवेत्यर्थः। यतोऽस्मिन् विधिनाऽवस्थोचितकृत्यकरणलक्षणेन सदा सर्वकालं या पालना वचनौषधस्य तया कृत्वाऽऽरोग्यं संसारव्याधिरोधलक्षणम् , एतस्मा-द्वचनौषधप्रयोगाद्भवति। अपुनर्बन्धकप्रभृतिषु वचनप्रयोगः क्रियमाणोऽपि न तथासूक्ष्मबोध-विधायकोऽनाभोगबहुलत्वात्[5] तत्कालस्य। भिन्नग्रन्थ्यादयस्तु व्यावृत्तमोहत्वेनातिनिपुणबुद्धितया तेषु २ कृत्येषु वर्त्तमानास्तत्कर्मव्याधिसमुच्छेदका जायन्त इति। ग्रन्थिभेदमेव पुरस्कुर्वन्नाह –

**''इयरा वि हंदि एयंमि, एस आरोग्गसाहगो चेव ।**
**पुग्गलपरिअट्टद्धं, जमूणमेअंमि संसारो''** ॥१॥ [ उ.प./गा.४३४ ]

व्याख्या –'इतरथापि' विधेः सदापालनमन्तरेणापि, हन्दीति पूर्ववत् , 'एतस्मिन्' ग्रन्थिभेदे कृते सति 'एष' वचनौषधप्रयोगः 'आरोग्यसाधकश्चैव' भावारोग्यनिष्पादक एव संपद्यते । तथा च पठ्यते –

**''लब्ध्वा मुहूर्तमपि ये परिवर्जयन्ति, सम्यक्त्वरत्नमनवद्यपदप्रदायि ।**
**यास्यन्ति[6] तेऽपि न चिरं भववारिराशौ, तद्बिभ्रतां चिरतरं किमिहास्ति वाच्यम्''** ॥१॥[ ]

अत्र हेतुमाह –'पुद्गलपरावर्त्तार्द्धं, यावत् , यद्यस्मादूर्ध्वं[7] न, किञ्चिद्धीनं 'एतस्मिन्' ग्रन्थिभेदे कृते सति 'संसारो' जीवानां तीर्थकराद्याशतनाबहुलानामपीति। **विंशिकाया**मपि –

---

१. °कालो उ-इति उपदेशपदे ॥ २. सतिवालणाउ–इति उपदेशपदे ॥ ३. भुजङ्गगमननलिका° इति उपदेशपदवृत्तौ प० २३५A ॥ ४. एतौ च चरम० इति उपदेशपदवृत्तौ प० २३५A ॥ ५. बहुलत्वात्तत्तत्कालस्य–मु० ॥ ६. भ्राम्यन्ति–इति उपदेशपदवृत्तौ ॥ ७. यद्यस्मादूनं–किञ्चिद्धीनं–इति उपदेशपदवृत्तौ ॥

"**अचरमपरिअट्टेसुं , कालो भवबालकालमो भणिओ ।**

**चरमो अ धम्मजुव्वणकालो तह चित्तभेओ त्ति** ॥१॥ [ चरमावर्त्तविं-१९ ]

**ता बीअपुव्वकालो, णेओ [1]भवबालकाल एवेह ।**

**इअरो उ धम्मजुव्वणकालो विहिलिंगगम्मु त्ति**" ॥२॥ [ विं.विं./५-१६ ]

ननु- "**गलमच्छभवविमोअगविसन्नभोईण जारिसो एसो ।**

**मोहा सुहो वि असुहो, तप्फलओ एवमेसो त्ति** ॥१॥ [ उ.प./गा. १८८ ]

[2]इति श्री**हरिभद्र**वचनानुसारेण विपर्यासयुक्तत्वान्मिथ्यादृशां शुभपरिणामोऽपि फलतोऽशुभ एवेति कथमादिधार्मिकस्य देशनायोग्यत्वमित्याशङ्कायामाह–'मध्यस्थत्वाद्' इति रागद्वेषरहितत्वात् [3]पूर्वोक्तगुणयोगादेव माध्यस्थ्योपसंपत्तेरित्यर्थः । मध्यस्थस्यैव चागमेषु धर्मार्हत्वप्रतिपादनात् । यतः –

"**रत्तो १ दुट्ठो २ मूढो ३, पुव्विं वुग्गहिओ अ ४ चत्तारि ।**

[4]**एए धम्माणरहा, धम्मारहा उ मज्झत्थो**" ॥१॥ [ गा.स./५९५ ] त्ति ।

श्री**हारिभद्र**वचनं तु कदाग्रहग्रस्ताभिग्रहिकमाश्रित्येति न विरोधः । इदमत्र हृदयम् – यः खलु मिथ्यादृशामपि केषाञ्चित्स्वपक्षनिबद्धोद्धुरानुबन्धानामपि प्रबलमोहत्वे सत्यपि कारणान्तरादुपजायमानो रागद्वेषमन्दतालक्षण उपशमो भूयानपि दृश्यते स पापानुबन्धिपुण्यहेतुत्वात् पर्यन्तदारुण एव, तत्फलसुखव्यामूढानां तेषां पुण्याभासकर्मोपरमे नरकादिपातावश्यम्भावादित्यसत्प्रवृत्तिरेवायम् , यश्च गुणवत्पुरुषप्रज्ञापनार्हत्वेन जिज्ञासादिगुणयोगान्मोहापकर्षप्रयुक्तरागद्वेषशक्तिप्रतिघातलक्षण उपशमः, स तु [5]सत्प्रवृत्तिरेवाग्रहनिवृत्तेः सदर्थपक्षपातसारत्वादिति ।

नन्वेवमपि स्वागमानुसारिण आदिधार्मिकस्योपपन्नं माध्यस्थ्यम् , परं तस्य विचित्राचारत्वेन भिन्नाचारस्थितानां तेषां स्वस्वमतनिष्ठानां कथं तदुपपद्यते ? तदभावे च कथं देशनायोग्यत्वम् ? इत्यत्राह –'**योगेत्यादि**' । **यद्य**स्माद्धेतोः, तस्येति शेषः '**योगदृष्ट्युदयात्**' योगदृष्टिप्रादुर्भावात् '**आदिमं**' '**गुणस्थानं**' '**सार्थम्**' अन्वर्थं भवति । अयं भावः-मिथ्यादृष्टयोऽपि परमार्थगवेषणपराः सन्तः पक्षपातं परित्यज्याद्वेषादिगुणस्थाः खेदादिदोषपरिहाराद्यदा संवेगतारतम्यमाप्नुवन्ति । तदा मार्गाभिमुख्यात् तेषामिक्षुरस-कक्कब-

---

१. भवकालबाल-C.P.L. ॥ २. इति-मु० L.C. नास्ति ॥ ३. सर्वोक्त० मु० ॥ ४. एए धम्माणरिहा धम्मे अरिहो उ मज्झत्थो-मु० ॥ ५. सत्प्रवृत्तिहेतुरेव–P.L. ॥

गुडकल्पा मित्रा तारा बला दीप्रा चेति चतस्रो योगदृष्टय उल्लसन्ति ।[१] **भगवत्पतञ्जलिभदन्तभास्करादीनां** तदभ्युपगमात् ।

[२]तत्र मित्रायां दृष्टौ स्वल्पो बोधः, यमो योगाङ्गम्, देवकार्यादावखेदो योगबीजोपादानम्, भवोद्वेगः सिद्धान्तलेखनादिकं बीजश्रुतोपरमः [३]श्रद्धासत्सङ्गश्च भवति । चरमयथाप्रवृत्तकरणसामर्थ्येन कर्ममलस्याल्पीकृतत्वादत एवेदं चरमयथाप्रवृत्तकरणं परमार्थतोऽपूर्वकरणमेवेति **योगबिन्दौ** व्यवस्थितम् । तथा च तद्ग्रन्थः —

''**अपूर्वासन्नभावेन, व्यभिचारवियोगतः ।**
**तत्त्वतोऽपूर्वमेवेदमिति योगविदो विदुः ॥१॥ [ यो.दृ.स./श्लो.३९ ]**
**प्रथमं यद् गुणस्थानं, सामान्येनोपवर्णितम् ।**
**अस्यां तु तदवस्थायां, मुख्यमन्वर्थयोगतः'' [ यो.दृ.स./श्लो.४० ]** इति । १।

[४]तारायां तु मनाक् स्पष्टं दर्शनम्, शुभा नियमाः, तत्त्वजिज्ञासा, योगकथास्वविच्छिन्ना प्रीतिर्भावयोगिषु यथाशक्त्युपचारः, उचितक्रियाऽहानिः, स्वाचारहीनतायां महात्रासः, अधिककृत्यजिज्ञासा च भवति । तथास्यां स्थितः स्वप्रज्ञाकल्पिते विसंवाददर्शनान्नानाविधमुमुक्षुप्रवृत्तेः कात्स्न्र्येन ज्ञातुमशक्यत्वाच्च शिष्टाचरितमेव पुरस्कृत्य प्रवर्त्तते । उक्तं च —

''**नास्माकं महती प्रज्ञा, सुमहान् शास्त्रविस्तरः ।**
**शिष्टाः प्रमाणमिह तदित्यस्यां मन्यते सदा ॥१॥ [ यो.दृ.स./श्लो.४८ ]** ॥२॥

[५]बलायां दृष्टौ दृढं दर्शनम्, स्थिरसुखमासनम्, परमा तत्त्वशुश्रूषा, [६]योगगोचरोत्क्षेपः, स्थिरचित्ततया योगसाधनोपायकौशलं च भवति ३।

[७]दीप्रायां दृष्टौ प्राणायामः, प्रशान्तवाहितालाभाद् योगोत्थानविरहस्तत्त्वश्रवणम्, प्राणेभ्योऽपि धर्मस्याधिकत्वेन परिज्ञानम्, तत्त्वश्रवणतो गुरुभक्तेरुद्रेकात् समापत्त्यादिभेदेन तीर्थकृद्दर्शनं च भवति ।४।

तथा मित्रादृष्टिस्तृणाग्निकणोपमा, [८]न तत्त्वतोऽभीष्टकार्यक्षमा सम्यक्प्रयोगकालं यावदनवस्थानात्, अल्पवीर्यतया ततः पटुबीजसंस्काराधानानुपपत्तेः, विकलप्रयोगादतो वन्दनादिकार्यायोगादिति ।

---

१. द्रष्टव्यः योगदृष्टिसमुच्चयः सटीकः गा० १६ ॥ २. द्रष्टव्यः योगदृष्टिसमुच्चयः सटीकः गा० २१तः २७ ॥ ३. श्रद्धासङ्गमश्च–मु० C. ॥ ४. द्रष्टव्यं योगदृष्टिसमुच्चये गा० ४१तः ॥ ५. योगदृष्टिसमुच्चये गा० ४९तः द्रष्टव्यम् ॥ ६. योगगोचराक्षेपः– मु० C ॥ ७. योगदृष्टिसमुच्चये गा० ५७तः द्रष्टव्यम् ॥ ८. तुला–योगदृष्टिसमुच्चयवृत्तिः गा० १५॥

तारादृष्टिर्गोमयाग्निकणसदृशी, इयमप्युक्तकल्पैव, तत्त्वतो विशिष्टवीर्यस्थिति-विकलत्वादतोऽपि प्रयोगकाले स्मृतिपाटवासिद्धेस्तदभावे प्रयोगवैकल्यात्ततस्तथा तत्कार्याभावादिति ।

बलादृष्टिः काष्ठाग्निकणतुल्या ईषद्विशिष्टोक्तबोधद्वयात्, तद्भावेनात्र मनाक् स्थितिवीर्ये, अतः पटुप्राया स्मृतिरिह प्रयोगसमये, तद्भावे चार्थप्रयोगमात्रप्रीत्या यत्नलेश-भावादिति ।

दीप्रादृष्टिः दीपप्रभासदृशी, [1]विशिष्टतरोक्तबोधत्रयादतोऽत्रोदग्रे स्थितिवीर्ये तत्पट्व्यपि प्रयोगसमये स्मृतिः । एवं भावतोऽप्यत्र द्रव्यप्रयोगो वन्दनादौ, तथाभक्तितो यत्नभेद-प्रवृत्तेरिति । प्रथमगुणस्थानप्रकर्ष एतावानिति समयविदः ।

इत्थं चोक्तस्य **योगदृष्टिसमुच्चय**ग्रन्थार्थस्यानुसारेण मिथ्यादृष्टिनामपि माध्यस्थ्यादि-गुणमूलकमित्रादिदृष्टियोगेन तस्य गुणस्थानकत्वसिद्धेस्तथाप्रवृत्तेरनाभिग्रहिकस्य संभवाद-नाभिग्रहिकत्वमेव तस्य देशनायोग्यत्वे शोभननिबन्धनमित्यापन्नम् ।

इत्थं च "**अनाभोगतोऽपि मार्गगमनमेव सदन्धन्यायेनेत्यध्यात्मचिन्तकाः**" [ **प० ११६** B ] इति **ललितविस्तरा**वचनानुसारेण यद्यनाभोगवान् मिथ्यादृष्टिरपि मिथ्यात्व-मन्दतोद्भूतमाध्यस्थ्यतत्त्वजिज्ञासादिगुणयोगान्मार्गमेवानुसरति, तर्हि तद्विशेषगुणयोगा-दनाभिग्रहिके तु सुतरां धर्मदेशनायोग्यत्वमितिभावः । इति धर्मदेशनार्ह उक्तः ॥१८॥

अथ तत्प्रदानविधिमाह –

**सा च संवेगकृत्कार्या, शुश्रूषोर्मुनिना परा ।**
**बालादिभावं संज्ञाय, यथाबोधं महात्मना ॥१९॥**

'**सा च**' देशना '**संवेगकृत्**' संवेगकारिणी । संवेगलक्षणं चेदम् –

"**तथ्ये धर्मे ध्वस्तहिंसाप्रबन्धे, देवे रागद्वेषमोहादिमुक्ते ।**
**साधौ सर्वग्रन्थसन्दर्भहीने, संवेगोऽसौ निश्चलो योऽनुरागः**" ॥१॥ [ ] इति ।

'**मुनिना**' गीतार्थेन साधुनाऽन्यस्य धर्मोपदेशेऽनधिकारित्वात् । यथोक्तं **निशीथे** –

"**संसारदुक्खमहणो, विबोहणो भवियपुंडरीयाणं ।**
**धम्मो जिणपण्णत्तो, पकप्पजइणा कहेअव्वो त्ति**" ॥ [ ]

'प्रकल्पयतिना' इति अधीत**निशीथा**ध्ययनेन । '**परा**' शेषतीर्थान्तरीयधर्माति-

---

१. विशिष्टतर उक्त० इति योगदृष्टिस०वृत्तौ गा० १५ ॥

शायितया प्रकृष्टा '**कार्या**' प्रज्ञापनीया, कीदृशस्य पुरतः सा कार्या ? इत्याह –'**शुश्रूषोः**' श्रोतुमुपस्थितस्य, **मुनिना** च किंज्ञानपूर्वमाख्येया ? इत्याह –'**बालादिभावम्**' इत्यादि, बालादीनां त्रयाणां धर्मपरीक्षकाणाम् आदिपदेन मध्यमबुद्धि-बुधयोर्ग्रहणात्, भावं परिणामविशेषं स्वरूपं वा '**संज्ञाय**' सम्यग् अवैपरीत्येन ज्ञात्वाऽवबुध्य । तस्य त्रिविधस्य धर्मपरीक्षकस्य रुचिरुपलक्षणमिदं [१]**षोडशकप्रकरणो**क्तम् –

**''बालः पश्यति लिङ्गं, मध्यमबुद्धिर्विचारयति वृत्तम् ।**
**आगमतत्त्वं तु बुधः, परीक्षते सर्वयत्नेन ॥१॥** [ षोड. १/२ ]

तेषामेवाचाररूपलक्षणं चेदम् –

**''बालो ह्यसदारम्भो, मध्यमबुद्धिस्तु मध्यमाचारः ।**
**ज्ञेय इह तत्त्वमार्गे, बुधस्तु मार्गानुसारी यः''** ॥१॥ [ षोड. १/३ ] इति ।

इत्थं च तद्भावज्ञानपूर्वकं तदनुसारेण देशना विधेयेति संपन्नम् । तत्र बालस्य परिणाममाश्रित्य हितकारिणी देशना यथा –

**''बाह्यचरणप्रधाना, कर्त्तव्या [२]देशनेह बालस्य ।**
**स्वयमपि च तदाचारस्तदग्रतो नियमतः सेव्यः ॥२॥** [ षोड. २/२ ]
**सम्यग्लोचविधानं, ह्यनुपानत्कत्वमथ धरा शय्या ।**
**प्रहरद्वयं रजन्यां, स्वापः शीतोष्णसहनं च ॥३॥** [ षोड. २/३ ]
**षष्ठाष्टमादिरूपं, चित्रं बाह्यं तपो महाकष्टम् ।**
**अल्पोपकरणसंधारणं च तच्छुद्धता चैव ॥४॥** [ षोड. २/४ ]
**गुर्वी पिण्डविशुद्धिश्चित्रा द्रव्याद्यभिग्रहाश्चैव ।**
**विकृतीनां संत्यागस्तथैकसिक्थादिपारणकम् ॥५॥** [ षोड. २/५ ]
**अनियतविहारकल्पः, कायोत्सर्गादिकरणमनिशं च ।**
**इत्यादि बाह्यमुच्चैः, कथनीयं भवति बालस्य ॥६॥** [ षोड. २/६ ]

इदानीं मध्यमबुद्धेर्देशनाविधिर्यथा –

**''[३]मध्यमबुद्धेस्त्वीर्यासमितिप्रभृति त्रिकोटिपरिशुद्धम् ।**
**आद्यन्तमध्ययोगैर्हितदं खलु साधु सद्वृत्तम् ॥७॥** [ षोड. २/७ ]

---

१. षोडशक० मु० । षोडस० P.L. ॥ २. धर्मदेशनेह-L.C.P. ॥ ३. मध्यमबुद्धेर्देयासमिति० L । मध्यमबुद्धेः स्वीयासमिति० P.C. ॥

**अष्टौ साधुभिरनिशं, मातर इव मातरः प्रवचनस्य ।**
**नियमेन न मोक्तव्याः, परमं कल्याणमिच्छद्भिः ॥८॥** [ षोड. २/८ ]
**एतत्सचिवस्य सदा, साधोर्नियमान्न भवभयं भवति ।**
**भवति च हितमत्यन्तं, फलदं विधिनाऽऽगमग्रहणम् ॥९॥** [ षोड. २/९ ]
**गुरुपारतन्त्र्यमेव च, तद्बहुमानात् सदाशयानुगतम् ।**
**परमगुरुत्वाप्तेरिह, बीजं तस्माच्च मोक्ष इति" ॥१०॥** [ षोड. २/१० ]
**इत्यादिसाधुवृत्तं, मध्यमबुद्धेः सदा समाख्येयम् ॥** [ षोड. २/११पू. ]

अथ बुधोपदेशविधिर्यथा —

"**आगमतत्त्वं तु परं, बुधस्य भावप्रधानं तु ॥११॥** [ षोड. २/११उ. ]
**वचनाऽऽराधनया खलु, धर्मस्तद्बाधया त्वधर्म इति ।**
**इदमत्र धर्मगुह्यं, सर्वस्वं चैतदेवास्य ॥१२॥** [ षोड. २/१२ ]
**यस्मात् प्रवर्त्तकं भुवि, निवर्त्तकं चान्तरात्मनो वचनम् ।**
**धर्मश्चैतत्संस्थो, मौनीन्द्रं चैतदिह परमम्" ॥१३॥** [ षोड. २/१३ ] इत्यादि ।

कथं सा कार्या ? इत्याह —'**यथाबोधम्**' इति बोधानतिक्रमेण, अनवबोधे धर्माख्यानस्योन्मार्गदेशनारूपत्वेन प्रत्युतानर्थसम्भवात् , न ह्येडान्धः समाकृष्यमाणः सम्यगध्वानं प्रतिपद्यत इति । मुनिना कीदृशेन ? '**महात्मना**' तदनुग्रहैकपरायणतया महान् आत्मा यस्य स तेन । इति सङ्क्षेपतो धर्मदेशनाप्रदानविधिः । विस्तरतस्तु **धर्मबिन्दा**वुक्तः । स चायम् —

"**इदानीं तद्विधिमनुवर्त्तयिष्याम इति**" [ सू० ५९ ] 'इदानीं' सम्प्रति 'तद्विधिं' सद्धर्मदेशनाक्रमं 'वर्णयिष्यामः' निरूपयिष्यामो वयमिति । तद्यथा —

"**तत्प्रकृतिदेवताधिमुक्तिज्ञानमिति**" [ सू० ६० ] तस्य सद्धर्मदेशनार्हस्य जन्तोः प्रकृतिः स्वरूपं गुणवल्लोकसङ्गप्रियत्वादिका[1] देवताधिमुक्तिश्च **बुद्धकपिला**दिदेवता विशेषभक्तिस्तयोर्ज्ञानं[2] प्रथमतो देशकेन कार्यम् । ज्ञातप्रकृतिको हि पुमान् रक्तो द्विष्टो मूढः पूर्वं व्युद्ग्राहितश्च चेन्न भवति तदा कुशलैस्तथा तथानुवर्त्त्य लोकोत्तरगुण-पात्रतामानीयते । विदितदेवताविशेषाधिमुक्तिश्च तत्तद्देवताप्रणीतमार्गानुसारिवचनोप-दर्शनेन दूषणेन च सुखमेव मार्गेऽवतारयितुं शक्य[3] इति ।

---

१. गुणवत्सङ्गलोकप्रियत्वादिका-मु० । L.P.C. धर्मबिन्दुवृत्तावपि गुणवल्लोकसङ्ग० इति ॥
२. विशेषमुक्तिस्तयो०-इति धर्मबिन्दुवृत्तौ ॥ ३. शक्यते—इति धर्मबिन्दुवृत्तौ ॥

तथा ''**साधारणगुणप्रशंसेति**।[ सू० ६१ ] साधारणानां लोक-लोकोत्तरयोः सामान्यानां गुणानां प्रशंसा पुरस्कारो देशनार्हस्याग्रतो विधेया । यथा –

''**प्रदानं प्रच्छन्नं गृहमुपगते संभ्रमविधिः,**
**प्रियं कृत्वा मौनं सदसि कथनं चाप्युपकृतेः ।**
**अनुत्सेको लक्ष्म्यां नरभिभवसाराः परकथाः,**
**श्रुते चासंतोषः कथमनभिजाते निवसति ॥१॥** [ ]

तथा ''**सम्यक्तदधिकाख्यानमिति**'' [ सू० ६२ ] सम्यगविपरीतरूपतया तेभ्यः साधारणगुणेभ्योऽधिका विशेषवन्तो ये गुणाः तेषामाख्यानं कथनं । यथा –

''**पञ्चैतानि पवित्राणि, सर्वेषां धर्मचारिणाम् ।**
**अहिंसा सत्यमस्तेयं, त्यागो मैथुनवर्जनम्**'' ॥ [ **हारिभद्रीयाष्टक १३।२** ] इति ।

तथा ''**अबोधेऽप्यनिन्देति**'' [ सू० ६३ ] अबोधेऽप्यनवगमेऽपि सामान्यगुणानां विशेषगुणानां वा व्याख्यातानामपि, अनिन्दा, अहो मन्दबुद्धिर्भवान्य[1] इत्थमाचक्षाणेष्वप्यस्मासु न बुध्यते वस्तुतत्त्वमित्येवं [2]श्रोतुस्तिरस्कारपरिहाररूपा, निन्दितो हि श्रोता किञ्चिद् बुभुत्सुरपि सन् दूरं विरज्यत इति । तर्हि किं कर्त्तव्यम् ? इत्याह –

''**शुश्रूषाभावकरणमिति**''[ सू० ६४ ] धर्मशास्त्रं प्रति श्रोतुमिच्छा शुश्रूषा, तल्लक्षणो भावः परिणामस्तस्य करणं निवर्त्तनम् , श्रोतुस्तैस्तैर्वचनैरिति । शुश्रूषामनुत्पाद्य धर्मकथने प्रत्युतानर्थसम्भवः । पठ्यते च –

''**स खलु पिशाचकी वातकी वा यः परेऽनर्थिनि वाचमुदीरयति**'' । [ ]

''**भूयो भूय उपदेश इति**'' [ सू० ६५ ] भूयो भूयः पुनः पुनरुपदिश्यत इत्युपदेशः उपदेष्टुमिष्टः वस्तुविषयः कथञ्चिदनवगमे सति कार्यः, किं न क्रियते दृढसन्निपातरोगिणां पुनः पुनः क्रिया तिक्तादिक्वाथपानोपचार इति ।

तथा ''**बोधे प्रज्ञोपवर्णनमिति**'' [ सू० ६६ ] बोधे सकृदुपदेशेन भूयो भूय उपदेशेन वोपदिष्टवस्तुनः परिज्ञाने तस्य श्रोतुः प्रज्ञोपवर्णनं बुद्धिप्रशंसनं यथा –नालघुकर्माणः प्राणिन एवंविधसूक्ष्मार्थबोद्धारो भवन्तीति ।

तथा ''**तन्त्रावतार इति**'' [ सू० ६७ ] तन्त्रे आगमे अवतारः प्रवेशः आगमबहुमानोत्पादनद्वारेण तस्य विधेयः । आगमबहुमानश्चैवमुत्पादनीयः –

---

१. ०र्भवा इत्थमाचक्षणमाणे. L. ॥ २. श्रोतुतिरस्कारपरिहाररूपा-मु० धर्मबिन्दुवृत्तौ च । श्रोतुतिरस्काररूपपरिहाररूपा-P.L.C. ॥

''**परलोकविधौ शास्त्रात् , प्रायो नानन्यदपेक्षते ।**
**आसन्नभव्यो मतिमान् श्रद्धाधनसमन्वितः ॥१॥** [ यो.बिं./श्लो.२२१ ]
**उपदेशं विनाप्यर्थकामौ प्रति पटुर्जनः ।**
**धर्मस्तु न विना शास्त्रादिति तत्रादरो हितः ॥२॥** [ यो.बिं./श्लो.२२२ ]
**अर्थादावविधानेऽपि, तदभावः परं नृणाम् ।**
[1]**धर्मेऽविधानतोऽनर्थः, क्रियोदाहरणात् परः ॥३॥** [ यो.बिं./श्लो.२२३ ]
**तस्मात् सदैव धर्मार्थी, शास्त्रयत्नः प्रशस्यते ।**
**लोके मोहान्धकारेऽस्मिन् , शास्त्रालोकः प्रवर्त्तकः'' ॥४॥** [ यो.बिं./श्लो.२२४ ]

'शास्त्रयत्नः' इति शास्त्रे यत्नो यस्येति समासः ।

''**पापमयौषधं शास्त्रं, शास्त्रं पुण्यनिबन्धनम् ।**
**चक्षुः सर्वत्रगं शास्त्रं, शास्त्रं सर्वार्थसाधनम् ॥५॥** [ यो.बिं./श्लो.२२५ ]
**न यस्य भक्तिरेतस्मिंस्तस्य धर्मक्रियापि हि ।**
**अन्धप्रेक्षाक्रियातुल्या, कर्मदोषादसत्फला ॥६॥** [ यो.बिं./श्लो.२२६ ]
**यः श्राद्धो मन्यते मान्यानहङ्कारविवर्जितः ।**
**गुणरागी महाभागस्तस्य धर्मक्रिया परा ॥७॥** [ यो.बिं./श्लो.२२७ ]
**यस्य त्वनादरः शास्त्रे, तस्य श्रद्धादयो गुणाः ।**
**उन्मत्तगुणतुल्यत्वात् , न प्रशंसास्पदं सताम् ॥८॥** [ यो.बिं./श्लो.२२८ ]
**मलिनस्य यथाऽत्यन्तम् , जलं वस्त्रस्य शोधनम् ।**
**अन्तःकरणरत्नस्य, तथा शास्त्रं विदुर्बुधाः ॥९॥** [ यो.बिं./श्लो.२२९ ]
**शास्त्रे भक्तिर्जगद्वन्द्यैर्मुक्तिदूतो**[2] **परोदिता ।**
**अत्रैवेयमतो न्याय्या, तत्प्राप्त्यासन्नभावतः'' ॥१०॥** [ यो.बिं./श्लो.२३० ]

'अत्रैव' इति मुक्तावेव 'इयं' इति शास्त्रभक्तिः, 'तत्प्राप्त्यासन्नभावतः' इति मुक्तिप्राप्तिसमीपभावादिति ।

तथा ''**प्रयोग आक्षेपण्या इति**'' [ सू० ६८ ] 'प्रयोगो' व्यापारणं धर्मकथाकाले, आक्षिप्यन्ते आकृष्यन्ते मोहात् तत्त्वं प्रति भव्यप्राणिनोऽनयेति आक्षेपणी तस्याः कथायाः, सा चाचार–व्यवहार–प्रज्ञप्ति दृष्टिवादभेदाच्चतुर्द्धा, तत्राचारो [3]लोचास्नानादिसुष्ठुक्रियारूपः,

---

१. धर्मोऽवि० C.P.L. । योगबिन्दौ धर्मबिन्दुवृत्तौ च–धर्मेऽवि० ॥ २. ०र्मुक्तेर्दूती–इति–योगबिन्दौ ॥ ३. L.P.C. धर्मबिन्दुवृत्तिः । लोचास्नानादिः सु० मु० ॥

व्यवहारः कथञ्चिदापन्नदोषव्यपोहाय प्रायश्चित्तलक्षणः, प्रज्ञप्तिः संशयापन्नस्य मधुरवचनैः प्रज्ञापनम् , दृष्टिवादश्च श्रोत्रपेक्षया सूक्ष्मजीवादिभावकथनमिति ।

तथा "**ज्ञानाद्याचारकथनमिति**" **[ सू० ६९ ]** ज्ञानस्य श्रुतलक्षणस्य आचारो ज्ञानाचारः, आदिशब्दाद्दर्शनाचारश्चारित्राचारस्तपआचारो वीर्याचारश्चेति । ततो ज्ञानाद्याचाराणां कथनं प्रज्ञापनमिति समासः । तत्र ज्ञानाचारोऽष्टधाकाल-विनय-बहुमानोपधानाऽनिह्नव-व्यञ्जना-ऽर्थ-तदुभयभेदलक्षणः ।

तत्र काल इति यो यस्याङ्गप्रविष्टादेः श्रुतस्य काल उक्तस्तस्मिन्नेव तस्य स्वाध्यायः कर्त्तव्यो नान्यदा, तीर्थकरवचनाद् , दृष्टं च कृष्यादेः कालकरणे फलं विपर्यये तु विपर्यय इति । तथा श्रुतग्रहणं कुर्वता गुरोर्विनयः कार्यः, विनयो ह्यभ्युत्थान-पादधावनादिः-अविनयगृहीतं हि तदफलं भवति । तथा श्रुतग्रहणोद्यतेन गुरोर्बहुमानः कार्यः, बहुमानो नामाऽऽन्तरो भावप्रतिबन्धः, एतस्मिन् सति अक्षेपेणाविकलं[1] श्रुतं भवति । अत्र च विनय-बहुमानयोश्चतुर्भङ्गी भवति, एकस्य विनयो न बहुमानः, अपरस्य बहुमानो न विनयः अन्यस्य विनयोऽपि बहुमानोऽपि, अन्यतरस्य न विनयो नापि बहुमान इति । तथा श्रुतग्रहणमभीप्सतोपधानं कार्यम् , उपदधाति पुष्णाति श्रुतमित्युपधानं तपः, तद्धि यद्यत्राध्ययने आगाढादियोगलक्षणमुक्तं तत्तत्र कार्यम् , तत्पूर्वं श्रुतग्रहणस्यैव फलवत्त्वात् । 'अनिह्नव इति' गृहीतश्रुतेनानिह्नवः, कार्यः, यद्यत् सकाशेऽधीतं तत्र स एव कथनीयो नान्यश्चित्तकालुष्याऽऽपत्तेरिति ।

तथा श्रुतग्रहणप्रवृत्तेन तत्फलमभीप्सता व्यञ्जनभेदोऽर्थभेद उभयभेदश्च न कार्यः । तत्र व्यञ्जनभेदो यथा "**धम्मो मंगलमुक्किट्ठं**" **[ दशवै० १।१ ]** इति वक्तव्ये 'पुण्णं कल्लाणमुक्कोस'मित्याह । अर्थभेदस्तु[2] यथा – "**आवंतिकेआवंति लोगंसि विप्परामुसंति**[3]" **[ आचाराङ्ग सू० ५।१ ]** इत्यत्राचारसूत्रे यावन्तः केचन लोकेऽस्मिन् पाखण्डिलोके विपरामृशन्तीत्यर्थाभिधाने अवन्तिजनपदे[4] केयावंती रज्जुवन्ताः लोकः परामृशति कूपे इत्याह । उभयभेदस्तु द्वयोरपि याथात्म्योपमर्दे यथा–धर्मो मंगलमुत्कृष्टः[5], अहिंसा पर्वतमस्तके

---

१. अक्षेपेणाविक(फ)लं-मु० । P.L. प्रत्योः धर्मबिन्दुवृत्तौ च–अक्षेपेणाविकलं० ॥ २. यथा आवंति लोगंसि L.P. ॥ ३. विप्परमसंति-P. । विपरामुसंति-मु । विपरामसंति L ॥ ४. अवन्तिजनपदे केया(०) रज्जुस्तां(वन्तो) लोकः मु० । आवन्ति जनपदे केयारब्रुवंता लोकः P.L.C.। आवन्ति जनपदे केयवंती-रज्जुर्वान्ता लोकः विपरामृशति-इति धर्मबिन्दुवृत्तौ प० १८ ॥ ५. मङ्गलमुक्कस्थः-P । मङ्गलमुत्कृष्टं-इति धर्मबिन्दुवृत्तौ ॥

इत्यादि। दोषश्चात्र व्यञ्जनभेदादर्थभेदः, तद्भेदे क्रियायाः, क्रियाभेदे च मोक्षाभावः, तदभावे च निरर्थका दीक्षेति।

दर्शनाचारोऽपि निःशङ्कित-निष्काङ्क्षित-निर्विचिकित्सा-ऽमूढदृष्टि-उपबृंहा-स्थिरीकरण-वात्सल्य-तीर्थप्रभावनाभेदादष्टधैव। तत्र 'निःशङ्कित इति' शङ्कनं शङ्कितम्, निर्गतं शङ्कितं यतोऽसौ निःशङ्कितः, देशसर्वशङ्कारहित इत्यर्थः। तत्र देशशङ्का —समाने जीवत्वे कथमेको भव्योऽपरस्त्वभव्य इति शङ्कते, सर्वशङ्का तु प्राकृतनिबद्धत्वात् सकलमेवेदं परिकल्पितं भविष्यतीति। न पुनरालोचयति यथा—भावा हेतुग्राह्या अहेतुग्राह्याश्च, तत्र हेतुग्राह्या जीवास्तित्वादयः, अहेतुग्राह्या भव्यत्वादयोऽस्मदाद्यपेक्षया प्रकृष्टज्ञानगोचरत्वात्तद्धेतूनामिति। प्राकृतनिबन्धोऽपि[१] बालादिसंधारण इति। उक्तं च —

> **"बालस्त्रीमन्दमूर्खाणां, नृणां चारित्रकाङ्क्षिणाम्।**
> **अनुग्रहार्थं तत्त्वज्ञैः, सिद्धान्तः प्राकृतः कृतः[२] ॥१॥** [ ]

दृष्टेष्टाविरुद्धत्वाच्च नायं परिकल्पनागोचरः। ततश्च निःशङ्कितो जीव एवार्हच्छासनप्रतिपन्नो दर्शनाचार इत्युच्यते। अनेन दर्शन-दर्शनिनोरभेदोपचारमाह, तदेकान्तभेदे त्वदर्शनिन इव फलाभावान्मोक्षाभाव इत्येवं शेषपदेष्वपि भावना कार्या।

तथा निष्काङ्क्षितो देशसर्वकाङ्क्षारहितः। तत्र देशकाङ्क्षा—एकं दर्शनं काङ्क्षते दिगम्बरदर्शनादि, सर्वकाङ्क्षा तु सर्वाण्येवेति, नालोकयति षड्जीवनिकायपीडामसत्प्ररूपणां चेति।

विचिकित्सा मतिविभ्रमो, निर्गता विचिकित्सा यस्मादसौ निर्विचिकित्सः। साध्वेवं जिनदर्शनम्, किन्तु प्रवृत्तस्यापि सतो ममास्मात् फलं भविष्यति वा न वा ?, कृषिवलादिक्रियासूभयथाप्युपलब्धेरितिकुविल्परहितः, न ह्यविकल उपाय उपेयवस्तुपरिप्रापको न भवतीति सञ्जातनिश्चय इत्यर्थः, यद्वा निर्विजुगुप्सो जुगुप्सारहितः।

तथा अमूढदृष्टिः, बालतपस्वितपोविद्याद्यतिशयैर्न मूढा स्वभावान्न चलिता दृष्टिः सम्यग्दर्शनरूपा यस्यासौ अमूढदृष्टिः, एतावान् गुणिप्रधानो दर्शनाचारनिर्देशः। अधुना गुणप्रधानः-उपबृंहणं नाम समानधार्मिकाणां सद्गुणप्रशंसनेन तद्वृद्धिकरणम्, स्थिरीकरणं धर्माद् विषीदतां तत्रैव स्थापनम्, वात्सल्यं समानधार्मिकजनोपकारकरणम्, प्रभावना धर्मकथादिभिस्तीर्थख्यापनेति। गुणप्रधानश्चायं निर्देशो गुण-गुणिनोः कथञ्चिद् भेदख्यापनार्थम्, एकान्ताभेदे गुणनिवृत्तौ गुणिनोऽपि निवृत्तेः शून्यताऽऽपत्तिरिति।

---

१. ०निबन्धनोऽपि० L ॥ २. स्मृतः-मु०-C ॥

चारित्राचारोऽष्टधा पञ्चसमिति-त्रिगुप्तिभेदात् तत्स्वरूपं च प्रतीतमेव ।

तपआचारस्तु द्वादशविधः, बाह्या-ऽभ्यन्तरतपःषट्कद्वयभेदात् । तत्र –

''**अनशनमूनोदरता, वृत्तेः संक्षेपणं रसत्यागः ।**
**कायक्लेशः संलीनतेति बाह्यं तपः प्रोक्तम् ॥१॥** [ प्रशम.का./१७५ ]
**प्रायश्चित्तं ध्यानं, वैयावृत्त्यविनयावथोत्सर्गः ।**
**स्वाध्याय इति तपः षट्प्रकारमाभ्यन्तरं भवति ॥२॥** [ प्रशम.का./१७६ ]

वीर्याचारः पुनरनिह्नुतबाह्याभ्यन्तरसामर्थ्यस्य सतः अनन्तरोक्तषट्त्रिंशद्विधे ज्ञान-दर्शनाद्याचारे यथाशक्ति प्रतिपत्तिलक्षणं पराक्रमणम्, प्रतिपत्तौ च यथाबलं पालनेति ।

तथा ''**निरीहशक्यपालनेति**'' [ सू० ७० ] निरीहेणैहिकपारलौकिकफलेषु राज्य-देवत्वादिलक्षणेषु व्यावृत्ताभिलाषेण शक्यस्य ज्ञानाचारादेर्विहितमिदमितिबुद्ध्या पालना कार्या इति च कथ्यत इति ।

तथा ''**अशक्ये भावप्रतिपत्तिरिति**'' [ सू० ७१ ] 'अशक्ये' ज्ञानाचारादिविशेष एव कर्त्तुमपार्यमाणे कुतोऽपि धृति-संहनन-काल-बलादिवैकल्याद्, 'भावप्रतिपत्तिः' भावेनान्तः-करणेन प्रतिपत्तिरनुबन्धः, न पुनस्तत्र प्रवृत्तिरपि, अकालौत्सुक्यस्य तत्त्वत आर्त्तध्यानत्वादिति ।

तथा ''**पालनोपायोपदेश इति**'' [ सू० ७२ ] एतस्मिन् ज्ञानाद्याचारे प्रतिपन्ने सति पालनाय उपायस्याधिकगुणतुल्यगुणलोकमध्यसंवासलक्षणस्य निजगुणस्थानकोचित-क्रियापरिपालनानुस्मारणस्वभावस्य चोपदेशो दातव्य इति ।

तथा ''**फलप्ररूपणेति**'' [ सू० ७३ ] अस्याचारस्य सम्यक्परिपालितस्य सतः फलमिहैव तावदुपप्लवह्रासो भावैश्वर्यवृद्धिर्जनप्रियत्वं च, परत्र च सुगतिजन्मोत्तमस्थानलाभः, परम्परया निर्वाणावाप्तिश्चेति यत्कार्यं तस्य प्ररूपणा प्रज्ञापना विधेयेति ।

अत्रैव विशेषमाह–''**देवर्द्धिवर्णनमिति**'' [ सू० ७४ ] देवानामृद्धेर्विभूतिरूपादि-लक्षणाया वर्णनं प्रकाशनम्, यथा-तत्रोत्तमा रूपसम्पत्, सत्स्थितिप्रभावसुखद्युति-लेश्यायोगः, विशुद्धेन्द्रियावधित्वम्, प्रकृष्टानि भोगसाधनानि, दिव्यो विमाननिवह इत्यादि वक्ष्यमाणमेव ।

तथा ''**सुकुलागमनोक्तिरिति**'' [ सू० ७५ ] देवस्थानाच्च्युतावपि विशिष्टे देशे, विशिष्टे काले, निष्कलङ्केऽन्वये उदग्रे सदाचारेणाख्यायिकापुरुषयुक्तेऽनेकमनोरथावपूरकमत्यन्त-निरवद्यं जन्मेत्यादिवक्ष्यमाणलक्षणैव[1] (उक्तिः) ।

---

१. ०लक्षणैव-P.L.C. । ०लक्षणैवोक्तिः-इति धर्मबिन्दुवृत्तौ ॥

तथा "**कल्याणपरम्पराऽऽख्यानमिति**"[ सू० ७६ ] ततः सुकुलागमनादुत्तरं कल्याणपरम्परायास्तत्र सुन्दरं रूपम् , आलयो लक्षणानां रहितमामयेनेत्यादिरूपाया अत्रैव धर्मफलाध्याये वक्ष्यमाणाया आख्यानं निवेदनं कार्यमिति ।

तथा "**असदाचारगर्हेति**" [ सू० ७७ ] असदाचारः सदाचारविलक्षणो हिंसानृतादिर्दशविधः पापहेतुभेदरूपः । यथोक्तम् –

"**हिंसानृतादयः पञ्च, तत्त्वाश्रद्धानमेव च ।**
**क्रोधादयश्च चत्वार, इति पापस्य हेतवः**" ॥१॥ [ **शा.वा.समु./का. ४** ]

तस्य गर्हाऽसदाचारगर्हा । यथा –

"**न मिथ्यात्वसमः शत्रुर्न मिथ्यात्वसमं विषम् ।**
**न मिथ्यात्वसमो रोगो, न मिथ्यात्वसमं तमः** ॥१॥ [ ]
**द्विषद्विषतमोरोगैर्दुःखमेकत्र दीयते ।**
**मिथ्यात्वेन दुरन्तेन, जन्तोर्जन्मनि जन्मनि** ॥२॥ [ ]
**वरं ज्वालाऽऽकुले क्षिप्तो, देहिनात्मा हुताशने ।**
**न तु मिथ्यात्वसंयुक्तं, जीवितव्यं कदाचन**" ॥३॥ [ ] इति

तत्त्वाश्रद्धानगर्हा, एवं हिंसादिष्वपि गर्हायोजना कार्या ।

तथा "**तत्स्वरूपकथनमिति**" [ सू० ७८ ] तस्याऽसदाचारस्य हिंसादेःस्वरूपकथनम् । यथा –"**प्रमत्तयोगात् प्राणव्यपरोपणं हिंसा**" । [ **तत्त्वार्थं सू० ७।८** ] "**असदभिधानं मृषा**" । "**अदत्तादानं स्तेयम्**" । "**मैथुनमब्रह्म**" । "**मूर्छा परिग्रहः**" [ **तत्त्वार्थसूत्र ७।१०-१२** ] इत्यादि ।

तथा "**स्वयं परिहार इति**" [ सू० ७९ ] स्वयमाचारकथकेन परिहारोऽसदाचारस्य संपादनीयः । यतः स्वयमसदाचारमपरिहरतो धर्मकथनं नटवैराग्यकथनमिवानादेयमेव स्यान्न तु साध्यसिद्धिकरमिति ।

तथा "**ऋजुभावाऽऽसेवनमिति**" [ सू० ८० ] ऋजुभावस्य कौटिल्यत्यागरूपस्यासेवनमनुष्ठानं देशकेनैव कार्यम् । एवं हि तस्मिन्नविप्रतारणकारिणि संभाविते सति शिष्यस्तदुपदेशान्न कुतोऽपि दूरवर्त्ती स्यादिति ।

तथा "**अपायहेतुत्वदेशनेति**" [ सू० ८१ ] अपायानामनर्थानाम् इहलोकपरलोकगोचराणां हेतुत्वं प्रस्तावादसदाचारस्य यो हेतुभावस्तस्य देशना विधेया यथा –

**''यन्न प्रयान्ति पुरुषाः, स्वर्गं यच्च प्रयान्ति विनिपातम् ।**
**तत्र निमित्तमनार्यः, प्रमाद इति निश्चितमिदं मे''** ॥३॥ [ ]

प्रमादश्चासदाचार इति ।

अपायानेव व्यक्तीकुर्वन्नाह –''**नारकदुःखोपवर्णनमिति**'' [ **सू० ८२** ] नरके भवा नारकास्तेषामुपलक्षणत्वात् तिर्यगादीनां च दुःखान्यशर्माणि तेषामुपवर्णनं विधेयम्। यथा –

**''तीक्ष्णैरसिभिर्दीप्तैः, कुन्तैर्विषमैः परश्वधैश्चक्रैः ।**
**परशू-त्रिशूल-तोमर-मुद्गर-वासी-मुसण्ढीभिः** ॥१॥ [ ]
**संभिन्नतालुशिरसश्छिन्नभुजाश्छिन्नकर्णनासोष्ठाः ।**
**भिन्नहृदयोदरान्त्रा, भिन्नाक्षिपुटाः सुदुःखार्त्ताः** ॥२॥ [ ]
**निपतन्त उत्पतन्तो, विचेष्टमाना महीतले दीनाः ।**
**नेक्षन्ते त्रातारं, नैरयिकाः कर्मपटलान्धाः** ॥३॥ [ ]
**क्षुत्तृड्हिमान्युष्णभयार्दितानां, पराभियोगव्यसनातुराणाम् ।**
**अहो तिरश्चामतिदुःखितानां, सुखानुषङ्गः किल वार्त्तमेतत्** ॥४॥ [ ]
**मानुष्यकेऽपि दारिद्र्य-रोग-दौर्भाग्य-शोक-मुख्यानि[१] ।**
**जाति-कुला-ऽवयवादिन्यूनत्वं चाश्नुते प्राणी** ॥५॥ [ ]
**देवेषु च्यवनवियोगदुःखितेषु , क्रोधेर्ष्या-मद-मदनातितापितेषु ।**
**आर्या नस्तदिह विचार्य संगिरन्तां, यत् सौख्यं किमपि निवेदनीयमस्ति''** ॥६॥[ ]इति ।

तथा ''**दुष्कुलजन्मप्रशस्तिरिति**'' [ **सू० ८३** ] दुष्कुलेषु शक-यवन शबर-बर्बरादिसम्बन्धिषु यज्जन्म असदाचाराणां प्राणिनां प्रादुर्भावस्तस्य प्रशस्तिः प्रज्ञापना कार्या ।

तत्र चोत्पन्नानां किम् ? इत्याह –''**दुःखपरम्परानिवेदनमिति**'' [ **सू० ८४** ] दुःखानां शारीर-मानसाशर्मलक्षणानां या परम्परा प्रवाहस्तस्या निवेदनं प्ररूपणं, यथा – असदाचारपारवश्याज्जीवा दुष्कुलेषूत्पद्यन्ते । तत्र चासुन्दरवर्ण-रस-गन्ध-स्पर्शशरीरभाजां तेषां दुःखनिराकरणनिबन्धनस्य धर्मस्य स्वप्नेऽप्यनुपलम्भाद्धिंसा-ऽनृत-स्तेयाशुद्ध-कर्मप्रवणानां नरकादिफलः पापकर्मोपचय एव संपद्यते । तदभिभूतानाम् इह परत्र चाऽव्यवच्छिन्नानुबन्धा दुःखपरम्परा प्रसूयते । यदुच्यते –

---

१. शोकमुख्यानि-P.L.C. । शोकमौर्ख्याणि-मु० धर्मबिन्दुवृत्तौ च ॥

''**कर्मभिरेव स जीवो, विवशः संसारचक्रमुपयाति ।**
**द्रव्यक्षेत्राद्धाभावभिन्नमावर्त्तते बहुशः**'' ॥१॥ [ ]

तथा ''**उपायतो मोहनिन्देति**'' [ सू० ८५ ] उपायत उपायेनानर्थप्रधानानां मूढपुरुषलक्षणानां प्रपञ्चनरूपेण मोहस्य मूढताया निन्दा अनादरणीयताख्यापनेति । यथा —

''**अमित्रं कुरुते मित्रं, मित्रं द्वेष्टि[1] हिनस्ति च ।**
**कर्म चारभते दुष्टं, तमाहुर्मूढचेतसम्** ॥१॥ [ ]
**अर्थवन्त्युपपन्नानि, वाक्यानि गुणवन्ति च ।**
**नैव मूढो विजानाति, मुमूर्षुरिव भैषजम्** ॥२॥ [ ]
**सम्प्राप्तः पण्डितः कृच्छ्रं, पूजया प्रतिबुध्यते ।**
**मूढस्तु कृच्छ्रमासाद्य, शिलेवाम्भसि मज्जति**'' ॥३॥ [ ]

अथवोपायतो मोहफलोपदर्शनद्वारलक्षणान्मोहनिन्दा कार्येति —

''**जन्ममृत्युजराव्याधिरोगशोकाद्युपद्रुताम् ।**
**वीक्षमाणा अपि भुवं, नोद्विजन्त्यपि मोहतः** ॥१॥ [ ]
**धर्मबीजं परं प्राप्य, मानुष्यं कर्मभूमिषु ।**
**न सत्कर्मकृषावस्य, प्रयतन्तेऽल्पमेधसः** ॥२॥ [ ]

'अस्येति' धर्मबीजस्य ।

''**बडिशामिषवत् तुच्छे, कुसुखे दारुणोदये ।**
**सक्तास्त्यजन्ति सच्चेष्टां, धिगहो दारुणं तमः** ॥३॥ [ ] इति ।

तथा ''**सज्ज्ञानप्रशंसनमिति**'' [ सू० ८६ ] सदविपर्यस्तं ज्ञानं यस्य स सज्ज्ञानः पण्डितो जनस्तस्य, सतो वा ज्ञानस्य विवेचनलक्षणस्य प्रशंसनं पुरस्कार इति । यथा —

''**तन्नेत्रैस्त्रिभिरीक्षते न गिरिशो नो पद्मजन्माष्टभिः,**
**स्कन्दो द्वादशभिर्न वा न मघवा चक्षुःसहस्रेण च ।**
**सम्भूयापि जगत्त्रयस्य नयनैस्तद्वस्तुनो वीक्षते,**
**प्रत्याहृत्य दृशः समाहितधियः पश्यन्ति यत् पण्डिताः**'' ॥१॥ [ ] इति ।

तथा- ''[2]**नाऽप्राप्यमभिवाञ्छन्ति, नष्टं नेच्छन्ति शोचितुम् ।**
**आपत्सु च न मुह्यन्ति, नराः पण्डितबुद्धयः** ॥२॥ [ ]

---

१. द्विष्टि–L.P.C. ॥ २. नो० मु० ॥

**न हृष्यत्यात्मनो माने, नापमाने च रुष्यति ।**
**गाङ्गो ह्रद इवाक्षोभ्यो, यः स पण्डित उच्यते** ॥३॥ [ ]

तथा—''**पुरुषकारसत्कथेति**'' [ सू० ८७ ] पुरुषकारस्योत्साहलक्षणस्य सत्कथा माहात्म्यप्रशंसनं । यथा —

''**दुर्गा तावदियं समुद्रपरिखा तावन्निरालम्बनं,**
**व्योमैतन्ननु तावदेव विषमः पातालयात्रागमः ।**
**दत्वा मूर्द्धनि पादमुद्यमभिदो दैवस्य कीर्तिप्रियै-**
**र्वीरैर्यावदहो न साहसतुलामारोप्यते जीवितम्**'' ॥१॥ [ ]

तथा-''**विहाय पौरुषं कर्म, यो दैवमनुवर्त्तते ।**
**तद् विनश्यति तं प्राप्य, क्लीबं पतिमिवाङ्गना**'' ॥१॥ [ ] इति ।

तथा- ''**वीर्यर्द्धिवर्णनमिति**'' [ सू० ८८ ] वीर्यर्द्धेः प्रकर्षरूपायाः शुद्धाचार-बललभ्यायास्तीर्थकरवीर्यपर्यवसानाया वर्णनमिति ।

यथा-''**मेरुं दण्डं धरां छत्रं, यत् केचित् कर्त्तुमीशते ।**
**तत् सदाचारकल्पद्रुफलमाहुर्महर्षयः**'' ॥१॥ [ ]

तथा-''**परिणते गम्भीरदेशनायोग इति**''[ सू० ८९ ] परिणते गम्भीरायाः पूर्वदेशना-पेक्षयाऽत्यन्तसूक्ष्माया आत्मास्तित्वतद्बन्धमोक्षादिकाया देशनाया योगो व्यापारः कार्यः । इदमुक्तं भवति—यः पूर्वं साधारणगुणप्रशंसादिरनेकधोपदेशः प्रोक्त आस्ते, स यदा तदावारक-कर्मह्रासातिशयादङ्गाङ्गीभावलक्षणं परिणाममुपागतो भवति, तदा जीर्णे भोजनमिव गम्भीर-देशनायामसौ देशनार्होऽवतार्यत इति ।

अयं च गम्भीरदेशनायोगो न श्रुतधर्मकथनमन्तरेणोपपद्यत इत्याह —**श्रुतधर्म-कथनमिति**''[ सू० ९० ] श्रुतधर्मस्य वाचना-प्रच्छना परावर्त्तनाऽनुप्रेक्षा-धर्मकथनलक्षणस्य सकलकुशलकलापकल्पद्रुमविपुलालवालकल्पस्य कथनं यथा —

''**चक्षुष्मन्तस्त एवेह, ये श्रुतज्ञानचक्षुषा ।**
**सम्यक् सदैव पश्यन्ति, भावान् हेयेतरान्नराः**'' ॥१॥ [ ]

अयं च श्रुतधर्मः प्रतिदर्शनमन्यथान्यथा प्रवृत्त इति नासावद्यापि तत् सम्यग्भावं विवेचयितुमलमित्याह —

''**बहुत्वात् परीक्षावतार इति**'' [ सू० ९१ ] तस्य हि बहुत्वाच्छ्रुतधर्माणां श्रुतधर्म इतिशब्दसमानतया विप्रलब्धबुद्धेः परीक्षायां त्रिकोटिपरिशुद्धिलक्षणायां श्रुतधर्म-सम्बन्धिन्यामवतारः कार्यः । अन्यत्राप्यवाचि —

''**तं शब्दमात्रेण वदन्ति धर्मं, विश्वेऽपि लोका न विचारयन्ति ।**
**स शब्दसाम्येऽपि विचित्रभेदैर्विभिद्यते क्षीरमिवार्जुनीयम् ॥१॥** [ ]
**लक्ष्मीं विधातुं सकलां समर्थं**[1]**, सुदुर्लभं विश्वजनीनमेनम् ।**
**परीक्ष्य गृह्णन्ति विचारदक्षाः, सुवर्णवद्वञ्चनभीतचित्ताः ॥२॥** [ ] इति ।

परीक्षोपायमेवाह –''**कषादिप्ररूपणेति**'' [ सू० ९२ ] यथा सुवर्णमात्रसाम्येन तथाविधमुग्धलोकेष्वविचारेणैव शुद्धाशुद्धरूपस्य सुवर्णस्य प्रवृत्तौ कष-च्छेद-तापाः परीक्षणाय विचक्षणैराद्रियन्ते । तथाऽत्रापि श्रुतधर्मे परीक्षणीये कषादीनां प्ररूपणेति ।

कषादीनेवाह –''**विधिप्रतिषेधौ कष इति**'' [ सू० ९३ ] विधिरविरुद्धकर्त्तव्या-ऽर्थोपदेशकं वाक्यं । यथा –स्वर्गकेवलार्थिना तपोध्यानादि कर्त्तव्यम् , समितिगुप्तिशुद्धा क्रिया इत्यादि । प्रतिषेधः पुनर्न हिंस्यात् सर्वभूतानि, नानृतं वदेदित्यादि, ततो विधिश्च प्रतिषेधश्च विधि-प्रतिषेधौ किम् ? इत्याह –कषः सुवर्णपरीक्षायामिव कषपट्टके रेखा । इदमुक्तं भवति –यत्र धर्मे उक्तलक्षणो विधिः, प्रतिषेधश्च पदे पदे सुपुष्कल उपलभ्यते, स धर्मः कषशुद्धः । न पुनः –

''**अन्यधर्मस्थिताः सत्त्वा, असुरा इव विष्णुना ।**
**उच्छेदनीयास्तेषां हि, वधे दोषो न विद्यते**'' **॥१॥** [ ]

इत्यादिकवाक्यगर्भ इति ।

छेदमाह–''**तत्संभवपालनाचेष्टोक्तिश्छेद इति**'' [ सू० ९४ ] तयोर्विधि-प्रतिषेध-योरनाविर्भूतयोः संभवः, प्रादुर्भूतयोश्च पालना रक्षारूपा, ततस्तत्सम्भवपालनार्थं या चेष्टा भिक्षाटनादिबाह्यक्रियारूपा, तस्या उक्तिश्छेदः । यथा कषशुद्धावप्यन्तरामशुद्धिमाशङ्कमानाः सौवर्णिकाः सुवर्णगोलिकादेश्छेदमाद्रियन्ते, तथा कषशुद्धावपि धर्मस्य छेदमपेक्षन्ते । स च छेदो विशुद्धबाह्यचेष्टारूपो, विशुद्धा च चेष्टा सा यत्रासन्तावपि विधिप्रतिषेधावबाधितरूपौ स्वात्मानं लभेते । लब्धात्मानौ चा[2]तिचारलक्षणोपचारविरहितौ उत्तरोत्तरां वृद्धिमनुभवतः । सा यत्र धर्मे चेष्टा सप्रपञ्चा प्रोच्यते स धर्मः छेदशुद्ध इति ।

यथा कष-च्छेदशुद्धमपि सुवर्णं तापमसहमानं कालिकोन्मीलनदोषान्न सुवर्ण-भावमश्नुते । एवं धर्मोऽपि सत्यामपि कषच्छेदशुद्धौ तापपरीक्षायामनिर्वहमाणो न

---

१. समर्थां–मु० P मूल । समर्थं–C.L.P. संशोधितं धर्मबिन्दुवृत्तौ च ॥ २. चातिचार-लक्षणापचार० मु० ॥

स्वभावमासादयत्यतस्तापं प्रज्ञापयन्नाह –"**उभयनिबन्धनभाववादस्ताप इति**" [ **सू० ९५** ] उभयोः कष-च्छेदयोरनन्तरमेवोक्तरूपयोर्निबन्धनं परिणामि किम् ? इत्याह –तापोऽत्र श्रुतधर्मपरीक्षाधिकारे । इदमुक्तं भवति –यत्र शास्त्रे द्रव्यरूपतयाऽप्रच्युतानुत्पन्नः पर्यायात्मकतया च प्रतिक्षणमपरापरस्वभावास्कन्दनेनानित्यस्वभावो जीवादिरवस्थाप्यते स्यात् तत्र तापशुद्धिः । यतः परिणामिन्येवात्मादौ तथाविधाशुद्धपर्यायनिरोधेन ध्यानाध्ययनाद्यपरशुद्धपर्यायप्रादुर्भावादुक्तलक्षणः कषो बाह्यचेष्टाशुद्धिलक्षणश्च छेद उपपद्यते न पुनरन्यथेति ।

एतेषां मध्यात् को बलीयानितरो वा ? इति प्रश्ने यत् कर्त्तव्यं तदाह –"**अमीषामन्तरदर्शनमिति**" [ **सू० ९६** ] अमीषां त्रयाणां परीक्षाप्रकाराणां परस्परमन्तरस्य विशेषस्य समर्था-ऽसमर्थरूपस्य दर्शनं कार्यमुपदेशकेन ।

तदेव दर्शयति –"**कष-च्छेदयोरयत्न इति**" [ **सू० ९७** ] कष-च्छेदयोः परीक्षाऽक्षमत्वेनादरणीयतायामयत्नोऽतात्पर्यं मतिमतामिति ।

कुतः ? इत्याह –"**तद्भावेऽपि तापाभावेऽभाव इति**" [ **सू० ९८** ] तयोः कष-च्छेदयोर्भावः सत्ता तद्भावस्तस्मिन्, किं पुनरतद्भावे ? इत्यपिशब्दार्थः । किम् ? इत्याह –'**तापाभावे**' उक्तलक्षणतापविरहे अभावः परमार्थतोऽसत्तैव परीक्षणीयस्य, न हि तापे विघटमानं हेम कष-च्छेदयोः सतोरपि स्वं स्वरूपं प्रतिपत्तुमलम्, जातिसुवर्णत्वात् तस्य ।

एतदपि कथम् ? इत्याह –"**तच्छुद्धौ हि तत्साफल्यमिति**" [ **सू० ९९** ] तच्छुद्धौ तापशुद्धौ हि यस्मात् तत्साफल्यं तयोः कष-च्छेदयोः सफलभावः । तथाहि –ध्यानाऽध्ययनादिकोऽर्थो विधीयमानः प्रागुपात्तकर्मनिर्जरणफलः । हिंसादिकश्च प्रतिषिध्यमानो नवकर्मोपादाननिरोधफलः, बाह्यचेष्टाशुद्धिश्चानयोरेवानाविर्भूतयोर्योगेनाविर्भूतयोश्च परिपालनेन फलवती स्यात् । न चापरिणामिन्यात्मन्युक्तलक्षणौ कष-च्छेदौ स्वकार्यं कर्त्तुं प्रभविष्णू स्यातामिति तयोस्तापशुद्धावेव सफलत्वमुपपद्यते न पुनरन्यथेति ।

ननु फलविकलावपि तौ भविष्यत इत्याह–"**फलवन्तौ च [१] वास्तवाविति**" [ **सू० १००** ] [२] उक्तलक्षणभाजौ सन्तौ पुनस्तौ कषच्छेदौ [३] वास्तवौ कषच्छेदौ भवतः । स्वसाध्यक्रियाकारिणो हि वस्तुनो वस्तुत्वमुशन्ति सन्तः ।

विपक्षे बाधामाह –"**अन्यथा याचितकमण्डनमिति**" [ **सू० १०१** ] अन्यथा

१. तौ ताविति–P.C. ॥ २. उक्तलक्षणफलभाजौ–C.L. ॥ ३. तौ वास्तवौ–C.P.L. ॥

फलविकलौ सन्तौ वस्तुपरीक्षाधिकारे समवतारितावपि तौ याचितकमण्डनम्। द्विविधं ह्यलङ्कारफलम्—निर्वाहे सति परिशुद्धाऽऽभिमानिकसुखजनिका स्वशरीरशोभा, कथञ्चिन्निर्वहणाभावे च तेनैव निर्वाहः । न च याचितकमण्डने एतद् द्वितीयमप्यस्ति, परकीयत्वात् तस्य, ततो याचितकमण्डनमिव याचितकमण्डनम् । इदमुक्तं भवति—द्रव्यपर्यायोभयस्वभावे जीवे कषच्छेदौ निरुपचरिततयोपस्थाप्यमानौ स्वफलं प्रत्यवन्ध्यसामर्थ्याविव स्याताम्, नित्याद्येकान्तवादे तु स्ववादशोभार्थं तद्वादिभिः कल्प्यमानावप्येतौ याचितकमण्डनाकारौ प्रतिभासेते, न पुनः स्वकार्यकराविति ।

आह—अवगतं यथा कष-च्छेद-तापशुद्धः श्रुतधर्मो ग्राह्यः, परं किंप्रणेतृकोऽसौ प्रमाणमिति व्यतिरेकतः साधयन्नाह—"**नातत्त्ववेदिवादः सम्यग्वाद इति**" [ सू० १०२ ] न नैव अतत्त्ववेदिनः साक्षादेव वस्तुतत्त्वमज्ञातुं शीलस्य पुरुषविशेषस्यार्वाग्दर्शिन इत्यर्थः । वादो वस्तुप्रणयनमतत्त्ववेदिवादः । किम्? इत्याह—सम्यग्वादो यथावस्थितार्थवादः, साक्षादवीक्षमाणेन हि प्रमात्रा प्रोक्तं[1] जात्यन्धचित्रकरनरालिखितचित्रकर्मवत् यथावस्थितरूपविसंवादेनासमञ्जसमेव शास्त्रं स्यादिति कथं तद्भाषितं वस्तु अविपरीतरूपतां प्रतिपत्तुमुत्सहत इति ।

सम्यग्वादताया एवोपायमाह—"**बन्धमोक्षोपपत्तितस्तच्छुद्धिरिति**" [ सू० १०३ ] बन्धो मिथ्यात्वादिहेतुभ्यो जीवस्य कर्मपुद्गलानां च वह्न्ययःपिण्डयोरिव क्षीर-नीरयोरिव वा परस्परमविभागपरिणामेनावस्थानम्, मोक्षः पुनः सम्यग्दर्शन-ज्ञान चारित्रेभ्यः कर्मणामत्यन्तोच्छेदः, ततो बन्धश्च मोक्षश्च बन्ध-मोक्षौ [2] तयोरुपपत्तिर्घटना तस्याः सकाशाच्छुद्धिर्वस्तुवादनिर्मलता चिन्तनीया । इदमुक्तं भवति—यस्मिन् सिद्धान्ते बन्धमोक्षयोग्य आत्मा तैस्तैर्विशेषैर्निरूप्यते स सर्ववेदिपुरुषप्रतिपादित इति कोविदैर्निश्चीयते इति ।

इयमपि बन्धमोक्षोपपत्तिर्यथा युज्यते तथाऽऽह—"**इयं बध्यमानबन्धनभावे इति**" [ सू० १०४ ] इयं बन्धमोक्षोपपत्तिर्बध्यमानस्य बन्धनस्य च वक्ष्यमाणस्य भावे सद्भावे सति भवति ।

कुतः? इत्याह—**कल्पनामात्रमन्यथेति**" [ सू० १०५ ] यस्मात् कारणादियं कल्पनैव केवला वितथार्थप्रतिभासरूपा, न पुनस्तत्र प्रतिभासमानोऽर्थोऽपीति कल्पनामात्रम्, अन्यथा मुख्यबध्यमानबन्धनयोरभावे वर्त्तते इति । बध्यमानबन्धन एव व्याचष्टे—"[3] **बध्यमान आत्मा**

१. जात्यन्धचित्रकनरा० P.L.C. ॥ २. तयोरुपपत्तिरुत्पत्तिर्घटना-मु० C. । P.L. प्रत्योः धर्मबिन्दुवृत्तावपि—तयोरुपपत्तिर्घटना-इति ॥ ३. बध्यमानं-मु० ॥

**बन्धनं वस्तुसत्कर्मेति**'' [ सू० १०६ ] तत्र बध्यमानः स्वसामर्थ्यतिरोधानेन पारवश्य-मानीयमानः, कः ? इत्याह –आत्मा चतुर्दशभूतग्रामभेदभिन्नो जीवः प्रतिपाद्यते । तथा बध्यते मिथ्यात्वादिभिर्हेतुभिरात्माऽनेनेति बन्धनम् , किम् ? इत्याह –वस्तुसत्परमार्थतो विद्यमानम् कर्म ज्ञानावरणादि अनन्तानन्तपरमाणुप्रचयस्वभावमत एव मूर्त्तप्रकृतीति ।

अत्रात्मग्रहणेन **साङ्ख्यमत**निरासमाह । यतस्तत्रोच्यते –

**''आत्मा न बध्यते, नापि संसरति कश्चित् ,**
**संसरति बध्यते मुच्यते च नानाश्रया प्रकृतिः''** । [ शा.वा.स./३-३४ ]

वस्तुसद्ग्रहणेन न तु **सौगतमत**स्य । यतस्तत्रापि पठ्यते –

**''चित्तमेव हि संसारो, रागादिक्लेशवासितम् ।**
**तदेव तैर्विनिर्मुक्तं, भवान्त इति कथ्यते''** ॥१॥ [ शा.वा.स./५-३० ]

'रागादिक्लेशवासितमिति' रागादिक्लेशैः सर्वथा चित्तादव्यतिरिक्तैर्वासितं संस्कृतम् । एवं हि बध्यमानान्न भिन्नं वस्तु सत्कर्मेत्युपगतं भवति । तत्र प्रकृतेरेव बन्धमोक्षाभ्युपगमे आत्मनः संसाराऽपवर्गावस्थयोरभिन्नैकस्वभावत्वेन योगिनां यम-नियमाद्यनुष्ठानं मुक्ति-फलतयोक्तं य**द्योगशास्त्रेषु** तद् व्यर्थमेव स्यात् । **बौद्ध**स्यापि चित्तादव्यतिरिक्त-कर्मवादिनोऽवस्तुसत्त्वमेव कर्मणः स्यात् , यतो यद्यतोऽव्यतिरिक्तस्वरूपं तत् तदेव भवति, न[१] च लोके तदेव तेनैव बध्यते इति प्रतीतिरस्ति, बध्यमान-बन्धनयोः पुरुष-निगडादि-रूपयोर्भिन्नस्वभावयोरेव लोके व्यवह्रियमाणत्वात् । किञ्च –चित्तमात्रत्वे कर्मणोऽभ्युप-गम्यमाने संसारापवर्गयोर्भेदो न[२] प्रतिप्राप्नोति, चित्तमात्रस्योभयत्राप्यविशेषात् ।

बन्धमोक्षहेतूनेवाह –''**हिंसादयस्तद्योगहेतवस्तदितरे तदितरस्येति**'' [ सू० १०७ ] 'हिंसादयः' इति हिंसानृतादयो जीवपरिणामविशेषाः, किम् ? इत्याह –तद्योगहेत-वस्तस्य बन्धस्य संसारफलत्वेन परमार्थचिन्तायां पापात्मकस्यैव योगहेतव आत्मना सह बन्धकारणभावमापन्ना वर्त्तन्ते । यदवाचि –

**''हिंसाऽनृतादयः पञ्च, तत्त्वाऽश्रद्धानमेव च ।**
**क्रोधादयश्च चत्वार, इति पापस्य हेतवः''** ॥१॥ [ शा.वा.स./१-४ ]

तथा 'तदितरे' तेभ्यो हिंसादिभ्य इतरेऽहिंसादय एव, 'तदितरस्य' तस्माद् बन्धादितरो मोक्षस्तस्यानुरूपकारणप्रभवत्वात् सर्वकार्याणामिति ।

---

१. स च–P.L. ॥ २. न (प्रति) प्राप्नोति–मु० । न प्रतिप्राप्नोति–P.L.C. । न प्राप्नोति–इति धर्मबिन्दुवृत्तौ ॥

बन्धस्यैव स्वरूपमाह –"**प्रवाहतोऽनादिमानिति**" [ सू० १०८ ] प्रवाहतः परम्परातोऽनादिमान् आदिभूतबन्धकालविकलः ।

अत्रैवार्थे उपचयमाह –"**कृतकत्वेऽप्यतीतकालवदुपपत्तिरिति**" [ सू० १०९ ] 'कृतकत्वेऽपि' स्वहेतुभिर्निष्पादितत्वेऽपि, बन्धस्यातीत [1]कालस्येवोपपत्तिर्घटनाऽनादिमत्त्वस्य वक्तव्या । किमुक्तं भवति ? प्रतिक्षणं क्रियमाणोऽपि बन्धः प्रवाहापेक्षयाऽतीतकालवदनादिमानेव ।

अथ यादृशादनयोर्दृष्टान्तदार्ष्टान्तिकभावोऽभूत् तं साक्षादेव दर्शयन्नाह –"**वर्त्तमानताकल्पं कृतकत्वमिति**" [ सू० ११० ] यादृशी अतीतकालसमयानां वर्त्तमानता तत्कल्पं क्रियमाणत्वमित्युपन्यसितुं युक्तं स्यात् ।

यादृशी चात्मनि प्रागुपन्यस्ता बन्धहेतव उपपद्यन्ते तमन्वयव्यतिरेकाभ्यामाह – "**परिणामिन्यात्मनि हिंसादयो भिन्नेऽभिन्ने च देहादिति**" [ सू० १११ ] परिणमनं परिणामो द्रव्यरूपतयाऽवस्थितस्यैव वस्तुनः पर्यायान्तरप्रतिपत्तिः । यथोक्तम् –

"**परिणामो ह्यर्थान्तरगमनं न च सर्वथा व्यवस्थानम् ।**
**न च सर्वथा विनाशः, परिणामस्तद्विदामिष्टः**" ॥१॥ [ ]

परिणामो नित्यमस्यास्तीति परिणामी तत्र, आत्मनि [2]जीवे, 'हिंसादयः' प्राग्निरूपिता उपपद्यन्ते, तथा 'भिन्ने' पृथग्रूपे 'अभिन्ने च' तद्विपरीते, चकारो विशेषणसमुच्चये, कस्माद् ? इत्याह –'देहात्' शरीरात् ।

अत्रैवार्थे विपक्षे बाधामाह –"**अन्यथा तदयोग इति**" [ सू० ११२ ] यदि हि परिणाम्यात्मा भिन्नाभिन्नश्चदेहान्नेष्यते, तदा तेषां हिंसादीनां बन्धहेतुतयोपन्यस्तानामयोगोऽघटना ।

कथम् ? इत्याह –"**नित्य एवाधिकारतोऽसंभवादिति**" [ सू० ११३ ] नित्य एव [3]अच्युतानुत्पन्नस्थिरैकस्वभावे आत्मनि न तु [4]पर्यायनयावलम्बनेनानित्यरूपेऽपीत्येवकारार्थोऽभ्युपगम्यमाने द्रव्यास्तिकनयावष्टम्भतोऽधिकारतस्तिलतुषत्रिभागमात्रमपि पूर्वस्वरूपादप्रच्यवमानत्वेनासम्भवादघटनात् हिंसायाः, यतो विवक्षितहिंसा विवक्षितपर्यायविनाशादिस्वभावा शास्त्रेषु गीयते । यथोक्तम् –

---

१. कालस्यैवो० L.P. ॥ २. जीव–P.L.C. ॥ ३. अ(प्र)च्यु० मु० अप्रच्यु० धर्मबिन्दुवृत्तौ ॥ ४. पर्याय न(त)या०–मु० । पर्यायतया० L.P.C.॥

D:\new/d-1.pm5\3rd proof

**''तत्पर्यायविनाशो, दुःखोत्पादस्तथा च संक्लेशः ।**
**एष वधो जिनभणितो, वर्जयितव्यः प्रयत्नेन''** ॥१॥ [ ]

तथा ''**अनित्ये चापराऽहिंसनेनेति**''[ सू० ११४ ] 'अनित्ये च' सर्वथा प्रतिक्षणभङ्गुरे पुनरात्मन्यभ्युपगम्यमाने सति, अपरेण केनचिल्लुब्धकादिना अहिंसनेनाऽव्यापादनेन, कस्यचिच्छूकरादेर्हिंसाऽसम्भवः। प्रतिक्षणभङ्गुरत्वाभ्युपगमे हि सर्वेष्वात्मसु स्वत एव स्वजन्मलाभक्षणानन्तरं सर्वथा निवर्त्तमानेषु कः कस्य हिंसकः ? को वा कस्य हिंसनीयः ? इति।

तथा ''**भिन्न एव देहान्न स्पृष्टवेदनमिति**'' [ सू० ११५ ] यदि हि 'भिन्न एव' विलक्षण एव सर्वथा देहादात्मा तदा 'न' नैव स्पृष्टस्य योषिच्छरीरशयनासनादेः कण्टकज्वलनज्वालादेश्च इष्टानिष्टरूपस्पर्शनेन्द्रियविषयस्य देहेन स्पृश्यमानस्य वेदनमनुभवनं प्राप्नोति भोगिनः पुरुषस्य । न हि देवदत्ते शयनादीनि भोगाङ्गानि स्पृशति विष्णुमित्रस्यानुभवप्रतीतिरस्तीति ।

तथा ''**निरर्थकश्चानुग्रह इति**'' [ सू० ११६ ] 'निरर्थकः' पुरुषसंतोषलक्षणफलविकलश्चः समुच्चये । 'अनुग्रहः' स्रक्चन्दनाङ्गनावसनादिभिर्भोगाङ्गैरुपष्टम्भो भवेद् देहस्य, देहादात्मनोऽत्यन्तभिन्नत्वात् , निग्रहस्याप्युपलक्षणमेतत् ।

एवं भेदपक्षं निराकृत्याभेदपक्षनिराकरणायाह–''**अभिन्न एवामरणं वैकल्यायोगादिति**'' [ सू० ११७ ] 'अभिन्न एव' देहात् सर्वथा नानात्वमनालम्बमाने आत्मनि सति 'चैतन्यविशिष्टः कायः पुरुष इति मतावलम्बिनां सुरगुरुशिष्याणामभ्युपगमेन' किम् ? इत्याह –'अमरणं' मृत्योरभाव आपद्यते आत्मनः। कुतः ? इत्याह –वैकल्यस्यायोगादघटनात् , यतो मृतेऽपि देहे न किञ्चित् पृथिव्यादिभूतानां देहारम्भकाणां वैकल्यमुपलभ्यते, वायोस्तत्र वैकल्यमिति चेत् ? न, वायुमन्तरेण उत्सूनभावाऽयोगात् , तर्हि तेजसस्तत्र वैकल्यमस्तीति चेत् , न, तेजसो व्यतिरेकेण कुथितभावाप्रतिपत्तेरिति कथं देहाभिन्नात्मवादिनां मरणमुपपन्नं भवेदिति ? ।

प्राक्तनावस्थयोर्वायु-तेजसोस्तत्राभावात् मरणमुपपद्यते इति चेत् ? उच्यते – ''**मरणे परलोकाभाव इति**''[ सू० ११८ ] 'मरणे' अभ्युपगम्यमाने परलोकस्याभावः प्रसज्यते, न हि देहादभिन्न एवात्मन्यभ्युपगम्यमाने कश्चित् परलोकयायी सिद्ध्यति, देहस्यात्रैव तावत्पातदर्शनात् तद्व्यतिरिक्तस्य चात्मनोऽनभ्युपगमात् । न च वक्तव्यं परलोक एव तर्हि नास्ति, तस्य सर्वशिष्टैः प्रमाणोपष्टम्भोपपन्नत्वेनाभीष्टत्वात् प्रमाणं चेदम् –यो योऽभिलाषः स सोऽभिलाषान्तरपूर्वको दृष्टो, यथा यौवनकालाभिलाषो बालकाली-

नाभिलाषपूर्वकः । अभिलाषश्च बालस्य तदहर्जातस्य प्रसारितलोचनस्य मातुः स्तनौ निभालयतः स्तन्यस्पृहारूपः । यच्च तदभिलाषान्तरं तन्नियमाद् भवान्तरभावीति ।

तथा "**देहकृतस्यात्मनाऽनुपभोग इति**" [ सू० ११९ ] एकान्तभेदे देहाऽऽत्मनोः 'देहकृतस्य' शुभस्याशुभस्य वा 'आत्मनानुपभोगः' सुखदुःखानुभवद्वारेणाऽवेदनमापद्यते । न हि कश्चिदन्यकृतं शुभमशुभं वा वेदयितुमर्हति, कृतनाशाकृताभ्यागमदोषप्रसङ्गादिति ।

तथा "**आत्मकृतस्य देहेनेति**" [ सू० १२० ] यदि च देहाद् भिन्न एवात्मेत्यभ्युपगमस्तदा 'आत्मकृतस्य' कुशलादकुशलाद्वाऽनुष्ठानादात्मसमुपार्जितस्य शुभस्याशुभस्य च कर्मण इहामुत्र च देहेन कर्त्रानुपभोगोऽवेदनं प्रसज्यते, अकृतत्वात् ।

यदि नामैवमापद्यते तथापि को दोषः ? इत्याह—"**दृष्टेष्टबाधेति**" [ सू० १२१ ] दृष्टस्य सर्वलोकप्रतीतस्य देहकृतस्यात्मना आत्मकृतस्य च देहेन यः सुखदुःखानुभवस्तस्य इष्टस्य च शास्त्रसिद्धस्य बाधाऽपह्नवः प्राप्नोति । तथाहि—दृश्यत एवात्मा देहकृताच्चौर्यपारदार्याद्यनार्यकार्याच्चारकादौ चिरशोक-विषादादीनि दुःखानि समुपलभमानः । शरीरं च तथाविधमनःसङ्क्षोभादापन्नज्वरादिजनितव्यथामनुभवति । न च दृष्टेष्टापलापिता युक्ता सताम्, नास्तिकलक्षणत्वात् तस्याः ।

इत्थं सर्वथा नित्यमनित्यं च तथा देहाद् भिन्नमभिन्नं चात्मानमङ्गीकृत्य हिंसादीनामसंभवमापाद्योपसंहरन्नाह—"**अतोऽन्यथैतत्सिद्धिरिति तत्त्ववाद इति**" [ सू० १२२ ] 'अत' एकान्तवादाद् 'अन्यथा' नित्याऽनित्यादिस्वरूपे आत्मनि समभ्युपगम्यमाने [1]एतस्मिन्-(त्सिद्धिः) हिंसाहिंसादिसिद्धिस्तत्सिद्धौ च तन्निबन्धना बन्धमोक्षसिद्धिः 'इति' एष 'तत्त्ववादः' प्रतिज्ञायते, [2]अतत्त्ववादिना पुरुषेण वेदितुं न पार्यत इति ।

एवं तत्त्ववादे निरूपिते किं कार्यम् ? इत्याह—"**परिणामपरीक्षेति**" [ सू० १२३ ] 'परिणामस्य' तत्त्ववादविषयज्ञानश्रद्धानलक्षणस्य 'परीक्षा' एकान्तवादाऽरुचिसूचनवचनसंभाषणादिनोपायेन निर्णयनं विधेयम् ।

ततोऽपि किं कार्यम् ? इत्याह—"**शुद्धे बन्धभेदकथनमिति**" [ सू० १२४ ] 'शुद्धे' परमां शुद्धिमागते परिणामे 'बन्धभेदकथनं' 'बन्धभेदस्य मूलप्रकृतिबन्धरूपस्याष्टविधस्य उत्तरप्रकृतिबन्धस्वभावस्य च सप्तनवतिप्रमाणस्य कथनं प्रज्ञापनं कार्यं [3]**बन्धशतका**दिग्रन्थानुसारेणेति ।

---

१. एतस्मिन् हिंसा० P.L.C. । एतत्सिद्धिः-इति धर्मबिन्दुवृत्तौ ॥ २. योऽतत्त्वं० इति धर्मबिन्दुवृत्तौ ॥ ३. बन्धशतक गा० ३९ ॥

तथा "**वरबोधिलाभप्ररूपणेति**" [ **सू० १२५** ] 'वरस्य' तीर्थकरलक्षणफल-कारणतयाऽशेषबोधिलाभेभ्योऽतिशायिनो 'बोधिलाभस्य' 'प्ररूपणा' प्रज्ञापना अथवा 'वरस्य' द्रव्यलाभव्यतिरेकिणः पारमार्थिकस्य बोधिलाभस्य प्ररूपणा हेतुतः स्वरूपतः फलतश्चेति ।

तत्र हेतुतस्तावदाह –"**तथाभव्यत्वादितोऽसाविति**" [ **सू० १२६** ] भव्यत्वं नाम सिद्धिगमनयोग्यत्वमनादिपरिणामिभाव आत्मस्वतत्त्वमेव । तथाभव्यत्वं तु भव्यत्वस्य फलदानाभिमुख्यकारि(री) वसन्तादिवद्वनस्पतिविशेषस्य[1] काल(:), कालसद्भावेऽपि न्यूनाधिकव्यपोहेन नियतकार्यकारिणी नियतिः । अपचयमानसंक्लेशं नानाशुभाशय-संवेदनहेतुः कुशलानुबन्धि कर्म । समुपचितपुण्यसंभारो महाकल्याणाशयः प्रधान-परिज्ञानवान् प्ररूप्यमाणार्थपरिज्ञानकुशलः पुरुषः । ततस्तथाभव्यत्वमादौ येषां ते तथा तेभ्योऽसौ वरबोधिलाभः प्रादुरस्ति । स्वरूपं च जीवादिपदार्थ[2]श्रद्धानमस्य ।

अथ फलत एव तमेवाह –"**ग्रन्थिभेदे नात्यन्तसङ्क्लेश इति**" [ **सू० १२७** ] इह ग्रन्थिरिव ग्रन्थिर्दृढो रागद्वेषपरिणामः, तस्य ग्रन्थेर्भेदेऽपूर्वकरणवज्रसूच्या विदारणे सति लब्धशुद्धतत्त्वश्रद्धानसामर्थ्याद् 'नात्यन्तं' न प्रागिवातिनिबिडतया 'संक्लेशो' रागद्वेष-परिणामः प्रवर्त्तते । न हि लब्धवेधपरिणामो मणिः कथञ्चिन्मलापूरितरन्ध्रोऽपि प्रागवस्थां प्रतिपद्यत इति ।

एतदपि कुतः ? इत्याह –"**न भूयस्तद्बन्धनमिति**" [ **सू० १२८** ] यतो 'न' 'भूयः' पुनरपि तस्य ग्रन्थेर्बन्धनं निष्पादनं भेदे सति संपद्यत इति । किमुक्तं भवति –यावती ग्रन्थिभेदकाले सर्वकर्मणामायुर्वर्जानां स्थितिरन्तःसागरोपमकोटीकोटिलक्षणाऽवशिष्यति तावत्प्रमाण(णा)मेवासौ सम्यगुपलब्धसम्यग्दर्शनो जीवः कथञ्चित् सम्यक्त्वापगमात् तीव्रायामपि तथाविधसंक्लेशप्राप्तौ बध्नाति, न पुनस्तं(स्तां) बन्धेनातिक्रामतीति ।

तथा "**असत्यपाये न दुर्गतिरिति**" [ **सू० १२९** ] असत्यविद्यमाने 'अपाये' विनाशे सम्यग्दर्शनस्य परिशुद्धभव्यत्वपरिपाकसामर्थ्यान्मतिभेदादिकारणानवाप्तौ 'न' नैव 'दुर्गतिः' कुदेवत्व-कुमानुषत्व-तिर्यक्त्व-नारकत्वप्राप्तिः संपद्यते, किन्तु सुदेवत्व-सुमानुषत्वे एव स्याताम्, अन्यत्र पूर्वबद्धायुष्केभ्य इति ।

तथा "**विशुद्धेश्चारित्रमिति**" [ **सू० १३०** ] 'विशुद्धेः' परिशुद्धनिःशङ्कितत्वादि-

---

१. विशेषस्य कालसद्भावेऽपि P.L. ॥ २. जीवादिपदार्थः-P.L. ॥

दर्शनाचारवारिपूरप्रक्षालितशङ्कादिपङ्कतया प्रकर्षप्राप्तिलक्षणायाः सम्यग्दर्शनसत्कायाः सकाशात् किम् ? इत्याह —'चारित्रं' सर्वसावद्ययोगपरिहारनिरवद्ययोगसमाचाररूपं संपद्यते । शुद्धसम्यक्त्वस्यैव चारित्ररूपत्वात् । तथा **चाचारसूत्रम्—**

**''जं मोणंति पासहा, तं संमंति पासहा ।**
**जं संमंति पासहा, तं मोणंति पासह त्ति'' [ आचा.१।५।३ सू० १५५ ] ।**

''**भावनातो रागादिक्षय इति**'' [ **सू० १३१** ] भाव्यन्ते मुमुक्षुभिरभ्यस्यन्ते निरन्तरमेव ता इति भावनास्ताश्चानित्यत्वाऽशरणत्वादयो द्वादश । यथोक्तम् —

**''भावयितव्यमनित्यत्वमशरणत्वं तथैकतान्यत्वे ।**
**अशुचित्वं संसारः, कर्माश्रवसंवरविधिश्च ॥१॥ [ प्र.र./१४९ ]**
**निर्जरणलोकविस्तर-धर्मस्वाख्याततत्त्वचिन्ताश्च ।**
**बोधेः सुदुर्लभत्वं च, भावना द्वादश विशुद्धाः'' ॥२॥ [ प्र.र./१५० ]**

ताभ्यो 'रागादिक्षयो' राग-द्वेष-मोहमलप्रलयः सञ्जायते, सम्यक् चिकित्साया इव वातपित्तादिरोगापगमः, प्रचण्डपवनाद्वा यथा मेघमण्डलविघटनम्, रागादिप्रतिपक्षभूतत्वाद् भावनानामिति ।

ततोऽपि किम् ? इत्याह —''**तद्भावेऽपवर्ग इति**'' [ **सू० १३२** ] 'तस्य' रागादिक्षयस्य 'भावे' सकललोकाऽलोकविलोकनशालिनोः केवलज्ञानदर्शनयोर्लब्धौ सत्यां निस्तीर्णभवार्णवस्य सतो जन्तोः 'अपवर्गः' उक्तनिरुक्त उद्भवतीति ।

किंलक्षणः ? इत्याह —''**स आत्यन्तिको दुःखविगम इतीति**'' [ **सू० १३३** ] सोऽपवर्गः अत्यन्तं सकलदुःखशक्तिनिमूलनेन भवतीति आत्यन्तिको 'दुःखविगमः' सर्वशारीरमानसाशर्मविरहः सर्वजीवलोकासाधारणानन्दानुभवश्चेति ।

इत्थं देशनाविधिं प्रपञ्च्योपसंहरन्नाह —

**''एवं संवेगकृद्धर्म, आख्येयो मुनिना परः ।**
**यथाबोधं हि शुश्रूषोर्भावितेन महात्मना''॥[ ध.बिं./श्लो.१०प.-२९ ]** इति । व्याख्या० ।

आह —धर्माख्यापनेऽपि यदा तथाविधकर्मदोषान्नावबोधः श्रोतुरुत्पद्यते तदा किंफलं धर्माख्यानम् ? इत्याह —

**''अबोधेऽपि फलं प्रोक्तं, श्रोतॄणां मुनिसत्तमैः ।**
**कथकस्य विधानेन, नियमाच्छुद्धचेतसः''॥१॥[ ध.बिं./श्लो.११-प.२९ ]** इति । सुगमम् ।

आह –प्रकारान्तरेणापि देशनाफलस्य संभाव्यमानत्वादलमिहैव यत्नेनेत्याशङ्क्याह –

**नोपकारो जगत्यस्मिंस्तादृशो विद्यते क्वचित् ।**

**यादृशी दुःखविच्छेदाद् देहिनां धर्मदेशना ॥२॥ [ ध.बिं./श्लो.१२-प.२९ ]** इति ।

'न' नैवोपकारोऽनुग्रहो 'जगति' भुवने 'अस्मिन्' उपलभ्यमाने 'तादृशो' 'विद्यते' समस्ति 'क्वचित्' काले क्षेत्रे वा 'यादृशी' यादृग्रूपा 'दुःखविच्छेदात्' शारीर-मानसदुःखापनयनात् 'देहिनां' देशनार्हाणां 'धर्मदेशना' इति धर्मदेशनाजनितो मार्गश्रद्धानादिर्गुणः । तस्य निःशेषक्लेशलेशाकलङ्कमोक्षाक्षेपं प्रत्यवन्ध्यकारणत्वादिति निरूपितो **धर्मबिन्दौ [ अध्याय २। प० १६-३० ]** सद्धर्मदेशनाप्रदानविधिः ।

अथ सद्धर्मग्रहणयोग्यतामाह –

**संविग्नस्तच्छ्रुतेरेवं, ज्ञाततत्त्वो नरोऽनघः ।**
**दृढं स्वशक्त्या जातेच्छः, संग्रहेऽस्य प्रवर्त्तते ॥२०॥**

'**एवम्**' उक्तनीत्या '**तच्छ्रुतेः**' तस्या धर्मदेशनायाः श्रुतेः श्रवणाद् '**नरः**' श्रोता पुमान् '**अनघो**' व्यावृत्ततत्त्वप्रतिपत्तिबाधकमिथ्यात्वमालिन्यः सन्नत एव '**ज्ञाततत्त्वः**' करकमलतलाकलितनिस्तलास्थूलामलमुक्ताफलवच्छास्त्रलोचनबलेन[१] लोकितसकल-जीवादिवस्तुवादः, तथा '**संविग्नः**' संवेगमुक्तलक्षणं प्राप्तः सन् '**जातेच्छो**' लब्ध-चिकीर्षापरिणामोऽर्थाद् धर्मे '**दृढम्**' अतिसूक्ष्माभोगपूर्वं यथा स्यात्तथा '**स्वशक्त्या**' स्वसामर्थ्येन हेतुभूतेन '**अस्य**' धर्मस्य सङ्ग्रहे सम्यग्वक्ष्यमाणयोगवन्दनादिशुद्धि-रूपविधिपूर्वं ग्रहे प्रतिपत्तौ '**प्रवर्त्तते**' प्रवृत्तिमाधत्ते । अदृढमयथाशक्ति च धर्मग्रहण-प्रवृत्तौ भङ्गसंभवेन प्रत्युतानर्थसंभव इति दृढस्वशक्त्योर्ग्रहणं कृतमिति विशेषगृहि-धर्मग्रहणयोग्यता प्रतिपादिता भवति ।

**शास्त्रान्तरे** चैकविंशत्या गुणैर्धर्मग्रहणार्हो भवतीति प्रतिपादितं । तद्यथा –

**धम्मरयणस्स जुग्गो, अक्खुद्दो १ । रूववं २ । पगइसोमो ३ ।**
**लोगप्पिओ ४ । अकूरो ५ । भीरू ६ । असढो ७ । सुदक्खिण्णो ८ ॥१॥**
**लज्जालुओ ९ । दयालू १०। मज्झत्थो[२] सोमदिट्ठी ११ । गुणरागी १२ ।**
**सक्कह १३ । सुपक्खजुत्तो १४ । सुदीहदंसी[३] १५ । विसेसन्नू १६ ॥२॥**

---

१. ०बलेन० P.L.C. । बलेना–मु० ॥ २. मज्झत्थो ११–सोमदिट्ठी–P.L. ॥ ३. सुदीहदरिसी–इति धर्मरत्नप्रकरणे । प्रवचनसारोद्धारे गा० १३५७ सुदीहदंसी–इति ॥

**वुड्ढाणुगो १७ । विणीओ १८[1] । कयण्णुओ १९ । परहिअत्थकारी अ ॥२०॥**
**तह चेव लद्धलक्खो २१ । इगवीसगुणेहिं संजुत्तो ॥३॥**

**[ धर्मरत्न. गा. ५-७/सं.प्र.श्रा. गा. ६-८/ प्र.सा. गा. १३५६-८ ]**

एतासां व्याख्या –[2]धर्माणां मध्ये यो रत्नमिव वर्त्तते जिनप्रणीतो देशविरतिसर्वविरतिरूपो धर्मः स धर्मरत्नम्, तस्य 'योग्यः' उचितो भवत्यध्याहारः, 'एकविंशत्या गुणैः संपन्न' इति तृतीयगाथान्ते संबन्धः ।

तानेव गुणान् गुण-गुणिनोः कथञ्चिदभेद इति दर्शनाय गुणिप्रतिपादनद्वारेणाह – अक्खुद्दो इत्यादि ।

तत्राक्षुद्रोऽनुत्तानमतिः १।

रूपवान् प्रशस्तरूपः, स्पष्टपञ्चेन्द्रियरूप इत्यर्थः २।

प्रकृतिसोमः स्वभावतोऽपापकर्मा ३।

लोकप्रियः सदा सदाचारचारी ४।

अक्रूरोऽक्लिष्टचित्तः ५।

भीरुरैहिकामुष्मिकापायभीलुकः ६।

अशठः परावञ्चकः ७।

सुदाक्षिण्यः प्रार्थनाभङ्गभीरुः ८।

लज्जालुरकार्यवर्ज्जकः ९।

दयालुः सत्त्वानुकम्पकः १० ।

मध्यस्थो रागद्वेषरहितोऽत एवासौ सोमदृष्टिर्यथावस्थितविचारवित्त्वात्, [3]इह पद-द्वयेनाप्येक एव गुणः ११।

गुणरागी गुणिपक्षपातकृत् १२।

सती धर्मकथाऽभीष्टा यस्य स सत्कथः १३।

सुपक्षयुक्तः सुशीलानुकूलपरिवारोपेतः १४।

सुदीर्घदर्शी सुपर्यालोचितपरिणामसुन्दरकार्यकारी १५।

---

१. इगवीसगुणेहिं संपन्नो–इति धर्मरत्न प्र० ।
इगवीसगुणो हवइ सड्ढो–इति सम्बोधप्रकरणे प्रवचनसारोद्धारे च गा० १३५८ ॥

२. तुला–धर्मरत्नप्रकरणस्वोपज्ञवृत्तिः प० ३तः गा० ५तः, प्रवचनसारोद्धारवृत्तिः–२३९ द्वारे ॥

३. 'मज्झत्थो सोमदिट्ठी इति एकमेवेदं पदं प्राकृतत्वाद्विभक्तेरलुक्'–इति धर्मरत्नप्रकरणवृत्तौ प० ४ ॥

विशेषज्ञोऽपक्षपातित्वेन गुण-दोषविशेषवेदी १६।

वृद्धानुगः परिणतमतिपुरुषसेवकः १७।

विनीतो गुणाधिकेषु गौरवकृत् १८।

कृतज्ञः परोपकाराविस्मारकः १९।

परहितार्थकारी निरीहः सन् परार्थकृत्, सुदाक्षिण्यो हि अभ्यर्थित एव परोपकारं करोत्ययं पुनः स्वत एव परहितरत इति विशेषः २०।

तह चेव त्ति तथाशब्दः प्रकारार्थश्चः समुच्चये, एवोऽवधारणे । ततश्च यथैते विंशतिस्तथैव तेन प्रकारेण, लब्धलक्ष्यश्च धर्माधिकारीति पदयोगः । पदार्थस्तु लब्ध इव प्राप्त इव लक्ष्यो लक्षणीयो धर्मानुष्ठानव्यवहारो येन स लब्धलक्ष्यः सुशिक्षणीयः २१ ।

इत्येकविंशत्या[1] गुणैः संपन्नो धर्मरत्नयोग्य इति योजितमेव ।

अत्राह –ननु किमेकान्तेनैतावद्गुणसंपन्ना धर्माधिकारिण उतापवादोऽप्यस्ति ? इति प्रश्ने सत्याह –

**''पायद्धगुणविहीणा, एएसिं मज्झिमाऽवरा णेआ ।**
**इत्तो परेण हीणा, दरिद्दपाया मुणेअव्वा'' ॥१॥** [ ध.र./गा. ३० ]

इहाधिकारिण उत्तमा मध्यमा हीनाश्चेति त्रिधा, तत्रोत्तमाः संपूर्णगुणा एव । पादश्च-तुर्थांशस्तत्प्रमाणैर्गुणैर्ये विहीनास्ते मध्यमाः । अर्द्धप्रमाणगुणहीनाश्च जघन्याः । अर्द्धाद-प्यधिकैर्हीना नरा दरिद्रा धर्मरत्नस्यायोग्या इत्यर्थः ।

अत्र च यद्यपि श्रावकयतिधर्मभेदाद् धर्मो द्विधा, श्रावकधर्मोऽपि अविरत-विरत-श्रावकधर्मभेदाद् विधा । तत्राविरतश्रावकधर्मस्य **पूर्वसूरिभिः –**

**''तत्थहिगारी अत्थी, समत्थओ जो न सुत्तपडिकुट्ठो ।**
**अत्थी उ जो विणीओ, समुट्ठिओ पुच्छमाणो अ ॥१॥** [ श्रा.ध.वि./गा. ४ ]

इत्यादिनाऽधिकारी निरूपितः । विरतश्रावकधर्मस्य –

**''संपत्तदंसणाई, पइदिअहं जइजणा सुणेइ अ ।**
**सामायारिं परमं, जो खलु तं सावयं बिंति ॥१॥** [ सं.प्र./गा. ९६१ ]

तथा–''[2]**परलोगहिअं ध( स )म्मं, जो जिणवयणं सुणेइ उवउत्तो ।**
**अइतिव्वकम्मविगमा, उक्कोसो सावगो इत्थ ॥१॥**[ पञ्चा. १।२, श्रा.ध.वि./२ ]

---

१. ०विंशत्या० C.P.L. । ०विंशति० मु० । एकविंशतिभिर्गुणैः-इति धर्मरत्नप्र० स्वोपज्ञवृत्तौ ।
२. परलोगहिअध(अं स)म्मं-मु० । परलोगहिअं धम्मं-P.L.C. । परलोगहिअं सम्मं-इति पञ्चाशकश्रावकधर्मविधिग्रन्थयोः ॥

इत्यादिभिरसाधारणैः श्रावकशब्दप्रवृत्तिहेतुभिरधिकारित्वमुक्तम् ।

यतिधर्माधिकारिणोऽप्येवं तत्प्रस्तावे वक्ष्यमाणा यथा –

**''पव्वज्जाए अरिहा, आरिअदेसंमि जे समुप्पन्ना ।**
**जाइकुलेहिं विसिट्ठा, तह खीणप्पायकम्ममला ॥१॥** [ पञ्चव./गा. ३२ ]
**तत्तो अ विमलबुद्धी, दुलहं मणुअत्तणं भवसमुद्दे ।**
**जम्मो मरणनिमित्तं, चवलाओ संपयाओ अ ॥२॥** [ पञ्चव./गा. ३३ ]
**विसया य दुक्खहेऊ, संजोगे निअमओ विओगु त्ति ।**
**पइसमयमेव मरणं, इत्थ विवागो अ अइरुद्दो ॥३॥** [ पञ्चव./गा. ३४ ]
**एवं पयईए च्चिअ, अवगयसंसारनिग्गुणसहावा ।**
**तत्तो अ तव्विरत्ता, पयणुकसायप्पहासा य ४॥** [ पञ्चव./गा. ३५ ]
**सुकयन्नुआ विणीआ, रायाईणमविरुद्धकारी अ ।**
**कल्लाणंगा सड्ढा, धीरा तह समुवसंपन्ना ॥५॥** [ पञ्चव./गा. ३६ ] इति

पृथक् पृथक् प्रतिपादितास्तथाप्येभिरेकविंशत्या गुणैः कतमधर्मस्याधिकारित्वमिति न व्यामोहः कार्यः, यत एतानि सर्वाण्यपि शास्त्रान्तरीयाणि लक्षणानि प्रायेण तत्तद्गुण-स्याङ्गभूतानि वर्त्तन्ते । चित्रस्य वर्णकशुद्धिविचित्रवर्णतारेखाशुद्धिनानाभावप्रतीतिवत् । प्रकृतगुणाः पुनः सर्वधर्माणां साधारणभूमिकेव चित्रकराणामिति सूक्ष्मबुद्ध्या [1]परिभावनीयम् । यदुक्तम् –

**दुविहं पि धम्मरयणं, तरइ नरो घित्तुमविगलं सो उ ।**
**जस्सेगवीसगुणरयणसंपया होइ सुत्थि त्ति ॥१॥** [ ध.र./१४० ]

ते च सर्वेऽपि गुणाः प्रकृते संविग्नादिविशेषणपदैरेव संगृहीता इति सद्धर्मग्रहणार्ह उक्तः ॥२०॥

**इतिपरमगुरुभट्टारकश्रीविजयानन्दसूरिशिष्यपण्डितश्रीशान्तिविजयगणि[2]चरणसेवि-महोपाध्यायमानविजयगणिविरचितायां स्वोपज्ञधर्मसङ्ग्रहवृत्तौ सामान्यतो गृहिधर्मव्यावर्णनो नाम प्रथमोऽधिकारः ॥**

**॥ इति प्रथमोऽधिकारः ॥**

● ● ●

---

१. परि० मु० नास्ति ॥ २. L.C.P. मूल । चरणसेव्युपाध्यायश्रीमान–P संशो० L ॥

D:\new/d-1.pm5\3rd proof

# द्वितीयोऽधिकारः ॥

## प्रथमः खण्डः ॥

[१]अथ विशेषतो गृहिधर्मव्याख्यानावसरः, स च सम्यक्त्वमूलक इति प्रथमं सम्यक्त्वं प्रस्तूय तदेव लक्षयति –

**न्याय्यश्च सति सम्यक्त्वेऽणुव्रतप्रमुखग्रहः ।**
**जिनोक्ततत्त्वेषु रुचिः, शुद्धा सम्यक्त्वमुच्यते ॥२१॥**

'**सति**' विद्यमाने '**सम्यक्त्वे**' सम्यग्दर्शने **च**कारोऽत्रैवकारार्थो भिन्नक्रमश्च, ततः सम्यक्त्वे सत्येवेत्यर्थो लभ्यते । **अणुव्रत-गुणव्रत-शिक्षाव्रतानां ग्रहो**ऽभ्युपगमो '**न्याय्यः**' उपपन्नः, न त्वन्यथा सम्यक्त्वेऽसति निष्फलत्वप्रसङ्गात् । यथोक्तम् –

''**शस्यानीवोषरक्षेत्रे, निक्षिप्तानि कदाचन ।**
**न व्रतानि प्ररोहन्ति, जीवे मिथ्यात्ववासिते ॥१॥** [ ]
**संयमा नियमाः सर्वे, नाश्यन्ते तेन पावनाः ।**
**क्षयकालानलेनेव, पादपाः फलशालिनः ॥२॥** [ ] इति

सम्यक्त्वमेव दर्शयति –'**जिनोक्त**' इत्यादि **जिनोक्तेषु तत्त्वेषु** जीवाजीवादिपदार्थेषु या '**शुद्धा**' अज्ञानसंशयविपर्यासनिराकरणेन निर्मला '**रुचिः**'[२]श्रद्धानं सा '**सम्यक्त्वमुच्यते**' जिनैरितिशेषः । तद्विशेषतो गृहिधर्म इति पूर्वप्रतिज्ञातं सर्वत्र योज्यम् । ग्रं० १००० ।

नन्वित्थं तत्त्वार्थश्रद्धानं सम्यक्त्वमिति पर्यवसन्नम् , तत्र श्रद्धानं च तथेतिप्रत्ययः, स च मानसोऽभिलाषो, न चायमपर्याप्तकाद्यवस्थायामिष्यते, सम्यक्त्वं तु तस्यामपीष्टम् , षट्षष्टिसागरोपमरूपायाः साद्यपर्यवसितकालरूपायाश्च तस्योत्कृष्टस्थितेः प्रतिपादनादिति कथं नागमविरोधः ? इत्यत्रोच्यते –तत्त्वार्थश्रद्धानं सम्यक्त्वस्य कार्यम् , सम्यक्त्वं तु मिथ्यात्वक्षयोपशमादिजन्यः शुभ आत्मपरिणामविशेषः । आह च –

''**से अ संमत्ते पसत्थसंमत्तमोहणीअकम्माणुवेअणोवसमखयसमुत्थे पसम-संवेगाइलिंगे सुहे आयपरिणामे पण्णत्ते**'' । [ **आवश्यकसूत्रे ६।३६, सम्यक्त्वाधिकारः** ]

---

१. साम्प्रतं विशेषतो–मु० C । अथ P.L. ॥ २. तुला–श्राद्धप्रतिक्रमणवृत्तिः प० ८तः ॥

इदं च लक्षणममनस्केषु सिद्धादिष्वपि व्यापकम् । इत्थं च सम्यक्त्वे सत्येव यथोक्तं श्रद्धानं भवति । यथोक्तश्रद्धाने च सति सम्यक्त्वं भवत्येवेति श्रद्धानवतां सम्यक्त्वस्यावश्यम्भावित्वोपदर्शनाय कार्ये कारणोपचारं कृत्वा तत्त्वेषु रुचिरित्यस्य तत्त्वार्थश्रद्धानमित्यर्थपर्यवसानं न दोषाय । तथा [1] चोक्तम् –

**''जीवाइ नव प[2]यत्थे, जो जाणइ तस्स होई संमत्तं ।**
**भावेण सद्दहंते, अयाणमाणे वि सम्मत्तं''** ॥१॥ [ नव.प्र./गा.५१ ] ति ।

नन्वेमपि शास्त्रान्तरे तत्त्वत्रयाध्यवसायः सम्यक्त्वमित्युक्तम् । यतः –

**''अरिहं देवो गुरुणो, सुसाहुणो जिणमयं पमाणं च ।**
**इच्चाइ सुहो भावो, सम्मत्तं बिंति जगगुरुणो** ॥१॥ [ सं.प्र.स./गा.३४ ] [3] त्ति ।

कथं न शास्त्रान्तरविरोधः ? इति चेत् ? न, अत्र प्रकरणे जिनोक्तत्त्वेषु रुचिरिति यति-श्रावकाणां साधारणं सम्यक्त्वलक्षणमुक्तम् , शास्त्रान्तरे तु गृहस्थानां देव-गुरु-धर्मेषु पूज्यत्वोपास्यत्वानुष्ठेयत्वलक्षणोपयोगवशाद् देवगुरुधर्मतत्त्वप्रतिपत्तिलक्षणं सम्यक्त्वं प्रतिपादितम् । तत्रापि देवा गुरुवश्च जीवतत्त्वे, धर्मः शुभाश्रवे संवरे चान्तर्भवतीति न शास्त्रान्तरविरोधः । सम्यक्त्वं चार्हद्धर्मस्य मूलभूतं यतो द्विविधं [4] त्रिविधेनेत्यादिप्रतिपत्त्या श्राद्धद्वादशव्रतीं सम्यक्त्वोत्तरगुणरूपभेदद्वययुतामाश्रित्य त्रयोदश कोटिशतानि चतुर-शीतिकोट्यः सप्तविंशतिः [5] सहस्राणि द्वे शते च द्वयुत्तरे भङ्गाः स्युः । [6] एषु च केवलं सम्यक्त्वं विना च नैकस्यापि भङ्गस्य संभवः, अत एव 'मूलं दारमित्यादि' षड्भावना वक्ष्यमाणा युक्ता एवेति । [7] एतत्फलं चैवमाहुः –

**''अंतोमुहुत्तमित्तं पि, फासिअं हुज्ज जेहिं सम्मत्तं ।**
**तेसिं अवड्डपुग्गलपरिअट्टो चेव संसारो** ॥१॥ [ न.प्र./गा. ५३ ,सं.प्र.स./गा.२४ ]
**सम्मद्दिट्ठी [8] जीवो, गच्छइ नियमा विमाणवासीसु ।**
**जइ न विगयसम्मत्तो, अहव न बद्धाउओ [9] पुव्विं** ॥२॥ [ सं.प्र.स./गा.३५ ]

१. तत्त्वत्रयाध्ययन(ध्यव)सायः-मु० । तत्त्वत्रयाध्ययनसायः-C ॥ २. ०तो० इति नवतत्त्व प्र० ॥ ३. (इति) मु० । इति-C नास्ति ॥ ४. द्विविध-P.L ॥ ५. सहस्रा-C.P.L. ॥ ६. (केवलं)-मु० । एषु च केवलं सम्यक्त्वं प्रथमो भङ्गः सम्यक्त्वं विना....इति श्राद्धप्रतिक्रमणवृत्तौ प० ९ ॥ ७. एतस्य फलं-मु० । एतस्य च फलं-C ॥ ८. चइयसम्मत्तो-इति सम्बोधप्रकरणे ॥ ९. पुव्विं पि-P.L. ॥

**जं सक्कइ तं कीरइ, जं च न सक्कइ तयंमि[1] सद्दहणा ।**
**सद्दहमाणो जीवो, वच्चइ अयरामरं ठाणं'' ॥३॥** [ सं.प्र.स./गा.३६ ] ति ।

अथ तस्य चोत्पादे द्वयी गतिर्निसर्गोऽधिगमश्चेति तां तद्भेदांश्चाह —

**निसर्गाद्वाऽधिगमतो, जायते तच्च पञ्चधा ।**
**मिथ्यात्वपरिहाण्यैव, पञ्चलक्षणलक्षितम् ॥२२॥**

**निसर्गादधिगमाद्वा तत्** सम्यक्त्वं '**जायते**' उत्पद्यते, तत्र निसर्गः स्वभावो गुरूपदेशादिनिरपेक्ष इतिभावः, अधिगमो गुरूपदेशः यथावस्थितपदार्थपरिच्छेद इतियावत् । तथाहि **योगशास्त्रवृत्तौ —**

**''[2]अनाद्यनन्तरसंसाराऽऽवर्त्तवर्त्तिषु देहिषु ।**
**ज्ञानदृष्ट्यावृतिवेदनीयान्तरायकर्मणाम् ॥१॥** [ यो.शा.१/१७ वृत्तौ ]
**सागरोपमकोटीनां, कोट्यस्त्रिंशत्परा स्थितिः ।**
**विंशतिर्गोत्रनाम्नोश्च, मोहनीयस्य सप्ततिः ॥२॥** [ यो.शा.१/१७ वृत्तौ ]
**ततो गिरिसरिद्ग्रावघोलनान्यायतः स्वयम् ।**
**एकाब्धिकोटिकोट्यूना, प्रत्येकं क्षीयते स्थितिः ॥३॥** [ यो.शा.१/१७ वृत्तौ ]
**शेषाब्धिकोटिकोट्यन्तः, स्थितौ सकलजन्मिनः ।**
**यथाप्रवृत्तिकरणाद् ग्रन्थिदेशं सभिद्यति ॥४॥** [ यो.शा.१/१७ वृत्तौ ]
**रागद्वेषपरिणामो, दुर्भेदो ग्रन्थिरुच्यते ।**
**दुरुच्छेदो दृढतरः, काष्ठादेरिव सर्वदा ॥५॥** [ यो.शा.१/१७ वृत्तौ ]
**ग्रन्थिदेशं तु संप्राप्ता, रागादिप्रेरिताः पुनः ।**
**उत्कृष्टबन्धयोग्याः स्युश्चतुर्गतिजुषोऽपि च[3] ॥६॥** [ यो.शा.१/१७ वृत्तौ ]
**तेषां मध्ये तु ये भव्या, भाविभद्राः शरीरिणः ।**
**आविष्कृत्य परं वीर्यमपूर्वकरणे कृते ॥७॥** [ यो.शा.१/१७ वृत्तौ ]
**अतिक्रामन्ति सहसा, तं ग्रन्थिं दुरतिक्रमम् ।**
**अतिक्रान्तमहाऽध्वानो, घट्टभूमिमिवाध्वगाः ॥८॥** [ यो.शा.१/१७ वृत्तौ ]
**[4]अथानिवृत्तिकरणादन्तरकरणे कृते ।**
**मिथ्यात्वं विरलं कुर्युर्वेदनीयं यदग्रतः ॥९॥** [ यो.शा.१/१७ वृत्तौ ]

---

१. तयं च सद्द०-इति सम्बोधप्रकरणे ॥ २. श्लोकदशकं त्रिशष्टि श०पु० चरित्रे १।३।५८२-७, ५९१-५ ॥ ३. ते-इति योगशास्त्रवृत्तौ पाठः ॥ ४. युग्मम् । अथा० मु० ॥

**आन्तर्मुहूर्तिकं सम्यग्दर्शनं प्राप्नुवन्ति यत् ।**
**निसर्गहेतुकमिदं, सम्यक्श्रद्धानमुच्यते ॥१०॥ [ यो.शा.१/१७ वृत्तौ ]**
**गुरूपदेशमालम्ब्य, सर्वेषामपि देहिनाम् ।**
**यत्तु सम्यक्श्रद्धानं तत्, स्यादधिगमजं परम् ॥११॥ [ यो.शा.१/१७ वृत्तौ ]**
**यमप्रशमजीवातुर्बीजं ज्ञानचरित्रयोः ।**
**हेतुस्तपःश्रुतादीनां, सद्दर्शनमुदीरितम् ॥१२॥ [ यो.शा.१/१७ वृत्तौ ]**
**श्लाघ्यं हि चरणज्ञानविमुक्तमपि[1] दर्शनम् ।**
**न पुनर्ज्ञानचारित्रे, मिथ्यात्वविषदूषिते ॥१३॥ [ यो.शा.१/१७ वृत्तौ ]**
**ज्ञानचारित्रहीनोऽपि, श्रूयते श्रेणिकः किल ।**
**सम्यग्दर्शनमाहात्म्यात्, तीर्थकृत्त्वं प्रपत्स्यते" ॥१४॥ [ यो.शा.१/१७ वृत्तौ ]** इति ॥

अत्राह –मिथ्यात्वमोहनीयकर्मक्षयोपशमादेरिदं भवति, कथमुच्यते निसर्गादधिगमाद्वा तज्जायत इति ? । अत्रोच्यते–स एव क्षयोपशमादिर्निसर्गाधिगमजन्मेति न दोषः । उक्तं च–

"**ऊसरदेसं दड्ढिल्लयं च, विज्झाइ वणदवो पप्प ।**
**इयमिच्छस्साणुदए, उवसमसम्मं लहइ जीवो ॥१॥ [ विशे.भा./गा.२७३४ ]**
**जीवादीणमधिगमो, मिच्छत्तस्स उ खओवसमभावे ।**
**अधिगमसंमं जीवो, पावेइ विसुद्धपरिणामो" ॥२॥ [ ]** त्ति ।

कृतं प्रसङ्गेन । तच्च कतिविधं भवति ? इत्याह –'**पञ्चधा**' इति' पञ्चप्रकारं स्यात् तद्यथा –औपशमिकम् १ क्षायिकम् २ क्षायोपशमिकम् ३ वेदकम् ४ सास्वादनं ५ चेति । तत्रौपशमिकं भस्मच्छन्नाग्निवत् मिथ्यात्वमोहनीयस्यानन्तानुबन्धिनां च क्रोधमानमाया-लोभानामनुदयावस्था [2]उपशमः (स) प्रयोजनं प्रवर्त्तकमस्य औपशमिकम्, तच्चानादि-मिथ्यादृष्टेः[3] करणत्रयपूर्वकमान्तर्मुहूर्त्तिकम्, चतुर्गतिकस्यापि संज्ञिपर्याप्तपञ्चेन्द्रियस्य जन्तोर्ग्रन्थिभेदानन्तरं भवतीत्युक्तप्रायम्, यद्वा उपशमश्रेण्यारूढस्य भवति । यदाह –

"**उवसमसेढिगयस्स उ, होइ उवसामिअं तु सम्मत्तं ।**
**जो वा अकयतिपुंजो, अखविअमिच्छो लहइ सम्मं" ॥१॥ [ विशे.भा./२७३५ ]** ति ।

ग्रन्थिप्रदेशं यावत्तु अभव्योऽपि सङ्ख्येयमसङ्ख्येयं वा कालं तिष्ठति । तत्र स्थित-श्चाभव्यो द्रव्यश्रुतं भिन्नानि दशपूर्वाणि यावल्लभते, जिनर्द्धिदर्शनात् स्वर्गसुखार्थित्वादेव दीक्षाग्रहणे तत्सम्भवात् । अत एव भिन्नदशपूर्वान्तं [4]श्रुतं मिथ्याश्रुतमपि स्यादित्यन्यदेतत् ।

---

१. ०वियुक्तमपि–इति योगशास्त्रवृत्तौ ॥ २. (स)उपशमः–मु० ॥ ३. ०भेदा(द)नन्तर–मु० ॥ ४. L.P.। श्रुतं मि(थ्याश्रुतं)स्यादित्यन्यदेतत्–मु० C ॥

D:\new/d-1.pm5\3rd proof

अत्र च प्रसङ्गतः कश्चिद्विशेषो विशेषज्ञानार्थं दर्श्यते[१] । यथाऽन्तरकरणाद्यसमय एवौपशमिकसम्यक्त्ववान्, तेन चौषधविशेषकल्पेन शोधितस्य[२] मदनकोद्रवकल्पस्य मिथ्यात्वस्य शुद्धार्द्धशुद्धाशुद्धरूपपुञ्जत्रयमसौ करोत्येव । अत एवौपशमिकसम्यक्त्वाच्च्युतोऽसौ क्षायोपशमिकसम्यग्दृष्टिर्मिश्रो मिथ्यादृष्टिर्वा भवति । उक्तं च –

''**कम्मगंथेसु धुवं, पढमोवसमो करेइ पुंजतिअं ।**
**तव्वडिओ पुण गच्छइ, सम्मे मीसंमि मिच्छे वा**'' ॥ [ ]

इदं च **कार्मग्रन्थिकमतम् । सैद्धान्तिकमतं** त्वेवं –यदुतानादिमिथ्यादृष्टिः कोऽपि तथाविधसामग्रीसद्भावेऽपूर्वकरणेन पुञ्जत्रयं कृत्वा शुद्धपुद्गलान् वेदयन्नौपशमिकसम्यक्त्वमलब्ध्वैव प्रथमत एव क्षायोपशमिकसम्यग्दृष्टिर्भवति, अन्यस्तु यथाप्रवृत्त्यादिकरणत्रयक्रमेणान्तरकरणे औपशमिकसम्यक्त्वं लभते । पुञ्जत्रयं त्वसौ न करोत्येव । ततश्चौपशमिकसम्यक्त्वच्युतोऽवश्यं मिथ्यात्वमेव याति । उक्तं च **कल्पभाष्ये –**

''**आलंबणमलहंती, जह सट्ठाणं न मुंचए इलिआ ।**
**एवं अकयतिपुंजी, मिच्छं चिअ उवसमी एइ**'' ॥१॥ [ **क.भा.गा. १२०/सं.प्र. गा.११** ]

''प्रथमं च सम्यक्त्वे लभ्यमाने कश्चित् सम्यक्त्वेन समं देशविरतिं सर्वविरतिं वा प्रतिपद्यते । उक्तं च **शतकबृहच्चूर्णौ –**

''[३]**उवसमसम्मद्दिट्ठी अंतरकरणे ठिओ कोई देसविरइं पि लहेइ, कोई पमत्तापमत्तभावं पि, सासायणो पुण न किं पि लहेइ**'' । [ **श.बृ.चू.** ] त्ति ।

पुञ्जत्रयसंक्रमश्च **कल्पभाष्ये** एवमुक्तः–मिथ्यात्वदलिकात् पुद्गलानाकृष्य सम्यग्दृष्टिः प्रवर्द्धमानपरिणामः सम्यक्त्वे मिश्रे च संक्रमयति । मिश्रपुद्गलांश्च सम्यग्दृष्टिः सम्यक्त्वे, मिथ्यादृष्टिश्च मिथ्यात्वे । सम्यक्त्वपुद्गलांस्तु मिथ्यात्वे संक्रमयति, न तु मिश्रे ।

''**मिच्छत्तंमि अखीणे, तिपुंजिणो सम्मद्दिट्ठिणो णियमा ।**
**खीणंमि उ मिच्छत्ते, दुएगपुंजी व खवगो वा** ॥१॥ [ **बृ.क.भा./गा.११७** ]

मिथ्यात्वेऽक्षीणे सम्यग्दृष्टयो नियमात् त्रिपुञ्जिनः, मिथ्यात्वे क्षीणे द्विपुञ्जिनः, मिश्रे क्षीणे एकपुञ्जिनः, सम्यक्त्वे तु क्षीणे क्षपकः । सम्यक्त्वपुद्गलाश्च शोधितमदनकोद्रवस्थानीया विरुद्धतैलादिद्रव्यकल्पेन कुतीर्थिकसंसर्गकुशास्त्रश्रवणादिमिथ्यात्वेन मिश्रिताः सन्त-

---

१. दृश्य(दर्श्य)ते–मु० । दृश्यते–P.C. । दर्श्यते–L ॥ २. तुला–श्राद्धप्रतिक्रमणवृत्तिः प० २५ ॥ ३. तुला–सम्बोधप्रकरणसम्यक्त्वाधिकारे गा० १२ ॥

स्तत्क्षणादेव मिथ्यात्वं स्युः । यदाऽपि प्रपतितसम्यक्त्वः पुनः सम्यक्त्वं लभते, तदाऽप्यपूर्वकरणेन पुञ्जत्रयं कृत्वा अनिवृत्तिकरणेन सम्यक्त्वपुञ्ज एव गमनाद् द्रष्टव्यम् ।

पूर्वलब्धस्याप्यपूर्वकरणस्यापूर्वता, पूर्वं स्तोकशः कृतत्वेनापूर्वमिवेति **वृद्धाः** । **सैद्धान्तिकमतं** चैतत् —सम्यक्त्वप्राप्ताविव देशविरति-सर्वविरत्योः प्राप्तावपि यथा-प्रवृत्त्यपूर्वकरणे भवतो न त्वनिवृत्तिकरणम्, [1]अपूर्वकरणाद्धाप्रा(समा)प्तावनन्तरसमये एव तयोर्भावात्, देश-सर्वविरत्योः प्रतिपत्त्योरनन्तरमन्तर्मुहूर्तं यावदवश्यं जीवः प्रवर्द्धमानपरिणामस्तत ऊर्ध्वं त्वनियमः ।

ये चाऽऽभोगं विनैव कथञ्चित् परिणामह्रासाद् देशविरतेः सर्वविरतेर्वा प्रतिपति-तास्तेऽकृतकरणा एव पुनस्तां लभन्ते । ये त्वाभोगतः प्रतिपतिता आभोगेनैव च मिथ्यात्वं गतास्ते जघन्यतोऽन्तर्मुहूर्त्तेनोत्कर्षतः प्रभूतकालेन यथोक्तकरणपूर्वकमेव पुनस्तां लभन्त इत्युक्तं **कर्मप्रकृतिवृत्तौ । सैद्धान्तिकमते** हि विराधितसम्यक्त्वो गृहीतेनापि सम्यक्त्वेन षष्ठपृथिवीं यावत् कोऽप्युत्पद्यते, **कार्मग्रन्थिकमते** तु वैमानिकेभ्योऽन्यत्र नोत्पद्यते, तेन गृहीतेनेत्युक्तं **प्रवचनसारोद्धारवृत्तौ । [ प्र.सा.गा. ९६१/खण्ड २ प. १९१ ]**

अवाप्तसम्यक्त्वश्च तत्परित्यागे **कार्मग्रन्थिक**मतेनोत्कृष्टस्थितीः कर्मप्रकृतीर्बध्नाति, **सैद्धान्तिकाभिप्रायत**स्तु भिन्नग्रन्थेरुत्कृष्टः स्थितिबन्ध एव न स्यात् १।

तथा क्षयो मिथ्यात्वमोहनीयस्यानन्तानुबन्धिनां निर्मूलनाशः, प्रयोजनमस्य क्षायिकं । यतः —

''**खीणे दंसणमोहे, विविहंमि वि भवनिआणभूअंमि ।**
**निप्पच्चवायमउलं, सम्मत्तं खाइअं होइ**'' ॥१॥ **[ ध.सं.णी/गा.८०१ ]** त्ति ।

तच्च साद्यनन्तम् २।

तथा पूर्वोदिता(नां मिथ्यात्वपुद्गला)नामुदितानां क्षयो निर्मूलनाशः, अनुदितानां चोपशमः, क्षयेण युक्त उपशमः क्षयोपशमः, स प्रयोजनमस्य क्षायोपशमिकम् । यतः —

''**मिच्छत्तं जमुइन्नं, तं खीणं अणुइअं च उवसंतं ।**
**मीसीभावपरिणयं, वेइज्जंतं खओवसमं**'' ॥१॥ **[ ध.सं.णी/गा.७९७ ]** ति ।

तच्च सत्कर्मवेदकमप्युच्यते, औपशमिकं तु सत्कर्मवेदनारहितमित्यौपशमिक-क्षायोपशमिकयोर्भेदः । यदाह —

---

१. अपूर्वकरणाद्धाप्राप्ता P.L.C. । 'अपूर्वकरणाद्धासमाप्तावनन्तर' इति श्राद्धप्रतिक्रमणवृत्तौ पा० २४ B ॥

**"[1]वेएइ संतकम्मं, खओवसमिएसु नाणुभावं से ।**
**उवसंतकसाओ उण, वेएइ न संतकम्मं पि" ॥१॥** [ विशे.भा./गा. १२९३ ] ३।

वेदकं क्षपकश्रेणिं प्रपन्नस्य [2]चतुर(र्ष्व)नन्तानुबन्धिषु मिथ्यात्व-मिश्रपुञ्जद्वये च क्षपितेषु सत्सु क्षप्यमाणे सम्यक्त्वपुञ्जे तत्सम्यक्त्वचरमपुद्गलक्षपणोद्यतस्य तच्चरम-पुद्गलवेदनरूपम् । यतः –

**"वेअगमिअ पुव्वोइअचरमिल्लयपुग्गलग्गासं"** [ ] ति ४।

सास्वादनं च पूर्वोक्तौपशमिकसम्यक्त्वात् पततो जघन्यतः समय उत्कर्षतश्च षडावलिकायामवशिष्टायामनन्तानुबन्ध्युदयात् तद्गमने तदास्वादरूपम् । यतः –

**"उवसमसम्मत्ताओ, चयओ मिच्छं अपावमाणस्स ।**
**सासायणसम्मत्तं, तयंतरालंमि छावलिअं" ॥१॥** [ विशे.भा./गा. ५३१ ]

पञ्चानामप्येषां स्थितिकालमानादि चैवमाहुः –

**"अंतमुहुत्तुवसमओ १, छावलि सासाण २ वेअगो समओ ३ ।**
**साहिअतित्तीसायर, खइओ ४ दुगुणो खओवसमो ५" ॥१॥** [ सम्बो.प्र.सम्य./गा. २२ ]

उपशम क्षयोपशमः, स प्रयोजनमस्य क्षायोपशमिकम् । यतः –

दुगुणो त्ति पूर्वस्माद् द्विगुणः स्थितिकालः षट्षष्टिः सागरोपमाणि समधिकानि क्षायोपशमिकस्य स्थितिरित्यर्थः । सा चैवम् –

**"दोवारे विजयाइसु , गयस्स तिन्नच्चुए अहव ताइं ।**
**अइरेगं नरभविअं, नाणाजीवाण सव्वद्धं" ॥१॥** [ विशे.भा./गा. ४३६ ] त्ति ।
**उक्कोसं सासायणउवसमिआ हुंति पंचवाराओ ।**
**वेअगखइगा इक्कसि, असंखवारा खओवसमो ॥२॥** [ सम्य.प्र./गा. २२ ]
**तिण्हं सहसपुहुत्तं, [3]सयप्पुहुत्तं च होई विरईए ।**
**एगभवे आगरिसा, एवइआ हुंति णायव्वा ॥३॥** [ सम्बो.प्र.सम्य./गा.३१ ]

'तिण्हं'ति श्रुतसम्यक्त्वदेशविरतीनाम् । 'आगरिस'त्ति आकर्षः प्रथमतया मुक्तस्य वा ग्रहणम् , एते आकर्षा उत्कर्षतो जघन्यतस्त्वेक एव ।

**तिण्हं [4]सहसमसंखा, सहसपुहुत्तं च होइ विरईए ।**
**नाणा[5]भवे आगरिसा, एवइआ हुंति णायव्वा ॥४॥** [ सम्बो.प्र.सम्य./गा.३२ ]

---

१. वेएइ न संत-मु० P.C. ॥ २. चतुरनन्त० C.P.L. ॥ ३. सययपुहुत्तं-C.P.L. ॥ ४. तिण्ह-मसंखसहस्सा-इति सम्बोधप्रकरणे ॥ ५. ०वे-L ॥

**बीअगुणे सासाणं, तुरिआइसु अट्ठिगारचउचउसु ।**
**उवसमगखइअवेअगखाओवसमा कमा हुंति ॥५॥ [ सम्य.प्र./गा. २३ ]**
**संमत्तंमि उ लद्धे, पलिअपुहुत्तेण सावओ हुज्जा ।**
**चरणोवसमखयाणं, सागर संखंतरा हुंति ॥६॥ [ विशेषा.भा./गा. ११२२ ]**
**[1]इअ ( अप्प )परिवडिए सम्मे, सुरमणुए इगभवे वि सव्वाणि ।**
**इगसेढिवज्जिआइं, सिवं च सत्तट्ठभवमज्झे ॥७॥ [ ]**

''क्षायिकसम्यग्दृष्टिस्तु तृतीये चतुर्थे तस्मिन् भवे वा सिद्ध्यति । उक्तं च **पञ्चसङ्ग्रहादौ –**

''**तइअचउत्थे तंमि व, भवंमि सिज्झंति दंसणे खीणे ।**
**जं देवनिरयसंखाउ, चरमदेहेसु ते हुंति ॥८॥ [ पं.सं./गा.७७८ ]**

व्याख्या –बद्धायुः क्षीणसप्तको यदि देवगतिं नरकगतिं वा याति, तदा तद्भवान्तरितस्तृतीयभवे सिद्ध्यति । अथ तिर्यक्षु नृषु वोत्पद्यते । सोऽवश्यमसङ्ख्येयवर्षायुष्केष्वेव, न तु सङ्ख्येयवर्षायुष्केषु तद्भवानन्तरं च देवभवे, ततो नृभवे सिद्ध्यतीति चतुर्थभवे मोक्षः । अबद्धायुश्च तस्मिन्नेव भवे क्षपकश्रेणिं संपूर्णीकृत्य सिद्ध्यतीत्यर्थः[2]'' ।

एकं जीवं नानाजीवान् वाऽपेक्ष्य सम्यक्त्वोपयोगो जघन्यत उत्कृष्टतश्चान्तर्मुहूर्त्तमेव, क्षयोपशमरूपा तल्लब्धिस्त्वेकजीवस्य जघन्याऽन्तर्मुहूर्त्तमुत्कृष्टा तु ६६सागराणि नृभवाधिकानि तत ऊर्ध्वं सम्यक्त्वाप्रच्युतः सिद्ध्यत्येव, नानाजीवानां तु सर्वकालः । अन्तरं च जघन्यतोऽन्तर्मुहूर्त्तम् , कस्यचित् सम्यक्त्वत्यागे सति पुनस्तदावरणक्षयोपशमादन्तर्मुहूर्त्तमात्रेणैव तत्प्रतिपत्तेः । उत्कृष्टतस्त्वाशातनाप्रचुरस्यापार्द्धपुद्गलपरावर्त्तः[3] । उक्तं च –

''**तित्थयरं पवयणसुअं, आयरिअं गणहरं महड्ढीयं ।**
**आसायंतो बहुसो, अणंतसंसारिओ होइ'' ॥१॥ [ उ.प./गा.४२३ ]**

नानाजीवानपेक्ष्य चान्तराऽभाव इत्याद्युक्त**मावश्यकवृत्ता**विति शेषविचारो विशेषार्थिभिस्तत एवावधार्य इत्यलं विस्तरेण ।

शास्त्रान्तरे चैकविधादिक्रमेण सम्यक्त्वभेदा प्रदर्शिताः । तथाहि –

''**एगविह दुविह तिविहं, चउहा पंचविह दसविहं सम्मं ।**
**दव्वाइ कारयाई, उवसमभेएहिं वा सम्मं ॥१॥ [ प्र.सा./गा.९४२ ]**

---

१. इय अपरि० । C.P.L. अप्परि० इति श्राद्धप्रतिक्रमणवृत्तौ प० २६ ॥ २. ०त्थं मु० P मूल C। ०त्थे–P संशोधित. L पञ्चसङ्ग्रहे च ॥ ३. ०र्त्त–P.L. । ०र्त्तः–इति श्राद्धप्रतिक्रमणवृत्तौ प० २७ ॥

**एगविहं सम्मरुई, निसग्गहिगमेहि भवे तयं दुविहं ।**
**तिविहं तं खइआई, अहवा वि हु कारगाईअं ॥२॥** [ प्र.सा./गा.९४३ ]
**खइगाइ सासणजुअं, चउहा वेअगजुअं तु पंचविहं ।**
**तं मिच्छचरमपुग्गलवेअणओ दसविहं एयं ॥३॥** [ प्र.सा./गा.९४७ ]
**निसग्गुवएसरुई, आणरुइ सुत्तबीअरुइमेव ।**
**अभिगमवित्थाररुई, किरिआसंखेवधम्मरुई ॥४॥**
[ प्र.सा.गा.९५०, सम्बोधप्र. सम्य./गा. ८९ ]

आसां भावार्थः —[१]तत्र श्रद्धानरूपत्वाविशेषादेकविधं सम्यक्त्वम् । निसर्गाधिगमभेदाद् द्विविधम् , निसर्गाऽधिगमस्वरूपं तु प्रागुक्तम् , आभ्यामुत्पत्तिप्रकाराभ्यां सम्यक्त्वं द्विधा भिद्यत इत्यर्थः ।

अथवा द्रव्यभावभेदाद् द्विविधम् , तत्र जिनोक्ततत्त्वेषु सामान्येन रुचिर्द्रव्यसम्यक्त्वम् , नयनिक्षेपप्रमाणादिभिरधिगमोपायो जीवाजीवादिसकलतत्त्वपरिशोधनरूपज्ञानात्मकं भावसम्यक्त्वम् , परीक्षाजन्यमतिज्ञानतृतीयांशस्वरूपस्यैव तस्य शास्त्रे व्यवस्थापितत्वात् । तदाहुः **श्रीसिद्धसेनदिवाकरपादाः सम्मतौ —**

''**एवं जिणपण्णत्ते, सद्दहमाणस्स भावओ भावे ।**
**पुरिसस्साभिणिबोहे, दंसणसद्दो हवइ वच्चो**'' ॥१॥ [ सं.प्र.का.२/३२ ] ति ।

[२]यच्च **श्रीहरिभद्रसूरिभिः —**

''**जिणवयणमेव तत्तं, इत्थ रुई होई दव्वसम्मत्तं ।**
**जह भावणाणसद्धापरिसुद्धं भावसंमत्तं**'' ॥१॥ [ पञ्च./गा.१०६३ ] ति ।

**पञ्चवस्तुके** [३]प्रति(त्य)पादि तस्याप्ययमेवार्थः । जिनवचनमेव तत्त्वं नान्यदिति सामान्यरुचेर्द्रव्यसम्यक्त्वरूपताया नयनिक्षेपप्रमाणपरिष्कृतविस्तारुरुचेश्च भावसम्यक्त्वरूपतायास्तत्र परिस्फुटत्वात् । तत्र द्रव्यशब्दार्थः कारणता, भावशब्दार्थश्च कार्यापत्तिरिति भावनीयम् । येषां त्वेकान्तेन सामान्यरुचिरोघतोऽप्यनेकान्तास्पर्शश्च, तेषां द्रव्यसम्यक्त्वमित्यत्र द्रव्यपदार्थोऽप्राधान्यमेव । जैनमपि समयमवलम्ब्यैकान्ते प्रविशतां मिथ्यात्वस्यावर्जनीयत्वात् । तदाहुः **श्रीसिद्धसेनदिवाकरपादाः —**

''**छप्पिअ जीवणिकाए, सद्दहमाणो ण सद्दहे भावा ।**
**हंदि अपज्जवेसुं, सद्दहणा होइ अविभत्ता**'' ॥१॥ [ सं.प्र.का.३/२८ ] त्ति ।

---

१. तथा श्र० मु० ॥ २. यच्च–मु० नास्ति, L.P.C. अस्ति ॥ ३. प्रतिपादितस्या० मु० L.P.C. ॥

यस्य त्वनेकान्तत्त्वे भगवत्प्ररूपिते सम्यगपरिच्छिद्यमानेऽपि भगवत्प्ररूपितत्वेन तत्र रुचिर्विपरीताभिनिवेशश्च न भवति गीतार्थप्रज्ञापनीयत्वादिगुणयोगात् । तस्यानाभोग-गुरुपारतन्त्र्याभ्यामन्यथा सम्भावनेऽपि अन्तस्तत्त्वस्य शुद्धत्वाद् द्रव्यसम्यक्त्वमविरुद्धम्। तथा च **भाद्रबाहवं वच उत्तराध्ययननिर्युक्तौ –**

''**सम्मद्दिट्ठी जीवो, उवइट्ठं पवयणं तु सद्दहइ ।**

**सद्दहइ असब्भावं, अणभोगा गुरुनिओगा व[१]**'' ॥१॥ [ उ.नि./गा.१६३ ] त्ति ।

नन्वत्रद्रव्य-भावयोरेकतरस्यानिर्द्धारणाद् द्रव्यमेवेति कुतः ? सामान्यवचनस्य विशेषपरतायां प्रमाणस्य मृग्यत्वादिति चेत्, सत्यम्, विस्ताररुचेर्भावसम्यक्त्व[२]स्याधि-कृत(त्व)स्यैव तद्द्रव्यतायाम् प्रमाणत्वात् , द्रव्य-भावयोरन्योन्यानुविद्धत्वनये तु तत्र कथञ्चिद् भावत्वमप्युच्यमानं न विरोधायेत्युक्तमन्यत्र । एवं द्रव्य-भावाभ्यां द्वैविध्यं नयविशेषेण विचित्रं भावनीयम्। अथवा निश्चय-व्यवहाराभ्यां द्विविधम्। तल्लक्षणमिदम् –

''**निच्छयओ सम्मत्तं, नाणाइमयप्पसुद्धपरिणामो ।**

**इअरं पुण तुह समए, भणिअं सम्मत्तहेऊहिं**'' ॥१॥ [ **सम्य.प्र.गा.११** ] ति ।

ज्ञानादिमयशुभपरिणामो निश्चयसम्यक्त्वम्, ज्ञान-श्रद्धान-चरणैः सप्तषष्टिभेदशीलनं च व्यवहारसम्यक्त्वमित्येतदर्थः । ननु ज्ञानादिमय इत्यस्य ज्ञान-दर्शन-चारित्रसंलुलित इत्यर्थः, तथाचैतद्भावचारित्रमेव प्राप्तम्, कथं नैश्चयिकं सम्यक्त्वमिति चेत्?, सत्यम्, भावचारित्रस्यैव निश्चयसम्यक्त्वरूपत्वात्, मिथ्याऽऽचारनिवृत्तिरूपकार्यस्य तत एव भावात्, कार्यानुपहितस्य कारणस्य निश्चयनयेनानभ्युपगमात्। नन्वेवं तुर्यगुणस्थानादिवर्त्तिनां **श्रेणिका**दीनामपि तन्न स्यादिति चेत्?, न स्यादेव, कः किमाह –अप्रमत्तसंयतानामेव तद्व्यवस्थितेः । तदुक्त**माचाराङ्गे –**

''**जं सम्मं ति पासह, तं मोणं ति पासह, जं मोणं ति पासह, तं सम्मं ति पासह। ण इमं सक्कं सिढिलेहिं अद्दिज्जमाणेहिं गुणासाएहिं वंकसमायारेहिं पमत्तेहिं गारमावसंतेहिं। मुणी मोणं समादाय, धुणे कम्म सरीरगं। पंतलूहं च सेवंति, धीरा सम्मत्तदंसिणो**''। [ **आचा.२/५/३. सू.१२५** ] त्ति ।

नन्वेवमपि कारक-निश्चयसम्यक्त्वयोर्भेदो न स्यात्, क्रियोपहितस्यैव कारकत्वात्, क्रियायाश्च चारित्ररूपत्वात्, ज्ञानादिमयपरिणामस्यापि तथात्वादिति चेत्? न, उपधेय-

१. वा इति-मु० ॥ २. ०स्याधिकृततत्वस्यैव-L.P.C. ॥

सङ्करेऽप्युपाध्योरसाङ्कर्येणादोषात् , कारके क्रियोपहितत्वमुपाधिर्नैश्चयिके च ज्ञानादिमयत्वमिति । एवंविधं नैश्चयिकसम्यक्त्वमधिकृत्यैव प्रशमादीनां लक्षणत्वं सिद्धान्तोक्तं सङ्गच्छते । अन्यथा **श्रेणिक-कृष्णादी**नामपि तदसंभवेन लक्षणव्याघातसम्भवात् । तदुक्तं **विंशिकायां श्रीहरिभद्राचार्यैः —**

**''णिच्छयसम्मत्तं वाहिगिच्च सुत्तभणिअनिउणरूवं तु ।**
**एवंविहो णिओगो, होइ इमो हंत वण्णु त्ति''** ॥१॥ **[ सद्धर्मविं./गा.१७ ]**

अत्र वाकारो विषयविशेषापेक्षया प्रकारान्तरोपदर्शनार्थः । अथवा ज्ञानादिमय इत्यस्यायमर्थः —ज्ञाननये ज्ञानस्य दशाविशेष एव सम्यक्त्वम् , क्रियानये च चारित्ररूपम् , दर्शननये तु स्वतन्त्रं व्यवस्थितमेव इति । शुद्धात्मपरिणामग्राहिनिश्चयनये तु —

**''आत्मैव दर्शन-ज्ञान-चारित्राण्यथवा यतेः ।**
**यत्तदात्मक एवैष, शरीरमधितिष्ठति''** ॥१॥ **[ यो.शा./४/१ ]**

इति **योगशास्त्र**वचनादात्मैव निरुपाधिशुद्धस्वरूपप्रकाशात् ज्ञानरूपः, तथा श्रद्धानाद् दर्शनरूपः, स्वभावाचरणाच्चारित्ररूप इति शुद्धात्मबोधाचरणतृप्तिरेव निश्चयसम्यक्त्वमित्यलं प्रपञ्चेन ।

त्रिविधं यथा-क्षायिकम् , क्षायोपशमिकम् , औपशमिकं चेति । वेदकस्य क्षायोपशमिकेऽन्तर्भावात् , सासादनस्याविवक्षितत्वात् । अर्थस्तु प्रागुक्तः[१] । अथवा कारकं रोचकं दीपकं चेति, तत्र कारकं सूत्राज्ञाशुद्धा क्रियैव, तस्या एव परगतसम्यक्त्वोत्पादकत्वेन सम्यक्त्वरूपत्वात् , तदवच्छिन्नं वा सम्यक्त्वं कारकसम्यक्त्वम् , एतच्च विशुद्धचारित्राणामेव १। रोचयति सम्यगनुष्ठानप्रवृत्तिम् न तु कारयतीति रोचकम् , अविरतसम्यग्दृशां **कृष्ण-श्रेणिका**दीनाम् २। दीपकं व्यञ्जकमित्यनर्थान्तरम् , एतच्च यः स्वयं मिथ्यादृष्टिरपि परेभ्यो जीवाऽजीवादिपदार्थान् यथावस्थितान् व्यनक्ति, तस्**याङ्गारमर्द्दकादे**र्द्रष्टव्यम् ३।

चतुर्विधं क्षायिकादित्रयेऽधिकस्य सासादनस्य परिगणनात् वेदकस्य च परित्यागात् ४। वेदकयुतं तदेव पञ्चविधम् ५।

दशविधं **चोत्तराध्ययना**नुसारेणोपदर्श्यते—निसर्गरुचिः १, उपदेशरुचिः २, आज्ञारुचिः, ३, सूत्ररुचिः ४, बीजरुचिः ५, अभिगमरुचिः ६, विस्ताररुचिः ७,

---

१. P.L. । प्रागुक्तम्(क्तः)-मु० सि० ॥

क्रियारुचिः ८. सङ्क्षेपरुचिः ९, धर्मरुचिः १० इति । तत्र भूतार्थेन सहसंमत्या जीवाऽजीवादिनवपदार्थविषयिणी रुचिर्निसर्गरुचिः । भूतार्थेनेत्यस्य भूतार्थत्वेनेत्यर्थो, भावप्रधाननिर्देशात्, सद्भूतार्था अमी इत्येवंरूपेणेतियावत्, वस्तुतो भूतार्थेनेत्यस्य शुद्धनयेनेत्यर्थः ।

"**ववहारोऽभूअत्थो, भूअत्थो देसिओ अ सुद्धणउ**"[ ] त्ति वचनात्, तेन व्यवहारमात्ररुचेर्विच्छेदः । सहसंमत्येत्यस्य सहात्मना सङ्गता मतिः[1] [सह]संमतिस्तयोपदेशनिरपेक्षक्षयोपशमेणेत्यर्थः १।

परोपदेशप्रयुक्तं जीवाऽजीवादिपदार्थविषयिश्रद्धानम् उपदेशरुचिः । परस्तीर्थकरस्तद्वचनानुसारी छद्मस्थो वा, केवलज्ञानमूलकत्वप्रयुक्तोपदेशरुचिस्तज्जन्यबोधरुचिर्वेति निष्कर्षः । तदुक्तं **सूत्रकृते –**

> "**लोगं अयाणित्तिह केवलेणं, कहंति जे धम्ममयाणमाणा ।**
> **णासंति अप्पाण परं च णट्ठा, संसारघोरंमि अणोरपारे ॥१॥**
> **लोगं वियाणित्तिह केवलेणं, पुन्नेण नाणेण समाहिजुत्ता ।**
> **धम्मं समत्तं च कहंति जे उ, तारंति अप्पाण परं च तिण्ण त्ति[2]" ॥२॥**

**[ सूत्रकृताङ्गश्रुतस्कन्ध २अ.६/७१७-८ ]**

उपदेशे तज्जन्यबोधे च रुचिरिह संशयव्यावर्त्तकतावच्छेदको धर्मविशेषः २।

रागद्वेषरहितस्य पुंस आज्ञयैव धर्मानुष्ठानगता रुचिराज्ञारुचिः, राहित्यं च देशतः सर्वतश्च, तत्र देशतो दोषरहितानामाचार्यादीनामाज्ञया धर्मानुष्ठाने रुचि**र्माषतुषा**दीनां सम्यक्त्वसम्पादिका तत्तदनुष्ठाने[3] । तदुक्तं **पञ्चाशके –**

> "**गुरुपारतंतनाणं सद्दहणं एयसंगयं चेव ।**
> **एत्तो उ चरित्तीणं, मासतुसाईण णिद्दिट्ठं" ॥१॥ [ पञ्चा.११/७ ]** ति ।

सर्वदोषरहिताज्ञामूलत्वं च तत्राप्यप्रामाण्यशङ्कानिवर्त्तकत्वेन सर्वत्र रुचिप्रयोजकमितिविशेषः ३।

सूत्राध्ययनाभ्यासजनितविशिष्टज्ञानेन जीवाजीवादिपदार्थविषयिणी रुचिः सूत्ररुचि**र्गोविन्दाचार्य**स्येव । जायते च पुनः पुनः स्मरणाद् दृढतरः संस्कार इव पुनः पुनरध्ययनाद् दृढतरं ज्ञानं निःसंशयमिति न किमप्यनुपपन्नम् ४।

---

१. मतिः संमति० L.P.C. ॥ २. तिण्णा इति–मु० ॥ ३. (तत्तदनुष्ठाने) मु० ॥

एकेन पदेनानेकपदतदर्थप्रतिसंधानद्वारा उदके तैलबिन्दुवत् प्रसरणशीला रुचिर्बीजरुचिः, प्रसार उत्तरोत्तरोत्पत्तिः ५।

अर्थतः सकलसूत्रविषयिणी रुचिरभिगमरुचिः । आह च —

**''सो होइ अभिगमरुई, सुअनाणं जस्स अत्थओ दिट्ठं ।**
**इक्कारस अंगाइं, पइन्नगं दिट्ठिवाओ अ''** ॥१॥ [ प्र.सा./९५६ ] त्ति ।

प्रकीर्णकमिति जातावेकवचनम् , ततः प्रकीर्णकानि **उत्तराध्ययना**दीनीत्यर्थः, **दृष्टिवाद**श्चेति चकारादुपाङ्गादिपरिग्रहः । नन्वेवमियं सूत्ररुचेर्न भिद्येत, न चेयमर्थाविच्छिन्नसूत्रविषया, सा च केवलं सूत्रविषयेत्येवं भेदः, केवलसूत्रस्य मूकत्वात् , तद्विषयरुचेरप्रमाणत्वात् । आह च —**''मूअगं केवलं सुत्तं''** [ **उपदेशपदे गा.८५६** ] त्ति । न केवलं केवलसूत्ररुचेरप्रमाणत्वम् , किन्त्वज्ञानानुबन्धित्वमपि । तदुक्त**मुपदेशमालायाम् —**

**''अपरिच्छिअसुअणिहसस्स केवलमभिन्नसुत्तचारिस्स ।**
**सव्वुज्जमेण वि कयं, अन्नाणतवे बहुं पडइ''** ॥१॥ [ उप.मा./गा.४१५ ] त्ति ।

'अभिन्नं' ति अविवृतम् , इति चेत् ?, सत्यम् , सूत्ररुचावर्थस्यार्थरुचौ च सूत्रस्य प्रवेशेऽपि सूत्रार्थाध्ययनजनितज्ञानविशेषकृतरुचिभेदाद् भेदः । अत एव सूत्राध्ययनादर्थाध्ययनेऽधिको यत्न उपदिष्ट **उपदेशपदे** । तथाहि —

**''सुत्ता अत्थे जत्तो, अहिगयरो णवरि होइ कायव्वो ।**
**इत्तो उभयविसुद्धि त्ति, मूअगं केवलं सुत्तं''** ॥१॥ [ उप.प./गा.८५६ ] ति ।

अथवा सूत्र-निर्युक्त्यादिग्रन्थविषयरुचिभेदाद् भेदः । अत एवाज्ञारुचिः सूत्ररुचेर्भिन्ना निर्युक्त्यादिविषयत्वेन **स्थानाङ्गवृत्तौ** प्रतिपादितेति ६।

सर्वप्रमाणसर्वनयजन्यसर्वद्रव्यसर्वभावविषयिणी रुचिर्विस्ताररुचिः ७।

दर्शन-ज्ञान-चारित्र-तपो-विनयाद्यनुष्ठानविषयिणी रुचिः क्रियारुचिः । न चाज्ञारुचिरपि धर्मानुष्ठानविषया इयमपि तथेति कोऽनयोर्भेदः ? इति शङ्कनीयम् , सा ह्याज्ञास्मरणनियता, इयं त्वसङ्गेत्येवं भेदाद् । अत एव सर्वसात्म्येन परिणतचारित्रक्रियाश्चारित्रकाया महर्षयो भणिता । **''इत्तो उ चरित्तकाओ''** [ ] त्ति वचनेन **हरिभद्राचार्यैः** ८।

अनभिगृहीतकुदृष्टेः प्रवचनाविशारदस्य निर्वाणपदमात्रविषयिणी रुचिः सङ्क्षेपरुचिर्यथोपशमादिपदत्रयविषयिणी **चिलातिपुत्र**स्य । न च विशेष्यभागरहितं विशेषणद्वयमात्रमेतल्लक्षणं युक्तम् , मूर्छादिदशासाधारण्यात् ९।

धर्मपदमात्रश्रवणजनित[1]प्रीतिसहिता धर्मपदवाच्यविषयिणी रुचिर्धर्मरुचिः । आह च –

"**जो अत्थिकायधम्मं, सुयधम्मं खलु चरित्तधम्मं च ।**
**सद्दहइ जिणाभिहिअं, सो धम्मरुइ त्ति णायव्वो**" ॥१॥ [ **प्र.सा./गा.९६०** ] ति ।

[न चैवं [2]ग्रामधर्मादिपदवाच्यविषयिण्यपि रुचिस्तथा स्यादिति वाच्यम् , निरुपपद-धर्मपदवाच्यत्वस्यैव ग्रहणात् । न चैवं चारित्रधर्मादिपदवाच्यविषयिण्यामव्याप्ति-र्निरुपपदत्वस्य वास्तवधर्मातिप्रसञ्जकोपपदराहित्यस्य विवक्षणादिति दिक्] १०।

शिष्यव्युत्पादनार्थं चेत्थमुपाधिभेदेन सम्यक्त्वभेदनिर्देशः, तेन क्वचित् केषाञ्चि-दन्तर्भावेऽपि न क्षतिः इत्**युत्तराध्ययनवृत्तौ** । यथा च नान्तर्भावस्तथोक्तमस्माभिः, तथापि नैतदन्यतरत्वं सम्यक्त्वलक्षणम् , रुचीनां तत्तद्विषयभेदेन परिगणनस्याशक्यत्वात् । रुचेः प्रतिरूपत्वेन वीतरागसम्यक्त्वेऽव्याप्तेश्च । "**दसविहे सरागसम्मत्तदंसणे पण्णत्ते**" [ **सू० ७५१** ] इति **स्थानाङ्गसूत्रस्य** स्वारस्येन सरागसम्यक्त्वस्यैव लक्ष्यत्वेन च रागस्याननुगत्त्वेन लक्ष्यभेदाल्लक्षणभेदोऽवश्यमनुसरणीय इति । वस्तुतो लक्षणमिह लिङ्गं व्यञ्जकमितियावत् । व्यञ्जकस्य च वह्निव्यञ्जकधूमालोकवदननुगमेऽपि न दोषः । अत एव च "**नाणं च दंसणं चेव**" [ **नवतत्त्व प्र० गा० ५** ] इत्यादिना ज्ञान-दर्शन-चारित्र-तपःप्रभृतीनामननुगतानामेव जीवस्वरूपव्यञ्जकत्वरूपजीवलक्षणत्वम् , उक्तलिंगं विनापि लैङ्गिकसद्भावेऽप्यविरोधश्च । यदाहुर**ध्यात्ममतपरीक्षायामुपाध्यायश्रीयशोविजयगणयः –**

"**जं च जीअलक्खणं तं, उवइट्ठं तत्थ लक्खणं लिङ्गं ।**
**तेण विणा सो जुज्जइ, धूमेण विणा हुआसु व्व**" ॥१॥ [ अ.प./गा. १५२ ] त्ति ।

एवं च रुच्यभावेऽपि वीतरागसम्यक्त्वसद्भावान्न क्षतिः । व्यङ्ग्यं त्वेकमनाविलसकल-ज्ञानादिगुणैकरसस्वभावं शुद्धात्मपरिणामरूपं परमार्थतोऽनाख्येयमनुभवगम्यमेव सम्यक्त्वम् । तदुक्तं धर्मबीजमधिकृत्**योपदेशपदे –**

"**पायमणक्खेअमिणं, अणुहवगम्मं तु सुद्धभावाणं ।**
**भवखयकरं ति गरुअं, बुहेहि सयमेव विण्णेयं**" ॥१॥ [ उप.प./गा.२३२ ] ति ।

स्वयमिति निजोपयोगतः, इक्षुक्षीरादिरसमाधुर्यविशेषाणामिवानुभवेऽप्यनाख्येय-त्वात् । उक्तं च –

---

१. PLI ०प्रीतिसहताध(ऽऽहिता ध)र्मपद० मु०सि० ॥ २. ग्राम्य-PL ॥

**"इक्षुक्षीरगुडादीनां, माधुर्यस्यान्तरं महत् ।**
**तथापि न तदाख्यातुं, सरस्वत्याऽपि पार्यते"** ॥१॥ [ ] इति ।

यदि च धर्मबीजस्याप्येवमनुभवैकगम्यत्वम्, का वार्त्ता तर्हि भवशतसहस्रदुर्लभस्य साक्षान्मोक्षफलस्य चारित्रैकप्राणस्य सम्यक्त्वस्य ? इति । शुद्धात्मपरिणतिस्वरूपे हि तत्र नातिरिक्तप्रमाणानां प्रवृत्तिः । उक्तं च शुद्धात्मस्वरूपमधिकृत्य**आचारसूत्रे –**
**"सव्वे सरा णिअट्टंति, तक्का जत्थ ण विज्जइ, मइ तत्थ ण गाहिआ"** [ आचा.५/६/१७० ] इत्यादि ।

तदेतद् ज्ञानादिगुणसमुदायाद् भेदाभेदादिना विवेचयितुमशक्यमनुभवगम्यमेवेति स्थितम् । अत्र पद्ये[1] –

**"न भिन्नं नाभिन्नं ह्युभयमपि नो नाप्यनुभयं,**
**न वा शाब्दन्यायाद् भवति भजनाभाजनमपि ।**
**गुणासीनं लीनं निरवधिविधिव्यञ्जनपदे,**
**यदेतत्सम्यक्त्वं तदनुकुरुते पानकरसम्** ॥१॥ [ ]
**न केनाप्याख्यातं न च परिचितं नाप्यनुमितं,**
**न चार्थादापन्नं क्वचिदुपमितं नापि विबुधैः ।**
**विशुद्धं सम्यक्त्वं न च हृदि न नालिङ्गितमपि,**
**स्फुरत्यन्तर्ज्योतिर्निरुपधिसमाधौ समुदितम्"** ॥२॥ [ ]

इत्यलं प्रसङ्गेन, प्रकृतमनुसरामः । निसर्गा-ऽधिगमयोरुभयोरप्येकमन्तरङ्गं कारणमाह – '**मिथ्यात्वपरिहाण्यैवे**[2]'ति मिथ्यात्वं जिनप्रणीततत्त्वविपरीतश्रद्धानलक्षणम्, तस्य परिहाण्यैव सर्वथा त्यागे त्रिविधं त्रिविधेन प्रत्याख्यानेनेतियावत् । आह च **–"मिच्छत्त-पडिक्कमणं, तिविहं तिविहेण नायव्वं"** [ आवश्यकनिर्युक्ति/गा.१२५१ ] ति ।

मिथ्यात्वं च लौकिक-लोकोत्तरभेदाद् द्विधा, एकैकमपि देवविषय-गुरुविषय-भेदाद् द्विविधम्, तत्र लौकिकदेवगतं लौकिकदेवानां हरि-हर-ब्रह्मादीनाम्, प्रणाम[3]-पूजादिना तद्भवनगमनादिना च तत्तद्देशप्रसिद्धमनेकविधं ज्ञेयम् १।

लौकिकगुरुगतमपि लौकिकगुरूणां ब्राह्मण-तापसादीनां नमस्कृतिकरणं-तदग्रे

---

१. पद्ये महोपाध्यायश्रीयशोविजयगणिकृते-P.L. ॥ २. ०ण्यैवमि०-मु० ॥ ३. L । प्रणाम-पूजादीनां (दिना)-मु० PC ॥

पतनम्, तदग्रे नमः शिवायेत्यादिभणनम्, तत्कथाश्रवणम्, तदुक्तक्रियाकरणतः कथाश्रवणबहुमानकरणादिना च विविधम् २।

लोकोत्तरदेवगतं तु परतीर्थिकसंगृहीतजिनबिम्बार्चनादिना इहलोकार्थं[1] जिनयात्रा-गमनमाननादिना च स्यात् ३।

लोकोत्तरगुरुगतं च पार्श्वस्थादिषु गुरुत्वबुद्ध्या वन्दनादिना गुरुस्तूपादावैहिकफलार्थं यात्रोपयाचितादिना चेति भेदचतुष्टयी । तदुक्तं **दर्शनशुद्धिप्रकरणे –**

**''दुविहं लोइअमिच्छं, देवगयं गुरुगयं मुणेअव्वं ।**
**लोउत्तरिअं पि दुविहं, देवगयं गुरुगयं चेव ॥१॥** [ द.प्र./२४३, सम्बो.प्र. सम्य./गा.४४ ]
**चउभेअं मिच्छत्तं, तिविहं तिविहेण जो विवज्जेइ ।**
**अकलंकं सम्मत्तं, होइ फुडं तस्स जीवस्स''** ॥२॥ [ द.प्र./२४४, सम्बो.प्र. सम्य./गा.४५ ]

त्रिविधं त्रिविधेनेत्यत्र भावनामेवमाहुः –

**''एयं अणंतरुत्तं, मिच्छं मणसा न चिंतइ करेमि ।**
**सयमेव सो सो करेउ, अन्नेण कए व सुट्ठु कयं ॥१॥** [ सम्बो.प्र. सम्य./गा.४६ ]
**एवं वाया न भणइ, करेइ अण्णं च न भणइ करेह ।**
**अन्नकयं न पसंसइ, न कुणइ सयमेव काएणं ॥२॥** [ श्रा.ध.वि./गा.३२ ]
**करसन्नभमुहखेवाइएहिं[2] न य कारवेइ अन्नेणं ।**
**अन्नकयं न पसंसइ, अण्णेण कयं च सुट्ठु कयं''** ॥३॥ [ श्रा.ध.वि./गा.३४ ]

[ननु त्रिविधं त्रिविधेन प्रत्याख्यातमिथ्यात्वस्य मिथ्यादृष्टिसंसर्गे कथं नानुमति-रूपमिथ्यात्वप्रसङ्ग इति चेत् ? न, तस्याप्यतिचाररूपस्य वर्ज्जनीयत्वस्यैवोक्तत्वात् । स्वकुटुम्बादिसम्बन्धिनो मिथ्यादृशो वर्जनाशक्तौ संवासानुमतिः स्यादिति चेत्? न, आरम्भिणा संवासे आरम्भक्रियाया बलात्[3] प्रसङ्गात् संवासानुमतिसंभवेऽपि मिथ्यात्वस्य भावरूपत्वेन तदसम्भवात् । अन्यथा संयतस्यापि मिथ्यादृष्टिनिश्राया अपि सम्भवेन तत्संवासानु-मतेर्दुर्वारत्वादिति दिक्]

यद्यपि तत्त्ववृत्त्या अदेवादेर्देवत्वादिबुद्ध्याऽऽराधने एव मिथ्यात्वम्, तथाप्यैहि-काद्यर्थमपि यक्षाद्याराधनमुत्सर्गतस्त्याज्यमेव । परम्परया मिथ्यात्ववृद्धि-स्थिरी-करणादिप्रसङ्गेन प्रेत्य दुर्लभबोधित्वापत्तेः । यतः –

---

१. जैन० मु० ॥ २. छोडिय हेसियाइ चेट्ठाहिं–इति श्राद्धधर्मविधिप्रकरणे ॥ ३. बलात्-प्रसवात् मु० ॥

**''अन्नेसिं सत्ताणं, मिच्छत्तं जो जणेइ मूढप्पा ।**
**सो तेण निमित्तेणं, न लहइ बोहिं जिणाभिहिअं'' ॥१॥ [ सं.प्र.सम्य./गा.४२ ]**

**रावण-कृष्णा**द्यालम्बनमपि नोचितमेव कालभेदात् । यतस्तत्समयेऽर्हद्धर्मस्येतर-धर्मेभ्योऽतिशायित्वेन न मिथ्यात्ववृद्धिस्तादृशी । सम्प्रति च स्वभावतोऽपि मिथ्यात्व-प्रवृत्तिर्दुर्निवारैवेति । अथ[1] मिथ्यात्वं पञ्चविधं । यदाह—

**''आभिग्गहिअमणभिग्गहं च तह अभिनिवेसिअं चेव ।**
**संसइअमणाभोगं, मिच्छत्तं पंचहा एअं'' ॥१॥ [ पञ्च.गा. ८६/सं.प्र.सम्य.गा.४७ ]**

तत्राभिग्रहिकं पाखण्डिनां स्वशास्त्रनियन्त्रितविवेकालोकानां परपक्षप्रतिक्षेपदक्षाणाम्, जैनानां च धर्माऽधर्मवादेन परीक्षापूर्वं तत्त्वमाकलय्य स्वाभ्युपगतार्थं श्रद्धमानानां परपक्षप्रतिक्षेपणदक्षत्वेऽपि नाभिग्रहिकत्वम्, स्वशास्त्रानियन्त्रितत्वाद् विवेकालोकस्य । यस्तु नाम्ना जैनोऽपि स्वकुलाचारेणैवागमपरीक्षां बाधते, तस्याभिग्राहिकत्वमेव, सम्यग्दृशो-ऽपरीक्षितपक्षपातित्वायोगात् । तदुक्तं **हरिभद्रसूरिभिः**—

**''पक्षपातो न मे वीरे, न द्वेषः कपिलादिषु ।**
**युक्तिमद्वचनं यस्य, तस्य कार्यः परिग्रहः'' ॥१॥ [ लो.नि./गा. ३८ ]** इति ।

गीतार्थनिश्रितानां **माषतुषा**दिकल्पानां तु[2] प्रज्ञापाटवाभावाद् विवेकरहितानामपि गुणवत्पारतन्त्र्यान्न दोष इति भावः । तच्च नास्त्यात्मेत्यादि षड्विकल्पैः षड्विधम् १।

अनाभिग्रहिकं प्राकृतजनानाम्, सर्वे देवा वन्द्या न निन्दनीया, एवं सर्वे गुरवः, सर्वे धर्मा इतीत्याद्यनेकविधम् २।

आभिनिवेशिकं जानतोऽपि यथास्थितं दुरभिनिवेशविप्लावितधियो **गोष्ठामाहिला**-देरिव ३। [अभिनिवेशेऽनाभोगात् प्रज्ञापकदोषाद्वा वितथश्रद्धानवति सम्यग्दृष्टावपि स्याद्। अनाभोगाद् गुरुनियोगाद्वा सम्यग्दृष्टेरपि वितथश्रद्धानभणनात् । तथाचोक्त-**मुत्तराध्ययननिर्युक्तौ**—

**''सम्मद्दिट्ठी जीवो, उवइट्ठं पवयणं तु सद्दहइ ।**
**सद्दहइ असब्भावं, अणभोगा गुरुणिओगा वा'' ॥१॥ [ उ.नि./गा.१६३ ]** इति ।

तद्वारणाय दुरिति विशेषणम्, सम्यग्वक्तृवचनानिवर्त्तनीयत्वं तदर्थः । अनाभोगादिजनितो मुग्धश्राद्धादीनां वितथश्रद्धानरूपोऽभिनिवेशस्तु सम्यग्वक्तृवचननिवर्त्तनीय इति न दोषः ।

१. अथवा-P.L. ॥ २. च-मु० C ॥

तथा **जिनभद्र-सिद्धसेनादि**प्रावचनिकप्रधानविप्रतिपत्तिविषयपक्षद्वयेऽप्यन्यतरस्य वस्तुनः शास्त्रबाधितत्वात् तदन्यतरश्रद्धानवतोऽभिनिवेशित्वप्रसङ्ग इति तद्वारणार्थं 'जानतोऽपि' इति शास्त्रतात्पर्यबाधप्रतिसन्धानवत इत्यर्थः,[1] **सिद्धसेनादय**श्च स्वाभ्युपगतमर्थं शास्त्रतात्पर्य-बाधं प्रतिसन्धायापि पक्षपातेन न न प्रतिपन्नवन्तः । किन्त्वविच्छिन्नप्रावचनिकपरम्परया शास्त्रतात्पर्यमेव स्वाभ्युपगतार्थानुकूलत्वेन प्रतिसन्धायेति न तेऽभिनिवेशिनो । **गोष्ठा-माहिलादय**स्तु शास्त्रतात्पर्यबाधं प्रतिसन्धायैवान्यथा श्रद्धत इति न दोषः । इदमपि मतिभेदाभिनिवेशादिमूलभेदादनेकविधम् , **जमालि-गोष्ठामाहिला**दीनाम् ।

उक्तं च **व्यवहारभाष्ये –**

**''मइभेएण जमाली, पुव्विं वुग्गाहिएण गोविंदो ।**
**संसग्गीए भिक्खू , गोट्ठामाहिल अहिणिवेसे''** ॥१॥ [ **व्य.भा./२७१४** ] त्ति ३।]

सांशयिकं देव-गुरु-धर्मेष्वयमन्यो वेति संशयानस्य भवति । [सूक्ष्मार्थादिविषयस्तु संशयः साधूनामपि भवति, स च **''तमेव सच्चं णीसंकं, जं जिणेहिं पवेइअं''** [ **भगवती-सूत्रे** ] इत्याद्यागमोदितभगवद्वचनप्रामाण्यपुरस्कारेण निवर्त्तते । स्वरसवाहितया अनिवर्त्तमानश्च सः सांशयिकमिथ्यात्वरूपः सन्ननाचारापादक एव । अत एवाकाङ्क्षामोहोदयादाकर्ष-प्रसिद्धिः । इदमपि सर्वदर्शनजैनदर्शनतदेकदेशपदवाक्यादिसंशयभेदेन बहुविधम् ।]

अनाभोगिकं विचारशून्यस्यैकेन्द्रियादेर्वा विशेषज्ञानविकलस्य भवति । इदमपि सर्वांशविषयाव्यक्तबोधस्वरूपं विवक्षितकिञ्चिदंशाव्यक्तबोधस्वरूपं चेत्यनेकविधम् । [एतेषु मध्ये आभिग्राहिकाऽऽभिनिवेशिके गुरुके, विपर्यासरूपत्वेन सानुबन्धक्लेश-मूलत्वात् । शेषाणि च त्रीणि[2] (न) विपरीतावधारणरूपविपर्यासव्यावृत्तत्वेन तेषां क्रूरानुबन्धफलकत्वाभावात्[3] । तदुक्तं **चोपदेशपदे –**

**''एसो अ एत्थ गुरुओ, णाणज्झवसायसंसया एवं ।**
**जम्हा असप्पवित्ती, एत्तो सव्वत्थणत्थफला''** ॥१॥ [ **उप.प./गा.१९८** ]

दुष्प्रतीकाराऽसत्प्रवृत्तिहेतुत्वेन एष विपर्यासोऽत्र गरीयान् दोषः[4] । न त्वनध्यवसाय-संशयावेवम्भूतातत्त्वाभिनिवेशाभावात् । तयोः सुप्रतीकारत्वेनात्यन्तानर्थसम्पादकत्वा-भावादित्येतत्तात्पर्यार्थः]

[5]एवं सर्वथा सर्वप्रकारमिथ्यात्वपरिहारेण सम्यक्त्वं गुरुसमक्षमालापकोच्चारपूर्वं

१. इत्यर्थः–मु० नास्ति ॥ २. त्रीणि वि० L.P.C. ॥ ३. भावात् उक्तं चो० P ॥ ४. PCL दोषो–मु० नास्ति ॥ ५. एवं च स° L ॥

प्रतिपत्तव्यम् । तस्या**नन्दादि**श्रावकोपदर्शितविधिनैव प्रतिपत्त्यौचित्यात्[1] ।
तथाचोक्त**मावश्यकनिर्युक्तौ** —

**''तत्थ समणोवासओ पुव्वामेव मिच्छत्ताओ पडिक्कमइ, सम्मत्तं उवसंपज्जइ । नो से कप्पइ अज्जप्पभिईं अन्नउत्थिए वा अन्नउत्थिअदेवयाणि वा अन्नउत्थि-अपरिग्गहिअरिहंतचेइयाइं वा वंदित्तए[2] वा णमंसित्तए वा, पुव्विं अणालित्तएणं[3] आलवित्तए वा संलवित्तए वा । तेसिं असणं वा पाणं वा खाइमं वा साइमं वा दाउं वा अणुप्पदाउं वा, णण्णत्थ रायाभिओगेणं गणाभिओगेणं बलाभिओगेणं[4] देवयाभिओगेणं गुरुनिग्गहेणं वित्तीकंतारेणं''** [ आवश्यकसूत्रे ६/३६ हारिभद्रीयवृत्तिः पृ. ८११ ] ति ।

**योगशास्त्रवृत्ता**वपि — **''एवंविधं च सम्यक्त्वं विशिष्टद्रव्यादिसामग्र्यां सत्यां गुरोः समीपे विधिना प्रतिपद्य श्रावको यथावत् पालयति''** [ यो.शा.वृ २/१७ ] **यतः —**

**''समणोवासओ तत्थ, मिच्छत्ताउ पडिक्कमे ।**
**दव्वओ भावओ पुव्विं, सम्मत्तं पडिवज्जए ॥१॥** [ मूल.प्र.४, यो.शा.२/१७ ]
**न कप्पई से परतित्थिआणं, तहेव तेसिं चिअ देवयाणं ।**
**परिग्गहेताण[5] य चेइआणं, पहावणावंदणपूअणाई ॥२॥** [ मूल.प्र.५, यो.शा.२/१७ ]
**लोआण तित्थेसु सिणाणदाणं, पिंडप्पदाणं हुणणं तवं च ।**
**संकंतिसोमग्गहणाइएसु, पभूअलोआण पवाहकिच्चं''॥३॥**[ मूल.प्र.६,यो.शा.२/१७ ] ति ।

इत्थं च सम्यक्त्वाणुव्रतादिप्रतिपत्तिः सर्वाऽपि गुरुसाक्षिकैव फलवती, नान्यथा । यतः **पञ्चाशके** वधवर्ज्जनविधिप्रस्तावे —

**''गुरुमूले सुअधम्मो, संविग्गो इत्तरं[6] च इअरं वा ।**
**गिण्हइ वयाइँ कोई, पालेइ तहा निरइआरं''** ॥१॥ [ पञ्चा.१/९ ]

वृत्तिर्यथा —गुरुः सम्यग्ज्ञानक्रियायुक्तः सम्यग् धर्मशास्त्रार्थदेशकः । यदाह —

**''धर्मज्ञो धर्मकर्त्ता च, सदा धर्मपरायणः ।**
**सत्त्वेभ्यो धर्मशास्त्रार्थदेशको गुरुरुच्यते''** ॥१॥ [ ]

अथवा-**''जो जेण सुद्धधम्मे, निजोजिओ संजएण गिहिणा वा ।**
**सो चेव तस्स भणणइ, धम्मगुरू धम्मदाणाओ''** ॥१॥ [ ]

---

१. प्रतिपत्तव्यौचित्यात्-मु० C.P. मूल । प्रतिपत्त्यौचित्यात्-LP संशो० ॥ २. वंदेत्तए-मु० ॥ ३. अणालित्तेणं-मु० ॥ ४. बलाभिओगेणं-मु० नास्ति । P.C. आवश्यकसूत्रे अस्ति । बलाभि० L॥ ५. परिग्गहीताण-मु० ॥ ६. उत्तरं व-L । इत्तरं व-P संशो० । इत्तरं च-P मूल ॥

तस्य गुरोराचार्यस्य मूलमन्तिकं गुरुमूलं, तत्र गुरुमूलेऽनेनान्यत्र धर्मश्रवणप्रतिषेधो दर्शितः, विपर्यस्तबोधसम्भवात् । 'श्रुतधर्मः' आकर्णिताणुव्रतादिप्रतिपादनपराप्तप्रवचनः । अनेन चाश्रुतागमस्य ज्ञानाभावेन व्रतप्रतिपत्तिर्न सम्यगिति तत्प्रतिषेधो दर्शितो । यदाह –

''**जस्स नो इमं उवगयं भवइ, इमे जीवा इमे थावरा ( इमे तसा ) तस्स नो सुपच्चक्खायं भवइ, से दुप्पच्चक्खायं भवइ, से दुप्पच्चक्खाई मोसं भासइ, नो सच्चं**[1] **भासइ**'' [ ] त्ति ।

तथा स्वयमुत्प्रेक्षितशास्त्रस्यापि प्रतिषेध उक्तः । स्वयमुत्प्रेक्षणे हि सम्यक्शास्त्रानवगमेन सम्यक्प्रवृत्त्यभावात् । यदाह –

''**न हि भवति निर्विगोपकमनुपासितगुरुकुलस्य विज्ञानम् ।**
**प्रकटितपश्चाद्भागं, पश्यत**[2] **नृत्यं मयूराणाम्**'' ॥१॥ [ ]

तथा श्रुत[3]धर्मत्वादेव संविग्नो मोक्षाभिलाषी सन् संसारभीतो वा, अन्यथाविधस्य हि व्रतप्रतिपत्तिर्न मोक्षाय स्यात् । इत्वरमल्पकालम् , इतरं वा बहुकालं यावज्जीवमित्यर्थः । इति पूर्वगाथासूचितो वधवर्जनविधिः । इत्यलं प्रासङ्गिकेन । प्रकृतं प्रस्तुमः –

तच्च सम्यक्त्वं शुभात्मपरिणामरूप[4]मस्मदीयानामप्रत्यक्षं केवलं लिङ्गैर्लक्ष्यते । अत आह–सम्यक्त्वं कीदृशं भवति ? '**पञ्च**' इति पञ्चभिः शम-संवेग-निर्वेदाऽनुकम्पा-ऽऽस्तिक्यरूपै**र्लक्षणै**र्लिङ्गै**र्लक्षितम्** उपलक्षितं भवति । [5]एभिर्लक्षणैः परस्थं परोक्षमपि सम्यक्त्वं लक्ष्यते इति भावः ।

तत्र शमः प्रशमः अनन्तानुबन्धिनां कषायाणामनुदयः, स च प्रकृत्या कषायपरिणतेः कटुफलावलोकनाद्वा भवति । यदाह –

''**पयईए कम्माणं, नाऊणं वा विवागमसुहं ति ।**
**अवरद्धे वि न कुप्पइ, उवसमओ सव्वकालं पि**'' ॥१॥

**[ श्रा.प्र.५५, विं.विं.६/१०, ध.सं.णी/ ८०८ ]** त्ति ।

अन्ये तु क्रोधकण्डूविषयतृष्णोपशमः शम इत्याहुः । अधिगतसम्यग्दर्शनो हि साधूपासनावान् कथं क्रोधकण्ड्वा विषयतृष्णया च तरलीक्रियेत । ननु क्रोधकण्डूविषयतृष्णोपशमश्चेच्छमस्तर्हि **श्रेणिक-कृष्णादीनां** सापराधे निरपराधेऽपि च परे क्रोधवतां

---

१. नो सच्चं भासं भासइ–P । L नास्ति ॥ २. ०ति–L.P.C. ॥ ३. ज्ञातध° मु० । श्रुत ध° L.P.C. ॥ ४. मस्मदीयानाम० मु० C. । °मस्मदादीनाम° P.L. ॥ ५. तुला–योगशास्त्रवृत्ति २/१५ प० १७९ तः॥

विषयतृष्णातरलितमनसां च कथं शमः ? तदभावे च कथं सम्यक्त्वसंभवः ? इति चेत् ? मैवम्, लिङ्गिनि सम्यक्त्वे सति लिङ्गैरवश्यं भाव्यमिति नायं नियमः, दृश्यते हि धूमरहितोऽप्ययस्कारगृहेषु वह्निः । भस्मच्छन्नस्य वा वह्नेर्न धूमलेशोऽपीति । अयं तु नियमः, सुपरीक्षितो –लिङ्गे सति लिङ्गी भवत्येव । यदाह –

**"लिङ्गे लिङ्गी भवत्येव, लिङ्गिन्येवेतरत्पुनः ।**
**नियमस्य विपर्यासे, संबन्धो लिङ्ग–लिङ्गिनो"** ॥१॥ **[ प्रमा.स.स्वा. ]** इति ।

संज्वलनकषायोदयाद्वा कृष्णादीनां क्रोधकण्डूविषयतृष्णे । संज्वलना अपि केचन कषायास्तीव्रतयाऽनन्तानुबन्धिसदृशविपाका इति सर्वमवदातम् १।

[१]संवेगो मोक्षाभिलाषः । सम्यग्दृष्टिर्हि नरेन्द्र–सुरेन्द्राणां विषयसुखानि दुःखानुषङ्गाद्–दुःखतया मन्यमानो मोक्षसुखमेव सुखत्वेन मन्यतेऽभिलषति च । यदाह –

**"नरविबुहेसरसुक्खं, दुक्खं चिअ भावओ अ मन्नंतो ।**
**संवेगओ न मोक्खं, मोत्तूणं किंचि पत्थेइ"** ॥२॥

**[ ध.सं.णी/८०९, श्रा.प्र./गा.५६, विं.विं.६/११ ]** त्ति ।

निर्वेदो भववैराग्यम्, सम्यग्दर्शनी हि दुःखदौर्गत्यगहने भवकारागारे कर्मदण्डपाशि[२]–कैस्तथा कदर्थ्यमानः प्रतिकर्तुमक्षमो ममत्वरहितश्च दुःखेन निर्विण्णो भवति । यदाह –

**"नारयतिरिअनरामरभवेसु निव्वेअओ वसइ दुक्खं ।**
**अकयपरलोअमग्गो, ममत्तविसवेगरहिओ अ"** ॥१॥

**[ ध.सं.णी/८१०, विं.विं./६/१३, श्रा.प्र./५७ ]**

अन्ये तु संवेग–निर्वेदयोरर्थविपर्यासमाहुः – संवेगो भवविरागः, निर्वेदो मोक्षाभिलाष इति ३।

अनुकम्पा दुःखितेष्वपक्षपातेन दुःखप्रहाणेच्छा, पक्षपातेन तु करुणा पुत्रादौ व्याघ्रादीनामप्यस्त्येव सा [३]चानुकम्पा द्रव्यतो भावतश्चेति द्विधा । द्रव्यतः सत्यां शक्तौ दुःखप्रतिकारेण, भावतश्चार्द्रहृदयत्वेन । यदाह –

**"दट्ठूण पाणिनिवहं, भीमे भवसागरंमि दुक्खत्तं ।**
**[४]अविसेसओऽणुकंपं, दुहा वि सामत्थओ कुणइ"** ॥४॥

**[ श्रा.प्र./५८, विं.विं./६/१२, ध.सं.णी/८११ ]** त्ति ।

---

१. तुला–प्रवचनसारोद्धारवृत्तिः खण्ड २ । प० १७४ ॥ २. °पाशकै° मु० । L.P.C. योगशास्त्र–प्रवचनसारोद्धारवृत्त्योरपि–पाशिकै° ॥ ३. चानुकम्प° मु० । L.P.C. योगशास्त्रप्रवचनसारोद्धारवृत्त्योरपि–चानुकम्पा० इति ॥ ४. अविसेओ० मु० । L.P.C. योगशास्त्रवृत्तावपि अविसेसओ–इति ॥

अस्तीति मतिरस्येत्यास्तिकस्तस्य भावः कर्म[1] वा आस्तिक्यम्, तत्त्वान्तरश्रवणेऽपि जिनोक्ततत्त्वविषये निराकाङ्क्षा प्रतिपत्तिः । तद्वान् हि आस्तिक इत्युच्यते । यदाह —

''**मण्णइ तमेव सच्चं, नीसंकं जं जिणेहि पण्णत्तं ।**
**सुहपरिणामो[2] सम्मं, कंखाइविसुत्तिआरहिओ**'' ॥५॥

[ **विं.विं.६/१४, श्रा.प्र./५९, ध.सं.णी/८१२** ] त्ति ।

यत्राप्यस्य मोहवशात् क्वचन संशयो भवति, तत्राप्यप्रतिहतेयमर्गला **श्रीजिनभद्रगणिक्षमाश्रमणो**दिता ।

''**कत्थय[3] मइदुब्बलेणं, तव्विहआयरिअविरहओ वा वि ।**
**नेअगहणत्तणेण य, नाणावरणोदएणं च**'' ॥१॥ [ **सं.प्र.४८/ध्या.श.४७** ]
**हेऊदाहरणासम्भवे अ, सइ सुट्ठु जं न बुज्झेज्जा ।**
**सव्वण्णुमयमवितहं, तहा वि तं चिंतए मइमं** ॥२॥ [ **सं.प्र.४९/ध्या.श.४८** ]
**अणुवकयपराणुग्गहपरायणा जं जिणा जगप्पवरा ।**
**जिअरागदोसमोहा य, नन्नहा वाइणो तेणं**'' ॥३॥ [ **सं.प्र.५०/ध्या.श.४९** ]

यथा वा-

''**सूत्रोक्तस्यैकस्याप्यरोचनादक्षरस्य भवति नरः ।**
**मिथ्यादृष्टिः सूत्रं, हि नः प्रमाणं जिनाभिहितम्**'' ॥१॥ इति ।

अन्ये[5] तु शमादिलिङ्गान्यन्यथा व्याचक्षते-सुपरीक्षितप्रवक्तृप्रवाद्यप्रवचनतत्त्वाभिनिवेशान्मिथ्याभिनिवेशोपशमः(शमः[6]) । स सम्यग्दर्शनस्य लक्षणम् । यो ह्यतत्त्वं विहायात्मना तत्त्वं प्रतिपन्नः स लक्ष्यते सम्यग्दर्शनवानिति ।

संवेगो भयम्, जिनप्रवचनानुसारिणो नरकेषु शीतोष्णादिसहनं संक्लिष्टासुरादिनिर्मित्तं परस्परोदीरितं च, तिर्यक्षु भारारोपणाद्यनेकविधं, मनुजेषु दारिद्र्यदौर्भाग्यादि, देवेष्वपीर्ष्याविषादपरप्रेष्यत्वादि च दुःखमवलोकयतस्तद्भीरुतया तत्प्रशमोपायभूतं धर्ममनुष्ठाता लक्ष्यते—विद्यतेऽस्य सम्यग्दर्शनमिति ।

निर्वेदो विषयेष्वनभिष्वङ्गः यथा इहलोक एव प्राणिनां दुरन्तकामभोगाभिष्वङ्गो-

---

१. धर्मो–मु० P.C. । कर्मों–L संशो० योगशास्त्रप्रवचनसारोद्धारवृत्त्योः ॥ २. °मा–मु० । °मो–L.P.C. योगशास्त्रवृत्तावपि ॥ ३. कत्थइ–L । तत्थ य–इति ध्यानशतके ॥ ४. नेअ० मु० सि० । भेअ० P.L. ॥ ५. तुला–योगशास्त्रवृत्तिः २।१५ प० १८३ । तत्त्वार्थसूत्रवृत्तिकारस्य सिद्धसेनगणिनः अयमभिप्रायः, दृश्यतां तत्वार्थवृत्तिः १।२॥ ६. शमः–L.P.C. नास्ति, योगशास्त्रवृत्तावस्ति ॥

ऽनेकोपद्रवफलः, परलोकेऽप्यतिकटुकनरकतिर्यग्मनुष्यजन्मफलप्रदः । अतो न किञ्चिदनेन, उज्झितव्य एवायमिति । एवंविधनिर्वेदेनापि लक्ष्यतेऽस्त्यस्य सम्यग्दर्शनमिति ।

अनुकम्पा कृपा, यथा सर्व एव सत्त्वाः सुखार्थिनो, दुःखप्रहाणार्थिनश्च, ततो नैषामल्पाऽपि पीडा मया कार्येत्यनयाऽपि लक्ष्यतेऽस्त्यस्य सम्यक्त्वमिति । सन्ति खलु जिनेन्द्रोपदिष्टा अतीन्द्रिया जीवपरलोकादयो भावा इति परिणामः आस्तिक्यम् । अनेनापि लक्ष्यते सम्यग्दर्शनयुक्तोऽयमिति । अत्र च पञ्चलक्षणप्रदर्शनेन [1]तत्सहचरिताः सप्तषष्टिरपि भेदाः सूचिताः, सम्यक्त्वं च तैर्विशुद्धं स्यात् । यदाहुः –

"**चउसद्दहण ४ तिलिंगं ३, दसविणय १० तिसुद्धि ३ पंचगयदोसं ५ ।**
**अट्ठपभावण ८ भूसण ५ लक्खण ५ पंचविहसंजुत्तं** ॥१॥ [ प्र.सा./९२६ ]
**छव्विहजयणाऽऽगारं ६, छब्भावणभाविअं च ६ छट्ठाणं ६ ।**
**इअ सत्तसट्ठीदंसणभेअविसुद्धं तु सम्मत्तं**" ॥२॥ [ प्र.सा./९२७ ]

चउसद्दहण त्ति– "**परमत्थसंथवो खलु १, सुमुणिअपरमत्थजइजणनिसेवा २ ।**
**वावन्न ३ कुद्दिट्ठीण य, वज्जणा य ४ सम्मत्तसद्दहणा**" ॥३॥
[ प्र.सा./९२८/प्रज्ञा.सू.११०/गा. १३१ ]

तिलिंग त्ति– "**सुस्सूस १, धम्मराओ २, गुरुदेवाणं जहासमाहीए ।**
**वेयावच्चे नियमो ३, सम्मद्दिट्ठिस्स लिंगाइं**" ॥४॥ [ प्र.सा./९२९ ]

दसविणयं त्ति– "**अरिहंत १ सिद्ध २ चेइअ ३, सुए अ ५ धम्मे अ ५ साहुवग्गे अ ६ ।**
**आयरिअ १ उवज्झाए ८, पवयणे ९ दंसणे १० विणओ**" ॥५॥
[ प्र.सा./९३० ]

**भत्तीपूआवन्नजणणं नासणमवन्नवायस्स ।**
**आसायणपरिहारो, दंसणविणओ समासेणं** ॥६॥ [ प्र.सा./९३१ ]

तिसुद्धि त्ति– "**मुत्तूण जिणं मुत्तूण, जिणमयं जिणमयट्ठिए मुत्तुं ।**
**संसारकत्तवारं, चिंतिज्जंतं जगं सेसं**" ॥७॥ [ प्र.सा./९३२ ]

पंचगयदोसं त्ति–"**संका १ कंख २ विगिच्छा ३ पसंस ४ तह संथवो ५ कुलिंगीसुं ।**
**सम्मत्तस्सइयारा, परिहरिअव्वा पयत्तेणं**" ॥८॥ [ प्र.सा./९३३ ]

अट्ठपभावण त्ति–"**पावयणी १ धम्मकही २, वाई ३ नेमित्तिओ ४ तवस्सी अ ५ ।**
**विज्जा ६ सिद्धो अ ७ कई ८, अट्ठेव पभावगा भणिआ**" ॥९॥
[ प्र.सा./९३४/चे.व.म.१२८ ]

---

१. तत्सहचारिता–मु० ॥

भूसण[1] त्ति– ''**जिणसासणे कुसलया १, पभावणा २ तित्थसेवणा ३ थिरया ४ ।**
**भत्ती अ ५ गुणा सम्मत्तदीवया उत्तमा पंच**'' ॥१०॥ [ प्र.सा./९३५ ]

लक्खणपंचविहसंजुत्त ति लक्षणान्युक्तान्येवात्र गाथापि –

''**संवेगो चिअ १ उवसम २, निव्वेओ ३ तह य होइ अणुकंपा ४ ।**
**अत्थिक्कं चिअ एए, सम्मत्ते लक्खणा पंच**'' ॥११॥ [ प्र.सा./९३६ ]

छव्विहजयण त्ति''**नो अन्नतित्थिए अन्नतित्थिदेवे य तह[2] सदेवाइं,**
**गहिए कुतित्थिएहिं, वंदामि १ न वा नमंसामि २** ॥१२॥
[ प्र.सा./९३७ ]

**नेव अणालत्तो आलवेमि ३, नो संलवेमि ४ तह तेसिं,**
**देमि न असणाईअं ५, पासेमि[3] न गंधपुप्फाई ६** '' ॥१३॥
[ प्र.सा./९३८ ]

छआगारं ति ''**रायाभिओगो अ १ गणाभिओगो २, बलाभिओगो ३ असुराभिओगो ४।**
**कंतारवित्ती ५ गुरुनिग्गहो अ ६, छ छिंडिआउ जिणसासणंमि**'' ॥१४॥
[ प्र.सा./९३९ ]

छब्भावणभाविअं ति -

''**मूलं १ दारं २ पइट्ठाणं ३, आहारो ४ भायणं ५ निही ६ ।**
**दुछक्कस्सावि धम्मस्स, संमत्तं परिकित्तिअं**'' ॥१५॥ [ प्र.सा./९४० ]

छट्ठाणं ति– ''**अत्थि अ १ णिच्चो २ कुणई ३, कयं च वेएइ ४ अत्थि णिव्वाणं ५ ।**
**अत्थि अ मुक्खोवाओ ६, छस्सम्मत्तस्स ठाणाइं**'' ॥१६॥ [ प्र.सा./९४१ ]

अथैतासां विषमपदार्थो यथा –[4]परमार्था जीवादयस्तेषां संस्तवः परिचयः १, सुमुनितपरमार्था यतिजना आचार्यादयः, तेषां सेवनम् २, व्यापन्नदर्शना निह्नवादयः ३, कुदर्शनाः शाक्यादयः ४, तेषां वर्ज्जनं त्यागः 'सम्मत्तसद्दहणा' इति सम्यक्त्वं श्रद्धीयते-ऽस्तीतिप्रतिपद्यतेऽनेनेति सम्यक्त्वश्रद्धानम् । न **चाङ्गारमर्द्दका**देरपि परमार्थसंस्तवादि-सम्भवाद् व्यभिचारिता शङ्क्या, तात्त्विकानामेतेषां इहाधिकृतत्वात्, तस्य च तथा-विधानामेषामसम्भवादिति । इह प्राकृतत्वाल्लिङ्गमतन्त्रमिति स्त्रीत्वम् १ । मूलद्वारगाथायां च चतुःश्रद्धानादिशब्दानां चतुर्विधं श्रद्धानं चतुःश्रद्धानम् ।

---

१. भत्तीपूआवन्न(स्स)जणणं मु० ॥ २. तह य स० L.C. ॥ ३. पासेमि L.P.C. । पेसेमि–मु० प्रवचनसारोद्धारे च ॥ ४. तुला–प्रवचनसारोद्धारवृत्तिः खण्ड २ । प० १६८तः ॥

त्रिविधं लिङ्गं त्रिलिङ्गं –दशविधो विनयो दशविनयः। त्रिविधा शुद्धिस्त्रिशुद्धिरित्यादि व्युत्पत्तिर्ज्ञेया।

त्रिलिङ्गे –श्रोतुमिच्छा शुश्रूषा, सद्बोधावन्ध्यनिबन्धनधर्मशास्त्रश्रवणवाञ्छेत्यर्थः। सा च वैदग्ध्यादि[१]गुणवत्तरुणनरकिन्नरगानश्रवणरागादप्यधिकतमा सम्यक्त्वे सति भवति। यदाह–

**"यूनो वैदग्ध्यवतः, कान्तायुक्तस्य कामिनोऽपि दृढम्।**
**किन्नरगेयश्रवणादधिको धर्मश्रुतौ रागः"** ॥१॥ [ षोड. ११/३ ] इति १।

तथा धर्मे चारित्रलक्षणे रागः, श्रुतधर्मरागस्य तु शुश्रूषापदेनैवोक्तत्वात्। स च कर्मदोषात् तदकरणेऽपि कान्तारातीतदुर्गतबुभुक्षाक्षामकुक्षिब्राह्मणघृतभोजनाभिलाषादप्यतिरिक्तो भवति २।

तथा गुरवो धर्मोपदेशका देवा अर्हन्तस्तेषां वैयावृत्त्ये तत्प्रतिपत्तिविश्रामणाभ्यर्चनादौ नियमोऽवश्यङ्कर्त्तव्यताङ्गीकारः, स च सम्यक्त्वे सति भवतीति ३। तानि सम्यग्दृष्टेः धर्मधर्मिणोरभेदोपचारात् सम्यक्त्वस्य लिङ्गानि, एभिस्त्रिभिर्लिङ्गैः सम्यक्त्वं समुत्पन्नमस्तीति निश्चीयत इति भावः। वैयावृत्त्यनियमस्य च तपोभेदत्वेन चारित्रांशरूपत्वेऽपि [२]सम्यक्त्वसत्त्वे चावश्यम्भावित्वेऽपि नाविरतसम्यग्दृष्टिगुणस्थानकाऽभावप्रयोजकतोद्भाव्या। एतद्रूपचारित्रस्याल्पतमत्वेनाचारित्रतया विवक्षितत्वात्। संमूर्छनजानां संज्ञामात्रसद्भावेऽपि विशिष्टसंज्ञाऽभावादसंज्ञित्वव्यपदेशवदिति। उपशान्तमोहादिषु तु कृतकृत्यत्वादेषां साक्षादभावेऽपि फलतया सद्भावान्न तेष्वप्येतेषां व्यभिचारः। वैयावृत्त्यनियमश्चोपरिष्टात् **श्राद्धविधि**पाठेन दर्शयिष्यत इति ततोऽवसेयः।

दशविनये चैत्यान्यर्हत्प्रतिमाः, प्रवचनं जीवादितत्त्वं, दर्शनम् सम्यक्त्वं तदभेदोपचारात् तद्वानपि दर्शनमुच्यते। एतेषु दशसु भक्तिरभिमुखागमनाऽऽसनप्रदान-पर्युपास्त्यञ्जलिबन्धाद्या, पूजा सत्काररूपा, वर्णः प्रशंसा, तज्जननमुद्भासनम्, अवर्णवादस्याश्लाघाया वर्ज्जनं परिहारः। आशातना प्रतीपवर्त्तनं तस्याः परिहारः। एष दशस्थानविषयत्वाद् दशविधो दर्शनविनयः, सम्यक्त्वे सत्यस्य भावात् सम्यक्त्वविनयः।

त्रिशुद्ध्यां जिनं वीतरागं जिनमतं स्यात्पदलाञ्छितं जिनमतस्थितांश्च साध्वादीन्

---

१. °गुणोत्तरतरुण° इति प्रवचनसारोद्धारवृत्तौ २। पृ० १६९॥ २. सम्यक्त्वे सत्येवावश्यं° मु०॥

मुक्त्वा शेषमेकान्तग्रस्तं जगदपि संसारमध्ये [1]कत्तवारं, कचवरप्रायम्, असारमित्यर्थः । इतिचिन्तया सम्यक्त्वस्य विशोध्यमानत्वादेतास्तिस्रः शुद्धय इति ।

पञ्च दोषा अग्रे मूल एव वक्ष्यमाणाः ।

अष्टप्रभावनायां –[2]प्रभवति जैनेन्द्रं शासनम्, तस्य प्रभवतः प्रयोजकत्वं प्रभावना । सा चाष्टधा प्रभावकभेदेन तत्र प्रवचनं द्वादशाङ्गं गणिपिटकम्[3], तदस्यास्तीति प्रावचनी युगप्रधानागमः १। धर्मकथा प्रशस्ताऽस्यास्तीति धर्मकथी, "**शिखादित्वादिन्**" [**शिखादिभ्य इन् श्रीसि० ७।२।४**] आक्षेपणी १ विक्षेपणी २ संवेगजननी ३ निर्वेदनी ४ लक्षणां चतुर्विधां जनितजनमनःप्रमोदां धर्मकथां कथयति सः २। वादिप्रतिवादिसभ्य-सभापतिरूपायां चतुरङ्गायां परिषदि प्रतिपक्षक्षेपपूर्वकं स्वपक्षस्थापनार्थमवश्यं वदतीति वादी ३। निमित्तं त्रैकालिकलाभाऽलाभप्रतिपादकं शास्त्रम्, तद्वेत्त्यधीते वा नैमित्तिकः ४। तपो विकृष्टमष्टमाद्यस्यास्तीति तपस्वी ५। विद्याः प्रज्ञप्त्यादयस्तद्वान् विद्यावान् ६। सिद्धयोऽञ्जनपादलेपतिलकगुटिकाकर्षणवैक्रियत्वप्रभृतयस्ताभिः सिद्ध्यति स्म सिद्धः ७। कवते गद्य-पद्यादिभिः प्रबन्धैर्वर्णनामिति कविर्गद्यपद्यप्रबन्धरचकः ८। एते प्रवचन्यादयोऽष्टौ प्रभवतो भगवच्छासनस्य यथायथं देशकालाद्यौचित्येन साहाय्यकरणात् प्रभावकाः, प्रभवन्तं स्वतः प्रकाशकस्वभावमेव प्रेरयन्तीति व्युत्पत्तेः, तेषां कर्म प्रभावना । इत्थं च मूलद्वार-गाथायाम् अष्टौ प्रभावना यत्रेति समासः ।

भूषणपञ्चके–जिनशासनेऽर्हद्दर्शनविषये कुशलता नैपुण्यं १, प्रभावना [4]प्रभावन-मित्यर्थः । सा च प्रागष्टधाऽभिहिता, यत्पुनरिहोपादानं तदस्याः स्वपरोपकारित्वेन तीर्थकरनामकर्मनिबन्धनत्वेन च प्राधान्यख्यापनार्थम् २, तथा तीर्थं द्रव्यतो जिनदीक्षा-ज्ञाननिर्वाणस्थानं । यदाह –

"**जम्मं दिक्खा नाणं, तित्थयराणं महाणुभावाणं ।**
**जत्थ य किर निव्वाणं, आगाढं दंसणं होइ**" ॥१॥ [ ] त्ति ।

भावतस्तु ज्ञानदर्शनचारित्राधारः श्रमणसङ्घः, प्रथमगणधरो वा । यदाह –

"**तित्थं तित्थं ? तित्थयरे तित्थं ! गोयमा ! अरिहा ताव नियमा तित्थयरे, तित्थं पुण चाउव्वण्णे समणसंघं पढमगणहरे वा**" [**भगवतीसूत्रे उ. २०/सू. ६८२**] इति । तस्य सेवनम् ३।

---

१. कत्तवारं-मु० नास्ति ॥ २. तुला-योगशास्त्रवृत्तिः २।१६ प० १८४ ॥ ३. शिखादित्वादिन् क्षेपणी- L.P.C. ॥ ४. प्रभावनमित्यर्थः सा च-L नास्ति । सा च-P नास्ति ॥

स्थिरता जिनधर्मं प्रति परस्य स्थिरताऽऽपादनम्, स्वस्य वा परतीर्थिकसमृद्धिदर्शनेऽपि जिनप्रवचनं प्रति निष्प्रकम्पता[1] ४। भक्तिः प्रवचने विनयवैयावृत्त्यरूपा प्रतिपत्तिः। एते गुणाः सम्यक्त्वस्य दीपकाः प्रभासकाः, उत्तमाः प्रधानाः, भूषणानि एतैः सम्यक्त्व-मलङ्क्रियत इति भावः। लक्षणानि पञ्च व्याख्यातानि।

षड्विधयतनायाम् —अन्यतीर्थिकान् परदर्शनिनः परिव्राजकभिक्षुभौतिकादीन् अन्य-तीर्थिकदेवान् रुद्रविष्णुयक्षादीन् तथा स्वदेवान् अर्हत्प्रतिमालक्षणान् कुतीर्थिकै-र्दिगम्बरादिभिर्गृहीतान् भौतिकादिभिः[2] परिगृहीतान् महाकालादीन् नो नैव वन्दे वा १। न नमस्यामि २, तद्भक्तानां मिथ्यात्वस्थिरीकरणात्! तत्र वन्दनं शिरसाऽभिवादनम्, नमस्करणं प्रणामपूर्वं प्रशस्तध्वनिभिर्गुणोत्कीर्त्तनम्। तथाऽन्यतीर्थिकैः पूर्वमनालप्तः सन्नैवालपामि ३, नापि संलपामि। तत्रेषद्भाषणमालापः, मुहुर्भाषणं संलापः ४। तत्संभाषणे हि तैः स परिचयात् प्रतिक्रियाश्रवणदर्शनादिभिर्मिथ्यात्वप्रसक्तिरपि स्यादेव। तथा तेषामन्यतीर्थिकाणां न ददामि अशनादिकम् अनुकम्पां विहाय, अनुकम्पायाश्च कुत्राप्यनिषेधात्। यत उक्तम् —

**"सव्वेहिं पि जिणेहिं, दुज्जयजिअरागदोसमोहेहिं।**
**सत्ताणुकंपणट्ठा, दाणं न कहिं वि पडिसिद्धं ॥१॥ [ गा.स./१९० ]** ५।

तथा तेषां परतीर्थिकदेवानां तत्प्रतिगृहीतजिनप्रतिमानां च पुजानिमित्तं नैव पश्यामि[3] गन्धपुष्पादिकम्, आदिशब्दाद् विनय-वैयावृत्त्य-यात्रा-स्नानादिकम् ६। एताभिः षड्भिर्यतनाभिर्यतमानः सम्यक्त्वं नातिक्रामतीति।

आकारषट्के —अभियोजनमभियोगोऽनिच्छतोऽपि व्यापारणम्, तत्र राज्ञो नृपादेरभि-योगो राजाभियोगः १। गणः स्वजनादिसमुदायस्तस्याभियोगो गणाभियोगः २। बलं हठप्रयोगस्तेनाभियोगः ३। सुरस्य कुलदेवतादेरभियोगः ४। कान्तारमरण्यं तत्र वृत्तिर्वर्त्तनं निर्वाहः कान्तारवृत्तिर्यद्वा कान्तारमपि बाधाहेतुत्वादिह[4] बाधात्वेन विवक्षितं तेन कारणेन बाधया वृत्तिः प्राणवर्त्तनरूपा कान्तारवृत्तिः कष्टेन निर्वाह इति यावत् ५। गुरवो मातृपितृ-[5]प्रभृतयः। यदुक्तम् —

---

१. निष्कम्पता-मु०। निष्प्रकम्पता-LP। निष्पुकंपता-C ॥ योगशास्त्रप्रवचनसारोद्धार[भा० २ प० १७३]वृत्त्योरपि-निष्प्रकम्पता ॥ २. °भिः-मु० नास्ति ॥ ३. प्रेक्ष्यामि-मु०। प्रेषयामि-इति प्रवचनसारोद्धारवृत्तौ खण्ड २। प० १७५ ॥ ४. ०त्तिर्यद्वा कष्टेन-L.C. ॥ ५. मातृ(ता)पितृ० मु० ॥

**"माता पिता कलाचार्य, एतेषां ज्ञातयस्तथा ।**
**वृद्धा धर्मोपदेष्टारो, गुरुवर्गस्सतां मतः" ॥१॥ [ यो.बिं./११० ]**

तेषां निग्रहो निर्बन्धः ६। तदेताः षट् छिण्डिका अपवादरूपा जिनशासने भवन्ति । इदमत्र तात्पर्यम् –प्रतिपन्नसम्यक्त्वस्य परतीर्थिकवन्दनादिकं निषिद्धम् , तद्राजाभियोगादिभिरेभिः कारणैर्भक्तिवियुक्तो द्रव्यतः समाचरन्नपि सम्यक्त्वं नाभिचरतीति ।

षड्भावनायां–द्विषट्कस्यापि द्वादशभेदस्यापि पञ्चाणुव्रत-त्रिगुणव्रत-चतुःशिक्षाव्रतरूपधर्मस्य चारित्रविषयस्य इदं सम्यक्त्वं मूलमिव मूलं कारणमित्यर्थः, परिकीर्त्तितं जिनैरिति सर्वत्र सम्बन्धः । यथा मूलरहितः पादपः पवनकम्पितस्तत्क्षणादेव निपतति, एवं धर्मतरुरपि सम्यक्त्वहीनः कुतीर्थिकमतान्दोलितः १।

द्वारमिव द्वारं प्रवेशमुखमितिभावः । यथा ह्यकृतद्वारं नगरं सन्तत[1]प्राकारवलयवेष्टितमप्यनगरं भवति, जनप्रवेशनिर्गमाभावात् । एवं धर्मपुरमपि सम्यक्त्वद्वारशून्यमशक्यादिगमं स्यादिति २।

पइट्ठाणं –प्रतिष्ठते प्रासादोऽस्मिन्निति प्रतिष्ठानं पीठम् , ततः प्रतिष्ठानमिव प्रतिष्ठानम् , यथा पृथ्वीतलगतगर्त्तापूरकरहितः प्रासादः सुदृढो न भवति । तथा धर्महर्म्यमपि सम्यक्त्वरूपप्रतिष्ठानं विना निश्चलं न भवेदिति ३।

आहारो त्ति –आधारः यथा धरातलमन्तरा निरालम्बं जगदिदं न तिष्ठति । एवं धर्मजगदपि सम्यक्त्वलक्षणाधारव्यतिरेकेण न तिष्ठेदिति ४।

भायणं ति –भाजनं पात्रमित्यर्थः, यथा हि पात्रविशेषं विना क्षीरादि वस्तु विनश्यति, एवं धर्मवस्त्वपि सम्यक्त्वभाजनं विना ५।

निहि त्ति –निधिः यथा हि निधिव्यतिरेकेण महार्हमणि-मौक्तिक-कनकादि द्रव्यं न प्राप्यते । तथा सम्यक्त्वनिधानमन्तरा चारित्रधर्मरत्नमपि ६।

इत्येताभिः षड्भिर्भावनाभिर्भाव्यमानमिदं सम्यक्त्वमविलम्बेन मोक्षसुखसाधकं भवतीति ।

षट्स्थाने –अत्थि त्ति –अस्ति विद्यते, चशब्दस्याऽवधारणार्थत्वाज्जीव इति गम्यते, एतेन **नास्तिकमतं** निरस्तम् १।

---

१. सन्ततः-इति प्रवचनसारोद्धारवृत्तौ भा० २ । प० १७६ समन्ततः–इति तत्रैव दे०ला० संस्करणे पाठः ॥

'निच्चो'त्ति –स च जीवो नित्य उत्पत्तिविनाशरहितः, तदुत्पादककारणाभावादित्यादिना **शौद्धोदनि**मतमपध्वस्तम् २।

'कुणइ'त्ति[1] –स च जीवः करोति[2] मिथ्यात्वाऽविरति कषायादिबन्धहेतुयुक्ततया तत्तत्कर्माणि निर्वर्त्तयति । एतेन **कापिल**कल्पनाप्रतिक्षेपः ३।

'कयमिति' –कृतं कर्म च वेद्यते "**सव्वं पएसतया भज्जइ**" [ ] त्ति वचनादनेन **सर्वथाऽभोक्तृजीववादी** दुर्नयो निराकृतः ४।

'अत्थि निव्वाणं'ति –अस्य च जीवस्यास्ति विद्यते निर्वाणं मोक्षः, स च जीवस्य राग-द्वेष-मद-मोह-जन्म-जरा-रोगादिदुःखक्षयरूपोऽवस्थाविशेष इतियावद् । एतेन प्रदीपनिर्वाणकल्पमभावरूपं निर्वाणमित्यादि सङ्गिरमाणाः **सौगतविशेषाः** व्युदस्ताः । ते च प्रदीपस्येवास्य सर्वथा ध्वंस एव निर्वाणमाहुः । तथा च तद्वचः –

"**दीपो यथा निर्वृतिमभ्युपेतो, नैवावनिं गच्छति नान्तरिक्षम् ।**
**दिशं न काञ्चिद्विदिशं न काञ्चित्स्नेहक्षयात् केवलमेति शान्तिम् ॥१॥** इति
[3]**जीव[ स्तथा निर्वृतिमभ्युपेतो नैवावनिं गच्छति नान्तरिक्षम् ।**
**दिशं न काञ्चिद्विदिशं न काञ्चित् , क्लेशक्षयात् केवलमेति शान्तिम् ॥ ]**

**[ सौन्दरनन्दे १६।२८-२९ ]**

तच्चायुक्तम् , दीक्षादिप्रयासवैयर्थ्यात् । प्रदीपदृष्टान्तस्याप्यसिद्धत्वादियुक्ति[4]विस्तरस्तु ग्रन्थान्तरादवसेयः ५।

'अत्थि अ मोक्खोवाओ'त्ति –मोक्षस्य निर्वृतेरुपायः सम्यक् साधनं विद्यते सम्यग्ज्ञान-दर्शन-चारित्राणां मुक्तिसाधकतया घटमानत्वात् । अनेनापि मोक्षोपायाभावप्रतिपादकदुर्नयतिरस्कारः कृतः ६।

एतान्यात्मास्तित्वादीनि षट् सम्यक्त्वस्य स्थानानि, सम्यक्त्वमेषु[5] सत्स्वेव भवतीतिभावः । एषां च भेदानां यथासंभवं ज्ञान-श्रद्धा-चरणविधया सम्यक्त्व-उपयोगित्वमिति ध्येयम् । इत्थं च देवादितत्त्वश्रद्धानविकलत्वे तथाविधाजीविकादिहेतोः श्रावकाकारधरणे द्रव्यश्रावकत्वमेव च पर्यवसन्नम् , भावश्रावकत्वं तु यथोक्तविधिप्रतिपन्नसम्यक्त्वादिर्यतिभ्यः सकाशान्नित्यं धर्मश्रवणादेव । यदुक्तं **आवश्यकवृत्तौ** –

---

१. निवर्त्त० मु० P ॥ २. कपिल° मु० ॥ ३. इति जीवः (वाभावः) तच्चा°-मु० । तुला-प्रवचनसारोद्धारवृत्तिः भा० २. प १८० । एवं कृती निवृति° इति सौन्दरनन्दकाव्ये महाकवि-अश्वघोषकृते पाठः ॥ ४. °सिद्धत्वादि(त्यादि)युक्ति° मु० ॥ ५. सम्यक्त्वमु(उ)प° मु० ॥

D:\new/d-1.pm5\3rd proof

**"यो ह्यभ्युपेतसम्यक्त्वो, यतिभ्यः प्रत्यहं कथाम् ।**
**शृणोति धर्मसम्बद्धामसौ श्रावक उच्यते" ॥१॥** [ १५५६ गाथा टीका प. ८०५ ]

अभ्युपेतसम्यक्त्व इत्यत्राभ्युपेताणुव्रतोऽपीति व्याख्यालेश इति । तच्चेहाधिकृतम्, भावस्यैव मुख्यत्वात् । भावश्रावकोऽपि दर्शनव्रतोत्तरगुणश्रावकभेदात् त्रिविधः[1] । तद्विस्तरस्तु व्रतभङ्गाधिकारे दर्शयिष्यते, आगमे चान्यथाऽपि श्रावकभेदाः श्रूयन्ते ।

तथा च **स्थानाङ्गसूत्रम् –**

**"चउव्विहा समणोवासगा पण्णत्ता, तंजहा –अम्मापिइसमाणे भाइसमाणे, मित्तसमाणे, सवत्तिसमाणे, अहवा चउव्विहा समणोवासगा पण्णत्ता, तंजहा– आयंससमाणे, पडागसमाणे, खाणुसमाणे, खरंटसमाणे[2]"** [ स्था.४/३/३२१ ] इति ।

परमेते साधूनाश्रित्य द्रष्टव्या इति न पार्थक्यशङ्कालेशः । एषामपि नामश्रावकादिष्ववतारणविचारे व्यवहारनयमते भावश्रावका एवैते । श्रावकपदव्युत्पत्तिनिमित्तमात्रयोगेन तथाव्यवह्रियमाणत्वात् । निश्चयनयमते पुनः सपत्नीखरण्टसमानौ मिथ्यादृष्टिप्रायौ द्रव्यश्रावकौ, शेषास्तु भावश्रावकाः । यतस्तेषां स्वरूपमेवमागमे व्याख्यायते –

**"चिंतिज्जइ कज्जाइं, न दिट्ठखलिओ वि होइ निन्नेहो ।**
**एगंतवच्छलो जइजणस्स जणणीसमो सड्ढो[3] ॥१॥** [ ]
**हिअए ससिणेहो च्चिअ, मुणीण मंदायरो विणयकम्मे ।**
**भाइसमो साहूणं, पराभवे होइ सुसहाओ ॥२॥** [ ]
**मित्तसमाणो माणा, ईसिं रूसइ अपुच्छिओ कज्जे ।**
**मन्नंतो अप्पाणं, मुणीण सयणाउ अब्भहिअं ॥३॥** [ ]
**थद्धो छिद्दप्पेही, पमायखलिआणि निच्चमुच्चरइ ।**
**सद्धो सवत्तिकप्पो, साहुजणं तणसमं गणइ ॥४॥** [ ]

तथा[4] द्वितीयचतुष्के –

**"गुरुभणिओ सुत्तत्थो, बिंबिज्जइ अवितहो[5] मणे जस्स ।**
**सो आयंससमाणो, सुसावओ वन्निओ समए ॥५॥** [ ]
**पवणेण पडागा इव, भामिज्जइ जो जणेण मूढेणं ।**
**अविणिच्छिअगुरुवयणो, सो होइ पडाइआतुल्लो ॥६॥** [ ]

---

१. °धाः–L.P.C. ॥ २. खरंटमाणे–मु० ॥ ३. सद्धो–मु० ॥ ४. तुला–धर्मरत्नप्रकरणस्वोपज्ञवृत्तिः प० २८ तः ॥ ५. °हा–L.P. ॥

**पडिवन्नमसग्गाहो न मुणइ[१] गीअत्थसमणुसट्ठो वि ।**
**खाणुसमाणो[२] एसो, अप्पउसो मुणिजणे नवरं ॥७॥** [ ]
**उम्मग्गदेसओ णिण्हवोऽसि मूढोऽसि मंदधम्मोऽसि ।**
**इअ सम्मं पि कहंतं, खरंटए सो खरंटसमो ॥८॥** [ ]
**जह सिढिलमसुइदव्वं, लुप्पंतं[३] पि हु नरं खरंटेइ ।**
**एवमणुसासगं[४] पि हु , दूसंतो भन्नइ खरंटो ॥९॥** [ ]
**निच्छयओ मिच्छत्ती, खरंटतुल्लो सवत्तितुल्लो वि ।**
**ववहारओ उ सड्ढा, जयंति जं जिणगिहाईसुं ॥१०॥** [ ] इत्यलं प्रसङ्गेन ।

अत्रोपयोगित्वात् पूर्वसूरिप्रणीतानि भावश्रावकस्य लिङ्गानि **धर्मरत्नप्रकरणे** यथोपदिष्टानि तथोपदर्श्यन्ते । तथाहि –

''**कयवयकम्मो १ तह सीलवं च २ गुणवं च ३ उज्जुववहारी ४ ।**
**गुरुसुस्सूसो ५ पवयणकुसलो ६ खलु सावगो भावे**'' ॥१॥ [ ध.र./गा. ३३ ]

कृतमनुष्ठितं व्रतविषयं कर्म कृत्यं येन स कृतव्रतकर्मा १। अथैनमेव सप्रभेदमाह –

''**तत्थायण्णण १ जाणण २ गिण्हण ३ पडिसेवणेसु ४ उज्जुत्तो[५] ।**
**कयवयकम्मो चउहा, भावत्थो तस्सिमो होइ**'' ॥२॥ [ ध.र./गा. ३४ ]

तत्राकर्णनं विनयबहुमानाभ्यां व्रतस्य श्रवणम् १। ज्ञानं व्रतभङ्गभेदातिचाराणां सम्यगवबोधः २। ग्रहणं गुरुसमीपे इत्वरं यावत्कालं वा व्रतप्रतिपत्तिः ३। आसेवनं सम्यक् पालनम् ४।

अथ शीलवत्स्वरूपं द्वितीयलक्षणं यथा –

''**आययणं खु निसेवइ १, वज्जइ परगेहपविसणमकज्जे २ ।**
**निच्चमणुब्भडवेसो ३, न भणइ सविआरवयणाइं ४ ॥३॥** [ ध.र./गा.३७ ]
**परिहरइ बालकीलं ५, साहइ कज्जाइँ महुरनीईए ६ ।**
**इअ छव्विहसीलजुओ, विन्नेओ सीलवंतोऽत्थ ४**'' ॥४॥ [ ध.र./गा.३८ ]

आयतनं धर्मिजनमीलनस्थानम् । उक्तं च –

''**जत्थ साहम्मिआ बहवे, सीलवंता बहुस्सुआ ।**
**चरित्तायारसंपन्ना, आययणं तं विआणाहि**'' ॥१॥ [ सु.सि./गा.६० ]

---

१. मुयइ–धर्मरत्नप्र० वृत्तौ ॥ २. थाणु–धर्मरत्नप्र० वृत्तौ ॥ ३. छुप्पं° धर्मरत्नप्र० वृत्तौ ॥ ४. एवमणुसासणं पि हु० ॥ ५. °त्ता–L.P.C. । °त्तो–धर्मरत्नप्रकरणे ॥

तत् सेवते भावश्रावको न त्वनायतनमितिभावः १।

शेषपदानि सुगमानि, बालक्रीडां द्यूतादिकम् ५। मधुरनीत्या सामवचनेन स्वकार्यं साधयति, न तु परुषवचनेनेति षट् शीलानि ६।

अधुना तृतीयं भावश्रावकलक्षणं गुणवत्स्वरूपं यथा –

**''जइ वि गुणा बहुरूवा, तहावि पंचहिं गुणेहिं गुणवंता ।**
**इअ मुणिवरेहिं भणिओ, सरूवमेसिं निसामेहि ॥५॥** [ ध.र./गा.४२ ]
**सज्झाए १ करणंमि अ २, विणयंमि अ ३ निच्चमेव उज्जुत्तो ।**
**सव्वत्थऽणभिनिवेसो ४, वहइ रुइं सुट्ठु जिणवयणे ५''** ॥६॥ [ ध.र./गा.४३ ]

स्वाध्याये पञ्चविधे १, करणे तपोनियमवन्दनाद्यनुष्ठाने २, विनये गुर्वाद्यभ्युत्थानादिरूपे, नित्यमुद्यक्तः प्रयत्नवान् भवति ३। सर्वत्र प्रयोजनेषु अनभिनिवेशः प्रज्ञापनीयो भवति ४, तथा वहति धारयति, रुचिमिच्छां श्रद्धानमित्यर्थः । सुष्ठु बाढं जिनवचने ५, इति पञ्च गुणाः ।

अधुना ऋजुव्यवहारीति चतुर्थं भावश्रावकलक्षणं यथा –

**''उजुववहारो चउहा, जहत्थभणणं १ अवंचिगा[1] किरिआ २ ।**
**हुंतावायपगासण ३, मित्तीभावो अ सब्भावा ४''** ॥१॥ [ ध.र./गा.४७ ]

ऋजु प्रगुणं व्यवहरणं ऋजुव्यवहारः । स चतुर्द्धा–यथार्थभणनमविसंवादिवचनम् १। [2]अवञ्चिका [3]पराव्यसनहेतुक्रिया मनोवाक्कायव्यापाररूपा २। 'हुंतावायपगासण'त्ति 'हुंत'त्ति प्राकृतशैल्या भाविनोऽशुद्धव्यवहारकृतो येऽपायास्तेषां प्रकाशनं प्रकटनं करोति। 'भद्र मा कृथाः पापानि चौर्यादीनि, इह परत्र चानर्थकारीणि' इत्याश्रितं शिक्षयति ३। मैत्रीभावः सद्भावान्निष्कपटतया ४।

साम्प्रतं गुरुशुश्रूषक इति पञ्चमं लक्षणं यथा –

**''सेवाइ १ कारणेण य २, संपायण ३ भावओ गुरुजणस्स ४ ।**
**सुस्सूसणं कुणंतो, गुरुसुस्सूसो हवइ चउहा''** ॥८॥ [ ध.र./गा.४९ ]

सेवया पर्युपासनेन १, कारणेन गुरुजनवर्णवादकरणादन्यजनप्रवर्त्तनेन २, सम्पादनं [4]गुरोरौषधादीनां प्रदानम् ३, भावो गुरुजनचेतोऽनुवर्त्तनम् ४, एतैश्चतुर्भिः प्रकारैः गुरुजन–

---

१. अवंचगा–C संशो० P. संशो० ॥ २. अवञ्चका–C संशो० P संशो० ॥ ३. परावञ्चन° मु० । पराव्यसन° इति धर्मरत्नप्र० वृत्तौ । पराव्यंसन° C.P. ॥ ४. गुरोरौषधीनां–मु० गुरोरौषधीनां C ॥

स्याराध्यवर्गस्य शुश्रूषां, कुर्वन् गुरुशुश्रूषको भवतीति । यद्यपि गुरवो मातृपित्रादयोऽपि भण्यन्ते तथाऽप्यन्त्र धर्माधिकाराद्धर्माचार्यादय एव प्रस्तुता इति हार्दम् ।

अथ प्रवचनकुशल इति षष्ठं भावश्रावकलक्षणं चेत्थम्—

**सुत्ते १ अत्थे अ २ तहा, उस्सग्ग ३ ववाय ४ भाव ५ ववहारे ६ ।**
**जो कुसलत्तं पत्तो, पवयणकुसलो तओ छद्धा'' ॥९॥** [ ध.र./गा.५२ ]

सूत्रे सूत्रविषये यः कुशलत्वम्, प्राप्त इति प्रत्येकं योजनीयम्, श्रावकपर्यायोचितसूत्राध्येतेत्यर्थः १। तथाऽर्थे सूत्राभिधेये संविग्नगीतार्थसमीपे सूत्रार्थश्रवणेन कुशलत्वं प्राप्त इत्यर्थः २। उत्सर्गे सामान्योक्तौ ३ अपवादे विशेषभणिते कुशलः । अयं भावः — केवलं नोत्सर्गमेवावलम्बते, नापि केवलमपवादम्, किन्तूभयमपि यथायोगमालम्बत इत्यर्थः ४। भावे विधिसारे धर्मानुष्ठाने करणस्वरूपे कुशलः ।

इदमुक्तं भवति —विधिकारिणमन्यं बहु मन्यते । स्वयमपि सामग्रीसद्भावे यथाशक्ति विधिपूर्वकं धर्मानुष्ठाने प्रवर्त्तते । सामग्र्या अभावे पुनर्विध्याराधनमनोरथान्न मुञ्चत्येवेति ५। व्यवहारे गीतार्थाचरितरूपे कुशलः देशकालाद्यपेक्षयोत्सर्गापवादवे[1]दिगुरुलाघवपरिज्ञाननिपुणगीतार्थाचरितं व्यवहारं न दूषयतीतिभावः ६।

**''एसो पवयणकुसलो, छब्भेओ मुणिवरेहिं निद्दिट्ठो ।**
**किरियागयाइं [2]छव्विह-लिंगाइं भावसड्ढस्स'' ॥१०॥** [ ध.र./गा.५५ ]

एतानि भावश्रावकस्य क्रियोपलक्षणानि षडेव लिङ्गानि । अथ भावगतानि तान्याह —

**''भावगयाइं सत्तरस, मुणिणो एअस्स बिंति लिंगाइं ।**
**[3]जाणिअजिणमयसारा, पुव्वायरिआ जओ [4]आहु ॥११॥** [ ध.र./गा.५६ ]
**इत्थि १, दिअत्थसंसार ४, विसय ५ आरंभ ६ गेहे ७ दंसणओ ८ ।**
**गड्डुरिगाइपवाहे ९, पुरस्सरं आगमपवित्ती १० ॥१२॥** [ ध.र./गा.५७ ]
**दाणाइ जहासत्ती, पवत्तणं ११ विहि १२ अरत्तदुट्ठे अ १३ ।**
**मज्झत्थ १४ मसंबद्धो १५, परत्थकामोवभागी अ १६ ॥१३॥** [ ध.र./गा.५८ ]
**वेसा इव गिहवासं, पालइ १७ सत्तरसपयनिबद्धं तु ।**
**भावगयभावसावगलक्खणमेअं समासेणं'' ॥१४॥** [ ध.र./गा.५९ ]

---

१. °वादविदितिगुरु° L ॥ २. छच्चिय-इति धर्मरत्नप्रकरणे ॥ ३. भणिअ° इति धर्मरत्नप्रकरणे । ४. °आहू-मु० ॥

आसां काचिद् व्याख्या –स्त्रियादिदर्शनान्तपदाष्टकानां द्वन्द्वे सप्तम्यर्थे तसिल् । अयं भावः –स्त्रीवशवर्त्ती न भवेत् १। इन्द्रियाणि विषयेभ्यो निरुणद्धि २। नानर्थमूलेऽर्थे लुभ्यति ३। संसारे रतिं न करोति ४। विषयेषु न गृद्धिं कुर्यात् ५। तीव्रारम्भं न करोति, करोति चेदनिच्छन्नेव ६। गृहवासे पाशमिव मन्यमानो वसेत् ७। सम्यक्त्वान्न चलति ८। गड्डुरिकप्रवाहं त्यजति ९। आगमपुरस्सरं सर्वाः क्रियाः करोति १०। यथाशक्ति दानादौ प्रवर्त्तते ११। विह्रीको निरवद्यक्रियां कुर्वाणो न लज्जते १२। संसारगतपदार्थेषु अरक्तद्विष्टो निवसति १३। धर्मादिस्वरूपविचारे मध्यस्थः स्यात्, न तु मया अयं पक्षोऽङ्गीकृत इत्यभिनिवेशी १४। धनस्वजनादिषु सम्बद्धोऽपि क्षणभङ्गुरतां भावयन्न-सम्बद्ध इवास्ते १५। परार्थम् अन्यजनदाक्षिण्यादिना भोगोपभोगेषु प्रवर्त्तते, न तु स्वतीव्ररसेन १६। वेश्येव निराशंसो गृहवासं पालयतीति १७। कृतं प्रासङ्गिकलक्षण-प्ररूपणया ।

अत्र च प्रतिपन्नसम्यक्त्वेनादित एव नियमपूर्वं तथाऽभ्यासः कार्यः, यथोक्तं **श्राद्धविधिवृत्तौ – "तथाहि –पूर्वं तावन्मिथ्यात्वं त्याज्यम्, ततो नित्यं यथाशक्ति त्रिर्द्विः सकृद्वा जिनपूजा जिनदर्शनं संपूर्णदेववन्दनं चैत्यवन्दना च कार्येति । एवं सामग्र्यां गुरौ बृहल्लघु वा वन्दनम्, सामग्र्यभावे नामग्रहणेन वन्दनं नित्यम्, वर्षाचतुर्मास्यां पञ्चपर्व्यादौ वाऽष्टप्रकारीपूजा, यावज्जीवं [1]नव्यान्नपक्वान्नफलादेर्देवस्य ढौकनं विनाऽग्रहणम्, नित्यं नैवेद्यपूगादेर्ढौकनम्, नित्यं चतुर्मासीत्रयवार्षिक[2]दीपोत्सवादौ वाऽष्टमङ्गलढौकनम्, नित्यं पर्वसु वा वर्षमध्ये कियद्वारं वा खाद्यस्वाद्यादिसर्ववस्तूनां देवस्य गुरोश्च प्रदानपूर्वं भोजनम्, प्रतिमासं प्रतिवर्षं वा महाध्वजप्रदानादिविस्तरेण स्नात्रमहापूजारात्रिजागरणादि, नित्यं वर्षादौ कियद्वारं वा चैत्यशालाप्रमार्जनसमारचनादि, प्रतिवर्षं प्रतिमासं वा चैत्ये[3]ऽगरूत्क्षेपणदीपार्थपुम्भिकाकियद्दीपघृतचन्दनखण्डादेः शालायां मुखवस्त्रजपमालाप्रोञ्छनकचरवलकाद्यर्थं [4]कियद्वस्त्रसूत्रकम्बलोर्णादेश्च मोचनम्, वर्षासु श्राद्धादीनामुपवेशनार्थं कियत्पट्टिकादेः कारणम्, प्रतिवर्षं सूत्रादिनापि सङ्घपूजा कियत्साधर्मिकवात्सल्यादि च, प्रत्यहं कियान् कायोत्सर्गः स्वाध्यायः त्रिशत्यादिगुणनं च, नित्यं दिवा नमस्कारसहितादेः रात्रौ दिवसचरमस्य च प्रत्याख्यानस्य करणम्, द्विः सकृद्वा प्रतिक्रमणादि चादौ नियमनीयानि" ॥ [ प० ८४-८५ ]**

---

१. PCJ श्राद्धविधिवृत्तिः । नव्याम्रपक्वाम्र° मु० । नव्यान्नपक्वान्न० L ॥ २. °दिनोत्सवादौ-इति श्राद्धविधिवृत्तौ ॥ ३. अङ्गरूक्षणदीपार्थपूणीकियद्दीपतैलचन्दन° इति श्राद्धविधिवृत्तौ ॥ ४. L.P.C. श्राद्धविधिवृत्तिः । कियद्वस्त्रक० मु० ॥

नन्वेवमविरतावस्थायां विरतिपरिणामाभावे प्रत्याख्यानप्रतिक्र[१]मणादिविरतिधर्मस्य कर्त्तव्यत्वाङ्गीकारे तात्त्विकगुणस्थानावस्था लुप्येत । न हि तुर्यगुणस्थाने पञ्चमगुणस्थानादिक्रियाकरणं युक्तियुक्तम्, अविरतसम्यग्दृष्टिगुणस्थानहानिप्रसक्तेः, नापि च क्षयोपशमादिभावभाव्यानि गुणस्थानानि अस्मदादिबाह्यौदयिक[२]भावोद्भूतक्रियाकृष्टान्यायान्ति इति चेत्? मैवम्, शास्त्रार्थापरिज्ञानात्, न हि तुर्यगुणस्थाने विरतिक्रियाकरणं शास्त्रे निषिद्धम्, किन्तु [३]पारमार्थिकाध्यवसायरूपो विरतिपरिणामः । स हि असन्नपि विशुद्धव्रतग्रहणादिक्रियाकारिणां तन्माहात्म्यादेव तद्ग्रहणानन्तरं जायते, सँश्च परिवर्द्धते, न तु प्रतिपातशीलो भवति ।

अत एव क्षायोपशमिकानि गुणस्थानानि नास्मदादिबाह्यौदयिकक्रियाकृष्टान्यायान्तीतिबुद्ध्या सम्यग् क्रियायां नोदासितव्यम्, प्रयत्नेन तेषामपि सुलभत्वाद्, उपायाधीनत्वादुपेयस्य च । न चैतत् स्वमनीषिकाविजृम्भितम्, यदाहुः **श्रीहरिभद्रसूरिवराः पञ्चाशकप्रकरणे** सम्यक्त्वव्रतपरिणामस्थैर्यार्थं विधेयगतोपदेशप्रस्तावे –

> **''गहणादुवरि पयत्ता, होइ असन्तोऽवि विरइपरिणामो ।**
> **अकुसलकम्मोदयओ, पडइ अवण्णाइं लिंगमिह ॥१॥** [ पञ्चा.१/३५ ]
> **तम्हा णिच्चसईए, बहुमाणेणं च अहिगयगुणम्मी ।**
> **पडिवक्ख[४]दुगंछाए, परिणइआलोअणेणं च ॥२॥** [ पञ्चा.१/३६ ]
> **तित्थंकरभत्तीए, सुसाहुजणपज्जुवासणाए अ ।**
> **उत्तरगुणसद्धाए, एत्थ सया होइ जइअव्वं ॥३॥** [ पञ्चा.१/३७ ]
> **''एवमसंतो वि इमो, जायइ जाओ वि पडइ न कया वि ।**
> **ता इत्थं बुद्धिमया, अपमाओ होइ कायव्वो''** ॥४॥ [ पञ्चा.१/३८ ]

आसां व्याख्या –[५]ग्रहणाद् 'गुरुमूले श्रुतधर्म'इत्यादिविधिना सम्यक्त्वव्रतोपादानादुपरि उत्तरकाले, प्रयत्नादुद्यमविशेषाद्धेतोर्भवति जायते । असन्नपि कर्मदोषादविद्यमानोऽपि[६], संस्तु भूत एवेत्यपिशब्दार्थः । कोऽसौ? इत्याह –'विरतिपरिणामः' प्राणातिपातादिनिवर्त्तने पारमार्थिकाध्यवसायः, उपलक्षणत्वात् सम्यक्त्वपरिग्रहणम्, सोपक्रमत्वाद् विरत्याद्यावारककर्मणाम्, तथाविधप्रयत्नस्य च तदुपक्रमणस्वभावत्वादिति । अथोक्तविपर्ययमाह –अकुशलकर्मोदयतोऽशुभ[७]कर्मोपायादिकर्मानुभावात् पतति सन्नपि व्रतग्रहणस्योपरि प्रयत्नं विना अपयाति विरतिपरिणाम इति प्रकृतम् ।

---

१. °क्रमणादि(देः) वि° मु० ॥ २. °भावोद्धुत° L । ३. पर° मु० ॥ ४. LPCJI °दुगुंछाए-मु० ॥ ५. तुला-पञ्चाशकटीका ॥ ६. LPCJ । °न-मु० ॥ ७. °कषाया° इति पञ्चाशकवृत्तौ ॥

तत्प्रतिपातश्च लिङ्गेनावसीयते तदेवाह—अवर्णो व्रतानां व्रतदेशकानां व्रतवतां वा अश्लाघा अवज्ञा वा अनादर आदिर्यस्य [1] तदवर्णादि (तेन) अवज्ञा(णा)दिना, आदि-शब्दात्तद्रक्ष्णोपायाऽप्रवृत्त्यादि च । लिङ्गं लक्षणमिह व्रतपरिणामपरिपात इति । न च वाच्यं —'विनिर्गत(विरति)परिणामाभावे कथं व्रतग्रहणम् ? इति, उपरोधादिना तस्य सम्भवात् । श्रूयन्ते ह्यनन्तानि द्रव्यतः श्रमणत्व-श्रावकत्वोपादानानीति प्रथमगाथार्थः ।

प्रस्तावितोपदेशमेवाह—'तम्हा'गाहा 'तित्थंकर' गाहा। यस्मादसन्नपि विरतिपरिणामः प्रयत्नाज्जायते, प्रयत्नं विना [3] चाऽकुशलकर्मोदयात् सन्नपि प्रतिपतति, तस्मात् कारणान्नित्यस्मृत्या सार्वदिकस्मरणेन [4] भगवति यतितव्यमिति । तथा बहुमानेन भावप्रतिबन्धेन, चशद्धः समुच्चये, अधिकृतगुणेऽङ्गीकृतगुणे सम्यक्त्वाणुव्रतादौ, इदं पूर्वपदाभ्यामुत्तरपदेन च सह प्रत्येकं योज्यते । तथा 'प्रतिपक्षजुगुप्सया' मिथ्यात्वप्राणिवधाद्युद्वेगेन तथा 'परिणत्यालोचनेन' अधिकृतगुणविपक्षभूता मिथ्यात्वप्राणातिपातादयो दारुणफलाः, अधिकृतगुणा वा सम्यक्त्वाऽणुव्रतादयः परमार्थहेतव एव इत्येवं विपाकपर्यालोचनेन, चशद्धः समुच्चय एव ।

तथा 'तीर्थकरभक्त्या' परमगुरुविनयेन तथा 'सुसाधुजनपर्युपासनया' भावयतिलोकसेवया, चशद्धः समुच्चय एव । तथा 'उत्तरगुणश्रद्धया' प्रधानतरगुणाभिलाषेण, सम्यक्त्वे सति अणुव्रताभिलाषेण । अणुव्रतेषु सत्सु महाव्रताभिलाषेणेतिभावः, चशद्धः समुच्चय एव । 'अत्र' सम्यक्त्वाऽणुव्रतादिव्यतिकरे तत्प्रतिपत्त्युतरकालं 'सदा' सर्वकालं 'भवति' युज्यते, यतितव्यमुद्यमः कर्त्तव्यः । इति गाथात्रयार्थः ।

'एवमसन्तो' गाहा, एवमसन्नपि व्रतग्रहणकाले 'इमो'त्ति अयं व्रतपरिणामो जायते । जातोऽपि व्रतग्रहणकाले न पतति कदापि । तस्मादत्र व्रतग्रहणादिविधावप्रमादः कर्त्तव्यो भवतीति चतुर्थगाथार्थः । एवं च विरतेरभ्यासेनाविरतिर्जीयते । अभ्यासादेव हि सर्वक्रियासु कौशलमुन्मीलति । अनुभवसिद्धं चेदं लिखन-पठन-सङ्ख्यान-गान-नृत्यादिसर्व-कलाविज्ञानेषु सर्वेषाम् । उक्तमपि —

**"अभ्यासेन क्रियाः सर्वा, अभ्यासात् सकलाः कलाः ।**
**अभ्यासाद्ध्यान-मौनादि, किमभ्यासस्य दुष्करम् ?"** ॥१॥ [ ]

निरन्तरं विरतिपरिणामाभ्यासे च प्रेत्यापि तदनुवृत्तिः स्यात् । यत उक्तम् —

---

१. तदवर्णादि अवज्ञादिना–LPCJ ॥ २. विनिर्गतपरि॰ LPCJ । विरतिपरि॰ इति पञ्चाशकवृत्तौ ॥ ३. L.P. पञ्चाशकटीका वा॰ मु॰ C ॥ ४ भवति–इति पञ्चाशकवृत्तौ ॥

D:\new/d-1.pm5\3rd proof

**"जं अब्भसेइ जीवो, गुणं च दोसं च एत्थ जम्मंमी ।
तं पावइ परलोए, तेण य अब्भासजोएणं" ॥१॥ [ ]**

तस्मादभ्यासेन तत्परिणामदार्ढ्ये यथाशक्ति द्वादशव्रतस्वीकारः । तथा सति सर्वाङ्गीण-विरतेः संभवाद्, विरतेश्च महाफलत्वात् । अन्येऽपि च नियमाः सम्यक्त्वयुक्त-द्वादशान्यतरव्रतसंबद्धा एव देशविरतित्वाभिव्यञ्जकाः । अन्यथा तु प्रत्युत पार्श्वस्थ-त्वादिभावाविर्भावकाः । यत **उपदेशरत्नाकरे –**

**"सम्यक्त्वाणुव्रतादिश्राद्धधर्मरहिता नमस्कारगुणनजिनार्चनवन्दनाद्यभिग्रहभृतः श्रावकाभासाः श्राद्धधर्मस्य पार्श्वस्थाः"** [ उप.र. ] इति ॥२१॥

इत्थं च विधिग्रहणस्यैव कर्त्तव्यत्वात्, 'संग्रहेऽस्य प्रवर्त्तते' इत्यत्र धर्मस्य सम्यग् विधिना प्रतिपत्तौ प्रवर्त्तत इत्येव पूर्वं प्रतिज्ञातत्वाच्च तद्ग्रहणविधिमेव दर्शयति –

**योगवन्दननिमित्तदिगाकारविशुद्धयः ।
योग्योपचर्येति विधिरणुव्रतमुखग्रहे ॥२३॥**[१]

इह विशुद्धिशब्दः प्रत्येकमभिसम्बध्यते, द्वन्द्वान्ते श्रूयमाणत्वात् । ततो **योगशुद्धि-र्वन्दनशुद्धिर्निमित्तशुद्धिर्दिक्शुद्धिराकारशुद्धिश्**चेत्यर्थः । तत्र योगाः कायवाङ्मनो-व्यापारलक्षणास्तेषां शुद्धिः सोपयोगान्तरगमननिरवद्यभाषणशुभचिन्तनादिरूपा । वन्दन-शुद्धिरस्खलितप्रणिपातादिदण्डकसमुच्चारणाऽसम्भ्रान्तकायोत्सर्गादिकरणलक्षणा । निमित्तशुद्धिस्तत्कालोच्छलितशङ्खपणवादिनिनादश्रवणपूर्ण[२]कुम्भभृङ्गारच्छत्रध्वज-चामराद्यवलोकनशुभगन्धाघ्राणादिस्वभावा । दिक्शुद्धिः प्राच्युदीचीजिनजिनचैत्या-द्यधिष्ठिताशासमाश्रयणस्वरूपा । आकारशुद्धिस्तु राजाभियोगादिप्रत्याख्यानापवाद-मुत्कलीकरणात्मिकेति ।

तथा **योग्यानां** देव-गुरु-साधर्मिक-[३]स्वजन-दीनाऽनाथादीनामुचिता **उपचर्या** धूप-पुष्प-वस्त्र-विलेपनासनदानादि गौरवात्मिका चेति विधिः । स च कुत्र भवति ? इत्याह –**'अणुव्रत'** इति अणुव्रतानि मुखे आदौ येषां तानि **अणुव्रतमुखानि** साधुश्रावकविशेषधर्माचरणानि तेषां **ग्रहे** प्रतिपत्तौ भवतीति सद्धर्मग्रहणविधिः । विशेषविधिस्तु **सामाचारी**तोऽवसेयः । तत्पाठश्चायम् –

---

१. मु० मध्ये–२२–इति, एवमग्रेऽपि अङ्क भेदः वर्तते ॥ २. °पूर्णजम्भ° L.P.C.J. ॥ ३. °स्व° मु० नास्ति ॥

×"चिइ[1] १ संति सत्तवीसा २ बारस ३ सुअ ४ सासणा ५ ऽखिलसुराणं ६ ।
नवकारो ७ सक्कथओ ८ परमिट्ठिथओ अ ९ वंदणयं १० ॥१॥
सामन्नमिणं तत्तो, आरोवणुस्सग्गु ११ दंडउच्चारो १२ ।
सत्तखमासमणं १३ × पुण, वयाइगहणे विही होइ" ॥२॥

पसत्थे खित्ते जिणभवणाइए पसत्थेसु तिहि-करण-नक्खत्त-मुहुत्त-चंदबलेसु [2]परिक्खिअगुणं सीसं सूरी अग्गओ काउं खमासमणदाणपुव्वं भणावेइ "इच्छकारि भगवन् ! तुम्हे अम्हं सम्यक्त्वसामयिक-श्रुतसामायिक-देशविरतिसामायिक [3]आरोवावणिअं नंदिकरावणिअं देवे वंदावेह" तओ सूरी सेहं वामपासे ठवित्ता [4]वद्धंतिआहि थुईहिं संघेण समं देवे वंदेइ, जाव मम दिसंतु ।

ततः 'श्रीशान्तिनाथआराधनार्थं करेमि काउस्सगग्गं वंदणवत्तिआए'० इत्यादि । सत्तावीसुस्सासं काउस्सग्गं करेइ, [5]श्रीशान्ति इत्यादिस्तुतिं च भणति । ततो 'द्वादशाङ्गीआराधनार्थं करेमि काउस्सग्गं वंदणवत्तिआए'० इत्यादि, कायोत्सर्गे नमस्कारचिन्तनम् । ततः स्तुतिः, तओ 'सुअदेवयाए करेमि काउस्सग्गं अन्नत्थ ऊससिएणं'० [6]इत्यादि, ततः स्तुतिः, [7]एवं शासनदेवयाए करेमि काउस्सग्गं अन्न० ।

"या पाति शासनं जैनं, सद्यः प्रत्यूहनाशिनी ।
साऽभिप्रेतसमृद्ध्यर्थं, भूयाच्छासनदेवता" ॥१॥ इति स्तुतिः ।

समस्तवैयावृत्त्यकराणां कायोत्सर्गः, ततः स्तुतिः, नमस्कारं पठित्वोपविश्य च शक्रस्तवपाठः, परमेष्ठिस्तवः, 'जयवीयराय' इत्यादि । इयं प्रक्रिया सर्वविधिषु तुल्या, तत्तन्नामोच्चारकृतो विशेषः ।

तओ वंदणयपुव्वं सीसो भणइ "इच्छकारि भगवन् तुम्हे अम्हं सम्यक्त्वसामायिक ३ [8]आरोवावणिअं नंदिकरावणिअं काउस्सग्गं कारेह' तओ सीससहिओ गुरू सम्यक्त्व-सामायिक ३ [9]आरोवावणिअं करेमि काउस्सग्गं" इच्चाइ भणइ । सत्तावीसुस्सासचिंतणं चउवीसत्थयभणनं क्षमा०नमस्कारत्रयरूपनन्दिश्रावणम् ।

ततः पृथग् २ नमस्कारपूर्वं वारत्रयं सम्यक्त्वदण्डकपाठः । स चायम् –

"अहन्नं भंते तुम्हाणं समीवे मिच्छत्ताओ पडिक्कमामि संमत्तं उवसंपज्जामि,

---

१. ×× चिह्नद्वयमध्यवर्ती पाठः L.P. नास्ति ॥ २. सुपरि° L.P. ॥ ३. आरोपाव° मु० C. ॥ ४. वट्टंति° L.P. ॥ ५. शान्तिः–मु० ॥ श्रीशान्तिः श्रुतशान्तिः प्रशान्तिकोऽसावशान्तिमुपशान्तिम् । नयतु सदा यस्य पदाः सुशान्तिदाः सन्तु सन्ति जिने ॥ इति पूर्णः श्लोकः ॥ ६. इच्चाइ–L.P. ॥ ७. एवं शासनदेवताकायोत्सर्गः या पाति–मु० C. ॥ ८. आरोपा° मु० C. ॥ ९. आरोपा° मु० C. ॥

तंजहा—दव्वओ खित्तओ कालओ भावओ, दव्वओ णं मिच्छत्तकारणाइं पच्चक्खामि, संमत्तकारणाइं उवसंपज्जामि, [१]नो मे कप्पइ अज्जप्पभिइ अन्नउत्थिए वा अन्नउत्थिअदेवयाणि वा, अन्नउत्थिअपरिग्गहिआणि [२]वा अरिहंतचेइआणि वंदित्तए वा नमंसित्तए वा पुव्विं [३]अणालत्तेणं आलवित्तए वा संलवित्तए वा, तेसिं असणं वा पाणं वा खाइमं वा साइमं वा दाउं वा अणुप्पयाउं वा, खित्तओ णं इत्थ वा अन्नत्थ वा, कालओ णं जावज्जीवाए, भावओ णं जाव गहेणं न गहिज्जामि, जाव छलेणं न छलिज्जामि, जाव सन्निवाएणं नाभिभविज्जामि, जाव अन्नेण वा केणइ रोगायंकाइणा एस परिणामो न परिवडइ, ताव मे एअं सम्मद्दंसणं, नन्नत्थ रायाभिओगेणं, गणाभिओगेणं, बलाभिओगेणं, देवयाभिओगेणं, गुरुनिग्गहेणं, वित्तीकंतारेणं वोसिरामि'' । ततश्च –

''अरिहंतो मह [४]देवो, जावज्जीवं सुसाहुणो गुरुणो ।
जिणपन्नत्तं तत्तं, इअ समत्तं मए गहिअं'' ॥१॥

इति गाथाया वारत्रयं पाठः ।

यस्तु सम्यक्त्वप्रतिपत्त्यनन्तरं देशविरतिं प्रतिपद्यते, तस्यात्रैव व्रतोच्चारः –

तओ वंदित्ता सीसो भणइ—''इच्छकारि तुम्हे अम्हं सम्यक्त्वसामायिक ३ [५]आरोपउ,' गुरुराह—'आरोवेमि' १। पुणो वंदित्ता भणइ—'संदिसह किं भणामि' ? गुरू भणइ—'वंदित्ता पवेअह' २, पुणो वंदित्ता भणइ—'तुम्हे अम्हं संमत्तसामाइअं ३ आरोविअं, इच्छामि अणुसट्ठिं' गुरू भणइ—'आरोविअं आरोवियं खमासममाणं हत्थेणं सुत्तेणं अत्थेणं तदुभएणं—संमं [६]धारिज्जाहि (अण्णेसिं पवेज्जाहिं) गुरुगुणेहिं वुड्ढाहिं, नित्थारगपारगा होह,' सीसो भणइ—'इच्छं' ३ । तओ वंदित्ता भणइ 'तुम्हाणं पवेइअं, संदिसह साहूणं पवेएमि,' गुरू भणइ 'पवेअह' ४। तओ वंदित्ता एगनमुक्कारमुच्चरंतो समोसरणं गुरुं च पयक्खिणेइ । एवं तिन्निवेला, तओ गुरू निसिज्जाए उवविसइ ५ । खमासमणपुव्वं सीसो भणइ 'तुम्हाणं पवेइअं, साहूणं पवेइअं, संदिसहकाउस्सग्गं करेमि' गुरू भणइ—'करेह' ६ । तओ वंदित्ता भणइ

---

१. तुला–उपाशकदशाङ्गसूत्रे अ० १/सू० ८ ॥ २. वा–उपाशकशाङ्गसूत्रे तिलकाचार्यकृत-सामाचारीप्रकरणे च नास्ति ॥ ३. अणालित्तेण–L. तिलकाचार्यकृतसामाचारीप्रकरणे च । अणालत्तेणं–मु० P.C. उपासकदशाङ्गसूत्रे च । ४. देवो० इत्यादि गाथाया–P.L. ॥ ५. आरोवउ–L.P. ॥ ६. धारिज्जाहि (अण्णेसिं पवेज्जाहिं) गुरु० मु० ॥

D:\new/d-1.pm5\3rd proof

**'सम्यक्त्वसामायिक३स्थिरीकरणार्थं करेमि काउस्सग्गं इत्यादि' सत्तावीसुस्सास-चिंतणं चउवीसत्थयभणनम्''** ।

ततः सूरिस्तस्य पञ्चोदुम्बर्यादीन् यथायोग्यमभिग्रहान् ददाति । तद्दण्डकश्चैवम् –

**''अहन्नं भंते ! तुम्हाणं समीवे अभिग्गहे गिह्णामि तंजहा –दव्वओ, खित्तओ, कालओ, भावओ, दव्वओ णं इमे अभिग्गहे, खित्तओ णं इत्थ वा अन्नत्थ वा, कालओ णं जावज्जीवाए, भावओ णं अहागहिअभंगएणं, अरिहंतसक्खिअं, सिद्ध-सक्खिअं, साहुसक्खिअं, देवसक्खिअं, अप्पसक्खिअं, अन्नत्थणाभोगेणं सहसागारेणं महत्तरागारेणं सव्वसमाहिवत्तिआगारेणं वोसिरामि''** ॥

तत एकासनादि विशेषतपः कारयति । सम्यक्त्वादिदुर्ल्लभताविषयां देशनां च विधत्ते [1]दारम् १ ।

देशविरत्यारोपणविधिरप्येवमेव । व्रताभिलापस्त्वेवम् –

**''अहन्नं भंते ! तुम्हाणं समीवे थूलगं पाणाइवायं संकप्पओ निरवराहं पच्चक्खामि जावज्जीवाए दुविहं तिविहेणं मणेणं वायाए काएणं न करेमि न कारवेमि तस्स भंते ! पडिक्कमामि निंदामि गरिहामि अप्पाणं वोसिरामि''** ॥१॥

**''अहन्नं भंते ! तुम्हाणं समीवे थूलगं मुसावायं जीहाछेआइहेउं कन्नालीआइ पंचविहं पच्चक्खामि दक्खिणणाइअविसए [2]जावज्जीवाए दुविहमित्यादि''** ॥२॥

**''अहन्नं भंते ! तुम्हाणं समीवे थूलगं अदत्तादाणं खत्तखणणाइअं चोरंकारकरं रायनिग्गहकरं सचित्ताचित्ताइवत्थुविसयं पच्चक्खामि जावज्जीवाए दुविहमित्यादि''** ॥३॥

**''अहन्नं भंते ! तुम्हाणं समीवे ओरालिअवेउव्विअभेअं थूलगं मेहुणं पच्चक्खामि [3]जावज्जीवाए, तत्थ दिव्वं दुविहं तिविहेणं, तेरिच्छं एगविहं तिविहेणं, मणुअं अहागहिअभंगएणं, तस्स भंते ! [4]पडिक्कमामि निंदामीत्यादि''** ॥४॥

**''अहन्नं भंते ! तुम्हाणं समीवे अपरिमिअपरिग्गहं पच्चक्खामि धणधन्नाइ-नवविहवत्थुविसयं इच्छापरिमाणं उवसंपज्जामि जावज्जीवाए अहागहिअभंगएणं तस्स भंते ! [5]पडिक्कमामि निंदामीत्यादि''** ॥५॥

एतानि [6]प्रत्येकं प्रत्येकं वारत्रयं नमस्कारपूर्वमुच्चारणीयानि ।

---

१. दारं १–P.L. नास्ति ॥ २. जावजीवाए–मु० C. ॥ ३. जावज्जीवाए–L.P. नास्ति ॥ ४. पडिक्कमामीत्यादि–P.L. ॥ ५. पडिक्कमामीत्यादि–P.L. ॥ ६. प्रत्येकं नमस्कारपूर्वं वारत्रयम् उच्चा० P.L. ॥

**''अहन्नं भंते ! तुम्हाणं समीवे गुणव्वयतिए उड्ढाहोतिरिअगमणविसयं दिसिपरिमाणं पडिवज्जामि । उवभोगपरिभोगवए भोअणओ अणंतकायबहुबीअराईभोअणाइं परिहरामि, कम्मओ णं पनरसकम्मादाणाइं इंगालकम्माइआइं बहुसावज्जाइं, खरकम्माइं रायनिओगं[१] च परिहरामि । अणत्थदंडे अवज्झाणाइअं चउव्विहं अणत्थदंडं जहासत्तीए परिहरामि जावज्जीवाए अहागहिअभंगएणं तस्स भंते[२] ! पडिक्कमामीत्यादि ६-७-८ ॥ त्रीण्यपि समुदितानि वार ३''** ।

**''अहन्नं भंते ! तुम्हाणं समीवे सामाइअं, देसावगासिअं, पोसहोववासं, अतिहि-संविभागवयं च जहासत्तीए पडिवज्जामि जावज्जीवाए[३] अहागहिअभंगएणं तस्स भंते[४] पडिक्कमामीत्यादि ९-१०-११-१२ ॥ चत्वार्यपि समुदितानि वार ३''** ।

**''इच्चेइअं संमत्तमूलं पंचाणुव्वइअं सत्तसिक्खावइअं दुवालसविहं सावगधम्मं उवसंपज्जित्ता णं विहरामि । वार ३''** ॥२३॥

अथाणुव्रतादीन्येव क्रमेण दर्शयन्नाह –

**स्थूलहिंसादिविरतिं, व्रतभङ्गेन केनचित् ।**
**अणुव्रतानि पञ्चाहुरहिंसादीनि शम्भवः ॥२४॥**

इह हिंसा प्रमादयोगात् प्राणव्यपरोपणरूपा, सा च स्थूला सूक्ष्मा च । तत्र – सूक्ष्मा पृथिव्यादिविषया, स्थूला[५] मिथ्यादृष्टीनामपि हिंसात्वेन प्रसिद्धा या सा । स्थूलानां वा त्रसानां हिंसा **स्थूलहिंसा, आदि**शब्दात् स्थूलमृषावादा-ऽदत्तादाना-ऽब्रह्म-परिग्रहाणां परिग्रहः । एभ्यः स्थूलहिंसादिभ्यो या **विरति**र्निवृत्ति**स्तां 'अहिंसा-दीनि'**इति, अहिंसासुनृताऽस्तेय-ब्रह्मचर्या-ऽपरिग्रहान् अणूनि साधुव्रतेभ्यः सकाशा-ल्लघूनि व्रतानि नियमरूपाणि **अणुव्रतानि,** अणोर्वा यत्यपेक्षया लघोर्लघु-गुणस्थानिनो व्रता**न्यणुव्रतानि** । अथवाऽनु पश्चान्महाव्रतप्ररूपणापेक्षया प्ररूपणीय-त्वात् व्रता**न्यणुव्रतानि** । पूर्वं हि महाव्रतानि प्ररूप्यन्ते, ततस्तत्प्रतिपत्त्यसमर्थस्याणु-व्रतानि । यदाह –

''**जइधम्मस्सऽसमत्थे[६], जुज्जइ तद्देसणं पि साहूणं**'' [ ] ति । तानि कियन्ति ? इत्याह –**'पञ्चे'**ति, पञ्चसङ्ख्यानि पञ्चाणुव्रतानीति । बहुवचननिर्देशेऽपि यद्विरतिमित्येक-वचननिर्देशः, स सर्वत्र विरतिसामान्यापेक्षयेति । **'शम्भवः'** तीर्थकराः **'आहुः'**

---

१. रायभियोगं-मु० ॥ २. भंते इत्यादि-P.L. ॥ ३. जावजीवाए-मु० C. ॥ ४. भंते इत्यादि-P.L. ॥ ५. तुला-योगशास्त्रवृत्तिः २।१८ प० १९१॥ ६. ०त्थो-L.P.C. ॥

प्रतिपादितवन्तः, किमविशेषण विरतिः ? न, इत्याह – '**व्रतभङ्गेन**' इत्यादि। '**केनचित्**' द्विविधत्रिविधादीनामन्यतमेन '**व्रतभङ्गेन**' व्रतप्रकारेण, बाहुल्येन हि श्रावकाणां द्विविध-त्रिविधादयः षडेव भङ्गाः सम्भवन्तीति तदादिभङ्गजालग्रहणमुचितमितिभावः। ते च भङ्गा एवम् –श्राद्धा विरता अविरताश्चेति सामान्येन द्विविधा अपि विशेषतोऽष्टविधा भवन्ति। यत् **आवश्यके** –

''**साभिग्गहा य णिरभिग्गहा य ओहेण सावया दुविहा।**
**ते पुण विभज्जमाणा, अट्ठविहा हुंति णायव्वा**'' ॥१॥ [ आव.नि./१५५७ ]

[१]साभिग्रहा विरता **आनन्दादयः**, अनभिग्रहा अविरताः **कृष्ण-सत्यकि-श्रेणिकादय** इति। अष्टविधास्तु द्विविध-त्रिविधादिभङ्गभेदेन भवन्ति। तथाहि –

''**दुविह तिविहेण पढमो, दुविहं दुविहेण बीअओ होइ।**
**दुविहं एगविहेणं, एगविहं चेव तिविहेणं** ॥१॥ [ आव.नि./१५५८ ]
**एगविहं दुविहेणं, एगेगविहेण छट्ठओ होइ।**
**उत्तरगुण सत्तमओ, अविरओ चेव अट्ठमओ**'' ॥२॥ [ आव.नि./१५५९ ]

द्विविधं कृतं [२]कारितम्, [३]त्रिविधेन मनसा वचसा कायेन। यथा –स्थूलहिंसादिकं न करोत्यात्मना न कारयत्यन्यैर्मनसा वचसा कायेनेत्यभिग्रहवान् प्रथमः, अस्य चानुमतिरप्रतिषिद्धा, अपत्यादिपरिग्रहसद्भावात्। [४]तैर्हिंसादिकरणे तस्यानुमतिप्राप्तेः। अन्यथा परिग्रहाऽपरिग्रहयोरविशेषेण प्रव्रजिताप्रव्रजितयोरभेदापत्तेः।

त्रिविध-त्रिविधादयस्तु भङ्गा गृहिणमाश्रित्य [५]**भगवत्यु**क्ता अपि क्वाचित्कत्त्वा-न्नेहाधिकृताः। बाहुल्येन षड्भिरेव विकल्पैस्तेषां प्रत्याख्यानग्रहणात्। बाहुल्यापेक्षया चास्य सूत्रस्य प्रवृत्तेः। क्वाचित्कत्वं तु तेषां विशेषविषयत्वात्, [६]तथाहि –यः किल प्रविव्रजिषुः पुत्रादिसन्ततिपालनाय प्रतिमाः प्रतिपद्यते, यो वा विशेषं स्वयम्भूरमणादिग[७]तं मत्स्यादिमांसं दन्तिदन्त-चित्रकचर्मादिकं स्थूलहिंसादिकं वा क्वचिदवस्थाविशेषे प्रत्याख्याति, स एव त्रिविधं त्रिविधादिना करोतीत्यल्पविषयत्वान्नोच्यते।

---

१. तुला–आवश्यकहारिभद्रीयवृत्तिः प० ८०५॥ २. कारितं च त्रि° L.P. ॥ ३. तुला योगशास्त्रवृत्तिः प० १९२ ॥ ४. तैर्हिंसाकरणे–मु०। L.P.C. योगशास्त्रवृत्तावपि तैर्हिंसादिकरणे–इति ॥ ५. तुला–तत्त्वार्थसूत्रस्य सिद्धसेनीयावृत्तिः ७।१४ भा० २। पृ० ८५ ॥ ६. तुला–योगशास्त्रवृत्तिः प० १९२, प्रवचनसारोद्धार [गा० १३२३]वृत्तिः, श्रावकव्रतभङ्गावचूरिः प० २ तः ॥ ७. °त–मु० योगशास्त्रवृत्तौ च ॥

तथा द्विविधं द्विविधेनेति द्वितीयो भङ्गः । अत्र चोत्तरभङ्गास्त्रयः । तत्र द्विविधं स्थूलहिंसादिकं न करोति न कारयति द्विविधेन मनसा वचसा १, यद्वा मनसा कायेन २, यद्वा वाचा कायेनेति ३ । तत्र यदा मनसा वचसा न करोति न कारयति, तदा मनसाऽभिसन्धिरहित एव वाचाऽपि हिंसादिकमब्रुवन्नेव कायेन[1] दुश्चेष्टितादि असंज्ञिवत् करोति १। यदा तु मनसा कायेन न करोति न कारयति, तदा मनसाऽभिसन्धिरहित एव कायेन दुश्चेष्टितादि परिहरन्नेवानाभोगाद्वा(द्वा वा)चैव हन्मि घातयामि चेति ब्रूते २ । यदा तु वाचा कायेन न करोति न कारयति, तदा मनसैवाभिसन्धिमधिकृत्य करोति कारयति च ३ । अनुमतिस्तु त्रिभिः सर्वत्रैवास्ति । एवं शेषविकल्पा अपि भावनीयाः ।

द्विविधमेकविधेनेति तृतीयः । अत्राप्युत्तरभङ्गास्त्रयः द्विविधं करणं कारणं च, एकविधेन मनसा, यद्वा वचसा, यद्वा कायेन । एकविधं त्रिविधेनेति चतुर्थः । अत्र च द्वौ भङ्गौ, एकविधं करणम्, यद्वा कारणम्, त्रिविधेन मनसा वाचा कायेन । एकविधं द्विविधेनेति पञ्चमः । अत्रोत्तरभेदाः षट्, एकविधं करणं यद्वा कारणं, द्विविधेन मनसा वाचा, यद्वा मनसा कायेन, यद्वा वाचा कायेन । एकविधमेकविधेनेति षष्ठः, अत्रापि प्रतिभङ्गाः षट्, एकविधं करणं यद्वा कारणम्, एकविधेन मनसा यद्वा वाचा यद्वा कायेन । तदेवं मूलभङ्गाः षट्, षण्णामपि च मूलभङ्गानामुत्तरभङ्गाः सर्वसङ्ख्ययैकविंशतिः । तथा चोक्तम्–

**''दुविहतिविहा २ २ २ १ १ १ य[2] छ च्चिअ, तेसिं भेआ कमेणिमे हुंति ।**
**पढमिक्को दुन्नि तिआ, दुगेग दो छक्क इगवीसं ३ २ १ ३ २ १''** ॥१॥

**[ श्रावकव्रतभङ्गप्र.९/प्रवचनसारोद्धारे १३२९ ]**

स्थापना चेयम्–एवं च षड्भिर्भङ्गैः कृताभिग्रहः षड्विधः श्राद्धः, सप्तमश्चोत्तरगुणः–१ ३ ३ २ ६ ६ प्रतिपन्नगुणव्रतशिक्षाव्रताद्युत्तरगुणः । अत्र च सामान्येनोत्तरगुणानाश्रित्यैक एव भेदो विवक्षितः, अविरतश्चाष्टमः ।

तथा पञ्चस्वप्यणुव्रतेसु प्रत्येकं षड्भङ्गीसम्भवेन उत्तरगुणाविरतमीलनेन च द्वात्रिंशद्भेदा अपि श्राद्धानां भवन्ति । यदुक्तम्–

**''दुविहा विरयाविरया, दुविहतिविहाइणट्ठहा हुंति ।**
**वयमेगेगं छ च्चिय, गुणिअं दुगमिलिअ बत्तीसं''** ॥१॥

**[ श्रावकव्रतभङ्गप्र.३/प्रवचनसारोद्धारे १३२३ ]** ति ।

---

१. कायेनैव दुश्चेष्टितादिना–इति योगशास्त्रवृत्तौ प० १९२ ॥ २. °इ–मु० ॥

अत्र च द्विविध-त्रिविधादिना भङ्गनिकुरम्बेण श्रावकार्हपञ्चाणुव्रतादिव्रतसंहति-भङ्गकदेवकुलिकाः सूचिताः । ताश्चैकैकव्रतं प्रत्यभिहितया षड्भङ्ग्या निष्पद्यन्ते । तासु च प्रत्येकं त्रयो राशयो भवन्ति । तद्यथा —आदौ गुण्यराशिर्मध्ये गुणकराशिरन्ते चागतराशिरिति । तत्र पूर्वमेतासामेव देवकुलिकानां षड्भङ्ग्या विवक्षितव्रतभङ्गक-सर्वसङ्ख्यारूपा एवङ्काराशयश्चैवम् —

"**एगवए छब्भङ्गा, निद्दिट्ठा सावयाण जे सुत्ते ।**
**ते च्चिअ पयवुड्ढीए, सत्तगुणा छज्जुआ कमसो**" ॥१॥

**[ श्रावकव्रतभङ्गप्र.१०/प्रवचनसारोद्धारे १३३० ]**

सर्वभङ्गराशिं जनयन्तीति शेषः । कथं पुनः षड्भङ्गाः सप्तभिर्गुण्यन्ते ? इत्याह — पदवृद्ध्या, मृषावादाद्येकैकव्रतवृद्ध्या, एकव्रतभङ्गराशेरवधौ व्यवस्थापितत्वाद् विवक्षितव्रतेभ्य एकेन हीना वारा इत्यर्थः । तथाहि —एकव्रते षड्भङ्गा सप्तभिर्गुणिता जाता द्विचत्वारिंशत्तत्र षट् क्षिप्यन्ते जाता अष्टचत्वारिंशद् , एषाऽपि सप्तभिर्गुण्यते षट् च क्षिप्यन्ते जातं ३४२ । एवं सप्तगुणनषट्प्रक्षेपक्रमेण तावत्कार्यं[1] यावदेकादश्यां वेलायामागतम् १३८४१२८७२०० । एते च षट्अष्टचत्वारिंशदादयो द्वादशाप्यागतराशय उपर्यधोभागेन व्यवस्थाप्यमाना अर्द्ध-देवकुलिकाकारां भूमिमावृण्वन्तीति खण्डदेवकुलिकेत्युच्यते । स्थापना (१) ।

सम्पूर्णदेवकुलिकास्तु प्रतिव्रतमेकैकदेवकुलिकासद्भावेन षड्भङ्ग्यां द्वादश देवकुलिकाः सम्भवन्ति । तत्र द्वादश्यां देवकुलिकायामेकद्विकादिसंयोगा[2] गुणक-(ण्य)रूपाश्चैवं ६-३६-२१६-१२९६-७७७६-४६६५६-२७९९३६ १६७९६१६-१००७७६९६-६०४६६१७६-३६२७९७०५६-२१७६७८२३३६ ।

तत्र च गुणकराशयस्त्वमी[3]—१२-६६-२२०-४९५-७९२-९२४-७९२-४९५-२२०-६६-१२-१ । एतेषां च पूर्वस्य[4] षड्गुणनेऽग्रेतनो गुण्यराशिरायातीत्यानयने बीजम् , एते च षट्षट्त्रिंशदादयो द्वादशापि गुण्यराशयः क्रमशो द्वादश-षट्षष्टिप्रभृतिभिर्गुणकराशिभिर्गुणिता आगतराशयः ७२ आदयो भवन्ति । ते देवकुलिकागततृतीयराशितो ज्ञेयाः । स्थापना चाग्रे (२) ।

अत्राप्युत्तरगुणाऽविरतसंयुक्ताः १३८४१२८७२०२ भवन्ति । उत्तरगुणाश्चात्र प्रतिमा-दयोऽभिग्रहविशेषा ज्ञेयाः । यदुक्तम् —

"**तेरसकोडिसयाइं, चुलसीइजुआइं बारस य लक्खा ।**
**सत्तासीअसहस्सा, दो अ सया तह दुरग्गा य**" ॥१॥ **[ श्रावकव्रतभङ्गप्र.४० ]**

---

१. तावत् याव॰ P.L. ॥ २. योगा गुणकरूपा॰ L.P. ॥ ३. गुण्यराशय॰ L.P.C. ॥ ४. पूर्वस्य षड्गु॰ मु० ॥

''दुरग त्ति'' प्रतिमाद्युत्तरगुणाऽविरतरूपभेदद्वयाधिकाः, एतावन्तश्च द्वादश व्रतान्याश्रित्य प्रोक्ता। पञ्चाणुव्रतान्याश्रित्य तु १६८०६ भवन्ति। तत्राप्युत्तरगुणाऽविरतमीलने १६८०८ भवन्ति। अत्र चैकद्विकादिसंयोगा गुणकाः, षट्षट्त्रिंशदादयो गुण्याः। त्रिंशदादयश्चागतराशयो यन्त्रकादवसेयाः।

इयमत्र भावना—कश्चित् पञ्चाणुव्रतानि प्रतिपद्यते, तथा किल पञ्चैकसंयोगाः, एकैकस्मिंश्च संयोगे द्विविधत्रिविधादयः षड् भङ्गाः स्युः, तेन षट् पञ्चभिर्गुण्यन्ते जाताः ३०। एतावन्तः पञ्चानां व्रतानामेकैकसंयोगे[1] भङ्गाः, तथा एकैकस्मिन् द्विकसंयोगे ३६ भङ्गास्तथाहि—आद्यव्रतसम्बन्ध्याद्यो भङ्गकोऽवस्थितो मृषावादस्तकान् षड् भङ्गान् लभते। एवमाद्यव्रतसम्बन्धी द्वितीयोऽपि यावत् षष्ठोऽपि भङ्गोऽवस्थित एव मृषावादसत्कान् षड् भङ्गान् लभते, ततश्च षड् षड्भिर्गुणिताः ३६। दश चात्र द्विकसंयोगाः अत ३६ दशगुणिताः ३६०। एतावन्तः पञ्चानां व्रतानां द्विकसंयोगे भङ्गाः, एवं त्रिकसंयोगादिष्वपि भङ्ग-सङ्ख्याभावना कार्या।

पञ्चमदेवकुलिकास्थापना—

| | | |
|---|---|---|
| ६ | ५ | ३० |
| ३६ | १० | ३६० |
| २१६ | १० | २१६० |
| १२९६ | ५ | ६४८० |
| ७७७६ | १ | ७७७६ |

एवं सर्वासामपि देवकुलिकानां निष्पत्तिः स्वयमेवावसेया। इयं च प्ररूपणाऽऽ**वश्यक-निर्युक्त्य**भिप्रायेण कृता। **भगवत्य**भिप्रायेण तु नवभङ्गी। साऽपि प्रसङ्गतः प्रदर्श्यते। तथाहि—हिंसां न करोति मनसा १, वाचा २, कायेन ३। मनसा वाचा ४, मनसा कायेन ५, वाचा कायेन ६। मनसा वाचा कायेन ७, एते करणेन सप्त भङ्गाः १, एवं कारणेन २, अनुमत्या ३, करणकारणाभ्यां ४, कारणानुमतिभ्यां ५, करणानुमतिभ्यां ६, करणकारणानुमतिभिरपि ७ सप्त। एवं सर्वे मिलिता एकोनपञ्चाशद्भवन्ति ३३३ २२२ १११ एते च त्रिकालविषयत्वात् प्रत्याख्यानस्य कालत्रयेण गुणिताः सप्तचत्वारिंशं ३२१ ३२१ ३२१ शतं भवन्ति। यदाह—

''**मणवयकाइयजोगे, करणे कारावणे अणुमई अ।**
**इक्कगदुगतिगजोगे, सत्ता सत्तेव गुणवन्ना ॥१॥** [ श्रा.व्र.भ.प्र./५ ]

१. व्रतानामेकक० मु० ॥

**पढमिक्को तिन्नि तिआ, दुन्नि नवा तिन्नि दो नवा चेव । १३३ ३९९ ३९९**
**कालतिगेण य सहिया, सीआलं होइ भंगसयं ॥२॥** [ श्रा.व्र.भ.प्र./६ ]
**सीआलं भंगसयं, पच्चक्खाणंमि[1] जस्स उवलद्धं ।**
**सो खलु पच्चक्खाणे, कुसलो सेसा अकुसला उ'' ॥३॥** [ श्रा.व्र.भ.प्र./८ ] त्ति,

त्रिकालविषयता चातीतस्य निन्दया साम्प्रतिकस्य संवरणेन अनागतस्य प्रत्याख्यानेनेति । यदाह –''**अईयं निंदामि, पडुप्पन्नं, संवरेमि, अणागयं पच्चक्खामि**'' [ **पाक्षिकसूत्रे** ] त्ति। एते च भङ्गा अहिंसामाश्रित्य प्रदर्शिता व्रतान्तरेष्वपि ज्ञेया: ।

तत्र पञ्चाणुव्रतेषु प्रत्येकं १४७ भङ्गकभावात् ७३५ भेदा: श्रावकाणां भवन्ति। उक्तं च –

**दुविहा अट्ठविहा वा, बत्तीसविहा व सत्त पणतीसा ।**
**सोलस य सहस्स भवे, अट्ठसयहुत्तरा वइणो ॥१॥** [ श्रा.व्र.भ.प्र./२ ] त्ति ।

इदं तु ज्ञेयं –षड्भङ्गीवदुत्तरभङ्गरूपैकविंशतिभङ्ग्या २, तथा नवभङ्ग्या ३, तथैकोनपञ्चाशद्भङ्ग्या ४, तथा सप्तचत्वारिंशत्(दधिकशत)[2]भङ्ग्या ५, द्वादश द्वादश देवकुलिका निष्पद्यन्ते। यदुक्तम् –

**इगवीसं खलु भङ्गा, निद्दिट्ठा सावयाण जे सुत्ते ।**
**ते च्चिअ बावीसगुणा, इगवीसं पक्खिववेअव्वा ॥१॥** [ श्रा.व्र.भ.प्र./११ ]
**एगवए नव भङ्गा, निद्दिट्ठा सावयाण जे सुत्ते ।**
**ते च्चिअ दसगुण काउं, नव पक्खेवंमि कायव्वा ॥२॥** [ श्रा.व्र.भ.प्र./१२ ]
**[3]इगुवन्नं खलु भङ्गा, निद्दिट्ठा सावयाण जे सुत्ते ।**
**ते च्चिअ पंचासगुणा, [4]इगुणवन्नं पक्खिववेअव्वा ॥३॥** [ श्रा.व्र.भ.प्र./१३ ]
**सीआलं भंगसयं, ते च्चिअ अडयालसयगुणं काउं ।**
**सीयालसएण जुअं, सव्वग्गं जाण भङ्गाणं ॥४॥** [ श्रा.व्र.भ.प्र./१४ ]

एकदश्यां वेलायां द्वादशव्रतभङ्गकसर्वसङ्ख्यायामागतं क्रमेण खण्डदेवकुलिकातो ज्ञेयम् [5]तत्स्थापनाश्चेमा: (३) । एवं सम्पूर्णदेवकुलिका अपि एकविंशत्यादिभङ्ग्यादिषु द्वादश द्वादश भावनीया: । स्थापना: क्रमेण यथा (४-५-६-७) इति प्रसङ्गत: प्रदर्शिता भङ्गप्ररूपणा। बाहुल्येन च द्विविध-त्रिविधादिषड्भङ्ग्येवोपयोगिनीत्युक्तमेवावसेयमित्यलं विस्तरेण ॥२४॥

---

१. जस्सविसुद्धिए होई उवलद्धं-इति प्रवचनसारोद्धारे ॥ २. सप्तचत्वारिंशत्(दधिकशत) भङ्ग्या-मु० । सप्तचत्वारिंशशतभङ्ग्या-L.P. ॥ ३-४. गुणवन्नं-मु० ॥ ५. स्थापना: १००तमपत्रत: १११तमपत्रं यावद् द्रष्टव्या: ॥

| स्थापना ( २ ) | | स्थापना ( १ ). | |
|---|---|---|---|
| ६ | १ | ६ | ६★ |
| ६ | २ | १२ | ४८ |
| ३६ | १ | ३६ | |
| ६ | ३ | १८ | |
| ३६ | ३ | १०८ | ३४२ |
| २१६ | १ | २१६ | |
| ६ | ४ | २४ | |
| ३६ | ६ | २१६ | २४०० |
| २१६ | ४ | ८६४ | |
| १२९६ | १ | १२९६ | |
| ६ | ५ | ३० | |
| ३६ | १० | ३६० | |
| २१६ | १० | २१६० | १६८०६ |
| १२९६ | ५ | ६४८० | |
| ७७७६ | १ | ७७७६ | |
| ६ | ६ | ३६ | |
| ३६ | १५ | ५४० | |
| २१६ | २० | ४३२० | ११७६४८ |
| १२९६ | १५ | १९४४० | |
| ७७७६ | ६ | ४६६५६ | |
| ४६६५६ | १ | ४६६५६ | |
| ६ | ७ | ४२ | |
| ३६ | २१ | ७५६ | |
| २१६ | ३५ | ७५६० | ८२३५४२ |
| १२९६ | ३५ | ४५३६० | |
| ७७७६ | २१ | १६३२९६ | |
| ४६६५६ | ७ | ३२६५९२ | |
| २७९९३६ | १ | २७९९३६ | |
| ६ | ८ | ४८ | |
| ३६ | २८ | १००८ | |
| २१६ | ५६ | १२०९६ | |
| १२९६ | ७० | ९०७२० | ५७६४८०० |
| ७७७६ | ५६ | ४३५४५६ | |
| ४६६५६ | २८ | १३०६३६८ | |
| २७९९३६ | ८ | २२३९४८८ | |
| १६७९६१६ | १ | १६७९६१६ | |

D:\new/d-1.pm5\3rd proof

| | | | |
|---|---|---|---|
| ६ | ९ | ५४ | |
| ३६ | ३६ | १२९६ | |
| २१६ | ८४ | १८१४४ | |
| १२९६ | १२६ | १६३२९६ | |
| ७७७६ | १२६ | ९७९७७६ | ४०३५३६०६ |
| ४६६५६ | ८४ | ३९१९१०४ | |
| २७९९३६ | ३६ | १००७७६९६ | |
| १६७९६१६ | ९ | १५११६५४४ | |
| १००७७६९६ | १ | १००७७६९६ | |
| ६ | १० | ६० | |
| ३६ | ४५ | १६२० | |
| २१६ | १२० | २५९२० | |
| १२९६ | २१० | २७२१६० | |
| ७७७६ | २५२ | १९५९५५२ | २८२४७५२४८ |
| ४६६५६ | २१० | ९७९७७६० | |
| २७९९३६ | १२० | ३३५९२३२० | |
| १६७९६१६ | ४५ | ७५५८२७२० | |
| १००७७६९६ | १० | १००७७६९६० | |
| ६०४६६१७६ | १ | ६०४६६१७६ | |
| ६ | ११ | ६६ | |
| ३६ | ५५ | १९८० | |
| २१६ | १६५ | ३५६४० | |
| १२९६ | ३६० | ४२७६८० | |
| ७७७६ | ४६२ | ३५९२५१२ | |
| ४६६५६ | ४६२ | २१५५५०७२ | ११७७३२६७४२ |
| २७९९३६ | ३३० | ९२३७८८८० | |
| १६७९६१६ | १६५ | २७७१६६६४० | |
| १००७७६९६ | ५५ | ५५४२७३२८० | |
| ६०४६६१७६ | ११ | ६६५१२७९३६ | |
| ३६२७९७०५६ | १ | ३६३७९७०५७ | |
| ६ | १२ | ७२ | |
| ३६ | ६६ | २३७६ | |
| २१६ | २२० | ४७५२० | |
| १२९६ | ४९५ | ६४१५२० | |
| ७७७६ | ७९२ | ६१५८५९२ | |
| ४६६५६ | ९२४ | ४३११०१४४ | |
| २७९९३६ | ७९२ | २२१७०९३१२ | १३८४१२८७२०० |
| १६७९६१६ | ४९५ | ८३१४०९९२० | |
| १००७७६९६ | २२० | २२१७०९३१२० | |
| ६०४६६१७६ | ६६ | ३९९०७६७६१६ | |
| ३६२७९७०५६ | १२ | ४३५३५६४६७२ | |
| २१७६७८२३३६ | १ | २१७६७८२३३६ | |

## स्थापना ( ३ )

| | |
|---|---|
| ९ | २१ |
| ९९ | ४८३ |
| ९९९ | १०६४७ |
| ९९९९ | २३४२५५ |
| ९९९९९ | ५१५३६३१ |
| ९९९९९९ | ११३३७९९०३ |
| ९९९९९९९ | २४९४३५७८८७ |
| ९९९९९९९९ | ५४८७५८७३५३५ |
| ९९९९९९९९९ | १२०७२६९२१७७९१ |
| ९९९९९९९९९९ | २६५५९९२२७९१४२३ |
| ९९९९९९९९९९९ | ५८४३१८३०१४११३२७ |
| ९९९९९९९९९९९९ | १२८५५००२६३१०४९२१५ |

| | |
|---|---|
| ४९ | १४७ |
| २४९९ | २१९०३ |
| १२४९९९ | ३२४१७९१ |
| ६२४९९९९ | ४७९७८५२१५ |
| ३१२४९९९९९ | ७१००८२११९६७ |
| १५६२४९९९९९९ | १०५०९२१५३७१२६३ |
| ७८१२४९९९९९९९ | १५५५३६३८७४९४७०७१ |
| ३९०६२४९९९९९९९९ | २३०१९३८५३४९२१६६५५ |
| १९५३१२४९९९९९९९९९ | ३४०६८६९०३१६८४०६६५०८७ |
| ९७६५६२४९९९९९९९९९९ | ५०४२१६६१६६८९२४१८४३३०२३ |
| ४८८२८१२४९९९९९९९९९९९ | ७४६२४०५९२७०००७७९२८०८७५५१ |
| २४४१४०६२४९९९९९९९९९९९९ | ११०४४३६०७७१९६११६३३५६९५७६९५ |

## स्थापना ( ४ ).

| | | |
|---|---|---|
| ९ | १ | ९ |
| ९ | २ | १८ |
| ८१ | १ | ८१ |
| ९ | ३ | २७ |
| ८१ | ३ | २४३ |
| ७२९ | १ | ७२९ |
| ९ | ४ | ३६ |
| ८१ | ६ | ४८६ |
| ७२९ | ४ | २९१६ |
| ६५६१ | १ | ६५६१ |
| ९ | ५ | ४५ |
| ८१ | १० | ८१० |
| ७२९ | १० | ७२९० |
| ६५६१ | ५ | ३२८०५ |
| ५९०४९ | १ | ५९०४९ |
| ९ | ६ | ५४ |
| ८१ | १५ | १२१५ |
| ७२९ | २० | १४५८० |
| ६५६१ | १५ | ९८४१५ |
| ५९०४९ | ६ | ३५४२९४ |
| ५३१४४१ | १ | ५३१४४१ |
| ९ | ७ | ६३ |
| ८१ | २१ | १७०१ |
| ७२९ | ३५ | २५५१५ |
| ६५६१ | ३५ | २२९६३५ |
| ५९०४९ | २१ | १२४००२९ |
| ५३१४४१ | ७ | ३७२००८७ |
| ४७८२९६९ | १ | ४७८२९६९ |
| ९ | ८ | ७२ |
| ८१ | २८ | २२६८ |
| ७२९ | ५६ | ४०८२४ |
| ६५६१ | ७० | ४५९२७० |
| ५९०४९ | ५६ | ३३०६७४४ |
| ५३१४४१ | २८ | १४८८०३४८ |
| ४७८२९६९ | ८ | ३८२६३७५२ |
| ४३०४६७२१ | १ | ४३०४६७२१ |

D:\new/d-1.pm5\3rd proof

| | | |
|---|---|---|
| ९ | ९ | ८१ |
| ८१ | ३६ | २९१६ |
| ७२९ | ८४ | ६१२३६ |
| ६५६१ | १२६ | ८२६६८६ |
| ५९०४९ | १२६ | ७४४०१७४ |
| ५३१४४१ | ८४ | ४४६४१०४४ |
| ४७८२९६९ | ३६ | १७२१८६८८४ |
| ४३०४६७२१ | ९ | ३८७४२०४८९ |
| ३८७४२०४८९ | १ | ३८७४२०४८९ |
| ९ | १० | ९० |
| ८१ | ४५ | ३६४५ |
| ७२९ | १२० | ८७४८० |
| ६५६१ | २१० | १३७७८१० |
| ५९०४९ | २५२ | १४८८०३४८ |
| ५३१४४१ | २१० | १११६०२६१० |
| ४७८२९६९ | १२० | ५७३९५६२८० |
| ४३०४६७२१ | ४५ | १९३७१०२४४५ |
| ३८७४२०४८९ | १० | ३८७४२०४८९० |
| ३४८६७८४४०१ | १ | ३४८६७८४४०१ |
| ९ | ११ | ९९ |
| ८१ | ५५ | ४४५५ |
| ७२९ | १६५ | १२०२८५ |
| ६५६१ | ३३० | २१६५१३० |
| ५९०४९ | ४६२ | २७२८०६३८ |
| ५३१४४१ | ४६२ | २४५५२५७४२ |
| ४७८२९६९ | ३३० | १५७८३७९७७० |
| ४३०४६७२१ | १६५ | ७१०२७०८९६५ |
| ३८७४२०४८९ | ५५ | २१३०८१२६८९५ |
| ३४८६७८४४०१ | ११ | ३८३५४६२८४११ |
| ३१३८१०५९६०९ | १ | ३१३८१०५९६०९ |
| ९ | १२ | १०८ |
| ८१ | ६६ | ५३४६ |
| ७२९ | २२० | १६०३८० |
| ६५६१ | ४९५ | ३२४७६९५ |
| ५९०४९ | ७९२ | ४६७६६८०८ |
| ५३१४४१ | ९२४ | ४९१०५१४८४ |
| ४७८२९६९ | ७९२ | ३७८८१११४४८ |
| ४३०४६७२१ | ४९५ | २१३०८१२६८९५ |
| ३८७४२०४८९ | २२० | ८५२३२५०७५८० |
| ३४८६७८४४०१ | ६६ | २३०१२७७०४६६ |
| ३१३८१०५९६०९ | १२ | ३७६५७२७१५३०८ |
| २८२४२९५३६४८१ | १ | २८२४२९५३६४८१ |

## स्थापना ( ५ ).

| | | |
|---|---|---|
| २१ | १ | २१ |
| २१ | २ | ४२ |
| ४४१ | १ | ४४१ |
| २१ | ३ | ६३ |
| ४४१ | ३ | १३२३ |
| ९२६१ | १ | ९२६१ |
| २१ | ४ | ८४ |
| ४४१ | ६ | २६४६ |
| ९२६१ | ४ | ३७०४४ |
| १९४४८१ | १ | १९४४८१ |
| २१ | ५ | १०५ |
| ४४१ | १० | ४४१० |
| ९२६१ | १० | ९२६१० |
| १९४४८१ | ५ | ९७२४०५ |
| ४०८४१०१ | १ | ४०८४१०१ |
| २१ | ६ | १२६ |
| ४४१ | १५ | ६६१५ |
| ९२६१ | २० | १८५२२० |
| १९४४८१ | १५ | २९१७२१५ |
| ४०८४१०१ | ६ | २४५०४६०६ |
| ८५७६६१२१ | १ | ८५७६६१२१ |
| २१ | ७ | १४७ |
| ४४१ | २१ | ९२६१ |
| ९२६१ | ३५ | ३२४१३५ |
| १९४४८१ | ३५ | ६८०६८३५ |
| ४०८४१०१ | २१ | ८५७६६१२१ |
| ८५७६६१२१ | ७ | ६००३६२८४७ |
| १८०१०८८५४१ | १ | १८०१०८८५४१ |
| २१ | ८ | १६८ |
| ४४१ | २८ | १२३४८ |
| ९२६१ | ५६ | ५१८६१६ |
| १९४४८१ | ७० | १३६१३६७० |
| ४०८४१०१ | ५६ | २२८७०९६५६ |
| ८५७६६१२१ | २८ | २४०१४५१३८८ |
| १८०१०८८५४१ | ८ | १४४०८७०८३२८ |
| ३७८२२८५९३६१ | १ | ३७८२२८५९३६१ |

| | | |
|---|---|---|
| २१ | ९ | १८९ |
| ४४१ | ३६ | १५८७६ |
| ९२६१ | ८४ | ७७७९२४ |
| १९४४८१ | १२६ | २४५०४६०६ |
| ४०८४१०१ | १२६ | ५१४५९६७२६ |
| ८५७६६१२१ | ८४ | ७२०४३५४१६४ |
| १८०१०८८५४१ | ३६ | ६४८३९१८७४७६ |
| ३७८२२८५९३६१ | ९ | ३४०४०५७३४२४९ |
| ७९४२८००४६५८१ | १ | ७९४२८००४६५८१ |
| २१ | १० | २१० |
| ४४१ | ४५ | १९८४५ |
| ९२६१ | १२० | १११९३२० |
| १९४४८१ | २१० | ४०८४१०१० |
| ४०८४१०१ | २५२ | १०२९१९३४५२ |
| ८५७६६१२१ | २१० | १८०१०८८५४१० |
| १८०१०८८५४१ | १२० | २१६१३०६२४९२० |
| ३७८२२८५९३६१ | ४५ | १७०२०२८६७१२४५ |
| ७९४२८००४६५८१ | १० | ७९४२८००४६५८१० |
| १६६७९८८०९७८२०१ | १ | १६६७९८८०९७८२०१ |
| २१ | ११ | २३१ |
| ४४१ | ५५ | २४२५५ |
| ९२६१ | १६५ | १५२८०६५ |
| १९४४८१ | ३३० | ६४१७८७३० |
| ४०८४१०१ | ४६२ | १८८६८५४६६२ |
| ८५७६६१२१ | ४६२ | ३९६२३९४७९०२ |
| १८०१०८८५४१ | ३३० | ५९४३५९२१८५३० |
| ३७८२२८५९३६१ | १६५ | ६२४०७७१७९४५६५ |
| ७९४२८००४६५८१ | ५५ | ४३६८५४०२५६१९५५ |
| १६६७९८८०९७८२०१ | ११ | १८३४७८६९०७६०२११ |
| ३५०२७७५००५४२२२१ | १ | ३५०२७७५००५४२२२१ |
| २१ | १२ | २५२ |
| ४११ | ६६ | २९१०६ |
| ९२६१ | २२० | २०३७४२० |
| १९४४८१ | ४९५ | ९६२६८०९५ |
| ४०८४१०१ | ७९२ | ३२३४६०७९९२ |
| ८५७६६१२१ | ९२४ | ७९२४७८९५८०४ |
| १८०१०८८५४१ | ७९२ | १४२६४६२१२४४७२ |
| ३७८२२८५९३६१ | ४९५ | १८७२२३१५३८३६९५ |
| ७९४२८००४६५८१ | २२० | १७४७४१६१०२४७८२० |
| १६६७९८८०९७८२०१ | ६६ | ११००८७२१४४५६१२६६ |
| ३५०२७७५००५४२२२१ | १२ | ४२०३३३०००६५०६६५२ |
| ७३५५८२७५११३८६६४१ | १ | ७३५५८२७५११३८६६४१ |

## स्थापना ( ६ ).

| | | |
|---|---|---|
| | ० | |
| ४९ | १ | ४९ |
| ४९ | २ | ९८ |
| २४०१ | १ | २४०१ |
| ४९ | ३ | १४७ |
| २४०१ | ३ | ७२०३ |
| ११७६४९ | १ | ११७६४९ |
| ४९ | ४ | १९६ |
| २४०१ | ६ | १४४०६ |
| ११७६४९ | ४ | ४७०५९६ |
| ५७६४८०१ | १ | ५७६४८०१ |
| ४९ | ५ | २४५ |
| २४०१ | १० | २४०१० |
| ११७६४९ | १० | ११७६४९० |
| ५७६४८०१ | ५ | २८८२४००५ |
| २८२४७५२४९ | १ | २८२४७५२४९ |
| ४९ | ६ | २९४ |
| २४०१ | १५ | ३६०१५ |
| ११७६४९ | २० | २३५२९८० |
| ५७६४८०१ | १५ | ८६४७२०१५ |
| २८२४७५२४९ | ६ | १६९४८५१४९४ |
| १३८४१२८७२०१ | १ | १३८४१२८७२०१ |
| ४९ | ७ | ३४३ |
| २४०१ | २१ | ५०४२१ |
| ११७६४९ | ३५ | ४११७७१५ |
| ५७६४८०१ | ३५ | २०१७६८०३५ |
| २८२४७५२४९ | २१ | ५९३१९८०२२९ |
| १३८४१२८७२०१ | ७ | ९६८८९०१०४०७ |
| ६७८२२३०७२८४९ | १ | ६७८२२३०७२८४९ |
| ४९ | ८ | ३९२ |
| २४०१ | २८ | ६७२२८ |
| ११७६४९ | ५६ | ६५८८३४४ |
| ५७६४८०१ | ७० | ४०३५३६०७० |
| २८२४७५२४९ | ५६ | १५८१८६१३९४४ |
| १३८४१२८७२०१ | २८ | ३८७५५६०४१६२८ |
| ६७८२२३०७२८४९ | ८ | ५४२५७८४५८२७९२ |
| ३३२३२९३०५६९६०१ | १ | ३३२३२९३०५६९६०१ |

| | | |
|---|---|---|
| ४९ | ९ | ४४१ |
| २४०१ | ३६ | ८६४३६ |
| ११७६४९ | ८४ | ९८८२५१६ |
| ५७६४८०१ | १२६ | ७२६३६४९२६ |
| २८२४७५२४९ | १२६ | ३५५९१८८१३७४ |
| १३८४१२८७२०१ | ८४ | ११६२६६८१२४८८४ |
| ६७८२२३०७२८४९ | ३६ | २४४१६०३०६२२५६४ |
| ३३२३२९३०५६९६०१ | ९ | २९९०९६३७५१२६४०९ |
| १६२८४१३५९७९१०४४९ | १ | १६२८४१३५९७९१०४४९ |
| ४९ | १० | ४९० |
| २४०१ | ४५ | १०८०४५ |
| ११७६४९ | १२० | १४११७८८० |
| ५७६४८०१ | २१० | १२१०६०८२१० |
| २८२४७५२४९ | २५२ | ७११८३७६२७४८ |
| १३८४१२८७२०१ | २१० | २९०६६७०३१२२१० |
| ६७८२२३०७२८४९ | १२० | ८१३८६७६८७४१८८० |
| ३३२३२९३०५६९६०१ | ४५ | १४९५४८१८७५६३२०४५ |
| १६२८४१३५९७९१०४४९ | १० | १६२८४१३५९७९१०४४९० |
| ७९७९२२६६२९७६१२००१ | १ | ७९७९२२६६२९७६१२००१ |
| ४९ | ११ | ५३९ |
| २४०१ | ५५ | १३२०५५ |
| ११७६४९ | १६५ | १९४१२०८५ |
| ५७६४८०१ | ३३० | १९०२३८४३३० |
| २८२४७५२४९ | ४६२ | १३०५०३५६५०३८ |
| १३८४१२८७२०१ | ४६२ | ६३९४६७४६८६८६२ |
| ६७८२२३०७२८४९ | ३३० | २२३८१३६१४०४०१७० |
| ३३२३२९३०५६९६०१ | १६५ | ५४८३४३३५४३९८४१६५ |
| १६२८४१३५९७९१०४४९ | ५५ | ८९५६२७४७८८५०७४६९५ |
| ७९७९२२६६२९७६१२००१ | ११ | ८७७७१४९२९२७३७३२०११ |
| ३९०९८२१०४८५८२९८८०४९ | १ | ३९०९८२१०४८५८२९८८०४९ |
| ४९ | १२ | ५८८ |
| २४०१ | ६६ | १५८४६६ |
| ११७६४९ | २२० | २५८८२७८० |
| ५७६४८०१ | ४९५ | २८५३५७६४९५ |
| २८२४७५२४९ | ७९२ | २२३७२०३९७२०८ |
| १३८४१२८७२०१ | ९२४ | १२७८९३४९३७३७२४ |
| ६७८२२३०७२८४९ | ७९२ | ५३७१५२६७३६९६४०८ |
| ३३२३२९३०५६९६०१ | ४९५ | १६४५०३००६३११५२४९५ |
| १६२८४१३५९७९१०४४९ | २२० | ३५८२५०९११५४०२९८७८० |
| ७९७९२२६६२९७६१२००१ | ६६ | ५२६६२८९५७५६४२३९२०६६ |
| ३९०९८२१०४८५८२९८८०४९ | १२ | ४६९११७८५२५८२९९५८५६५८८ |
| १९१५८१२३१३८०५६६४१४४०१ | १ | १९१५८१२३१३८०५६६४१४४०१ |

D:\new/d-1.pm5\3rd proof

## स्थापना ( ७ ).

### १४७ भङ्ग्यां द्वादशव्रतदेवकुलिकाः । ११०४४३.

| | | |
|---|---|---|
| १४७ | १ | १४७ |
| १४७ | २ | २९४ |
| २१६०९ | १ | २१६०९ |
| १४७ | ३ | ४४१ |
| २१६०९ | ३ | ६४८२७ |
| ३१७६५२३ | १ | ३१७६५२३ |
| १४७ | ४ | ५८८ |
| २१६०९ | ६ | १२९६५४ |
| ३१७६५२३ | ४ | १२७०६०९२ |
| ४६६९४८८८१ | १ | ४६६९४८८८१ |
| १४७ | ५ | ७३५ |
| २१६०९ | १० | २१६०९० |
| ३१७६५२३ | १० | ३१७६५२३० |
| ४६६९४८८८१ | ५ | २३३४७४४४०५ |
| ६८६४१४८५५०७ | १ | ६८६४१४८५५०७ |
| १४७ | ६ | ८८२ |
| २१६०९ | १५ | ३२४१३५ |
| ३१७६५२३ | २० | ६३५३०४६० |
| ४६६९४८८८१ | १५ | ७००४२३३२१५ |
| ६८६४१४८५५०७ | ६ | ४११८४९१३०४२ |
| १००९०२९८३६९५२९ | १ | १००९०२९८३६९५२९ |
| १४७ | ७ | १०२९ |
| २१६०९ | २१ | ४५३७८९ |
| ३१७६५२३ | ३५ | १११७८३०५ |
| ४६६९४८८८१ | ३५ | १६३४३२१०८३५ |
| ६८६४१४८५५०७ | २१ | १४४१४७११९५६४७ |
| १००९०२९८३६९५२९ | ७ | ७०६३२०८८५८६७०३ |
| १४८३२७३८६०३२०७६३ | १ | १४८३२७३८६०३२०७६३ |
| १४७ | ८ | ११७६ |
| २१६०९ | २८ | ६०५०५२ |
| ३१७६५२३ | ५६ | १७७८८५२८८ |
| ४६६९४८८८१ | ७० | ३२६८६४२१६७० |
| ६८६४१४८५५०७ | ५६ | ३८४३९२३१८८३९२ |
| १००९०२९८३६९५२९ | २८ | २८२५२८३५४३४६८१२ |
| १४८३२७३८६०३२०७६३ | ८ | ११८६६११०८८२५६६१०४ |
| २१८०४१२५७४६७१५२१६१ | १ | २१८०४१२५७४६७१५२१६१ |

| | | |
|---|---|---|
| १४७ | ९ | १३२३ |
| २१६०९ | ३६ | ७७७९२४ |
| ३१७६५२३ | ८४ | २६६८२७९३२ |
| ४६६९४८८८१ | १२६ | ५८८३५५५९००६ |
| ६८६४१४८५५०७ | १२६ | ८६४८८२७१७३८८२ |
| १००९०२९८३६९५२९ | ८४ | ८४७५८५०६३०४०४३६ |
| १४८३२७३८६०३२०७६३ | ३६ | ५३३९७८५८९७१५४७४६८ |
| २१८०४१२५७४६७१५२१६१ | ९ | १९६२३७१३१७२०४३६९४४९ |
| ३२०५२०६४८४७६७१३६७६६७ | १ | ३२०५२०६४८४७६७१३६७६६७ |
| १४७ | १० | १४७० |
| २१६०९ | ४५ | ९७२४०५ |
| ३१७६५२३ | १२० | ३८११८२७६० |
| ४६६९४८८८१ | २१० | ९८०५९२६५०१० |
| ६८६४१४८५५०७ | २५२ | १७२९७६५४३४७७६४ |
| १००९०२९८३६९५२९ | २१० | २११८९६२६५७६०१०९० |
| १४८३२७३८६०३२०७६३ | १२० | १७७९१२८६३२३८४९१५६० |
| २१८०४१२५७४६७१५२१६१ | ४५ | ९८११८५६५८६०२१८४७२४५ |
| ३२०५२०६४८४७६७१३६७६६७ | १० | ३२०५२०६४८४७६७१३६७६६७० |
| ४७११६५३५३२६०७६९१०४७०४९ | १ | ४७११६५३५३२६०७६९१०४७०४९ |
| १४७ | ११ | १६१७ |
| २१६०९ | ५५ | ११८८४९५ |
| ३१७६५२३ | १६५ | ५२४१२६२९५ |
| ४६६९४८८८१ | ३३० | १५४०९३१३०७३० |
| ६८६४१४८५५०७ | ४६२ | ३१७१२३६६३०४२३४ |
| १००९०२९८३६९५२९ | ४६२ | ४६६१७१७८४६७२२३९८ |
| १४८३२७३८६०३२०७६३ | ३३० | ४८९४८०३७३९०५८५१७९० |
| २१८०४१२५७४६७१५२१६१ | १६५ | ३५९७६८०७४८२०८०१०६५६५ |
| ३२०५२०६४८४७६७१३६७६६७ | ५५ | १७६२८६३५६६६२१९२५२२१६८५ |
| ४७११६५३५३२६०७६९१०४७०४९ | ११ | ५१८२८१८८८५८६८४६०१५१७५३९ |
| ६९२६१३०६९२९३३३०५८३९१६२०३ | १ | ६९२६१३०६९२९३३३०५८३९१६२०३ |
| १४७ | १२ | १७६४ |
| २१६०९ | ६६ | १४२६१९४ |
| ३१७६५२३ | २२० | ६९८८३५०६० |
| ४६६९४८८८१ | ४९५ | २३११३९६९६०९५ |
| ६८६४१४८५५०७ | ७९२ | ५४३६४०५६५२१५४४ |
| १००९०२९८३६९५२९ | ९२४ | ९३२३४३५६९३४४४७९६ |
| १४८३२७३८६०३२०७६३ | ७९२ | ११७४७५२८९७३७४०४४२९६ |
| २१८०४१२५७४६७१५२१६१ | ४९५ | १०७९३०४२२४४६२४०३११६९५ |
| ३२०५२०६४८४७६७१३६७६६७ | २२० | ७०५१४५४२६६४८७७००८८६७४० |
| ४७११६५३५३२६०७६९१०४७०४९ | ६६ | ३१०९६९१३३१५२१०७६०९१०५२३४ |
| ६९२६१३०६९२९३३३०५८३९१६२०३ | १२ | ८३११३५६८३१५१९९६७००६९९४४३६ |
| १०१८१४१२११८६११९५९५८३५६८१८४१ | १ | १०१८१४१२११८६११९५९५८३५६८१८४१ |

D:\new/d-1.pm5\3rd proof

एवं सामान्येन पञ्चाप्यणुव्रतान्युपदर्श्य नामग्राहं तानि पञ्चभिः श्लोकैर्विवरीषुः प्रथमं प्रथमाणुव्रतमाह —

**निरागोद्वीन्द्रियादीनां, संकल्पाच्चानपेक्षया ।**
**हिंसाया विरतिर्या सा, स्यादणुव्रतमादिमम् ॥२५॥**

**निरागसो** निरपराधो ये **द्वीन्द्रियादयो** द्वित्रिचतुष्पञ्चेन्द्रियजीवास्**तेषां** '**संकल्पाद्**' अस्थि-चर्म-दन्त-मांसाद्यर्थममुं जन्तुं हन्मीति संकल्पपूर्वकं '**च**'[1] पुनः '**अनुपेक्षया**' अपेक्षामन्तरा या हिंसा प्राणव्यपरोपणं तस्या या '**विरतिः**' निवृत्तिः **सा** '**आदिमं,**' प्रथमम् '**अणुव्रतं**' '**स्याद्**' भवेत् । 'निराग' इतिपदेन निरपराधजन्तुविषयां हिंसां प्रत्याख्याति, सापराधस्य तु न नियम इति व्यज्यते । द्वीन्द्रियादिग्रहणेन त्वेकेन्द्रियविषयां हिंसां नियमितुं न क्षम इत्याचष्टे । 'संकल्पाद्' इत्यनेन चानुबन्धहिंसा वर्ज्या, आरम्भजा तु हिंसाऽशक्यप्रत्याख्यानेति तत्र यतनां कुर्यादिति ज्ञेयम् । यतः सूत्रम् —

''**थूलगपाणाइवायं समणोवासओ पच्चक्खाइ, से पाणाइवाए दुविहे पण्णत्ते, तंजहा —संकप्पओ आरंभओ अ, तत्थ समणोवासओ संकप्पओ जावज्जीवाए पच्चक्खाइ, णो आरंभओ'' त्ति —[ प्रत्याख्यानावश्यक सू० १ हारिभद्रीयवृत्तौ प० ८१८ ]** ।

अत्र च यद्यपि आरम्भजहिंसाऽप्रत्याख्याता, तथापि श्रावकेण त्रसादिरहितं सङ्गारकसत्यापनादिविधिना निश्छिद्रदृढवस्त्रगालितं जलमिन्धनानि च शुष्कान्यजीर्णान्यशुषिराण्यकीटजग्धानि धान्य-पक्वान्न-सुखाशिका-शाक-स्वादिम-पत्र-पुष्प-फलादीन्यप्यसंसक्तान्यगर्भितानि सर्वाण्यपि च जलादीनि परिमितानि सम्यक् शोधितान्येव च व्यापार्याणि । अन्यथा निर्दयत्वादिना शम-संवेगादिक्षणसम्यक्त्वक्षणपञ्चकान्तर्गताया अनुकम्पाया व्यभिचारापत्तेः । तदुच्यते —

''**परिसुद्धजलग्गहणं, दारुअधन्नाइआण य तहेव ।**
**गहिआण य परिभोगो, विहीइ तसरक्खणट्ठाए**'' ॥१॥ **[ प्र.आ.चू./भा.२ प.२८४ ]**

त्ति विवेक कार्यः । एवं चात्र विशेषणत्रयेण श्रावकस्य [2]सपादविशोपकप्रमितजीवदयात्मकं प्रायः प्रथममणुव्रतमिति सूचितम् । यत उक्तम् —

''**जीवा थूला सुहुमा, संकप्पारंभओ [3]भवे दुविहा ।**
**सावराहनिरवराहा, साविक्खा चेव निरविक्खा**'' ॥१॥ **[ सम्बोधप्र.श्रा.व्रता./२ ]**

---

१. L.P.C.J. चः-मु० ॥ २. सपादविशो° J. ॥ ३. य ते-इति सम्बोधप्रकरणे ॥

D:\new/d-1.pm5\3rd proof

अस्या व्याख्या –प्राणिवधो द्विविधः –स्थूल-सूक्ष्मजीवविषयभेदात् । तत्र –स्थूला द्वीन्द्रियादयः, सूक्ष्माश्चात्रैकेन्द्रियाः पृथिव्यादयः पञ्चापि बादराः, न तु सूक्ष्मनामकर्मोदयवर्त्तिनः सर्वलोकव्यापिनः, तेषां वधाभावात्, स्वयमायुःक्षयेणैव मरणात्। अत्र च साधूनां द्विविधादपि वधान्निवृत्तत्वाद्विंशतिविशोपका जीवदया, गृहस्थानां तु स्थूलप्राणिवधान्निवृत्तिर्न तु सूक्ष्मवधात्, पृथ्वी-जलादिषु सततमारम्भप्रवृत्तत्वाद्, इति दशविशोपकरूपमर्द्धं गतम्। स्थूलप्राणिवधोऽपि द्विधा, सङ्कल्पज आरम्भजश्च । तत्र सङ्कल्पान्मारयाम्येनमिति मनः-सङ्कल्परूपाद्यो जायते तस्माद् गृही निवृत्तो, न त्वारम्भजात्, कृष्याद्यारम्भे द्वीन्द्रियादिव्यापादनसम्भवाद्, अन्यथा च शरीरकुटुम्बनिर्वाहाद्यभावात्, एवं पुनरर्द्धं गतं जाताः पञ्च विशोपकाः । सङ्कल्पजोऽपि द्विधा, सापराधविषयो निरपराधविषयश्च । तत्र निरपराधविषया निवृत्तिः, सापराधे तु गुरु-लाघवचिन्तनम्, यथा गुरुरपराधो लघुर्वेति । एवं पुनरर्द्धे गते सार्द्धौ द्वौ विशोपकौ जातौ । निरपराधोऽपि द्विधा, सापेक्षो निरपेक्षश्च । तत्र निरपेक्षान्निवृत्तिर्न तु सापेक्षाद्, निरपराधेऽपि वाह्यमानमहिष-वृष-हयादौ पाठादिप्रमत्तपुत्रादौ च सापेक्षतया वध-बन्धादिकरणात्, ततः पुनरर्द्धे गते सपादो विशोपकः स्थित इति । इत्थं च देशतः प्राणिवधः श्रावकेन प्रत्याख्यातो भवति । प्राणिवधो हि त्रयश्चत्वारिंशदधिकशतद्वयविधः । यतः –

''**भूजलजलणानिलवणबितिचउपंचिदिएहिं नव जीवा ।**
**मणवयणकायगुणिया, हवंति ते सत्तवीस त्ति ॥१॥** [ **सं.प्र.श्रा.व्रता./८** ]
**इक्कासीई ते करणकारणाणुमइताडिआ होइ ।**
**ते च्चिअ तिकालगुणिआ, दुन्नि सया हुंति तेआला ॥२॥** [ **सं.प्र.श्रा.व्रता./९** ] इति ।

तेषां मध्ये त्रैकालिकिमनोवाक्कायकरणकद्वित्रिचतुष्पञ्चेन्द्रियविषयकहिंसाकरण-कारणस्यैव प्रायः प्रत्याख्यानसंभवात् । एतद्व्रतफलं चैवमाहुः –

''**जं आरुग्गमुदग्गमप्पडिहयं आणेसरत्तं फुडं,**
**रूवं अप्पडिरूवमुज्जलतरा[१] कित्ती धणं जुवण्णं ।**
**दीहं आउ अवंचणो परिअणो पुत्ता[२] सुपुत्तासया,**
**तं सव्वं सचराचरंमि वि जए नूणं दयाए फलं**'' ॥१॥ [ **सं.प्र.श्रा.व्रता./१२** ] ।

एतदनङ्गीकारे च पङ्गुता-कुणिता-कुष्ठादिमहारोद-वियोग-शोकापूर्णायुर्दुःखदौर्गत्यादि फलम् । यतः –

---

१. °मुज्जलधरा-इति सम्बोधप्रकरणे ॥ २. L.P.C.J. । पुत्ता सुपुण्णासया-मु० । पुत्ता विणीया सया-इति सम्बोधप्रकरणे ॥

**''पाणिवहे वट्टंता, भमन्ति भीमासु गब्भवसहीसुं ।**
**संसारमंडलगया, नरयतिरिक्खासु जोणीसुं''** ॥२॥ [ सं.प्र.श्रा.व्रता./१० ] ॥२५॥

इत्युक्तमहिंसाव्रतं प्रथमम् । अथ द्वितीयमणुव्रतं दर्शयति —

**द्वितीयं कन्यागोभूम्यलीकानि न्यासनिह्नवः ।**
**कूटसाक्ष्यं चेति पञ्चासत्येभ्यो विरतिर्मतम् ॥२६॥**

द्वन्द्वान्ते श्रूयमाणालीकशब्दस्य प्रत्येकं संयोजनात् **कन्यालीकम्** , **गवालीकम्** , **भूम्यलीकं** चेति, **तानि,** तथा '**न्यासनिह्नवः**' '**कूटसाक्ष्यं**' चेति '**पञ्च**' पञ्चसङ्ख्याकानि असत्यानि अर्थात् क्लिष्टाशयशतसमुत्थत्वात् स्थूलासत्यानि, तेभ्यो '**विरतिः**' विरमणं '**द्वितीयम्**' अधिकारादणुव्रतं '**मतं**' जिनैरिति शेषः ।

[१]तत्र कन्याविषयमलीकं कन्याऽलीकं —द्वेषादिभिरविषकन्यां विषकन्याम् , विषकन्यामविषकन्यां वा, सुशीलां वा दुःशीलाम् , दुःशीलां , वा सुशीलामित्यादि वदतो भवति । इदं च सर्वस्य कुमारादिद्विपदविषयस्यालीकस्योपलक्षणम् १। गवालीकम् —अल्पक्षीरां बहुक्षीरां बहुक्षीरां वाऽल्पक्षीरामित्यादि वदन्तः, इदमपि सर्वचतुष्पदविषयालीकस्योपलक्षणम् २। भूम्यलीकं —परसत्कामप्यात्मादिसत्कामात्मादिसत्कां वा परसत्काम् , ऊषरं वा क्षेत्रमनूषरम् अनूषरं वोषरमित्यादि [२]वदतः, [३]इदं चाशेषापदद्रव्यविषयालीकस्योपलक्षणम् । यदाह —

**''कण्णागहणं दुपयाण, सूअगं चउपयाण गोवयणं ।**
**अपयाणं दव्वाणं, सव्वाणं भूमिवयणं तु''** ॥१॥ [ सं.प्र.श्रा.व्रता./१८ ]

ननु यद्येवं तर्हि द्विपद-चतुष्पदा-ऽपदग्रहणं सर्वसंग्राहकं कुतो न कृतम् ? सत्यम् , कन्याद्यलीकानां लोकेऽतिगर्हिततत्वेन रूढत्वाद्विशेषेण वर्जनार्थमुपादानम् , कन्यालीकादौ च भोगान्तरायद्वेषवृद्ध्यादयो दोषाः स्फुटा एव । यत **आवश्यकचूर्णौ** —

**''मुसावाए के दोसा ? [४]अकज्जन्ते वा के गुणा ? तत्थ दोसा कण्णगं चेव अकण्णगं [५]भणंतो भोगंतरायदोसा य, दुट्ठा वा आतघातं करेज्ज, कारवेज्जा वा, एवं सेसेसु भाणिअव्वा''** [ पच्चक्खाणावश्यकसूत्रे हारिभद्र्यां वृत्तौ प० ८२१ ] इत्यादि ।

तथा न्यस्यते रक्षणायान्यस्मै समर्प्यते इति न्यासः सुवर्णादिस्तस्य निह्नवो-

---

१. तुला-योगशास्त्रवृत्तिः २।५५ प० २७६ ॥ २. L.P.C.J. । वदन्(तः)-मु० ३. इदं च शेषपादपाद्यपदद्रव्य° इति योगशास्त्रवृत्तौ प० २७७ ॥ ४. अकधन्ते-मु० L.P.C.J. आवश्यके च अकज्जंते-इति ॥ ५. भणंते भोगांतरायदोसा पदुट्ठा वा-इति आवश्यकसूत्रे पाठः ॥

ऽपलापस्तद्वचनं स्थूलमृषावादः । इदं चानेनैव विशेषेण पूर्वालीकेभ्यो भेदेनोपात्तम्, अस्य [१]चादत्तादाने(नत्वे) सत्यपि वचनस्यैव प्राधान्यविवक्षणान्मृषावादत्वम् ४। कूटसाक्ष्यं लभ्यदेयविषये प्रमाणीकृतस्य लञ्चामत्सरादिना कूटं वदतः 'यथाऽहमत्र साक्षी'ति । अस्य च परकीयपापसमर्थकत्वलक्षणविशेषमाश्रित्य पूर्वेभ्यो भेदेनोपन्यासः ५ इति ।

अत्रायं भावार्थः —मृषावादः क्रोध-मान-माया-लोभ-त्रिविधराग-द्वेष-हास्य-भय-व्रीडा-क्रीडा-रत्यरति-दाक्षिण्य-मौखर्य-विषादादिभिः सम्भवति । पीडाहेतुश्च सत्य-वादोऽपि मृषावादः, सद्भ्यो हितं सत्यमिति व्युत्पत्त्या परपीडाकरमसत्यमेव । यतः—

**''अलिअं न भासिअव्वं, अत्थि हु सच्चं पि जं न वत्तव्वं ।**
**सच्चं पि तं न सच्चं, जं परपीडाकरं वयणं''** ॥१॥ **[ सं.प्र.श्रा.व्रता./१६ ]**

स च द्विविधः, —स्थूलः सूक्ष्मश्च । तत्र परिस्थूलवस्तुविषयोऽतिदुष्टविवक्षासमुद्भवश्च स्थूलः, तद्विपरीतः सूक्ष्मः । आह हि —

**''दुविहो अ मुसावाओ, सुहुमो थूलो अ तत्थ इह सुहमो ।**
**परिहासाइप्पभवो, थूलो पुण तिव्वसंकेसा''** ॥१॥ **[ सं.प्र.श्रा.व्रता./१७ ]**

श्रावकस्य सूक्ष्ममृषावादे यतना, स्थूलस्तु परिहार्य एव । तथा **चावश्यकसूत्रम् —**

**''थूलगमुसावायं समणोवासओ पच्चक्खाइ, से अ मुसावाए पंचविहे पण्णत्ते, तं जहा —कण्णालिए १, गवालिए २, भोमालिए ३, णासावहारे ४, कुडसक्खे य ५''** **[ प्रत्याख्यानावश्यक सू० २ हारिभद्रीयवृत्तौ प० ८२० ]** इति ।

**तच्चूर्णावपि —''जेण भासिएण अप्पणो परस्स वा अतीव वाघाओ अहि-संकिलेसो अ जायते, तं अट्ठाए वा अणट्ठाए वा ण वएज्ज''** त्ति **[ आवश्यकचूर्णौ भा० २ प० २८५ ]** ।

[२]एतच्चासत्यं चतुर्द्धा —भूतनिह्नवः १ अभूतोद्भावनम् २ अर्थान्तरं ३ गर्हा च ४। तत्र भूतनिह्नवो यथा —नास्त्यात्मा नास्ति पुण्यं नास्ति पापमित्यादि १। अभूतोद्भावनं यथाऽऽत्मा श्यामाकतन्दुलमात्रोऽथवा सर्वगत आत्मेत्यादि २। अर्थान्तरं यथा —[३]गामश्वमभिवदतः ३। गर्हा तु त्रिधा, एका सावद्यव्यापारप्रवर्त्तिनी, यथा क्षेत्रं कृषेत्यादि १, द्वितीया अप्रिया काणं काणं वदतः २, तृतीया आक्रोशरूपा यथा अरे ! बान्धकिनेय इत्यादि ।

---

१. चादत्तादाने(नत्वे)-मु० । चादत्तादाने-L.P.C.J. ॥ २. तच्चा-L. । तुला-योगशास्त्रवृत्तिः २।५७, प० २७९ ॥ ३. गामश्वमभिदधतः-इति योगशास्त्रवृत्तौ २।५७ ॥

एतद्व्रतफलं-विश्वास-यशः-स्वार्थसिद्धि-प्रियाऽऽदेयाऽमोघवचनतादि । यथा —

**''सव्वा उ मंतजोगा, सिज्झंती धम्म अत्थकामा य ।**
**सच्चेण परिग्गहिआ, रोगा सोगा य नस्संति** ॥१॥ [ ]
**सच्चं जसस्स मूलं, सच्चं विस्सासकारणं परमं ।**
**सच्चं सग्गद्दारं, सच्चं सिद्धीइ सोपाणं''** ॥२॥ [ ]

एतदग्रहणेऽतिचरणे च वैपरीत्येन फलम् —

**''जं जं वच्चइ जाइं, अप्पिअवाई तहिं तहिं होइ ।**
**न सुणइ सुहे सुसद्दे, सुणइ असोअव्वए सद्दे** ॥१॥ [ सं.प्र.श्रा.व्र./२३ ]
**दुग्गंधो पूइमुहो, अणिट्ठवयणो अ फरुसवयणो अ ।**
**जलएडमूअमम्मण, अलिअवयणजंपणे दोसा**[१] ॥२॥ [ सं.प्र.श्रा.व्र./२४ ]
**इहलोए च्चिअ जीवा, जीहाछेअं वहं च बंधं वा ।**
**अयसं धणनासं वा, पावंती अलिअवयणाओ''** ॥३॥ [ सं.प्र.श्रा.व्र./२५ ] इत्यादि ॥२६॥

उक्तं द्वितीयमणुव्रतम् । अथ तृतीयं तदाह —

**परस्वग्रहणाच्चौर्यव्यपदेशनिबन्धनात् ।**
**या निवृत्तिस्तृतीयं तत्प्रोचे सार्वैरणुव्रतम् ॥२७॥**

**परस्या**न्यस्य **स्वं** द्रव्यं तस्य **ग्रहणमा**दानं तस्मात्, कीदृशात् ? '**चौर्य**' इति **चौर्यं** चोरिका तस्य **व्यपदेशो** व्यवहारस्तस्य **निबन्धनं** निमित्तं तस्मात् । येन कृतेनायं चौर इति व्यपदिश्यते इतिभावः । तस्माद् **या निवृत्ति**र्विरतिः **तत् तृतीयमणुव्रतं** '**सार्वैः**' अर्हद्भिः '**प्रोचे** प्रोक्तम् इत्यक्षरार्थः ।

भावार्थस्त्वयम् —अदत्तं चतुर्द्धा । यदाहुः —

**''सामीजीवादत्तं, तित्थयरेणं तहेव य गुरूहिं ।**
**एअमदत्तसमरूवं, परूविअं आगमधरेहिं''** ॥१॥ [ सं.प्र.श्रा.व्र./२६ ]

यद्वस्तु कनकादिकं स्वामिनाऽदत्तं तत्स्वाम्यदत्तम् १। यत्फलादि सचित्तं स्वकीयं भिनत्ति तज्जीवादत्तम् , यतस्तेन फलादिजीवेन न निजप्राणास्तस्य दत्ताः २। गृहस्थेन दत्तमाधाकर्मादिकं तीर्थकराननुज्ञातत्वात् साधोस्तीर्थकरादत्तम् । एवं श्राद्धस्य प्रासुकमनन्तकायाभक्ष्यादि तीर्थकरादत्तम् ३। सर्वदोषमुक्तमपि यद् गुरूननिमन्त्र्य भुज्यते तद् गुर्वदत्तम् ४।

---

१. दोसो-L.P.C. ॥

अत्र स्वाम्यदत्तेनाधिकारः । तच्च द्विविधम् –स्थूलं सूक्ष्मं च । तत्र [१]परिस्थूलविषयं चौरव्यपदेशकारणत्वेन निषिद्धमिति दुष्टाध्यवसायपूर्वकं स्थूलम् । चौर्यबुद्ध्या क्षेत्र-खलादावल्पस्यापि ग्रहणं स्थूलमेवादत्तादानम्, तद्विपरीतं सूक्ष्मम् । स्वामिनमननुज्ञाप्य तृणलेष्ट्वादिग्रहणरूपम् । तत्र श्राद्धस्य सूक्ष्मे यतना कर्त्तव्या, स्थूलात् तु निवृत्तिः । यतः सूत्रम् –

''**थूलगादत्तादाणं समणोवासओ पच्चक्खाइ, से अ अदत्तादाणे दुविहे पण्णत्ते, तंजहा –सचित्तादत्तादाणे अचित्तादत्तादाणे अ**'' [ **प्रत्याख्यानावश्यक सू० ३, हारि-भद्रीयवृत्तौ प० ८२२** ] त्ति ।

एतद्व्रतस्य च फलं-सर्वजनविश्वास-साधुवाद-समृद्धिवृद्धि-स्थैर्यैश्वर्य-स्वर्गादि, यदवादि –

''**खित्ते खले अरण्णे, दिआ य राओ व सत्थघाए वा ।**
**अत्थो से न विणस्सइ, अचोरिआए फलं एअं** ॥१॥ [ **सं.प्र.श्रा.व्र./३३** ]
**गामागरनगराणं, दोणमुहमडंबपट्टणाणं च ।**
**सुइरं हवंति सामी, अचोरिआए फलं एअं**'' ॥२॥ [ **सं.प्र.श्रा.व्र./३४** ]

एतद्व्रतानुपादाने [२]मालिन्योत्पादने वा दौर्भाग्यदास्याङ्गच्छेददारिद्र्यादि । उक्तमपि –

''**इह चेव खरारोहणगरिहा धिक्कार मरणपज्जंतं ।**
**दुक्खं तक्करपुरिसा, लहंति नरयं परभवंमी** ॥१॥ [ **सं.प्र.श्रा.व्र./३५** ]
**नरनाओ उव्वट्टा, केवट्टा कुंटमंटबहिरंधा ।**
**चोरिक्कवसणनिहया, हुंति नरा भवसहस्सेसुं**'' ॥२॥

[ **सं.प्र.श्रा.व्र./३६** ] इति ॥२७॥

प्रतिपादितं तृतीयमणुव्रतम् । अथ चतुर्थं तदाह –

**स्वकीयदारसन्तोषो, वर्ज्जनं वाऽन्ययोषिताम् ।**
**श्रमणोपासकानां तच्चतुर्थाणुव्रतं मतम्** ॥२८॥

**स्वकीयदाराः** स्वकलत्राणि, तैस्तेषु वा **सन्तोष**स्तन्मात्रनिष्ठा, '**वा**' अथवा '**अन्ययोषितां**' परकीयकलत्राणां '**वर्जनं**' त्यागः, अन्येषामात्मव्यतिरिक्तानां मनुष्याणां देवानां तिरश्चां च योषितः परिणीत-संगृहीतभेदभिन्नानि कलत्राणि तेषां

---

१. L.P.C. । परिस्थूर° मु० ॥ २. च मालि° C.P.L. ॥

वर्जनमित्यर्थः । यद्यप्यपरिगृहीता देव्यस्तिरश्च्यश्च काश्चित्संग्रहीतुः परिणेतुश्च कस्यचिदभावाद् वेश्याकल्पा एव भवन्ति, तथापि प्रायः परजातीयभोग्यत्वात् परदारा एव ता इति वर्जनीयाः । '**तत्**' स्वदारसन्तोषोऽन्ययोषिद्वर्जनं वा '**श्रमणोपासकानां**' श्रावकाणां सम्बन्धि '**चतुर्थाणुव्रतं**' '**मतं**' प्रतिपादितं जिनवरैरित्यन्वयः ।

इयमत्र भावना—मैथुनं द्विविधं—सूक्ष्मं स्थूलं च, तत्र कामोदयेन यदिन्द्रियाणामीषद्विकारस्तत् सूक्ष्मम्, मनोवाक्कायैरौदारिकादिस्त्रीणां यः सम्भोगस्तत् स्थूलम् । अथवा मैथुनविरतिरूपं ब्रह्मचर्यं द्विधा, सर्वतो देशतश्च । तत्र सर्वथा सर्वस्त्रीणां मनोवाक्कायैः सङ्गत्यागः सर्वतो ब्रह्मचर्यम्, [१]तच्चाष्टादशधा । यतो **योगशास्त्रे**—

"**दिव्यौदारिककामानां, कृतानुमतिकारितैः ।**
**मनोवाक्कायतस्त्यागो, ब्रह्माष्टादशधा मतम्**" ॥१॥ [ यो.शा.१/२३ ] इति ।

तदितरद्देशतः । तत्रोपासकः सर्वतोऽशक्तौ देशतस्तत्स्वदारसंतोषरूपं परदारवर्जनरूपं वा प्रतिपद्यते । तथा च सूत्रम्—

"**परदारगमणं समणोवासओ पच्चक्खाइ, सदारसंतोसं, वा पडिवज्जइ, से अ परदारगमणे दुविहे पण्णत्ते, [२]ओरालियपरदारगमणे वेउव्विअपरदारगमणे**" [ **प्रत्याख्यानावश्यके सू० ४ हारिभद्रीयवृत्तिः प० ८२३** ] त्ति

तत्र च परदारगमनप्रत्याख्याता यास्वेव परदारशब्दः प्रवर्त्तते ताभ्य एव निवर्त्तते, न तु साधारणाङ्गनादिभ्यः । स्वदारसन्तुष्टस्त्वेकानेकस्वदारव्यतिरिक्ताभ्यः सर्वाभ्य एवेति विवेकः ।

इदानीं चैतद्व्रतप्रतिपत्ति**वृद्धपरम्परया** प्रायो न सामान्यतोऽन्यचतुरणुव्रतवत् द्विविधत्रिविधेन [३]भङ्गेन दृश्यते, किन्तु विशेषतो मानुषमेकविधैकविधेन तैरश्चमेकविधत्रिविधेन दिव्यं च द्विविधत्रिविधेनेति ।

दारशब्दस्योपलक्षणत्वात् स्त्रियं प्रति स्वपतिव्यतिरिक्तसर्वपुरुषवर्जनमपि द्रष्टव्यम्, (ग्रन्थाग्रम् २०००) एतद्व्रतं च महाफलाय । यतः—

"**जो देइ [४]कणयकोडिं, अहवा कारेइ कणयजिणभवणं ।**
**तस्स न [५]तत्तं पुण्णं, जत्तिअ बंभव्वए धरिए ॥१॥ [ सं.प्र.गुरु./६९ ]**

---

१. L.P.C. । तच्चाष्टदशधा–मु० ॥ २. तं जहा ओरा०–L.P. ॥ ३. भेदेन–मु० ॥ ४. कणग° L.P. ॥ ५. तत्तिअपुण्णं–मु० ॥

**देवदाणवगंधव्वा, जक्खरक्खसकिन्नरा ।**
**बंभयारिं नमंसंति, दुक्करं जे करिंति[1] तं ॥२॥** [ उत्तरा.१६/१६ ]
**आणाईसरिअं वा, इड्ढी रज्जं च कामभोगा य ।**
**कित्ती बलं च सग्गो, आसन्ना सिद्धि बंभाओ ॥३॥** [ सं.प्र.श्रा.व्र./४२ ]
**कलिकारओ वि जणमारओ वि सावज्जजोगनिरओ वि ।**
**जं नारओ वि सिज्झइ, तं खलु सीलस्स माहप्पं" ॥४॥** [ सं.प्र.श्रा.व्र./४३ ]

गृहिणो हि स्वदारसन्तोषे ब्रह्मचारिकल्पत्वमेव । परदारगमने च वध-बन्धादयो दोषाः स्फुटा एव । उक्तमपि –

"**वहबंधणउब्बंधणनासिंदिअच्छेअधणखयाइआ ।**
**परदारओ उ बहुआ, कयत्थणाओ इहभवे वि ॥१॥** [ सं.प्र.श्रा.व्र./४४ ]
**परलोए सिंबलितिक्खकंटगालिंगणाइ बहुरूवं ।**
**नरयंमि दुह दुसहं, परदाररया लहंति नरा ॥२॥** [ सं.प्र.श्रा.व्र./४५ ]
**छिन्निंदिआ नपुंसा, दुरूवदोहग्गिणो भगंदरिणो ।**
**रंडकुरंडा वंझा, निंदुअविसकन्न हुँति दुस्सीला" ॥३॥** [ सं.प्र.श्रा.व्र./४६ ]

तथा–"**भक्खणे देवदव्वस्स, परित्थीगमणेण य ।**
**सत्तमं नरयं जंति, सत्तवाराउ गोअमा !" ॥४॥** [ ]

मैथुने च हिंसादोषोऽपि भूयानेव । यतः –

"**मेहुणसन्नारूढो, हणेइ नवलक्ख सुहुमजीवाणं**" [ सं.स./८६पू. ] इत्यादि शास्त्रान्तरादवसेयम्, तथाऽऽ**वश्यकचूर्णा**वपि दोषगुणप्रदर्शनम्, यथा –"**चउत्थे अणुव्वए सामण्णेण अणिअत्तस्स दोसा-मातरमपि गच्छेज्जा, विदितं[2] धूयाए वि समं वसेज्जा**" [ आ० चू० प० २८९ ] इत्यादि ।

"**णियत्तस्स इहलोए परलोए गुणा –इहलोए कत्थे कुलपुत्तगाणि सङ्घाणि**" इत्यादि । "**परलोए पहाणपुरिसत्तं, देवत्ते पहाणाउ अच्छराओ मणुअत्ते पहाणाओ माणुओ माणुसीओ विउला य पंचलक्खणा भोगा पिअसंपओगा य आसण्णसिद्धिगमणं च**" [ आ० चू० प० २८९ ] ॥२८॥ इत्युक्तं चतुर्थाणुव्रतम् । अथ पञ्चमं तदाह –

**परिग्रहस्य कृत्स्नस्यामितस्य परिवर्जनात् ।**
**इच्छापरिमाणकृतिं, जगदुः पञ्चमं व्रतम् ॥२९॥**

---

१. करंति–L.P. ॥ २. विदियं–मु० ॥

D:\new/d-1.pm5\3rd proof

परिगृह्यत इति **परिग्रहस्तस्य,** कीदृशस्य ? '**कृत्स्नस्य**' नवविधस्येत्यर्थः, स चायम् – धनं १ धान्यं २ क्षेत्रं ३ वास्तु ४ रूप्यं ५ सुवर्णं ६ कुप्यं ७ द्विपदः ८ चतुष्पद ९ श्चेति अतिचाराधिकारे व्याख्यास्यमानः । **श्रीभद्रबाहुस्वामिकृतदशवैकालिकनिर्युक्तौ** तु – गृहिणामर्थपरिग्रहो धान्य १ रत्न २ स्थावर ३ द्विपद ४ चतुष्पद ५ कुप्य ६ भेदात् सामान्येन षड्विधोऽपि तत्प्रभेदाश्चतुःषष्टिविधः प्रोक्तः । तथाहि –धान्यानि चतुर्विंशतिर्यथा –

"**धन्नाइँ चउव्वीसं, जव १ गोहुम २ सालि ३ वीहि ४ सट्ठी अ ५ ।**
**कुद्दव ६ अणुआ ७ कंगू ८, रालग ९ तिल १० मुग्ग ११ मासा य १२ ॥१॥**
**अयसि १३ हरिमंथ १४ तिउडय[1] १५ निप्फाव[2] १६ सिलिंद १७ रायमासा य १८ ।**
**इक्खू १९ मसूर २० तुवरी २१, कुलत्थ २२ तह धन्नय २३ कलाया २४" ॥२॥**

**[ दशवैकालिकनिर्युक्तिः २५२-३, सम्बोधप्र.श्राद्ध. ५४-५, प्रवचनसारो.१००४-५ ]**

एतानि प्रायः प्रसिद्धानि, नवरं षष्टिका शालिभेदः ५, अणवो मिणचवाख्या धान्यभेदा इति **हैमद्व्याश्रयवृत्तौ,** यद्वाऽणुका युगन्धरी इत्यपि क्वापि दृश्यते ७, अतसी प्रतीता १३, हरिमन्था कृष्णचनकाः १४, त्रिपुटको मालवकप्रसिद्धो धान्यविशेषः १५, निष्पावा वल्लाः १६, सिलिन्दा मुकुष्टाः १७, राजमाषाश्चपलकाः १८, इखुर्बरट्टिका सम्भाव्यते १९, मसूरतुवरी धान्यद्वयं मालवकादौ प्रसिद्धम् २०-२१, कलापका वृत्तचनकाः २४।

रत्नानि चतुर्विंशतिः । यथा –

"**रयणाइँ चउव्वीसं, सुवण्ण १ तउ २ तंब ३ रयय ४ लोहाई ५ ।**
**सीसग ६ हिरण्ण ७ पासाण ८, वइर ९ मणि १० मोत्तिअ ११ पवालं १२ ॥१॥**

**[ सं.प्र.श्रा.व्र./५६ ]**

"**संखो १३ तिणिसा १४ ऽगुरु १५ चंदणाणि १६ वत्थाऽमिलाणि १७ कट्ठाइं १८ ।**
**नह १९ चम्म २० दंत २१ वाला २२, गंधा २३ दव्वोसहाइं २४ च" ॥२॥**

**[ सं.प्र.श्रा.व्र./५७ ]**

प्रसिद्धान्यमूनि, नवरं रजतं रूप्यम्, हिरण्यं रूपकादि, पाषाणा विजातिरत्नानि, मणयो जात्यानि, तिनिसो वृक्षविशेषः, अमिलान्यूर्णावस्त्राणि, काष्ठानि श्रीपर्णादिफलकादीनि, चर्माणि सिंहादीनां, दन्ता गजादीनां, वालाश्चमर्यादीनाम्, द्रव्यौषधानि पिप्पलादीनि[3] ।

---

१. °उ-मु० । °ग-दशवै० निर्युक्तौ ॥ २. निप्पाव-मु० । निष्पाव-L.P.C. । दशवैकालिक-निर्युक्तौ प्रवचनसारोद्धारेऽपि-निप्फाव इति ॥ ३. पिष्पलादीनि-L.P.C. ॥

स्थावरं त्रिधा, द्विपदं च द्विधा । यथा –

"[१]**भूमी घरा य तरुगण, तिविहं पुण थावरं मुणेअव्वं ।**
**चक्कारबद्ध माणुस दुविहं पुण होइ दुपयं तु**" ॥१॥ [ द.वै.नि.२५६, **सं.प्र.श्रा.व्र.५८** ]

भूमिः क्षेत्रम्, गृहाणि प्रासादाः, तरुगणा नालिकेर्याद्यारामा इति त्रिधा स्थावरम्, चक्रारबद्धं गन्त्र्यादि, मानुषं दासादीति द्विधा द्विपदम् ।

चतुष्पदं दशधा । यथा –

"**गावी महिसी उट्टी, अयएलग आस आसतरगा य ।**
**घोडग गद्दह हत्थी, चउप्पयं होइ दसहा उ**" ॥१॥ [ द.वै.नि.२५७, **सं.प्र.श्रा.व्र.५९** ]

एते प्रतीताः, नवरमस्यां वाह्लीकादिदेशोत्पन्ना जात्या, अश्वतरा वेसराः, अजात्या घोटकाः ।

नानाविधमपि कुप्यमेकमेव । यथा –

"**णाणाविहोवगरणं, णेगविहं कुप्पलक्खणं होइ ।**
**एसो अत्थो भणिओ, छव्विह चउसट्ठिभेओ उ**" ॥१॥ [ द.वै.नि.२५८, **सं.प्र.श्रा.व्र.६०** ]

चतुःषष्टिभेदोऽप्येष नवविधपरिग्रहेऽन्तर्भवतीति न कोऽपि विरोधः ।

पुनः कीदृशस्य तस्य ? '**अमितस्य**' परिमाणरहितस्य '**परिवर्जनात्**' त्यागात् त्यागनिमित्तभूतेनेत्यर्थः । '**इच्छायाः**' अभिलाषस्य यत्**परिमाणमि**यत्ता तस्य **कृतिः** करणम्, **तां पञ्चमं 'व्रतम्**' अधिकारादणुव्रतं '**जगदुः**' ऊचुर्जिना इति सण्टङ्कः ।

इदमत्र तात्पर्यम्–परिग्रहविरतिर्द्विधा–सर्वतो देशतश्च, तत्र सर्वथा सर्वभावेषु मूर्च्छात्यागः सर्वतः, तदितरद्देशतः । तत्र श्रावकाणां सर्वतः तत्प्रतिपत्तेरशक्तौ देशतस्तामिच्छापरिमाणरूपां प्रतिपद्यते । यतः सूत्रम् –

"**अपरिमिअपरिग्गहं समणोवासओ पच्चक्खाइ, इच्छापरिमाणं उवसंपज्जइ, से अ परिग्गहे दुविहे [२]पण्णत्ते, तंजहा–सचित्तपरिग्गहे अचित्तपरिग्गहे अ**" [ **प्रत्याख्यानावश्यक सू० ५/हारिभद्रीयवृत्तिः प० ८२५** ] त्ति ।

ननु गृहे स्वल्पद्रव्येऽपि सति परिग्रहपरिमाणे तु द्रव्यसहस्रलक्षादिप्रतिपत्त्या इच्छावृद्धिसम्भवात् को नाम गुणः इति चेत् ? मैवम्, इच्छावृद्धिस्तु संसारिणां सर्वदा विद्यमानैव । यतो **नमिराजर्षि**वचनमिन्द्रं प्रति –

---

१. भूमि गिहा–इति सम्बोधप्रकरणे ॥ २. पण्णत्ते–मु० । पं० L.P.C. ॥

**''सुवण्णरूप्पस्स य पव्वया भवे, सिया हु केलाससमा असंखया ।**
**नरस्स लुद्धस्स न तेहिं किंचि, इच्छा हु आगाससमा अणंतया''** ॥१॥ [ उत्त.९/४८ ]

एवं चेच्छाया अनन्तत्वे तदियत्ताकरणं महते गुणाय । यतः –

**''जह जह अप्पो लोहो, जह जह अप्पो परिग्गहारंभो ।**
**तह तह सुहं पवट्टइ, धम्मस्स य होइ संसिद्धी''** ॥१॥ [ सं.प्र.श्रा./६१ ]

तस्मादिच्छाप्रसरं निरुध्य संतोषे यतितव्यम्, सुखस्य संतोषमूलत्वात् । यदाह –

**''आरोग्गसारिअं माणुसत्तणं सच्चसारिओ धम्मो ।**
**विज्जा निच्छयसारा, सुहाइ संतोससाराइं''** ॥१॥ [ सं.प्र.श्रा./६३ ]

तदेवमेतद्व्रतस्यात्रापि संतोष-सौख्य-लक्ष्मीस्थैर्य-जनप्रशंसादि फलम्, परत्र तु नराऽमरसमृद्धि-सिद्ध्यादि । अतिलोभाभिभूततया चैतद्व्रतस्यास्वीकृतौ विराधनायां वा दारिद्र्य-दास्य-दौर्भाग्य-दुर्गत्यादि । यतः –

**''महारंभयाए [2]महापरिग्गहाए कुणिमाहारेणं पंचिदिअवहेणं जीवा [3]नरयाउअं अज्जेई''** [ ] त्ति ।

मूर्छावान् हि उत्तरोत्तराशाकदर्थितो दुःखमेवानुभवति । यदाह –

**''उक्खणइ खणइ निहणइ, रत्तिं न सुअइ दिआ वि अ ससंको ।**
**लिंपइ [4]ठएह सययं, लंछिअपडिलंछिअं कुणइ''** ॥१॥ [ ]

परिग्रहित्वमपि मूर्छयैव, मूर्छामन्तरेण धनधान्यादेरपरिग्रहत्वात् । यदाह –

**''अपरिग्रह एव भवेद्वस्त्राभरणाद्यलङ्कृतोऽपि पुमान् ।**
**ममकारविरहितः सति, ममकारे सङ्गवान् नग्नः''** ॥१॥ [ स्त्रीमुक्ति प्र.१३ ]

तथा– **''जं पि वत्थं व पायं वा, कंबलं पायपुंछणं ।**
**तं पि संजमलज्जट्ठा, धरंति परिहरंति अ''** ॥१॥ [ द.वै.६/२० ]

**''न सो परिग्गहो वुत्तो * [5]नाणपुत्तेण ताइणा ।**
**मुच्छा परिग्गहो वुत्तो * इइ वुत्तं महेसिणा''** ॥२॥ [ द.वै.६/२१ ] इति ।

तेन मूर्छानियमनार्थं सर्वमूर्छा[6]परित्यागाशक्तस्यैतत् पञ्चममणुव्रतमुक्तम् ॥२९॥

---

१. निक्खय° मु० । निक्षय° C. ॥ २. महापरिग्गहयाए-मु० ॥ ३. नेरया० मु० ॥ ४. ठवइ-L.C. । ठवेइ-इति योगशास्त्रवृत्तौ । २।१०६ ॥ ५. * * चिह्नद्वयमध्यवर्त्ती पाठः नास्ति L.P. ॥ ६. °परि° L.P. नास्ति ॥

इत्युक्तान्यणुव्रतानि, साम्प्रतमेतेषामेवाणुव्रतानां परिपालनाय भावनाभूतानि गुण-व्रतान्यभिधीयन्ते । तानि पुनस्त्रीणि भवन्ति, तद्यथा –दिग्विरमणव्रतम् १, उपभोगपरि-भोगपरिमाणव्रतम् २, अनर्थदण्डविरमणव्रतं ३ चेति[1] । तत्राद्यगुणव्रतस्वरूपाभिधित्सयाऽऽह –

**ऊर्ध्वाधस्तिर्यगाशासु , नियमो गमनस्य यः ।**
**आद्यं गुणव्रतं प्राहुस्तद्दिग्विरमणाभिधम् ॥३०॥**

**ऊर्ध्वा** दिग् ब्राह्मी, **अधो** दिग् नागी, **तिर्यगाशा**स्तिर्यग्दिशस्ताश्च पूर्वा १, आग्नेयी २, याम्या ३, नैर्ऋती ४, वारुणी ५ वायव्या ६, कौबेरी ७, ऐशानी ८ चेत्यष्टौ । तत्र सूर्योदयोपलक्षिता पूर्वा, शेषाश्चाग्नेय्याद्यास्तदनुक्रमेण सृष्ट्या द्रष्टव्याः । **तासु** दिक्षु विषये तासां सम्बन्धिनो वा '**गमनस्य**' गतेर्यो '**नियमो**' नियमनम् , एतावत्सु पूर्वादिविभागेषु मया गमनाद्यनुष्ठेयं न परत इत्येवंस्वरूपः । तत्रोर्ध्वदिशि नियमः –एतावती दिगूर्ध्वं पर्वताद्यारोहणादवगाहनीया न परत इत्येवम्भूतः ।[2]एवमधोदिशि नियमः, एतावती दिगध इन्द्रकूपाद्यवतारणादवगाहनीया न परत इत्येवम्भूत इति । तथा तिर्यग्दिक्षु नियमः एतावती दिक् पूर्वेणावगाहनीया एतावती दक्षिणेनेत्यादि न परत इत्येवम्भूत इति भावार्थः । **तत्** '**आद्यं**' प्रथमम् , गुणायोपकारायाणुव्रतानां व्रतं गुणव्रतप्रतिपत्तिमन्तरेणाणुव्रतानां तथाविधशुद्ध्यभावात् **गुणव्रतं** '**प्राहुः**' ऊचुर्जिना इति शेषः । तत् किं नाम ? इत्याह –'**दिग्विरमणाभिधं**' दिग्विरमणमित्यभिधानं यस्य तदिति शब्दार्थः । एतद्व्रतस्वीकारेऽवगृहीतक्षेत्राद्बहिः स्थावरजङ्गमजीवाभयदानलोभाम्भोधि-नियन्त्रणादिर्महालाभो भवति । यतः –

"**फारफुल्लिंगभासुरअयगोलयसन्निहो इमो निच्चं ।**
**अविरयपावो जीवो, दहइ समंता समत्तजिए** ॥१॥ [ ]
**जइ वि अ न जाइ सव्वत्थ, कोइ देहेण माम वो एत्थं ।**
[3]**अविरइपच्चयबंधो, तहा वि निच्चो भवे तस्स**" ॥२॥ [ ]

अन्यत्रापि –

"**तत्तायगोलकप्पो, पमत्तजीवोऽणिवारिअप्पसरो ।**
**सव्वत्थ किं न कुज्जा, पावं तक्कारणाणुगओ ?**" ॥३॥ [ श्रा.प्र./२८१ ]

[4]गृहस्थो ह्यारम्भपरिग्रहपरत्वाद्यत्र यत्र याति, भुङ्क्ते, शेते, व्यापारं वा कुरुते, तत्र तत्र तप्तायोगोलक इव जीवोपमर्दं करोतीति तेषामेव हिंसादिपापस्थाननिवर्त्तकमेतत् ,

१. विरमण ३ चेति–मु० C. । विरमणव्रतं इति L.P. ॥ २. इति एव० L. ॥ ३. अविरइ-अव्वयबंधो–L.P.C.॥ ४. तुला–योगशास्त्रवृत्तिः ३।२ प० ४२६ ॥

न तु साधूनाम् , तेषां तु समितिगुप्तिप्रधानव्रतशालिनां नायं दोष इति न तेषां दिग्विरतिव्रतमित्यवसेयम् । यतो **योगशास्त्रवृत्ति**गतान्तरश्लोकाः —

**''तदेतद्यावज्जीवं वा, सद्व्रतं गृहमेधिनाम् ।**
**चतुर्मासादिनियमादथवा स्वल्पकालिकम्** ॥१॥ [ यो.शा.३/३ ]
**सदा सामायिकस्थानां, यतीनां तु यतात्मनाम् ।**
**न दिशि क्वचन स्यातां, विरत्यविरती इमे** ॥२॥ [ यो.शा.३/३ ]
**चारणानां हि गमनं, यदूर्ध्वं मेरुमूर्द्धनि ।**
**तिर्यग्रुचकशैले च, नैषां दिग्विरतिस्ततः''** ॥३॥ [ यो.शा.३/३ ] ॥३०॥

इति प्रतिपादितं प्रथमं गुणव्रतम् । अथ द्वितीयं तदाह —

**भोगोपभोगयोः सङ्ख्याविधानं यत्स्वशक्तितः ।**
**भोगोपभोगमानाख्यं, तद् द्वितीयं गुणव्रतम्** ॥३१॥

सकृद्भुज्यत इति भोगः, अन्न-माल्य-ताम्बूल-विलेपनोद्वर्त्तन-स्नान-पानादि[१] । मुहूर्मुहूर्भुज्यत इति उपभोगः वनितावस्त्रा-ऽलङ्कार-गृह-शयना-ऽऽसन-वाहनादि । यतः —

**''सइ भुज्जइ त्ति भोगो, सो पुण आहारपुप्फमाईअ[२] ।**
**उवभोगो उ पुणो पुण, उवभुज्जइ भवणवणिआइ''** ॥१॥ [ ] त्ति ।

भोगश्चोपभोगश्च भोगोपभोगौ तयो**र्भोगोपभोगयोर्यत्** '**सङ्ख्याविधानं**' परिमाणकरणं भवति, कुतः ? '**स्वशक्तितः**' निजशक्त्यनुसारेण '**तद्**' **भोगोपभोगमानाख्यं**' भोगोपभोगपरिमाणनामकं '**द्वितीयं**' '**गुणव्रतं**' ज्ञेयम् । **आवश्यके** त्वेतद्व्रतस्योपभोगपरिभोगव्रतमितिनामोच्यते । तथा च सूत्रम् —

**''उवभोगपरिभोगवए दुविहे पण्णत्तो, तंजहा-भोअणतो कम्मओ अ''** ।

**[ प्रत्याख्यानावश्यके सू० ७ हारिभद्रीयवृत्तिः प० ८२८ ]** त्ति ।

एतद्वृत्तिर्यथा —उपभुज्यत इत्युपभोगः, उपशब्दः सकृदर्थे वर्त्तते, सकृद्भोग उपभोगः, अशनपानादे[३]ः, अथवाऽन्तर्भोग उपभोगः आहारादे[४]ः, उपशब्दोऽत्रान्तर्वचनः । परिभुज्यते इति परिभोगः परिशब्दो[५]ऽसकृद्वृत्तौ वर्त्तते, पुनः पुनर्भोगः परिभोगो वस्त्रादेः, बहिर्भोगो वा परिवसनालङ्कारादेः अत्र परिशब्दो बहिर्वाचक इति । एतद्विषयं व्रतम् उपभोगपरिभोगव्रतम्' ।

**[ तुला-आवश्यकहारिभद्रीयवृत्तिः प० ८२८A ]**

---

१. °पानादि, पुनः पुनर्भुज्यत मु० । °पानादिसुर्भूज्यत-C. । २. °ओ-मु० ॥ ३-४. °दि-इति आवश्यकहारिभद्र्यां पाठः । ५. परिशब्दोऽत्रावृत्तौ-इति आवश्यकहारिभद्र्यां पाठः ॥

तथा च प्रकृते निपातानामनेकार्थत्वात् उपभोगशब्दः परिभोगार्थस्तत्समभिव्याहारेण च भोगशब्दस्योपभोगे निरूढलक्षणेति न कश्चिद्विरोध इति ध्येयम् । इदं च द्विविधम् – भोजनतः कर्मतश्च । उपभोग-परिभोगयोरासेवाविषययोर्वस्तुविशेषयोस्तदुपार्जनोपाय-भूतकर्मणां चोपचारादुपभोगादिशब्दवाच्यानां व्रतमुपभोगपरिभोगव्रतमिति व्युत्पत्तेः । तत्र भोजनत उत्सर्गेण निरवद्याहारभोजिना भवितव्यम्, कर्मतोऽपि प्रायो निरवद्यकर्मा-नुष्ठानयुक्तेनेति ।

अत्रेयं भावना – श्रावकेण हि तावदुत्सर्गतः प्रासुकैषणीयाहारभोजिना भाव्यम्, तस्मिन्नसति सचित्तपरिहारः कार्यः, तस्याप्यशक्तौ बहुसावद्यान्मद्याऽऽमिषाऽनन्त-कायादीन् वर्जयता प्रत्येक-मिश्र-सचित्तादीनां प्रमाणं कार्यम् । भणितं च –

**''निरवज्जाहारेणं १, निज्जीवेणं २ परित्तमीसेणं ३ ।**
**अत्ताणुसंधणपरा, सुसावगा एरिसा हुंति''** ॥२॥ [ सं.प्र.श्रा./७० ]

एवमुत्सवादिविशेषं विनाऽत्यन्तचेतोगृद्ध्युन्मादजनापवादादिजनकमत्युद्भटवेषवाहना-लङ्कारादिकमपि श्रावको वर्ज्जयेत् । यतः –

**''अइरोसो अइतोसो, अइहासो दुज्जणेहिं संवासो ।**
**अइउब्भडो अ वेसो, पञ्च वि गुरुअं पि लहुअं ति''** ॥१॥ [ ]

अतिमलिनातिस्थूलह्रस्वसच्छिद्रवस्त्रादिसामान्यवेषपरिधानेऽपि कुचेलत्व-कार्पण्या-दिजनापवादोपहसनीयतादि स्याद्, अतः स्ववित्त-वयो-ऽवस्था-निवास-स्थान-कुलाद्यनुरूपं वेषं कुर्यात् । उचितवेषादावपि प्रमाणनैयत्यं कार्यम् । एवं दन्तकाष्ठा-ऽभ्यङ्गतैलोद्वर्त्तन-मज्जन-वस्त्र-विलेपना-ऽऽभरण-पुष्प-फल-धूपा-ऽऽसन-शयन-भवनादेः, तथौदन-सूप-स्नेह-शाक-पेया-खण्ड-खाद्याद्यशन-पान-खादिम-स्वादिमा-देस्त्यक्तुमशक्यस्य व्यक्त्या प्रमाणं कार्यम्, शेषं च त्याज्यम्, **आनन्दादि**सुश्रावकवत् ।

कर्मतोऽपि श्रावकेण मुख्यतो निरवद्यकर्मप्रवृत्तिमता भवितव्यम्, तदशक्तावप्य-त्यन्तसावद्यविवेकिजननिन्द्यक्रयविक्रयादि कर्म वर्जनीयम्, शेषकर्मणामपि प्रमाणं करणीयम् । यतः –

**''रंधणखंडणपीसणदलणं पयणं च एवमाईणं ।**
**निच्चपरिमाणकरणं, अविरइबंधो जओ गरुओ''** ॥१॥ [ सं.प्र.श्रा./७१ ]

**आवश्यकचूर्णा**वप्युक्तम् – **''इह चेयं सामाचारी-भोअणओ सावगो उस्सग्गेण फासुगं आहारं आहारेज्जा, तस्सासति अफासुगमपि सचित्तवज्जं, तस्स असति अणंत-**

**कायबहुबीयगाणि परिहरिअव्वाणि, इमं च अण्णं भोअणओ परिहर-असणे अणंत-कायं अल्लग-मूलगाइ मंसं च, पाणे मंसरसगमज्जाइ, खादिमे उदुंबरकाउंबरवडपि-प्पलपिलुंखुमादि, सादिमे मधुमादि, अचित्तं च आहारेअव्वं । जदा किर ण होज्ज अचित्तो तो उस्सग्गेण भत्तं पच्चक्खाइं, ण तरइ ताहे अपवाएण सच्चित्तं अणंतकाय-बहुबीअगवज्जं । कम्मओ वि अकम्मा ण तरइ जीविउं ताहे अच्चंतसावज्जाणि [1]परिहरिज्जंति''** [ **प्रत्याख्यानावश्यकचूर्णौ प० २९५** ] त्ति ।

इत्थं [2]चेदं भोगपभोगव्रतं भोक्तुं योग्येषु परिमाणकरणेन भवति, इतरेषु तु वर्जनेनेति पर्यवासितमिति च ॥३१॥

श्लोकत्रयेण वर्ज्जनीयानाह —

**चतुर्विकृतयो निन्द्या, उदुम्बरकपञ्चकम् ।**
**हिमं विषं च करका, मृज्जाती रात्रिभोजनम् ॥३२॥**
**बहुबीजाऽज्ञातफले, सन्धानानन्तकायिके ।**
**वृन्ताकं चलितरसं, तुच्छं पुष्पफलादि च ॥३३॥**
**आमगोरससंपृक्तद्विदलं चेति वर्ज्जयेत् ।**
**द्वाविंशतिमभक्ष्याणि, जैनधर्माधिवासितः ॥३४॥ त्रिभिर्विशेषकम् ॥**

**जैनधर्मेणा**र्हद्धर्मेणा**ऽधिवासितो** भावितात्मा पुमान् '**द्वाविंशतिं**' द्वाविंशति-सङ्ख्याकानि '**अभक्ष्याणि**' भोक्तुमनर्हाणि '**वर्जयेत्**' त्यजेदिति तृतीयश्लोकान्तेन सम्बन्धः तानेवाह —'**चतुर्विकृतय**' इतिचतुरवयवा विकृतयश्चतुर्विकृतयः, शाकपार्थिवादित्वात् समासः । कीदृश्यस्ताः ? '**निन्द्याः**' सकलशिष्टजननिन्दाविषया मद्य-मांस-मधु-नवनीतलक्षणा इत्यर्थः । तद्वर्णानेकजीवमूर्च्छनात् । तथा चाहुः —

**''मज्जे महुंमि मंसंमि, नवनीए चउत्थए ।**
**उप्पज्जंति चयंति अ, तव्वण्णा तत्थ जंतुणो''** ॥१॥ [ **सं.प्र.श्रा./७६** ]

परेऽपि- **''मद्ये मांसे मधुनि च, नवनीते चतुर्थके ।**
**उत्पद्यन्ते विलीयन्ते, सुसूक्ष्मा जन्तुराशयः''** ॥१॥ [ ] इति ।

तत्र मद्यं मदिरा, तच्च द्विधा-काष्ठनिष्पन्नं पिष्टनिष्पन्नं चेति । एतच्च बहुदोषा-श्रयान्महानर्थहेतुत्वाच्च त्याज्यम् । यदाह —

---

१. L.P.C. । परिहरिज्जति त्ति-मु० ॥ २. तुला-योगशास्त्रवृत्तिः ३/६ प० ४२९ ॥

"गुरुमोह-कलह-निद्दा[1]-परिभव-उवहास-रोसमयहेऊ ।
मज्जं दुग्गइमूलं, हिरि-सिरि-मइ-धम्मनासकरं" ॥१॥ [ सं.प्र.श्रा./७३ ]

तथा–"रसोद्भवाश्च भूयांसो, भवन्ति किल जन्तवः ।
तस्मान्मद्यं न पातव्यं, हिंसापातकभीरुणा ॥२॥ [ यो.शा.वृ.३/१७ ]
दत्तं न दत्तमात्तं च, नात्तं कृतं च नो कृतम् ।
मृषोद्यराज्यादिव हा, स्वैरं वदति मद्यपः ॥३॥ [ यो.शा.वृ.३/१७ ]
गृहे बहिर्वा मार्गे वा, परद्रव्याणि मूढधीः ।
वधबन्धादिनिर्भीको, गृह्णात्याच्छिद्य मद्यपः ॥४॥ [ यो.शा.वृ.३/१७ ]
बालिकां युवतिं वृद्धां, ब्राह्मणीं श्वपचीमपि ।
भुङ्क्ते परस्त्रियं सद्यो, मद्योन्मादकदर्थितः ॥५॥ [ यो.शा.वृ.३/१७ ]
विवेकः संयमो ज्ञानं, सत्यं शौचं दया क्षमा ।
मद्यात् प्रलीयते सर्वं, तृण्या वह्निकणादपि ॥६॥ [ यो.शा.वृ.३/१७ ]
श्रूयते किल शाम्बेन, मद्यादन्धकविष्णुना[3] ।
हतं वृष्णिकुलं सर्वं, प्लोषिता च पुरी पितुः" ॥७॥ [ यो.शा./आं.२५३ ] १।

मांसं[4] त्रेधा–जलचर-स्थलचर-खेचरजन्तूद्भवभेदाच्चर्म-रुधिर-मांसभेदाद्वा, तद्भक्षणमपि महापापमूलत्वाद्वर्ज्यम् । यदाहुः –

"पंचिदिअवहभूअं, मंसं दुग्गंधमसुइबीभच्छं ।
रक्खपरितुलिअ[5]भक्खगमामयजणयं कुगइमूलं ॥१॥ [ सं.प्र.श्रा.व्र./७४ ]
आमासु अ पक्कासु अ, विपच्चमाणासु मंसपेसीसुं ।
सययं चिअ उववाओ, भणिओ अ निगोअजीवाणं" ॥२॥ [ सं.प्र.श्रा.व्र./७५ ]

**योगशास्त्रे**ऽपि –

"सद्यःसंमूर्च्छितानन्तजन्तुसन्तानदूषितम् ।
नरकाध्वनि पाथेयं, कोऽश्नीयात् पिशितं सुधीः ?" ॥३॥ [ यो.शा.३/३३ ]

"सद्यो जन्तुविशसनकाल एव 'संमूर्च्छिता' उत्पन्ना 'अनन्ता' निगोदरूपा ये जन्तवस्तेषां 'संतानः' पुनः पुनर्भवनं तेन दूषितमिति" तद्वृत्तिः [ प.४४५ ]

मांसभक्षकस्य च घातकत्वमेव । यतः –

---

१. °निंदा° मु० ॥ २. L.P. । हरि° मु० C. ॥ ३. मद्यादन्धकवृष्णिना–मु० । L.P.C. । योगशास्त्रवृत्तावपि–मद्यादन्धम्भविष्णुना–इति ॥ ४. तुला–श्राद्धप्रतिक्रमणवृत्तिः गा० २० प० ११५ ॥ ५. रक्खपरिच्चलिअ–इति सम्बोधप्रकरणे पाठः ॥

**"हन्ता पलस्य विक्रेता, संस्कर्ता भक्षकस्तथा ।**
**क्रेताऽनुमन्ता दाता च, घातका एव यन्मनुः"** ॥४॥ [ यो.शा.३/२० ]

तथा भक्षकस्यैवान्यपरिहारेण वधकत्वम् । यथा —

**"ये भक्षयन्त्यन्यपलं, स्वकीयपलपुष्टये ।**
**त एव घातका यन्न, वधको भक्षकं विना"** ॥१॥ [ यो.शा.३/२३ ] इति २।

मधु च माक्षिकं १ कौत्तिकं[1] २ भ्रामरं ३ चेति त्रिधा । इदमपि बहुप्राणिविनाशसमुद्भवमिति हेयम् । यतः —

**"अनेकजन्तुसङ्घातनिघातनसमुद्भवम् ।**
**जुगुप्सनीयं लालावत् कः स्वादयति माक्षिकम् ?"** ॥ [ यो.शा.३/३६ ] इति ३।

नवनीतमपि गोमहिष्यजाऽविसम्बन्धेन चतुर्द्धा, तदपि सूक्ष्मजन्तुराशिखानित्वात् त्याज्यमेव । यतः —

**"अन्तर्मुहूर्त्तात् परतः, सुसूक्ष्मा जन्तुराशयः ।**
**यत्र मूर्छन्ति तन्नाऽद्यं, नवनीतं विवेकिभिः"** ॥१॥ [ यो.शा.३/३४ ] इति ४।

तथा **उदुम्बरकेनो**पलक्षितं **पञ्चकं** वट १ पिप्पलो २ दुम्बर ३ प्लक्ष ४ काकोदुम्बरी ५ फललक्षणं उदुम्बरकपञ्चकम्, मशकाकारसूक्ष्मबहुजीवनिचितत्वाद् वर्जनीयम् । यतो **योगशास्त्रे —**

**"उदुम्बरवटप्लक्षकाकोदुम्बरशाखिनाम् ।**
**पिप्पलस्य च नाश्नीयात् फलं कृमिकुलाकुलम्"** ॥१॥ [ यो.शा.३/४२ ]

**लोके**ऽपि —

**"कोऽपि क्वापि कुतोऽपि कस्यचिदहो चेतस्यकस्माज्जनः,**
**केनापि प्रविशत्युदुम्बरफलप्राणिक्रमेण क्षणात् ।**
**येनास्मिन्नपि पाटिते विघटिते विस्फोटिते त्रोटिते,**
**निष्पिष्टे परिगालिते[2] विदलिते निर्यात्यसौ वा न वा"** ॥१॥ [ ] ९।

तथा **'हिमं'** तुहिनं तदप्यसङ्ख्येयाप्कायरूपत्वात् त्याज्यम् १०।

**'विषम्'** अहिफेनादि[3]मन्त्रोपहतवीर्यमप्युदरान्तर्वर्त्तिगण्डोलकादिजीवघातहेतुत्वान्मरणसमये महामोहोत्पादकत्वाच्च हेयम् ११।

**'करका'** द्रवीभूता आपः असङ्ख्याप्कायिकत्वात् वर्ज्याः । नन्वेवमसङ्ख्याप्काय-

---

१. L.P.C. । कौन्तिकं-मु० ॥ २. परिगालिते (च गलिते) मु० C. । L.P. प्रत्योः योगशास्त्रवृत्तावपि [३/४२] विदलिते-इति ॥ ३. तुला-प्रवचनसारोद्धारवृत्तिः गा० २४५ प० १५३ ॥

मत्वेनाभक्ष्यत्वे जलस्याप्यभक्ष्यत्वापत्तिः, इति चेत् ? सत्यम् , असङ्ख्यजीवमयत्वेऽपि जलमन्तरा निर्वाहाभावान्न तस्य तथोक्तिः १२।

तथा '**मृज्जातिः**' सर्वापि मृत्तिका दर्दुरादिपञ्चेन्द्रियप्राण्युत्पत्तिनिमित्तत्वादिना मरणाद्यनर्थकारित्वात् त्याज्या । जातिग्रहणं खटिकादिसूचकम् , तद्भक्षणस्याऽऽमाश्रयादिदोषजनकत्वात् । मृद्ग्रहणं चोपलक्षणम् , तेन सुधाद्यपि वर्जनीयम् , तद्भक्षकस्यान्त्रशाटाद्यनर्थसम्भवात् । मृद्भक्षणे चासङ्ख्येयपृथिवीकायविराधनाद्यपि । लवणमप्यसङ्ख्यपृथिवीकायात्मकमिति सचित्तं त्याज्यम् , प्रासुकं ग्राह्यम् , प्रासुकत्वं चाग्न्यादिप्रबलशस्त्रयोगेनैव, नान्यथा । तत्र पृथिवीकायजीवानामसङ्ख्येयत्वेनात्यन्तसूक्ष्मत्वात् । तथा च **पञ्चमाङ्गे १९ शतकतृतीयोद्देशके** निर्दिष्टोऽयमर्थः –

''**वज्रमय्यां शिलायां स्वल्पपृथिवीकायस्य वज्रलोष्टकेनैकविंशतिवारान् पेषणे [1]सन्त्येके केचन जीवा ये स्पृष्टा अपि नेति**'' [ भ.श.१९/उ.३ ] १३।

तथा रात्रौ–नक्तं भोजनं–भुक्तिः **रात्रिभोजनम्** , तदपि हेयम् , बहुविधजीवसम्पातसम्भवेनैहिक–पारलौकिकानेकदोषदुष्टत्वात् । यदभिहितम् –

''**मेहं [2]पिवीलिआउ, हणंति वमणं च मच्छिआ कुणइ ।**
**जूआ जलोदरत्तं, कोलिअओ कोट्ठरोगं च** ॥१॥ [ सं.प्र.श्रा./८० ]

''**[3]वालो सरस्स भंगं, कंटो लग्गइ गलंमि दारुं च ।**
**तालुंमि विंधइ अली, वंजणमज्झंमि भुज्जंतो**'' ॥२॥ [ सं.प्र.श्रा./८१ ]

[4]व्यञ्जनमिह वार्त्ताकशाकरूपमभिप्रेतं, तद्वृन्तं च वृश्चिकाकारमेव स्यादिति वृश्चिकस्यासूक्ष्मस्यापि तन्मध्यपतितस्यालक्ष्यत्वाद्भोज्यता सम्भवतीतिविशेषः । **निशीथचूर्णावपि** –

''**गिहकोइलअवयवसम्मिस्सेण भुत्तेण पोट्टे किल गिहकोइला संमुच्छंति**'' ।

एवं सर्पादिलाला–मल–मूत्रादिपाताद्यपि । तथा –

''**मालिंति महिअलं जामिणिसु रयणीअरा [5]य [ स ]मंतेणं ।**
**तेवि च्छलंति हु फुडं, रयणीए भुंजमाणं तु**'' ॥१॥ [ सं.प्र.श्रा./८२ ]

---

१. सत्येके (सन्त्येके) मु० C. । भगवतीसूत्रवृत्तौ L.P. प्रत्योश्च सन्त्येके–इति पाठः ॥ २. पिप्पीलिआओ–L.P. ॥ ३. वाला–L.P.C. ॥ ४. तुला–योगशास्त्रवृत्तिः ३/५० प० ४५६ ॥ ५. य (भ)मंतेणं–मु० । समंतेणं–इति सम्बोधप्रकरणे । य मंतेणं–L.P.C. ॥

[१]अपि च—निशाभोजने क्रियमाणे अवश्यं पाकः सम्भवी । तत्र षड्जीवनिकायवधोऽवश्यम्भावी । भाजनधावनादौ च जलगतजन्तुनाशः, [२]जलोज्झनेन भूमिगतकुन्थुपिपीलिकादिजन्तुघातश्च भवति । तत्प्राणिरक्षणकाङ्क्षयापि निशाभोजनं न कर्त्तव्यम् । यदाहुः —

**''जीवाण कुंथुमाईण, घायणं भाणधोअणाईसुं ।**
**एमाइ रयणिभोयणदोसे को साहिउं तरइ ?''** ॥ [ सं.प्र.श्रा./८३ ]

यद्यपि च सिद्धमोदकादिखर्जूरद्राक्षादिभक्षणे नास्त्यन्नपाको, न च भाजनधावनादिसम्भवः, तथापि कुन्थुपनकादिधातसम्भवात् तस्यापि त्याग एव युक्तः । यदुक्तं **निशीथभाष्ये** —

**''जइ वि हु फासुगदव्वं, कुंथू पणगा तहा वि दुप्पस्सा ।**
**पच्चक्खणाणिणोऽवि हु , राईभत्तं परिहरंति** ॥१॥ [ नि.भा./३३९९ ]
**जइ वि हु पिवीलिगाई, दीसंति पईवमाईउज्जोए ।**
**तह वि खलु अणाइन्नं, मूलवयविराहणाजणणं[३]''** ॥२॥ [ नि.भा./३४०० ]

एतत्फलं च —

**''उलूककाकमार्जारगृध्रशम्बरशूकराः ।**
**अहिवृश्चिकगोधाश्च, जायन्ते रात्रिभोजनात्''** ॥१॥ [ यो.शा.३/६७ ]

परेऽपि पठन्ति —

**''मृते स्वजनमात्रेऽपि, सूतकं जायते किल ।**
**अस्तं गते दिवानाथे, भोजनं क्रियते कथम् ?** ॥१॥ [ ]
**रक्तीभवन्ति तोयानि, अन्नानि पिशितानि च ।**
**रात्रौ भोजनसक्तस्य, ग्रासे तन्मांसभक्षणम्''** ॥२॥ [ ]

**स्कन्दपुराणे रुद्रप्रणीतकपालमोचनस्तोत्रे** सूर्यस्तुतिरूपेऽपि —

**''एकभक्ताशनान्नित्यमग्निहोत्रफलं लभेत्[४] ।**
**अनस्तभोजनो नित्यं, तीर्थयात्राफलं भजेत्[५]''** ॥१॥ [ स्क.पु. ]

तथा–**''नैवाहुतिर्न च स्नानं, न श्राद्धं देवतार्चनम् ।**
**दानं वा विहितं रात्रौ, भोजनं तु विशेषतः''** ॥२॥ [ यो.शा.३/५६ ]

---

१. तुला–योगशास्त्रवृत्तिः प० ४५६ ॥ २. जलोज्झने–इति योगशास्त्रवृत्तौ ॥ ३. °हणा जणं–P.L. । °हणा जेण–इति योगशास्त्रवृत्तौ प० ४५८ ॥ ४. भवेत्–P.L. ॥ ५. लभेत्–मु० । L.P.C. प्रतिषु श्राद्धप्रतिक्रमणवृत्तावपि [प० ११६] भजेत्–इति ॥

**आयुर्वेदे**ऽपि –

''**हृन्नाभिपद्मसङ्कोचश्चण्डरोचिरपायतः ।**

**अतो नक्तं न भोक्तव्यं, सूक्ष्मजीवादनादपि**'' ॥३॥ [ यो.शा.३/६० ]

तस्माद्विवेकिना रात्रौ चतुर्विधोऽप्याहारः परिहार्यः, तदशक्तौ त्वशनं खादिमं च त्याज्यमेव । स्वादिमं पूगीफलाद्यपि दिवा सम्यक् शोधनादियतनयैव गृह्णात्यन्यथा त्रसहिंसादयोऽपि दोषाः । मुख्यवृत्त्या च प्रातः सायं च रात्रिप्रत्यासन्नत्वाद् द्वे द्वे घटिके भोजनं त्यजेद् । यतो **योगशास्त्रे** –

''**अह्नो मुखेऽवसाने च, यो द्वे द्वे घटिके त्यजन् ।**

**निशाभोजनदोषज्ञोऽश्नात्यसौ पुण्यभाजनम्**'' ॥१॥ [ यो.शा.३/६३ ]

अत एवागमे सर्वजघन्यं प्रत्याख्यानं मुहूर्त्तप्रमाणं नमस्कारसहितमुच्यते, जातु तत्तत्कार्यव्यग्रत्वादिना तथा न शक्नोति । तदापि सूर्योदयास्तनिर्णयमपेक्षत एवाऽऽतप-दर्शनादिना, अन्यथा रात्रिभोजनदोषः । अन्धकारभवनेऽपि व्रीडया प्रदीपाकरणादिना त्रसादिहिंसानियमभङ्गमायामृषावादादयोऽधिकदोषा अपि । यतः –

''**न करेमि त्ति भणित्ता, तं चेव निसेवए पुणो पावं ।**

**पच्चक्खमुसावाई, मायानियडीपसंगो अ** ॥१॥ [ उप.मा./५०७ ]

**पावं काऊण सयं[1], अप्पाणं सुद्धमेव वाहरइ ।**

**दुगुणं करेइ पावं, बीअं बालस्स मंदत्तं**'' ॥२॥ [ ] १४।

तथा '**बहुबीज**' इति **बहुबीजं** च **अज्ञातफलं** चेति द्वन्द्वः, तत्र बहूनि बीजानि वर्तन्ते यस्मिन् तत् बहुबीजं, पम्पोटकादिकमभ्यन्तरे [2]पुटादिरहितकेवलबीजमयं, तच्च प्रतीबीजं जीवोपमर्दसम्भवाद् वर्जनीयं, [3]यच्चाभ्यन्तरपुटादिसहितबीजमयं [4]दाडिमटिण्डुरादि [5]तन्ना-भक्ष(क्ष्य)तया व्यवहरन्ति १५। अज्ञातं च तत्फलं चेति कर्मधारयः, अज्ञातफलं स्वयं परेण वा यद् न ज्ञातं फलमुपलक्षणत्वात् पत्रं तदभक्ष्यं, निषिद्धफले विषफले[6] वा अज्ञानात् प्रवृत्तिसम्भवात्, अज्ञानतो हि प्रतिषिद्धे फले प्रवर्तमानस्य व्रतभङ्गः, विषमयफले तु

---

१. सं.-L.P.C. । सयं-श्राद्धप्रतिक्रमणवृत्तौ [प० ११६] ॥ २. °भ्यन्तरे पु(प)टादि° मु० । भ्यन्तरपुटादि° इति श्राद्धप्रतिक्रमणवृत्तौ [प० ११८] L.P.C. च ॥ ३. यच्चाभ्यन्तरपटादि° मु० C.P. ॥ ४. दाडिमटिण्टुरादि-L. । दाडिमटिन्दुरादि-इति श्राद्धप्रतिक्रमणवृत्तौ प० ११८ ॥ ५. तन्नाभक्षतया- L.P.C. । तन्नाभक्ष्यतया-इति श्राद्धप्रतिक्रमणवृत्तौ प० ११८ ॥ ६. विषमफले- L.P.C. ॥

जीवितविनाशः १६। तथा **सन्धानं चानन्तकायिकं** चेति द्वन्द्वः, अत्र सन्धानं निम्बुक-बिल्वकादीनाम् अनेकसंसक्तिनिमित्तत्वाद् वर्ज्यं, सन्धानस्य च व्यवहारवृत्त्या दिनत्रयात् परतोऽभक्ष्यत्वमाचक्षते, **योगशास्त्रवृत्ता**वपि **—"सन्धानमाम्रफलादीनां यदि संसक्तं भवेत् तदा जिनधर्मपरायणः कृपालुत्वात् त्यजेत्"** [ ३/७२, प० ४६७ ] इति १७।

अनन्ताः कायिका जीवा यत्र तत् अनन्तकायिकम् अनन्तजन्तुसन्ताननिपातननिमित्त-त्वात् वर्ज्यम् । यतः —

**"नृभ्यो नैरयिकाः सुराश्च निखिलाः पञ्चाक्षतिर्यग्गणो,**
**द्व्यक्षाद्या ज्वलनो यथोत्तरममी सङ्ख्यातिगा भाषिताः ।**
**तेभ्यो भूजलवायवः समधिकाः प्रोक्ता यथानुक्रमं,**
**सर्वेभ्यः शिवगा अनन्तगुणितास्तेभ्योऽप्यनन्तांशगाः"** ॥१॥ [ ]

तानि आर्यदेशप्रसिद्धानि द्वात्रिंशत् । तदाहुः —

**"सव्वा य कंदजाई १ सूरणकंदो अ वज्जकंदो २ अ ।**
**अल्लहलिद्दा य ३ तहा, अल्लं ४ तह अल्लकच्चूरो ५ ॥१॥**
**सत्तावरी ६ विराली ७, कुँआरि ८ तह थोहरी ९ गलोई अ १० ।**
**लसुणं ११ वंसकरिल्ला १२, गज्जर १३ लूणो अ १४ तह लोढा १५ ॥२॥**
**गिरिकण्णि १६ किसलिपत्ता[1] १७, खरिंसुआ १८ थेग १९ अल्लमुत्था य २० ।**
**तह लूणरुक्खछल्ली २१, खिल्लहडो[2] २२ अमयवल्ली अ २३ ॥३॥**
**मूला २४ तह भूमिरुहा २५, विरुआ २६ तह [3]ढक्कवत्थुलो पढमो २७ ।**
**सूअरवल्लो अ २८ तहा, पल्लंको २९ कोमलंबिलिआ ३० ॥४॥**
**आलू ३१ तह पिंडालू ३२, हवंति एए अणंतनामेणं ।**
**अन्नमणंतं नेअं, लक्खणजुत्तीइ समयाओ"** ॥५॥

**[ सम्बोधप्र.श्रा. ९०-९४/प्र.सा. २३६-२४० ]**

व्याख्या —[4]सर्वैव कन्दजातिरनन्तकायिका इति सम्बन्धः, कन्दो नाम भूमध्यगो वृक्षावयवः, ते चात्र कन्दा अशुष्का एव ग्राह्याः, शुष्काणां तु निर्जीवत्वादनन्तकायिकत्वं

---

१. किसलपत्ता-इति सम्बोधप्रकरणे प्रवचनसारोद्धारे च ॥ २. खिलुहडो-L.P. । खिल्लुहडो-इति सम्बोधप्रकरणे । खेल्लुड्डो-इति प्रवचनसारोद्धारे ॥ ३. ढक्क(ढंक)वत्थूलो-मु० । ढक्कवत्थुलो-L.P.C. प्रवचनसारोद्धारेऽपि । टक्कवत्थुलो-इति श्राद्धप्रतिक्रमणवृत्तौ प० ११९ । ढंकवत्थुलो-इति सम्बोधप्रकरणे ॥ ४. तुला-प्रवचनसारोद्धारवृत्तिः प० १५० ॥

न सम्भवति, **श्रीहेमसूरिरप्येवमेव –''आर्द्रः कन्दः समग्रोऽपि'' [ योगशास्त्रे ३/४४ ]** **''आर्द्रोऽशुष्कः कन्दः[1], शुष्कस्य तु निर्जीवत्वादनन्तकायत्वं न सम्भवतीतियोगशास्त्रसूत्र-वृत्त्योराह'' [ यो.शा.वृ.३/४४ ]**

अथ तानेव कांश्चित् कन्दान् व्याप्रियमाणत्वान्नामत आह –सूरणकन्दः अर्शोघ्नः कन्दविशेषः १। वज्रकन्दोऽपि कन्दविशेष एव २। आर्द्राऽशुष्का हरिद्रा प्रतीतैव ३। आर्द्रकं शृङ्गबेरम् ४। आर्द्रकच्चूर[2]स्तिक्तद्रव्यविशेषः प्रतीत एव ५। शतावरी ६। विरालिके[3] वल्लीभेदौ ७। कुमारी मांसलप्रणालाकारपत्रा प्रतीतैव ८। थोहरी स्नुहीतरुः ९। गडूची वल्लीविशेषः प्रतीत एव १०। लशुनः कन्दविशेषः ११। वंशकर(रि)ल्लानि[4] कोमलाभिनव[5]वंशावयवविशेषाः प्रसिद्धा एव १२। गर्जरकाणि सर्वजनविदितान्येव १३। लवणको वनस्पतिविशेषो, येन दग्धेन सर्ज्जिका निष्पद्यते १४। लोढकः पद्मिनीकन्दः १५। गिरिकर्णिका वल्लीविशेषः १६। किसलयरूपाणि पत्राणि प्रौढपत्रादर्वाक् बीजस्योच्छूनावस्थालक्षणानि सर्वाण्यप्यनन्तकायिकानि, न तु कानिचिदेव १७। खरिंशुकाः कन्दभेदाः १८। थेगोऽपि कन्दविशेष एव १९। आर्द्रा मुस्ता प्रतीता २०। लवणापरपर्यायस्य भ्रमरनाम्नो वृक्षस्य छविस्त्वक् न त्वन्येऽवयवाः २१। खिल्लहडो लोकप्रसिद्धः कन्दः २२। अमृतवल्ली वल्लीविशेषः २३। मूलको लोकप्रतीतः २४। भूमिरुहाणि छत्रकाणि[6] वर्षाकालभावीनि भूमिस्फोटकानीतिप्रसिद्धानि २५। विरूढान्यङ्कुरितानि द्विदलधान्यानि २६। ढङ्कवास्तुलः शाकविशेषः, स च प्रथमोद्गत एवानन्तकायिको न तु छिन्नप्ररूढः २७। शूकरसंज्ञको वल्लः, स एवानन्तकायिको न तु धान्यवल्लः २८। पल्यङ्कः शाकभेदः[7] २९। कोमलाम्लिका अबद्धास्थिका चिञ्चिणिका ३०। आलुक ३१ पिण्डालुकौ[8] ३२ कन्दभेदौ ।

एते पूर्वोक्ताः पदार्थाः द्वात्रिंशत्सङ्ख्या अनन्तकायनामभिर्भवन्तीत्यर्थः, न चैतावन्त्ये-

---

१. कन्दः–योगशास्त्रवृत्तौ नास्ति ॥ २. आर्द्रकच्च(च्चू)र° मु० । L.C. प्रत्योः प्रवचनसारोद्धार-श्राद्धप्रतिक्रमणवृत्त्योरपि–आर्दकच्चूर° इति ॥ ३. वरालिके–मु० C. । P.L. प्रवचनसारोद्धारवृत्तौवपि-विरालिके इति । विरालिके–इति श्राद्धप्रतिक्रमणवृत्तौ प० ११९ ॥ ४. व(वि)शकरलानि–L.P.C. । वंशकरिल्लानि–इति । प्रवचनसारोद्धारवृत्तौ । वंसकरेल्लानि–इति श्राद्धप्रतिक्रमणवृत्तौ ॥ ५. कोमलातिनव° C. । कोमलानिनव० L. । ६. छत्राकाराणि–इति प्रवचनसारोद्धारवृत्तौ प० १५१ ॥ ७. शाकभेदः–मु० C. नास्ति । L.P. प्रत्योः योगशास्त्र[प० ४५३]प्रवचनसारोद्धार[प० १५१]वृत्त्योरपि–शाकभेदः–अस्ति ॥ ८. पिण्डाल(लु)कौ–मु० C. । P.L. प्रत्योः प्रवचनसारोद्धार-श्राद्धप्रतिक्रमणवृत्त्योरपि–पिण्डालुकौ इति ॥

वानन्तकायिकानि, किन्त्वन्येऽपि । तथाह —'अन्यदपि' पूर्वोक्तातिरिक्तमनन्तकायिकं 'लक्षणयुक्त्या' वक्ष्यमाणक्षणविचारणया 'समयात्' सिद्धान्ततः, तान्येवनन्तकायानि यथा —

**''घोसाडकरीरंकुरु, तिंडुअअइकोमलंबगाईणि ।**
**[1]वरुणवडनिंबयाईण, अंकुराइं अणंताइं''** ॥१॥ [ **प्र.सा.गा./२४१** ]

घोषातकी-करीरयोरङ्कुरास्तथाऽतिकोमलान्यबद्धास्थिकानि तिन्दुकाम्रफलादीनि । तथा वरुण-वटनिम्बादीनामङ्कुरा अनन्तकायिकाः । अनन्तकायलक्षणं चेदम् —

**''गूढसिरसंधिपव्वं, समभंगमहीर( रु )गं च छिन्नरुहं ।**
**साहारणं सरीरं, तव्ववरीअं च पत्तेअं''** ॥१॥ [ **जीवा.सू.,जीव.प्र.गा./१२** ]

एवंलक्षणयुक्ता अन्येऽपि अनन्तकायाः स्युस्ते हेयाः । यतः —

**''चत्वारो नरकद्वाराः, प्रथमं रात्रिभोजनम् ।**
**परस्त्रीसङ्गमश्चैव, सन्धानानन्तकायिके''** ॥१॥ [ ]

अनन्तकायिकमन्यदप्यभक्ष्यं चाचित्तीभूतमपि परिहार्यम् , निःशूकतालौल्यवृद्ध्यादि-दोषसम्भवात् , परम्परया सचित्ततद्ग्रहणप्रसङ्गाच्च । यथोक्तम् —

**''इक्केण कयमकज्जं, करेइ तप्पच्चया पुणो अन्नो ।**
**सायाबहुलपरंपरवुच्छेओ संजमतवाणं''** ॥१॥ [ प.व./गा.५९१ ]

**''अत एवोत्कालितसेल्लरकराद्धार्द्रकसूरणवृन्ताकादि प्रासुकमपि सर्वं वर्ज्यम् , मूलकस्तु पञ्चाङ्गोऽपि त्याज्यः, सुण्ठ्यादि तु नामस्वादभेदादिना कल्पते''** । इति **श्राद्धविधिवृत्तौ** [ प० ४२ A ] १८।

[2]तथा '**वृन्ताकं**'' निद्राबाहुल्यमदनोद्दीपनादिदोषपोषकत्वात् त्याज्यम् । पठन्ति च परेऽपि —

**''यस्तु वृन्ताककालिङ्गमूलकानां च भक्षकः ।**
**अन्तकाले स मूढात्मा, न स्मरिष्यति मां प्रिये !''** ॥ [ **शिवपुराणे** ] इति १९।

तथा चलितो —विनष्टो रसः —स्वाद उपलक्षणत्वाद्वर्णादिर्यस्य तच्**चलितरसम्** , कुथितान्नपर्युषितद्विदलपूपिकादिकेवलजलराद्धकूराद्यनेकजन्तुसंसक्तत्वात् , पुष्पितौदन-पक्वान्नादि दिनद्वयातीतदध्याद्यपि च । तत्र —[3]पक्वान्नाद्याश्रित्य चैवमुक्तम् —

---

१. वरुणब(व)ड° मु० ॥ २. तुला-प्रवचनसारोद्धारवृत्तिः प० १५४, श्राद्धविधिप्रतिक्रमणवृत्तिः प० ११८ ॥ ३. तुला-श्राद्धविधिवृत्तिः प० ४१ ॥

**"वासासु पनरदिवसं, सिउण्हकालेसु मास दिणवीसं ।**
**उग्गाहिमं जईणं, कप्पई आरब्भ पढमदिणा[1]"** ॥१॥ [ ]

केचित्त्वस्या गाथाया अलभ्यमानस्थानत्वं वदन्तो यावद् गन्धरसादिना न विनश्यति तावदवगाहिमं शुध्यतीत्याहुः । दिनद्वयातीते दध्न्यपि जीवसंसक्तिर्यथा –

**"जइ मुग्गमासमाई, विदलं कच्चंमि गोरसे पडइ ।**
**ता तसजीवुप्पत्तिं, भणंति दहिए वि दुदिणुवरिं"** ॥१॥ [ ]

**हारिभद्रदशवैकालिकवृत्ता**वपि –**"रसजास्तक्रारनालदधितीमनादिषु पायुकृम्याकृतयोऽतिसूक्ष्मा भवन्ति** [ द.वृ.४/१/प० १४१ ] **इति" "दध्यहर्द्वितयातीतम्"** [ **योगशास्त्रे** ३/७ ] इति **हैममपि** वचः २०।

तथा **तुच्छम्** –असारं, पुष्पं च फलं च ते आदी यस्य तत् **पुष्प-फलादि, 'चः'** समुच्चये, आदिशब्दान्मूल-पत्रादिपरिग्रहः । तत्र तुच्छं पुष्पम् –अरणि-करीर-शिग्रू-मधूकादिसम्बन्धि । तुच्छं फलं –मधूक-जम्बू-टिम्बरू-पीलू-पक्वकरमदेङ्गुदीफल-पिञ्चू[2]-मकुर-वालुउलि-बृहद्बदर-कच्च-कुठिम्भड-खसखसादि । प्रावृषि तन्दुलीयकादेश्च पत्रं बहुजीवसम्मिश्रत्वात् त्याज्यम्, अन्यदप्येतादृशं मूलादि । यद्वाऽर्द्ध-निष्पन्नकोमलचवलकुमुद्गसि(शि)म्बादिकम्[3], तद्भक्षणे हि न तथाविध(धा)[4] तृप्तिर्विराधना च भूयसी २१।

तथा आमेति, आमं च तत् गोरसं च आमगोरसं तत्र सम्पृक्तम् **आमगोरससम्पृक्तम्**, कच्चदुग्धदधितक्रसंमिलितं[5] **द्विदलम्** केवलिगम्यसूक्ष्मजीवसंसक्तिसम्भवात् हेयम् । उक्तं च **संसक्तनिर्युक्त्यादौ** –

**"सव्वेसु वि देसेसु, सव्वेसु वि चेव तह य कालेसुं ।**
**कुसिणेसु आमगोरसजुत्तेसु निगोअपंचिंदी"** ॥१॥ [ **सं.प्र.श्रा./८४** ]

द्विदललक्षणं त्वेवमाहुः –

**"जंमि उ पोलिज्जंते, नेहो न हु होइ बिंति तं विदलं ।**
**विदले वि हु उप्पन्नं, नेहजुअं होइ नो विदलं"** ॥१॥ [ **सं.प्र.श्रा./८५** ]

इह हीयं स्थितिः –केचिद्भावा हेतुगम्याः, केचित्त्वागमगम्याः । तत्र ये यथा

---

१. °णे–L.P. ॥ २. °पिचू° P.L. ॥ ३. °शिम्बादिकम्–इति प्रवचनसारोद्धारवृत्तौ प० १५४ । सिङ्गादिकं–इति श्राद्धप्रतिक्रमणवृत्तौ प० ११८ ॥ ४. तथाविधा–इति प्रवचनसारोद्धारवृत्तौ प० १५४, श्राद्धप्रतिक्रमणवृत्तौ प० ११८ ॥ ५. L.P. । °तक्रमिलितं° मु० C. ॥

हेतुगम्यास्ते तथैव प्रवचनधरैः प्रतिपादनीयाः । आगमगम्येषु हेतून् , हेतुगम्येषु त्वागममात्रं प्रतिपादयन्नाज्ञाविराधकः स्यात् । यतः –

''**जो हेउवायपक्खंमि, हेउओ आगमे अ आगमिओ ।**
**सो ससमयपन्नवओ, सिद्धंतविराहओ अन्नो**'' ॥१॥ [ **पञ्चवस्तुके/९९३** ]

इत्यामगोरससम्पृक्तद्विदले पुष्पितौदनेऽहर्द्वितयातीते दध्नि कुथितान्ने च न हेतुगम्यो जीवसद्भावः, किन्त्वागमगम्य एव । तेन तेषु ये जन्तवस्ते केवलिभिरर्दृष्टा इति २२। **अभक्ष्याणि द्वाविंशति, वर्जयेत्** इति पूर्वं योजितमेवेति श्लोकत्रयार्थः ।

**योगशास्त्रे** तु षोडश वर्जनीयानि प्रतिपादितानि यथा –

''**मद्यं मासं नवनीतं, मधूदुम्बरपञ्चकम् ।**
**अनन्तकायमज्ञातफलं रात्रौ च भोजनम्** ॥१॥ [ **यो.शा.३/६** ]
**आमगोरससम्पृक्तं**[1], **द्विदलं पुष्पितौदनम् ।**
**दध्यहर्द्वितयातीतं, क्वथितान्नं च वर्जयेत्**'' ॥२॥ [ **यो.शा.३/७** ]

अन्यसकलाभक्ष्यवर्जनं च –

''**जन्तुमिश्रं फलं पुष्पं, पत्रं चान्यदपि त्येजत् ।**
**सन्धानमपि संसक्तं, जिनधर्मपरायणः**'' ॥३॥

[ **यो.शा.३/७२** ] इति सङ्ग्रहश्लोकेनोक्तम् ।

अत्र च सप्तमव्रते सचित्ता-ऽचित्त-मिश्रव्यक्तिः **श्राद्धविध्यु**[2]क्ता पूर्वं सम्यक् ज्ञेया युज्यते यथा चतुर्दशादिनियमाः सुपाल्या भवन्तीति । तद्व्यक्तिर्यथा –प्रायः सर्वाणि धान्यानि धानक-जीरा-ऽजमक-विरहाली-सूआ-राई-खसखसप्र[3]भृतिसर्वकणाः, सर्वाणि फलपत्राणि, लवणखारीक्षारकः रक्तसैन्धवसञ्चलादिरकृत्रिमः क्षारो मृत्खटी वर्णिकादि आर्द्रदन्तकाष्ठादि च व्यवहारतः सचित्तानि ।

[4]जलेन क्ष्वेदिताश्चणकगोधूमादिकणाश्चणकमुद्गादिदालयश्च क्लिन्ना अपि क्वचिन्नखिकासम्भवान्मिश्राः । तथा पूर्वं लवणादिप्रदानं बाष्पादिप्रदानं वालुकादिक्षेपं वा विना सेकिताश्चणका गोधूम-युगन्धर्यादिधानाः क्षारादिप्रदानं विना लोलिततिला ओलक-

---

१. °क्तं-मु० °क्त-इति P.C. योगशास्त्रे च । २. श्राद्धविधिवृत्तौ प० ३९-४१ ॥ ३. °प्रभृति-(प्रभृतयः)-मु० । L.P.C. श्राद्धविधिवृत्तावपि °प्रभृति° इति ॥ ४. जलेनस्वेदिता° मु० । जलेनक्ष्वेदिता° L.P.C. । ९४५ ञिक्ष्विदाङ्९४६ । ञिश्विदाङ्मोचने च । चकारात् स्नेहने-इति धातुपारायणे प० १३१ । जलेनक्लेदिता० इति श्राद्धविधिवृत्तौ प० ३९ ॥

उम्बिकापृथुकसेकितफलिकापर्प्पटिकादयो मरिचराजिकावघारादिमात्रसंस्कृतचिर्भटि-कादीनि सचित्तान्तर्बीजानि सर्वपक्वफलानि च मिश्राणि । यद्दिने तिलकुट्टिः कृता तद्दिने मिश्रा । मध्येऽन्नरोटिकादिक्षेपे तु मुहूर्त्तादनु प्रासुका । दक्षिणमालवादौ प्रभूततरगुडक्षेपेण तद्दिनेऽपि तस्याः प्रासुकत्वव्यवहारः, वृक्षात् तत्कालगृहीतं गुन्दालाक्षाछल्ल्यादि तात्कालिको नालिकेर-निम्बूक-निम्बा-ऽऽम्रेक्ष्वादीनां रसः तात्कालिकं तिलादितैलं तत्कालभग्नं नीर्बीजीकृतं नालिकेर—शृङ्गाट[१]—पूगीफलादि निर्बीजीकृतानि पक्वफलानि गाढमर्द्दितं निष्कणं जीरका-ऽजमकादि च मुहूर्त्तं यावन्मिश्राणि, मुहूर्त्तादूर्ध्वं तु प्रासुकानीति व्यवहृतिः । अन्यदपि प्रबलाग्नियोगं विना यत्प्रासुकीकृतं स्यात्तन्मुहूर्त्तावधि मिश्रं तदनु प्रासुकं व्यवह्रियते, यथा प्रासुकनीरादि । तथा कच्चफलानि कच्चधान्यानि गाढं मर्दितमपि लवणादि च प्रायोऽग्न्यादिप्रबलशस्त्रं विना न प्रासुकानि ।

योजनशतात् परत आगतानि हरीतकी-खारिकी-किसिमिसि-द्राक्षा-खर्जूर-मरिच-पिप्पलीजातिफल-बदाम-वायम-अक्षोटक-नमिजां-पिस्तां-चिणीकबाबा-स्फुटिकानु-कारिसैन्धवादिनि सर्जिका-बिडलवणादिः कृत्रिमः क्षारः कुम्भकारादिपरिकर्मित-मृदादिकम् एला-लविङ्ग-जावित्री-शुष्कमुस्ता-कोङ्कणादिपक्वकदलीफलान्युत्कालित-शृङ्गाटकपूगादीनि च प्रासुकानीतिव्यवहारो दृश्यते । उक्तमपि श्री**कल्पे** —

> **''जोयणसयं तु गंतं[२]( गन्ता ), अणहारेणं तु भंडसंकंती ।**
> **वायागणिधूमेण य, विद्धत्थं होइ लोणाइ'' ॥१॥**
>
> **[ बृ.क.भा. ९७३, प्र.सा. १००१, नि.भा. ४८३३ ]**

लवणादिकं स्वस्थानात् गच्छत् प्रत्यहं बहुबहुतरादिक्रमेण विध्वस्यमानं योजन-शतात् परतो गत्वा सर्वथैव विध्वस्तम् अचित्तं भवति । शस्त्राभावे योजन-शतगमनमात्रेणैव कथमचित्तीभवति ? इत्याह—'अनाहारेण' यदुत्पत्तिदेशादिकं साधारणं तत्ततो व्यवस्थितं स्वोपष्टम्भकाहारविच्छेदाद्विध्वस्यते, तच्च लवणादिकं[३] 'भाण्डसङ्क्रान्त्या' पूर्वस्मात् पूर्वस्मात् भाजनादपरभाजनेषु यद्वा पूर्वस्या भाण्डशालाया अपरस्यां भाण्डशालायां सङ्क्रम्यमाणं विध्वस्यते, तथा वातेन वाऽग्निना वा महानसादौ धूमेन वा लवणादिकं विध्वस्तं भवति । लोणाई इत्यत्रादिशब्दादमी द्रष्टव्याः —

---

१. °शृङ्गाटक° L. श्राद्धविधिवृत्तौ च प० ३९ ॥ २. P.L. गन्तु । गंतु-C. । प्रवचनसारोद्धार-वृत्तौ—गन्ता । ३. L.P.। लवणादि-मु० C. ॥

**''हरियालमणोसिलपिप्पलीअखज्जूरमुद्दिआ अभया ।**
**आइन्नमणाइन्ना, ते वि हु एमेव नायव्वा'' ॥२॥**

**[ बृ.क.भा. ९७४, नि.भा. ४८३४, प्र.सा. १००२ ]**

हरितालं मनःशिला पिप्पली च खर्जूरः एते प्रसिद्धाः, [१]मुद्रि(मृद्वी)का द्राक्षा, अभया हरीतकी, एतेऽप्येवमेव लवणवद्योजनशतगमनादिभिः कारणैरचित्तीभवन्तो ज्ञातव्याः, परमेकेऽत्राचीर्णाः, अपरेऽनाचीर्णाः । तत्र पिप्पलीहरीतकीप्रभृतय आचीर्णा इति गृह्यन्ते । खर्जूर[२]मुद्रि(मृद्वी)कादयः पुनरनाचीर्ण इति न गृह्यन्ते ।

अथ सर्वेषां सामान्येन परिणमनकारणमाह—

**''आरुहणे ओरुहणे, निसिअणगोणाइणं च गाउम्हा ।**
**भूम्माहारोच्छेए, उवक्कमेणं च परिणामो'' ॥३॥**

**[ बृ.क.भा. ९७५, नि.भा. ४८३५, प्र.सा. १००३ ]**

शकटादिषु लवणादीनां यद् भूयो भूय आरोहणवरोहणं च, तथा यत् तस्मिन् शकटादौ लवणादिभारोपरिमनुष्या निषीदन्ति, तेषां गवादीनां च यः कोऽपि [३]पिष्टा(पृष्ठा)दिगात्रोष्मा तेन वा परिणामो भवति । तथा यो यस्य भौमादिकः पृथिव्यादिक आहारस्तद्व्यवच्छेदे, तस्य, परिणामः, उपक्रमः —शस्त्रम् , तच्च त्रिधा —स्वकाय-परकाय-तदुभयरूपम् ।

तत्र स्वकायशस्त्रं यथा —लवणोदकं मधुरोदकस्य, कृष्णभूमं वा पाण्डुभूमस्य । परकायशस्त्रं यथा —अग्निरुदकस्य, उदकं चाग्नेरिति । तदुभयशस्त्रं यथा —उदकमृत्तिका शुद्धोदकस्येत्यादि । एवमादीनि सच्चित्तवस्तूनां परिणमनकारणानि मन्तव्यानि ।

**''उप्पलपउमाई पुण, उण्हे दिण्णाइँ जाम न धरिंति ।**
**मोग्गरगजूहिआओ, उण्हे छूढा चिरं हुंति ॥१॥ [ बृ.क.भा./९७८ ]**
**मगदंतिअपुप्फाइं, उदगच्छूढाइँ जाम न धरिंति ।**
**उप्पलपउमाइ पुणो, उदए छूढा चिरं हुँति ॥२॥ [ बृ.क.भा./९७९ ]**

उत्पलानि पद्मानि च [४]उदकयोनिकत्वाद् उष्णो —आतपे दत्तानि 'यामं' प्रहरमात्रं कालं 'न ध्रियन्ते' नावतिष्ठन्ते, किन्तु प्रहरादर्वागेवाचित्तीभवन्ति । मुद्गरकाणि —मगदन्ति-

---

१. मुद्रिका-L.P.C. प्रवचनसारोद्धारवृत्तौ च [प० २३२] । द्राक्षापर्याये तु मृद्वीका दृश्यते न मुद्रिका, अभिधानचिन्तामणावपि-'द्राक्षा तु गोस्तनी मृद्वीका हारहूरा च' [४/२२१-२] ॥ २. °मुद्रिकादयः-L.P.C. श्राद्धविधिवृत्तौ च प० ४० ॥ ३. पिष्टादि° L.P.C. । इति श्राद्धविधिवृत्तौ प० ४० ॥ ४. किन्तु-मु० C. नास्ति । P.L. प्रत्योः श्राद्धविधिवृत्तावपि [प० ४०B]-'किन्तु'-अस्ति ॥

D:\new/d-1.pm5\3rd proof

कापुष्पाणि यूथिकापुष्पाणि चोष्णयोनिकत्वादुष्णे क्षिप्तानि चिरमपि कालं भवन्ति, सचित्तान्येव तिष्ठन्तीतिभावः । मगदन्तिकापुष्पाणि उदके क्षिप्तानि याममपि न ध्रियन्ते, उत्पलपद्मानि पुनरुदके क्षिप्तानि चिरमपि भवन्ति ।

''**पत्ताणं पुप्फाणं, सरडुफलाणं तहेव हरिआणं ।**
**बिंटंमि मिलाणंमी, णायव्वं जीवविप्पजढं**'' ॥६॥ [ बृ.क.भा./९८० ]

''**पत्राणां पुष्पाणां सरडुफलानामबद्धास्थिकफलानां वास्तुलादीनां सामान्यतस्तरुणवनस्पतीनां वा वृन्ते-मूलनाले म्लाने सति ज्ञातव्यं जीवविप्रयुक्तमेतत्पत्रादिकम्** [ प० ३०८ ] इति'' श्री**कल्पवृत्तौ** ।

शाल्यादिधान्यानां तु श्री**पञ्चमाङ्गे** षष्ठशतकसप्तमोद्देशके सचित्ताचित्तत्वविभाग एवमुक्तः –

''**अह णं भंते ? सालीणं वीहीणं गोहूमाणं जवाणं जवजवाणं एएसि णं धण्णाणं कोट्ठाउत्ताणं पल्लाउत्ताणं मंचाउत्ताणं मालाउत्ताणं उल्लित्ताणं पिहिआणं मुद्दिआणं लंछिआणं केवइअं कालं जोणी संचिट्ठइ ? गोअमा ! जहण्णेणं अंतोमुहुत्तं उक्कोसेणं तिण्णि संवच्छराइं, तेण परं जोणी पमिलाइ पविद्धंसइ बीए अबीए भवइ । अह भंते ? कलाय १ मसूर २ तिल ३ मुग्ग ४ मास ५ निप्फाव ६ कुलत्थ ७ अलिसंदग ८ सईण[1] ९ पलिमंथग १० माईणं एएसि णं धण्णाणं ? जहा सालीणं तहा एआण वि, नवरं पंच संवच्छराइं सेसं तं चेव । अह भंते ? अयसि १ कुसुंभग २ कोद्दव ३ कंगु ४ बरट्ट ५ रालग ६ कोडूसग ७ सण ८ सरिसव ९ मूलबीअ १० माईणं धण्णाणं ? सत्त संवच्छराइं**'' । [ भग०सू० २४६ ] अत्र **पूर्वसूरिकृत**गाथा यथा –

''[2]**जव १ जवजव २ गोहुम ३ सालि ४ वीहि ५ धण्णाण कुट्ठयाईसुं ।**
**खिविआणं उक्कोसं, वरिससतिगं होइ सजीअत्तं** ॥१॥ [ ]
**तिल १ मुग्ग २ मसुर ३ कलाय ४ मास ५ चवलय ६ कुलत्थ ७ तुवरीणं ८ ।**
**तह वट्टचणय ९ वल्लाण १०, वरिसपणगं सजीअत्तं** ॥२॥ [ ]
**अयसी १ लट्टा २ कंगू ३, कोडूसग ४ सण ५ बरट्ट ६ सिद्धत्था ७ ।**
**कुद्दव ८ रालग ९ मूलगबीयाणं १० सत्त वरिसाणि**'' ॥३॥ [ ]

कर्पासस्याचित्तता त्रिवर्षानन्तरं स्याद् । यदुक्तं **कल्पबृहद्भाष्ये –**

---

१. सईण–मु० C.P. । सण–L. । भवगवतीसूत्रवृत्तिर्द्रष्टव्या ॥ २. तुला–प्रवचनसारोद्धारः गा० ९९५–१००१ ॥

"सेंडुगं[1] तिवरिसाइ, गिह्णंति" [ बृ.क.भा. ] सेडूकं त्रिवर्षातीतं विध्वस्तयोनिकमेव कल्पते। "**सेडूकः कर्पास**" इति **तद्वृत्तौ** ।

पिष्टस्य तु मिश्रताद्येवमुक्तं **पूर्वसूरिभिः** –

**"पणदिण मीसो लुट्टो, अचालिओ सावणे अ भद्दवए ।**
**चउ आसोए कत्तिअमगसिरपोसेसु तिन्नि दिणा** ॥१॥ [ ]
**पणपहर माहफग्गुण, पहरा चत्तारि चित्तवइसाहे ।**
**जिट्ठासाढे तिपहर, तेण परं होइ अच्चित्तो"** ॥२॥ [ ]

चालितस्तु मूहूर्त्तादूर्ध्वमचित्तः, तस्य चाचित्तीभूतानन्तरं विनशनकालमानं तु शास्त्रे न दृश्यते, परं[2] द्रव्यादिविशेषेण वर्णादिविपरिणामाभवनं यावत् कल्पते । उष्णनीरं[3] तु त्रिदण्डोत्कलनावधि मिश्रम् । यदुक्तं **पिण्डनिर्युक्तौ** –

**"उसिणोदगमणुवत्ते, दंडे[4] वासे अ पडिअमित्तंमि ।**
**मुत्तूणादेसतिगं, चाउलउदगं[5] बहुपसन्नं"** ॥१॥ [ पि.नि./१८ ]

व्याख्या –अनुद्वृत्तेषु त्रिदण्डेषु –उत्कालेषु जलमुष्णं मिश्रम् , ततः परमचित्तम् । तथा वर्षे –वृष्टौ पतितमात्रायां ग्रामादिषु प्रभूतमनुष्यप्रचारभूमौ यज्जलं तद्यावन्न परिणमति तावन्मिश्रम्। अरण्यभूमौ तु यत्प्रथमं पतति तत्पतितमात्रं मिश्रम् , पश्चान्निपतत् सचित्तम् , आदेशत्रिकं मुक्त्वा तन्दुलोदकमबहुप्रसन्नं मिश्रम् , अतिस्वच्छीभूतं त्वचित्तम् ।

अत्र त्रय आदेशा यथा –**केचिद्** वदन्ति तन्दुलोदके तन्दुलप्रक्षालनभाण्डादन्यत्र भाण्डे क्षिप्यमाणे त्रुटित्वा भाण्डपार्श्वे लग्ना बिन्दवो यावन्न शाम्यन्ति तावन्मिश्रम् , **अपरे** तु तथैव जाता यावद् बुद्बुदा न शाम्यन्ति तावत् , **अन्ये** तु यावत् तन्दुला न सिद्ध्यन्ति तावत् । एते[6] त्रयोऽप्यादेशा अनादेशाः, रूक्षेतरभाण्डपवनाग्निसम्भवादिभिरेषु कालनियमस्याभावात् , ततोऽतिस्वच्छीभूतमेवाचित्तम् ।

**"नीव्वोदगस्स गहणं, केई भाणेसु असुई पडिसेहो ।**
**गिहिभायणेसु गहणं, ठिअवासे मीसगं छारो"** ॥२॥ [ पि.नि./३२ ]

---

१. सेडुगं–L.C. श्राद्धविधिवृत्तौ च प० ४१ ॥ २. परन्तु द्रव्या° L. ॥ ३. तुला–श्राद्धविधिवृत्तिः प० ४२-४३ ॥ ४. दंडे (तिदंड)वासे–मु० दंडे वासे–L.P.C. पिण्डनिर्युक्तौ श्राद्धविधिवृत्तौ च ॥ ५. चाउलदगेऽबहुपसन्नं–इति पिण्डनिर्युक्तौ ॥ ६. एते त्रयोऽप्यादेशा रूक्षे० L.P.C. । एते त्रयोप्यनादेशा–इति श्राद्धविधिवृत्तौ पाठः ॥

नीव्रोदकं[1] हि धूमधूम्रीकृतदिनकरकरसम्पर्कसोष्मनीव्र[2]सम्पर्कादचित्तम् , अतस्तद्ग्रहणे न काचिद्विराधना, **केचिद्** आहुः —स्वभाजनेषु तद् ग्राह्यम् , अत्राचार्यः प्राह —अशुचित्वात् स्वपात्रेषु ग्रहणप्रतिषेधः, ततो गृहिभाजने कुण्डिकादौ ग्राह्यम् , वर्षति मेघे च तन्मिश्रम् , ततः स्थिते वर्षेऽन्तर्मुहूर्त्तादूर्ध्वं ग्राह्यम् , जलं हि केवलं प्रासुकीभूतमपि प्रहरत्रयादूर्ध्वं भूयः सचित्तं स्यादतस्तन्मध्ये क्षारः क्षेप्यः । एवं स्वच्छतापि स्यादिति **पिण्डनिर्युक्तिवृत्तौ** ।

तन्दुलधावनोदकानि प्रथम-द्वितीय-तृतीयानि अचिरकृतानि मिश्राणि, चिरं तिष्ठन्ति त्वचित्तानि । चतुर्थादिधावनानि तु चिरं स्थितान्यपि सचित्तानि । प्रासुकजलादिकालमान-मेवमुक्तं **प्रवचनसारोद्धारादौ** —

''**उसिणोदगं तिदंडुक्कालिअं**[3] **फासुअजलं जइकप्पं ।**
**नवरि गिलाणाइकए, पहरतिगोवरि वि धरिअव्वं** ॥१॥ [ **प्र.सा.८८१/वि.सा.२५७** ]
**जायइ सचित्तया से, गिम्हासुं पहरपंचगस्सुवरिं ।**
**चउपहरुवरिं सिसरे, वासासु जलं तिपहरुवरिं**'' ॥२॥ [ **प्र.सा.८८२/वि.सा.२५८** ]

तथाऽचेतनस्यापि कङ्कडुकमुद्ग-हरीतकी-कुलिकादेरविनष्टयोनिरक्षणार्थं निःशूक-तादिपरिहारार्थं च न दन्तादिभिर्भज्यते[4]। यदुक्तं **श्रीओघनिर्युक्तिपञ्चसप्ततितमगाथावृत्तौ**- ''**अचित्तानामपि केषाञ्चिद्वनस्पतीनामविनष्टा योनिः स्याद् गडूचीमुद्गादीनाम् । तथाहि — गुडुची शुष्काऽपि जलसेकात्तादात्म्यं भजन्ती दृश्यन्ते । एवं कङ्कडुकमुद्गादिरपि । अतो योनिरक्षणार्थमचेतनयतना न्यायवत्येवेति**'' [ **प्र०सा०/तुला-४१तमगाथावृत्तिः, प०३४** ]

एवं सचित्ताचित्तादिव्यक्तिं ज्ञात्वा सप्तमव्रतं नामग्राहं सचित्तादिसर्वभोग्य-वस्तुनैयत्यकरणादिना स्वीकार्यम् । यथाऽऽनन्द-**कामदेवादि**[5]**भिः** स्वीकृतम् । तथा-करणाशक्तौ तु सामान्यतोऽपि सचित्तादिनियमाः कार्याः । ते चैवम् —

''**सच्चित्त १ दव्व २ विगई ३, वाणह ४ तंबोल ५ वत्थ ६ कुसुमेसुं ७ ।**
**वाहण ८ सयण ९ विलेवण १० बंभ ११ दिसि १२ ण्हाण १३ भत्तेसुं १४**'' ॥१॥
**[ सं.प्र.श्रा.व्रता/११ ]**

---

१. तिव्वो° इति श्राद्धविधिवृत्तौ । 'वर्षासु गृहाच्छादनप्रान्तगलितं जलं नीव्रोदकम्' इति पिण्डनिर्युक्तिवृत्तौ ॥ २. °तीव्र० L.P.C. श्राद्धविधिवृत्तौ च ॥ ३. तिदंडुक्कलिअं-मु० ॥ ४. °र्भज्यते (भञ्जनं)-मु० । L.P.C. प्रतिषु श्राद्धविधिवृत्तौ च [प० ४३] °र्भज्यते—इति ॥ ५. तुला-श्राद्धविधिवृत्तिः प० ४३ ॥

तत्र मुख्यवृत्त्या सुश्रावकेण सचित्तं सर्वथा त्याज्यं, [१] तदशक्तौ नामग्राहम्, तथाऽप्यशक्तौ सामान्यत एकद्व्यादि नियम्यं यतः —''निरवज्जाहारेणम्' इति पूर्वलिखिता गाथेति । परं प्रतिदिनैकसचित्ताभिग्रहिणो हि पृथक् पृथक् दिनेषु परावर्त्तनेन सर्वसचित्तग्रहणमपि स्यात्, तथा च न विशेषविरतिः । नामग्राहं सचित्ताभिग्रहे तु तदन्यसर्वसचित्तनिषेधरूपं यावज्जीवं स्पष्टमेवाधिकं फलम् । [२] उक्तं च —

**''पुप्फफलाणं च रसं, सुराइ मंसाण महिलिआणं च ।**
**जाणंता जे विरया, ते दुक्करकारए वंदे''** ॥१॥ [ ]

सचित्तेष्वपि नागवल्लीदलानि दुस्त्यजानि । शेषसचित्तानां प्रायः प्रासुकीभवनं स्वल्पकालमध्येऽपि दृश्यते । एषु तु निरन्तरं जलक्लेदादिना सचित्तता सुस्थैव, कुन्थ्वादिविराधनापि भूयसी च, तत एव पापभीरुणा त्याज्यानि । अन्यथाऽपि रात्रौ न व्यापार्याणि । रात्रिव्यापारणेऽपि दिवा संशोधनादियतनाया एव मुख्यता । ब्रह्मचारिणा तु कामाङ्गत्वात् त्याज्यान्येव । सचित्तभक्षणे दोषस्तु अनेकजीवविराधनारूपः । यतः प्रत्येकसचित्तेऽप्येकस्मिन् पत्रफलादावसङ्ख्यजीवविराधनासम्भवः यद् **आगमः** —

**''जं भणिअं पज्जत्तगनिस्साए वुक्कमंत अपजत्ता ।**
**जत्थेगो पज्जत्तो, तत्थ असंखा अपज्जत्ता''** ॥१॥ [ **प्र.तृ.सं./४६** ]

बादरेष्वेकेन्द्रियेष्वेवमुक्तम्, सूक्ष्मेषु तु यत्रैकोऽपर्याप्तस्तत्र तन्निश्रया नियमादसङ्ख्याः पर्याप्ताः स्युरित्या**चाराङ्गवृत्त्यादौ** प्रोक्तम् । एवमेकस्मिन्नपि पत्रादावसङ्ख्यजीवविराधना तदाश्रितजलनील्यादिसम्भवे त्वनन्ता अपि । जललवणादि चासङ्ख्यजीवात्मकमेव । यद् **आर्षम्** —

**''एगंमि उदगबिंदुम्मि, जे जीवा जिणवरेहिं पण्णत्ता ।**
**ते जइ सरिसवमित्ता, जंबुद्दीवे न मायंति** ॥१॥ [ **सम्बो.स./९५** ]
[३] **अद्दामलगप्पमाणे, पुढविक्काए हवंति जे जीवा ।**
**ते पारेवयमित्ता, जंबुद्दीवे न मायंति''** ॥२॥ [ **सम्बो.स./९४** ]

सर्वसचित्त[४]त्यागे**ऽम्बडपरिव्राजक**सप्तशतशिष्यनिदर्शनम्, एवं सचित्तत्यागे यतनीयमिति प्रथमनियमः १।

---

१. तदशक्तौ नामग्राहं, तथाप्यशक्तौ सामान्यत-मु० । तदशक्तौ सामान्यतो-L. । तदशक्तौ नामग्राहं सामन्येन-इति श्राद्धविधिवृत्तौ प० ४३ ॥ २. तुला-श्राद्धविधिवृत्तिः प० ४२ ॥ ३. अद्दामलप्पमाणे-P.L. । अद्दामलगपमाणे-इति श्राद्धविधिवृत्तौ प० ४३ ॥ ४. °त्यागे चाम्बड° इति श्राद्धविधिवृत्तौ प० ४३ ॥

सचित्तविकृतिवर्जं यन्मुखे क्षिप्यते तत्सर्वं द्रव्यं, क्षिप्रचटी-रोटिका-निर्विकृतिकमोदक-लपनश्री-पर्पटिका-चूरिम-करम्बक-क्षैरेय्यादिकं बहुधान्यादिनिष्पन्नमपि परिणामान्तराद्यापत्तेरेकैकमेव द्रव्यम्। एकधान्यनिष्पन्नान्यपि पूलिका-स्थूलरोट्टक-मण्डक-खर्खरक-घूघरी-ढोक्कल-थूलीवाट-कणिक्कादीनि[1] पृथक् पृथक् नामास्वादवत्त्वेन पृथक् पृथक् द्रव्याणि। फलफलिकादौ तु नामैक्ये भिन्नभिन्नास्वादव्यक्तेः परिणामान्तराभावाच्च बहुद्रव्यत्वम्। अन्यथा वा सम्प्रदायादिवशाद् द्रव्याणि गणनीयानि। धातुमयशिला-काकराऽङ्गुल्यादिकं द्रव्यमध्ये न गणयन्ति २।

विकृतयो भक्ष्याः षट्-दुग्ध १ दधि २ घृत ३ तैल ४ गुड ५ सर्वपक्वान्न ६ भेदात् ३।

'वाणह'त्ति-उपानद्युग्मं मोचकयुग्मं वा, काष्ठापादुकादि तु बहुजीवविराधनाहेतुत्वात् त्याज्यमेव श्रावकैः ४।

ताम्बूलं-पत्र-पूग-खदिर-वटिका-कत्थकादि स्वादिमरूपम् ५।

वस्त्रं-पञ्चाङ्गादिर्वेषः धौतिक-पौतिक-रात्रिवस्त्रादि वेषे न गण्यते ६।

कुसुमानि-शिरःकण्टक्षेपशय्योच्छीर्षकाद्यर्हाणि, तन्नियमेऽपि देवशेषा कल्पते ७।

वाहनं-रथाश्वादि ८। शयनं—खट्वादि ९।

विलेपनं-भोगार्थं चन्दन-जवादिचूअ-कस्तूर्यादि, तन्नियमेऽपि देवपूजादौ तिलक-स्वहस्तकङ्कणधूपनादि कल्पते १०।

अब्रह्म-दिवा रात्रौ वा पत्न्याद्याश्रित्य ११।

दिक्परिमाणं-सर्वतोऽमुकदिशि वा इयदवधिगमनादिनियमनम् १२।

स्नानं-तैलाभ्यङ्गादिपूर्वकम्, देवपूजार्थं करणे न नियमभङ्गः, लौकिककारणे च यतना रक्ष्या १३।

भक्तं-राद्धधान्य-सुखभक्षिकादि[2] सर्वं त्रिचतुःसेरादिमितम्, खडबूजादिग्रहणे बहवोऽपि सेराः स्युः १४।

एतदुपलक्षणत्वादन्येऽपि शाक-फल-धान्यादिप्रमाणारम्भनैयत्यादिनियमा यथाशक्ति ग्राह्याः ॥३४॥

---

१. °रोट्टकमण्डकषर्षरकघूघ(र्घ L.)रीढोक्कलथूलीवा(बा P.L.)टकणिक्कादीनि-L.P.C. । °रोटकमंडकखाखरकघूघरीढोक्कलकथूलीवाट० इति श्राद्धविधिवृत्तौ प० ४४ A ॥ २. °सुख-भक्ष्यकादि-L. ॥

इत्युक्तं भोगोपभोगव्रतम् । अथ तृतीयमनर्थदण्डविरमणाख्यं गुणव्रतमाह –

**शरीराद्यर्थविकलो, यो दण्डः क्रियते जनैः ।**
**सोऽनर्थदण्डस्तत्त्यागस्तार्त्तीयीकं गुणव्रतम् ॥३५॥**

**शरीरं**-देह **आदि**शब्दात् क्षेत्र-वास्तु-धन-धान्य-परिजनादिपरिग्रहस्तद्विषयो योऽ**र्थः** –प्रयोजनं तेन **विकलो**-रहितो निष्प्रयोजन इत्यर्थः, '**यो**' '**दण्डः**' दण्ड्यते पापकर्मणा लुप्यते येन स दण्डः भूतोपमर्दः, '**जनैः**' मुग्धलोकैः '**क्रियते**' विधीयते '**सोऽनर्थदण्डः**' निष्कारणभूतोपमर्दलक्षणो दण्ड इतियावत्, '**तत्त्यागः**' तत्परिहारः '**तार्तीयीकं**' तृतीयमेव तार्तीयीकं स्वार्थे *टीकण्प्रत्ययः, **गुणव्रतं** भवतीत्यक्षरार्थः ।

भावार्थस्त्वयम् –यः स्वस्वीयस्वजनादिनिमित्तं विदीयमानो भूतोपमर्दः सोऽर्थदण्डः सप्रयोजन इतियावत्। प्रयोजनं च येन विना गार्हस्थ्यं प्रतिपालयितुं न शक्यते, सोऽर्थदण्डः, विपरीतस्त्वनर्थदण्ड इति । यदाह –

''**जं इंदियसयणाई, पडुच्च पावं करेज्ज सो होई ।**
**अत्थे दंडो इत्तो, अन्नो उ अणत्थदंडो त्ति**'' ॥१॥ [ **सं.प्र.श्रा./९८** ] ॥३५॥

उक्तमनर्थदण्डविरमणव्रतस्वरूपम् । अथानर्थदण्डभेदानाह –

**सोऽपध्यानं पापकर्मोपदेशो हिंसकापर्णम् ।**
**प्रमादाचरणं चेति, प्रोक्तोऽर्हद्भिश्चतुर्विधः ॥३६॥**

'**स**' अनर्थदण्डः '**अपध्यानं**' '**पापकर्मोपदेशो**' '**हिंसकार्पणं**' '**प्रमादाचरणं**' **च** '**इति**' एवम्प्रकारै**श्चतुर्विधः** '**अर्हद्भिः**' जिनैः '**प्रोक्तः**' प्रज्ञप्तः । यतः सूत्रम् –

''**अणत्थदंडे चउव्विहे पण्णत्ते**[१] **तंजहा –अवज्झाणायरिए, पमायायरिए, हिंसप्पदाणे, पावकम्मोवएसे अ**'' [ **आवश्यकमूलसूत्र ४५** ] त्ति ।

तत्राप्रशस्तं यत् ध्यानं –स्थिराध्यवसानलक्षणं तदपध्यानम्, [२]तच्चार्तरौद्रभेदाद् द्विधा। तत्र ऋतं –दुःखं तत्र भवमार्त्तम्, यदि वा [३]आर्त्तिः-पीडा यातनं च तत्र भवमार्त्तम् । [४]रोदयति परानिति रुद्रो दुःखहेतुस्तेन कृतं तस्य वा कर्म रौद्रम्, एतत्परिमाणं चान्तमुहूर्त्तम् । यतो **हेमसूरिपादाः** –

---

* ''तीयाट्टीकण् न विद्या चेत्'' सिद्धहेम० ७-२-१५३ । इति सूत्रेण ॥ १. पं० तं० अव°- L.P. ॥ पातं अव° C. ॥ २. तुला-योगशास्त्रटीका ३/७३ प० ४६८ ॥ ३. अर्त्तिः पीडा याचनं-योगशास्त्रवृत्तौ प० ४६८ ॥ ४. तुला-योगशास्त्रवृत्तिः प० ४६९ ॥

"**वैरिघातो नरेन्द्रत्वं, पुरघाताग्निदीपने ।**
**[1]खचरत्वाद्यपध्यानं, मुहूर्त्तात् परतस्त्यजेत्**" ॥१॥ [ **योग.शा.३/७५** ] इति ।

तथा पातयति नरकादाविति पापम्, तत्प्रधानं तद्धेतुभूतं वा कर्म पापकर्म — कृष्यादि तस्योपदेशः —प्रवर्त्तनवाक्यं पापकर्मोपदेशः । स च यथा —

"क्षेत्रं कृष, वृषवृन्दं दमय, हयान् [2]षण्डय, (शण्ढय) [3]क्रथय शत्रून्, यन्त्रं वाहय, शस्त्रं सज्जय, पापोपदेशोऽयम् । एवं प्रत्यासीदति वर्षाकालो, दीयतां वल्लरेष्वग्निः, सज्जीक्रियतां [4]हल-फलादि । अतिक्रामति वापकालो, भृताः केदारा गाह्यन्तां सार्द्धदिनत्रयमध्ये, उप्यन्तां च व्रीहयः । [5]जातावयःस्था कन्यका विवाह्यतां शीघ्रम्, प्रत्यासीदन्ति प्रवहणपूरणदिवसाः प्रगुणीक्रियतां प्रवहणानीत्यादि सर्वोऽपि पापोपदेश उत्सर्गतः श्रावकेण त्याज्यः, अपवादतस्त दाक्षिण्यादिविषये यतना विधेया ।
यतो **योगशास्त्रे** —

"**वृषभान् दमय क्षेत्रं, कृष [6]षण्डय वाजिनः ।**
**दाक्षिण्याविषये पापोपदेशोऽयं न कल्पते**" ॥१॥ [ **यो.शा.३/७६** ] इति ।

[7]तथा हिंसन्तीति हिंसका-हिंसोपकरणानि आयुधानलविषादयस्तेषामर्पणं —दानं हिंसकार्पणम्, हिंस्रमपि हि उत्सर्गतो न देयम्, अपवादतस्तु दाक्षिण्यादिविषये यतना कार्या । यतो **योगशास्त्रे** —

"**यन्त्र-लाङ्गल-शस्त्रा-ऽग्नि-मुशलोलूखलादिकम् ।**
**दाक्षिण्याविषये हिंस्रं, नार्पयेत् करुणापरः**" ॥१॥ [ **यो.शा.३/७७** ] इति ।

तथा प्रमादेन प्रमादस्य वाऽऽचरणं प्रमादाचरणमिति । प्रमादश्च —"**मज्जं विसय-कसाया, णिद्दा विकहा य पञ्चमी भणिय**" [ **उत्तराध्ययननिर्युक्तिः गा० १८०** ] त्ति पञ्चविधस्तदाचरणमपि वर्ज्यमेव । एतत्प्रपञ्चो **योगशास्त्रे** यथा —

"**कुतूहलाद् गीतनृ[8]त्ते, नाटकादिनिरीक्षणम् ।**
**कामशास्त्रप्रसक्तिश्च, द्यूतमद्यादिसेवनम्** ॥१॥ [ **यो.शा.३/७८** ]

---

१. खे° मु० । L.P. योगशास्त्रेऽपि-ख° इति ॥ २. खण्डय-L.P.C. ॥ ३. कथय-मु० । १०४५ क्रथ १०४६ क्लथ हिंसार्थाः [धातुपाठे भ्वादि गणे] ३९४ क्रथ ३९५ अर्दिण् हिंसायाम् [धातुपाठे चुरादिगणे ।] ४. L.P. । दल° मु० C. ॥ ५. L.P. । जातावस्था-मु० । जातावयस्था-C. । ६. षण्ढय-इति योगशास्त्रे ॥ ७. तथा हिंसनशीलानि हिंस्राणि-हिंसो० L.P. ॥ ८. °त्त° योगशास्त्रे । °त्ये-मु० । इति ॥

''**जलक्रीडान्दोलनादिविनोदो जन्तुयोधनम् ।**
**रिपोः सुतादिना वैरं, भक्तस्त्रीदेशराट्कथा ॥२॥** [ **यो.शा.३/७९** ]
**रोगमार्गश्रमौ मुक्त्वा, स्वापश्च सकलां निशाम् ।**
**एवमादि परिहरेत् , प्रमादाचरणं सुधीः'' ॥३॥** [ **यो.शा.३/८०** ]

वृत्तिलेशो यथा –कौतुकान्निरीक्षणं तेन तेनेन्द्रियेण यथोचितं विषयीकरणम् , कुतूहलग्रहणाज्जिनयात्रादौ प्रासङ्गिकनिरीक्षणे च न प्रमादाचरणम् । तथा **कामशास्त्रे वात्स्यायना**दिकृते प्रसक्तिः –पुनः पुनः शीलनम् । द्यूतशब्दकटमद्ये प्रसिद्धे, आदि-शब्दान्मृगयादि । [1]तस्य सेवनं-परिशीलनम् १।

जलक्रीडा-तडागजलयन्त्रादिषु मज्जनोन्मज्जन-शृङ्गिकाच्छोटनादिरूपा, तथा आन्दोलनं – वृक्षशाखादौ खेलनम् , आदिशब्दात् पुष्पावचयादि । तथा जन्तूनां –कुक्कुटादीनां योधनं-[2]परस्परेणाहननम् , रिपोः सम्बन्धिना पुत्र-पौत्रादिना वैरम् , अयमर्थो-येन तावत्कथञ्चि-दायातं वैरं तद्यः परिहर्तुं न शक्नोति, तस्यापि पुत्र-पौत्रादिना यद्वैरं तत् प्रमादाचरणम् ।

भक्तकथा यथा –इदं चेदं [3]मांस्पाक-माष-मोदकादि साधु भोज्यम् , साध्वनेन भुज्यते, अहमपि [4]चेदं भोक्ष्ये इत्यादिरूपा १। स्त्रीकथा तथा स्त्रीणां नेपथ्याऽङ्गहार-हावभावादिवर्णनरूपा –

''**कर्णाटी सुरतोपचारचतुरा लाटा विदग्धा प्रिया**'' [ ] इत्यादिरूपा वा २। तथा देशकथा यथा-'दक्षिणापथः प्रचुरान्नपानः स्त्रीसम्भोगप्रधानः । पूर्वदेशो विचित्रवस्तु-गुडखण्ड-शालि-मद्यादिप्रधानः । उत्तरापथे शूराः पुरुषाः, जविनो वाजिनो, गोधूम-प्रधानानि धान्यानि, सुलभं कुङ्कुमम् , मधुराणि द्राक्षा-दाडिम-कपित्थादीनि । पश्चिमदेशे सुखस्पर्शानि वस्त्राणि, सुलभा इक्षवः, शीतं वारी'त्यादि ३। राजकथा यथा-'शूरोऽस्मदीयो राजा, [5]सधनाश्चेडा, गजपतिर्गौडः, अश्वपतिस्तुरुष्कः' इत्यादि ४। एवं प्रतिकूला अपि भक्तादिकथा वाच्याः [ **तुला-योगशास्त्रटीका प० ४७३-४** ] इति मद्यादिपञ्चविधप्रमादस्य प्रपञ्चः ।

तथा तत्रैव- ''**विलासहासनिष्ठ्यूतनिद्राकलहदुष्कथाः ।**
**जिनेन्द्रभवनस्यान्तराहारं च चतुर्विधम्'' ॥१॥** [ **यो.शा.३/८१** ] इति ।

---

१. तस्य-C. नास्ति P. प्रतौ पार्श्वभागे अस्ति । तेषाम्-इति योगशास्त्रवृत्तौ पाठः ॥ २. परस्परेणाभ्याघातनम्-इति योगशास्त्रवृत्तौ ॥ ३. मांस्याक° मु० । C.P. योगशास्त्रवृत्तावपि मांस्पाक° इति ॥ ४. वा इदम्-इति योगशास्त्रवृत्तौ प० ४७३ ॥ ५. सधनश्चौडः-इति योगशास्त्रवृत्तौ प० ४७४ ॥

जिनेन्द्रभवनस्य मध्ये विलासं-कामचेष्टाम्, हासं-कहकहध्वानं[1] हसनम्, निष्ठ्यूतं निष्ठीवनम्, कलहं-राटीम्, दुष्कथां-चौरपारदारिकादिकथाम्, चतुर्विधाहारम् अशन-पान-खाद्य-स्वाद्यरूपम्, परिहरेदिति पूर्वतः संबन्धनीयमिति **[ योगशास्त्रटीका प० ४७५ ]**।

तथाऽऽलस्यादिना घृत-तैल-जलादिभाजनानामस्थगनम्, मार्गे सति हरितकायाद्युपर्यशोभिताध्वनि वा गमनम्, अनालोकितस्थाने हस्तक्षेपादि, सत्यपि स्थाने सचित्तोपरि स्थित्यादि, वस्त्रादेर्वा मोचनम्, पनक-कुन्थ्वाद्याक्रान्तभुव्यव[2]श्रावणादेस्त्यजनम्, अयतनया कपाटार्गलादानादि, वृथा पत्रपुष्पादित्रोटन-मृत्खटीवणिकादिमर्दन-वह्न्युद्दीपन-गवादिघातदान-शस्त्रव्यापारण-निष्ठुरमर्मभाषण-हास्यनिन्दाकरणादि। रात्रौ दिवाप्ययतनया वा स्नान-केशग्रथन-रन्धन-खण्डन-दलन-भूखनन-मृदादिमर्दन-लेपन-वस्त्रधापन-जलगालनादि च प्रमादाचरणम्, श्लेष्मादीनां व्युत्सर्गे स्थगनाद्ययतनापि प्रमादाचरणम्। मुहूर्त्तानन्तरं तत्र सम्मूर्च्छिममनुष्यसम्मूर्च्छनतद्विराधनादिमहादोषसम्भवात्। अधिकरणभूतस्य शस्त्रादिर्मलमूत्रादेश्चाव्युत्सर्जनमति तथा वृथा क्रियाधिकारित्वापत्तेः, शास्त्रे च्युतधनुरादिजीवानामपि क्रियाधिकारित्वोक्तेः। स्वकार्ये कृतेऽपि ज्वलदिन्धनप्रदीपादेरविध्यापनमपि तथा। अग्निविध्यापनापेक्षया तदुद्दीपने बहुजीवविराधनायाः प्रतिपादनात्। यतो **भगवत्यां —**

''**जे णं पुरिसे अगणिकायं निव्वावेइ, से णं पुरिसे अप्पकम्मतराए चेव**'' [ ] त्ति।

अपिहितप्रदीपचुल्हकादिधारण-[3]चुल्लकाद्युपरिचन्द्रोदयाप्रदानाद्यपि तथा। [4]अशोधितेन्धन-धान्य-जलादिव्यापारणमपि तथा। [5]तद्यतना प्रथमव्रते प्रागुक्तैव। एष च चतुर्विधोऽप्यनर्थदण्डोऽनर्थहेतुर्निरर्थकश्च। तथाहि —अपध्यानेन न काचिदिष्टसिद्धिः, प्रत्युत चित्तोद्वेग-वपुःक्षीणता-शून्यता-घोरदुष्कर्मबन्ध-दुर्गत्याद्यनर्थ एव। उक्तं च —

''**अणवट्ठिअं मणो जस्स, झायइ बहुआइं अट्टमट्टाइं।**
**तं चिंतिअं च न लहइ, संचिणइ अ पावकम्माइं ॥१॥** [ उ.मा./४८६ ]
**वयकायविरहिआण वि, कम्माणं चित्तमित्तविहिआणं।**
**अइघोरं होइ फलं, तंदुलमच्छु व्व जीवाणं**'' ॥२॥ [ म.भा./४ ]

---

१. °न° मु० C. संशो०। L.P.C. मूल योगशास्त्रवृत्तौ च °नं-इति पाठः॥ २. L.P.C.। °श्रवणा° मु०॥ ३. चुल्लकोपरि° मु०॥ ४. तुला-श्राद्धप्रतिक्रमणवृत्तिः प० १३५॥ ५. तत्तद्यतना-मु० L.P.C. श्राद्धप्रतिक्रमणवृत्तावपि तद्यतना-इति पाठः॥

अतोऽशक्यपरिहारं जात्वपध्यानं क्षणमात्रं स्यात् । तदापि सद्य एव परिहार्यं मनोनिग्रहयतनया । यदाह —**मनोनिग्रहभावनाकृत्** —

**''साहूण सावगाण य, धम्मो जो कोइ वित्थरो भणिओ ।**
**सो मणनिग्गहसारो, जं फलसिद्धी तओ भणिआ''** ॥१॥ [ म.भा./१८ ]

पापोपदेश-हिंस्रप्रदाने च स्वजनादावन्यथा निर्वाहादर्शनात् दुःशक्यपरिहारे, अन्येषु तु पापाद्यनर्थफले एव । तदुक्तं **लौकिकै**रपि —

**''न ग्राह्याणि न देयानि, पञ्च द्रव्याणि पण्डितैः ।**
**अग्निर्विषं तथा शस्त्रं, मद्यं मांसं च पञ्चमम्''** ॥१॥ [ ]

प्रमादाचरितेऽपि मुधैवायतनादिनिमित्तो हिंसादिदोषः । अत एवाह —

**''तुल्ले वि उअरभरणे, मूढअमूढाण अंतरं पिच्छ ।**
**एगाण नरयदुक्खं, अन्नेसिं सासयं सुक्खं''** ॥१॥ [ ष.श./२१ ]

यतनां विना च प्रवृत्तौ सर्वत्रानर्थदण्ड एव, अतः सदयतया सर्वव्यापारेषु सर्वशक्त्या श्रावकेण यतनायां यतनीयम् । यतः —

**''जयणा य धम्मजणणी, जयणा धम्मस्स पालणी चेव ।**
**तव्वुड्ढिकरी जयणा, एगंतसुहावहा जयणा''** ॥१॥ [ उप.प./७६९ ]

निरर्थकपापेऽधिककर्मबन्धादिदोषोऽपि । यतः —

**''अट्ठेण तं न बंधइ, जमणट्ठेणं तु थेवबहुभावा ।**
**अट्ठे कालाईआ, निआमगा न उ अणट्ठाए''** ॥१॥ [ श्रा.प्र./२९० ]

अतश्चतुर्विधोऽप्ययं त्याज्य इति ॥३६॥

उक्तानि त्रीणि गुणव्रतानि, अथ शिक्षापदव्रतान्युच्यन्ते —तत्र शिक्षणं शिक्षाऽभ्यासस्तस्यै तस्या वा पदानि स्थानानि तान्येव व्रतानि शिक्षापदव्रतानि । तानि च चत्वारि भवन्ति । तद्यथा —सामायिकम् , देशावकाशिकम् , पौषधोपवासः, अतिथिसंविभागश्चेति । स्वल्पकालिकत्वाच्चैतेषां गुणव्रतेभ्यो भेदः, गुणव्रतानि तु प्रायो यावज्जीविकानि । एतेष्वपि —

**''सामायिक —देशावकाशिके प्रतिदिवसानुष्ठेये पुनः पुनरुच्चारणीये । पौषधोपवासाऽतिथिसंविभागौ तु प्रतिनियतदिवसानुष्ठेयौ न प्रतिदिवसाचरणीयौ''** [ प० २३२ ] इति विवेक [१] **आवश्यकवृत्तौ** कृतः ।

---

१. आवश्यकवृत्तिकृतः-मु० C. ॥

तत्राद्यं शिक्षापदव्रतमाह —

**सावद्यकर्ममुक्तस्य, दुर्ध्यानरहितस्य च ।**
**समभावो मुहूर्त्तं तद् व्रतं सामायिकाह्वयम् ॥३७॥**

**सावद्यं**-वाचिकं कायिकं च **कर्म** तेन **मुक्तस्य,** तथा **दुर्ध्यानम्** —आर्त्त-रौद्ररूपं तेन **रहितस्य** प्राणिनः मनोवाक्कायचेष्टापरिहारं विना सामायिकं न भवतीति विशेषणद्वयम्, तादृशस्य '**मुहूर्त्तं**' घटीद्वयकालं यावत् [१] यो '**समभावो**' रागद्वेषहेतुषु मध्यस्थ-भावस्**तत्** '**सामायिकाह्वयं**' **व्रतं** ज्ञेयम्। [२] समस्य-रागद्वेषविमुक्तस्य सत आयो —ज्ञानादीनां लाभः प्रशमसुखरूपः, समानां वा —मोक्षसाधनं प्रति सदृशसामर्थ्यानां सम्यग्दर्शनज्ञान-चारित्राणाम् आयो लाभः समायः, समाय एव सामायिकम्, विनयादित्वादिकण्। समायः प्रयोजनमस्येति वा सामायिकम्। यतः —

"**जो समो सव्वभूएसु , तसेसु थावरेसु अ ।**
**तस्स सामाइअं होइ, इह केवलिभासिअं**" ॥१॥ [ आ.नि./७९८ ]

सामायिकस्थश्च श्रावकोऽपि यतिरिव । यदाह —

"**सामाइयंमि उ कए, समणो इव सावओ हवइ जम्हा ।**
**एएण कारणेणं, बहुसो सामाइअं कुज्जा ॥१॥**
**[ आव. मूल. अ. ६/गा. २०, आ.नि. ८०१, वि.भा. २६९० ]**

अत एव तस्य [३] देवपूजनादौ नाधिकारः, यतो भावस्तवार्थं द्रव्यस्तवोपादानम्, सामायिके च सति सम्प्राप्तो भावस्तव इति किं द्रव्यस्तवकरणेन ? । यदाह —

"**दव्वथओ भावथओ, [४] दव्वथओ बहुगुणो त्ति बुद्धि सिआ ।**
**अणिउणजणवयणमिणं, छज्जीवहिअं जिणा बिंति**" ॥१॥ [ आ.भा./१९२ ]

**आवश्यकसूत्र**मपि "**सामाइअं नाम सावज्जजोगपरिवज्जणं णिरवज्जजोग-पडिसेवणं च**" त्ति । **[ प्रत्याख्यानावश्यक सू० ९। आवश्यकचूर्णिः प० २९९, हारि-भद्रीयवृत्तिः प० ८३१ ]**

[५] तत्राय**मावश्यकचूर्णिपञ्चाशकचूर्णियोगशास्त्रवृत्त्या**द्युक्तो विधिर्यथा —श्रावकः

१. L.P.C. । योऽसौ सम° मु० ॥ २. तुला-योगशास्त्रवृत्तिः ३/८२ प० ४७७-४८३ ।. ३. देव-स्नात्रपूजनादौ-इति योगशास्त्रवृत्तौ ॥ ४. दव्वथओ-L.P.C. नास्ति ॥ ५. दृश्यताम्-आवश्यकचूर्णिः प० २९९-३००, आवश्यकहारिभद्रीयवृत्तिः प० ८३२, पञ्चाशकचूर्णिः १। गा० २५-६, योगशास्त्रवृत्तिः प० ४७८ तः ॥ "विनयादिभ्यः" सिद्धहेम० ७-२-१६९ इति सूत्रेण ॥

सामायिककर्त्ता द्विधा भवति, ऋद्धिमाननृद्धिकश्च । योऽसावनृद्धिकः स चतुर्षु स्थानेषु सामायिकं करोति, जिनगृहे, साध्वन्तिके, पौषधशालायाम्, स्वगृहे वा, यत्र वा विश्राम्यति निर्व्यापारो वा आस्ते । तत्र च यदा साधुसमीपे करोति तदाऽयं विधिः — यदि कस्माच्चिदपि भयं नास्ति, केनचिद्विवादो नास्ति, ऋणं वा न धारयति, मा भूत् तत्कृताकर्षणापकर्षणनिमित्तः[1] सङ्क्लेशः, तदा स्वगृहेऽपि सामायिकं कृत्वा ईर्यां शोधयन् सावद्यां भाषां परिहरन् काष्ठलेष्ट्वादिना यदि कार्यं तदा तत्स्वामिनमनुज्ञाप्य प्रतिलिख्य प्रमार्ज्य च गृह्णन् खेल-सिङ्घाणकादींश्चाविवेचयन् विवेचयंश्च स्थण्डिलं [2]प्रत्यवेक्ष्य प्रमृज्य च पञ्चसमितिसमितस्त्रिगुप्तिगुप्तः साध्वाश्रयं गत्वा साधून्नमस्कृत्य सामायिकं करोति । तत्सूत्रं यथा —

''**करेमि भंते ! सामाइअं सावज्जं जोगं पच्चक्खामि जाव साहू पज्जुवासामि दुविहं तिविहेणं मणेणं वायाए काएणं न करेमि न कारवेमि तस्स भंते ! पडिक्कमामि निंदामि गरिहामि अप्पाणं वोसिरामि**'' त्ति ।

अस्यार्थः —'[3]करेमि' । अभ्युपगच्छामि, भंते ! इति गुरोरामन्त्रणम्, हे भदन्त ! [4]भदन्तः सुखवान् कल्याणवांश्च भवति । ''[5]**भदुङ् सुखकल्याणयोः**'' [ **धा० पा० ७२२** ] [6]अस्यौणादिकान्तप्रत्ययान्तस्य निपातने रूपम् । आमन्त्रणं च प्रत्यक्षस्य गुरोस्तदभावे परोक्षस्यापि बुद्ध्या प्रत्यक्षीकृतस्य भवति । गुरोश्चाभिमुखीकरणेन सर्वो धर्मः गुरुपादमूले तदभावे स्थापनासमक्षं कृतः फलवानिति दर्शितम् । यतः —

''**नाणस्स होइ भागी, थिरयरओ दंसणे चरित्ते अ ।**

**धन्ना आवकहाए, गुरुकुलवासं न मुंचंति**'' ॥१॥ [ **विशेषा.भा./३४५९** ]

अथवा भवान्त भन्ते इत्यार्षत्वान्मध्यव्यञ्जनलोपे रूपम्, भन्ते इति ''**अत एत्सौ पुंसि मागध्याम्**'' [ **श्रीसि० ८-४-२८७** ] इत्येकारः, अर्द्धमागधत्वादार्षस्य । 'सामायिकम्' उक्तनिर्वचनम्, आत्मानं समभावपरिणतं करोमीत्यर्थः । कथम् ? इत्याह —'[7]सावद्यं' अवद्यसहितं युज्यत इति योगो व्यापारस्तं 'प्रत्याख्यामि' प्रतीति प्रतिषेधे, आङाभिमुख्ये, ''**ख्या प्रकथने**'' [ **है० धा० पा० १०७१** ] ततश्च प्रतीपमभिमुखं ख्यापनं सावद्ययोगस्य

१. निमित्तसंक्लेशः-C. । निमित्तश्चित्तसंक्लेशः-इति योगशास्त्रवृत्तौ ॥ २. प्रत्युपेक्ष्य-इति योगशास्त्रवृत्तौ । प्रत्यपेक्ष्य-इति तत्र पाठान्तरम् ॥ ३. करोमि-मु० । P.C. योगशास्त्रवृत्तावपि करेमि-इति ॥ ४. भन्दते-इति योगशास्त्रवृत्तौ प० ४७९ ॥ ५. भदु-मु० ॥ ६. ''उणादौ 'सीमन्तहेमन्त०' [उ० सू० २२२] इति अन्ते निपातनात् भदन्तः'' इति धातुपारायणे पृ० ९१ ॥ ७. तुला-आवश्यकहारिभद्रीयवृत्तिः प० B ४५५ ॥

करोमीत्यर्थः । अथवा 'पच्चक्खामि'त्ति प्रत्याचक्षे "**चक्षिङ् व्यक्तायां वाचि**" [ **हैमधातुपाठे २/६४** ] इत्यस्य प्रत्याङ्पूर्वस्य रूपम्, प्रतिषेधस्यादरेणाभिधानं करोमीत्यर्थः । 'जाव साहू पज्जुवासामि' यावच्छब्दः परिमाण-मर्यादा-ऽवधारणवचनः । तत्र परिमाणे यावत्साधुपर्युपासनं मम तावत् प्रत्याख्यामीति, मर्यादायां साधुपर्युपासनादर्वाक्, अवधारणे [1] यावत्साधुः तावदेव, न तस्मात् परत इत्यर्थः ।

'दुविहं तिविहेणं' द्वे विधे यस्य य द्विविधः [2] सावद्ययोगः । स च प्रत्याख्येयत्वेन कर्म सम्पद्यते, अतस्तं द्विविधं योगं करण-कारणलक्षणम् । अनुमतिप्रतिषेधस्य गृहस्थेन कर्तुमशक्यत्वात् । पुत्रभृत्यादिकृतव्यापारस्य स्वयमकरणेऽप्यनुमोदनात् । 'त्रिविधेन' इति करणे तृतीया । मणेणमित्यादि सूत्रोपात्तं विवरणम्, मनसा वचसा कायेन चेति त्रिविधेन करणेन । न करोमि न कारयामीति सूत्रोपात्तमेव द्विविधमित्यस्य विवरणम् । [3] अत्र उद्देशक्रममुल्लङ्घ्य व्यत्यासेन निर्देशस्तु योगस्य करणाधीनतादर्शनार्थम् । करणाधीनता हि योगानां करणभावे भावात् तदभावेऽभावाच्च योगस्य । 'तस्से'ति तस्य अत्राधिकृतो योग सम्बन्ध्यते, अवयवावयविभावलक्षणसम्बन्धे [4] षष्ठीयम्, योगस्त्रिकालविषय-स्तस्यातीतमवयवं 'प्रतिक्रमामि' निवर्त्ते प्रतीपं क्रमामीत्यर्थः । 'निन्दामि' जुगुप्से, 'गर्हामि' स एवार्थः, परं केवलमात्मसाक्षिकी गर्हा । भंते इति पुनर्गुरोरामन्त्रणं भक्त्यतिशयख्यापनार्थ-मपुनरुक्तम् । [5] अथवा सामायिकक्रियाप्रत्यर्पणाय पुनर्गुरोः सम्बोधनम् । अनेन चैतत् ज्ञापितं —सर्वक्रियावसाने गुरोः प्रत्यर्पणं कार्यमिति । उक्तं च **भाष्यकारेण —**

"**सामाइअपच्चप्पणवयणो वाऽयं भयंतसद्दोऽवि ।**
**सव्वकिरिआवसाणे, भणिअं पच्चप्पणमणेण**" ॥१॥ [ **विशेषा.भा./३५७१** ]

'अप्पाणम्' इति आत्मानम् अतीतकालसावद्ययोगकारिणं 'वोसिरामि'इति व्युत्सृजामि, विशब्दो विविधार्थो विशेषार्थो [6] वा, विविधं विशेषेण वा, भृशं त्यजामीत्यर्थः । सामायिक-ग्रहणकाले सावद्यात्मपूर्वपर्यायत्यागाद्रत्नत्रयात्मनवपर्यायोत् पादात्पर्यायपर्यायिणोः स्याद-भिन्नत्वादहं नव्य उत्पन्नः, "**आया खलु सामाइअं**" [ **आ.नि./७९०** ] इत्याद्युक्तेः ।

---

१. यावत्साधुपर्युपासनं मम तावदेव-इति योगशास्त्रवृत्तौ प० ४८० ॥ २. सावद्यो योगः-इति योगशास्त्रवृत्तौ ॥ ३. तुला-आवश्यकहारिभद्रीयवृत्तिः प० ४८० ॥ ४. षष्ठी, योऽयं योग° इति योगशास्त्रवृत्तौ । तुला-आवश्यकहारिभद्रीयवृत्तिः प० ४८४ ॥ ५. तुला-आवश्यकसूत्रस्य हारिभद्रीयवृत्तिः प० ३८६, B ४५५ ४८४ B ॥ ६. वा, उच्छब्दो भृशार्थः विविधं विशे० इति योगशास्त्रवृत्तौ प० ४८१ ॥

[1] अत्र च 'करेमि भंते सामाइअं' इति वर्त्तमानस्य [2] सावद्ययोगस्य, प्रत्याख्यामीत्यनागतस्य, 'तस्स भंते पडिक्कमामि' इत्यतीतस्येति त्रैकालिकं प्रत्याख्यानमुक्तमिति त्रयाणां न पौनरुक्त्यम् । उक्तं च —

''**अईअं निंदामि, पडुप्पन्नं संवरेमि, अणागयं पच्चक्खामि**'' [ **पाक्षिकसूत्रे** ] त्ति ।

अत्र च दण्डके सामान्यनियमग्रहणेऽपि विवक्षातः परम्पराप्रामाण्याच्च जघन्यतोऽपि मुहूर्त्तं तत् कर्त्तव्यम् । तथा **प्रतिक्रमणसूत्रचूर्णिः —**

''**जाव [3] नियमं पज्जुवासामि त्ति-जइ वि सामन्नवयणमेअं तहा वि जहन्नओऽवि अंतोमुहुत्तं नियमे ठायव्वं, परओऽवि समाहीए ठायव्वमिति**'' [ **प्र.सू.चू.** ] ।

[4] एवं कृतसामायिक ईर्यापथिक्याः प्रतिक्रामति, पश्चादागमनमालोच्य यथाज्येष्ठमाचार्यादीन् वन्दते । पुनरपि गुरूं वन्दित्वा प्रत्युपेक्षितासने निविष्टः श्रृणोति, पठति, पृच्छति वा । एवं चैत्यभवनेऽपि द्रष्टव्यम् , यदा तु पौषधशालायां स्वगृहे वा सामायिकं गृहीत्वा तत्रैवाऽऽस्ते, तदा गमनं नास्ति ।

यस्तु राजादिर्महर्द्धिकः स गन्धसिन्धुरस्कन्धाधिरूढच्छत्रचामरादिराज्यालङ्करणालङ्कृतो हास्तिका-श्वीय-पादातिक-रथ-कट्यापरिकरितो भेरीभाङ्कारभरिताम्बरतलो बन्दिवृन्दकोलाहलाकुलीकृतनभस्तलोऽनेकसामन्तमण्डलेश्वराहमहमिकासम्प्रेक्ष्यमाणपादकमलः पौरजनैः सश्रद्धमङ्गुल्योपदर्श्यमानो मनोरथैरुपस्पृश्यमानस्तेषामेवाञ्जलिबन्धान् लाजाञ्जलिपातान् शिरःप्रणामाननुमोदमानः 'अहो धन्यो धर्मो य एवंविधैरुपसे[5]व्यते' इति प्राकृतजनैरपि श्लाघ्यमानोऽकृतसामायिक एव जिनालयं साधुवसतिं वा गच्छति । तत्र गतो राजककुदानि छत्र-चामरोपानन्मुकुट-खड्गरूपाणि परिहरति । **आवश्यकचूर्णौ** तु —

''**मउडं न अवणेइ, कुंडलाणि णाममुद्दं पुप्फतम्बोलपावारगमादि वोसिरइ**'' त्ति [ **प० ३००** ] भणितम् , जिनार्चनं साधुवन्दनं वा करोति । यदि त्वसौ कृतसामायिक एव गच्छेत् , तदा गजाऽश्वादिभिरधिकरणं स्यात् , तच्च न युज्यते कर्त्तुम् , [6] तथा (कृत) —

१. तुला-आवश्यकहारिभद्रीयवृत्तिः प० ४८३ B ॥ २. सावद्ययोगस्य प्रत्याख्यानम् , सावज्जं जोगं पच्चक्खामीत्यनागतस्य-इति योगशास्त्रवृत्तौ प० ४८२ ॥ ३. नियमे(ण) मु० । नियमे P.C. ॥ ४. तुला-योगशास्त्रवृत्तिः प० ४८२ ॥ ५. °सेव्यः-इति योगशास्त्रवृत्तौ ॥ ६. तथा सामायिकेन-C.P. । तथा कृतसामायिकेन-इति योगशास्त्रवृत्तौ तुला-कयसामातिएण य पाएहिं आगंतव्वं-इति आवश्यकचूर्णौ प० २९९-३०० ॥

सामायिकेन पादाभ्यामेव गन्तव्यम्, तच्चानुचितं भूपतीनाम्, आगतस्य च यद्यसौ श्रावकस्तदा न कोऽप्यभ्युत्थानादि करोति । अथ यथाभद्रकस्तदा पूजा कृताऽस्तु इति पूर्वमेवासनं मुञ्चति, आचार्याश्च पूर्वमेवोत्थिता [1] आसते, मा उत्थानाऽनुत्थानकृता [2] दोषा भूवन्निति, आगतश्चासौ सामायिकं करोतीति पूर्ववत् ।

एतद्व्रतफलं च बहुनिर्जरारूपम् । अन्यदपि च । यदाहु –

**''दिवसे दिवसे लक्खं, देइ सुवण्णस्स खंडिअं एगो ।**
**इअरो पुण सामइअं, करेइ न पहुप्पए तस्स ॥१॥** [ सं.प्र.श्रा.व्र./११३ ]
**सामाइअं कुणंतो, समभावं सावओ अ घडिअदुगं ।**
**आउं सुरेसु बंधइ, इत्तिअमित्ताइं पलिआइं ॥२॥** [ सं.प्र.श्रा.व्र./११४ ]
**बाणवइकोडीओ, लक्खा गुणसट्ठि सहस्स पणवीसं ।**
**नवसयपणवीसाए, सतिहा अडभागपलिअस्स'' ॥३॥** [ सं.प्र.श्रा.व्र./११५ ]

[3] अङ्कतोऽपि ९२५९२५९२५ $\frac{८}{९}$ + $\frac{१}{३}$ ।

**''तिव्वतवं तवमाणो, जं न वि निट्ठवइ जम्मकोडीहिं ।**
**तं समभाविअचित्तो, खवेइ कम्मं खणद्धेणं ॥४॥** [ सं.प्र.श्रा.व्र./११६ ]
**जे केऽवि गया मोक्खं, जेऽवि अ गच्छंति जे गमिस्संति ।**
**ते सव्वे सामाइअमाहप्पेणं मुणेअ[4]व्वा ॥५॥** [ सं.प्र.श्रा.व्र./११७ ]

**''हूयते न तप्यते न, दीयते वा न किञ्चन ।**
**अहो अमूल्यक्रीतीयं, साम्यमात्रेण निर्वृतिः ॥६॥** [ ] ॥३७॥

इत्युक्तं सामायिकाख्यं प्रथमं शिक्षापदव्रतम् । अथ द्वितीयं तदाह –

**संक्षेपणं गृहीतस्य, परिमाणस्य दिग्व्रते ।**
**यत्स्वल्पकालं तद् ज्ञेयं, व्रतं देशावकाशिकम् ॥३८॥**

'**दिग्व्रते**' प्रथमे गुणव्रते '**गृहीतस्य परिमाणस्य**' यावज्जीवं संवत्सरं चातुर्मासीं वा यावद् दशदिक्षु योजनशताद्यवधिकसङ्कल्पितगमनादेरित्यर्थस्तस्य '**यत्**' '**संक्षेपणं**' सङ्कोचनं गृहशय्यास्थानादेः परतो निषेधरूपम्, कियत्कालम् ? इत्याह '**स्वल्पकालं**' मुहूर्त्तप्रहरदिनाहोरात्रादि यावत् । यतः –

---

१. °ने–P. ॥ २. दोषाः अभूव° मु० । P.C. योगशास्त्रवृत्तावपि दोषा भूव° इति ॥ ३. P.C. सम्बोधप्र. अङ्कतोऽपि ९२५९२५९२५ $\frac{३}{८}$–मु० ॥ ४. °व्वं–इति सम्बोधप्रकरणे ॥

''**एगमुहूत्तं दिवसं, राइं**[1] **पंचाहमेव पक्खं वा ।**
**वयमिह धारेह**[2] **दढं, जावइअं उच्छहे कालं**'' ॥१॥ [ सं प्र.श्रा./१२० ]

**तद् देशावकाशिकं** नाम **व्रतं ज्ञेयम्** । देशे[3] —दिग्व्रतगृहीतपरिमाणस्य विभागे-ऽवकाशः —अवस्थानं देशावकाशः, सोऽत्रास्तीति ''**अतोऽनेकस्वराद्**'' [ **श्रीसि० ७-२-६** ] इतीके देशावकाशिकम् । यतः सूत्रम् —

''**दिसिवयगहिअस्स दिसापरिमाणस्स पइदिणपरिमाणकरणं देसावगासिअं**'' [ **प्रत्याख्यानावश्यके सू० १०, हारिभद्रीयवृत्तिः प० ८९४** ] ति ।

[4]दिग्व्रतसङ्क्षेपकरणम् अणुव्रतादिसङ्क्षेपकरणस्याप्युपलक्षणम् , एषामपि सङ्क्षेप-स्यावश्यं कर्त्तव्यत्वात् । प्रतिव्रतं च सङ्क्षेपकरणस्य भिन्नव्रतत्वे द्वादश व्रतानीतिसङ्ख्या-विरोधः स्याद् , इति सर्वव्रतसङ्क्षेपरूपमिदं व्रतमिति व्यवस्थितम् । अत एव सम्प्रति श्रावकाः प्रत्यहमेतद्व्रतस्पर्शनाय पूर्वं सप्तमव्रते ये यावज्जीवं गृहीताश्चतुर्दश नियमास्तानेव प्रातः सङ्क्षिप्य गृह्णन्ति सङ्कोचयन्ति च सायं प्रत्याख्यानप्रान्ते ''**देसावगासिअं पच्चक्खामि**'' इत्यादिना, गुरुसमक्षं तद् व्रतं च प्रतिपद्यन्ते । उक्तं च —

''**देसावगासिअं पुण, दिसिपरिमाणस्स निच्चसंखेवो ।**
**अहवा सव्ववयाणं संखेवो पइदिणं जो उ**'' ॥१॥ [ सं प्र.श्रा./१२२ ]

स्वापाद्यवसरे च विशेषतः सर्वव्रतसङ्क्षेपरूपमिदं ग्रन्थिसहितादिना स्वीकार्यम् । उक्तं च **दिनकृत्ये —**

''**पाणिवहमुसादत्तं, मेहुणदिणलाभणत्थदंडं च ।**
**अंगीकयं च मुत्तुं , सव्वं उवभोगपरिभोगं** ॥१॥ [ श्रा.कृ./३०० ]
**गिहि( ह )मज्झं मुत्तूणं, दिसिगमणं मुत्तु मसगजूआई ।**
**वयकाएहिं न करे, न कारवे गंठिसहिएणं**'' ॥२॥ [ श्रा.कृ/३०१ ]

दिणलाभ त्ति–विद्यमानः परिग्रहो दिनलाभश्च प्रातर्न नियमित इदानीं तु तमपि नियच्छामीत्यर्थः । 'वयकाएहिं' ति मनसो निरोद्धुमशक्यत्वाद्वाक्कायाभ्यां न करोमि न कारयामीत्यर्थः ।

---

१. P. सम्बोधप्रकरणे । राई–मु० C. ॥ २. धरेह–मु० P. । धारेह–इति सम्बोधप्रकरणे ॥ ३. तुला–योगशास्त्रवृत्तिः ३।८४ प० ४८४ तः ॥ ४. तुला–धर्मबिन्दुवृत्तिः प० ४४, पञ्चाशकवृत्तिः प० २५, योगशास्त्रवृत्तिः प० ४८५ ॥

D:\new/d-1.pm5\3rd proof

एतत्फलं चैवं —यथा हि केनचिन्मान्त्रिकेण सर्वाङ्गगतं विषधरादिविषं निज-मन्त्रप्रयोगेण दंश एवाऽऽनीयते, एवं धार्मिकेणाप्येतद्व्रतयोगेन बहुसावद्यव्यापारः सङ्क्षिप्याधिकृतदेशमात्रे आनीयते, तत्सङ्क्षेपे च कर्मणामपि सङ्क्षेपस्ततश्च क्रमेण निःश्रेयसावाप्तिरिति ॥३८॥

अभिहितं द्वितीयं शिक्षापदव्रतम् । अथ तृतीयं तदाह —

**आहार-तनुसत्कारा-ऽब्रह्म-सावद्यकर्मणाम् ।**
**त्यागः पर्वचतुष्टय्यां, तद्विदुः पौषधव्रतम् ॥३९॥**

**पर्वचतुष्टयी** अष्टमी-चतुर्दशी-पूर्णिमा-[1]अमावास्यालक्षणा तस्याम् , **आहारः**-प्रतीतः **तनुसत्कारः**-स्नानोद्वर्त्तनवर्णकविलेपनपुष्पगन्धविशिष्टवस्त्रादिः, **अब्रह्म**-मैथुनम् , **सावद्यकर्म** —कृषिवाणिज्यादि, **एतेषां** यस्**त्यागस्तत्पौषधव्रतं विदुर्जि**ना इत्यन्वयः । यतः सूत्रम् —

"**पोसहोववासे चउव्विहे पण्णत्ते तंजहा —आहारपोसहे, सरीरसक्कारपोसहे, बंभचेरपोसहे, अव्वावारपोसहे**" [ **प्रत्याख्यानावश्यक सूत्र० ११, हारिभद्रीयवृत्तिः प० ८३५** ] त्ति ।

[2]तत्र पोषं-पुष्टिं प्रक्रमाद्धर्मस्य धत्ते इति पोषधः, स एव व्रतं पोषधव्रतमित्यर्थः । पोषधोपवास इत्यप्युच्यते । तथाहि —पोषध उक्तनिर्वचनोऽवश्यमष्टम्यादिपर्वदि-नानुष्ठेयो व्रतविशेषस्तेनोपवसनम् —अवस्थानं पोषधोपवासः, अथवा पोषधः-अष्टम्यादिपर्वदिवसः उपेति सह उपावृत्तदोषस्य सतो गुणैराहारपरिहारादिरूपैर्वास उपवासः । यथोक्तम् —

"**उपावृत्तस्य दोषेभ्यः, सम्यग्वासो गुणैः सह ।**
**उपवासः स विज्ञेयो, न शरीरविशोषणम्**" ॥१॥ [ **ध.बिं.३/१८ टीका** ] इति ।

ततः, पोषधेषूपवासः पोषधोपवासः । **आवश्यकवृत्ता**वित्थं व्याख्यातत्वात् । तथाहि —

"**इह [3]पोषधशब्दो रूढ्या पर्वसु वर्त्तते, पर्वाणि चाष्टम्यादितिथयः, पूरणात् पर्व धर्मोपचयहेतुत्वादित्यर्थः । [4]पोषधेषूपवासनं पोषधोपवासः नियमविशेषाभिधानं चेदमिति**" [ **आवश्यकहारिभद्रीयवृत्तिः प० ८३५** ] ।

१. तुला-आवश्यकचूर्णिः प० ३०४ ॥ २. तुला-योगशास्त्रवृत्तिः ३/८५, प० ४८५ ॥ ३. पौषध० इति आवश्यकहारिभद्र्यां वृत्तौ ॥ ४. पौषधे उपवसनं-इति आवश्यकहारिभद्र्यां वृत्तौ ॥

इयं च व्युत्पत्तिरेव प्रवृत्तिस्त्वस्य शब्दस्याहारादिचतुष्कवर्जनेषु, **समवायाङ्गवृत्तौ श्रीअभयदेवसूरि**भिरेवमेव व्याख्यातत्वात्। पौषधश्चाहार १ शरीरसत्कार २ ब्रह्मचर्य[1] ३-ऽव्यापार ४भेदाच्चतुर्द्धा। एकैकोऽपि देशसर्वभेदाद् द्विधेत्यष्टधा। तत्राहारपोषधो —देशतो विवक्षितविकृतेरविकृतेराचाम्लस्य वा सकृदेव द्विरेव वा भोजनमिति। सर्वतस्तु चतुर्विधस्याप्याहारस्याहोरात्रं यावत्प्रत्याख्यानम् १। शरीरसत्कारपोषधो देशतः शरीर-सत्कारस्यैकतरस्याकरणम्, सर्वतस्तु सर्वस्यापि तस्याकरणम् २। ब्रह्मचर्यपोषधोऽपि देशतो दिवैव रात्रावेव सकृदेव द्विरेव वा स्त्रीसेवां मुक्त्वा ब्रह्मचर्यकरणम्, सर्वतस्तु अहोरात्रं यावत् ब्रह्मचर्यपालनम् ३। [2]कुव्यापारपोषधस्तु —देशत एकतरस्य कस्यापि कुव्यापारस्याकरणम्, सर्वतस्तु सर्वेषां कृषि-सेवा-वाणिज्य-पाशुपाल्य-गृहकर्मादी-नामकरणम् ४।

इह च देशतः कुव्यापारनिषेधे सामायिकं करोति वा न वा, सर्वतस्तु कुव्यापारनिषेधे नियमात् करोति सामायिकम् अकरणे तु तत्फलेन वञ्च्यते। सर्वतः पोषधव्रतं च चैत्यगृहे वा साधुमूले वा गृहे वा पौषधशालायां वा त्यक्तमणिसुवर्णाद्यलङ्कारो व्यपगतमाला-विलेपनवर्णकः परिहृतप्रहरणः प्रतिपद्यते, तत्र च कृते पठति, पुस्तकं वाचयति, धर्मध्यानं ध्यायति, यथा —एतान् साधुगुणानहं मन्दभाग्यो न समर्थो धारयितुमिति [3]**आवश्यकचूर्णि-श्रावकप्रज्ञप्तिवृत्त्या**द्युक्तो विधिः।

**योगशास्त्रवृत्तौ** त्वयमधिकस्तथाहि —"**यद्याहार-शरीरसत्कार-ब्रह्मचर्यपोषधवत् कुव्यापारपोषधमप्यन्यत्रानाभोगेनेत्याद्याकारोच्चारणपूर्वकं प्रतिपद्यते, तदा सामायिक-मपि सार्थकं भवति, स्थूलत्वात् पोषधप्रत्याख्यानस्य, सूक्ष्मत्वाच्च सामायिक[4]व्रतस्येति। तथा पोषधवताऽपि [5]सावद्यव्यापारो न कार्य एव। ततः सामायिकमकुर्वंस्तल्लाभाद्-भ्रश्यतीति। यदि पुनः सामाचारीविशेषात् सामायिकमिव द्विविधं त्रिविधेनेत्येवं पोषधं प्रतिपद्यते, तदा सामायिकार्थस्य पोषधेनैव गतत्वान्न सामायिकमत्यन्तं फलवत्। यदि परं पोषधसामायिकलक्षणं व्रतद्वयं प्रतिपन्नं मयेत्यभिप्रायात् फलवदिति**" **[ यो०शा०३/ ८५. प० ४८६-७ ]**

---

१. तुला-आवश्यकचूर्णिः प० ३०४, पञ्चाशकवृत्तिः प० २५, योगशास्त्रवृत्तिः ३८५ प० ४८६॥ २. C.P.। कु(अ)व्यापारपोषधस्तु-मु०। कुव्यापारनिषेधपोषधस्तु-इति योगशास्त्रवृत्तौ प० ४८६॥ ३. द्रष्टव्या आवश्यकचूर्णिः प० ३०४, श्रावकप्रज्ञप्तिवृत्तिः गा० ३२२ प० १९५॥ ४. °व्रत° योगशास्त्रवृत्तौ नास्ति॥ ५. सावद्यव्यापारा न कार्या एव-इति योगशास्त्रवृत्तौ प० ४८७॥

D:\new/d-1.pm5\3rd proof

[1]एतेषां चाहारादिपदानां चतुर्णां देश-सर्वविशेषितानामेकद्व्यादिसंयोगजा अशीति-र्भङ्गा भवन्ति ।

तथाहि—एककसंयोगाः प्रागुक्ता एवाष्टौ ।

द्विकसंयोगाः षट्, एकैकस्मिंश्च द्विकयोगे देदे १ देस २ सदे ३ सस ४ एवं चत्वारश्चत्वारो भङ्गा भवन्ति, सर्वे चतुर्विंशतिः ।

त्रिकयोगाश्चत्वारो भवन्ति, एकैकस्मिंश्च त्रिकयोगे देशसर्वापेक्षया देदेदे १ देदेस २ देसदे ३ देसस ४ सदेदे ५ सदेस ६ ससदे ७ ससस ८ एवमष्टावष्टौ भवन्ति, सर्वे द्वात्रिंशत् ।

चतुष्कयोग एकः, तत्र देशसर्वापेक्षया षोडशभङ्गा देदेदेदे १ देदेदेस २ देदेसदे ३ देदेसस ४ देसदेदे ५ देसदेस ६ देससदे ७ देससस ८ सदेदेदे ९ सदेदेस १० सदेसदे ११ सदेसस १२ ससदेदे १३ ससदेस १४ सससदे १५ ससस‍स १६ एवं सर्वेषां मीलनेऽशीतिर्भङ्गाः स्युः ।

स्थापनायन्त्रकाणि चेमानि—एतेषां मध्ये पूर्वाचार्यपरम्परया समाचारीविशेषेणा-हारपोषध एव देशसर्वभेदाद् द्विधापि सम्प्रति क्रियते, निरवद्याहारस्य सामायिकेन सहाविरोधदर्शनात् । सर्वसामायिकव्रतवता साधुना उपधानतपोवाहिश्रावकेणाप्या-हरग्रहणात् । शेषास्त्रयः पोषधाः, सर्वत एवोच्चार्यन्ते, देशतस्तैः प्रायः सामायिकस्य विरोधात् । यतः सामायिके "**सावज्जं जोगं पच्चक्खामि**" इत्युच्चार्यते । शरीरसत्का-रादित्रये तु प्रायः सावद्यो योगः स्यादेव । निरवद्यदेहसत्कारव्यापारावपि विभूषादि-लोभनिमित्तत्वेन सामायिके निषिद्धावेव । आहारस्य त्वन्यथा शक्त्यभावे धर्मानुष्ठान-निर्वाहार्थं साधुवदुपासकस्याप्यनुमतत्वात् । उक्तं **चावश्यकचूर्णौ**—

## पोषधस्याशीतिभङ्ग्यन्त्रकाणि

| एकसंयोगा देशतः ४ | एककभङ्गाः सर्वतः ४ | आहारशरीरयोगे ४ | आहारब्रह्मयोगे ४ |
|---|---|---|---|
| आ०पो०दे० १ | आ०पो०स० ५ | आ०पो०दे०स०पो०दे० १ | आ-पो०दे०बं०पो०दे० ५ |
| स०पो०दे० २ | स०पो०स० ६ | आ०पो०दे०स०पो०स० २ | आ०पो०दे०बं०पो०स० ६ |
| बं०पो०दे० ३ | बं०पो०स० ७ | आ०पो०दे०स०पो०दे० ३ | आ०पो०स०बं०पो०दे० ७ |
| अ०पो०दे० ४ | अ०पो०स० ८ | आ०पो०स०स०पो०स० ४ | आ०पो०स०बं०पो०स० ८ |

१. तुला–श्राद्धप्रतिक्रमणवृत्तिः प० १६३ ॥

| आहारव्यापारयोगे ४ | शरीरब्रह्मयोगे ४ | शरीराव्यापारयोगे ४ | ब्रह्माव्यापारयोगे ४ |
|---|---|---|---|
| आ०पो०दे०अ०पो०दे०९ | स०पो०दे०बं०पो०दे०१३ | स०पो०दे०अ०पो०दे०१७ | बं०पो०दे०अ०पो०दे०२१ |
| आ०पो०दे०अ०पो०स१० | स०पो०दे०बं०पो०स०१४ | स०पो०स०अ०पो०स०१८ | बं०पो०दे०अ०पो०स० २२ |
| आ०पो०स०अ०पो०दे०११ | स०पो०स०बं०पो०दे०१५ | स०पो०स०अ०पो०दे०१९ | बं०पो०स०अ०पो०दे०२३ |
| आ०पो०स०अ०पो०स०१२ | स०पो०स०बं०पो०स०१६ | स०पो०स०अ०पो०स०२० | बं०पो०स०अ०पो०स०२४ |

## आहारादिचतुर्णां त्रिकयोगे भङ्गाः ४ । तत्रैकेकस्मिन् दे०दे०दे० इत्याद्यष्टयोजने ३२

### आहारशरीरब्रह्मयौगिकस्य दे०दे०दे० इत्यादियोगेऽष्टौ

आ०पो०दे०स०पो०दे०बं०पो०दे० १
आ०पो०दे०स०पो०दे०बं०पो०स० २
आ०पो०दे०स०पो०स०बं०पो०दे० ३
आ०पो०दे०स०पो०स०बं०पो०स० ४
आ०पो०स०स०पो०दे०बं०पो०दे० ५
आ०पो०स०स०पो०दे०बं०पो०स० ६
आ०पो०स०स०पो०स०बं०पो०दे० ७
आ०पो०स०स०पो०स०बं०पो०स० ८

### आहारशरीरअव्यापारयौगिकस्य दे०दे०दे० इत्यादियोगेऽष्टौ यथा

आ०पो०दे०स०पो०दे०अ०पो०दे० ९
आ०पो०दे०स०पो०दे०अ०पो०स० १०
आ०पो०दे०स०पो०स०अ०पो०दे० ११
आ०पो०दे०स०पो०स०अ०पो०स० १२
आ०पो०स०स०पो०दे०अ०पो०दे० १३
आ०पो०स०स०पो०दे०अ०पो०स० १४
आ०पो०स०स०पो०स०अ०पो०दे० १५
आ०पो०स०स०पो०स०अ०पो०स० १६

### आहारब्रह्मअव्यापारयौगिकस्य दे०दे०दे० इत्यादियोगेऽष्टौ यथा

आ०पो०दे०बं०पो०दे०अ०पो०दे० १७
आ०पो०दे०बं०पो०दे०अ०पो०स० १८
आ०पो०दे०बं०पो०स०अ०पो०दे० १९
आ०पो०दे०बं०पो०स०अ०पो०स० २०
आ०पो०स०बं०पो०दे०अ०पो०दे० २१
आ०पो०स०बं०पो०दे०अ०पो०स० २२
आ०पो०स०बं०पो०स०अ०पो०दे० २३
आ०पो०स०बं०पो०स०अ०पो०स० २४

### शरीरब्रह्मअव्यापारयौगिकस्य पूर्ववत् अष्टभङ्गाः ।

स०पो०दे०बं०पो०दे०अ०पो०दे० २५
स०पो०दे०बं०पो०दे०अ०पो०स० २६
स०पो०दे०बं०पो०स०अ०पो०दे० २७
स०पो०दे०बं०पो०स०अ०पो०स० २८
स०पो०स०बं०पो०दे०अ०पो०दे० २९
स०पो०स०बं०पो०दे०अ०पो०स० ३०
स०पो०स०बं०पो०दे०अ०पो०दे० ३१
स०पो०स०बं०पो०स०अ०पो०स० ३२

**चतुःसंयोगिकस्य दे०दे०दे०दे इत्यादियोगे १६ भङ्गाः ।**

आ०पो०दे०स०पो०दे०बं०पो०दे०अ०पो०दे० १

आ०पो०दे०स०पो०दे०बं०पो०दे०अ०पो०स० २

आ०पो०दे०स०पो०दे०बं०पो०स०अ०पो०दे० ३

आ०पो०दे०स०पो०दे०बं०पो०स०अ०पो०स० ४

आ०पो०दे०स०पो०स०बं०पो०दे०अ०पो०दे० ५

आ०पो०दे०स०पो०स०बं०पो०दे०अ०पो०स० ६

आ०पो०दे०स०पो०स०बं०पो०स०अ०पो०दे० ७

आ०पो०दे०स०पो०स०बं०पो०स०अ०पो०स० ८

आ०पो०स०स०पो०दे०बं०पो०दे०अ०पो०दे० ९

आ०पो०स०स०पो०दे०बं०पो०दे०अ०पो०स० १०

आ०पो०स०स०पो०दे०बं०पो०स०अ०पो०दे० ११

आ०पो०स०स०पो०दे०बं०पो०स०अ०पो०स० १२

आ०पो०स०स०पो०स०बं०पो०दे०अ०पो०दे० १३

आ०पो०स०स०पो०स०बं०पो०दे०अ०पो०स० १४

आ०पो०स०स०पो०स०बं०पो०स०अ०पो०दे० १५

आ०पो०स०स०पो०स०बं०पो०स०अ०पो०स० १६

पौषधव्रताधिकारे तु[१] –

''**तं सत्तिओ करिज्जा, तवो अ जं वण्णिओ समासेणं ।**
**देसावगासिएणं, जुत्तो सामाइएणं वा**'' ॥१॥ [ तुला–आव.चू.प.३०४ ]

**निशीथभाष्ये**ऽप्युक्तं पौषधिनमाश्रित्य –

''**उद्दिट्ठकडं पि सो भुंजे**'' [ नि.भा. ] इति, **चूर्णौ च** ''**जं च उद्दिट्ठकडं तं कडसामाइओऽवि भुंजे**'' [ नि.चू. ] इति ।

इदं च पोषधसहितसामायिकापेक्षयैव सम्भाव्यते, केवलसामायिके तु मुहूर्त्तमात्रमानत्वेन पूर्वाचार्यपरम्परादिनाऽऽहारग्रहणस्याक्रियमाणत्वात् । **श्रावकप्रतिक्रमणसूत्रचूर्णा**वप्युक्तम् –

१. तु–श्राद्धप्रतिक्रमणवृत्तौ नास्ति ॥

''जइ देसओ आहारपोसहिओ तो भत्तपाणस्स गुरुसक्खिअं पारावित्ता आवस्सिअं करित्ता ईरिआसमिइए गंतुं घरं इरियावहिअं पडिक्कमइ, आगमणालोअणं च करेइ, चेइए वंदेइ, तओ संडासयं पमज्जित्ता पाउंछणे निसीअइ, भायणं पमज्जइ, जहोचिए अ भोअणे परिवेसिए पंचमंगलमुच्चारेइ, सरेइ पच्चक्खाणं, तओ वयणं पमज्जित्ता'' –

''[1]असरसरं अचवचवं, अदुअमविलंबिअं अपरिसाडिं ।
मणवयणकायगुत्तो, भुंजइ साहु व्व उवउत्तो ॥१॥ [ श्रा.प्र.सू.चू. ]

जायामायाए भुच्चा फासुअजलेण मुहसुद्धिं काउं नवकारसरणेण उट्ठाइ, देवे वंदइ, वंदणयं दाउं संवरणं काऊण पुणो वि पोसहसालाए गंतुं [2]सज्झाइंतो चिट्ठइ'' त्ति [ श्रा०प्र०सू०चू० ] ।

अतो देशपोषधे सामायिकसद्भावे यथोक्तविधिना भोजनमागमानुमतमेव दृश्यते ।

[3]पोषधग्रहणपालनपारणविधिस्त्वयम् –

''इह जंमि दिणे सावओ पोसहं लेइ, तंमि दिणे घरवावारं वज्जिअ पोसहसालाए गहियपोसहजुग्गोवगरणो पोसहसालं साहुसमीवे वा गच्छइ, तओ अंगपडिलेहणं करिय, उच्चारपासवणे थंडिलं पडिलेहिय, गुरुसमीवे नवकारपुव्वं वा ठवणायरियं ठावइत्ता, इरियं पडिक्कमिय, खमासमणेण वंदिय, पोसहमुहपत्तिं पडिलेहइ । तओ खमासमणं दाउं उद्धट्ठिओ भणइ 'इच्छाकारेण संदिसह भगवन् ! पोसहं संदिसावेमि' बीयखमासमणेण 'पोसहं ठामि' त्ति भणिय नमुक्कारपुव्वं पोसहमुच्चारेइ ।

'करेमि भंते ! पोसहं आहारपोसहं सव्वओ देसओ वा, सरीरसक्कारपोसहं सव्वओ, बंभचेरपोसहं सव्वओ, अव्वावारपोसहं सव्वओ चउव्विहे पोसह ठामि जाव अहोरत्तं पज्जुवासामि, दुविहं तिविहेणं, मणेणं वायाए काएणं, न करेमि न कारवेमि, तस्स भंते ! पडिक्कमामि निंदामि गरिहामि अप्पाणं वोसिरामि' –

एवं पुत्तिपेहणपुव्वं खमासमणदुगेण सामाइअं करिय पुणो खमासमणदुगेण जइ वरिसारत्तो तओ कट्ठासणगं सेसट्ठमासेसु पाउंछणगं संदिसाविअ खमासमणदुगेण सज्झायं करेइ ।

तओ पडिक्कमण पुव्वं करिय खमासमणदुगेण बहुवेलं संदिसाविय खमा-

---

१. असुरसुरं–मु० अमरसरं–L. । असरमरं–P. । C. प्रतौ श्राद्धप्रतिक्रमणवृत्तावपि [प० १६३] असरसरं–इति पाठः ॥ २. सज्झायंतो–मु० । सज्झाइंतो–L.P.C. ॥ ३. तुला–श्राद्धविधिवृत्तिः प० १५३ ॥

समणपुव्वं पडिलेहणं करेमि त्ति भणिय मुहपत्तिं पाउंछणगं परिहरणं च पेहिय, साविया वि पुण पुत्तिं पाउंछणगमुत्तरीयं कंचुगं साडियं च पेहिय, खमासमणं दाउं भणइ 'इच्छकारि भगवन् ! पडिलेहणा पडिलेहावउ' तओ इच्छं ति भणिय, ठवणायरियं पेहिय, ठविय, खमासमणपुव्वं उवहिमुहपत्तिं पेहिय खमासमणदुगेण उवहिं संदिसाविय वत्थकंबलाइ पडिलेहेइ, तओ पोसहसालं जयणाए पमज्जिय, कज्जयं उद्धरिय, परिट्ठविय, इरियं पडिक्कमिय गमणागमणमालोइय खमासमणपुव्वं मंडलीए साहु व्व सज्झायं करेइ ।

तओ पढइ गुणइ पोत्थयं वा वाएइ, जाव पउणपोरिसी, तओ खमासमणपुव्वं पुत्तिं पेहिय तहेव सज्झायइ, जाव कालवेला, जइ देवा वंदियव्वा हुंति, तो आव-स्सियापुव्वं चेइयहरे देवे वंदइ, जइ पारणइ तो पच्चक्खाणे पुण्णे खमासमणपुव्वं पुत्तिं पेहिय खमासमणं दाउं भणइ –

''पारावहं[१] पोरिसी पुरिमड्ढो वा चउआहार कओ तिहार कओ आसि, निव्वीएणं आयंबिलेणं एगासणेणं पाणाहारेण वा जा काइ वेला तीए ।

तओ देवे वंदिअ सज्झायं करिय नियगिहे गंतुं जइ हत्थसयाओ बाहिं तो इरियं पडिक्कमिय आगमणमालोइय अहासंभवं अतिहिसंविभागवयं फासिय निच्चले आसणे उवविसिय हत्थे पाए मुहं च पडिलेहित्ता नमुक्कारं भणिय फासुयमरत्तदुट्ठो जिमेइ । पोसहसालाए वा पुव्वसंदिट्ठनियसयणेहिं आणियं, नो भिक्खं हिंडइ ।

तओ पोसहसालाए गंतुं इरियं पडिक्कमिय देवे वंदिय वंदणं दाउं तिहारस्स चउहारस्स वा पच्चक्खाइ, जइ सरीरचिंताए अट्ठो तो आवस्सियं करिय साहु व्व उवउत्तो निज्जीवे थंडिले गंतुं विहिणा उच्चारपासवणं वोसिरिय सोयं करिय पोसहसालाए आगंतुं इरियं पडिक्कमिय खमासमणपुव्वं भणइ-इच्छाकारेण संदिसह भगवन् ! गमागमण आलोयउ ! इच्छं वसति हुंता आवसी करी अवरदक्खिणदिसि जाइउ दिसालोअं करिय अणुजाणह जस्सुग्गह त्ति भणिय, संडासए थंडिलं च पमज्जिअ, उच्चारपासवणं वोसिरिय, निसीहियं करिय, पोसहसालाए पविट्ठा, आवंतजंतेहिं जं खंडिअं जं विराहिअं तस्स मिच्छा मि दुक्कडं' ।

तओ सज्झायं करेति[२] जाव पच्छिमपहरो, तओ खमासमणपुव्वं पडिलेहणं करेमि, बीयखमासमणेण पोसहसालं पमज्जेमि त्ति भणिय सावओ पुत्तिं पाउंछणगं च

---

१. °ह–मु० । P.L.C. श्राद्धविधिवृत्तावपि °हं–इति पाठः ॥ २. करेमि–L.P.C. । करेइ–इति श्राद्धविधिवृत्तौ पाठः ॥

पहिरणगं पेहेइ, साविया पुण पुत्तिं पाउंछणगं साडिअं कंचुगमुत्तरीयं च पेहेइ, तओ ठवणायरियं च पेहिय, पोसहसालं पमज्जिय खमासमणपुव्वं उवहिमुहपत्तिं पेहिय खमासमणेण मंडलीए जाणुट्ठिओ सज्झायं करिय वंदणं दाउं पच्चक्खाणं करिय खमासमणदुगेण उवहिं संदिसाविय वत्थकंबले पडिलेहिय सज्झायं करेइ । जो पुण अभत्तट्ठी सो सव्वोवहिअंते पहिरणगं, साविया पुण गोसि व्व उवहिं पडिलेहेइ, कालवेलाए पुण खमासमणपुव्वं सज्झाए[1] अंतो बहिं च बारस बारस काइय उच्चारभूमीओ पेहेइ । यतः —

''बारस बारस तिन्नि अ, काइअउच्चारकालभूमीओ ।
अंतो बहिं च[2] अहिआसे, अणहिआसेण पडिलेहा'' ॥१॥ [ उप.मा./३७५ ]

स्थापना

| वडीनीति संथारानइं समीपिं | लघुनीति |
|---|---|
| आगाढे आसन्ने उच्चारे पासवणे अणहियासे १ | आगाढे आसन्ने पासवणे अणहियासे १ |
| आगाढे मज्झे उच्चारे पासवणे अणहियासे २ | आगाढे मज्झे पासवणे अणहियासे २ |
| आगाढे दूरे उच्चारे पासवणे अणहियासे ३ | आगाढे दूरे पासवणे अणहियासे ३ |
| उपाश्रयनां बार मांहिलइं पासइं | |
| आगाढे आसन्ने उच्चारे पासवणे अहियासे १ | आगाढे आसन्ने पासवणे अहियासे १ |
| आगाढे मज्झे उच्चारे पासवणे अहियासे २ | आगाढे मज्झे पासवणे अहियासे २ |
| आगाढे दूरे उच्चारे पासवणे अहियासे ३ | आगाढे दूरे पासवणे अहियासे ३ |
| उपाश्रयद्वार बाहिरलइं पासइं | |
| अणागाढे आसन्ने उच्चारे पासवणे अणहियासे १ | अणागाढे आसन्ने पासवणे अणहियासे १ |
| अणागाढे मज्झे उच्चारे पासवणे अणहियासे २ | अणागाढे मज्झे पासवणे अणहियासे २ |
| अणागाढे दूरे उच्चारे पासवणे अणहियासे ३ | अणागाढे दूरे पासवणे अणहियासे ३ |
| स्थण्डिलस्थाने | |
| अणागाढे आसन्ने उच्चारे पासवणे अहियासे १ | अणागाढे आसन्ने पासवणे अहियासे १ |
| अणागाढे मज्झे उच्चारे पासवणे अहियासे २ | अणागाढे मज्झे पासवणे अहियासे २ |
| अणागाढे दूरे उच्चारे पासवणे अहियासे ३ | अणागाढे दूरे पासवणे अहियासे ३ |

---

१. सिज्जाए-L.P. श्राद्धविधिवृत्तौ च । सज्जाए-C. ॥ २. च-मु० नास्ति । L.P.C. उपदेशमालायामपि अस्ति ॥

तओ पडिक्कमणं करिय सइ संभवे साहूणं विस्सामणा खमासमणं दाऊण सज्झायं करेइ । जाव पोरिसी, तओ खमासमणपुव्वं भणइ –इच्छाकारेण संदिसह भगवन् ! बहुपडिपुन्ना पोरिसी राईसंथारए ठामि, तओ देवे वंदिय सरीरचिंतं सोहिय सव्वं बाहिरुवहिं पेहिय जाणुवरिं संथारुत्तरपट्टं मेलिय जओ पाए भूमिं पमज्जिय सणियं संथरइ, तओ वामपाएण संथारं संघट्टिय पुत्तिं पेहिय निसीही ३ नमो खमासमणाणं अणुजाणह जिट्ठिज्ज[1] त्ति भणंतो संथारए उवविसिय नमुक्कारतिअं तिन्नि वारे सामाइयं कड्डिय –

"अणुजाणह परमगुरू, गुरुगुणरयणेहिं मंडियसरीरा ।
बहुपडिपुन्ना पोरिसि, राईसंथारए ठामि ॥१॥ [ सं.पो. ]
अणुजाणह संथारं, बाहुवहाणेण वामपासेणं ।
कुक्कुडिपायपसारण, अतरंत पमज्जए भूमिं ॥२॥ [ ओ.नि./२०५ ]
संकोइयसंडासा, उव्वट्टंते य कायपडिलेहा ।
दव्वाइ उवओगं, ऊसासनिरुंभणाऽऽलोए ॥३॥ [ ओ.नि./२०६ ]
जइ मे हुज्ज पमाओ, इमस्स देहस्स इमाइ रयणीए ।
आहारमुवहि देहं, सव्वं तिविहेण वोसिरियं" ॥४॥ [ सं.पो. ]

चत्तारि मंगलमिच्चाइ भावणा भाविय नमुक्कारं समरंतो रओहरणाइणा सरीरगं संथारगस्सुवरिभागं च पमज्जिय वामपासेण बाहूवहाणेण सुयइ । जइ सरीरचिंताए अट्ठो संथारगं अन्नेण संघट्टाविय आवस्सियं करिय पुव्वपेहियथंडिले काइअं वोसिरिय इरियं पडिक्कमिय गमणागमणमालोइअ जहन्नेण वि तिन्नि गाहाओ सज्झाइय नमुक्कारं समरंतो तहेव सुयइ ।

पच्छिमजामे इरियं पडिक्कमिय कुसुमिणदुसुमिणकाउस्सग्गं चिइवंदणं च काउं आयरियाइ वंदिय सज्झायं करेइ, जाव पडिक्कमणवेला, तओ पुव्वं व पडिक्कमणाइ जाव मंडलीए सज्झाअं करिअ जइ पोसह पारिउकामो तो खमासमणं दाउं भणइ –

'इच्छाकारेण संदिसह भगवन् ! मुहुपत्तिं पडिलेहेमि' गुरू भणइ 'पडिलेहह' तओ पुत्तिं पेहिय खमासमणं दाउं भणइ 'इच्छाकारेण संदिसह पोसह पारउ ? गुरू भणइ 'पुणो वि कायव्वं[2]' बीयखमासमणेणं भणइ 'पोसह पारिओ' गुरू भणइ 'आयरो न मुत्तव्वो' तओ उद्धट्ठिओ नमुक्कारं भणिय जाणुठिओ भूमिठियसिरो भणइ –

---

१. जिट्टुज्ज त्ति–मु० श्राद्धविधिवृत्तौ च प० १५४ । जिट्ठिज त्ति–C. ॥ जिट्ठिज्ज त्ति–P.L. ॥
२. कायव्वं (व्वो)–मु० ॥

**"सागरचंदो कामो, चंदवडिंसो सुदंसणो धन्नो ।**
**जेसिं पोसहपडिमा, अखंडिआ जीवियंते वि ॥१॥**
**धन्ना सलाहणिज्जा, सुलसा आणंद कामदेवा य ।**
**जेसि पसंसइ भयवं, [1]दढव्वयं तं ( दढव्वयत्तं ) महावीरो ॥२॥**

**[2]पोसहविधिं लीधउ विधिं पारिओ विधि करतां जइ कांई अविधिखंडनविराधन [3]मनि वचनि कायाइं तस्स मिच्छा मि दुक्कडं" —**

**एवं सामाइअं पि, नवरं —**

**"साइयवयजुत्तो, जाव मणे होइ नियमसंजुत्तो ।**
**छिंदइ असुहं कम्मं, सामाइअ जत्तिआ वारा ॥१॥**
**छउमत्थो मूढमाणो, कित्तिअमित्तं च संभरइ जीवो ।**
**[4]जं च न सुमरामि अहं, मिच्छा मि दुक्कडं तस्स ॥२॥**
**सामाइअपोसहसुट्ठिअस्स जीवस्स जाइ जो कालो ।**
**सो सफलो बोधव्वो, सेसो संसारफलहेऊ" ॥३॥**

**तओ सामायिक [5]विधइं लिधउ इच्चाई भणइ, एवं दिवसपोसहं पि, नवरं 'जाव दिवसं पज्जुवासामि' त्ति भणइ, देवसिआइपडिक्कमणे कए पारेउं कप्पइ ।**

**रात्रिपोषधमप्येवं, नवरं मज्झण्हाओ परओ जाव दिवसस्स अंतोमुहुत्तो ताव घिप्पइ, तहा '[6]दिवससेसं रत्तिं पज्जुवासामि' त्ति भणइ, पोसहपारणए साहुसंभवे नियमा अतिहिसंविभागवयं फासियं पारेयव्वं" ।**

अत्र च पर्वचतुष्टयीति तस्यामवश्यकर्त्तव्यत्वोपदर्शनार्थमुक्ता, न तु तस्यामेवेति नियमदर्शनाय,

**"सव्वेसु कालपव्वेसु , पसत्थो जिणमए तहा जोगो ।**
**अट्ठमिचउद्दसीसुं , निअमेण हविज्ज पोसहिओ"** ॥ त्ति **आवश्यकचूर्ण्यादौ [ भा.२ प० ३०४ ]** तथादर्शनात् ।

---

१. दढव्वयं तं(दढव्वयत्तं)–मु० । दढव्वयं तं–L.C.P. । दढव्वयत्तं–इति श्राद्धविधिवृत्तौ प० १५५ ॥ २. L.P.C. । पोसहविधे लीधउ विधे पारिओ–मु० । पोसहविधिइं लिअं विधिइं पारियं–इति श्राद्धविधिवृत्तौ प० १५५ ॥ ३. मने वचने–मु० । L.P.C. श्राद्धविधिवृत्तावपि [प० १५५] मनि वचनि–इति ॥ ४. जं च (न)–मु० C. । P.L. श्राद्धविधिवृत्तावपि जं च न–इति ॥ ५. विधि लिधउ–L. । विधइ लिउं–P. । विधिं लिअं–इति श्राद्धविधिवृत्तौ प० १५५ ॥ ६. दिवसं सेसं–मु० । दिवं सेसं C. । L.P. श्राद्धविधिवृत्तावपि [४.१५५] दिवससेसं–इति ॥

न च ''**चाउदसट्ठमुद्दिट्ठपुण्णिमासीसु पडिपुण्णं पोसहं अणुपालेमाणा**'' [ ] इति **सूत्रकृदङ्गादौ** श्रावकवर्णनाधिकारीयाक्षरदर्शनादष्टम्यादिपर्वस्वेव पोषधः कार्यो न शेष-दिवसेष्विति वाच्यम् ।

**विपाकश्रुताङ्गे सुबाहुकुमार**कृतपौषधत्रयाभिधानात् । तथा च सूत्रम् –

''**तए णं से सुबाहुकुमारे अन्नया कयाइ चाउद्दसट्ठमुद्दिट्ठपुण्णमासीसु जाव पोसह-सालाए पोसहिए अट्ठमभत्तिए पोसहं पडिजागरमाणो विहरइ**'' **[ विपा. श्रुत. २, अध्य. १ पृ. ६३८ ]** त्ति ।

एतद्व्रतफलं त्वेवमुक्तम् –

''**कंचणमणिसोवाणं, थंभसहस्सुस्सिअं सुवण्णतलं ।**
**जो कारिज्ज जिणहरं, तओ वि तवसंजमो अहिओ**'' ॥१॥ **[ सं.प्र.श्रा./१३० ]**

एकस्मिन् सामायिके मुहूर्त्तमात्रे ''**बाणवई कोडीओ०**'' **[ सम्बोधप्र.श्रा./११५ ]** इतिगाथया प्रागुक्तलाभः । स त्रिंशन्मुहूर्त्तमानेऽहोरात्रपोषधे त्रिंशद्गुणो बादरवृत्त्या । स चायम् –

''**सत्तत्तरि सत्त सया, सतहत्तरि सहसलक्खकोडीओ ।**
**सगवीसं कोडीसया, नवभागा सत्त पलिअस्स**'' ॥१॥ **[ सं.प्र.श्रा./१३४ ]**

अङ्कतोऽपि [१]२७७७७७७७७७७$\frac{७}{९}$ एतावत्पल्यायुर्बन्ध एकस्मिन् पोषधे ॥३९॥

इति प्रतिपादितं तृतीयं शिक्षापदव्रतम् । अथ चतुर्थं तदाह –

**आहारवस्त्रपात्रादेः, प्रदानमतिथेर्मुदा ।**
**उदीरितं तदतिथिसंविभागव्रतं जिनैः ॥४०॥**

अतिथिः –तिथिपर्वादिलौकिकव्यवहारपरिवर्जको भोजनकालोपस्थायी भिक्षु-विशेषः । उक्तं च –

''**तिथिपर्वोत्सवाः सर्वे, त्यक्ता येन महात्मना ।**
**अतिथिं तं विजानीयात् , शेषमभ्यागतं विदुः**'' ॥१॥ [ ] इति ।

श्रावकस्य साधुरेवेति । तस्**यातिथेः** साधोः '**मुदा**' हर्षेण गुरुत्वभक्त्यतिशयेन न त्वनुकम्पादिनेत्यर्थः '**प्रदानं**' प्रकर्षेण मनोवाक्कायशुद्ध्या दानं –विश्राणनं कस्य ? **आहार-वस्त्र-पात्रादेः**' तत्राहारोऽशनादिः चतुर्विधः, वस्त्रं प्रतीतम् । [२]कम्बलो वा, पात्रं

---

१. ७७७७७७७७७७८$\frac{५}{७}$°।$\frac{५}{७}$° इति सम्बोधप्रकरणे ॥ २. कम्बल–L. ॥

पतद्ग्रहादि, आदिशब्दात् वसति-पीठ-फलक-शय्या-संस्तारकादिग्रहणम् । अनेन हिरण्यादिदाननिषेधः । तेषां यतेरनधिकारित्वात् । **'तदतिथिसंविभागव्रतं'** **'जिनैः'** अर्हद्भिः **'उदीरितं'** प्रतिपादितम् ।

तत्र अतिथेः —उक्तलक्षणस्य सङ्गतः —आधाकर्मादिद्विचत्वारिंशद्दोषरहितो विशिष्टो भागो —विभागः पश्चात्कर्मादिदोषपरिहारायांशदानरूपो[1]ऽतिथिसंविभागस्तद्रूपं व्रतम् —अतिथिसंविभागव्रतम् । आहारादीनां च न्यायार्जितानां प्रासुकैषणीयानां कल्पनीयानां च देश-काल-श्रद्धा-सत्कार-क्रमपूर्वकमात्मानुग्रहबुद्ध्या यतिभ्यो दानमित्यर्थः ।

तत्र शाल्यादिनिष्पत्तिभागो देशः १, सुभिक्ष-दुर्भिक्षादिः कालः २, विशुद्धश्चित्त-परिणामः श्रद्धा ३, अभ्युत्थानासनदानवन्दनानुव्रजनादिः सत्कारः ४, यथासम्भवं पाकस्य पेयादिपरिपाट्या प्रदानं क्रमः ५, तत्पूर्वकं देशकालाद्यौचित्येनेत्यर्थः । यदूचुः —

**''[2]नायागयाणं कप्पणिज्जाणं अन्नपाणाईणं दव्वाणं देस-काल-सद्धा-सक्कारकमजुअं पराए भत्तीए आयाणुग्गहबुद्धीए संजयाणं[3] दाणं अतिहि-संविभागो''** [ ]।

अनूदितं चैतत् **श्रीहेमसूरिभिः —**

**''प्रायः शुद्धैस्त्रिविधविधिना प्रासुकैरेषणीयैः,**
**[4]कल्पप्रायैः स्वयमुपहितैर्वस्तुभिः पानकाद्यैः ।**
**काले प्राप्तान् सदनमसमश्रद्धया साधुवर्गान् ,**
**धन्याः केचित् परमविहिता हन्त [5]सन्मानयन्ति ॥१॥ [ यो.शा.वृ. ]**
**अशनमखिलं खाद्यं स्वाद्यं भवेदथ [6]पानकं,**
**यतिजनहितं वस्त्रं पात्रं [7]सकम्बल-प्रोञ्छनम् ।**
**वसति-फलकप्रख्यं मुख्यं चरित्रविवर्द्धनं,**
**निजकमनसः प्रीत्याधायि प्रदेयमुपासकैः'' ॥२॥ [ यो.शा.वृ. ]**

---

१. °परिहारायाश° मु० । L.P.C. योगशास्त्रवृत्तावपि [प० ४९५] °परिहारायांश° इति ॥ २. नयागयाणं L.P.C. । आवश्यकसूत्रे [हारिभद्रीयवृत्तिः प० ८३७] योगशास्त्रवृत्तौ, [प० ४९६] च-नायागयाणं-इति पाठः 'न्यायागतानामिति न्यायः द्विज-क्षत्रिय-विट्-शूद्राणां स्ववृत्त्यनुष्ठानम्....तेन तादृशेन न्यायेनागतानां प्राप्तानाम् ,......इति आवश्यकहारिभद्र्यां वृत्तौ प० ८३७ ॥ ३. °ण-मु० C. । L.P. योगशास्त्रवृत्त्यादौ° ण इति ॥ ४. कल्प्यप्रायैः-इति योगशास्त्रवृत्तौ प० ४९६ ॥ ५. संमानयन्ति इति योगशास्त्रवृत्तौ प० ४९६ ॥ ६. पातकं-P.C. ॥ ७. सकम्बलप्रोच्छनं-मु० ॥

तथा–''साहूण कप्पणिज्जं, जं न वि दिन्नं कहिंचि[1] किंचि तहिं ।
धीरा जहुत्तकारी, सुसावगा तं न भुंजन्ति ॥३॥
वसही-सयणाऽऽसण-भत्तपाण[2]भेसज्जवत्थपायाई[3] ।
जइ वि न पज्जत्तधणो, थोवा वि हु थोवयं दिज्जा'' ॥४॥
[ उपदेशमाला २३९-२४०, सम्बोधप्र. श्रावक.व्रता. १३९-१४० ]

**वाचकमुख्य**स्त्वाह –

''किञ्चित् शुद्धं कल्प्यमकल्प्यं स्यात्[4] स्यादकल्प्यमपि कल्प्यम् ।
पिण्डः शय्या वस्त्रं, पात्रं वा भेषजाद्यं वा ॥१॥ [ प्रश.र./१४६ ]
देशं कालं पुरुषमवस्थामुपयोगशुद्धिपरिणामान् ।
प्रसमीक्ष्य भवति कल्प्यं, नैकान्तात् कल्पते कल्प्यम्'' ॥२॥ [ प्रश.र./१४७ ]

**ननु यथा शास्त्रे आहारदातारः श्रूयन्ते, न तथा वस्त्रादिदातारः, न च वस्त्रादिदानस्य फलं श्रूयते, तन्न वस्त्रादिदानं युक्तम् । नैवम् , भगवत्यादौ वस्त्रादिदानस्य साक्षादुक्तत्वात् । यथा –**

**''समणे निग्गंथे फासुयएसणिज्जेणं असण-पाण-खाइम-साइमेणं वत्थ-पडिग्गह-कंबल-पायपुंछणेणं पीढ-फलग-सिज्जा-संथारएणं पडिलाभेमाणे विहरति'' [ भगवतीसूत्रे ] इत्याहारवत्संयमाधारशरीरोपकारकत्वाद्वस्त्रादयोऽपि साधुभ्यो देयाः । [ योगशास्त्रवृत्तिः ३/८७ प० ४९६-८ ]**

संयमोपकारित्वं च वस्त्रादीनां यथोपपद्यते तथा यतिधर्माधिकारे वक्ष्यते ।

इह[5] **वृद्धोक्ता सामाचारी –**

श्रावकेण पोषधं पारयता नियमात् साधुभ्यो दत्वा भोक्तव्यम् , कथम् ? यदा भोजनकालो भवति, तदाऽऽत्मनो विभूषां कृत्वा प्रतिश्रयं च गत्वा साधून्निमन्त्रयते, 'भिक्षां गृह्णीत' इति साधूनां च तं प्रति का प्रतिपत्तिः ? उच्यते, तदैकः पटलमन्यो मुखानन्तकमपरो भाजनं प्रत्युपेक्षते[6], माऽन्तरायदोषाः स्थापनादोषा वाभूवन्निति[7] ।

---

१. कहिं पि–इति सम्बोधप्रकरणे ॥ २. °पाणनेसज्ज० मु० । P.C. सम्बोधप्रकरण–योगशास्त्र-वृत्त्योरपि °पाणभेसज्ज° इति ॥ ३. °पत्ताइ–इति सम्बोधप्रकरणे ॥ ४. स्यात्–मु० नास्ति ॥ ५. तुला–आवश्यकचूर्णिः प० ३०५–६, आवश्यकहारिभद्रीयवृत्तिः प० ८३७, पञ्चाशकवृत्तिः प० २७, श्रावकप्रज्ञप्तिवृत्तिः गा० ३२६, योगशास्त्रवृत्तिः ३।८७ प० ५०२–३ ॥ ६. प्रत्यवेक्षते–इति योगशास्त्रवृत्तौ प० ५०३ ॥ ७. वाऽभूवन्निति–मु० । P.C. योगशास्त्रवृत्तावपि वा भूवन्निति ॥

स च यदि प्रथमायां पौरुष्यां निमन्त्रयते, अस्ति च नमस्कारसहितप्रत्याख्यानी ततस्तद् गृह्यते, अथ नास्त्यसौ तदा न गृह्यते। यतस्तद्वोढव्यं भवति, यदि पुनर्घनं लगेत् तदा गृह्यते संस्थाप्यते च। यो वा उद्घाटपौरुष्यां पारयति पारणकवानन्यो वा, तस्मै तद् दीयते। पश्चात् तेन श्रावकेण ससंघाटको[1] व्रजति, एको न वर्त्तते प्रेषयितुम् , साधू पुरतः श्रावकस्तु मार्गे[2](मार्गतो) गच्छति। ततोऽसौ गृहं नीत्वा तावासनेनोपनिमन्त्रयते। यदि निविशेते तदा भव्यम् , अथ न निविशेते तथापि विनयः प्रयुक्तो भवति। ततोऽसौ भक्तं पानं च स्वयमेव ददाति, भाजनं वा धारयति, स्थित एव वाऽऽस्ते यावद् दीयते। साधू अपि पश्चात्कर्मपरिहारार्थं सावशेषं गृह्णीतः ततो वन्दित्वा विसर्जयति, अनुगच्छति च कतिचित्पदानि, ततः स्वयं भुङ्क्ते।

यदि पुनस्तत्र ग्रामादौ साधवो न भवन्ति तदा भोजनवेलायां द्वारावलोकनं करोति, विशुद्धभावेन च चिन्तयति–यदि साधवोऽभविष्यन् तदा निस्तारितोऽभविष्यमिति। एष पोषधपारणके विधिः। अन्यदा तु दत्वा भुङ्क्ते भुक्त्वा वा ददातीति।

**उमास्वातिवाचक**विरचित**श्रावकप्रज्ञप्तौ** तु अतिथिशब्देन साध्व्यादयश्चत्वारो गृहीताः, ततस्तेषां संविभागः कार्य इत्युक्तं। तथा च तत्पाठः —

''**अतिथिसंविभागो नाम अतिथयः-साधवः साध्व्यः श्रावकाः श्राविकाश्च, एतेषु गृहमुपागतेषु भक्त्याऽभ्युत्थानासनपादप्रमार्जननमस्कारादिभिरर्चयित्वा यथाविभवशक्ति अन्नपानवस्त्रौषधालयादिप्रदानेन संविभागः कार्यः**'' [ **श्रा.प्र.** ] इति।

एतद्व्रताराधनायैव प्रत्यहं श्रावकेण ''**फासुएणं एसणिज्जेणं असणपाणखाइमसाइमेणं वत्थपडिग्गहकंबलपायपुंछेणेणं पोढफलगसिज्जासंथारेणं ओसहभेसज्जेणं भयवं ! अणुग्गहो कायव्वो**'' [ ] इत्यादिना गुरूणां निमन्त्रणं क्रियते। एतद्व्रतफलं च दिव्यभोगसमृद्धि-साम्राज्य-तीर्थकृत्पदादि **श्रीशालिभद्र-मूलदेवा**द्यन्तार्हदादीनामिव सर्वं प्रसिद्धम्। पारम्पर्येण मोक्षोऽपि फलमस्ति। वैपरीत्ये तु दास्यदौर्गत्याद्यपीति।

अभिहितं चतुर्थं शिक्षापदव्रतम् , तदभिधाने च प्रतिपादितानि ससम्यक्त्वानि द्वादश श्रावकव्रतानि। तानि च विशेषतो गृहिधर्म इति योजितमेव ॥४०॥

अथ तच्छेषमतिचाररक्षणलक्षणं विशेषतो गृहिधर्मं प्रस्तौति —

**एषां निरतिचाराणां, पालनं शुद्धभावतः।**
**पञ्च पञ्चातिचाराश्च, सम्यक्त्वे च प्रतिव्रते ॥४१॥**

---

१. समं संघाटको–इति योगशास्त्रवृत्तौ प० ५०३ ॥ २. मार्गे L.P.C.। मार्गतो–इति योगशास्त्र-वृत्तौ प० ५०३ ॥

'**एषां**' सम्यक्त्वसहितद्वादशव्रतानां कीदृशानाम् ? '**निरतिचाराणाम्**' अतिचारा देशभङ्गहेतवः आत्मनोऽशुभाः परिणामविशेषाः । निर्गता अतिचारा येभ्यस्तेषां अतिचार-रहितानामित्यर्थः, '**शुद्धभावतः**' शुद्धः —अतिक्लिष्टमिथ्यात्वादिकर्मोदयकलङ्कपङ्क-रहितत्वेन निर्मलो भावः —क्षायोपशमिकलक्षणः आत्मपरिणामस्तद्धेतुभूतेन '**पालनं**' धारणं विशेषतो गृहिधर्मो भवतीति पूर्वेणान्वयः ।

निरतिचाराणामेषां पालनमित्युक्तमित्यतिचारज्ञानस्यावश्यकत्वात् तानेवाह —'**पञ्च पञ्च**' इति **अतिचारा** उक्तस्वरूपाः पञ्च पञ्च भवन्ति । वीप्सायां द्वित्वम् , कुत्र ? '**सम्यक्त्वे**' पूर्वोक्तस्वरूपे '[१]**च**' पुनः '**प्रतिव्रते**' वीप्सायामव्ययीभावस्ततो व्रते व्रत इत्यर्थः ।

[२]ननु सर्वविरतावेवातिचारा भवन्ति, संज्वलनोदय एव तेषामभिधानात् । यदाह —

''**सव्वे वि अ अइआरा, संजलणाणं तु उदयओ हुँति ।**
**मूलछिज्जं पुण होइ, बारसण्हं कसायाणं**'' ॥१॥ **[ आव.नि.११२, पंचा.१७/५० ]**

संज्वलनोदयश्च सर्वविरतानामेव, सम्यग्दृष्टिदेशविरतानां तु अप्रत्याख्यान-प्रत्या-ख्यानावरणोदय इति न सम्यक्त्वे देशविरतौ चातिचारसम्भवः । युज्यते चैतद् , अल्पीयत्वाद् देशविरतेः, कुन्थुशरीरे व्रणाद्यसम्भवात् । तथाहि —प्रथमाणुव्रते [३]स्थूलं संकल्पं निरपराधं द्विविधं त्रिविधेनेत्यादिविकल्पैर्विशेषितत्वेनातिसूक्ष्मतां गते देशा-भावात् कथं देशविराधनारूपा अतिचाराः स्युः ?, अतः सर्वनाश एव तस्योपयुज्यते, महाव्रतेषु तु ते सम्भवन्ति, महत्त्वादेव, हस्तिशरीरे व्रणपट्टबन्धादिवदिति ।

उच्यते —सम्यक्त्वे देशविरतौ चातिचारा न सम्भवन्तीत्यसङ्गतम् , [४]**उपासकदशादिषु** प्रतिव्रतमतिचारपञ्चकाभिधानात् । 'सव्वेवि अ अइआरा' इति च सर्वविरतिमेवाश्रित्य, न तु सम्यक्त्वदेशविरती, यतः ''**सव्वे वि अ अइआरा**'' इत्यादि गाथाया एवं व्याख्या, [५]तथाहि —''संज्वलनानामुदये सर्वविरतावतिचारा भवन्ति । शेषाणामुदये तु मूलच्छेद्यमेव तस्याम्'' इति एवं च न देशविरतावतिचाराभावः ।

यदप्यधिकृतगाथापश्चार्द्धं प्रकारान्तरेण व्याख्यायते यथा —मूलच्छेदः सर्वविरतेः तृतीया-नामुदये, देशविरतेर्द्वितीयानाम् , सम्यक्त्वस्य प्रथमानामिति । तेनापि देशविरत्यादौ नाति-चाराभावस्तथाहि —यथा संज्वलनोदये सर्वविरतिरवाप्यते, तत्रातिचाराश्च भवन्ति । एवं

---

१. चः–मु० ॥ २. तुला–पञ्चाशकवृत्तिः प० ८–९, योगशास्त्रवृत्तिः ३।८९ प० ५१८–९ ॥ ३. स्थूलसंकल्पनिरपराधद्विविधं–इति योगशास्त्रवृत्तौ प० ५१९ ॥ ४. द्रष्टव्यम् अध्ययन १। सू० ७ ॥ ५. L.P. । तथाह–मु० C. ॥

प्रत्याख्यानावरणोदये देशविरतिस्तदतिचाराश्च । अप्रत्याख्यानोदये सम्यक्त्वं तदतिचाराश्च भवन्तु । न्यायस्य समानत्वात् । विचित्रो ह्युदयः कषायाणाम्, ततोऽसौ गुणलाभस्याप्रतिबन्धकस्तदतिचाराणां च निमित्तं भवति, संज्वलनोदयवदिति ।

**अन्ये** पुनराहुः "सम्यक्त्वदेशविरत्यतिचाराः क्रमेण प्रथम-द्वितीयकषायोदयाद्भवन्ति । विचित्रो हि तदुदयो देशतः सर्वतश्च विराधनाया हेतुर्भवतीति । यश्च कुन्थुदृष्टान्तोऽसावसङ्गत एव, दृष्टान्तान्तरबाधितत्वात् तस्य । तथाहि—हस्तिनोऽतिलघुर्मनुष्यस्तस्य च [१]व्रणादिः सम्भवत्येवेति । यच्चोच्यते—अनन्तानुबन्ध्यादिकषायद्वादशकस्य सर्वघातित्वेनाभिधानात् तदुदये सम्यक्त्वादीनां भङ्ग एवेति । तदयुक्तम्, सर्वविरत्यपेक्षयैव सर्वघातित्वेन तस्य **शतकचूर्णौ** व्याख्यातत्वात् । न तु सम्यक्त्वाद्यपेक्षामिति । तथाहि तद्वाक्यम्—

"**भगवयाप्पणीयं पंचमहव्वयमइअं अट्ठारससीलंगसहस्सकलियं चारित्तं घायंति त्ति सव्वघाइणो**" [ श.चू. ] त्ति ॥४१॥

तदेवं सम्यक्त्वे देशविरतौ चाऽतिचारसम्भवोऽस्तीति प्रतिपत्तव्यम्, तत्र सम्यक्त्वे प्रथमं तानाह—

**पञ्चातिचाराः सम्यक्त्वे, हेयाः शङ्कन-काङ्क्षणे ।**
**विचिकित्सा कुदृष्टीनां, प्रशंसा तैश्च संस्तवः ॥४२॥**

**शङ्कनं** च **काङ्क्षणं** चेति द्वन्द्वस्ततस्ते, **विचिकित्सा, कुदृष्टीनां प्रशंसा, तैश्च संस्तवश्चे**ति **पञ्चातिचाराः 'सम्यक्त्वे'** सम्यक्त्वविषये **'हेयाः'** त्याज्याः ।

[२]तत्र शङ्कनं शङ्का सन्देह इतियावत् । तच्च देशविषयं सर्वविषयं च । तत्र सर्वविषयम्—अस्ति नास्ति वा धर्म इत्यादि, जिनधर्मः सत्योऽसत्यो वेत्यादि वा । देशशङ्कनं तु—एकैकवस्तुधर्मगोचरम्, यथाऽस्ति जीवः परं सर्वगतोऽसर्वगतो वा, सप्रदेशोऽप्रदेशो वा । पृथ्व्यादीनां कथं सजीवत्वम्? निगोदादयो वा कथं घटन्ते? इत्यादि । द्विधाप्यर्हदुक्ततत्त्वेष्वप्रत्ययरूपं सम्यक्त्वदूषकम् १।

काङ्क्षणम्—अन्यान्यदर्शनग्रहः, [३]तदपि देशविषयं सर्वविषयं च । सर्वविषयं सर्वपाखण्डिधर्माकाङ्क्षारूपम्, देशकाङ्क्षणं त्वेकादिदर्शनविषयम्, यथा **सुगते**न भिक्षूणामक्लेशको धर्म उपदिष्टः स्नाना-ऽन्न-पाना-ऽऽच्छादन-शयनीयादिषु सुखानुभवद्वारेण । यदाह—

---

१. व्रणादि-मु० C. ॥ २. तुला-योगशास्त्रवृत्तिः २/१७, प०, १८७ ॥ ३. तुला-श्राद्धप्रतिक्रमणवृत्तिः गा० ६ प० २८, योगशास्त्रवृत्तिः प० १८८ ॥

"**मृद्वी शय्या प्रातरुत्थाय पेया, मध्ये भक्तं पानकं चापराण्हे ।
द्राक्षाखण्डं शर्करा चार्द्धरात्रे, मोक्षश्चान्ते शाक्यसिंहेन दृष्टः**" ॥१॥ [ ष.स./१४८ ]

एतदपि घटमानकमेवेति । तथा परिव्राजक-भौत-ब्राह्मणादयः स्नानादिपरायणा विषयानुपभुञ्जाना एव परलोकेऽप्यभीष्टसुखेन युज्यन्ते इति साधीयानेषो धर्म इत्यादि, दृश्यन्ते हि मुग्धबुद्धयः स्थलनिम्नक्षेत्रभूबीजवापककर्षुकवत् धर्मार्थितया सर्वदर्शनान्याराधयन्तः । एवं च काङ्क्षणमपि परमार्थतो भगवदर्हत्प्रणीतागमानाश्वासरूपं सम्यक्त्वं दूषयति २।

विचिकित्सा चित्तविप्लवः, फलं प्रतिसन्देह इत्यर्थः । [1]स च सत्यपि युक्त्यागमोपपन्ने जिनधर्मेऽस्य महतस्तपःक्लेशस्य सिकताकणकवलवन्निःस्वादस्यायत्यां फलसम्पद्भवित्री ? अथ क्लेशमात्रमेवेदं निर्जराफलविकलमिति ?, उभयथापि हि क्रिया दृश्यन्ते । सफला निष्फलाश्च कृषीवलादीनाम् । अत इयमपि तथा सम्भाव्यते इति, विचिकित्सापि भगवद्वचनानाश्वासरूपत्वात् सम्यक्त्वस्य दोषः । [2]इह द्रव्य-गुणविषयायाः शङ्कायाः क्रियाविषयत्वेनास्या भेदः । यद्वा विचिकित्सा सदाचारमुनीनामपि मलविषयिणी निन्दा, यथा —अस्नानेन प्रस्वेदजलक्लिन्नमलत्वा[3]द् दुर्गन्धिविषय इति । को दोषः स्याद्यदि प्रासुकवारिणा अङ्गक्षालनं कुर्वीरन्निति ? । इयमपि तत्त्वतो भगवद्धर्मानाश्वासरूपत्वात् सम्यक्त्वस्य दोषः ३।

तथा कुत्सिता जिनागमविपरीतत्वात् दृष्टिर्दर्शनं येषां ते कुदृष्टयो —मिथ्यादृष्टयस्तेषां —सर्वज्ञप्रणीतदर्शनव्यतिरिक्तानां **शाक्य-कपिल-कणादा-ऽक्षपादा**दिप्रणीतमतवर्त्तिनाम् , पाखण्डिनामित्यर्थः । प्रशंसा-स्तुतिः, 'पुण्यभाज एते, सुलब्धमेषां जन्म, दयालव एते' इत्यादिका । इयं तु व्यक्तमेव सम्यक्त्वदूषणम् ४।

तैः —कुदृष्टिभिश्चैकत्र संवासात् परस्परालापादिजनितपरिचयः संस्तवः । एकत्रवासे हि तत्प्रक्रियाश्रवणात् तत्क्रियादर्शनाच्च दृढसम्यक्त्वस्यापि दृष्टिभेदः संभाव्यते, किमुत मन्दबुद्धेर्नवधर्मस्येति तत्संस्तवोऽपि दूषणम् ५।

[4]पाखण्डिनां चौघतस्त्रीणि शतानि त्रिषष्ट्यधिकानि भवन्ति । यत उक्तम् —

"**असिइसयं किरियाणं, अकिरियवाईण होइ चुलसीई ।
अण्णाणिय सत्तट्ठी, वेणइयाणं च बत्तीसं**" ॥१॥ [ सूत्र.नि.११९/प्र.सा.११८८ ]

---

१. सा च-इति योगशास्त्रवृत्तौ ॥ तुला-तत्त्वार्थसिद्धसेनीयावृत्तिः ७।१८ प० ९९ ॥ २. तुला-तत्त्वार्थसिद्धसेनीयावृत्तिः ७।१८ प० ९९ ॥ ३. °द् दुर्गन्धवपुष एत इति-इति योगशास्त्रवृत्तौ प० १८९ ॥ ४. तुला-आवश्यकहारिभद्रीयवृत्तिः प० ८१६-७ ॥

इयमपि गाथा विनेयजनानुग्रहार्थं ग्रन्थान्तरप्रतिबद्धाऽपि लेशतो व्याख्यायते — 'असिइसयं किरियाणं' अशीत्युत्तरं शतं क्रियावादिनाम् , तत्र न कर्त्तारं विना क्रिया सम्भवति, तामात्मसमवायिनीं वदन्ति ये तच्छीलाश्च ते क्रियावादिनः । ते पुनरात्माद्यस्तित्व-प्रतिपत्तिलक्ष्[1]णाः अनेनोपायेनाशीत्यधिकशतसङ्ख्या विज्ञेयाः । जीवा-ऽजीवा-ऽऽश्रव-बन्ध-संवर-निर्जरा-पुण्या-ऽपुण्य-मोक्षाख्यान् नव पदार्थान् विरचय्य परिपाट्या जीवपदार्थ-स्याधः स्वपरभेदावुपन्यसनीयौ । तयोरधो नित्या-ऽनित्यभेदौ । तयोरप्यधः कालेश्वरा-ऽऽत्म-नियतिस्वभावभेदाः पञ्च न्यसनीयाः पुनश्चेत्थं विकल्पाः कर्त्तव्याः —अस्ति जीवः स्वतो नित्यः कालत इत्येको विकल्पः । विकल्पार्थश्चायम् —विद्यते खल्वयमात्मा स्वेन रूपेण नित्यश्च कालतः कालवादिनः । उक्तेनैवाभिलापेन द्वितीयो विकल्पः ईश्वरकारणिनः । तृतीयो विकल्पः आत्मवादिनः । "**पुरुष एवेदं सर्वम्**" [ **ऋग्वेद १०/९०/२** ] इत्यादि । नियतिवादिनश्चतुर्थो विकल्पः । पञ्चमविकल्पः स्वभाववादिनः ।

एवं स्वत इत्यजहता लब्धाः पञ्च विकल्पाः । परत इत्यनेनापि पञ्चैव लभ्यन्ते । नित्यत्वापरित्यागेन चैते दश विकल्पाः । एवमनित्यत्वेनापि दशैव । एकत्र विंशतिर्जीव-पदार्थेन लब्धाः । अजीवादिष्वप्यष्टस्वेवमेव प्रतिपदं विंशतिर्विकल्पानाम् , अतो विंशतिर्नवगु[2]णा शतमशीत्युत्तरं क्रियावादिनामिति ।

'अकिरियाणं च भवति चुलसीति'त्ति अक्रियावादिनां भवति चतुरशीतिर्भेदा इति । न हि कस्यचिदवस्थितस्य पदार्थस्य क्रिया समस्ति, तद्भाव एवावस्थितेरभावादित्येवंवादि-नोऽक्रियावादिनः । तथा चाहुरेके —

"[3]**क्षणिकाः सर्वसंस्कारा, अस्थितानां कुतः क्रिया ? ।**
**भूतिर्येषां क्रिया सैव, कारकं सैव चोच्यते**" ॥१॥ [ **ष.स./१४१** ] इत्यादि ।

एते चात्मादिनास्तित्वप्रतिपत्तिलक्षणा अमुनोपायेन चतुरशीतिर्द्रष्टव्याः । एतेषां हि पुण्याऽपुण्यवर्जितपदार्थसप्तकन्यासः । तथैव जीवस्याधः स्वपरविकल्पभेदद्वयोपन्यासः । असत्त्वादात्मनो नित्या-ऽनित्यभेदौ न स्तः । कालादीनां तु पञ्चानां षष्ठी यदृच्छा न्यस्यते । पश्चाद्विकल्पाभिलापः —नास्ति जीवः स्वतः कालत इत्येको विकल्पः । एवमीश्वरादिभिरपि

१. तुला-नन्दीसूत्रमलयगिरिवृत्तिः प० २१३ B प्रवचनसारोद्धारवृत्तिः गा० ११८८ ॥ २. °णाश्च शत° L.P. । C. आवश्यकहारिभद्र्यां वृत्तावपि-श्च-नास्ति ॥ ३. श्लोकोऽयं-बोधिचर्यावतारे पृ० ३७६, तत्त्वसंग्रहे प० ११, भगवतीसूत्रस्य अभयदेवसूरिवृत्तौ ३०।१, नन्दीसूत्रस्य मलयगिरिवृत्तौ प० २१५ A षड्दर्शनसमुच्चयवृत्त्यादिषु उद्धृतोऽस्ति ॥

यदृच्छावसानैः, सर्वे च षड् विकल्पाः । तथा नास्ति जीवः परतः कालत इति षडेव विकल्पाः । एकत्र द्वादश । एवमजीवादिष्वपि षट्सु प्रतिपदं द्वादश विकल्पाः, एकत्र सप्त द्वादशगुणाश्चतुरशीतिर्विकल्पा नास्तिकानामिति ।

''अण्णाणिय सत्तट्ठि त्ति'' अज्ञानिकानां सप्तषष्टिर्भेदा इति । तत्र कुत्सितं ज्ञानमज्ञानम्, तदेषामस्तीति अज्ञानिकाः । नन्वेवं लघुत्वात् प्रक्रमस्य प्राक् बहुव्रीहिणा भवितव्यम्, ततश्चाज्ञाना इति स्यात्, नैष दोषः, ज्ञानान्तरमेवाज्ञानं मिथ्यादर्शनसहचरित्वात्[1], ततश्च जातिशब्दत्वात् गौरखरवदरण्यमित्यादिवदज्ञानिकत्वमिति, अथवा अज्ञानेन चरन्ति तत्प्रयोजना वा अज्ञानिकाः । असंवित्त्यकृतबन्धवैफल्यादिप्रतिपत्तिलक्षणा अमुनोपायेन सप्तषष्टिर्ज्ञातव्याः —तत्र जीवादिनवपदार्थान् पूर्ववत् व्यवस्थाप्य पर्यन्ते चोत्पत्तिमुपन्यस्याधः सप्त सदादय उपन्यसनीयाः, सत्त्वमसत्त्वम्, सदसत्त्वम्, अवाच्यत्वम्, सदावाच्यत्वम्, असदवाच्यत्वम्, सदसदवाच्यत्वमिति च । एकैकस्य जीवादेः सप्त सप्त विकल्पाः । एते नवसप्तकाः त्रिषष्टिः । उत्पत्तेस्तु चत्वार एवाद्या विकल्पास्तद्यथा —सत्त्वमसत्त्वं, सदसत्त्वम्, अवाच्यत्वं चेति, त्रिषष्टिमध्ये क्षिप्ताः सप्तषष्टिर्भवन्ति ।

[2]को जानाति जीवः सन् ? इत्येको विकल्पः, ज्ञातेन वा किम् ?, एवमसदादयोऽपि वाच्याः, उत्पत्तिरपि किं सतोऽसतः सदसतोऽवाच्यस्येति, को जानातीत्येतत् ? न कश्चिदपीत्यभिप्रायः ।

''वेणइयाणं च बत्तीसं ति'' वैनयिकानां च द्वात्रिंशद्भेदाः । विनयेन चरन्ति विनयो वा प्रयोजनमेषामिति वैनयिकाः । एते चानवधृतलिङ्गाचारशास्त्रविनयप्रतिपत्तिलक्षणा अमुनोपायेन द्वात्रिंशदवगन्तव्याः —सुर-नृपति-ज्ञाति-यति-स्थविरा-ऽवम-मातृ-पितॄणां प्रत्येकं कायेन वाचा मनसा दानेन च देशकालोपपन्नेन विनयः कार्यः इत्येते चत्वारो भेदाः सुरादिष्वष्टसु स्थानेष्वेकत्र मेलिता द्वात्रिंशदिति ।

सर्वसङ्ख्या पुनरेतेषां त्रीणि शतानि त्रिषष्ट्यधिकानि । न चैतत् स्वमनीषिकाव्याख्यानम् । यस्मादन्यैरप्युक्तम् —

**''आस्तिकमतमात्माद्या, नित्यानित्यात्मका नव पदार्थाः ।**
**काल-नियति-स्वभावेश्वरा-ऽऽत्मकृताः स्वपरसंस्थाः ॥१॥ [ ]**
**काल-यदृच्छा-नियतीश्वर-स्वभावा-ऽऽत्मतश्चतुरशीतिः ।**
**नास्तिकवादिगणमतं, न सन्ति सप्त स्वपरसंस्था ॥२॥ [ ]**

---

१. L.P.C. । °सहचारित्वात्-मु० आवश्यकहारिभद्र्यां वृत्तौ [प० ८१७] च ॥ २. तुला-प्रवचनसारोद्धारवृत्तिः गा० १२०१ ॥

**अज्ञानिकवादिमतं, नव जीवादीन् सदादि सप्तविधं ।**
**भावोत्पत्तिं सदसद्द्वैतावाच्यं च को वेत्ति ? ॥३॥ [ ]**
**वैनयिकमतं विनयश्चेतोवाक्कायदानतः कार्यः ।**
**सुर-नृपति-यति-ज्ञाति-स्थविरा-ऽवम-मातृ-पितृषु सदा'' ॥४॥ [ ]**

कृतं प्रसङ्गेनेति ॥४२॥

### आत्माद्यस्तित्वप्रतिपत्तिलक्षणानां क्रियावादिनां १८० भेदयन्त्रम्[१]

| अस्ति जीवः | असत्यजीवः | अस्ति पुण्यम् | अस्ति पापम् | अस्त्याश्रवः | अस्ति संवरः | अस्ति निर्जरा | अस्ति बन्धः | अस्ति मोक्षः |
|---|---|---|---|---|---|---|---|---|
| २० | ४० | ६० | ८० | १०० | १२० | १४० | १६० | १८० |
| स्वतः परतः | स्वतः परतः | स्वतः परतः | स्वतः परतः | स्वतः परतः | स्वतः परतः | स्वतः परतः | स्वतः परतः | स्वतः परतः |
| १० १० | १० १० | १० १० | १० १० | १० १० | १० १० | १० १० | १० १० | १० १० |
| नित्योऽनित्यः | नित्योऽनित्यः | नित्योऽनित्यः | नित्योऽनित्यः | नित्योऽनित्यः | नित्योऽनित्यः | नित्योऽनित्यः | नित्योऽनित्यः | नित्योऽनित्यः |
| ५ ५ | ५ ५ | ५ ५ | ५ ५ | ५ ५ | ५ ५ | ५ ५ | ५ ५ | ५ ५ |
| कालतः स्व. | का.स्व.नि. | का.स्व.नि. | का.स्व.नि. | का.स्व.नि. | का.स्व.नि. | का.स्व.नि. | का.स्व.नि. | का.स्व.नि. |
| नि.ई.आ. | ई.आ. | ई.आ. | ई.आ. | ई.आ. | ई.आ. | ई.आ. | ई.आ. | ई.आ. |

### आत्मादिनास्तित्वप्रतिलक्षणानामक्रियावादिनां ८४ भेदयन्त्रम्[२]
### अत्रात्मनोऽसत्त्वान्नित्या-ऽनित्यभेदौ न स्तः ।

| नास्ति जीवः | नास्त्यजीवः | नास्त्याश्रवः | नास्ति संवर | नास्ति निर्जरा | नास्ति बन्धः | नास्ति मोक्षः |
|---|---|---|---|---|---|---|
| १२ | २४ | ३६ | ४८ | ६० | ७२ | ८४ |
| स्वतः परतः | स्वतः परतः | स्वतः परतः | स्वतः परतः | स्वतः परतः | स्वतः परतः | स्वतः परतः |
| ६ ६ | ६ ६ | ६ ६ | ६ ६ | ६ ६ | ६ ६ | ६ ६ |
| कालतः स्व.नि. | का.स्व.ई.नि. | का.स्व.ई.नि. | का.स्व.ई.नि. | का.स्व.ई.नि. | का.स्व.ई.नि. | का.स्व.ई.नि. |
| ई.आ.य. | आ.य. | आ.य. | आ.य. | आ.य. | आ.य. | आ.य. |

### को जानाति ? किं वा ज्ञातेनेतिप्रतिपत्तिलक्षणानामज्ञानवादिनां ६७ भेदयन्त्रम्

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| को जानाति जीवः | | | | | | | | | को जानाः |
| ज्ञातेन वा किं ? | | | | | | | | | |
| सन् १ असन् २ | को जाना. | को जाना. | को जाना. | को जाना. | को जाना. | को जाना. | को जाना. | को जाना. | उत्पत्तिं ७० |
| सदसन् ३ | अजीवः १४ | पुण्यं २१ | पापं २८ | आश्रवं ३५ | संवरं ४२ | निर्जराम् | बन्धं ५६ | मोक्षं ६३ | सतः १, |
| अवाच्यः ४ | ज्ञा. | ज्ञा. | ज्ञा. | ज्ञा. | ज्ञा. | ४९ ज्ञा. | ज्ञा. | | असतः २, |
| सद्वाच्यः ५ | सन् इ.७ | सन् इ.७ | सन् इ.७ | सन् इ.७ | सन् इ.७ | सन् इ.७ | सन् इ.७ | सन् इ.७ | सदसतः ३ |
| असद्वाच्यः ६ | | | | | | | | | अवाच्यतः |
| सदसदवाच्यः ७ | | | | | | | | | ४ |

१. P. । भेदयन्त्रकम् मु० C. ॥ २. C.P. । भेदयन्त्रकम्-मु० ॥

विनयप्रतिपत्तिलक्षणानां विनयवादिनां ३२ भेदयन्त्रम्

| सुरविनयः | नृपविनयः | ज्ञातिवि. | यतिवि. | स्थविरवि. | अवमवि. | मातृवि. | पितृविनयः |
|---|---|---|---|---|---|---|---|
| ४ | ८ | १२ | १६ | २० | २४ | २८ | ३२ |
| कायेन १ वचसा २ | का.व.म. | का.व.म. | का.व.म. | का.व.म. | का.व.म. | का.व.म. | कायेन १ वचसा २ |
| मनसा ३ | दा. ४ | दा. ४ | दा. ४ | दा. ४ | दा. ४ | दा. ४ | मनसा ३ |
| दानेन ४ | | | | | | | दानेन ४ |

सम्यक्त्वस्य प्रदर्शिताः पञ्चातिचाराः, अथ प्रथमाणुव्रतस्य तानाह—

**वधो बन्धश्छविच्छेदोऽतिभारारोपणं क्रुधः ।**
**भक्तपानव्यवच्छेदोऽतिचाराः प्रथमव्रते ॥४३॥**

क्रुध इति पदं सर्वत्र योज्यते, तत्र '**क्रुधः**' क्रोधात् **वधो बन्धः छविच्छेदोऽतिभारारोपणं** भक्त-पान [१]व्यवच्छेदश्चकारो गम्य इति **पञ्चातिचाराः** '**प्रथमव्रते**' आद्याणुव्रते ज्ञेया इत्यन्वयः ।

[२]तत्र 'वधः' चतुष्पदादीनां लगुडादिना ताडनम्, स च स्वपुत्रादीनामपि विनय-ग्रहणार्थं क्रियते, अत उक्तं—'क्रोधादिति' प्रबलकषायोदयाद् यो वधः स प्रथमोऽतिचार इति भावः १।

'बन्धो' रज्ज्वादिना नियन्त्रणम्, सोऽपि पुत्रादीनां क्रियत इति क्रुध इति संबध्यते इति द्वितीयोऽतिचारः २।

छविः—शरीरं त्वग् वा तस्याच्छेदश्छविच्छेदः—कर्ण-नासिका-गलकम्बल-पुच्छादिकर्त्तनम्, अयमपि क्रुध इत्येव । तेन पादवल्मीकोपहतपादस्य पुत्रादेस्तत्करणेऽपि नातिप्रसङ्ग इति तृतीयोऽतिचारः ३।

अतिशयितो भारोऽतिभारो वोढुमशक्य इतियावत्, तस्यारोपणं—गो-करभ-रासभ-मनुष्यादेः स्कन्धे पृष्ठे शिरसि वा स्थापनम्, इहापि क्रोधात् तदुपलक्षितलोभाद्वेति-योज्यमिति चतुर्थोऽतिचारः ४।

भक्तम्—अशन[३]मोदनादि, पानं-पेयं जलादि, तयोर्व्यवच्छेदो-निषेधः, क्रुध एवेति पञ्चमोऽतिचारः ५।

अत्र [४]चाय**मावश्यकचूर्ण्या**द्युक्तो विधिः—वधो द्विपदानां चतुष्पदानां वा स्यात्,

---

१. °व्यवच्छेदश्च(च)कारो-मु० । व्यवच्छेदश्चकारो-C.P. ॥ २. तुला-योगशास्त्रवृत्तिः ३/९०, प्रवचनसारोद्धारवृत्तिः भा० १ । प० १८९ ॥ ३. °मोदकादि-L. ॥ ४. तुला-आवश्यकहारिभद्रीय-वृत्तिः प० ८१९-२०, आवश्यकचूर्णिः प० २८४-५, तत्त्वार्थसिद्धसेनीयावृत्तिः ७/२०, प० १०३-४,

सोऽपि सार्थकोऽनर्थको वा । तत्रानर्थकस्तावद्विधातुं न युज्यते । सार्थकः पुनरसौ द्विविधः —सापेक्षो निरपेक्षश्च । तत्र निरपेक्षो निर्दयताडनम् , स न कर्त्तव्यः । सापेक्ष पुनः श्रावकेणादित एव भीतपर्षदा भवितव्यम् , यदि पुनः कोऽपि न करोति विनयम् , तदा तं मर्माणि मुक्त्वा लतया दवरकेण वा सकृद् द्विर्वा ताडयेत् १।

बन्धोऽपि तथैव, नवरं निरपेक्षो निश्चलमत्यर्थं च बन्धनम् । सापेक्षो यो दामग्रन्थिना शिथिलेन, यश्च प्रदीपनादिषु मोचयितुं छेत्तुं वा शक्यते । एवं चतुष्पदानां बन्धः । द्विपदानामपि दास-दासी-चौर-[१]पारदारिकप्रमत्तपुत्रादीनां यदि बन्धः तदा सविक्रमणा एव बन्धनीयाः, रक्षणीयाश्च, यथाऽग्निभयादिषु न विनश्यन्ति, तथा द्विपदचतुष्पदाः श्रावकेण त एव संग्रहीतव्या ये अबद्धा एवासते २।

छविश्छेदोऽपि तथैव, नवरं निरपेक्षो हस्त-पाद-कर्ण-नासिकादि यन्निर्दयं छिनत्ति, सापेक्षः पुनर्गडं वा अरुर्वा छिन्द्याद्वा दहेद्वेति ३।

तथाऽतिभारोऽपि नारोपयितव्यः, पूर्वमेव हि द्विपदादिवाहनेन याऽऽजीविका सा श्रावकेण मोक्तव्या, [२]अथान्या सा न भवेत् , तदा द्विपदो यं भारं स्वयमुत्क्षिपति अवतारयति च तं वाह्यते, चतुष्पदस्य तु यथोचितभारः किञ्चिदूनः क्रियते हलश-कटादिषु , पुनरुचितवेलायामसौ मुच्यते ४।

तथा भक्तपानव्यवच्छेदो न कस्यापि कर्त्तव्यः, तीक्ष्णबुभुक्षो ह्येवं सति [३]म्रियते, स्वभोजनवेलायां तु ज्वरितादीन् विना नियमत एवान्यान् विधृतान् भोजयित्वा स्वयं भुञ्जीत । भक्तपाननिषेधोऽपि सार्थका-ऽनर्थकभेदभिन्नो बन्धवद् द्रष्टव्यः, नवरं सापेक्षो रोगचिकित्सार्थं स्यात् , अपराधकारिणि च वाचैव वदेद्-अद्य ते भोजनादि न दास्यते । शान्तिनिमित्तं [४]चोपवासादि कारयेत् । किं बहुना ? मूलगुणस्याहिंसालक्षणस्यातिचारो यथा न भवति तथा यतनीयम् । अतः पङ्गुकछागोत्पत्त्यादिकबहुदोषहेतुं महिष्यजादिसङ्ग्रहं च

---

धर्मबिन्दुवृत्तिः प० ३६-७, पञ्चाशकवृत्तिः प० १०-११, नवपदप्रकरणबृहद्वृत्तिः प० १०२, योग-शास्त्रवृत्तिः ३।९० प० ५२०-३, प्रवचनसारोद्धारवृत्तिः गा० २७४, प० १९०-२ ॥ १. °पारदारिक° योगशास्त्रवृत्तौ [प० ५२१] प्रवचनसारोद्धारवृत्तौ प० १९० नास्ति ॥ २. अथाऽन्यासौ न भवेत् —इति योगशास्त्रवृत्तौ प० ५२१ । अथासावन्या न भवेत् —इति प्रवचनसारोद्धारवृत्तौ प० १९० ॥ ३. म्रियेत-इति योगशास्त्रवृत्तौ प० ५२२ । म्रियेतापि-इति-प्रवचनसारोद्धारवृत्तौ प० १९० ॥ ४. चो-(वो)पवासादि-मु० । L.P.C. योगशास्त्र[प० ५२२] प्रवचनसारोद्धार[प० १९१]वृत्त्योरपि-चोपवासादि इति ॥

वर्जयेदिति । ननु हिंसैव श्रावकेण प्रत्याख्याता, ततो बन्धादिकरणेऽपि न दोषः हिंसा-विरतेरखण्डितत्वात् । अथ बन्धादयोऽपि प्रत्याख्यातास्तदा तत्करणे व्रतभङ्ग एव, विरतिखण्डनात्। किञ्च –बन्धादीनां प्रत्याख्येयत्वे व्रतेयत्ता विशीर्येत, प्रतिव्रतमतिचाराणा-माधिक्यादिति । एवं च न बन्धादीनामतिचारतेति ।

उच्यते, सत्यम् , हिंसैव प्रत्याख्याता, न बन्धादयः, केवलं तत्प्रत्याख्याने-ऽर्थतस्तेऽपि प्रत्याख्याता द्रष्टव्याः, हिंसोपायत्वात् तेषाम् एवं चेत् ? तर्हि वधादिकरणे व्रतभङ्ग एव, नातिचारो, नियमस्यापालनात् । मैवम् , यतो द्विविधं व्रतम्–अन्तर्वृत्त्या बहिर्वृत्त्या च, तत्र मारयामीतिविकल्पाभावेन यदा कोपाद्यावेशान्निरपेक्षतया वधादौ प्रवर्त्तते, न च हिंसा भवति, तदा निर्दयता[1]-विरत्यनपेक्षप्रवृत्तत्वेनान्तर्वृत्त्या तस्य भङ्गः, हिंसाया अभावाच्च बहिर्वृत्त्या पालनमिति, देशस्यैव भञ्जनाद्देशस्यैव पालनादतिचार-व्यपदेशः प्रवर्त्तते । तदुक्तम् –

''[2]**न मारयामीतिकृतव्रतस्य, विनैव मृत्युं क इहातिचारः ? ।**
**निगद्यते यः कुपितो न वधादीन् , करोत्यसौ स्यान्नियमानपेक्षः**[3] ॥१॥ [ ]
**मृत्योरभावान्नियमोऽस्ति तस्य, कोपाद् दयाहीनतया तु भग्नः ।**
**देशस्य भङ्गादनुपालनाच्च, पूज्या अतिचारमुदाहरन्ति**'' ॥२॥ [ ]

यच्चोक्तं –''**व्रतेयत्ता विशीर्येत**'' [ ] इति, तदयुक्तम् , विशुद्धाहिंसासद्भावे हि वधादीनामभाव एव । तत्स्थितमेतत् –बन्धादयोऽतिचारा एवेति । यद्वाऽनाभोगसहसा-कारादिनाऽतिक्रमादिना वा सर्वत्रातिचारता ज्ञेया । तत्रानाभोगोऽसावधानता सहसाकारो-ऽविमृश्यकारित्वम् । आहुश्च –

''**पुव्वं अपासिऊणं, छूढे पायंमि जं पुणो पासे ।**
**न य तरइ निअत्तेउं, पायं सहसाकरणमेअं**'' ॥१॥ [ ]

अतिक्रमादिस्वरूपं च-व्रतभङ्गाय केनचिन्निमन्त्रणे कृतेऽप्रतिषेधादतिक्रमः १, गमनादिव्यापारे तु व्यतिक्रमः २, क्रोधाद्वधबन्धादावतिचारः ३, जीवहिंसादौ त्वनाचारः ४।

---

१. निर्दयतया-मु० । L.P. योगशास्त्र[प० ५२२]प्रवचनसारोद्धार[प० १९१]वृत्त्योरपि-निर्दयता इति पाठः ॥ २. उद्धृतमिदम्-उपाशकदशाङ्गवृत्तौ, पञ्चाशकवृत्तौ प० १०, धर्मबिन्दुवृत्तौ प० ३७, योगशास्त्रवृत्तौ प० ५२३, नवपदप्रकरणबृहद्वृत्तौ प० १०३, प्रवचनसारोद्धारवृत्तौ प० १९१ ॥ ३. स्यान्नियमेऽपेक्षः-इति योगशास्त्रप्रवचनसारोद्धारवृत्त्योः ॥

वधादिग्रहणस्य चोपलक्षणत्वात् क्रोधादिना हिंसादिहेतु[१]मन्त्र-तन्त्रौषध-प्रयोगादयो-ऽन्येऽप्यतिचारतयाऽत्र व्रतेऽवगन्तव्याः ॥४३॥

अथ द्वितीयव्रतस्यातिचारानाह —

**सहसाभ्याख्यानं मिथ्योपदेशो गुह्यभाषणम् ।**
**कूटलेखश्च विश्वस्तमन्त्रभेदश्च सूनृते ॥४४॥**

सत्यव्रते पञ्चातिचाराः ज्ञेयाः । [२]तत्र **सहसा** —अनालोच्य '**अभ्याख्यानम्** ,असद्दोषा-ध्यारोपणं यथा —'चौरस्त्वं पारदारिको वा' इत्यादि । [३]अन्ये त्वस्य स्थाने **रहस्याभ्याख्यानं** पठन्ति, व्याचक्षते च-रहः-एकान्तस्तत्र भवं रहस्यम् , रहस्योनाभ्याख्यानम् —अभिशंसनमस-दध्यारोपणं रहस्याभ्याख्यानम् , यथा वृद्धायै वक्ति 'अयं ते भर्त्ता तरुण्यामतिप्रसक्तः' तरुण्यै वक्ति 'अयं ते भर्त्ता प्रौढचेष्टितायां मध्यमवयसि प्रसक्तः' तथा 'अयं खरकामो मृदुकामः' इति वा परिहसति । तथा स्त्रियमभ्याख्याति भर्तुः पुरतः यथा —पत्नी[५] ते कथयति —एवमयं मां रहसि कामगर्दभः खलीकुरुते' ।[४]अथवा दम्पत्योः अन्यस्य वा पुंसः स्त्रियो वा येन रागप्रकर्ष उत्पद्यते, तेन तादृशा रहस्येनानेकप्रकारेणाभिशंसनं हास्यक्रीडादिना, न त्वभिनिवेशेन, तथा सति व्रतभङ्ग एव स्यात् । अस्यासद्दोषाभिधानरूपत्वेन प्रत्याख्यातत्वात् । [६]यदाह —

**''सहसब्भक्खाणाई, जाणंतो जइ करेज्ज तो भंगो ।**
**जइ पुणणाभोगाईहिंतो तो होइ अइआरो''** ॥१॥ [ ]

इत्थं च [७]परोपघातकमनाभोगादिनाऽभिधत्ते तदा सङ्क्लेशाभावेन व्रतानपेक्षत्वा-भावान्न व्रतभङ्गः, परोपघातहेतुत्वाच्च भङ्ग इति भङ्गा-ऽभङ्गरूपः प्रथमोऽतिचारः १। '**मिथ्योपदेशः**' असदुपदेशः, [८]प्रतिपन्नसत्यव्रतस्य हि परपीडाकरं वचनमसत्यमेव, ततः

---

१. °मन्त्रतन्त्रप्रयोगा° इति योगशास्त्र[५२३]प्रवचनसारोद्धार[प०१९२]वृत्त्योः ॥ २. तुला-पञ्चाशकवृत्तिः ४.११, योगशास्त्रवृत्तिः प० ५२४ ॥ ३. ''थुलगस्समुसावायवेरमणस्स पंच अइयारा जाणियव्वा न समायरिव्वा तंजहा —सहसा अब्भक्खाणे १, रहसा अब्भक्खाणे २, सदारमंतभेए ३, मोसोवएसे ४, कूडलेहकरणे ५'' इति उपाशकदशाङ्गे अध्ययन-१ । सू०..... । ''मिथ्योपदेश-रहस्याभ्याख्यान-कूटलेखक्रिया-न्यासापहार-साकारमन्त्रभेदाः'' इति तत्त्वार्थ सूत्रे ७।२१। ''मिथ्योप-देश-रहस्याभ्याख्यान-कूटलेखक्रिया-न्यासापहार-स्वदारमन्त्रभेदाः'' इति धर्मबिन्दौ ३।२४। दृश्यतां तत्त्वार्थसूत्रस्य सिद्धसेनीयावृत्तिः ७।२१ प० १०५ ॥ ४. अथवाऽहंपत्योः मु० । L.P.C. योगशास्त्रवृत्तावपि प० ५२४ अथवा दम्पत्यो इति ॥ ५. स्त्रिया-इति योगशास्त्रवृत्तौ प० ५२४ ॥ ६. तुला-धर्मबिन्दुटीका प० ३८, पञ्चाशकटीका प० १२, नवपदप्रकरणबृहद्वृत्तिः प० ११५ ॥ ७. तुला-प्रवचनसारोद्धारवृत्तिः गा० २७५ प० १९२ ॥ ८. तुला-तत्त्वार्थसूत्रस्य सिद्धसेनीयावृत्तिः ७।२१ पृ० १०५ ॥

प्रमादात् परपीडाकरणे उपदेशेऽतिचारो यथा –वाह्यन्तां खरोष्ट्रादयो, हन्यन्तां दस्यव इति। यद्वा यथा स्थितोऽर्थस्तथोपदेशः साधीयान्, विपरीतस्तु अयथार्थोपदेशो यथा –परेण संदेहापन्नेन पृष्टे न तथोपदेशः। यद्वा विवाहे स्वयं परेण वा अन्यतराभिसंधानोपायोपदेशः[1], अयं च यद्यपि मृषा वादयामीत्यत्र व्रते भङ्ग एव, न वदामीति व्रतान्तरे न किञ्चन, तथापि सहसाकाराऽनाभोगाभ्यामतिक्रमादिभिर्वा मृषावादे परप्रवर्त्तनं व्रतस्यातिचारः। अथवा व्रतसंरक्षणबुद्ध्या परवृत्तान्तकथनद्वारेण मृषोपदेशं यच्छतोऽतिचारोऽयं, व्रतसापेक्ष-त्वान्मृषावादे परप्रवर्त्तनाच्च भग्नाभग्नरूपत्वाद् व्रतस्येति द्वितीयोऽतिचारः २।

तथा 'गुह्यं'[2] गुहनीयं न सर्वस्मै यत्कथनीयं राजादिकार्यसम्बद्धं तस्यानधिकृते-[3]नैवाकारेङ्गितादिभिर्ज्ञात्वाऽन्यस्मै प्रकाशनं **गुह्यभाषणम्**, यथा –एते हीदमिदं च राज-विरुद्धादिकं मन्त्रयन्ते। अथवा **गुह्यभाषणं –**पैशून्यम्, यथा –द्वयोः प्रीतौ सत्या-मेकस्याकारादिनोपलभ्याभिप्रायमितरस्य तथा कथयति यथा प्रीतिः प्रणश्यति। अस्याप्यतिचारत्वं रहस्याभ्याख्यानवद्धास्यादिनैवेति तृतीयोऽतिचारः ३।

तथा कूटम् –असद्भूतं तस्य लेखो-लेखनं **कूटलेखः**, अन्यसरूपाक्षरमुद्राकरणम्। एतच्च यद्यपि[4] 'कायेनासत्यां वाचं न वदामि' इत्यस्य, 'न वदामि न वा वादयामी'त्यस्य वा व्रतस्य भङ्ग एव, तथापि सहसाकाराऽनाभोगादिनाऽतिक्रमादिना वाऽतिचारः, अथवा 'असत्यमित्यसत्यभणनं मया प्रत्याख्यातम्, इदं पुनर्लेखनम्' इतिभावनया व्रतसापेक्ष-[5]स्यातिचार एवेति चतुर्थः ४।

तथा **विश्वस्ता**-विश्वासमुपगता ये मित्र-कलत्रादयस्तेषां मन्त्रो-**मन्त्रणम्**, तस्य **भेदः**-प्रकाशनम्। तस्यानुवादरूपत्वेन सत्यत्वाद्यद्यपि नातिचारता घटते, तथापि मन्त्रितार्थप्रकाशनजनितलज्जादितो मित्र-कलत्रादेर्मरणादिसम्भवेन परमार्थतोऽस्या-सत्यत्वात् कथञ्चिद्भङ्गरूपत्वेनातिचारतैव। गुह्यभाषणे गुह्यमाकारादिना विज्ञायानधिकृत

---

१. अन्यतरातिसंधानो° इति योगशास्त्रवृत्तौ प० ५२४। "वञ्चनं तु प्रतारणं व्यलीकमति-सन्धानम्" इति अभिधानचिन्तामणौ श्लो० ३७९। "अतिसन्धानं छलनम्" इति तत्त्वार्थसूत्र-भाष्यस्य सिद्धसेनगणिविरचितायां वृत्तौ ७।२१ पृ० १०५। इति योगशास्त्रटिप्पणे प० ५२४॥ २. दृश्यतां तत्त्वार्थसूत्रस्य सिद्धसेनीयावृत्तिः ७।२१ पृ० १०६॥ ३. तुला-प्रवचनसारोद्धारवृत्तिः प० १९२॥ ४. तुला-धर्मबिन्दुवृत्तिः प० ३८, पञ्चाशकवृत्तिः प० १२, नवपदप्रकरणबृहद्वृत्तिः प० ११५, प्रवचनसारोद्धारवृत्तिः प० १९३॥ ५. व्रतसव्यपेक्षस्या° इति योगशास्त्रवृत्तौः प० ५२६॥

एवं गुह्यं प्रकाशयति, इह तु स्वयं मन्त्रयित्वैव[1] मन्त्रं भिनत्तीत्यनयोर्भेद इति पञ्चमोऽतिचारः ५ ॥४४॥

अथ तृतीयव्रतातिचारानाह —

**स्तेनाहृतग्रह-स्तेनप्रयोगौ मानविप्लवः ।**
**द्विड्राज्यगतिरस्तेये, प्रतिरूपेण च क्रिया ॥४५॥**

'**स्तेनाहृतग्रह-स्तेनप्रयोगौ**''**मानविप्लवो**'[2] व्यत्ययो '**द्विड्राज्यगतिः**''**प्रतिरूपेण क्रिया**' चेति '**अस्तेये**' अदत्तादानविरमणरूपे तृतीयाणुव्रते प्रकरणात् पञ्चातिचारा ज्ञेया इति गम्यम् ।

तत्र स्तेनाः-चौरास्तैराहृतम्-[3]आनीतं कनक-वस्त्रादि तस्य ग्रहः-आदानं मूल्येन मुधिकया वा स स्तेनाहृतग्रहः । स्तेनाहृतं हि काणक्रयेण मुधिकया वा प्रच्छन्नं गृह्णं[4]श्चौरो भवति । यतो **नीतिः** —

**''चौरश्चौरापको मन्त्री, भेदज्ञ काणकक्रयी ।**
**अन्नदः स्थानदश्चेति, चौरः सप्तविधः स्मृतः''** ॥१॥ [ ] इति ।

ततश्चौर्यकरणाद् व्रतभङ्गः, वाणिज्यमेव मया क्रियते न चौरिकेत्यध्यवसायेन व्रतसापेक्षत्वाच्चाभङ्ग इति भङ्गाऽभङ्गरूपः प्रथमोऽतिचारः १।

तथा स्तेनानां प्रयोगः —अभ्यनुज्ञानं हरत यूयमिति हरणक्रियायां प्रेरणेतियावत् । अथवा स्तेनोपकरणानि —कुशिका-कर्त्तरिका-घर्घरिकादीनि, तेषामर्पणं विक्रयणं वा स्तेनप्रयोगः । अत्र च [5]यद्यपि 'चौर्यं न करोमि न कारयामि' इत्येवंप्रतिपन्नव्रतस्य स्तेनप्रयोगो व्रतभङ्ग एव, तथापि 'किमधुना यूयं निर्व्यापारास्तिष्ठत[6] ? यदि वो भक्तादि नास्ति तदाऽहं तद् ददामि, भवदानीतमोषस्य वा यदि विक्रायको न विद्यते तदाऽहं विक्रेष्ये' इत्येवंविधवचनैश्चौरान् व्यापारयतः स्वकल्पनया तद्व्यापारणं परिहरतो व्रतसापेक्षस्यासावतिचार इति द्वितीयोऽतिचारः २।

---

१. मन्त्रयितैव इति योगशास्त्र [प० ५२५] प्रवचनसारोद्धार [प० १९३] वृत्त्योः ॥ २. मानविप्लवो द्विड्° L.P. । मानव्यत्ययो द्विड्° C. ॥ ३. तुला-योगशास्त्रवृत्तिः ३।९२ प० ५२७, प्रवचनसारोद्धारवृत्तिः प० १९४ ॥ ४. ग्रहणंश्चौरो-मु० ॥ ५. द्दश्यतां तत्त्वार्थसूत्रस्य सिद्धसेनीयावृत्तिः ७।२२, प० १०६ । तुला-पञ्चाशकटीका प० १३, योगशास्त्रवृत्तिः प० ५२६, नवपदप्रकरणबृहद्वृत्तिः प० १३९, प्रवचनसारोद्धारवृत्तिः प०१९४ ॥ ६. °तिष्ठथ-इति धर्मबिन्दु [प० ३८]पञ्चाशक-[प०१५]प्रवचनसारोद्धार[प० १९४]वृत्तिषु । 'किं भवन्तो निर्व्यापारास्तिष्ठन्ति'-इति नवपदप्रकरणबृहद्वृत्तौ प० १३९ । C. योगशास्त्रवृत्तौ च °तिष्ठत-इति ॥

तथा मीयते अनेनेति मानं —कुडवादि पलादि हस्तादि वा, तस्य विप्लवो-विपर्यासः अन्यथाकरणं हीनाधिकत्वमितियावत्, हीनमानेन ददाति अधिकमानेन च गृह्णातीत्ययमपि तत्त्वतश्चौर एव । यदाह —

**''लौल्येन किञ्चित्कलया च किञ्चिन्मापेन किञ्चित्तुलया च किञ्चित् ।**
**किञ्चिच्च किञ्चित्त समाहरन्तः, प्रत्यक्षचौरा वणिजो भवन्ति ॥१ ॥[ ]**
**अधीते यत्किञ्चित्तदपि मुषितुं ग्राहकजनं,**
**मृदु ब्रूते यद्वा तदपि विवशीकर्त्तुमपरम् ।**
**प्रदत्ते यत्किञ्चित्तदपि समुपादातुमधिकं;**
**प्रपञ्चोऽयं वृत्तेरहह गहनः कोऽपि वणिजाम् ?'' ॥२॥[ ]**

न चैवं श्रावकस्य युज्यत इति तृतीयोऽतिचारः ३।

तथा द्विषोः —विरुद्धयो राज्ञोरिति गम्यम्, राज्यं-नियमितभूमिः[१] कटकं वा, तत्र गतिः —गमनं द्विड्राज्यगतिः राज्ञाऽननुज्ञाते गमनमित्यर्थः । द्विड्राज्यगमनस्य यद्यपि स्वस्वामिनाऽननुज्ञातस्य ''**सामी जीवादत्तं, तित्थयरेणं तहेव य गुरूहिं**'' [ **नवपदप्रकरणे गा० ३८** ] इत्यदत्तादानलक्षणयोगेन तत्कारिणां च चौर्यदण्डयोगेन अदत्तादानरूपत्वाद् व्रतभङ्ग एव । तथापि 'द्विड्राज्यगतिं कुर्वता मया वाणिज्यमेव कृतं न चौर्यम्' इति-भावनया व्रतसापेक्षत्वाल्लोके च चौरोऽयमिति व्यपदेशाभावादतिचारता । उपलक्षण-त्वाद् राजनिषिद्धवस्तुग्रहणमपि तथेति चतुर्थोऽतिचारः ४।

'चः' पुनः प्रतिरूपं —सदृशम्, व्रीहीणां पलञ्जिः[२], घृतस्य वसा, तैलस्य मूत्रम्, हिङ्गोः खदिरादिवेष्टश्चणकादिपिष्टं गुन्दादि वा, कुङ्कुमस्य कृत्रिमं तत् कुसुम्भादि वा, मञ्जिष्टादेश्चित्रकादि, जात्यकर्पूरमणिमौक्तिकसुवर्णरूप्यादीनां कृत्रिमं तत् तदादि, तेन प्रतिरूपेण 'क्रिया' व्यवहारः, व्रीह्यादिषु पलञ्ज्यादि प्रक्षिप्य तत्तद्विक्रीणीते, यद्वाऽपहृतानां गवादीनां सशृङ्गाणामग्नि-पक्वकालिङ्गीफलस्वेदादिना शृङ्गाण्यधोमुखानि प्रगुणानि तिर्यग्वलितानि वा यथारुचि [३]विधायान्यविधत्वमिव तेषामापाद्य सुखेन धारणविक्रयादि करोतीति पञ्चमः ५।

[४]मानविप्लवः प्रतिरूपक्रिया च परव्यंसनेन परधनग्रहणरूपत्वाद् भङ्ग एव, केवलं

---

१. नियमिता भूमिः-इति योगशास्त्रवृत्तौ प० ५२७ ॥ २. पलञ्जि-मु० । C.P. योगशास्त्रवृत्तावपि पलञ्जिः-इति ॥ ३. विधयान्यत्वमिव-इति योगशास्त्रवृत्तौ प० ५२८ ॥ ४. तुला-धर्मबिन्दुवृत्तिः प० ३८, पञ्चाशकवृत्तिः प० १३, नवपदप्रकरणबृहद्वृत्तिः प० १३९, प्रवचनसारोद्धारवृत्तिः भा० १ प० १९५ ॥

खात्रखननादिकमेव चौर्यं प्रसिद्धं[1], मया तु वणिक्कलैव कृतेतिभावनया व्रतरक्षणोद्यतत्वादतिचार इति ।

अथवा स्तेनाहृतग्रहादयः पञ्चाप्यमी व्यक्तचौर्यरूपा एव, केवलं सहसाकारादिनाऽतिक्रमादिना वा प्रकारेण विधीयमाना अतिचारतया व्यपदिश्यन्ते, न चैते राज[2]सेवकादीनां न सम्भवन्ति । तथा हि—आद्ययोः स्पष्ट एव तेषां सम्भवः, द्विड्राज्यगतिस्तु यदा सामन्तादिः कश्चित् स्वस्वामिनो वृत्तिमुपजीवति, तद्विरुद्धस्य च सहायो भवति, तदा तस्यातिचारो भवति। मानविप्लवः प्रतिरूपक्रिया च यदा राजा भाण्डागारे मानान्यत्वं द्रव्याणां विनिमयं च कारयति तदा राज्ञोऽप्यतिचारो भवति ॥४५॥

इति प्रोक्तास्तृतीयव्रतातिचाराः । अथ चतुर्थव्रतस्य तानाह —

**परविवाहकरणं, गमोऽनात्तेत्वरात्तयोः ।**
**अनङ्गक्रीडनं तीव्ररागश्च ब्रह्मणि स्मृताः ॥४६॥**

**परविवाहकरणमनात्तागम इत्वरात्तागम अनङ्गक्रीडनं कामतीव्ररागश्चे**ति **'ब्रह्मणि'** तुर्यव्रते पञ्चातिचाराः ।

तत्र परेषां—स्व[3] स्वापत्यव्यतिरिक्तानां विवाहकरणं—कन्याफललिप्सया स्नेहसम्बन्धादिना वा परिणयनविधानम् , इदं च स्वदारसन्तोषवता स्वकलत्रात् परदारवर्ज्जकेन च स्वकलत्रवेश्याभ्यामन्यत्र मनोवाक्कायैर्मैथुनं न कार्यं न च कारणीयमिति यदा प्रतिपन्नं भवति, तदा परवीवाहकरणं मैथुनकारणमर्थतः प्रतिषिद्धमेव भवति, तद्व्रती तु मन्यते — 'विवाह एवायं मया विधीयते, न मैथुनं कार्यते', इति व्रतसापेक्षत्वादतिचार इति । कन्याफललिप्सा च सम्यग्दृष्टेरव्युत्पन्नावस्थायां सम्भवति, मिथ्यादृष्टेस्तु भद्रकावस्थायामनुग्रहार्थं व्रतदाने सा सम्भवति ।

नन्वन्यविवाहनवत्स्वापत्यविवाहनेऽपि समान एव दोषः ?, सत्यम् , यदि स्वकन्या न परिणाय्यते, तदा [4]स्वच्छन्दकारिणी स्यात् , ततश्च शासनोपघातः स्यात् , विहितविवाहा तु पतिनियन्त्रितत्वेन न तथा स्यात् । **परे**ऽप्याहुः —

---

१. प्रतिषिद्धं—इति प्रवचनसारोद्धारवृत्तौ प० १९५ ॥ २. राज–राजसेवकादीनां–इति योगशास्त्रवृत्तौ प० ५२८ । दृश्यतां पञ्चाशकटीका प० १३ ॥ ३. स्वापत्य° इति धर्मबिन्दुवृत्तौ प० ३९ । तुला–पञ्चाशकटीका प० १४, योगशास्त्रवृत्तिः प० ५३१, प्रवचनसारोद्धारवृत्तिः प० १९८, नवपदप्रकरणबृहद्वृत्तिः प० १६८ ॥ ४. L.P.C. । स्वच्छन्दचारिणी–मु० योगशास्त्रवृत्तौ च प० ५३१ ॥

"पिता रक्षति कौमारे, भर्त्ता रक्षति यौवने ।
[१]पुत्रास्तु स्थावरे भावे, न स्त्री स्वातन्त्र्यमर्हति" ॥१॥ [ मनुस्मृति ९/३ ]

यस्तु **दाशार्हस्य कृष्णस्य चेटकराजस्य** च स्वापत्येष्वपि विवाहनियमः श्रूयते, स चिन्तकान्तरसद्भावाद् द्रष्टव्यः । तथा चान्यस्यापि श्रावकस्यान्यचिन्तकसद्भावे तथैव न्याय्यः, अन्यचिन्ताकर्त्रभावे तु यथानिर्वाहं विवाहसङ्ख्यानियमो युक्तः । [२]**अन्ये** त्वाहुः —परस्य-कलत्रान्तरस्य सत्यपि सज्जकलत्रे विशिष्टसन्तोषाभावात् पुनः स्वयं विवाहनं परविवाहनम् । अयं स्वदारसन्तुष्टस्यातिचारः प्रथमः १।

[३]तथा अनात्ता-अपरिगृहीता वेश्या, स्वैरिणी, प्रोषितभर्तृका, कुलाङ्गना वाऽनाथा, तथा [४]इत्वरी-प्रतिपुरुषमयनशीला वेश्येत्यर्थः सा चासावात्ता च कञ्चित् कालं भाटी-प्रदानादिना सङ्गृहीता, [५]पुंवद्भावे इत्वरात्ता [६]विस्पष्टपटुवत् समासः अथवा इत्वरकाल-मात्ता इत्वरात्ता [७]मयूरव्यंसकादित्वात् समासः कालशब्दलोपश्च, अनात्ता च इत्वरात्ता चेति द्वन्द्वः, तयोर्गमः —आसेवनम् ।

इयं चात्र भावना —अनात्तागमोऽनाभोगादिनाऽतिचारः, इत्वरात्तागमस्तु [८]भाटीप्रदाना-दित्वरकालस्वीकारेण स्वकलत्रीकृत्य वेश्यां सेवमानस्य स्वबुद्धिकल्पनया स्वदारत्वेन व्रतसापेक्षत्वान्न भङ्गः, अल्पकालपरिग्रहाच्च [९]वस्तुतोऽन्यकलत्रत्वाद् भङ्ग इति भङ्गाऽभङ्ग-रूपत्वादतिचारः २।

[१०]इमौ चातिचारौ स्वदारसन्तोषिण एव, न तु परदारवर्जकस्य, इत्वरात्ताया वेश्यात्वेन अनात्तायास्त्वनाथतयैवापरदारत्वात् । शेषास्त्वतिचारा द्वयोरपि । इदं च **हरिभद्रसूरिमतं,** सूत्रानुपाति च । यदाहुः —

"**सदारसंतोसस्स पंचइआरा जाणिअव्वा न समायरिअव्वा**" । [ उपा.द.अ.१ प. ५ ]

**अन्ये** त्वाहुः —इत्वरात्तागमः स्वदारसन्तोषवतोऽतिचारः, तत्र भावना कृतैव, अनात्ता-

---

१. पुत्रास्तु स्थाविरे-इति योगशास्त्रवृत्तौ प० ५३१ । पुत्राश्च स्थाविरे-इतिप्रवचनसारोद्धारवृत्तौ प० १९९ ॥ २. तुला-धर्मबिन्दुवृत्तिः ५.४०, पञ्चाशकवृत्तिः १५, योगशास्त्रवृत्तिः प० ५३१ ॥ ३. दृश्यतां तत्त्वार्थसिद्धसेनीयावृत्तिः ७।२३, पृ० १०८ । तुला-योगशास्त्रवृत्तिः प० ५३० ॥ ४. तुला-प्रवचनसारोद्धारवृत्तिः प० १९५ ॥ ५. "परतः स्त्री पुंवद् स्त्र्येकार्थेऽनूङ्" सिद्धहेम ३।१।४९ ॥ ६. दृश्यतां तत्त्वार्थसिद्धसेनीयावृत्तिः ७।२३, पृ० १०८ । 'नाम नाम्नैकार्थ्ये समासो बहुलम्' सि० हे० ३।१।१८ ॥ ७. 'मयूरव्यंसकेत्यादयः' सिद्धहेम० ३।१।११६॥ ८. तुला-धर्मबिन्दुवृत्तिः प० ३९, पञ्चाशकवृत्तिः १४, योगशास्त्रवृत्तिः प० ५२९, प्रवचनसारोद्धारवृत्तिः भा० १ प० १९६ ॥ ९. वस्तुतोऽस्वकलत्र° इति धर्मबिन्दुवृत्तौ पञ्चाशकवृत्तौ च पाठः ॥ १०. तुला-आवश्यकचूर्णिः प० २९१ ॥

गमस्तु परदारवर्जिनः । अनात्ता हि वेश्या, यदा तां गृहीतान्यसक्तभाटिकामभिगच्छति, तदा परदारगमनजन्यदोषसम्भवात् कथञ्चित्परदारत्वाच्च भङ्गत्वेन वेश्यात्वाच्चाभङ्गत्वेन भङ्गा-भङ्गरूपोऽतिचारः इति द्वितीय-तृतीयौ २-३ । तथा[1]ऽनङ्गः-कामः, स च पुंसः स्त्री-पुं-नपुंसकेषु सेवनेच्छा हस्तकर्मादीच्छा वा वेदोदयात् , योषितोऽपि योषिन्नपुंसक-पुरुषासेवनेच्छा हस्तकर्मादीच्छा वा, नपुंसकस्यापि नपुंसक-पुरुष-स्त्रीसेवनेच्छा हस्त-कर्मादीच्छा वा । एषोऽनङ्गः नान्यः कश्चित् । तेन तस्मिन् वा क्रीडनं-रमणमनङ्गक्रीडनम् । यद्वा आहार्यैः काष्ठ-पुस्त-फल-मृत्तिका-चर्मादिघ[2]टितप्रजननैः स्वलिङ्गेन कृतकृत्योऽपि योषितामवाच्यदेशं भूयो भूयः कु[3]थ्नाति, केशाकर्षण-प्रहारदान-दन्तनखकदर्थनादिप्र[4]कारेण मोहनीयकर्मावेशात् तथा क्रीडति यथा बलवान् रागः प्रसूयते । अथवा अङ्गं-देहावयवो मैथुनापेक्षया योनिर्मेहनं , तद्व्यतिरिक्तान्यनङ्गानि —कुच-कक्षोरु-वदनादीनि तेषु क्रीडनमनङ्गक्रीडनमिति चतुर्थः ४।

तथा तीव्ररागः —अत्याग्रहः अर्थात् मैथुने [5]परित्यक्तान्यसकलव्यापारस्य तदध्यव-सायता । योषामुखकक्षोपस्थान्तरेषु अवितृप्ततया प्रक्षिप्य लिङ्गं महतीं वेलां निश्चलो मृ[6]त ए(इ)वास्ते, चटक इव च[7]टिकायां मुहुर्मुहुर्योषायामारोहति, जातबलक्षयश्च [8]वाजीकरणा-न्युपयुङ्क्ते, 'अनेन खल्वौषधप्रयोगेण गजप्रसेकी तुरगावमर्द्दी च पुरुषो भवति'इति बुद्ध्येति पञ्चमः ५। [9]इह च श्रावकोऽत्यन्तपापभीरुतया ब्रह्मचर्यं चिकीर्षुरपि यदा वेदोदयासहिष्णुतया तद्विधातुं न शक्नोति, तदा यापनामात्रार्थं स्वदारसन्तोषादि प्रतिपद्यते । मैथुनमात्रेण च यापनायां [10]सम्भवत्यामनङ्गक्रीडनकामतीव्ररागावर्थत प्रतिषिद्धौ, तत्सेवने च न कश्चिद् गुणः, [11]प्रत्युत तात्कालिकी छिदा राजयक्ष्मादयश्च रोगा दोषा एव भवन्ति, एवं प्रतिषिद्धाचरणाद् भङ्गो नियमाबाधनाच्चाभङ्ग इत्यतिचारावेतौ ।

---

१. तुला-तत्त्वार्थसूत्रस्य सिद्धसेनीयावृत्तिः ७।२३, प० १०८-९, प्रवचनसारोद्धारवृत्तिः प० १९७-८ ॥ २. °घटितैः-इति योगशास्त्रवृत्तौ प० ५३२ ॥ ३. कुष्णाति-इति प्रवचनसारोद्धारवृत्तौ प० १९८ ॥ ४. °प्रकारैः-इति योगशास्त्रवृत्तौ प० ५३२ ॥ ५. तुला-तत्त्वार्थसूत्रस्य सिद्धसेनीयावृत्तिः ७।२३, पृ० १०९ धर्मबिन्दुवृत्तिः प० ३९, पञ्चाशकवृत्तिः प० १४, प्रवचनसारोद्धारवृत्तिः प० १९७-८, योगशास्त्रवृत्तिः प० ५३२ ॥ ६. मृत एवास्ते- । मृत इवास्ते-इति प्रवचनसारोद्धार-योगशास्त्रवृत्त्योः [प० १९७, प० ५३२] ७. चटकायां-इति योगशास्त्र[प० ५३२]प्रवचनसारोद्धार-[प० १९७]वृत्त्योः ॥ ८. वाजीकरणानुपयुङ्क्ते-इति योगशास्त्रवृत्तौ प० ५३२ ॥ ९. तुला-धर्मबिन्दुवृत्तिः प० ३९-४०, पञ्चाशकवृत्तिः प० १५, योगशास्त्रवृत्तिः प० ५३२-३, प्रवचनसारोद्धारवृत्तिः प० १९८ ॥ १०. सम्भवन्त्याम° इति योगशास्त्रवृत्तौ प० ५३३ ॥ ११. तुला-तत्त्वार्थसूत्रस्य सिद्धसेनीयावृत्तिः ७।२३, पृ० १०९ ॥

**अन्ये** त्वन्यथाऽतिचारद्वयमपि भावयन्ति—स हि स्वदारसन्तोषी मैथुनमेव मया प्रत्याख्यातमिति स्वबुद्ध्या वेश्यादौ तत्परिहरति नालिङ्गनादि, परदारवर्ज्जकोऽपि परदारेषु मैथुनं परिहरति नालिङ्गनादि, इति कथञ्चिद् व्रतसापेक्षत्वादतिचारौ । एवं स्वदारसन्तोषिणः पञ्चातिचाराः परदारवर्जकस्य तूत्तरे त्रय एवेति स्थितम् ।

**अन्ये** त्वन्यथाऽतिचारान् विचारयन्ति । यथा—

"**परदारवज्जिणो पंच हुंति तिन्नि उ सदारसंतुट्ठे ।**
**इत्थी[1] उ तिन्नि पंच व, भंगविगप्पेहिं[2] अइआरा**" ॥१॥ [ न.प्र./५४, सं.प्र.७/४१ ]

इत्वरकालं या परेण भाट्यादिना गृहीता वेश्या तां गच्छतः परदारावर्जिनो भङ्गः, कथञ्चित् परदारत्वात् तस्याः, लोके तु परदारत्वारूढेर्न भङ्ग इत्यतिचारता १। अनात्तायामनाथकुलाङ्गनायां या गतिः परदारवर्ज्जिनः सोऽप्यतिचारः, लोके परदारत्वेन तस्या रूढत्वात् वास्तवकल्पनया च परस्य भर्त्तुरभावेनापरदारत्वाच्च २। शेषास्तु त्रयो द्वयोरपि भवेयुः ।

स्त्रियस्तु स्वपुरुषसन्तोष-परपुरुषवर्जनयोर्न भेदः, स्वपुरुषव्यतिरेकेणान्येषां परपुरुषत्वात् । परविवाहकरणमनङ्गक्रीडनं कामतीव्ररागश्चेति त्रयः स्वदारसन्तोषिण इव [3]स्वपुरुषविषयाः स्युरिति । पञ्च वा कथं ? इत्वरात्तगमनं तावत्सपत्नीवारकदिने स्वपतिः सपत्नीपरिगृहीतो भवति, तदा सपत्नीवारकं विलुप्य तं परिभुञ्जानाया अतिचारः, अनात्तगमस्त्वतिक्रमादिना परपुरुषमभिसरन्त्या अतिचारः, ब्रह्मचारिणं वा स्वपतिमतिक्रमादिनाऽभिसरन्त्या अतिचारः । शेषास्त्रयः स्त्रियाः पूर्ववत् । ब्रह्मचारिणस्तु पुंसः स्त्रियो वाऽतिक्रमादिनैव सर्वेऽप्यतिचारा इति ध्येयम् ॥४६॥

अथ पञ्चमव्रतस्यातिचारानाह—

**धनधान्यं क्षेत्रवास्तु , रूप्यस्वर्णं च पञ्चमे ।**
**गोमनुष्यादि कुप्यं चेत्येषां सङ्ख्याव्यतिक्रमाः ॥४७॥**

**'धनधान्यं' 'क्षेत्रवास्तु' 'रूप्यस्वर्णं' 'गोमनुष्यादि' 'कुप्यं' चेति पञ्चानां सङ्ख्या**—यावज्जीवं चतुर्मासादिकालावधि वा यत्परिमाणं गृहीतं तस्या ये **अतिक्रमाः**—उल्लङ्घनानि ते **'पञ्चमे'** पञ्चमाणुव्रतेऽतिचारा ज्ञेयाः ।

[4]तत्र 'धनं' गणिम १ धरिम २ मेय ३ [5]परिच्छेद्य ४ भेदाच्चतुर्द्धा । यदाह—

---

१. इत्थीए-इति धर्मबिन्दुवृत्त्यादौ पाठः ॥ २. भंगविगप्पेहि-मु० G. । भंगविगप्पेहिं नायव्वा-इति L.P. सम्बोधप्रकरणे पञ्चाशकधर्मबिन्दुवृत्त्योश्च पाठः ॥ ३. पुरुषविषयाः-L.P. ॥ ४. तुला-योगशास्त्रवृत्तिः ३।९४ प० ५३४ तः, प्रवचनसारोद्धारवृत्तिः प० २०१ ॥ ५. °पारि° मु० ॥

**''गणिमं जाईफलफोफलाई, धरिमं तु कुंकुमगुडाई[1] ।**
**मेज्जं चोपडलोणाइ, रयणवत्थाइ परिच्छेज्जं'' ॥१॥ [ सं.प्र.श्रा./५३ ]**

धान्यं चतुर्विंशतिधा, व्रताधिकार एवोक्तं सप्तदशधापि । यतः —

**''साली १ जव २ वीहि ३ कुद्दव ४, रालय ५ तिल ६ मुग्ग ७ मास ८ चवल[2] ९ चिणा १० ।**
**तुवरि ११ मसूर १२ कुलत्था १३, गोहुम १४ निप्फाव १५ अयसि १६ सिणा १७'' ॥१॥**

धनं च धान्यं चेति समाहारः, अत्राग्रे च समाहारनिर्देशात् परिग्रहस्य पञ्चधात्वेनातिचारपञ्चकं सुयोजं भवति १।

क्षेत्रं[3]-सस्योत्पत्तिभूमिः, तत् त्रिविधं —सेतुकेतूभयात्मकभेदात् । तत्र सेतुक्षेत्रं यदरघट्टादिजलेन सिच्यते १, केतुक्षेत्रमाकाशोदकपातनिष्पाद्यसस्यम् २, उभयमुभयजलनिष्पाद्यसस्यम् ३। वास्तु-गृहादि ग्रामनगरादि च । तत्र गृहादि त्रेधा-खातं भूमिगृहादि १ उच्छ्रितं प्रासादादि २ खातोच्छ्रितं भूमिगृहोपरिगृहादिसन्निवेशः ३। क्षेत्रं च वास्तु चेति समाहारद्वन्द्वः २।

तथा रूप्यं-रजतं, घटितमघटितं चानेकप्रकारम् , एवं सुवर्णमपि, रूप्यं च स्वर्णं चेति समाहारः ३।

गावश्च मनुष्याश्चेति गोमनुष्यं तदादि यस्येति समासः, गवादि मनुष्यादि चेत्यर्थः, तत्र गवादि-गो-महिष-मेषा-ऽवि-करभ-सरभ[4]-हस्त्यश्वादि, मनुष्यादि-पुत्र-कलत्र-दास-दासी-कर्मकर-शुक-सारिकादि ४।

तथा कुप्यं-रूप्यसुवर्णव्यतिरिक्तं कांस्य-लोह-ताम्र-सीसक-त्रपु-मृद्भाण्ड-त्वचिसारविकारो[5]दङ्कि-काष्ठ-मञ्चक-मञ्चिका-मसूरक-रथ-शकट-हलादिगृहोपस्कररूपमिति ५।

**''यच्चात्र क्षेत्रादिपरिग्रहस्य नवविधत्वेन नवसङ्ख्या[6]तिचारप्राप्तौ पञ्चसङ्ख्यात्वमुक्तम् , तत्सजातीयत्वेन शेषभेदानामत्रैवान्तर्भावात् । शिष्यहितत्वेन च प्रायः सर्वत्र**

---

१. °ई-मु० । °ई-C. । °ई-इति योगशास्त्रवृत्तौ प० ५३५, प्रवचनसारोद्धारवृत्तौ प० २०१ ॥ २. सणा-मु० ॥ ३. तुला-धर्मबिन्दुवृत्तिः प० ४०, पञ्चाशकवृत्तिः प० १६, तत्त्वार्थसूत्रस्य सिद्धसेनीयावृत्तिः ७।२४, प० ११०, योगशास्त्रवृत्तिः प० ५३६, प्रवचनसारोद्धारवृत्तिः प० २०० ॥ ४. रासभ-इति योगशास्त्र [प० ५३६] प्रवचनसारोद्धार [प० २०१] वृत्त्योः ॥ ५. रोदङ्किकाकाष्ठ° इति योगशास्त्रवृत्तौ प० ५३५ । °रोदन्ति(दङ्कि?) काकाष्ठ°-तत्त्वार्थवृत्तिः सिद्धसेनीया । 'उदङ्कोऽनुदके ३।३।१२३....घृतोदङ्कश्चर्ममयं भाण्डम्' इति सिद्धान्तकौमुद्याम्'' ॥ इति योगशास्त्रे टिप्पणे ११, प० ५३५ ॥ ६. नवविधसङ्ख्या° मु० C. । P.L. धर्मबिन्दुवृत्तावपि-नवसङ्ख्या इति ॥

**मध्यमगतेर्विवक्षितत्वात् पञ्चकसङ्ख्ययैवातिचारपरिगणनम्[1] । अतो धन[2]धान्यादि-सङ्ख्ययातिचाराणां [ अ ][3]गणनमुपपन्नम्''** [ सू० १६० प० ४१ A ] इति **धर्मबिन्दु-वृत्तौ** ॥४७॥

[4]ननु प्रतिपन्नसङ्ख्यातिक्रमा भङ्गा एव स्युः, कथमतिचाराः ? इत्याह –

**बन्धनात् योजनात् दानात् , गर्भतो भावतस्तथा ।**
**कृतेच्छापरिमाणस्य, न्याय्याः पञ्चापि न ह्यमी ॥४८॥**

**'बन्धनात्''योजनात्''दानात्''गर्भतः''भावतः''अमी'** गृहीतसङ्ख्यातिक्रमाः **'पञ्चापि'** पञ्चसङ्ख्याका अपि **'कृतेच्छापरिमाणस्य'** प्रतिपन्नपञ्चमव्रतस्य श्रावकस्य **'न न्याय्याः'** न घटमाना व्रतमालिन्यहेतुत्वाद् ।

अयं भावः –[5]न साक्षात् सङ्ख्यातिक्रमाः, किन्तु व्रतसापेक्षस्य बन्धनादिभिः । पञ्चभिर्हेतुभिः स्वबुद्ध्या व्रतभङ्गमकुर्वत एवातिचारा भवन्ति । बन्धनादयश्च यथासङ्ख्येन धन-धान्यादीनां परिग्रहविषयाणां सम्बध्यते ।

तत्र धन-धान्यस्य बन्धनात् सङ्ख्यातिक्रमो यथा –[6]कृतधन-धान्यपरिमाणस्य कोऽपि लभ्यमन्यद्वा धनं धान्यं च ददाति, तच्च व्रतभङ्गभयाच्चतुर्मास्यादिपरतो गृह्णतो धनादि-विक्रये वा कृते ग्रहीष्यामीतिभावनया बन्धनात् नियन्त्रणात् , रज्ज्वादिसंयमनात् सत्यङ्कार-दानादिरूपाद्वा स्वीकृत्य तद्गेह एव स्थापयतोऽतिचारः १।

तथा क्षेत्र-वास्तुनो 'योजनात्' क्षेत्र-वास्त्वन्तरमीलनाद् गृहसङ्ख्यातिक्रमोऽतिचारो भवति । तथाहि –किलैकमेव क्षेत्रं वास्तु चेत्यभिग्रहवतोऽधिकतरतदभिलाषे सति व्रत-भङ्गभयात् प्राक्तनक्षेत्रादिप्रत्यासन्नं तद् गृहीत्वा पूर्वेण सह तस्यैकत्वकरणार्थं [7]वृत्तिभित्त्या-द्यपनयने च तत् तत्र योजयतो व्रतसापेक्षत्वात् कथञ्चिद्विरतिबाधनाच्चातिचारः २।

तथा रूप्य-सुवर्णस्य 'दानात्' वितरणात् , गृहीतसङ्ख्याया अतिक्रमः । यथा –केनापि चतुर्मासाद्यवधिना रूप्यादिसङ्ख्याविहिता, तेन च तुष्टराजादेः सकाशात् तदधिकं

---

१. °गणनमुचितम्–मु० C. । L.P. धर्मबिन्दुवृत्तावपि–°गणनम्–इति ॥ २. अतो क्षेत्रवास्त्वादि-सङ्ख्ययाऽतिचाराणामगणनमुपपन्नम्–इति धर्मबिन्दुवृत्तौ पाठः ॥ ३. गणन° L.P.C. मु० ॥ ४. तुला–योगशास्त्रवृत्तिः प० ५३५ ॥ ५. तुला–योगशास्त्रवृत्तिः प० ३।९५ प० ५३७ ॥ ६. तुला–धर्मबिन्दुवृत्तिः प० ४०, पञ्चाशकवृत्तिः प० १६, योगशास्त्रवृत्तिः प० ५३७–८, नवपदप्रकरण-बृहद्वृत्तिः प० १८५, प्रवचनसारोद्धारवृत्तिः प० २०० ॥ ७. C. । वृत्ति० मु० । वृत्तिभित्त्याद्यप-नयनेन–इति योगशास्त्रवृत्तौ प० ५३८ ॥

तल्लब्धम् , तच्चान्यस्मै व्रतभङ्गभयाद् ददाति । पूर्णेऽवधौ ग्रहीष्यामीतिभावनयेति व्रत-सापेक्षत्वात् कथञ्चिद्विरतिबाधनाच्चातिचार इति ३।

गोमनुष्यादेर्गर्भतः सङ्ख्यातिक्रमो यथा—किल केनापि संवत्सराद्यवधिना द्विपद-चतुष्पदानां परिमाणं कृतम् , तेषां च संवत्सराद्यवधिमध्य एव प्रसवेऽधिकद्विपदादिभावाद् व्रतभङ्गः स्यादिति तद्भयात् कियत्यपि काले गते गर्भग्रहणं कारयतो गर्भस्थद्विपदादिभावेन बहिर्गततदभावेन च कथञ्चिद् व्रतभङ्गादतिचारः ४।

कुप्यस्य भावतः सङ्ख्यातिक्रमो यथा—कुप्यस्य या सङ्ख्या कृता तस्याः कथञ्चिद् द्विगुणत्वे भूते सति व्रतभङ्गभयात् तेषां द्वयेन द्वयेनैकैकं महत्तरं कारयतः पर्यायान्तरकरणेन सङ्ख्यापूरणात् स्वाभाविकसङ्ख्याबाधनाच्चातिचारः ५।

**अन्ये** त्वाहुः—तदर्थित्वेन विवक्षितकालावधेः परतोऽहमेतत्करोटिकादि कुप्यं ग्रहीष्याम्यतो नान्यस्मै देयमिति पराप्रदेयतया व्यवस्थापयतोऽतिचारः ।[1] पञ्चेत्युप-लक्षणमन्येषां सहसाकारा-ऽनाभोगादीनामिति ॥४८॥

उक्ता अणुव्रतानां प्रत्येकं पञ्च पञ्चातिचाराः । अथ गुणव्रतानामतिचाराभिधाना-वसरः । तत्रापि प्रथमं प्रथमगुणव्रतस्य दिग्विरमणलक्षणस्यातिचारानाह—

**मानस्य निश्चितस्योर्ध्वाधस्तिर्यक्षु व्यतिक्रमाः ।**
**क्षेत्रवृद्धिः स्मृतिभ्रंशः, स्मृता आद्यगुणव्रते ॥४९॥**

**उर्ध्वाधस्तिर्यक्षु** निश्चितस्य **मानस्य व्यतिक्रमाः क्षेत्रवृद्धिः स्मृतिभ्रंशश्चे**ति पञ्चातिचाराः '**आद्यगुणव्रते**', दिग्विरमणाख्ये '**स्मृताः**' जिनैरित्यन्वयः ।[2] तत्र उर्ध्वं—पर्वतशिखरादौ, अधो—भूमिगृहादौ, तिर्यक्—पूर्वादिदिक्षु , '**निश्चितस्य**' नियमितस्य '**मानस्य**' प्रमाणस्य 'मया योजनशतादि यावद् गमनादि विधेयं न परत' इत्येवंरूपस्य **व्यतिक्रमा**[3] एते त्रयोऽतिचाराः । यत्सूत्रम्—

"**उड्ढदिसिपमाणाइक्कमे, अहोदिसिपमाणाइक्कमे, तिरिअदिसिपमाणाइक्कमे**" **[ उपासकदशाङ्गसूत्रे अ० १ सू० ७ प० ६ आवश्यकप्रत्याख्याने सू० ६ ]** त्ति ।

एते चानाभोगा-ऽतिक्रमादिभिरेवातिचारा भवन्ति, अन्यथाप्रवृत्तौ तु भङ्गा एव ।

---

१. तुला-योगशास्त्रवृत्तिः प० ५३८ ॥ २. तुला-धर्मबिन्दुवृत्तिः ३।१९, योगशास्त्रवृत्तिः प० ५३९, प्रवचनसारोद्धारवृत्तिः प० २०२ ॥ ३. तुला-तत्त्वार्थसूत्रस्य सिद्धसेनीयावृत्तिः ७।२५, पृ० १११ ॥

यस्तु न करेमि न कारयामीति वा नियमं करोति, स विवक्षितक्षेत्रात् परतः स्वयं गमनतः परेण नयना-ऽऽनयनाभ्यां न दिक्प्रमाणातिक्रमं परिहरति, तदन्यस्य तु तथा-विधप्रत्याख्यानाभावात् परेण नयनाऽऽनयनयोर्न दोष इति ३।

[1]तथा क्षेत्रस्य –पूर्वादिदेशस्य दिग्व्रतविषयस्य ह्रस्वस्य सतो वृद्धिः –वर्द्धनं पश्चिमादिक्षेत्रान्तरपरिमाणप्रक्षेपेण दीर्घीकरणं क्षेत्रवृद्धिः, यथा –किल केनापि पूर्वा-ऽपरदिशोः प्रत्येकं योजनशतं गमनपरिमाणं कृतम्, स चोत्पन्नप्रयोजन एकस्यां दिशि नवतिं योजनानि व्यवस्थाप्यान्यस्यां तु दशोत्तरं योजनशतं करोति, उभाभ्यामपि प्रकाराभ्यां योजनशतद्वयरूपस्य परिमाणस्याव्याहतत्वादित्येवमेकत्र क्षेत्रं वर्धयतो व्रतसापेक्षत्वादतिचार इति चतुर्थः ४।

तथा स्मृतेः –स्मरणस्य योजनशतादिरूपदिक्परिमाण[2]विषयस्यातिव्याकुलत्व-प्रमादित्वमत्यपाटवादिना भ्रंशोध्वंसः स्मृतिभ्रंशः । तथाहि –केनचित् पूर्वस्यां दिशि योजनशतरूपं परिमाण कृतमासीत्, गमनकाले च स्पष्टतया न स्मरति, किं शथं परिमाणं कृतमुत पञ्चाशत् ? तस्य चैवमस्मृतौ पञ्चाशतमतिक्रामतोऽतिचारः शतमति-क्रामतो भङ्गः, सापेक्षत्वान्निरपेक्षत्वाच्चेति, तस्मात् स्मर्त्तव्यमेव गृहीतव्रतं, [3]स्मृतिमूलं हि सर्वमनुष्ठानमिति पञ्चमोऽतिचारः ५।

इह चायं **वृद्धसम्प्रदायः** –यदि स्मृतिभ्रंशेनानाभोगाद्वा परिमाणमतिक्रान्तो भवति, तदा तेन ज्ञाते निवर्त्तितव्यम्, परतश्च न गन्तव्यम्, अन्योऽपि न विसर्ज्जनीयः । अथानाज्ञया कोऽपि गतो भवेत् तदा यत्तेन लब्धं, स्वयं [4]विस्मृत्य गतेन वा, तन्न गृह्यत इति । तीर्थयात्रादिधर्मनिमित्तं तु नियमितक्षेत्रात् परतोऽपि साधोरिवेर्यासमित्युपयोगेन गच्छतो न दोषः, धनार्जनाद्यैहिकफलार्थमेवाधिकगमनस्य नियमनादिति दिग्विरमणव्रतातिचाराः ॥४९॥

अथ द्वितीयगुणव्रतस्य भोगोपभोगपरिमाणरूपस्यातिचारानाह –

**सचित्तस्तत्प्रतिबद्धः, संमिश्रोऽभिषवस्तथा ।**
**दुष्पक्वाहार इत्येते, द्वैतीयीके गुणव्रते ॥५०॥**

---

१. तुला–धर्मबिन्दुवृत्तिः प० ४१, पञ्चाशकवृत्तिः प० १८, योगशास्त्रवृत्तिः प० ५४०, नवपदप्रकरणबृहद्वृत्तिः प० १९३, प्रवचनसारोद्धारवृत्तिः प० २०३, गा० २८० ॥ २. °विषयाया अति० इति योगशास्त्रवृत्तौ प० ५३९ ॥ ३. तुला–तत्त्वार्थसूत्रस्य सिद्धसेनीयावृत्तिः ७।२५, पृ १११ ॥ ४. विस्मृतितो गतेन–इति योगशास्त्रवृत्तौ प० ५४० ॥

[१] सह चित्तेन–चेतनया वर्त्तते यः स **सचित्तः**, तेन –सचित्तेन प्रतिबद्धः –सम्बद्ध–**स्तत्प्रतिबद्धः**, सचित्तेन मिश्रः –सबलः **संमिश्रः**, **अभिषवः**–अनेकद्रव्यसन्धान-निष्पन्नः, **दुष्पक्वो** –मन्दपक्वः स चासा**वाहार**श्चेत्यतिचाराः '**द्वैतीयीके**' ''**द्वितीये स्वार्थे इकण्**'' [ **श्रीसि० ६–४–१** ] '**गुणव्रते**' भोगोपभोगपरिमाणाख्ये, ज्ञेया इति शेषः ।

तत्र सचित्तः –कन्दमूलफलादिः पृथिवीकायादिर्वा । [२] इह च निवृत्तिविषयीकृतेऽपि सचित्तादौ प्रवृत्तावतिचाराभिधानं व्रतसापक्षस्यानाभोगाऽतिक्रमादिनिबन्धनप्रवृत्त्या द्रष्टव्यमन्यथा भङ्ग एव स्यात् । तत्रापि कृतसचित्तपरिहारस्य कृतसचित्तपरिमाणस्य वा सचित्तमधिकसचित्तं वाऽनाभोगादिना खादतः सचित्ताहाररूपः प्रथमोऽतिचारः । आहार-शब्दस्तु दुष्पक्वाहार इत्यस्मादाकृष्य सम्बन्ध्यः, एवमुत्तरेष्वप्याहारशब्दयोजना [३] भाव्या १।

सचित्तप्रतिबद्धः –सचेतनवृक्षादिसम्बद्धो [४] गुन्दादिः, पक्वफलादिर्वा, सचित्तान्तर्बीजः खर्जूरा–ऽऽम्रादिः, तदाहारो हि सचित्ताहारवर्ज्जकस्यानाभोगादिना सावद्याहारप्रवृत्ति-रूपत्वादतिचारः । अथवा बीजं त्यक्ष्यामि सचेतनत्वात् तस्य, कटाहं त्वचेतनत्वाद्भ-क्षयिष्यामीतिधिया पक्वं खर्जूरादिफलं मुखे प्रक्षिपतः सचित्तवर्ज्जकस्य सचित्तप्रति-बद्धाहारो द्वितीयः २।

सम्मिश्रः –अर्द्धपरिणतजलादिरार्द्रक–दाडिम–[५]बीजपूरक–चिर्भटिकादिमिश्रपूरणादिर्वा तिलमिश्रो यवधानादिर्वा, एतदाहारोऽप्यनाभोगाऽतिक्रमादिनाऽतिचारः । अथवा सम्भवत्सचित्तावयवस्यापक्वकणिक्कादेः पिष्टत्वादिनाअचेतनमितिबुद्ध्याऽऽहार सम्मिश्राहारो व्रतसापेक्षत्वादतिचार इति तृतीयः ३।

अभिषवः –सुरा–सौवीरकादिर्मांसप्रकारखण्डादिर्वा सुरा–मध्वाद्यभिस्यन्दिवृष्य-द्रव्योपयोगो वा, अयमपि सावद्याहारवर्ज्जकस्यानाभोगादिनाऽतिचार इति चतुर्थः ४।

तथा दुष्पक्वः –अर्द्धस्विन्नपृथुक–तन्दुल–यव–गोधूम–स्थूल–मण्डक–[६]कङ्कडुक-फलादिरैहिकप्रत्यवायकारी यावता चांशेन सचित्तस्तावता परलोकमप्युपहन्ति ।

---

१. तुला–तत्त्वार्थसूत्रस्य सिद्धसेनीयावृत्तिः ७।२०, पृ० ११४–५, योगशास्त्रवृत्तिः प० ५४१ ॥ २. तुला–धर्मबिन्दुवृत्तिः प० ४२, पञ्चाशकवृत्तिः प० १९, नवपदप्रकरणबृहद्वृत्तिः प० २२४, प्रवचनसारोद्धारवृत्तिः प० २०५ ॥ ३. वाच्या–L. ॥ ४. गुन्दादि पक्वादिवा–इति प्रवचनसारोद्धारवृत्तौ प० २०५ ॥ ५. बीजकरवन्दकादिमिश्रः–इति प्रवचनसारोद्धारवृत्तौ । वीजकुचिर्भिटादिमिश्रः–इति योगशास्त्रवृत्तौः ५० ५४१ ॥ ६. °कङ्कटुक° इति योगशास्त्रवृत्तौ प० ५४२ ॥

[1]पृथुकादेर्दुष्पक्वतया सम्भवत्सचेतनावयवत्वात् पक्वत्वेनाचेतन इति भुञ्जानस्यातिचार इति पञ्चमः ५।

**केचित्** तु –अपक्वाहारमप्यतिचारत्वेन वर्णयन्ति। अपक्वं च यदग्निनाऽसंस्कृतम्। एष च सचित्ताहारे प्रथमातिचारेऽन्तर्भवति । तुच्छौषधिभक्षणमपि **केचिद**तिचारमाहुः । तुच्छौषधयश्च मुद्गादिकोमलशिम्बीरूपाः, ताश्च यदि सचित्तास्तदा सचित्तातिचार एवान्तर्भवन्ति, अथाग्निपाकादिनाऽचित्तास्तर्हि को दोषः ? इति । [2]एवं रात्रिभोजन-मद्यादिनिवृत्तिष्वपि अनाभोगाऽतिक्रमादिभिरतिचारा भावनीयाः । इत्थमतिचारव्याख्यानं [3]**तत्त्वार्थवृत्त्याद्यनु**सारेण ज्ञेयम् ।

[4]**आवश्यक-पञ्चाशकवृत्त्या**दिषु तु अपक्व-दुष्पक्व-तुच्छौषधिभक्षणस्य क्रमेण तृतीयाद्यतिचारत्वं दर्शितम् । तत्राक्षेपपरिहाराविथम् –

''[5]**नन्वपक्वौषधयो यदि सचेतनास्तदा सचित्तमित्याद्यपदेनैवोक्तार्थत्वात् पुनर्वचन-मसङ्गतम् , अथाचेतनास्तदा कोऽतिचारो ? निरवद्यत्वात् तद्भक्षणस्येति । सत्यम् , किन्त्वाद्यावतिचारौ सचेतनकन्दफलादिविषयावितरे तु [6]शाल्याद्योषधिविषया इति विषयकृतो भेदः, अत एव मूलसूत्रे ''अप्पउलि[7]ओसह( हि )भक्खणया''** [ **आवश्यक प्रत्याख्यान सू०, उपासकदशाङ्ग सू० ७** ] **इत्याद्युक्तम् , ततोऽनाभोगाऽतिक्रमादिना-ऽपक्वौषधिभक्षणमतिचारः, अथवा कणिक्कादेरपक्वतया [8]सम्भवत्सचित्तावयवस्य पिष्टत्वादिनाऽचेतनमिदमितिबुद्ध्या भक्षणं व्रतसापेक्षत्वाददतिचारः''** । [ **पञ्चाशकटीका १/२२ प० १९** ] दुष्पक्वौषधिभक्षणभावना तु पूर्वोक्तैव ।

तुच्छौषधिभक्षणे त्वित्थम् –''**ननु तुच्छौषधयोऽपक्वा दुष्पक्वाः सम्यक्पक्वा वा स्युः ? यदाऽऽद्यौ पक्षौ तदा तृतीय-चतुर्थातिचाराभ्यामेवास्योक्तत्वात् पुनरुक्तत्वदोषः । अथ सम्यक्पक्वास्तदा निरवद्यत्वादेव काऽतिचारता तद्भक्षणस्येति ?, सत्यम् , किन्तु**

---

१. तुला-पञ्चाशकवृत्तिः प० २० ॥ २. तुला-प्रवचनसारोद्धारवृत्तिः प० २०६ ॥ ३. तत्त्वार्थे ७।३० सूत्रस्य वृत्त्यनुसारेण धर्मबिन्दु-योगशास्त्रवृत्त्यनुसारेण च इति ज्ञेयम् । ४. प्रत्याख्यानावश्यके सू० ७, हारिभद्र्यां वृत्तौ प० ८२८, पञ्चाशकवृत्तौ प० २० । ''भोअणओ समणोवासएणं पंच अइयारा जाणियव्वा न समायरियव्वा, तं जहा-सचित्ताहारे १, सचित्तपडिबद्धाहारे, २, अप्पउलि-ओसहिभक्खणया ३, दुप्पउलिओसहिभक्खणया ४, तुच्छोसहिभक्खणया ५'' इति उपासकदशाङ्गे अध्ययन १ ॥ ५. तुला-पञ्चाशकवृत्तिः १।२२, प्रवचनसारोद्धारवृत्तिः प० २०४ ॥ ६. शाल्याद्यौषधि° P. । शाल्योषधि° इति पञ्चाशकवृत्तौ पाठः ॥ ७. °ओसहभक्ख° L.P.C. । °ओसहिभक्ख° इति आवश्यकसूत्रे पाठः ॥ ८. सम्भवात्सचित्ता° इति पञ्चाशकवृत्तौ पाठः ॥

**यथाऽऽद्यद्वयस्योत्तरद्वयस्य च सचित्तत्वे समानेऽप्यनोषध्योषधिकृतो विशेषः । एवमस्य सचेतनौषधित्वाभ्यां समानत्वेऽप्यतुच्छतुच्छत्वकृतो[1] विशेषो दृश्यः । तत्र च कोमल-मुद्गादिफलीर्विशिष्टतृप्त्यकारकत्वेन तुच्छाः सचित्ता एवानाभोगादिना भुञ्जानस्य तुच्छौषधिभक्षणमतिचारः । अथवाऽत्यन्तावद्यभीरुतयाऽचित्ताहारताऽभ्युपगता, तत्र च यत्तृप्तिकारकं तदचित्तीकृत्यापि भक्षयतु , सचेतनस्यैव वर्जनीयत्वाभ्युपगमात् , यत्पुनस्तृप्तिजननासमर्था अप्योषधीर्लौल्येनाचित्तीकृत्य भुङ्क्ते तत्तुच्छौषधिभक्षण-मतिचारः, तत्र भावतो विरतेर्विराधितत्वाद् द्रव्यतस्तु पालितत्वादिति" [ पञ्चा० १/२२, प० २० ]** [2]पञ्चाशकवृत्तौ ॥५०॥

अथ भोगोपभोगातिचारानुपसंहरन् भोगोपभोगव्रतस्य लक्षणान्तरं तद्गतांश्चातिचारानुप-दर्शयितुमाह —

**अमी भोजनमाश्रित्य, त्यक्तव्याः कर्मतः पुनः ।**
**खरकर्मत्रिघ्नपञ्चकर्मादानानि तन्मलाः ॥५१॥**

'[3]**अमी**' उक्तस्वरूपाः पञ्चातिचारा '**भोजनमाश्रित्य**' '**त्यक्तव्या**' हेयाः । अथ कर्मतस्तानाह —तत्र भोगोपभोगसाधनं यद् द्रव्यं तदुपार्जनाय यत्कर्म-व्यापारस्तदपि भोगोपभोगशब्देनोच्यते, '**कारणे कार्योपचारात्**' इति, व्याख्यानान्तरं पूर्वमुक्तमेव । ततश्च '**कर्मतः**' कर्माश्रित्य भोगोपभोगोत्पादकव्यापारमाश्रित्येर्थः, '**पुनः**' '**खरं**' कठोरं यत् '**कर्म**' [4]कोट्टपालन-गुप्तिपालनादिरूपं तत्त्याज्यम् । '**तन्मलाः**' तस्मिन् खरकर्मत्यागलक्षणे भोगोपोभोगव्रते मलाः —अतिचाराः **त्रिघ्नाः** —त्रिगुणिताः **पञ्च** पञ्चदशेत्यर्थः । **कर्मादानानि** —कर्मादानशब्दवाच्या भवन्तीतिशेषः, कर्मणां पापप्रकृतीनामादानानि कारणानीतिकृत्वा तेऽपि त्यक्तव्या इति पूर्वक्रियान्वयः ॥५१॥

अथ तान्येव नामतः श्लोकद्वयेनाह —

**वृत्तयोऽङ्गार-विपिना-ऽनो-भाटी-स्फोटकर्मभिः ।**
**वणिज्याका दन्त-लाक्षा-रस-केश-विषाश्रिताः ॥५२॥**
**यन्त्रपीडनकं निर्लाञ्छनं दानं दवस्य च ।**
**सरःशोषोऽसतीपोषश्चेति पञ्चदश त्यजेत् ॥५३॥ युग्मम् ॥**

---

१. °तुच्छत्वतुच्छत्व° इति पञ्चाशक[प० २०]प्रवचनसारोद्धार[प० २०५]वृत्त्योः ॥ २. पञ्चाशकवृत्तौ प्रवचनसारोद्धारवृत्तौ च क्वचित् क्वचित् पाठभेदः दृश्यते ॥ ३. तुला-योग-शास्त्रवृत्तौ ३।९८ प० ५४४ ॥ ४. कोटपाल° इति योगशास्त्रवृत्तौ ॥

कर्मशब्दः प्रत्येकं सम्बध्यते, **अङ्गारकर्म, विपिनकर्म, अनःकर्म, भाटीकर्म, स्फोटकर्मे**ति, **तैर्वृत्तयः** –आजीविका अङ्गारकर्मादिवृत्तयः । तत्र कर्म–क्रिया करण-मितियावत्, ततः [१] काष्ठदाहेनाङ्गारनिष्पादनं अङ्गारकर्म तेनाजीविका –तद्विक्रयादि-रूपा। तत्करणे हि षण्णां जीवनिकायानां विराधनासम्भवः । एवं ये येऽग्निविराधना-रूपा आरम्भास्ते तेऽङ्गारकर्मण्यन्तर्भवन्ति । ते च भ्राष्ट्रकरणेष्टिकादिपाक–कुम्भकारा-ऽयस्कार–स्वर्णकारकृत्यादयः । एते हि अङ्गारकर्मरूपास्तैर्जीवनमङ्गारकर्मवृत्तिरेव-मग्रेऽपि भाव्यम् । यतो **योगशास्त्रे** –

''**अङ्गारभ्राष्ट्रकरणं, कुम्भायः-स्वर्णकारिता ।**
**ठठारत्वेष्टिकापाकाविति ह्यङ्गारजीविका**'' ॥१॥ [ यो.शा.३/१०१ ]

तत्र [२] ठठारत्वं–शुल्व–नाग–वङ्ग–कांस्य–पित्तलादीनां करण–घटनादिना जीविका १।

तथा 'विपिनं' वनं, तत्कर्म –छिन्ना–ऽच्छिन्न–वन–पत्र–पुष्प–फल–कन्दमूल–तृण–काष्ठ–कम्बा–वंशादिविक्रयः कणदलपेषणं वनकच्छादिकरणं च । यतः –

''**छिन्नाच्छिन्नवनपत्रप्रसूनफलविक्रयः ।**
**कणानां दलनोत्पेषाद् वृत्तिश्च वनजीविका**'' ॥१॥ [ यो.शा.३/१०२ ] इति ।

अस्यां च वनस्पतेस्तदाश्रितत्रसादेश्च घातसम्भव इति दोषः २।

'अनः' शकटं तत्कर्म च शकटशकटाङ्गघटन–खेटन–विक्रयादि । यदाह –

''**शकटानां तदङ्गानां, घटनं खेटनं तथा ।**
**विक्रयश्चेति शकटजीविका परिकीर्त्तिता**'' ॥१॥ [ यो.शा.३/१०३ ]

तत्र [३] शकटानामिति चतुष्पदवाह्यानां वाहनानाम् तदङ्गानां चक्रादीनाम्, घटनं स्वयं परेण वा निष्पादनम्, खेटनं [४] वाहनं च शकटानामेव सम्भवति, स्वयं परेण वा, विक्रयश्च शकटादीनां तदङ्गानां च, इदं कर्मापि सकलभूतोपमर्दजननम्, गवादीनां च वधबन्धादिहेतुः ३।

'भाटीकर्म' शकट–वृषभ–करभ–महिष–खर–वेसरा–ऽश्वादेर्भाटकनिमित्तं भार-वाहनम् । यतः –

''**शकटोक्ष-लुलायोष्ट्र-खरा-ऽश्वतर-वाजिनाम् ।**
**भारस्य वाहनाद् वृत्तिर्भवेद्भाटकजीविका**'' ॥१॥ [ यो.शा.३/१०४ ]

अत्रापि शकटकर्मोक्तो यो दोषः स सम्भवत्येव ४।

---

१. तुला–योगशास्त्रवृत्तिः ३।१०१, प० ५४५ ॥ २. तुला–योगशास्त्रवृत्तिः ३।१०१ ॥ ३. तुला–योगशास्त्रवृत्तौ प० ५४६ ॥ ४. वाहनं तच्च शक° इति योगशास्त्रवृत्तौ प० ५४६ ॥

'स्फोटः' पृथिव्या विदारणं तत्कर्म स्फोटकर्म, कूपाद्यर्थं भूखनन-हलखेटन-पाषाणखननादि । यतः —

**''सरः-कूपादिखननं[1], शिलाकुट्टनकर्मभिः ।**
**पृथिव्यारम्भसम्भूतैर्जीवनं स्फोटजीविका'' ॥१॥ [ यो.शा.३/१०५ ]**

अनेन च पृथिव्या वनस्पतित्रसादिजन्तूनां च घातो भवतीति दोषः स्पष्ट एव । [2]**प्रतिक्रमणसूत्रवृत्तौ** तु कणानां दलन-पेषणादि स्फोटकर्मत्वेन प्रतिपादितमिति ।

अथोत्तरार्द्धेन पञ्च वाणिज्यान्याह '**वणिज्याका**' इत्यादि, अत्राश्रिताशब्दः प्रत्येकं योज्यस्ततो **दन्ताश्रिता**-दन्तविषया वणिज्याका-वाणिज्यं दन्तक्रयविक्रय इत्यर्थः । एवं **लाक्षावणिज्या-रसवणिज्या-केशवणिज्या-विषवणिज्या**स्वपि ।

तत्र दन्ता हस्तिनाम् , तेषामुपलक्षणत्वादन्येषामपि त्रसजीवावयवानां घूकादिनख-हंसादिरोम-चर्म-चमर-शृङ्ग-शङ्ख-शुक्ति-कपर्द-कस्तूरी-पोहीसकादीनाम् , वणिज्या चात्राकरे ग्रहणरूपा द्रष्टव्या, यत्पूर्वमेव पुलिन्दानां मूल्यं ददाति, 'दन्तादीन् मे यूयं ददत' इति । ततस्ते हस्त्यादीन् घ्नन्त्यचिरादसौ वाणिजक एष्यतीति पूर्वानीतांस्तु क्रीणातीति । त्रसहिंसा स्पष्टैवास्मिन् वाणिज्ये । अनाकरे तु दन्तादीनां ग्रहणे विक्रये च न दोषः । यदाहुः —

**''दन्त-केश-नखा-ऽस्थि-त्वग्-रोम्णो ग्रहणमाकरे ।**
**त्रसाङ्गस्य वणिज्यार्थं, दन्तवाणिज्यमुच्यते ॥१॥ [ यो.शा.३/१०६ ]** ६।

लाक्षा जतुः[3], अत्रापि लाक्षाग्रहणमन्येषां सावद्यानां मनःशिलादीनामुपलक्षणम् , तदाश्रिता वणिज्या लाक्षावाणिज्यम् , लाक्षा-धातकी-नीली-मनःशिला-वज्रलेप-[4]तुबरिका-पट्टवास[5]टङ्कण-साबूक्षारादिविक्रयः । यतः —

**''लाक्षा-मनःशिला-नीली-धातकी-टङ्कणादिनः ।**
**विक्रयः पापसदनं, लाक्षावाणिज्यमुच्यते ॥१॥ [ यो.शा.३/१०७ ]**

अस्मिंश्च लाक्षाया बहुत्रसाकुलत्वात्तद्रसस्य च रुधिरभ्रमकारित्वात् , धातकीत्व-क्पुष्पयोर्मद्याङ्ग[6]त्वात् तत्कल्कस्य च कृमिहेतुत्वात् , गुलिकाया अनेकजन्तुघाताविना-भावित्वात् , मनःशिला-वज्रलेपयोः सम्पातिमबाह्यजन्तुघातकत्वात् , तुबरिकायाः

---

१. °न-इति योगशास्त्रे ॥ २. तुला-श्राद्धप्रतिक्रमणवृत्ति गा० २२ प० १२१ ॥ ३. जतु-इति योगशास्त्रवृत्तौ प० ५४९ ॥ ४. तुंबरिका° L. । लक्खवणिज्जं तुयरीसकूडमाईणं-इति प्रवचन-सारोद्धारवृत्तौ भा० १। प० १६५ ॥ ५. L.P.C. । °वासकण° मु० ॥ ६. C. । °ङ्गत्वात्कल्कस्य-मु० । योगशास्त्रवृत्तौ मद्यहेतुत्वेन तत्कल्कस्य-इति पाठः प: ५४९ ॥

पृथिवीत्वादिना पटवासस्य त्रसाकुलत्वात्, टङ्कणक्षार-साबूक्षारादेर्बाह्यजीवविनाश-निमित्तत्वाच्च महानेव दोषः ७।

रसवणिज्या-मधु-मद्य-मांस-म्रक्षण-वसा-मज्जा-दुग्ध-दधि-घृत-तैलादिविक्रयः। दोषास्तु नवनीते जन्तुमूर्छनम्, वसा-क्षौद्रयोर्जन्तुघातोद्भवत्वम्, मद्यस्योन्मादजननत्वम्, तद्गतकृमिविघातश्च, दुग्धादौ सम्पातिमजन्तुविराधना, दिनद्वयातीते दध्नि जन्तु-सम्मूर्छनाऽपि ८।

केशशब्दः केशवदुपलक्षकः, ततो दासादिनृणां गवाश्वादितिरश्चां च केशवतां विक्रयः केशवणिज्या। यतः—

''**नवनीत-वसा-क्षौद्र-मद्यप्रभृतिविक्रयः।**
**द्विपाच्चतुष्पाद्विक्रयो [1]वाणिज्यं रसकेशयोः** ॥१॥ [ यो.शा.३/१०८ ]

[2]अजीवानां तु केशादिजीवाङ्गानां विक्रयो दन्तवाणिज्यमिति विवेकः। द्विपाच्चतु-ष्पाद्विक्रये तु तेषां पारवश्यं वध-बन्धादयः क्षुत्पिपासा पीडा चेति दोषाः ९।

विषं-[3]शृङ्गादि, तच्चोपलक्षणं जीवघातहेतूनामस्त्रादीनाम्। ततो विष-शस्त्र-कुशी-कुद्दालादि-लोहहलादिविक्रयो विषवणिज्या। अस्मिंश्च शृङ्गक-वत्सनागादेर्हरिताल-सोमलक्षारादेश्च विषस्य, शस्त्रादीनां च जीवितघ्नत्वं प्रतीतमेव। दृश्यन्ते च जलार्द्र-हरितालेन सहसैव विपद्यमाना मक्षिकादयः, सोमलक्षारादिना तु भक्षितेन बालादयो-ऽपि। विषादिवाणिज्यं च परेऽपि निषेधयन्ति। यतः—

''**कन्याविक्रयिणश्चैव, रसविक्रयिणस्तथा।**
**विषविक्रयिणश्चैव, नरा नरकगामिनः**'' ॥१॥ [ ] इति।

अरघट्टादियन्त्रविक्रयोऽपि **योगशास्त्रे** विषवाणिज्यतयोक्तो। यतः—

''**विषा-ऽस्त्र-हल-यन्त्रा-ऽयो-हरितालादिवस्तुनः।**
**विक्रयो जीवितघ्नस्य, विषवाणिज्यमुच्यते**'' ॥१॥ [ यो.शा.३/१०९ ] इति।

**ग्रन्थान्तरे** तु यन्त्रपीडनकर्मण्येवेति १०।

'यन्त्रपीडनकर्म' शिलोदूखल-मुशल-घरट्टा-ऽरघट्ट-कङ्कतादिविक्रयस्तिलेक्षु-सर्षपैरण्डफलातस्यादिपीडनदलतैलविधान-जलयन्त्रवाहनादि वा। यतः—

---

१. C.। वा वाणिज्यं-मु० ॥ २. तुला-योगशास्त्रटीका प० ५४९ ॥ ३. शृङ्गिकादि-इति योगशास्त्रवृत्तौ प० ५५० ॥

''**तिलेक्षु सर्षपैरण्ड-जलयन्त्रादिपीडनम् ।**
**दलतैलस्य च कृतिर्यन्त्रपीडा प्रकीर्त्तिता**'' ॥१॥ [ यो.शा.३/११० ]

[1]अत्र यन्त्रशब्दः प्रत्येकं सम्बध्यते, तत्र तिलयन्त्रं तिलपीडनोपकरणम्, इक्षुयन्त्रं कोल्हुकादि, सर्षपैरण्डयन्त्रे [2]तत्पीडनोपकरणे, जलयन्त्रमरघट्टादि, [3]दलतिलं यत्र दलं तिलादि दीयते तैलं च प्रतिगृह्यते तद् दलतैलम्, तस्य कृतिर्विधानम्, अत्र दोषस्तु तिलादिक्षोदात् तद्गतत्रसजीववधाच्च । **लोकिका** अप्याहुः —

''***दशशूनासमं चक्रम्** [ मनुस्मृति ४/८५ ] इति'' ११।

नितरां लाञ्छनम् —अङ्गावयवच्छेदस्तेन कर्म-जीविका निर्लाञ्छनकर्म-गवादिकर्ण-कम्बल-शृङ्ग-पुच्छच्छेद-नासावेधा-ऽङ्कन-षण्डन-त्वग्दाहादि-उष्ट्रपृष्ठगालनादि च। यतः—

''**नासावेधोऽङ्कनं [4]पुच्छ( मुष्क )च्छेदनं पृष्ठगालनम् ।**
**[5]गोकर्णकम्बलच्छेदो, निर्लाञ्छनमुदीरितम्**'' ॥१॥ [ यो.शा.३/१११ ]

तत्राङ्कनं-गवा-ऽश्वादीनां-चिह्नकरणम्, मुष्कः —अण्डस्तस्य छेदनं-वर्द्धितकी-करणम्, अस्मिन् जीवबाधा व्यक्तैव १२।

[6]दवस्य-दवाग्नेर्दानं-वितरणं दवदानम्, गहनदाहे सति भिल्लादयः सुखेन चरन्ति, जीर्णतृणदाहे वा नवतृणाङ्कुरोद्भेदाद् गवादयश्चरन्ति, यद्वा दग्धे क्षेत्रे सस्यसम्पत्तिवृद्धिः स्यादित्यादिबुद्ध्या कौतुकाद्वा, यद्वा मम श्रेयोऽर्थं मरणकाले इयन्तो धर्मदीपोत्सवाः करणीया इति पुण्यबुद्ध्याऽरण्येऽग्निप्रज्वालनं । यतः —

''**व्यसनात् पुण्यबुद्ध्या वा, दवदानं भवेत् द्विधा**'' । [ यो.शा.३/११३पू. ] इति ।

तत्र व्यसनात् —फलनिरपेक्षतात्पर्यात्, तथा च वनेचरा एवमेवाग्निं ज्वालयन्ति, पुण्यबुद्ध्या वा —तच्चोक्तरीत्याऽवसेयम्, अत्र च दोषो जीवकोटीनां वधरूपः स्पष्ट एव १३।

सरसः शोषः सरःशोषः —धान्यादिवपनार्थं सारणीकर्षणम्, सरोग्रहणं जलाशया-न्तराणामुपलक्षणम् । तेन सिन्धुद्रह-तडागादिपरिग्रहः । यतः —

---

१. तुला-योगशास्त्रवृत्तिः ॥ २. तत्पीलनो° इति योगशास्त्रवृत्तौ ॥ ३. दलतैलं-इति योग-शास्त्रवृत्तौ प० ५२० ॥ ४. पुच्छच्छेदनं-L.P.C. । मुष्कच्छेदनं-इति योगशास्त्रे ॥ ५. कर्ण-कम्बलविच्छेदो-इति योगशास्त्रे ॥ ६. तुला-योगशास्त्रवृत्तिः प० ५५२, प्रवचनसारोद्धारवृत्तिः प० १६६-७ ॥ ''*दशसूनासमं चक्रं दशचक्रसमोध्वजः । दशध्वजसमो वेशो दशवेशसमो नृपः'' ॥ इति पूर्णः श्लोकः ॥

**"सरःशोषः सरःसिन्धु-ह्रदादेरम्बुसम्प्लवः"** ॥ [यो.शा.३/११३उत्त.]

तत्राऽखातं सरः, खातं तु तडागमित्यनयोर्भेदः । इह हि जलस्य तद्गतानां त्रसानां तत्प्लावितानां च षण्णां जीवनकायानां वध इति दोषः १४।

[1]असत्यो –दुःशीलास्तासां पोषणम्, लिङ्गमतन्त्रम्, शुकादीनां पुंसामपि पोषणम-सतीपोषः, शुक-सारिका-मयूर-मार्जार-मर्कट-कुर्कुट-कुर्कुर-शूकरादितिरश्चां पोषणम्। तथा भाटीग्रहणार्थं दास्याः पोषः, **गोल्ल**देशे प्रसिद्धोऽयं व्यवहारः, एषां च दुःशीलानां पोषणं पापहेतुरेवेति दोषः १५। इति **पञ्चदश**सङ्ख्यानि प्रस्तावात् कर्मादानानि अतिचाररूपत्वात्[3] **'त्यजेत्'** जह्यात्, श्रावक इति शेषः । [2]इत्युक्तानि पञ्चदश कर्मादानानि। दिग्मात्रं चेदमेवञ्जातीयानां बहूनां सावद्यकर्मणाम्, न पुनः परिगणनमिति, इह चैवं विंशतिसङ्ख्यातिचाराभिधानमन्यत्रापि पञ्चातिचारसङ्ख्यया तज्जातीयानां व्रतपरिणामकालुष्यनिबन्धनविधीनां[4] सङ्ग्रह इति ज्ञापनार्थम्। तेन स्मृत्यन्तर्द्धानादयो यथासम्भवं सर्वव्रतेष्वतिचारा द्रष्टव्याः। अत एव चात्र व्रते रात्रिभोजनमद्यादिनिवृत्ति-ष्वप्यतिचाराः पूर्वं भाविताः । तथा चोक्त**मुपासकदशाङ्गवृत्तौ "य एते प्रतिव्रतं पञ्च पञ्चातिचारास्ते उपलक्षणमतिचारान्तराणामवसेयम्, न त्ववधारणम्"** ।

यदाहुः **पूज्याः** –

**"पञ्चपञ्चातिचारा उ, सुत्तंमि जे पदंसिआ ।**
**ते नावहारणट्ठाए, किन्तु ते उवलक्खणं"** ॥१॥ [उपा.अ.१/सू.७ प.६ A] ति ।

इदं चेह तत्त्वम्–यत्र व्रतविषयेऽनाभोगादिनाऽतिक्रमादिपदत्रयेण वा स्वबुद्धि-कल्पनया वा व्रतसापेक्षतया व्रतविषयं[5] परिहरतः [या] प्रवृत्तिः साऽतिचारः, विपरीततायां तु भङ्गः । इत्येवं सङ्कीर्णातिचारपदगमनिका कार्येति ।

**"नन्वङ्गारकर्मादयः कथं खरकर्मण्यतिचाराः ? खरकर्मरूपा ह्येते । सत्यम्, खरकर्मरूपा एवैते । किन्त्वनाभोगादिना क्रियमाणाः खरकर्मवर्जनव्रतवतामतिचाराः स्युः । उपेत्य क्रियमाणास्तु भङ्गा एवेति" [तुला-पञ्चाशकटीका १/२२, प० २१ A । योगशास्त्रटीका ३/११३ प० ५५३] [6]पञ्चाशकयोगशास्त्रवृत्त्योः** ॥५३॥

---

१. तुला-प्रवचनसारोद्धारवृत्तिः प० १६८ ॥ २. तुला-योगशास्त्रवृत्तिः प० ५५३ ॥ ३. तुला-धर्मबिन्दुवृत्तिः प० ४२, पञ्चाशकवृत्तिः प० २०-१ ॥ ४. °नां अपरेषां संग्रह-इति धर्मबिन्दुवृत्तौ प० ४२ ॥ ५. परिहरतः प्रवृत्तिः-L.P.C. ॥ ६. दृश्यतां पञ्चाशकवृत्तौ १/२२, प० २१ A योगशास्त्रवृत्तिः ३।११३, प० ५५३ ॥

इत्युक्ता भोगोपभोगव्रतातिचाराः, अथानर्थदण्डविरमणव्रतस्य तानाह —

**प्रोक्तास्तृतीये कन्दर्पः, कौत्कुच्यं भोगभूरिता ।**
**संयुक्ताधिकरणत्वं, मौखर्यं च गुणव्रते ॥५४॥**

**कन्दर्पः कौत्कुच्यं भोगभूरिता संयुक्ताधिकरणत्वं मौखर्यं** चेति पञ्चातिचाराः '**तृतीये गुणव्रते**' अनर्थदण्डविरतिरूपे **प्रोक्ताः** जिनैरिति शेषः ।

तत्र[1] 'कन्दर्पः' कामस्तद्धेतुस्तत्प्रधानो वा वाक्प्रयोगोऽपि कन्दर्पः । मोहोद्दीपकं वाक्कर्मेति भावः । इह चेयं **सामाचारी**-श्रावकेण न तादृशं वक्तव्यं येन स्वस्य परस्य वा मोहोद्रेको भवति । अट्टट्टहासोऽपि न कल्पते कर्त्तुम्, यदि नाम हसितव्यं तदेषदेवेति प्रथमः १।

कुत्-कुत्सायां निपातः, निपातानामानन्त्यात् । कुत् कुत्सितं कुचति[2] कुच-भ्रू-नयनौष्ठ[3]-नासा-कर-चरण-मुखविकारैः सङ्कुचतीति कुत्कुचस्तस्य भावः कौत्कुच्यम् — अनेकप्रकारा भण्डादिविडम्बनक्रियेत्यर्थः । अथवा कौकुच्यमिति पाठः, तत्र कुत्सितः कुचः[4] सङ्कोचादिक्रियाभाक् तद्भावः कौकुच्यं[5], अत्र[6] च श्रावकस्य न तादृशं वक्तुं चेष्टितुं वा कल्पते, येन परे हसन्ति, आत्मनश्च लाघवं भवति, प्रमादात् तथाऽऽचरणे चातिचार इति द्वितीयः २।

एतौ द्वावपि प्रमादाचरितव्रतस्यातिचारौ, प्रमादरूपत्वादेतयोः ।

तथा भोगस्य उपलक्षणत्वादुपभोगस्य च-उक्तनिर्वचनस्य स्नान-पान-भोजन-चन्दन-कुङ्कुम-कस्तूरिका-वस्त्राऽऽभरणादेर्भूरिता-स्वस्वीयकुटुम्बव्यापारणापेक्षया-ऽधिकत्वम्, अयमपि प्रमादाचरितस्यातिचारः, विषयात्मकत्वादस्याः ।

इहापीयं **सामाचारी आवश्यकचूर्ण्या**द्युक्ता —यदि[7] उपभोगानि तैला-ऽऽमलकादीनि बहूनि गृह्णाति, तदा तल्लौल्येन बहवः स्नातुं तडागादौ व्रजन्ति, ततश्च पूतरकादिव-धोऽधिकः स्यात्, स्यादेवं ताम्बूलादिष्वपि विभाषा, न चैवं कल्पते, तत्र को विधिरुप-

---

१. तुला-योगशास्त्रवृत्तिः ३।११४, प्रवचनसारोद्धारवृत्तिः प० २०६-८ ॥ २. कुचते-C. ॥ ३. °नयनोष्ठ° इति योगशास्त्रवृत्तौ प० ५५५ प्रवचनसारोद्धारवृत्तौ प० २०६ ॥ ४. कुचः कुकुचः सङ्कोचा° इति । प्रवचनसारोद्धारवृत्तौ प० २०७ ॥ ५. कौत्कुच्य-मु० । P.C. प्रवचनसारोद्धार-योगशास्त्रवृत्त्योरपि कौकुच्यम्-इति ॥ ६. तुला-आवश्यकहारिभद्रीयवृत्तिः प० ८३० B ॥ ७. तुला-आवश्यकहारिभद्रीयवृत्तिः प० ८३१ A ॥

भोगे ? [१]स्नानेच्छुना तावत् गृह एव स्नातव्यम् । नास्ति चेत् तत्र सामग्री तदा तैलाऽऽमलकैः शिरो घर्षयित्वा तानि च सर्वाणि शाटयित्वा तडागादीनां तटे निविष्टोऽञ्जलिभिः स्नाति, तथा येषु पुष्पादिषु कुन्थ्वादयः सम्भवन्ति तानि परिहरति, एवं सर्वत्र वाच्यमिति तृतीयः ३।

[२]तथाऽधिक्रियते दुर्गतावात्माऽनेनेत्यधिकरणम् —उदूखलादिसंयुक्तं च अर्थक्रियायाः करणयोग्यम्, ततः संयुक्तं च तदधिकरणं चेति समासः । उदूखलेन मुशलम्, हलेन फालः, शकटेन युगम्, धनुषा च [३]शरा इत्यादिरूपमित्यर्थः, तद्भावः संयुक्ताधिकरणत्वम्, एतच्च हिंस्रप्रदानव्रतस्यातिचारः ।

अत्रापि **वृद्धसम्प्रदायः**-श्रावकेण हि संयुक्तान्यधिकरणानि न धारणीयानि, संयुक्ताधिकरणं हि यः कश्चिदाददीत, वियुक्ते तु तत्र परः सुखेन प्रतिषेधितुं शक्यत इति चतुर्थः ४।

तथा मुखमस्यास्तीति मुखरः-अनालोचितभाषी वाचाटस्तद्भावो मौखर्यं-धार्ष्ट्यं प्रायमसभ्यासम्बद्धबहुप्रलापित्वम्, अयं च पापोपदेशस्यातिचारः, मौखर्ये सति पापोपदेशसम्भवादिति पञ्चमः ५।

''**अपध्यानाचरितव्रते त्वनाभोगादिना अपध्याने प्रवृत्तिरतिचार इति स्वयमभ्यूह्यम् । कन्दर्पादयश्चाकुट्ट्या क्रियमाणा भङ्गा एवावसेया**'' [ ध.बिं.सू. १६३ प० ४३ ] इति **धर्मबिन्दुवृत्तौ** इत्युक्ता गुणव्रतातिचाराः ॥५४॥

अथ शिक्षाव्रतातिचाराभिधानावसरः तत्रापि सामायिकव्रतस्य तावत्तानाह —

**योगदुष्प्रणिधानानि, [४]स्मृतेरनवता( धा )रणम् ।**
**अनादरश्चेति जिनैः, प्रोक्ताः सामायिकव्रते ॥५५॥**

---

१. स्नाने तावत्-इति धर्मबिन्दुवृत्तौ [प० ४३] पञ्चाशकवृत्तौ [प० २२] नवपदप्रकरणबृहद्वृत्तौ [प० २३९] योगशास्त्रवृत्तौ [प० ५५४] प्रवचनसारोद्धारवृत्तौ [प० २०७] च पाठः ॥ २. तुला-पञ्चाशकवृत्तिः प० २१, योगशास्त्रवृत्तिः प० ५५४, प्रवचनसारोद्धारवृत्तिः प० २०७-८ । 'संयुक्ताधिकरण' स्थाने 'असमीक्ष्याधिकरणम्' अतिचारत्वेन तत्त्वार्थसूत्रे [७।२७] धर्मबिन्दौ [प० ४३] च वर्णितम् । ''असमीक्ष्य अनालोच्य प्रयोजनमात्मनाऽथमधिकरणम् उचितादुपभोगादतिरेककरणम् असमीक्ष्याधिकरणं मुसल-दात्र-शिलापुत्रक-शस्त्र-गोधूमयन्त्रकशिलाऽग्न्यादिदानलक्षणम् असमीक्ष्य कुर्वाणः स्वात्मानं नरकादिष्वधिकरोति येन तदधिकरणम्'' तत्त्वार्थवृत्तिः सिद्धसेनीया [७।२७] पृ० ११२-११३ । इति योगशास्त्रे टिप्पण्याम् प० ५५४ ॥ ३. शर-मु० । P.L.C. योगशास्त्रवृत्तावपि शरा इति ॥ ४. स्मृतेरनवतारणम्-L.P.C. ॥

**योगदुष्प्रणिधानादयः** प्रक्रमात् पञ्चातिचाराः '**सामायिकव्रते** जिनैः **प्रोक्ताः**' इत्यन्वयः । तत्र योगाः –कायवाङ्मनांसि, तेषां दुर्दुष्टानि प्रणिधानानि प्रणिधयः दुष्प्रणिधानानि । सावद्ये प्रवर्त्तनालक्षणानीत्यर्थः । [१]तत्रापि शरीरावयवानां पाणि-पादादीनामनिभृततावस्थापनं कायदुष्प्रणिधानम् , वर्णसंस्काराभावोऽर्थानवगमश्चापलं च वाग्दुष्प्रणिधानम् , क्रोध-लोभ-द्रोह-ऽभिमानेर्ष्यादयः कार्यव्यासङ्गसम्भ्रमश्च मनोदुष्प्रणिधानम् , एते त्रयोऽतिचाराः । यदाहुः–

''[२]**अणविक्खिआपमज्जिअ, थंडिल्ले ठाणमाइ सेवंतो ।**
**हिंसाऽभावे वि न सो, कडसामइओ पमायाओ** ॥१॥ [ श्रा.प्र./३१५ ]
**कडसामइओ पुव्विं, बुद्धीए पेहिऊण भासेज्जा ।**
**सइ निरवज्जं वयणं, अण्णह सामाइअं न हवे** ॥२॥ [ श्रा.प्र./३१४ ]
**सामाइअं तु काउं, [३]घरचिंतं जो अ चिंतए सड्ढो ।**
**अट्टवसट्टोवगओ, निरत्थयं तस्स सामइअं**'' ॥३॥ [ श्रा.प्र./३१३, सं.प्र.७/१०९ ]

तथास्मृतेः –सामायिककरणावसरविषयायाः कृतस्य वा सामायिकस्य प्रबल-प्रमादयोगादनवता(धा)रणम् –अनुपस्थापनम् । एतदुक्तं भवति –'मया कदा सामायिकं कर्त्तव्यम् ?' 'कृतं वा मया सामायिकं न वा' इति एवंरूपस्मरणभ्रंशो-ऽतिचारः, स्मृतिमूलत्वान्मोक्षानुष्ठानस्य । यदाहुः –

''**न सरइ पमायजुत्तो, जो सामइअं कया य कायव्वं ? ।**
**कयमकयं वा तस्स हु , कयं पि विहलं तयं नेयं**'' ॥१॥ [ श्रा.प्र./३१६, सं.प्र.७/११० ]

ति चतुर्थः ४।

तथाऽनादरः –अनुत्साहः प्रतिनियतवेलायां सामायिकस्याकरणम् , यथाकथञ्चिद्वा [४]करणम् , करणानन्तरमेव पारणं च । यदाहुः –

''**काऊण तक्खणं चिअ, पारेइ करेइ वा जहिच्छाए ।**
**अणवट्ठिअसामइअं, अणायराओ न तं सुद्धं**'' ॥१॥ [ श्रा.प्र./३१७ ] ति । पञ्चमोऽतिचारः ५।

अत्राह –[५]कायदुष्प्रणिधानादौ सामायिकस्य निरर्थकत्वादिप्रतिपादनेन वस्तुनोऽभाव

---

१. तुला–योगशास्त्रवृत्तिः ३।११५, प० ५५६, प्रवचनसारोद्धारवृत्तिः प० २०९ ॥ २. अनिरिक्खिया° इति योगशास्त्रवृत्तौ प० ५५६, प्रवचनसारोद्धारवृत्तौ प० २०९ । गाथात्रयमुद्धृतम्–पञ्चाशकवृत्तौ प० २३, नवपदप्रकरणबृहद्वृत्तौ प० २६२ ॥ ३. गिहकज्जं–इति सम्बोधप्रकरणे ॥ ४. करणं–मु० नास्ति । योगशास्त्र [प० ५५७]प्रवचनसारोद्धार [प० २१०] वृत्त्योरपि–करणम् अस्ति ॥ ५. तुला–धर्मबिन्दुवृत्तिः प० ४३, पञ्चाशकवृत्तिः प० २४, योगशास्त्रवृत्तिः प० ५५७–८ ॥

एवोक्तः, अतिचारश्च मालिन्यरूप एव भवतीति कथं सामायिकाभावेऽयं भवेत् ? अतो भङ्गा एवैते नातिचारा इति, उच्यते –अनाभोगतोऽतिचारत्वम् ।

ननु द्विविधं त्रिविधेनेति सावद्यप्रत्याख्यानं सामायिकम् , तत्र च कायदुष्प्रणिधानादौ प्रत्याख्यानभङ्गात् सामायिकाभाव एव, तद्भङ्गजनिते[1](तं)[2] च प्रायश्चित्तं विधेयं स्यात् , मनोदुष्प्रणिधानं चाशक्यपरिहारम् , मनसोऽनवस्थितत्वात् । अतः सामायिकप्रतिपत्तेः सकाशात्तदप्रतिपत्तिरेव श्रेयसी। यदाहुः –''**अविधिकृताद् वरमकृतम्**''[ ] इति। नैवम् , यतः सामायिकं द्विविधं त्रिविधेन प्रतिपन्नम् , तत्र च मनसा वाचा कायेन च सावद्यं न करोमि न कारयामीति षट् प्रत्याख्यानानीत्येकतरप्रत्याख्यानभङ्गेऽपि शेषसद्भावान्मिथ्या-दुष्कृतेन मनोदुष्प्रणिधानमात्रशुद्धेश्च न सामायिकात्यन्ताभावः । सर्वविरतिसामायिकेऽपि तथाऽभ्युपगतम् , यतो गुप्तिभङ्गे मिथ्यादुष्कृतं प्रायश्चित्तमुक्तम् । यदाह –

''**बीओ उ असमिओ मि त्ति कीस सहसा अगुत्तो वा**'' ।[ ] इति। द्वितीयोऽतिचारः समित्यादिभङ्गरूपोऽनुतापेन शुध्यतीत्यर्थः, इति '**न प्रतिपत्तेरप्रतिपत्तिर्गरीयसी**' इति । किञ्च –सातिचारादप्यनुष्ठानादभ्यासतः कालेन निरतिचारमनुष्ठानं भवतीति **सूरयः**। यदाह –

''**अभ्यासोऽपि प्रायः, प्रभूतजन्मानुगो भवति शुद्धः**''[ **षोड./२०५पू.** ] इति ।

**बाह्या** अपि –''**अभ्यासो हि कर्मणां कौशलमावहति, न हि सकृन्निपातमात्रेणोद-बिन्दुरपि ग्राव्णि निम्नतामादधाति**'' ।[ ]

न चाविधिकृताद् वरमकृतमिति युक्तम् , असूयावचनत्वादस्य । यदाहुः –

''**अविहिकया वरमकयं, उस्सुअ[3]( असूय )वयणं भणंति समयण्णू ।**
**पायच्छित्तं जम्हा, अकए गुरुअं कए लहुअं**'' ॥१॥ [ **वि.सा./८९६** ]

तस्माद्धर्मानुष्ठानं निरन्तरं कार्यमेव, किन्तु तत्कुर्वता सर्वशक्त्या विधौ यतनीयम् , इदमेव च श्रद्धालोर्लक्षणम्। आहुश्च –

''**विहिसारं चिय सेवइ, सद्धालू सत्तिमं अणुट्ठाणं ।**
**दव्वाइदोसनिहओ वि, पक्खवायं वहइ तंमि**'' ॥१॥ [ **ध.र.प्र.गा./९१** ]
**धण्णाणं विहिजोगो, विहिपक्खाराहगा सया धण्णा ।**
**विहिबहुमाणी धण्णा, विहिपक्खअदूसगा धण्णा ॥२॥ [ सं.प्र. सुगुरु./३४० ]**

---

१. तद्भङ्गजनिते–L.P.C. । तद्भङ्गजनितं–इति योगशास्त्रवृत्तौ प० ५५८ ॥ २. °स्थितत्वाच्च–मु० C. । L.P. योगशास्त्रवृत्तावपि प० ५५८ ॥ ३. उस्सुअवयणं–L.P.C. । असूयवयणं–इति योगशास्त्रवृत्तौ प० ५५८ ॥

**आसन्नसिद्धिआणं, विहिपरिणामो उ होइ सयकालं ।**
**विहिचाओ अविहिभत्ती, अभव्वजियदूरभव्वाणं''** ॥३॥ [ सं.प्र.देवा./१९३ ] [१]ति ।

कृषि-वाणिज्यसेवादि भोजन-शयना-ऽऽसन-गमन-वचनाद्यपि द्रव्यक्षेत्रकालादि-विधिना पूर्णफलवन्नान्यथा । अत एव [२]सकलपुण्यक्रियाप्रान्तेऽविध्याशातनानिमित्तं मिथ्यादुष्कृतं दातव्यमेवेत्यलं प्रसङ्गेन ॥५५॥

अधुना देशावकाशिकव्रतातिचारानाह –

**प्रेषणा-ऽऽनयने शब्द-रूपयोरनुपातने ।**
**पुद्गलप्रेरणं चेति, मता देशावकाशिके ॥५६॥**

प्रेषणं चानयनं चेति **प्रेषणा-ऽऽनयने, शब्दश्च रूपं चैतयोरनुपातने** अवतारणे, शब्दानुपातो रूपानुपातश्चेत्यर्थः, **पुद्गलप्रेरणं** चेति पञ्चातिचारा **'देशावकाशिके'** देशावकाशिकनाम्नि व्रते [३]**मताः** ।

[४]अयं भावः –दिग्व्रतविशेष एव देशावकाशिकव्रतम्, इयाँस्तु विशेषो –दिग्व्रतं यावज्जीवं संवत्सरचतुर्मासीपरिमाणं वा, देशावकाशिकं तु दिवस-प्रहर-मुहूर्त्तादिपरिमाणम्, तस्य च पञ्चातिचारास्तद्यथा –

[५]प्रेषणं-भृत्यादेर्विवक्षितक्षेत्राद्बहिः प्रयोजनाय [६]व्यापारणम्, स्वयं गमने हि व्रतभङ्गः स्यादिति अन्यस्य प्रेषणम्, देशावकाशिकव्रतं हि मा भूद् गमनाऽऽगमनादिव्यापारजनित-प्राण्युपमर्द इत्यभिप्रायेण गृह्यते, स तु स्वयं कृतोऽन्ये[७]न कारित इति न कश्चित् फले विशेषः, प्रत्युत स्वयं गमने ईर्यापथविशुद्धेर्गुणः, परस्य पुनरनिपुणत्वादीर्यासमित्यभावे दोष इति प्रथमोऽतिचारः १।

आनयनं –विवक्षितक्षेत्राद्बहिः स्थितस्य सचेतनादिद्रव्यस्य विवक्षितक्षेत्रे प्रापणं सामर्थ्यात् प्रेष्येण, स्वयं गमने हि व्रतभङ्गः स्यात्, परेण त्वानयने न भङ्ग इति बुद्ध्या यदाऽऽनाययति सचेतनादि द्रव्यं तदाऽतिचार इति द्वितीयः २।

शब्दस्य-क्षुत्कासितादेरनुपातनं –श्रोत्रेऽवतारणं शब्दानुपातनं, यथा विहितस्वगृहवृत्ति-

१. इति-मु० ॥ २. सकलक्रियापुण्य° मु० C. ॥ ३. L.P. । ज्ञेया-मु० C. ॥ ४. तुला-योगशास्त्रवृत्तिः ३।११६, प० ५५९, प्रवचनसारोद्धारवृत्तिः प० २१० ॥ ५. तुला-धर्मबिन्दुवृत्तिः प० ४४, पञ्चाशकवृत्तिः प० २४-५, नवपदप्रकरणबृहद्वृत्तिः प० २६९ ॥ ६. L.P.C. । हि-मु० नास्ति ॥ ७. °न (वा) कारित-मु० । L.P.C. योगशास्त्रवृत्तावपि वा-नास्ति ॥

प्राकारादिव्यवच्छिन्नभूप्रदेशाभिग्रहः प्रयोजने उत्पन्ने विवक्षितक्षेत्राद्बहिर्व्रतभङ्गभयात् स्वयं गन्तुं बहिःस्थितं चाह्वातुमशक्नुवन् वृति-प्राकारादिप्रत्यासन्नवर्त्तीभूय कासितादिशब्दम् आह्वानीयानां श्रोत्रोऽनुपातयति, ते च तच्छ्रवणात् तत्समीपमागच्छन्तीति शब्दानुपातननामाऽतिचारस्तृतीयः ३।

एवं रूपानुपातनम् , यथा रूपं –शरीरसम्बन्धि उत्पन्नप्रयोजनः शब्दमनुच्चारयन्नाह्वानीयानां दृष्टावनुपातयति, तद्दर्शनाच्च तत्समीपमागच्छन्तीति रूपानुपातनाख्योऽतिचारश्चतुर्थः ४।

तथा पुद्गलाः –परमाणवस्तत्सङ्घातसमुद्भवा बादरपरिणामं प्राप्ता लोष्टादयोऽपि, तेषां प्रेरणं –क्षेपणम् विशिष्टदेशाभिग्रहे हि सति कार्यार्थी परगृहगमननिषेधाद्यदा लोष्टकान् परेषां बोधनाय क्षिपति, [1]तदा लोष्टातिपातसमनन्तरमेव ते तत्समीपमनुधावन्ति, ततश्च तान् व्यापारयतः स्वयमगच्छतोऽप्यतिचारो भवतीति पञ्चमः ५।

इह चाद्यद्वयमव्युत्पन्नबुद्धित्वेन सहसाकारादिना वा, अन्त्यत्रयं तु मायापरतयाऽतिचारतां यातीति विवेकः ।

[2]इहाहु**र्वृद्धाः** –दिग्व्रतसङ्क्षेपकरणमणुव्रतादिसङ्क्षेपकरणस्याप्युपलक्षणं द्रष्टव्यम् , तेषामपि सङ्क्षेपस्यावश्यङ्कर्त्तव्यत्वात् । अत्राह –ननु अतिचाराश्च दिग्व्रतसङ्क्षेपकरणस्यैव श्रूयन्ते, न व्रतान्तरसङ्क्षेपकरणस्य, तत्कथं व्रतान्तरसङ्क्षेपकरणं देशावकाशिकव्रतमिति ? अत्रोच्यते –प्राणातिपातादिव्रतान्तरसङ्क्षेपकरणेषु वधबन्धादय एवातिचाराः, दिग्व्रतसङ्क्षेपकरणे तु सङ्क्षिप्तत्वात् क्षेत्रस्य प्रेष्यप्रयोगादयोऽतिचाराः, भिन्नातिचारसम्भवाच्च दिग्व्रतसङ्क्षेपकरणस्यैव देशावकाशिकत्वं साक्षादुक्तम् ॥५६॥

इत्युक्त्वा देशावकाशिकव्रतातिचाराः । अथ पोषधोपवासव्रतस्य तानाह –

**[3]संस्तारादानहानान्यप्रत्युपेक्ष्याप्रमृज्य च ।**
**अनादरोऽस्मृतिश्चेत्यतिचाराः पोषधव्रते ॥५७॥**

---

१. L.P. तदा लोष्टाति-मु० C. नास्ति । तदा लोष्टादि-इति योगशास्त्रवृत्तौ प० ५६० । तदा लोष्ट्वादि-इति प्रवचनसारोद्धारवृत्तौ प० २१२ ॥ २. तुला-धर्मबिन्दुवृत्तिः प० ४४, पञ्चाशकवृत्तिः प० २५, योगशास्त्रवृत्तिः प० ५६१, प्रवनचसारोद्धारवृत्तिः प० २१२ ॥ ३. प्रवचनसारोद्धारे तु-

''अप्पडिलेहिय अप्पमज्जियं च सेज्जाइ थंडिलाणि तहा ।
संमं च अणणुपालणमइयारा पोसहे पंच'' ॥२८५॥ इति प्रकारान्तरेण अतिचारा दृश्यन्ते ॥

संस्तारादिपदत्रयाणां द्वन्द्वः, तेनाप्रत्युप्रेक्ष्याप्रमृज्य चेति प्रत्येकं सम्बध्यते । ततोऽ**प्रत्युपेक्ष्याप्रमृज्य** च **संस्तारः, अप्रत्युपेक्ष्याप्रमृज्य चादानम्** [1]**, अप्रत्युपेक्ष्याप्रमृज्य च हानम्, अनादरोऽस्मृतिश्चेति** पञ्चातिचाराः **पोषधव्रते** ज्ञेया इति सम्बन्धः ।

तत्र संस्तीर्यते प्रतिपन्नपोषधव्रतेन दर्भ–कुश–कम्बलीवस्त्रादिः स संस्तारः संस्तार-शब्दश्च शय्योपलक्षणम्, तत्र शय्या–शयनं सर्वाङ्गीणं वसतिर्वा, संस्तारश्चार्द्धतृतीयहस्तप्रमाणः, स च प्रत्युपेक्ष्य प्रमार्ज्य च कर्त्तव्यः, प्रत्युपेक्षणं –चक्षुषा निरीक्षणम्, प्रमार्जनं च – वस्त्रप्रान्तादिना तस्यैव शुद्धीकरणम्, अथाप्रत्युपेक्ष्याप्रमृज्य च संस्तारकं करोति तदा पोषधव्रतमतिचरतीति प्रथमोऽतिचारः १।

आदानं–ग्रहणं यष्टि–पीठ–फलकादीनाम्, तदपि यष्ट्यादीनां निक्षेपस्योपलक्षणम्, तेनोभयमपि प्रत्युपेक्ष्य प्रमृज्य च कार्यम्, अप्रत्युपेक्षितस्याप्रमार्जितस्य चादानं निक्षेप-श्चातिचार इति द्वितीयः २।

हानं चोत्सर्गस्त्याग इतियावत् "**ओहाक् त्यागे**" [ **धातुपाठे २।७३** ] इत्यस्य धातोः प्रयोगात्, तच्चोच्चार–प्रश्रवणखेलसिङ्घाणकादीनां प्रत्युपेक्ष्य प्रमृज्य च स्थण्डिलादौ कार्यम्, अप्रत्युपेक्ष्याप्रमृज्य चोत्सर्जनमतिचार इति तृतीयः ३।

इह चाप्रत्युपेक्षणेन दुष्प्रत्युपेक्षणमप्रमार्जनेन च दुष्प्रमार्जनं सङ्गृह्यते, नञः कुत्सार्थस्यापि दर्शनात्, यथा कुत्सितो ब्राह्मणोऽब्राह्मणः । यत्सूत्रम् –"[2]**अप्पडिलेहि-अदुप्पडिलेहिअसिज्जासंथारे, अप्पमज्जियदुप्पमज्जिअसिज्जासंथारए, अप्पडिलेहि-अदुप्पडिलेहिअउच्चारपासवणभूमी, अप्पमज्जिअदुप्पमज्जिअउच्चारपासवणभूमि**" [ **उपासकदशाङ्गे सू० ७** ] त्ति ३।

तथाऽनादरः–अनुत्साहः पोषधव्रतप्रतिपत्तिकर्त्तव्यतयोरिति चतुर्थः ४।

तथाऽस्मृतिः–अस्मरणं तद्विषयैवेति पञ्चमः ५ ॥५७॥

इत्युक्ताः पोषधव्रतातिचाराः अथातिथिसंविभागव्रतस्य तानाह –

**सचित्ते स्थापनं तेन, स्थगनं मत्सरस्तथा ।**
**काललङ्घोऽन्यापदेश, इति पञ्चान्तिमे व्रते ॥५८॥**

---

१. चादानं (अप्रत्युपेक्ष्याप्रमृज्य च हानं)-मु० ॥ २. उद्धृतमिदम्–पञ्चाशकवृत्तौ प० २६, नवपदप्रकरणबृहद्वृत्तौ प० २८३, योगशास्त्रवृत्तौ प० ५६२ । तुला–प्रवचनसारोद्धारवृत्तिः प० २१६ ॥

**सचित्ते स्थापनम् , तेन स्थगनम् , मत्सरः, काललङ्घोऽन्यापदेशश्चेति पञ्चा-** तिचारा '**अन्तिमे व्रते**' अतिथिसंविभागनाम्नि ज्ञेया इत्यन्वयः ।

[1]तत्र सचित्ते-सचेतने पृथिवी-जल-कुम्भोपचुल्ली-धान्यादौ स्थापनं-साधुदेय-भक्तादेर्निक्षेपणम् , तच्चादानबुद्ध्या मातृस्थानतो निक्षिपतीति प्रथमः १।

तेन-सचित्तेन कन्द-पत्र-पुष्प-फलादिना तथाविधयैव बुद्ध्या स्थगनं-पिधानमिति द्वितीयः २।

तथा मत्सरः-कोपः यथा साधुभिर्याचितः कोपं करोति, सदपि मार्गितं न ददाति । [2]अथवा अनेन तावद्रङ्केण याचितेन दत्तम् , किमहं [3]ततोऽप्यून ? इति मात्सर्याद् ददाति, अत्र परोन्नतिवैमनस्यं मात्सर्यम् । यदुक्त**मनेकार्थसंग्रहे श्रीहेमसूरिभिः –**

''**मत्सरः परसम्पत्त्यक्षमायां तद्वति क्रुधि**'' [ ३/५७९ ] इति तृतीयः ३।

तथा कालस्य-साधूचितभिक्षासमयस्य लङ्घो –लङ्घनमतिक्रम इतियावत् , [4]अयम-भिप्रायः –कालं न्यूनमधिकं वा ज्ञात्वा साधवो न ग्रहीष्यन्ति ज्ञास्यन्ति च यथाऽयं ददातीत्येवं विकल्पतो दानार्थमभ्युत्थानमतिचार इति चतुर्थः ४।

तथाऽन्यस्य-परस्य सम्बन्धीदं गुड-खण्डादीत्यपदेशो-व्याजोऽन्यापदेशः । यद् **अनेकार्थसंग्रहे –**

''**अपदेशस्तु [5]कारणे व्याजे लक्ष्येऽपि**'' [ ४/३१० ] इति ।

अयं भावः-परकीयमेतत् तेन साधुभ्यो न दीयते इति साधुसमक्षं भणनम् , जानन्तु साधवो यद्यस्यैतद्भक्तादिकं भवेत् तदा कथमस्मभ्यं न दद्यात् ? इति साधुसंप्रत्ययार्थम् , अथवाऽस्माद् दानात् मम मात्रादेः पुण्यमस्त्विति भणनमिति पञ्चमः ५।

इत्थमतिचारभावना **उपासकदशाङ्गवृत्त्यनु**सारेणोक्ता, तत्र ह्याभोगेनापि विधीयमाना एते अतिचारत्वेनैव समर्थिताः । तथा चैतत्पाठः –

''**एते अतिचारा एव, न भङ्गा, दानार्थमभ्युत्थानाद्दानपरिणतेश्च दूषितत्वात्**'' [ **उपाशकदशाङ्गवृत्तिः १/६** ] भङ्गस्वरूपस्य चेहैवमभिधानात् । यथा –

---

१. तुला-योगशास्त्रवृत्तिः ३।११८, प० ५६३, प्रवचनसारोद्धारवृत्तिः २१३-४ ॥ २. तुला-तत्त्वार्थसूत्रस्य सिद्धसेनीयावृत्तिः ७।३१५, पृ० ११६, प्रवचनसारोद्धारवृत्तिः प० २१४ ॥ ३. L.P.C. । ततो न्यून ?-मु० । ततोऽपि हीन-इति योगशास्त्रवृत्तौ प० ५६३ ॥ ४. 'अयमर्थः-उचित यो भिक्षाकालः साधूनां तं लङ्घयित्वा, अनागतं वा भुङ्क्ते पोषधव्रती' । इति योगशास्त्रवृत्तौ । तुला-प्रवचनसारोद्धारवृत्तिः प० २१४ ॥ ५. करणे-मु० । L.P.C. अनेकार्थसंग्रहे योगशास्त्रवृत्तावपि-कारणे-इति ॥

**''दाणंतरायदोसा, न देइ दिज्जंतयं च वारेइ ।**
**दिण्णे वा परितप्पइ, इइ किविणत्ता भवे भङ्गो''** ॥१॥ [ **नव.प्र./१२७** ] त्ति ।

[1]**धर्मबिन्दु-योगशास्त्रवृत्त्यादौ** तु **''यदाऽनाभोगादिनाऽतिक्रमादिना वा एतानाचरति तदाऽतिचाराः, अन्यथा तु भङ्गा एव''** [ **धर्मबिन्दुटीका प० ४५, तुला-योगशास्त्रटीका प० ५६४** ] ति भावितम्, निश्चयस्तु केवलिगम्यः ।

एवं सम्यक्त्वा-ऽणुव्रत-गुणव्रत-शिक्षापदानि तदतिचाराश्चाभिहिताः । तदभिधाने च तदधिकारवाच्या [2]उपायादयोऽपि यथास्थानमर्थतो दर्शिता एवेति स्वयमभ्यूह्याः । नामतश्च तेषां सङ्कलना । यथा **पञ्चाशके** —

**''सुत्तादुपायरक्खणगहणपयत्तविसया मुणेयव्वा ।**
**कुंभारचक्कभामगदंडाहरणेण धीरेहिं''** ॥१॥ [ **पञ्चा.१/३४** ]

व्याख्या —'सूत्राद्-आगमादुपायादयो मुणेयव्वा इत्यनेन संबन्धः । तत्रोपायः-सम्यक्त्वा-ऽणुव्रतादिप्रतिपत्तावभ्युत्थानादिलक्षणो हेतुः । आह च —

**''अब्भुट्ठाणे विणए, परक्कमे साहुसेवणाए अ ।**
**सम्मद्दंसणलंभो, विरयाविरईएँ विरईए''** ॥१॥ [ ]

अथवा जातिस्मरणादितीर्थकरवचनतदन्यवचनलक्षणः । यदाह —

**''सहसंमुइआए परवागरणेणं अन्नेसिं वा सोच्चा''** [ **आचाराङ्गे १/१/१-४** ] अथवा प्रथमद्वितीयकषायक्षयोपशम इति ।

तथा रक्षणं-सम्यक्त्वव्रतानामनुपालनोपायरूपमायतनसेवनादि । आह च —

**''आययणसेवणा निन्निमित्तपरघरपवेसपरिहारो ।**
**किड्डापरिहरणं तह, विक्किअवयणस्स परिहारो''** ॥१॥ [ ] इत्यादि ।

उपायेन रक्षणमुपायरक्षणमि**त्यन्ये** । ग्रहणं त्रिविधं त्रिविधेनेत्यादिविकल्पैः सम्यक्त्वव्रतानामुपादानम् । आह च —**''मिच्छत्तपडिक्कमणं, तिविहं तिविहेण णायव्वं''** [ **आ.नि./१२५१** ] ।

तथा- **''दुविहं तिविहेण पढमो, दुविहं दुविहेण बीअओ होइ ।**
**दुविहं एगविहेणं, एगविहं चेव तिविहेणं''** ॥१॥ [ ] इत्यादि ।

---

१. तुला-धर्मबिन्दुवृत्तिः प० ४५, पञ्चाशकवृत्तिः प० २८, नवपदप्रकरणबृहद्वृत्तिः प० ३०८, योगशास्त्रवृत्तिः प० ५६४ ॥ २. P.L. । उपायादयो यथास्थानमर्थतो दर्शिता इति स्वय० मु० C. ॥

तथा प्रयत्नः-सम्यक्त्वव्रतग्रहणोत्तरकालं तदनुस्मरणादिः, सम्यक्त्वप्रतिपत्तौ उक्तरूपः, अप्रत्याख्यातविषयस्यापि वा[1] यथाशक्ति परिहारोद्यमरूपा यतना, "**नो मे कप्पइ अन्नउत्थिए**" [ ] इत्यादिका

"**परिसुद्धजलग्गहणं, दारुअधण्णाइआण तह चेव ।**
**गहिआण वि परिभोगो, विहिएँ तसरक्खणट्ठाए**" ॥१॥ [ श्रा.प्र./२५९ ] इत्यादिका च ।

तथा विषयः-सम्यक्त्वव्रतगोचरो जीवा-ऽजीवादितत्त्वरूपः स्थूलसङ्कल्पित-प्राण्यादिरूपश्च, तत उपायादीनां द्वन्द्वोऽतस्ते उपायरक्षणग्रहणप्रयत्नविषयाः 'मुणेअव्व' त्ति ज्ञातव्याः, इह विशिषतोऽनुक्ता अपि, कथम्? इत्याह –'**कुम्भकारचक्रभ्रामकदण्डदृष्टान्तेन**' धीरैः-बुद्धिराजितैः, इदमुक्तं भवति यथा कुम्भकारचक्रस्यैकस्मिन्नेव[2] देशे दण्डेन प्रेरिते सर्वे[3] तद् देशा भ्रमिता भवन्ति, एवमिहसम्यक्त्वव्रताश्रितविविधवक्तव्यताचक्रस्य सम्यक्त्वव्रतव्रतातिचाररूपे एकदेशे प्ररूपिते उपायादयस्तद्देशा आक्षिप्ता एव भवन्ति । ते च सूत्रादवसेयाः, सङ्क्षेपकरणत्वेनेह तेषामनुक्तत्वादिति गाथार्थः" [ **पञ्चाशकवृत्तिः** १/३४ ] ॥५८॥

इत्थं व्रतातिचारानभिधाय प्रस्तुते तान् योजयन्नाह –

**एतैर्विना व्रताचारो, गृहिधर्मो विशेषतः ।**
**सप्तक्षेत्र्यां तथा वित्तवापो दीनानुकम्पनम् ॥५९॥**

'**एतैः**' अतिचारैः '**विना**' '**व्रतानाम्**' अणुव्रतादीनामुपलक्षणत्वात् सम्यक्त्वस्य च **आचारः** –आचरणं पालनमितियावत्, किमित्याह –'**विशेषतो गृहिधर्मो**' भवति, यः शास्त्रादौ प्राक् सूचित आसीदिति । अथोक्तविशेषगृहिधर्मापेक्षयाऽशेषविशेषगृहिधर्मं प्ररूपयन्नाह –'**तथा**' इति पूर्वसादृश्येऽव्ययम्, यथा विशेषतो गृहिधर्मः पूर्वमुक्त-स्तथाऽन्योऽपि वक्ष्यमाणः स एवेति भावः ।

तथा च तमाह –'**सप्तक्षेत्र्याम्**' इत्यादि सप्तानां क्षेत्राणां समाहारः सप्तक्षेत्री[4]जिन-बिम्ब १ भवना २-ऽऽगम ३ साधु ४ साध्वी ५ श्रावक ६ श्राविका ७ लक्षणा, तस्यां **वित्तस्य** –धनस्य श्रावकाधिकारान्न्यायोपात्तस्य **वापो** –व्ययकरणम्, तच्च विशेषतो गृहिधर्मो भवतीति योज्यम् । एवमग्रेऽपि स्वयमूह्यम् । क्षेत्रे हि बीजस्य वपनमुचित-

---

१. चा-L. ॥ २. °कस्मिन्नेव-मु० । °कस्मिन्नपि-L.P.C. ॥ ३. L.P. । सर्वे देशा-मु० C. ॥ ४. तुला-योगशास्त्रवृत्तिः ३।११९ प० ५६४-५७७ ॥

मित्युक्तं वाप इति । वपनमपि क्षेत्रे उचितं नाक्षेत्रे इति सप्तक्षेत्र्यामित्युक्तम् । क्षेत्रत्वं च सप्तानां रूढमेव । वपनं च सप्तक्षेत्र्यां यथोचितस्य द्रव्यस्य भक्त्या श्रद्धया च ।

तथाहि —जिनबिम्बस्य तावद्विशिष्टलक्षणलक्षितस्य प्रसादनीयस्य वज्रेन्द्रनीला-ऽञ्जन-चन्द्रकान्त-सूर्यकान्त-रिष्ट[1]-कर्केतन-विद्रुम-सुवर्ण-रूप्य-चन्दनोपल-मृदादिभिः सारद्रव्यैर्विधापनम् । यदाह —

**''सन्मृत्तिका-ऽमलशिलातल-रूप्य-दारु-सौवर्ण-रत्न-मणि-चन्दनचारुबिम्बम् ।**
**कुर्वन्ति जैनमिह ये स्वधनानुरूपं, ते प्राप्नुवन्ति नृसुरेषु महासुखानि''** ॥१॥ [ उ.त./३८ ]

तथा —

**''पासाईआ पडिमा, लक्खणजुत्ता समत्तलंकरणा ।**
**जह पल्हाएइ मणं, तह णिज्जरमो विआणाहि''** ॥१॥ [ सं.प्र.१/३२२ ]

तथा निर्मितस्य जिनबिम्बस्य शास्त्रोक्तविधिना प्रतिष्ठापनम्, अष्टाभिश्च प्रकारैरर्चनम्, यात्राविधानम्, विशिष्टाभरणभूषणम्, विचित्रवस्त्रैः परिधापनमिति जिनबिम्बे धनवपनम् । यदाह —

**''गन्धैर्माल्यैर्विनिर्यद्बहुलपरिमलैरक्षतैर्धूपदीपैः,**
**सान्नाय्यैः प्राज्यभेदैश्चरुभिरुपहितैः पाकपूतैः फलैश्च ।**
**अम्भःसंपूर्णपात्रैरिति हि जिनपतेरर्चनामष्टभेदां;**
**कुर्वाणा वेश्मभाजः परमपदसुखस्तोममाराल्लभन्ते''** ॥१॥ [ ]

न च जिनबिम्बानां पूजादिकरणे न काचित् फलप्राप्तिरिति वाच्यम्, चिन्तामण्यादिभ्य इव तेभ्योऽपि फलप्राप्त्यविरोधात् । यदुक्तं **वीतरागस्तोत्रे श्रीहेमसूरिभिः —**

**''अप्रसन्नात् कथं प्राप्यं, फलमेतदसङ्गतम् ।**
**चिन्तामण्यादयः किं न, फलन्त्यपि विचेतनाः ?''** ॥२॥ [ वीत.१९/३ ]

तथा —

**''उवगाराभावम्मि वि, पूज्जाणं पूअगस्स उवगारो ।**
**[2]मंताइसरण-जलणादिसेवणे जह तहेहं पि''** ॥२॥ [ श्रा.प्र.३४८, पूजा.प.४/४४ ]

एष तावत् स्वकारितानां बिम्बानां पूजादिविधिरुक्तः, अन्यकारितानामप्यकारितानां च शाश्वतप्रतिमानां यथार्हं पूजन-वन्दनादिविधिरनुष्ठेयः ।

त्रिविधा हि जिनप्रतिमाः —भक्तिकारिताः स्वयं परेण वा चैत्येषु कारिताः, या इदानीमपि

---

१. °रिष्टाङ्ककर्केतन° इति योगशास्त्रवृत्तौ प० ५६४ ॥ २. मंताईसरजलणा° मु० । L.P.C. योगशास्त्रवृत्तावपि [५६६] मंताइसरणजलणा°-इति ॥

मनुष्यादीभिर्विधाप्यन्ते । माङ्गल्यकारिता या गृहद्वारपत्रेषु मङ्गलाय कार्यन्ते । शाश्वत्यस्तु अकारिता एवाधस्तिर्यगूर्ध्वलोकावस्थितेषु जिनभवनेषु वर्त्तन्त इति[1] । जिनप्रतिमानां च वीतरागस्वरूपाध्यारोपेण पूजादिविधिरुचित इति १।

जिनभवनक्षेत्रे स्वधनवपनं यथा —शल्यादिरहितभूमौ स्वयंसिद्धस्योपलकाष्ठादिदलस्य ग्रहणेन सूत्रकारादिभृतकानतिसन्धानेन भृत्यानामधिकमूल्यवितरणेन षट्जीवकायरक्षायतनापूर्वं जिनभवनस्य विधापनम् । सति विभवे **भरता**दिवद्रत्नशिलाभिर्बद्धचामीकरकुट्टिमस्य मणिमयस्तम्भसोपानस्य रत्नमयतोरणशतालङ्कृतस्य विशालशालाबलानकस्य शालभञ्जिकाभङ्गिभूषितस्तम्भादिप्रदेशस्य दह्यमानकर्पूर-कस्तूरिका-ऽगुरुप्रभृतिधूपसमुच्छलद्धूमपटलजातजलदशङ्कानृत्यत्कलकण्ठकुलकोलाहलस्य चतुर्विधातोद्य-नान्दीनिनादनादितरोदसीकस्य देवाङ्गप्रभृतिविचित्रवस्त्रोल्लोचखचितमुक्तावचूलालङ्कृतस्य[3] उत्पतन्निपतद्गायन्नृत्यद्वल्गत्सिंहादिनादितवत्[2]सुमहिमानुमोदनप्रमोदमानजनस्य विचित्रचित्रचित्रीयितसकललोकस्य चामरध्वजच्छत्राद्यलङ्कारविभूषितस्य मूर्द्धारोपितविजयवैजयन्तीनिबद्धकिङ्कणी[4]रणत्कारमुखरितदिगन्तस्य कौतुकाक्षिप्तसुरासुरकिन्नरीनिवहाहमहमिकाप्रारब्धसङ्गीतस्य गन्धर्वगीतध्वनितिरस्कृततुम्बुरुमहिम्नो निरन्तरतालारासक-हल्लीसकप्रमुखप्रबन्धनानाभिनयनव्यग्रकुलाङ्गनाचमत्कारितभव्यलोकस्याऽभिनीयमाननाटककोटिरसाक्षिप्तरसिकलोकस्य जिनभवनस्योत्तुङ्गगिरिशृङ्गेषु जिनानां जन्म-दीक्षा-ज्ञान-निर्वाणस्थानेषु **सम्प्रतिराज**वच्च प्रतिपुरं प्रतिग्रामं पदे पदे विधापनम् । असति तु विभवे तृणकुट्यादिरूपस्यापि । यदाहुः —

**''यस्तृणमयीमपि कुटीं, कुर्याद्दद्यात्तथैकपुष्पमपि ।**
**भक्त्या परमगुरुभ्यः, पुण्योन्मानं कुतस्तस्य ?** ॥१॥ [ ]
**किं पुनरुपचितदृढघनशिलासमुद्घातघटितजिनभवनम् ।**
**ये कारयन्ति शुभमतिविधायिनस्ते महाधन्याः''** ॥२॥ [ ]

राजादेस्तु विधापयितुः प्रचुरतरभाण्डागार-ग्राम-नगर-मण्डल-गोकुलादिप्रदानं जिनभवने वपनम् २। तथा जीर्णशीर्णानां चैत्यानां समारचनं नष्टभ्रष्टानां समुद्धरणं चेति ।

---

१. इतोऽग्रे-'न हि लोकत्रयेऽपि तत् स्थानमस्ति यन्न पारमेश्वरीभिः प्रतिमाभिः पवित्रितमिति' इति योगशास्त्रवृत्तौ [प० ५६६] अधिकम् ॥ २. °त्सुरसमूहमहिमा° इति योगशास्त्रवृत्तौ प० ५६७ ॥ ३. °चित्र° मु० नास्ति, L.P.C. योगशास्त्रवृत्तावपि अस्ति [प० ५६७] ॥ ४. °किङ्किणी° इति योगशास्त्रवृत्तौ प० ५६७ ॥

ननु निरवद्यजिनधर्मसमाचरणचतुराणां जिनगृहबिम्बपूजादिकरणमनुचितम्[1], षट्जीवनिकायविराधनाहेतुत्वात्तस्य, इति चेत्, न[2]।

**''देहाइनिमित्तं पि हु, छक्कायवहंमि जे पयट्टंति ।**

**जिणपूआकायवहंमि तेसिमपवत्तणं मोहो''** ॥१॥ **[ पञ्चा.प्र.४/४५ ]**

इति वचनात् य आरम्भपरिग्रहप्रसक्तस्तस्य कुटुम्बपरिपालनादिनिमित्तधनव्ययजनित-पापविशुद्ध्यर्थं जिनभवनादौ धनव्ययस्य श्रेयस्करत्वात्। यस्तु निजकुटुम्बार्थमपि नारम्भं करोति प्रतिमाप्रतिपन्नादिः, तस्य मा भूज्जिनबिम्बादिविधापनमपि। अन्यत्रारम्भवत एव धर्मार्थारम्भेऽप्यधिकृतत्वात्। न च धर्मार्थं प्रसह्य धनोपार्जनं युक्तम्। यतः –

**''[3]धर्मार्थं यस्य वित्तेहा, तस्यानीहा गरीयसी ।**

**प्रक्षालनाद्धि पङ्कस्य, दूरादस्पर्शनं वरम्''** ॥१॥ **[ हारि.अ.४/६ ]** इति ।

यस्तु देहाद्यर्थमारम्भकृदपि न ह्येकं पापमाचरितमित्यन्यदप्याचरितव्यमितिमत्या जिनभवनकारणादौ धार्मिककृत्येऽप्यारम्भं न कुरुते, तस्य महान् दोष एव। तदुक्तं **पञ्चाशके–**

**''अण्णत्थारंभवओ, धम्मेऽणारंभओ अणाभोगो ।**

**लोए पवयणखिंसा, अबोहिबीअं ति दोसा य''** ॥१॥ **[ पञ्चा.४/१२ ]**

न च वाप्यादिखननवदशुभोदर्कं जिनभवनादिकरणम् । अपि तु सङ्घसमागम-धर्मदेशनाकरण-व्रतप्रतिपत्त्यादिकरणेन शुभोदर्कमेव । षट्जीवनिकायविराधना च यतनाकारिणामगारिणां कृपापारवश्येन सूक्ष्मानपि जन्तून् रक्षयतामविराधनैव । यदाहुः –

**''जा जयमाणस्स भवे, विराहणा सुत्तविहिसमग्गस्स ।**

**सा होइ निज्जरफला, अज्झप्पविसोहिजुत्तस्स ॥१॥**

**[ पिण्ड.नि./६७१, ओघ.नि./७६० ]**

**परमरहस्समिसीणं, समत्तगणिपिडगज्झरिअसाराणं ।**

**परिणामिअं पमाणं, निच्छयमवलंबमाणाणं''** ॥२॥ **[ ओघ.नि./७६१ ]**

इत्यलं प्रसङ्गेन[4] ३।

जिनागमक्षेत्रे स्वधनवपनं यथा–जिनागमो हि कुशास्त्रजनितसंस्कारविषसमुच्छेदन[5]-

---

१. L.P.C. । जिनगृहादिकरणमनुचितं–मु० जिनभवनबिम्बपूजाकरण° इति योगशास्त्रवृत्तौ प० ५६८ ॥ २. इह पयट्टंति–इति योगशास्त्रवृत्तौ प० ५६९ ॥ ३. महाभारते वनपर्वाणि [२।४९] इदृशः श्लोकः उपलभ्यते –

''धर्मार्थं यस्य वित्तेहा वरं तस्य निरीहता ।

प्रक्षालनाद्धि पङ्कस्य श्रेयो न स्पर्शनं नृणाम्'' ॥

४. L.P. । °त्रे च स्व° मु० ॥ ५. °च्छेदनमहामन्त्रायमाणो–इति योगशास्त्रवृत्तौ प० ५६९॥

मन्त्रायमाणो धर्माधर्मकृत्याकृत्य-भक्ष्याभक्ष्य-पेयापेय-गम्यागम्य-सारासारादि-विवेचनाहेतुः सन्तमसे दीप इव समुद्रे द्वीपमिव मरौ कल्पतरुरिव संसारे दुरापः, जिनादयोऽप्येतत्प्रामाण्यादेव निश्चीयन्ते । यदूचुः स्तुतिं श्री**हेमसूरयः** —

''**यदीयसम्यक्त्वबलात् प्रतीमो, भवादृशानां परमाप्तभावम् ।**
**कुवासनापाशविनाशनाय नमोऽस्तु तस्मै जिनशासनाय''** ॥१॥ **[ अयोग.द्वा./२१ ]**

जिनागमबहुमानिना च देव-गुरु-धर्मादयोऽपि बहुमता भवन्ति । किञ्च —केवलज्ञानादपि जिनागम एव प्रामाण्येनातिरिच्यते । यदाहु —

''**ओहे सुओवउत्तो, सुअनाणी जइ हु गिण्हइ असुद्धं ।**
**तं केवली वि भुंजइ, अपमाणं सुअं भवे इहरा''** ॥१॥ **[ पिण्डनि./गा.५२४ ]**

एकमपि च जिनागमवचनं भविनां भवविनाशहेतुः । यदाहुः —

''**एकमपि च जिनवचनाद्यस्मान्निर्वाहकं पदं भवति ।**
**श्रूयन्ते चानन्ताः, सामायिकमात्रपदसिद्धाः''** ॥१॥ **[ तत्त्वा.सं.का./२७ ]**

यद्यपि च मिथ्यादृष्टिभ्य आतुरेभ्य इव पथ्यान्नं न रोचते जिनभवनम्, तथापि नान्यत्स्वर्गापवर्गमार्गप्रकाशनसमर्थमिति सम्यग्दृष्टिभिस्तदादरेण श्रद्धातव्यम्, यतः कल्याणभागिन एव जिनवचनं भावतो भावयन्ति, इतरेषां तु कर्णशूलकारित्वेनामृतमपि विषायते । यदि चेदं जिनवचनं नाभविष्यत् तदा धर्माधर्मव्यवस्थाशून्यं भवान्धकारे भुवनमपतिष्यत् । यथा च —''**हरीतकीं भक्षयेद्विरेककामः**''[ ] इति वचनाद्धरीतकीभक्षणप्रभवविरेकलक्षणेन प्रत्ययेन सकलस्याप्य**आयुर्वेदस्य** प्रामाण्यमवसीयते, तथाऽष्टाङ्गनिमित्त-केवलिका-चन्द्रार्क-ग्रहचार-धातुवाद-रस-रसायनादिभिरप्यागमोपदिष्टैर्दृष्टार्थवाक्यानां प्रामाण्यनिश्चयेनादृष्टार्थानामपि वाक्यानां प्रामाण्यं मन्दधीभिर्निश्चेतव्यम्, जिनवचनं दुष्षमाकालवशादुच्छिन्नप्रायमिति मत्वा भगवद्भि**र्नागार्जुनस्कन्दिलाचार्य**प्रभृतिभिः पुस्तकेषु न्यस्तम् । ततो जिनवचनबहुमानिना तल्लेखनीयम्, वस्त्रादिभिरभ्यर्चनीयं च । यदाह —

''**न ते नरा दुर्गतिमाप्नुवन्ति, न मूकतां नैव जडस्वभावम् ।**
**न चान्धतां बुद्धिविहीनतां च, ये लेखयन्तीह जिनस्य वाक्यम्''** ॥१॥ [ ]

जिनागमपाठकानां भक्तितः सन्माननं च । यदाह —

''**पठति पाठयते पठतामसौ, वसन-भोजन-पुस्तकवस्तुभिः ।**
**प्रतिदिनं कुरुते य उपग्रहं, स इह सर्वविदेव भवेन्नरः''** ॥१॥ [ ]

लिखितानां च पुस्तकानां संविग्नगीतार्थेभ्यो बहुमानपूर्वकं व्याख्यापनम्, व्याख्यापनार्थं दानं, व्याख्यायमानानं च प्रतिदिनं पूजापूर्वकं श्रवणं चेति ३।

---

१. L.P.C. । तव शासनाय-मु० योगशास्त्रवृत्तौ ॥ २. जिनवचनं च दु० इति योगशास्त्रवृत्तौ प० ५७१ ॥

साधूनां च जिनवचनानुसारेण सम्यक्चारित्रमनुपालयतां दुर्लभं मनुष्यजन्म सफलीकुर्वतां स्वयं तीर्णानां परं तारयितुमुद्यतानामातीर्थकरगणधरेभ्य आ च तद्दिनदीक्षितेभ्यः सामायिकसंयतेभ्यो यथोचितप्रतिपत्त्या स्वधनवपनम् , यथा उपयुज्यमानस्य चतुर्विधाहार–भेषज–वस्त्रा–ऽऽश्रयादेर्दानम्। न हि तदस्ति यद् द्रव्य–क्षेत्र–काल–भावापेक्षया–ऽनुपकारकं नाम, तत्सर्वस्वस्यापि दानम् , साधुधर्मोद्यतस्य स्वपुत्र–पुत्र्यादेरपि समर्पणं च। किं बहुना ? यथा यथा मुनयो निराबाधवृत्त्या स्वमनुष्ठानमनुतिष्ठन्ति, तथा तथा महता प्रयत्नेन सम्पादनम् , जिनप्रवचनप्रत्यनीकानां[1] साधुधर्मनिन्दापरायणानां यथाशक्ति निवारणम्। यदाह –

''**तम्हा सइ सामत्थे, आणाभट्ठंमि नो खलु उवेहा ।**
**अणुकूलेहिअरेहि अ, अणुसट्ठी होइ दायव्वा**'' ॥१॥ [ द.शु./१९७ ] ४।

तथा रत्नत्रयधारिणीषु साध्वीषु साधुष्विव यथोचिताहारादिदान स्वधनवपनम् । ननु स्त्रीणां निःसत्त्वतया दुःशीलत्वादिना च मोक्षेऽनधिकारः, तत्कथमेताभ्यो दानं साधुदानतुल्यम् ? उच्यते –निःसत्त्वत्वमसिद्धम् , **ब्राह्मी**प्रभृतीनां साध्वीनां गृहवासपरित्यागेन यतिधर्ममनुतिष्ठन्तीनां महासत्त्वानां नासत्त्वत्वसम्भवः[2] । यदाह –

''**ब्राह्मी सुन्दर्यार्या, राजीमती चन्दना गणधराऽन्या[3] ।**
**अपि देवमनुजमहिता, विख्याता[4] शील-सत्त्वाभ्याम्**'' ॥१॥ [ स्त्री.नि./३४ ]

एवमन्यास्वपि **सीतादि**सतीषु शीलसंरक्षण–तन्महिमादर्शन–राज्यलक्ष्मीपतिपुत्र–भ्रातृप्रभृतित्यागपूर्वकपरिव्रजनादि सत्त्वचेष्टितं प्रसिद्धमेव ।

ननु महापापेन[5] मिथ्यात्वसहायेन स्त्रीत्वमर्ज्यते, न हि सम्यग्दृष्टिः स्त्रीत्वं कदाचिद्बध्नाति, कथं स्त्रीशरीरवर्त्तिन आत्मनो मुक्तिः स्यात् ? मैवं वोचः, सम्यक्त्वप्रतिपत्तिकाल एवान्तःकोटाकोटिस्थितिकानां सर्वकर्मणां भावेन मिथ्यात्वमोहनीयादीनां क्षयादिसम्भवात् मिथ्यात्वसहितपापकर्मसम्भवत्व[६][म]कारणम् , मोक्षकारणवैकल्यं तु तासु वक्तुमुचितम् , तच्च नास्ति । यतः –

''**जानीते जिनवचनं, श्रद्धत्ते चरति चार्यिका[7] सकलम् ।**
**नास्यास्त्यसंभवोऽस्या[8], नादृष्टविरोधगतिरस्ति**'' ॥१॥ [ स्त्री.नि./४ ] इति ।

---

१. °प्रत्यनीकानां च साधुधर्मनिन्दापरायणानाम्–इति योगशास्त्रवृत्तौ प० ५७२ ॥ २. L.P.C. । नासत्त्व(त्व) सम्भवः मु० । नासत्त्वसम्भवः–इति योगशास्त्रवृत्तौ प० ५७३ ॥ ३. °न्या[:] इति योगशास्त्रवृत्तौ ॥ ४. °ताः–इति योगशास्त्रवृत्तौ प० ५७३ ॥ ५. °ति इति–इति योगशास्त्रवृत्तौ प० ५७३ ॥ ६. °सम्भवत्वमकारणमं–इति योगशास्त्रवृत्तौ प० ५७३ ॥ ७. चार्यिका[ऽ]शबलम्–इति योगशास्त्रवृत्तौ प० ५७४ ॥ ८. °स्यां–इति योगशास्त्रवृत्तौ प० ५७४ ॥

तत्सिद्धमेतत् —मुक्तिसाधनासु साध्वीषु साधुवद्धनवपनमुचितमिति । एतच्चाधिकं यत् —साध्वीनां दुःशीलेभ्यो नास्तिकेभ्यो गोपनम्, स्वगृहप्रत्यासत्तौ च समन्ततो गुप्ताया गुप्तद्वाराया वसतेर्दानम्, स्वस्त्रीभिश्च तासां परिचर्याविधानम्[1], स्वपुत्रिकाणां तत्संनिधौ धारणम्, व्रतोद्यतानां स्वपुत्र्यादीनां प्रत्यर्पणं च । तथा विस्मृतकरणीयानां तत्स्मारणम्, अन्यायप्रवृत्तिसम्भवे तन्निवारणम्, सकृदन्यायप्रवृत्तौ शिक्षणम्, पुनः पुनः प्रवृत्तौ निष्ठुरभाषणादिना ताडनम्, उचितेन वस्तुनोपचारकरणं[2] चेति ५।

श्रावकेषु स्वधनवपनं यथा —साधर्मिकत्वेन तेषां सङ्गमो महते पुण्याय, किं पुनस्तदनुरूपा प्रतिपत्तिः ? । सा च स्वपुत्र-पुत्र्यादि[3]जन्मोत्सवविवाहादिप्रकरणे निमन्त्रणम्, विशिष्टभोजनताम्बूल-वस्त्राभरणादिदानम्, आपन्निमग्नानां च स्वधनव्ययेनाप्यभ्युद्धरणम्, अन्तरायदोषाच्च विभवक्षये पुनः पूर्वभूमिकाप्रापणम्, धर्मे च विषीदतां तेन तेन प्रकारेण धर्मे स्थैर्यारोपणम्, प्रमाद्यतां च स्मारण-वारण-चोदन-प्रतिचोदनादिकरणम्, पञ्चविधस्वाध्याये यथायोग्यं विनियोजनम्, विशिष्टधर्मानुष्ठानकरणार्थं च साधारणपोषधशालाकरणमिति ६।

श्राविकासु धनवपनं श्रावकादन्यूनातिरिक्तमुन्नेतव्यम्, तच्च[4] ज्ञान-दर्शन-चारित्रवत्यः शील-सन्तोषप्रधानाः सधवा विधवा वा जिनशासनानुरक्तमनसः साधर्मिकत्वेन माननीयाः ।

ननु स्त्रीणां कुतः शीलशालित्वं ? कुतो वा रत्नत्रययुक्तत्वम्, स्त्रियो हि नाम लोके लोकोत्तरे च अनुभवाच्च दोषभाजनत्वेन प्रसिद्धाः । एताः खलु अभूमिका विषकन्दल्यः, अनभ्रसम्भवा वज्राशनयः, असंज्ञका व्याधयः, अकारणो मृत्युः, अकन्दरा व्याघ्र्यः, प्रत्यक्षा राक्षस्यः, असत्यवचनस्य साहसस्य बन्धुस्नेहविघातस्य सन्तापहेतुत्वस्य निर्विवेकत्वस्य च परमं कारणमिति दूरतः परिहार्याः, तत् कथं दानसन्मानवात्सल्यविधानं तासु युक्तियुक्तम् ? ।

उच्यते —अनेकान्त एष यत् स्त्रीणां दोषबहुलत्वम्[5], पुरुषेष्वपि समानमेतत् । तेऽपि क्रूराशया दोषबहुला नास्तिकाः कृतघ्नाः स्वामिद्रोहिणो देव-गुरुवञ्चकाश्च दृश्यन्ते । तद्दर्शनेन च महापुरुषाणामवज्ञां कर्तुं न युज्यते । तीर्थकरादिजनन्यो हि स्त्रीत्वेऽपि तत्तद्गुणगरिम-योगितया सुरेन्द्रैरपि पूज्यन्ते, मुनिभिरपि स्तूयन्ते । **लौकिका** अप्याहुः —

**''निरतिशयं गरिमाणं, तेन युवत्या वदन्ति विद्वांसः ।**
**तं कमपि वहति गर्भं, जगतामपि यो गुरुर्भवति''** ॥१॥ [ ]

---

१. परिचार्याविधा(प)नं-मु० । L.P.C. योगशास्त्रवृत्तावपि-[प० ५७४] परिचर्याविधानम्-इति ॥ २. वस्तुनोपचरणम्-इति योगशास्त्रवृत्तौ प० ५७४ ॥ ३. स्वपुत्रपुत्रादि° C.P. । स्वपुत्रादि° इति योगशास्त्र-वृत्तौ प० ५७४ ॥ ४. तदवच्च-मु० । C. योगशास्त्रवृत्तावपि [प० ५७५] तच्च-इति ॥ ५. त्वमुच्यते-इति योगशास्त्रवृत्तौ प० ५७५ ॥

काश्चन स्वशीलप्रभावादग्निं जलमिव, विषधरं रज्जुमिव, सरितः स्थलमिव, विषममृतमिव कुर्वन्ति। **सुलसा**प्रभृतयो हि श्राविकास्तीर्थकरैरपि प्रशस्यगुणाः, सुरेन्द्रैरपि स्वर्गभूमिषु पुनः पुनः बहुमतचारित्राः, प्रबलमिथ्यात्वैरपि अक्षोभ्यसम्यक्त्वसम्पदः, काश्चिच्चरमदेहाः, काश्चिद् द्वित्रिभवान्तरितमोक्षगमनाः शास्त्रेषु श्रूयन्ते। तदासां जननीनामिव भगिनीनामिव स्वपुत्रीणामिव वात्सल्यं विधेयमेवेत्यलं प्रसङ्गेन।

न केवलं सप्तक्षेत्र्यां **धनवापः** पूर्वोक्तशेषो विशेषतो गृहस्थधर्मः, किन्त्वन्योऽपीति तमाह –'**दीनानुकम्पनम्**' इति, दीनेषु–निःस्वा–ऽन्ध–बधिर–पङ्गु–रोगार्त्तप्रभृतिषु अनुकम्पनम्–अनुकम्पाकरणम्, केवलया कृपया धनवापः न तु भक्त्येतिभावः। भक्तिपूर्वकं हि सप्तक्षेत्र्यां यथोचितं दानम्, दीनेषु[1] तु अविचारितपात्रापात्रमविमृष्टकल्प्या[2]-कल्प्यप्रकारं केवलयैव करुणया स्वधनस्य वपनं न्याय्यम्, भगवन्तो हि निष्क्रमणकाले-ऽनपेक्षितपात्रापात्रविभागं करुणया साँवत्सरिकदानं दत्तवन्त इति। एवंविधगुणयुक्तश्च महाश्रावक उच्यते। यतो **योगशास्त्रे** –

"**एवं व्रतस्थितो भक्त्या, सप्तक्षेत्र्यां धनं वपन्।**
**दयया चातिदीनेषु, महाश्रावक उच्यते**" ॥१॥ [ **यो.शा.३/११९** ]

महत्पदविशेषणं च अन्येभ्योऽतिशायित्वात्, यतः –श्रावकत्वमविरतानामेका-द्यणुव्रतधारिणां च शृणोतीति व्युत्पत्त्योच्यते। यदाह –

"**संपत्तदंसणाई, पइदिअहं जइजणा सुणेई अ।**
**सामायारिं परमं, जो खलु तं सावगं बिंति** ॥१॥ [ **सं.प्र.५/१, श्रा.प्र.२** ]
**श्रद्धालुतां श्राति पदार्थचिन्तनाद्धनानि पात्रेषु वपत्यनारतम्।**
**किरत्यपुण्यानि सुसाधुसेवनादद्यापि[3] तं श्रावकमाहुरञ्जसा**" ॥२॥ [ **सु.अ.६/३** ]

इति निरुक्ताच्च श्रावकत्वं सामान्यस्यापि प्रसिद्धम्, विवक्षितस्तु निरतिचार-सकलव्रतधारी सप्तक्षेत्र्यां धनवपनाद् दर्शनप्रभावकतां परमां दधानो दीनेषु चात्यन्त-कृपापरो महाश्रावक उच्यते इत्यलं प्रसङ्गेन ॥५९॥

## ॥ इति[4] प्रथमः खण्डः ॥

● ● ●

१. L.P.C.। दीनादिषु–मु०। अतिदीनेषु–इति योगशास्त्रवृत्तौ प० ५७६ ॥ २. कल्पनीया-कल्पनीयप्रकारं–इति योगशास्त्रवृत्तौ प० ५७६ ॥ ३. °थापि–इति योगशास्त्रवृत्तौ प० ५७७ ॥ ४. सौकयार्थमस्माभिरत्र 'प्रथमखण्डः' कृत इति ज्ञेयम् ॥

# द्वितीयः खण्डः ॥

इदानीं महाश्रावकस्य दिनचर्यारूपं उक्तशेषं विशेषतो गृहस्थधर्ममाह –

**नमस्कारेणावबोधः स्वद्रव्याद्युपयोजनम् ।**
**सामायिकादिकरणं, विधिना चैत्यपूजनम् ॥६०॥**

'**नमस्कारेण**' सकलकल्याणपुरपरमश्रेष्ठिभिः परमेष्ठिभिरधिष्ठितेन '**नमो अरिहंताणं**'-इत्यादिप्रतीतरूपेण '**अवबोधो**' निद्रापरिहारः, तत्पाठं पठन्निद्रां जह्यादित्यर्थ। अयं विशेषतो गृहिधर्मो भवतीत्येवमग्रेऽप्यन्वयः ।

तथा **स्वस्मिन्** –आत्मनि **द्रव्यादेः** –द्रव्य-क्षेत्र-काल-भावानाम् '**उपयोजनम्**' – उपयोगकरणम्, यथा –द्रव्यतः कोऽहम् ? श्राद्धोऽन्यो वा, के मम गुरव इत्यादि। क्षेत्रतः –कुत्र ? ग्रामे नगरे स्वगृहेऽन्यगृहे वा उपरि अधो वा वसामीति । कालतो रात्रिर्वा दिनं वेत्यादि । भावतः किं कुलः ? किं धर्मः ?, किं व्रतो वाऽस्मीत्यादि-स्मरणम् ।

अत्रायं विधिर्निद्राच्छेदे-श्रावकेण तावत्स्वल्पनिद्रेण भाव्यं यथा पाश्चात्यरात्रौ स्वयमेवोत्थीयते । तथा सति ऐहिकामुष्मिककार्यसिद्ध्यादयोऽनेकगुणाः । न चेदेवं तदा [१]पञ्चदशमुहूर्त्ता रजनी, तस्यां जघन्यतोऽपि चतुर्दशे ब्राह्मे मुहूर्ते नमस्कारं स्मरन् उत्तिष्ठेत्। ततो द्रव्याद्युपयोगं करोति । तथापि निद्रानुपरमे नासानिश्वासरोधं करोति । ततो विनिद्रः कायि[२]कीं चिन्तां करोति। कासितादिशब्दमपि उच्चस्वेरण न कुर्यात् । हिंसक-जीवजागरणेन हिंसाद्यनर्थप्रवृत्तेः, उत्तिष्ठँश्च वहमाननासिकापक्षीयं पादं प्रथमं भूम्यां दद्यादिति नीतिः । अत्र निद्रात्यागसमये [३]आत्यन्तिकतद्बहुमानकार्यभूतं मङ्गलार्थं नमस्कारम् अव्यक्तवर्णं स्मरेदिति विशेषः । यदाहुः –

---

१. तुला-योगशास्त्रटीका ३।१२१ प० ५७९ ॥ २. L.P.C. । °की° मु० ॥ ३. इत आरभ्य तुला-श्राद्धविधिप्र० प० ३५तः ॥

**''परमेट्ठिचिंतणं माणसंमि सिज्जागएण कायव्वं ।**
**सुत्ताविणयपवित्ती, निवारिआ होइ एवं तु[१]'' ॥१॥ [ ]**

अन्ये तु न सा काचिदवस्था यस्यां नमस्कारस्यानधिकार इति मन्वाना अविशेषेणैव नमस्कारपाठमाहुः। एतन्मतद्वयमाद्य**पञ्चाशकवृत्त्या**दा[२]वुक्तम्। **श्राद्धदिनकृत्ये**त्वेवमुक्तम् –

**''सिज्जाठाणं पमुत्तूणं, चिट्ठिज्जा धरणीअले ।**
**भावबन्धुं जगन्नाहं, नमुक्कारं तओ पढे ॥१॥ [ श्रा.दि./गा.९ ]**

**यतिदिनचर्या**यां चैवम् –

**''जामिणिपच्छिमजामे, सव्वे जग्गंति बालवुड्ढाई ।**
**परमिट्ठिपरममंतं, भणंति सत्तट्ठवाराओ ॥१॥ [ य.दि./गा.३ ]**

नमस्कारपरावर्त्तनविधिस्त्वेवं **योगशास्त्रेऽष्टमप्रकाशे** –

**''अष्टपत्रे सिताम्भोजे, कर्णिकायां कृतस्थितिम् ।**
**आद्यं सप्ताक्षरं मन्त्रं, पवित्रं चिन्तयेत् ततः ॥१॥ [ यो.शा./८-३३ ]**
**सिद्धादिकचतुष्कं च, दिक्पत्रेषु यथाक्रमम् ।**
**चूलापादचतुष्कं च, विदिक्पत्रेषु चिन्तयेत् ॥२॥ [ यो.शा./८-३४ ]**
**विशुद्ध्या चिन्तयन्नस्य, शतमष्टोत्तरं मुनिः ।**
**भुञ्जानोऽपि लभेतैव, चतुर्थतपसः फलम्'' ॥३॥ [ यो.शा./८-३५ ]**

मुख्यफलं तु स्वर्गापवर्गाविव । यतस्तत्रैव –

**''प्रवृत्तिहेतुरेवैतदमीषां कथितं फलम् ।**
**फलं स्वर्गापवर्गौ तु , वदन्ति परमार्थतः'' ॥१॥ [ यो.शा./८-४० ]**

तथागणनाशक्तौ करजापो नन्दावर्त्त-शङ्खावर्त्तादिरपि बहुफलः । उक्तं च –

**''करआवत्ते जो, पंचमंगला साहुपडिमसंखाए ।**
**णववारा आवत्तइ, छलंति तं नो पिसायाई'' ॥१॥ [ नम.प./१६ ]**

बन्धनादिकष्टे तु विपरीतशङ्खावर्त्तादिनाऽक्षरैः पदैर्वा विपरीतनमस्कारं लक्षादि जपेत् , सद्यः क्लेशनाशः स्यात् । यद्यपि मुख्यवृत्त्या निर्जरायै एव सम्यग्दृशां गणनमुचितम् , तथापि तत्तद्द्रव्य-क्षेत्र-काल-भावसामग्रीवशेनैहिकाद्यर्थमपि स्मरणं कदाचिदुपकारीति शास्त्रे उपदिष्टं दृश्यते । यतो **योगशास्त्रे** –

---

१. नु-मु० । श्राद्धविधियोगशास्त्र[प० ५७९]वृत्त्योरपि-तु-इति ॥ २. योगशास्त्रवृत्तौ [३।१२१, प० ५७९] द्रष्टव्यम् ॥

"पीतं स्तम्भेऽरुणं वश्ये, क्षोभणे विद्रुमप्रभम् ।
कृष्णं विद्वेषणे ध्यायेत् , कर्मघाते शशिप्रभम्" ॥१॥[ यो.शा./८-३१ ]इति।

करजापाद्यशक्तस्तु [1]रत्नरुद्राक्षादिजपमालया स्वहृदयसमश्रेणिस्थया परिधानवस्त्र-चरणादावलगन्त्या मेर्वनुल्लङ्घनादिविधिना जपेत् । यतः —

"अङ्गुल्यग्रेण यज्जप्तं, यज्जप्तं मेरुलङ्घने ।
व्यग्रचित्तेन यज्जप्तं, तत्प्रायोऽल्पफलं भवेत् ॥१॥ [ ]
सङ्कुलाद् विजने भव्यः, सशब्दान्मौनवान् शुभः ।
मौनजान्मानसः श्रेष्ठो, जापः श्लाघ्यः परः परः" ॥२॥ [ ]

श्री**पादलिप्तसूरि**कृत**प्रतिष्ठापद्धताव**प्युक्तम् —

**"जापस्त्रिविधो-मानसोपांशुभाष्यभेदात् । तत्र मानसो मनोमात्रवृत्तिनिर्वृत्तिः स्वसंवेद्यः, उपांशुस्तु परैरश्रूयमाणोऽन्तः[2]सञ्जल्परूपः, यस्तु परैः श्रूयते स भाष्यः । अयं यथाक्रममुत्तममध्यमाऽधमसिद्धिषु शान्ति-पुष्ट्यभिचारादिरूपासु नियोज्यः । मानसस्य [3]यत्नसाध्यत्वाद् , भाष्यस्याधमसिद्धिफलत्वाद् , उपां[4]शोः साधारणत्वादिति । नमस्कारस्य पञ्चपदीं नवपदीं वाऽनानुपूर्वीमपि चित्तैकाग्र्यार्थं [5]गणयेत् , तस्य च प्रत्येकमेकैकाक्षर-पदाद्यपि [6]परावृत्त्यं( वर्त्यं ), स च प्रकारो योगशास्त्राष्टमप्रकाशाद्** ज्ञेयः । तथा —

"मन्त्रः प्रणवपूर्वोऽयं, फलमैहिकमिच्छुभिः ।
ध्येयः प्रणवहीनस्तु , निर्वाणपदकाङ्क्षिभिः" ॥१॥ [ यो.शा./८-७१ ]

एवं च विधिना जापो विधेयः, जापादेश्च बहुफलत्वात् । यतः —

"पूजाकोटिसमं स्तोत्रं, स्तोत्रकोटिसमो जपः ।
जपकोटिसमं ध्यानं, ध्यानकोटिसमो लयः" ॥१॥ [ उ.त./८९ ]

ध्यानसिद्ध्यै च जिनजन्मभूम्यादिरूपं तीर्थमन्यद्वा स्वास्थ्यहेतुं विविक्तस्थानाद्या-श्रयेत् । यदुक्तं **ध्यानशतके** —

"निच्चं चिअ जुवइ-पसू-नपुंसग-कुसीलवज्जिअं जइणो ।
ठाणं विअणं भणिअं, विसेसओ झाणकालंमि ॥१॥ [ ध्या.श./३५ ]

---

१. सूत्ररत्न° इति श्राद्धविधिवृत्तौ ॥ २. °सङ्कल्परूपः-मु० । सञ्जल्परूपः-इति P.C. श्राद्धविधिवृत्तौ च ॥ ३. प्रयत्न० इति श्राद्धविधिवृत्तौ ॥ ४. °शु०-इति श्राद्धविधिवृत्तौ ॥ ५. गुणयेत्-इति श्राद्धविधिवृत्तौ ॥ ६. परावृत्त्यं-L.P. । परावर्त्यं-इति श्राद्धविधिवृत्तौ ॥

**थिरकयजोगाणं पुण, मुणीण झाणेसु निच्चलमणाणं ।**
**गामंमि जणाइण्णे, सुण्णे रण्णे व न विसेसो ॥२॥** [ ध्या.श./३६ ]

**तो जत्थ समाहाणं, होइ मणो-वयण-कायजोगाणं ।**
**भूओवरोहरहिओ, सो देसो झायमाणस्स ॥३॥** [ ध्या.श./३७ ]

**कालोऽवि सुच्चिअ जहिं, जोगसमाहाणमुत्तमं लहइ ।**
**न उ दिवसनिसावेलाइ, नियमणं झाइणो भणिअं''** ॥ [ ध्या.श./३८ ] इत्यादि ।

नमस्कारश्चात्रामुत्र चात्यन्तगुणकृत् । यतो **महानिशीथे –**

''**नासेइ चोर-सावय-विसहर-जल-जलण-बंधणभयाइं ।**
**चिंतिज्जंतो रक्खस-रण-रायभयाइं भावेणं''** ॥१॥ [ म.नि. ]

अन्यत्रापि-''**जाए वि जो पढिज्जइ, जेण जायस्स होइ फलरिद्धी ।**
**अवसाणे वि पढिज्जइ, जेण मओ सुग्गइं जाइ** ॥१॥ [ न.फ.कु./५ ]

**आवयहिं[1] पि पढिज्जइ, जेण य लंघेइ आवयसयाइं ।**
**रिद्धीए वि पढिज्जइ, जेण य सा जाइ वित्थारं** ॥२॥ [ न.फ.कु./६ ]

**नवकारइक्कअक्खर, पावं फेडेइ सत्तअयराइं ।**
**पण्णासं च पएणं, पंचसयाइं समग्गेणं** ॥३॥ [ र.सं./२ ]

**जो गुणइ लक्खमेगं, पूएइ विहीइ जिणनमुक्कारं ।**
**तित्थयरनामगोअं, सो बंधइ नत्थि संदेहो** ॥४॥ [ न.फ.कु./१२ ]

**अट्ठेव य अट्ठसया, अट्ठसहस्सं च अट्ठकोडीओ ।**
**जो गुणइ अट्ठलक्खे, सो तइअभवे लहइ सिद्धिं''** ॥५॥ [ र.सं./४ ] इति ।

द्रव्याद्युपयोजनमित्यत्रादिशब्दाद्धर्मजागर्याऽपि गृहीता भवति । सा चैवम् –

''**किं मे कडं ? किं च मे किच्चसेसं ?, किं सक्कणिज्जं न समायरामि ? ।**[2]
**किं मे परो पासइ ? किं च अप्पा, किं वाहं खलिअं न विवज्जयामि''** ॥१॥
[ श्रा.दि./३२४ ] इत्यादि ।

श्रूयते **ह्यानन्द-कामदेवा**द्यैरप्येवं विहितेति ।

अथोत्तरार्द्धव्याख्या **–'सामायिकादि'**इत्यादि, **सामायिकं –**मुहूर्त्तं यावत्समभावरूप-नवमव्रताराधनं प्रथमावश्यकं वा । **आदि**शब्दात् षड्विधावश्यकप्रतिबद्धरात्रिकप्रति-क्रमणग्रहणम् , तद्विधिरग्रे वक्ष्यते । अत्र च षाण्मासिकतपः –कायोत्सर्गेऽद्य का तिथिः ?

---

१. आवइहिं पि-मु० ॥ २. किं मे कडं ? किच्चमकिच्चसेसं-मु० । किं मे कडं किच्चंमि किच्चसेसं-इति श्राद्धविधिवृत्तौ प० ३७A ॥

किं वाऽर्हतां कल्याणकमित्यादि विमृश्य तद्दिनकर्त्तव्यं प्रत्याख्यानं चिन्तयित्वा स्वयं कुर्यात् प्रत्याख्यानम् । यतः **श्राद्धदिनकृत्ये –**

**''छण्हं तिहीण मज्झंमि, का तिही अज्ज वासरे ? ।**
**किं वा कल्लाणगं अज्ज ?, लोगनाहाण संतिअं ॥१॥** [ श्रा.दि./गा.२१ ]
**पच्चक्खाणं तु जं तंमि, दिणंमि गिण्हियव्वयं ।**
**चिंतिऊणं सुसड्ढो उ, कुणइ अण्णं तओ इमं'' ॥२॥** [ श्रा.दि./गा.२२ ] ति ।

अथ च यो न प्रतिक्रामति तेनापि रागादिमयकुस्वप्न–प्रद्वेषादिमयदुःस्वप्नयोरनिष्ट–सूचकताद्दक्स्वप्नस्य च प्रतिघाताय स्त्रीसेवादिकुस्वप्नोपलम्भेऽष्टोत्तरशतोच्छ्वासमानोऽन्यथा तु शतोच्छ्वासमानः कायोत्सर्गः कार्यः । यदुक्तं **व्यवहारभाष्ये –**

**''पाणिवह १ मुसावाए २, अदत्त ३ मेहुण ४ परिग्गहे सुविणे ।**
**सयमेगं तु अणूणं, ऊसासाणं[1] झविज्जाहि ॥१॥** [ व्य.भा./११९ ]
**महव्वयाइं झाइज्जा, सिलोगे पंचवीसई ।**
**इत्थीविप्परिआसे[2], सत्तावीससिलोइओ ॥२॥** [ व्य.भा./१२० ]

**प्राणिवधादिचतुष्के स्वप्ने कृते कारितेऽनुमोदिते च, मैथुने तु कृते द्वितीयगाथा–त्तरार्द्धेऽष्टोत्तरशतोच्छ्वासोत्सर्गस्योक्तत्वात् कारितेऽनुमोदिते च शतमेकमन्यूनमुच्छ्वासानां क्षपयेत्–पञ्चविंशत्युच्छ्वासप्रमाणं चतुर्विंशतिस्तवं चतुरो वारान् ध्यायेदिति भावः ।१। अथवा महाव्रतानि दशवैकालिकश्रुतबद्धानि कायोत्सर्गे ध्यायेत् , तेषामपि प्रायः पञ्चविंशतिश्लोकमानत्वात् । अथवा यान् तान् वा स्वाध्यायभूतान् पञ्चविंशतिं श्लोकान् ध्यायेत् इति तद्वृत्तौ''** । [ व्य.सू.गा.११९/१२०वृ. ]

**आद्यपञ्चाशकवृत्तावपि ''जातु मोहोदयात् कुस्वप्ने स्त्रीसेवनादिरूपे तत्कालमुत्था–येर्यापथिकी[3]प्रतिक्रमणपूर्वकमष्टोत्तरशतोच्छ्वासप्रमाणः कायोत्सर्गः कार्यः इति''** । [ ]

**श्राद्धविधौ** त्वयं विशेषः –**''कायोत्सर्गे कृतेऽपि प्रतिक्रमणवेलाया अर्वाग् बहुनिद्रा–प्रमादे पुनरेवं[4] कायोत्सर्गः क्रियते, जातु दिवाऽपि निद्रायां कुस्वप्नाद्युपलम्भे एवं कायोत्सर्गः कर्त्तव्यो विभाव्यते, परं तदैव क्रियते सन्ध्याप्रतिक्रमणावसरे वेति निर्णयो बहुश्रुतगम्यः''** [ प० ३० ] इति ।

**''प्रतिक्रामकस्य च प्रत्याख्यानोच्चारात् पूर्वं सच्चित्तादिचतुर्दशनियमग्रहणं स्यात् ,**

---

१. ऊसासे° L.C. । ऊसास° P. ॥ २. °से अ सत्ता० इति श्राद्धविधिवृत्तौ प० ३७A ॥ ३. °र्यापथप्रति० इति श्राद्धविधिवृत्तौ प० ३७B ॥ ४. पुनरेव–मु० । L.P.C. श्राद्धविधिवृत्तावपि पुनरेवम्–इति ॥

**अप्रतिक्रामकेनापि सूर्योदयात् प्राक् चतुर्दशनियमग्रहणं यथाशक्ति नमस्कारसहितग्रन्थिसहितादिद्व्यासनैकाशनादियथागृहीतसच्चित्तद्रव्यविकृतिनैयत्यादिनियमोच्चारणरूपं देशावकाशिकं च कायम्''** इति **श्राद्धविधिवृत्ति**लिखितानुवादः । [ प० ३९ ]

क्षोदक्षमश्चायम् , यतो नमस्कारसहितपौरुष्यादिकालप्रत्याख्यानं सूर्योदयात् , प्रागेवोच्चारयितुं युक्तम् , न तु तत् पश्चात् , कालप्रत्याख्यानस्य 'सूरे उग्गए' इति पाठबलात् सूर्योदयेनैव संबद्धत्वसिद्धेः, शेषाणि सङ्केतादीनि तु पश्चादपि कृतानि शुध्यन्ति । यतः **श्राद्धविधिवृत्तौ –''नमस्कारसहितपौरुष्यादिकालप्रत्याख्यानं सूर्योदयात् प्राग् यद्युच्चार्यते तदा शुध्यति, नान्यथा, शेषप्रत्याख्यानानि सूर्योदयात् पश्चादपि क्रियन्ते, नमस्कारसहितं च[२] यदि सूर्योदयात् प्रागुच्चारितं तदा तत्पूर्त्तेरन्वयि पौरुष्यादिकालप्रत्याख्यानं[३] क्रियते स्वस्वावधिमध्ये, नमस्कारसहितोच्चारं विना सूर्योदयादनु कालप्रत्याख्यानं न शुध्यति, यदि दिनोदयात् प्राग् नमस्कारसहितं विना पौरुष्यादि कृतं तदा तत्पूर्त्तेरूर्ध्वमपरं कालप्रत्याख्यानं न शुध्यति, तन्मध्ये तु शुध्यतीति वृद्धव्यवहारः''** । [ श्रा.वि.गा.५वृ. ]

**श्रावकदिनकृत्ये**ऽपि –**''पच्चक्खाणं तु जं तंमि''** [ गा. २२ ] ति गाथार्थपर्यालोचनयेयमेव वेला प्रतिपादिता संभाव्यते ।

**प्रवचनसारोद्धारवृत्ता**वपि **'उचिए काले विहिणा'** [ गा. २१३ ] त्ति गाथाव्याख्यायाम् –**''उचितकाले विधिना प्राप्तं यत् स्पृष्टं तद् भणितम् , इदमुक्तं भवति –साधुः श्रावको वा प्रत्याख्यानसूत्रार्थं सम्यगवबुध्यमानः सूर्ये अनुद्गत एव स्वसाक्षितया चैत्यस्थापनाचार्यसमक्षं वा स्वयं प्रतिपन्नविवक्षितप्रत्याख्यानः पश्चाच्चारित्रपवित्रगात्रस्य गीतार्थस्य गुरोः समीपे सूत्रोक्तविधिना कृतिकर्मादिविनयं विधाय रागादिरहितः सर्वत्रोपयुक्तः प्राञ्जलिपुटो लघुतरशब्दो[४] गुरुवचनमनूच्चरन् यदा प्रत्याख्यानं प्रतिपद्यते तदा स्पृष्टं भवतीति''** [ भा० २, प० १३७ ][५] ।

तथा **प्रत्याख्यानपञ्चाशकवृत्ता**वपि **''गिह्णइ''** [ ५।५ ] त्ति गाथा, **''गृह्णाति प्रतिपद्यते, प्रत्याख्यानमिति प्रकृतं, स्वयं गृहीतमात्मना प्रतिपन्नं विकल्पमात्रेण स्वसाक्षितया वा चैत्यस्थापनाचार्यसमक्षं वा, कदा गृह्णातीत्याह –'काले' पौरुष्यादिके आगामिनि सति, न पुनस्तदतिक्रमे, अनागतकालस्यैव प्रत्याख्यानविषयत्वात् , अतीतवर्त्तमानयोस्तु निन्दासंवरणविषयत्वादिति''** [ पञ्चाशकवृत्तिः प० ८९ ]

---

१. °नियत्या° P.L. ॥ २. च–मु० C. नास्ति । L.P. श्राद्धविधिवृत्तौ च अस्ति ॥ ३. °नं सर्वं क्रियते–इति श्राद्धविधिवृत्तौ ॥ ४. °शब्देन–इति प्रवचनसारोद्धारवृत्तौ प० १३७ ॥ ५. L.P.C. । ''गिण्हइ सयं गहीयं काले''त्ति–मु० ॥

इत्थं च बहुग्रन्थानुसारेण कालप्रत्याख्यानं सूर्योदयात् प्रागेवोच्चार्यम् , नान्यथेति तत्त्वम् ।

अथ प्रत्याख्यानकरणानन्तरं यत् कर्त्तव्यं तदाह –'**विधिना**' इति विधिना-अनुपदमेव वक्ष्यमाणपुष्पादिसंपादनमुद्रान्यसनादिना प्रसिद्धेन **चैत्यपूजनं** –द्रव्य-भावभेदादर्हत्प्रतिमार्चनम् , अन्वयः प्राग्वदेव । चैत्यानि च भक्ति १ मङ्गल २ निश्राकृत ३ अनिश्राकृत ४ शाश्वत ५ चैत्यभेदात् पञ्च । यतः –

''**भत्तीमंगलचेइअनिस्सकडमनिस्सचेइए वा वि ।**
**सासयचेइअपंचममुवइट्ठं जिणवरिंदेहिं**'' ॥१॥ [ प्र.सा./६५९ ]

तत्र नित्यपूजार्थं गृहे कारिताऽर्हत्प्रतिमा भक्तिचैत्यम् , गृहद्वारोपरि तिर्यक्काष्ठ-मध्यभागे घटितं मङ्गलचैत्यम् , गच्छसत्कं चैत्यं निश्राकृतम् , सर्वगच्छ-साधारणम् अनिश्राकृतम् ४, शाश्वतचैत्यं प्रसिद्धम् ५ । उक्तं च –

''**गिहजिणपडिमाएँ भत्तिचेइअं उत्तरंगघडिअंमि ।**
**जिणबिंब[१] मंगलचेइअं ति समयन्नुणो बिंति** ॥१॥ [ प्र.सा./६६० ]
**निस्सकडं जं गच्छसंतिअं तदिअरं अनिस्सकडं ।**
**सिद्धाययणं च इमं, चेइअपणगं विणिद्दिट्ठं**'' ॥२॥ [ प्र.सा./६६१ ] इति ।

तत्र चेदं भक्तिचैत्यमिति ज्ञेयम् , मङ्गलचैत्यमिति **योगशास्त्रवृत्ता**वुक्तम् , तच्च प्रागुक्तत्रिविधजिनप्रतिमापेक्षया भाव्यमित्यलं प्रसङ्गेन ॥६०॥

पूजनं च विधिनैव विधीयमानं फलवद् भवति । यतः **पूजापञ्चाशके** –

''**विहिणा उ कीरमाणा सव्वाऽवि अ फलवई भवे चेट्ठा ।**
**इहलोइआऽवि किं पुणा? जिणपूआ उभयलोगहिआ**'' ॥१॥ [ पञ्चा.४।२ ] इति ।

तद्विधिमाह –

**सम्यक् स्नात्वोचिते काले, संस्नाप्य च जिनान् क्रमात् ।**
**पुष्पाहारस्तुतिभिश्च, पूजयेदिति तद्विधिः ॥६१॥**

'**उचिते**' जिनपूजाया योग्ये '**काले**' अवसरे '**सम्यग्**' विधिना '**स्नात्वा**' स्वयं स्नानं कृत्वा '**चः**' पुनः '**जिनान्**' अर्हत्प्रतिमाः '**संस्नाप्य**' सम्यग् स्नपयित्वा '**क्रमात्**' पुष्पादिक्रमेण न तु तमुल्लङ्घ्य, **पुष्पाणि** –कुसुमानि, पुष्पग्रहणं च सुगन्धिद्रव्याणां विलेपन-गन्ध-धूप-वासादीनामङ्गन्यसनीयानां च वस्त्रा-ऽऽभरणादीनामुपलक्षणम् , **आहारश्च**-पक्वान्न-फला-ऽक्षत-दीप-जलघृतपूर्णपात्रादिरूपः, **स्तुतिः**–शक्रस्तवादि-सद्भूतगुणोत्कीर्त्तनरूपा, ततो द्वन्द्व**स्ताभिः** '**पूजयेदिति**' **तस्य** चैत्यपूजनस्य **विधि**रिति

१. °बे-इति प्रवचनसारोद्धारे ॥

क्रियाकारकसंबन्धः । तत्र जिनपूजाया उत्सर्गतः उचितः कालः सन्ध्यात्रयरूपः, अपवादतस्तु वृत्तिक्रियाऽविरोधेन आभिग्रहिकः । यत उक्तं **पञ्चाशके —**

> "**सो पुण इह विण्णेओ, संझाओ तिण्णि ताव ओहेणं ।**
> **वित्तिकिरिआऽविरुद्धो, अहवा जो जस्स जावइओ**" ॥१॥ [ पञ्चा.४/५ ]

[1]अस्या अपरार्द्धव्याख्या —वृत्तिक्रियाः-राजसेवा-वणिज्यादीनि कर्माणि, तासामविरुद्धः —अबाधको वृत्तिक्रियाऽविरुद्धः, अथवेति विकल्पार्थः, ततश्चापवादत इत्युक्तं भवति, यः पूर्वाह्णादिर्यस्य-राजसेवक-वाणिजकादेः'जावइओ' त्ति यत्परिमाणो यावान् स एव यावत्को —मुहूर्त्तादिपरिमाणः, स तस्य तावत्कः पूजाकालो भवति, न पुनः सन्ध्यात्रयरूप एवेति ।

सम्यग् स्नात्वा संस्नाप्य चेत्यत्र सम्यक्पदाभ्यां सकलोऽपि स्नानादिविधिर्जिनप्रतिमास्नपनादिविधिश्च सूचितः । तत्र स्नानविधिः —उत्तिङ्गपनककुन्थ्वाद्यसंसक्तवैषम्यशूषिरादिदोषादूषितभूमौ परिमितवस्त्रपूतजलेन संपातिमसत्त्वरक्षणादियतनारूपः, उक्तं च **दिनकृत्ये —**

> "**तसाइजीवरहिए, भूमिभागो विसुद्धए ।**
> **फासुएणं तु नीरेणं, इअरेणं गलिएण उ** ॥१॥ [ श्रा.दि./गा.२३ ]
> **काऊणं विहिणा ण्हाणं**" [ श्रा.दि./गा.२४पू. ] ति ।

तत्र विधिना —परिमितोदकसंपातिमसत्त्वरक्षणादियतनयेति तद्वृत्तिलेशः **पञ्चाशकेऽपि —**

> "**भूमिपेहणजलछाणणाइजयणा[2] उ होइ ण्हाणादो[3] ।**
> **एत्तो विसुद्धभावो, अणुहवसिद्धो च्चिअ बुहाणं**" ॥१॥ [ पञ्चा.४/११ ]

**व्यवहारशास्त्रे** तु —

> "**नग्नार्तः प्रोषितायातः, सचेलो भुक्तभूषितः ।**
> **नैव स्नायादनुव्रज्य, बन्धून् कृत्वा च मङ्गलम्**" ॥१॥ [ व्य.शा. ] इत्यादि ।

स्नानं च द्रव्यभावभ्यां द्विधा, तत्र द्रव्यस्नानं जलेन शरीरक्षालनम्, तच्च देशतः सर्वतो वा, तत्र देशतो मलोत्सर्ग-दन्तधावन-जिह्वालेखन-करचरणमुखादिक्षालन-गण्डूषकरणादि । सर्वतस्तु सर्वशरीरक्षालनमिति । तत्र च मलोत्सर्गो मौनेन निरवद्यार्हस्थानादिविधिनैवोचितः । यतः —

---

१. तुला-पञ्चाशकटीका प० ७२ ॥ २. °जइणा-इति पञ्चाशके ॥ ३. ण्हाणादो(ण्हाणंमि)-मु० । ण्हाणादौ-L.P.C. । ण्हाणाओ-इति पञ्चाशके ॥

**"मूत्रोत्सर्गं मलोत्सर्गं, मैथुनं स्नानभोजनम् ।**

**सन्ध्यादिकर्म पूजां च, कुर्याज्जापं च मौनवान्"** ॥१॥ [ ]

**विवेकविलासे**ऽपि —

**"मौनी वस्त्रावृत्तः कुर्याद्दिनसन्ध्याद्वयेऽपि च ।**

**उदङ्मुखः शकृन्मूत्रे, रात्रौ याम्याननः पुनः"** ॥१॥ [वि.वि./१-४८] इति ।

दन्तधावनमपि —

**"[1]अवक्राऽग्रन्थिसत्कूर्चं, सूक्ष्माग्रं च दशाङ्गुलम् ।**

**कनिष्ठाग्रसमस्थौल्यं, ज्ञातवृक्षं सुभूमिजम्** ॥१॥ [व्य.शा.]

**कनिष्ठिकानामिकयोरन्तरे दन्तधावनम् ।**

**आदाय दक्षिणां दंष्ट्रां, वामां वा संस्पृशस्तले** ॥२॥ [व्य.शा.]

**तल्लीनमानसः स्वस्थो, दन्तमांसव्यथां त्यजन् ।**

**उत्तराभिमुखः प्राचीमुखो वा निश्चलासनः"** ॥३॥ [व्य.शा.]

इत्यादि **नीतिशास्त्रो**क्तविधिना विधेयम् ।

गण्डूषोऽपि —

**"अभावे दन्तकाष्ठस्य, मुखशुद्धिविधिः पुनः ।**

**कार्यो द्वादशगण्डूषैर्जिह्वोल्लेखस्तु सर्वदा"** ॥१॥ [व्य.शा.]

इति विधिना कार्योऽप्रत्याख्यानिना, प्रत्याख्यानिनस्तु दन्तधावनादि विनापि शुद्धिरेव, तपसो महाफलत्वात् । इदं च द्रव्यस्नानं [2]वपुःपावित्र्यसुखकरत्वादिना भावशुद्धिहेतुः । उक्तं **चाष्टके** —

**"जलेन देहदेशस्य, क्षणं यच्छुद्धिकारणम् ।**

**प्रायोऽन्यानुपरोधेन, द्रव्यस्नानं तदुच्यते"** ॥१॥ [स्नानाष्टके श्लो.२]

देहदेशस्य त्वङ्मात्रस्यैव, क्षणं न तु प्रभूतकालम्, प्रायः शुद्धिहेतुर्नत्वेकान्तेन, तादृग्रोग-ग्रस्तस्य क्षणमप्यशुद्धेः, प्रक्षालनार्हमलादन्यस्य [3]मलस्य कर्णनासाद्यन्तर्गतस्यानुपरोधेन — अप्रतिषेधेन यद्वा प्रायो जलादन्येषां प्राणिनामनुपरोधेन —अव्यापादनेन द्रव्यस्नानं —बाह्यस्नान-मित्यर्थः ।

**"कृत्वेदं यो विधानेन, देवतातिथिपूजनम् ।**

**करोति मलिनारम्भी, तस्यैतदपि शोभनम्"** ॥२॥ [स्नानाष्टके श्लो.३]

विधानेन —विधिना, अतिथिः —साधुः, मलिनारम्भी गृहस्थः । द्रव्यस्नानस्य शोभनत्वे हेतुमाह —

---

१. तुला-श्राद्धविधिवृत्तिः ५० ४७ ॥ २. तुला-श्राद्धविधिवृत्तिः प० ४८ ॥ ३. मलस्य-मु० C. नास्ति । L.P. श्राद्धविधिवृत्तावपि मलस्य-इति अस्ति ॥

"**भावशुद्धेर्निमित्तत्वात् , तथानुभवसिद्धितः ।**
**कथञ्चिद्दोषभावेऽपि, तदन्यगुणभावतः**" ॥३॥ [ **स्नानाष्टके/श्लो.४** ] युग्मम्[1] ॥

दोषोऽप्कायविराधनादिः, तस्माद् दोषादन्यो गुणः —सद्दर्शनशुद्धिलक्षणः । यदुक्तम् —

"**पूआए कायवहो, पडिकुट्ठो सो उ किं तु जिणपूआ ।**
**सम्मत्तसुद्धिहेउ त्ति भावणीआ उ णिरवज्जा**" ॥१॥ [ ]

**अन्यत्रा**ऽप्युक्तम् —"द्रव्यस्नानादिके यद्यपि षट्कायोपमर्दादिका काचिद् विराधना स्यात् , तथापि कूपोदाहरणेन श्रावकस्य द्रव्यस्तवः कर्तुमुचितः" । यदाहुः —

"**अकसिणपवत्तगाणं[2], विरयाविरयाण एस खलु जुत्तो ।**
**संसारपयणुकरणे, दव्वथए कूवदिट्ठंतो**" ॥१॥ [ **पञ्चाशकप्र.४/४२** ]

इदमुक्तं भवति —यथा कूपखननं श्रमतृष्णाकर्दमोपलेपादिदोषदुष्टमपि जलोत्पत्ताव-नन्तरोक्तदोषानपोह्य स्वोपकाराय परोपकाराय च किल भवति, इत्येवं स्नानादिकम-प्यारम्भदोषमपोह्य शुभाध्यवसायोत्पादनेन विशिष्टाशुभकर्मनिर्जरणपुण्यबन्धकारणं भवतीति । इह **केचिन्**मन्यन्ते —पूजार्थस्नानादिकरणकालेऽपि निर्मलजलकल्पशुभाध्यवसायस्य विद्यमानत्वेन कर्दमलेपादिकल्पपापाभावाद्विषममिदमित्थमुदाहरणम् । ततः किलेदमित्थं योजनीयं —यथा कूपखननं स्वपरोपकाराय भवति, एवं स्नानपूजादिकं करणानुमोदनद्वारेण स्वपरयोः पुण्यकारणं स्यादिति । न चैतदागमाननु[3](मानु)पाति, यतो धर्मार्थप्रवृत्तावप्यारम्भ-जनितस्याल्पपापस्येष्टत्वात् । कथमन्यथा **भगवत्या**मुक्तम् —

"**तहारूवं समणं वा माहणं वा पडिहयपच्चक्खायपावकम्मं अफासुएणं अणेसणिज्जेणं असणपाणखाइमसाइमेणं[4] पडिलाभेमाणे भंते ! किं कज्जइ ? गो० ! अप्पे पावे कम्मे बहुअरिआ से णिज्जरा कज्जइ**" । [ **भ.सू.** ]

तथा ग्लानप्रतिचरणानन्तरं पञ्चकल्याणकप्रायश्चित्तप्रतिप्रतिरपि कथं स्यादिति **पञ्चाशकवृत्तौ [ ४।१० ]**। [5]तत्सूत्रमपि —

"**ण्हाणाइ वि जयणाए, आरंभवओ गुणाय णिअमेणं[6] ।**
**सुहभावहेउओ खलु , विण्णेअं कूवणाएणं**" ॥१॥ [ **पञ्चा.४/१०** ] इत्यलं प्रसङ्गेन ।

---

१. युग्मम्-मु० नास्ति । L.P.C. श्राद्धविधिवृत्तावपि अस्ति ॥ २. P. । °वत्तमाणं-L.C. ॥ ३. आगमाननुपाति-L.P.C. । अत्र C. प्रतौ एतादृशं=चिह्नम् कृत्वा पार्श्वभागे 'प्रथमाशये'-इति लिखितम् प० ८८A ॥ ४. असण४पडिलाभेमाणे-L.P.C. ॥ ५. अत्र C. प्रतौ=एतादृशं चिह्नम् कृत्वा पार्श्वभागे-'द्वितीयाशये'-इति लिखितम् ॥ ६. L.P.C. । °ण-मु० ॥

एवं च देवपूजाद्यर्थमेव गृहस्थस्य द्रव्यस्नानमनुमतम्, तेन द्रव्यस्नानं पुण्यायेति यत् प्रोच्यते तन्निरस्तं मन्तव्यम्, भावस्नानं च शुभध्यानरूपम् । यतः –

"[१]**ध्यानाम्भसा तु जीवस्य, सदा यच्छुद्धिकारणम् ।**
**मलं कर्म समाश्रित्य, भावस्नानं तदुच्यते"** ॥१॥ [ अ.प्र. २।६ ] इति ।

कस्यचित् स्नाने कृतेऽपि यदि गडुक्षतादि स्रवति, तदा तेनाङ्गपूजां स्वपुष्पचन्दनादिभिः परेभ्यः कारयित्वाऽग्रपूजा भावपूजा च स्वयं कार्या । वपुरपावित्र्ये प्रत्युताशातनासम्भवेन स्वयमङ्गपूजाया निषिद्धत्वाद् । उक्तं च –

"**निःशूकत्वादशौ[२]चेऽपि, देवपूजां तनोति यः ।**
**पुष्पैर्भूपतितैर्यश्च, भवतः श्वपचाविमौ"** ॥१॥ [ ] इति ।

तत्र स्नानानन्तरं [३]पवित्रमृदुगन्धकाषायिकाद्यंशुकेनाङ्गरूक्ष[४]णं तथा पोतिकमोचनपवित्रवस्त्रान्तरपरिधानादियुक्त्या क्लिन्नाङ्घ्रिभ्यां भूमिमस्पृशन् पवित्रस्थानमागत्यो[५]त्तरामुखः संव्ययते दिव्यं नव्यमकीलितं श्वेतांशुकद्वयम् । यतः –

"**विशु[६]द्धिं वपुषः कृत्वा, यथायो[७]ग्यं जलादिभिः ।**
**धौतवस्त्रे [८]वसीत द्वे, विशुद्धे धूपधूपिते"** ॥१ ॥ [ ]

**लोके**ऽप्युक्तम् –

"**न कुर्यात् सन्धितं वस्त्रं, देवकर्मणि भूमिप ! ।**
**न दग्धं न तु वै [९]च्छिन्नं, परस्य तु न धारयेत्** ॥१ ॥ [ ]
**कटिस्पृष्टं तु यद्वस्त्रं, पुरीषं येन कारितम् ।**
**समूत्रमैथुनं [१०]वाऽपि, तद्वस्त्रं परिवर्ज्जयेत्** ॥२॥ [ ]
"**एकवस्त्रो न भुञ्जीत, न कुर्याद् देवतार्चनम् ।**
**न कञ्चुकं विना कार्या, देवार्चा स्त्रीजनेन तु"** ॥३॥ [ ]

एवं हि पुंसां वस्त्रद्वयं स्त्रीणां च वस्त्रत्रयं विना देवपूजादि न कल्पते । धौतवस्त्रं च मुख्यवृत्त्याऽतिविशिष्टं क्षीरोदकादिकं श्वेतमेव कार्यम्, **उदायननृप–प्रभावती**प्रभृतीनामपि

१. तुला–श्राद्धविधिवृत्तिः प० ४९ ॥ २. °शौचोऽपि–इति श्राद्धविधिवृत्तौ ॥ ३. तुला–श्राद्धविधिवृत्तिः प० ४९ ॥ ४. °णपौतिक° इति श्राद्धविधिवृत्तौ ॥ ५. °त्तराभिमुखः–इति श्राद्धविधिवृत्तौ ॥ ६. °द्धं–L.P.C. ॥ ७. °गं–C. संशो. ॥ ८. च सीते द्वे–इति श्राद्धविधिवृत्तौ ॥ ९. वै च्छिनं–L.P.C. श्राद्धविधिवृत्तौ च । वै च्छिन्नं (विच्छिन्नं)–मु० ॥ १०. चाऽपि–इति श्राद्धविधिवृत्तौ ॥

धौतांशुकं श्वेतं **निशीथादौ**वुक्तम् , **दिनकृत्यादा**वपि ''**सेअवत्थनिअसणो**''[ श्रा.दि.गा. २४ ] त्ति । क्षीरोदकाद्यशक्तावपि[१] दुकूलादिधौतिकं विशिष्टमेव कार्यम् । यदुक्तं **पूजाषोडशके** ''**सितशुभवस्त्रेण**'' [ ९।५ ] इति । **तद्वृत्तिर्**यथा – ''**सितवस्त्रेण च**[२] **शुभवस्त्रेण च, शुभमिह शुभ्रादन्यदपि**[३] **पट्टयुग्मादि रक्तपीतादिवर्णं परिगृह्यते**'' [ श्रीयशोभद्रसूरिकृतवृत्तौ ९।५ ] इति । ''**एगसाडिअं उत्तरासंगं करेइ**''[ ] इत्यागमप्रामाण्यादुत्तरीयमखण्डमेव कार्यम् , न तु खण्डद्वयादिरूपं, तच्च वस्त्रद्वयं भोजनादिकार्ये न व्यापार्यं, प्रस्वेदादिनाऽशुचित्वापत्तेः । व्यापारणानुसारेण च पुनः पुनर्धावनधूपनादिना पावनीयम् , पूजाकार्येऽपि स्वल्पवेलमेव व्यापार्यम् , परसत्कमपि च प्रायो वर्ज्यं, विशिष्य च बालवृद्धस्त्र्यादिसत्कम् , न च ताभ्यां प्रस्वेदश्लेष्मादि स्फेटनीयम् , व्यापारितवस्त्रान्तरेभ्यश्च पृथग् मोच्यमिति 'सम्यग् स्नात्वा' इत्यंशः प्रदर्शितः ।

अथ 'जिनान् संस्नाप्य' इत्यंशः प्रदर्शनीयः । तत्र जिनस्नपनादिविधिश्च समस्तपूजा-सामग्रीमेलनपूर्वकः, सा चेयम् –तथाहि –शुभस्थानात् स्वयमारामिकादिकं सुमूल्यार्पणादिना संतोष्य पवित्रभाजनाच्छादनहृदयाग्रस्थकरसम्पुटधरणादिविधिना पुष्पाद्यानयेद् । वैश्वासिकपुरुषेण वाऽनाययेत् । जलमपि च तथा । ततोऽष्टपुटोत्तरीयप्रान्तेन मुखकोशं विदध्यात् । यतो **दिनकृत्ये** –

''**काऊण विहिणा ण्हाणं, सेअवत्थनिअंसणो ।**
**मुहकोसं तु काऊणं, गिहबिंबाणि पमज्जाए**'' ॥१॥ [ श्रा.दि.गा./२४ ] त्ति ।

तमपि च यथासमाधि कुर्यात् , नासाबाधे तु नापि, यतः **पूजापञ्चाशके** ''**वत्थेण बंधिऊणं, णासं अहवा जहासमाहीए**'' [ ४।२० ] **एतद्वृत्तिर्**यथा –वस्त्रेण –वसनेन, बद्ध्वा –आवृत्य, नाशां[४] –नाशिकामथवेति विकल्पार्थो, यथासमाधि –समाधाना-नतिक्रमेण, यदि हि नासाबन्धे असमाधानं स्यात् तदा तामबद्ध्वाऽपीत्यर्थः, सर्वं यत्नेन कार्यमित्यनुवर्त्तते इति । [ **पञ्चाशकवृत्तिः प०** ७८ A ] युक्तिमच्च मुखे वस्त्र-बन्धनं, भृत्या अपि [तथा][५] स्वामिनोऽङ्गमर्दनश्मश्रुरचनादिकं कुर्वन्ति । यदुक्तम् –

''**बंधित्ता कासवओ, वयणं अट्ठग्गुणाए पोत्तीए ।**
**पत्थिवमुवासए खलु , वित्तिनिमित्तं भया चेव**'' ॥१॥ [ श्रा.दि.गा.१४८ ] त्ति ।

---

१. क्षीरोदकांशुकाद्य° इति श्राद्धविधिवृत्तौ ॥ २. च–श्राद्धविधिवृत्तौ षोडशकयशोभद्रसूरिवृत्तौ च नास्ति ॥ ३. सितादन्यदपि–इति षोडशकयशोभद्रसूरिवृत्तौ ॥ ४. नासां–नासिका° इति पञ्चाशक-वृत्तौ पृ० ७८ ॥ ५. L.P.C. । तथा–नास्ति ॥

तथा प्रमार्जितपवित्रावघर्षेऽसंसक्तशोधितजात्यकेसरकर्पूरादिमिश्रश्रीखण्डं संघर्ष्य भाजनद्वये पृथगुत्सारयेत् । तथा संशोधितजात्यधूपघृतपूर्णप्रदीपाखण्डचोक्षादिविशेषाक्षतपूगफलविशिष्टानुच्छिष्टनैवेद्यहृद्यफलनिर्मलोदकभृतपात्रादिसामग्रीं संयोजयेद् , एवं द्रव्यतः शुचिता, भावतः शुचिता तु रागद्वेषकषायेर्ष्यैहिकामुष्मिकस्पृहाकौतुकव्याक्षेपादित्यागैनैकाग्रचित्तता । उक्तं च –

''**मनोवाक्कायवस्त्रोर्वीपूजोपकरणस्थितेः ।**
**शुद्धिः सप्तविधा कार्या, श्रीअर्हत्पूजनक्षणे**'' ॥१॥ [ उ.त./६८ ]

एवं द्रव्यभावाभ्यां शुचिः सन् गृहचैत्ये –

''**आश्रयन् दक्षिणां शाखां, पुमान् योषित्त्वदक्षिणाम् ।**
**यत्नपूर्वं प्रविश्यान्तर्दक्षिणेनांह्रिणा[1] ततः** ॥२॥ [ वि.वि./१-८३ ]
**सुगन्धिमधुरैर्द्रव्यैः, प्राङ्मुखो वाऽप्युदङ्मुखः ।**
**वामनाड्यां प्रवृत्तायां, मौनवान् देवमर्चयेत्**'॥३॥ [ वि.वि./१-८४ ]

इत्याद्युक्तेन नैषेधिकीत्रयकरणप्रदक्षिणात्रयचिन्त(विरच)नादिकेन च विधिना देवताऽवसरप्रमार्जनपूर्वं शुचिपट्टकादौ पद्मासनासीनः पूर्वोत्सारितद्वितीयपात्रस्थचन्दनेन देवपूजासत्कचन्दनभाजनाद्वा पात्रान्तरे हस्ततले वा गृहीतचन्दनेन कृतभालकण्ठहृदुदरतिलको रचितकर्णिकाङ्गदहस्तकङ्कणादिभूषणश्चन्दनचर्चितधूपितहस्तद्वयो लोमहस्तकेन श्रीजिनाङ्गान्निर्माल्यमपनयेत् । निर्माल्यं च –''[2]**भोगविणट्ठं दव्वं, निम्मल्लं बिंति गीअत्थ**'' [ **चेइअवंदणमहाभास गा. ८९** ] त्ति **बृहद्भाष्य**वचनात् । ''**यज्जिनबिम्बारोपितं सद्विच्छायीभूतं विगन्धं जातम् , दृश्यमानं च निःश्रीकं न भव्यजनमनःप्रमोदहेतुस्तन्निर्माल्यं ब्रुवन्ति बहुश्रुताः**'' [[3] **तुला सङ्घाचारवृत्तिः प० ५३** ] इति **सङ्घाचारवृत्त्यु**क्तेश्च भोगविनष्टमेव ।

न तु **विचारसारप्रकरणो**क्तप्रकारेण ढौकिताक्षतादेर्निर्माल्यत्वमुचितम् , शास्त्रान्तरे तथाऽदृश्यमानत्वाद् , अक्षोदक्षमत्वाच्च, तत्त्वं पुनः केवलिगम्यम् । वर्षादौ च निर्माल्यं[4] विशेषतः कुन्थ्वादिसंसक्तेः पृथग् पृथग् जनानाक्रम्यशुचिस्थाने त्यज्यते, एवमाशातनापि न स्यात् , स्नात्रजलमपि तथैव ।

---

१. °नाङ्घ्रिणा–मु० ॥ २. तुला–श्राद्धविधिवृत्तिः प० ५३ ॥ ३. **प्रद्युम्नसूरि**कृते **विचारसारप्रकरणे** त्वेवमुक्तम् –''चेइअ दव्वं दुविहं पूआ निम्मल्लभेअओ इत्थ । आयाणाई दव्वं पूआरित्थं मुणेयव्वं । अक्खयफलबलिवत्थाइ संतिअं जं पुणो दविणजायं । तं निम्मलं वुच्चइ जिणगिहकम्मंमि उवओगो'' इति श्राद्धदिनकृत्ये । इति श्राद्धविधिवृत्तौ ॥ ४. ल्ये–L.C. मूल ॥

ततः सम्यग् श्रीजिनप्रतिमाः प्रमार्ज्य उच्चैःस्थाने भोजनादावव्यापार्यपवित्रपात्रे संस्थाप्य च करयुगधृतशुचिकलशादिनाऽभिषिञ्चेत् । जलं च पूर्वं घुसृणाद्युन्मिश्रं कार्यम् । यतो **दिनकृत्ये** —

''**घुसिणकप्पूरमीसं तु , काउं गंधोदगं वरं ।**
**तओ [1]भुवणनाहस्स, ण्हवेई भत्तिसंजुओ** ॥१॥ [ श्रा.दि./गा.५९ ]

[2]घुसृणं —कुङ्कुमम् , कर्पूरो-घनसारस्ताभ्यां मिश्रम् , तुशब्दात् सर्वौषधिचन्दनादि-परिग्रहः इति तद्वृत्तिः । स्नपनकाले च —

''**बालत्तणंमि सामिय !, सुमेरुसिहरंमि कणयकलसेहिं ।**
**तिअसासुरेहि ण्हविओ, ते धन्ना जेहि दिट्ठोऽसि**'' ॥ [ ] इत्यादि चिन्त्यम् ।

पूजाक्षणे च मुख्यवृत्त्या मौनमेव कार्यं, तदशक्तौ सावद्यं वचस्त्याज्यमेव । अन्यथा नैषेधिकीकरणनैरर्थक्यापत्तिः, कण्डूयनाद्यपि हेयमेव । यतः —

''**कायकण्डूअणं वज्जे, तहा खेलविगिंचणं ।**
**थुइथुत्तभणणं [3]च( चेव ), पूअंतो जगबंधुणो**'' ॥१॥ [ श्रा.दि./गा.५८ ]

ततः सुयत्नेन वालककूर्चिकां व्यापार्य्यैकेनाङ्गरूक्षणेन सर्वतो निर्जलीकृत्य द्वितीयेन च धूपितमृदूज्ज्वलेन ते मुहुः मुहुः सर्वतः स्पृशेत् , एवमङ्गरूक्षणद्वयेन सर्वप्रतिमा निर्जलीकार्याः । [4]यत्र यत्र स्वल्पोऽपि जलक्लेदः तिष्ठति तत्र तत्र श्यामिका स्यादिति सा सर्वथा व्यपास्यते । न च पञ्चतीर्थीचतुर्विंशतिपट्टकादौ मिथः स्नात्रजलस्पर्शादिना दोष आशङ्क्यो । यदाहुः —

''**रायप्पसेणइज्जे, सोहम्मे सूरिआभदेवस्स ।**
**जीवाभिगमे विजयापुरीइ विजयाइदेवाणं** ॥१॥ [ ]
**भिंगाइलोमहत्थयलूहणया धूवदहणमाईअं ।**
**पडिमाणं सकहाण य, पूआए इक्कयं भणिअं** ॥२॥ [ सं.प्र.दे./१७५ ]
**निव्वुअजिणिंदसकहा, सग्गसमुग्गेसु तिसु वि लोएसु ।**
**अन्नोन्नं संलग्गा, ण्हवणजलाईहिं संपुट्ठा** ॥३॥ [ सं.प्र.दे./१७६ ]
**पुव्वधरकालविहिआ, पडिमा दीसंति केसु वि पुरेसुं ।**
**वत्तक्खा १ खेत्तक्खा २ महक्खया ३ गंथदिट्ठा य**'' ॥४॥ [ सं.प्र.दे./१७७ ]

---

१. भुवणनाहे उ-इति श्राद्धदिनकृत्ये ॥ २. घुसृणं चन्दनं कर्पूरं घनसार....इति श्राद्धदिन-कृत्यवृत्तौ पाठः ॥ ३. च पूअंतो-L.P.C. । चेव पूयंतो-इति सङ्घाचारभाष्ये प० ६२ ॥ ४. यत्र स्वल्पोऽपि-L.P.C. । तुला-श्राद्धविधिवृत्तिः प० ५५ ॥

गंथदिट्ठ त्ति –ग्रन्थे –**प्रतिष्ठाषोडशकादौ** दृष्टा । तदुक्तं –

''**व्यक्त्याख्या खल्वेका, क्षेत्राख्या चापरा महाख्या च ।**
**यस्तीर्थकृद्यदा किल, तस्य तदाद्येति समयविदः** ॥१॥ [ षोड./८/२ ]
**ऋषभाद्यानां तु तथा, सर्वेषामेव मध्यमा ज्ञेया ।**
**सप्तत्यधिकशतस्य तु , चरमेह महाप्रतिष्ठेति**'' ॥२॥ [ षोड./८/३ ]

इत्थं च एकस्यार्हतः प्रतिमा व्यक्त्याख्या १, एकत्र पट्टादौ चतुर्विंशतिः प्रतिमाः क्षेत्राख्या २, एवं सप्ततिशतप्रतिमा महाख्या ३।

''**मालाधराइआण वि, धुवणजलाई[१] फुसेइ जिणबिंबं ।**
**पुत्थयपत्ताईण वि, उवरुवरिं फरिसणाईअं** ॥५॥ [ सं.प्र.दे./१७८ ]
**ता नज्जई नो दोसो, करणे चउवीसवट्टयाईणं ।**
**आयरणाजुत्तीओ, गंथेसु अ दिस्समाणत्ता**'' ॥६॥ [ सं.प्र.दे./१७९ ]

**बृहद्भाष्ये**ऽप्युक्तम् –

''**जिणरिद्धिदंसणत्थं, एगं कारेइ कोइ भत्तिजुओ ।**
**पायडिअपाडिहेरं, देवागमसोहिअं चेव** ॥१॥ [ चे.वं.म./२७ ]
**दंसणनाणचरित्ताऽऽराहणकज्जे जिणत्तिअं[२] कोई ।**
**परमिट्ठिनमोक्कारं, उज्जमिउं कोइ पंच जिणा** ॥२॥ [ चे.वं.म./२८ ]
**कल्लाणयतवमहवा, उज्जमिउं भरहवासभावि त्ति ।**
**बहुमाणविसेसाओ, केई कारिंति[३] चउवीसं** ॥३॥ [ चे.वं.म./२९ ]
**उक्कोस सत्तरिसयं, नरलोए विहरइ त्ति भत्तीए ।**
**सत्तरिसयं पि कोई, बिंबाणं कारइ धणड्ढो**'' ॥४॥ [ चे.वं.म./३० ]

तस्मात् त्रितीर्थीपञ्चतीर्थीचतुर्विंशतिपट्टादिकारणं न्याय्यमेव दृश्यते । तथा सति तत्प्रक्षालनाद्यपि निर्दोषमेव । अङ्गरूक्षणं हस्तादि च पृथक्भाजनस्थशुद्धजलेन क्षाल्यम् , नतु प्रतिमाक्षालनजलेन, चन्दनादिवदिति जिनस्नपनविधिः ।

अथ पूजाविधिः –पूजा चाङ्गाग्रभावभेदात् त्रिधा–तत्र स्नपनमङ्गपूजैव, ततः ''**अंह्रि[४] २ जानु ४ करां ६ ऽसेषु ८ मूर्ध्नि ९ पूजां यथाक्रमम्**'' [ ] इत्युक्तेर्वक्ष्यमाणत्वात् सृष्ट्या नवाङ्गेषु कर्पूरकुङ्कुमादिमिश्रगोशीर्षचन्दनादिनाऽर्चयेत् । **केऽप्याहुः** –पूर्वं भाले तिलकं

१. धु(ण्ह)वण° मु० । L.P.C. श्राद्धविधिवृत्तौ च धुवण० इति ॥ २. जिणे–इति चेइय-वंदणमहाभास–श्राद्धविधिवृत्त्योश्च ॥ ३. कारंति–इति श्राद्धविधिवृत्तौ ॥ ४. L.P.C. अङ्घ्रि–मु० ॥

कृत्वा नवाङ्गपूजा कार्या । **श्रीजिनप्रभसूरि**कृत**पूजाविधौ तु** ''**सरससुरहिचंदणेणं देवस्स दाहिणजाणदाहिणखंधनिडालवामखंधवामजाणुलक्खणेसु पंचसु हिअएहिं सह छसु वा अंगेसु पूअं काऊण पच्चग्गकुसुमेहिं गंधवासेहिं च पूइए**'' [ ] इत्युक्तम् , ततः सद्वर्णैः सुगन्धिभिः सरसैरभूपतितैर्विकाशिभिरशटितदलैः प्रत्यग्रैश्च प्रकीर्णैर्नानाप्रकारग्रथितैर्वा पूष्पैः पूज्यते , पुष्णाणि च यथोक्तान्येव ग्राह्याणि । यतः —

''**न शुष्कैः पूजयेद् देवं, कुसुमैर्न महीगतैः ।**
**न विशीर्णदलैः स्पृष्टैर्नाशुभैर्नाविकाशिभिः** ॥१॥ [ ]
**कीटकोशापविद्धानि, शीर्णपर्युषितानि च ।**
**वर्जयेदूर्णनाभेन, वासितं यदशोभितम्** ॥२॥ [ ]
**पूतिगन्धीन्यगन्धीनि, अम्लगन्धानि वर्ज्जयेत् ।**
**मलमूत्रादिनिर्माणादुच्छिष्टानि कृतानि च**'' ॥३॥ [ ]

सति च सामर्थ्ये रत्नसुवर्णमुक्ताभरणरौप्यसौवर्णपुष्पादिभिश्चन्द्रोदयादिविचित्र-दुकूलादिवस्त्रैश्चाप्यलङ्कुर्याद् , एवं चान्येषामपि भाववृद्ध्यादिः स्यात् । यतः —

''**पवरेहिं साहणेहिं, पायं भावो वि जायए पवरो ।**
**न य अन्नो उवओगो, एएसि सयाण लट्ठयरो**'' ॥१॥ [ सं.प्र.दे.१६७,पञ्चा.४।१६ ] त्ति ।

**श्राद्धविधिवृत्तौ** तु —''**ग्रन्थिम १ वेष्टिम[1] २ पूरिम ३ सङ्घातिम ४रूपचतुर्विध-प्रधानाम्लानविध्यानीतशतपत्रसहस्त्रपत्रजातीकेतकचम्पकादिविशिष्टपुष्पैर्माला[2] १ मुकुट २ शिरस्क ३ पुष्पगृहादि विरचयेत्** [ प० ५४ ] इतिविशेषः ।

चन्दनपुष्पादिपूजा च तथा कार्या यथा जिनस्य चक्षुर्मुखाच्छादनादि न स्यात् । सश्रीकतातिरेकश्च स्यात् । तथैव द्रष्टॄणां प्रमोदवृद्ध्यादिसंभवात् । अन्योऽप्यङ्गपूजाप्रकारः कुसुमाञ्जलिमोचन-पञ्चामृतप्रक्षालन-शुद्धोदकधाराप्रदान-कुङ्कुमकर्पूरादिमिश्रचन्दन-विलेपनाङ्गीविधान-गौरोचनमृगमदादिमयतिलकपत्रभङ्ग्यादिकरणप्रमुखो **भक्तिचैत्य-प्रतिमापूजाधिकारे** वक्ष्यमाणो यथास्वं ज्ञेयः । तथा जिनस्य हस्ते सौवर्णबीजपूरनालिकेर-पूगीफलनागवल्लीदलनाणकमुद्रिकादिमोचनं कृष्णागुर्वादिधूपोत्क्षेपगन्धवासप्रक्षेपाद्यपि सर्वमङ्गपूजायामन्तर्भवति । तथोक्तं **बृहद्भाष्ये** —

''**ण्हवणविलेवणआहारणवत्थफलगंधधूवपुप्फेहिं ।**
**कीरइ जिणंगपूआ, तत्थ विही एस नायव्वो**'' ॥१॥ [ ] त्ति ।

---

१. वेष्टन-मु० । L.P.C. श्राद्धविधिवृत्तावपि वेष्टिम इति ॥ २. °विशेषपुष्पै० इति श्राद्ध-विधिवृत्तौ ॥

तत्र धूपो जिनस्य वामपार्श्वे कार्य इत्यङ्गपूजा १ ॥ ततो घृतपूर्णप्रदीपैः शाल्यादि-तन्दुलाक्षतैर्बीजपूरादिनानाफलैः सर्वनैवेद्यैर्निर्मलोदकभृतशङ्खादिपात्रैश्च पूजयेत्। तत्र प्रदीपो जिनस्य दक्षिणपार्श्वे स्थाप्यः, अक्षतैश्चाखण्डै रौप्यसौवर्णैः शालेयैर्वा जिनपुरतो दर्पण १ भद्रासन २ वर्द्धमान ३ श्रीवत्स ४ मत्स्ययुग्म ५ स्वस्तिक ६ कुम्भ ७ नन्दावर्त्त ८ रूपाष्टमङ्गलानालेखयेत् । अन्यथा वा ज्ञानदर्शन-चारित्राराधननिमि[1]त्तं सृष्ट्या पुञ्जत्रयेण पट्टादौ विशिष्टाक्षतान् पूगादिफलं च ढौकयेत्, नवीनफलागमे तु पूर्वं जिनस्य पुरतः सर्वथा ढौक्यम्। नैवेद्यमपि सति सामर्थ्ये कूराद्यशन १ शर्करागुडादिपान २ फलादिखाद्य ३ ताम्बूलादिस्वाद्यान् ४ ढौकयेत्। नैवेद्यपूजा च प्रत्यहमपि सुकरा महाफला च धान्यस्य च विशिष्य, **आगमे**ऽपि राद्धधान्यस्यैव प्रतिपादनात् । यत [2]**आवश्यकनिर्युक्तौ समवसरणाधिकारे** –"**कीरइ बली**"[ ] त्ति। **निशीथे**ऽपि –"**तओ पभावईदेवीए सव्वं बलिमाइ काउं भणिअं 'देवाहिदेवो वद्धमाणसामी तस्स पडिमा कीरउ' त्ति वाहिओ कुहाडो, दुहा जायं, पिच्छइ सव्वालंकारविभूसिअं भगवओ पडिमं**"[ ] **निशीथपीठे**ऽपि "**बलि त्ति असिवोवसमनिमित्तं कूरो किज्जइ**" [ ] **महानिशीथे**ऽपि **तृतीयाध्ययने** "**अरिहंताणं भगवंताणं गंधमल्लपईवसंमज्जणोवलेवण[3]विचित्तबलिवत्थधूवाईएहिं पूआसक्कारेहिं पइदिणमब्भच्चणं पकुव्वाणा तित्थुप्पणं[4]( ण्णइं ) करामो**" [ ] त्ति।

ततो गोशीर्ष[5]चन्दनरसेन पञ्चाङ्गुलितलैर्मण्डलालेखनादि पुष्पप्रकारारात्रिकादि गीतनृत्यादि च कुर्यात्, सर्वमप्येतदग्रपूजैव। यद् **भाष्यम्** –

"**गंधव्वनट्टवाइअलवणजलारत्तिआइ दीवाई ।**
**जं किच्चं तं सव्वं पि, ओअरई अग्गपूआए**" ॥१॥ [ **चे.वं.म.गा.२०५** ] इत्यग्रपूजा २॥

भावपूजा तु जिनपूजाव्यापारनिषेधरूपतृतीयनैषेधिकीकरणपूर्वं जिनाद् दक्षिणदिशि पुमान् स्त्री तु वामदिशि आशातनापरिहारार्थं जघन्यतोऽपि संभवे नवहस्तमानादसंभवे तु हस्तार्द्धमानाद् उत्कृष्टतस्तु षष्टिहस्तमानादवग्रहाद् बहिः स्थित्वा चैत्यवन्दनां विशिष्ट-स्तुत्यादिभिः कुर्यात् । आह च –

"**तइआ उ भावपूजा, ठाउं चिइवंदणोचिए देसे ।**
**जहसत्ति चित्तथुइथुत्तमाइणा देववंदणयं**" ॥१॥ [ ]

---

१. °त्तं ग्रं० ४०००-L.P. ॥ २. तुला-सङ्घाचारभाष्यवृत्तिः प० ६४, श्राद्धविधिवृत्तिः प० ५६ ॥ ३. °वित्थिण्णबलि° मु० । विथित्तबलि° P. । °विच्छित्तवलि° C. । °विचित्तबलि° इति श्राद्धविधिवृत्तौ ॥ ४. तित्थुप्पणं(ण्णइं)करामो त्ति-मु० । तित्थुत्थपणं करामो त्ति-L.P.C. : तित्थुच्छप्पणं करामो त्ति-इति श्राद्धविधिवृत्तौ ॥ ५. L.P. । °चन्दने° मु० ॥

**निशीथे**ऽपि —"**सो उ गंधारसावओ थयथुईहिं[1] थुणंतो तत्थ गिरिगुहाए अहोरत्तं निवसिओ**" [ ] तथा **वसुदेवहिण्डौ** —"**वसुदेवो पच्चूसे कयसमत्तसावयसामाइआइ-निअमो गहिअपच्चक्खाणो कयकाउसग्गथुइवंदणो**"[ ] त्ति। एवमनेकत्र श्रावकादिभिरपि कायोत्सर्गस्तुत्यादिभिश्चैत्यवन्दना कृतेत्युक्तम्। सा च जघन्यादिभेदात् त्रिधा। यद्[2] **भाष्यम्** —

"**नमुक्कारेण[3] जहन्ना, चिइवंदण मज्झ दंडथुइजुअला ।**
**पणदंडथुइचउक्कगथयपणिहाणेहिं उक्कोसा**" ॥१॥ [ **चै.मू.भा./गा.२३** ]

व्याख्या —नमस्कारेण[4] —अञ्जलिबन्धशिरोनमनादिलक्षणप्रणाममात्रेण, यद्वा नमो अरिहंताणमित्यादिना, अथवैकश्लोकादिरूपनमस्कारपाठपूर्वकनमस्क्रियालक्षणेन करणभूतेन, जातिनिर्देशाद् बहुभिरपि नमस्कारैः क्रियमाणा जघन्या स्वल्पा, पाठक्रिययोरल्पत्वात्, वन्दना भवतीति गम्यम्। तत्र प्रणामश्च पञ्चधा —

"**एकाङ्गः शिरसो नामे, स्याद् द्व्यङ्गः करयोर्द्वयोः ।**
**त्रयाणां नामने त्र्यङ्गः, करयोः शिरसस्तथा ॥१॥** [ ]
**चतुर्णां करयोर्जान्वोर्नमने चतुरङ्गकः ।**
**शिरसः करयोर्जान्वोः, पञ्चाङ्गः पञ्चनामने**" ॥२॥ [ ] इति १॥

तथा दण्डकश्च —अरिहंतचेइयाणमित्यादिश्चैत्यस्तवरूपः, स्तुतिः प्रतीता, या तदन्ते दीयते, तयोर्युगलं —युग्ममेते एव वा युगलं मध्यमा । एतच्च व्याख्यानमिमां **कल्पगाथा**मुपजीव्य कुर्वन्ति । तद्यथा —

"**निस्सकडमनिस्सकडे, वा[5] वि चेइए सव्वहिँ थुई तिण्णि**
**वेलं व चेइआणि व, नाउं एक्किक्किया वा वि**" ॥१॥[ **बृ.क.भा./१८०४** ]

यतो दण्डकावसाने एका स्तुतिर्दीयते इति दण्डकस्तुतियुगलं भवति २ ॥ तथा पञ्चदण्डकैः —शक्रस्तव १ चैत्यस्तव २ नामस्तव ३ श्रुतस्तव ४ सिद्धस्तवाख्यैः ५ स्तुतिचतुष्टयेन स्तवनेन जय वीयरायेत्यादिप्रणिधानेन चोत्कृष्टा । इदं च व्याख्यानमेके —

"**तिण्णि वा कड्ढई जाव, थुईओ तिसिलोइआ ।**
**ताव तत्थ अणुण्णायं, कारणेण परेण वा[6] ( वि )**" ॥१॥[ **व्य.भा./३७७५** ]

इत्येतां **कल्पगाथां** "**पणिहाणं मुत्तसुत्तीए**" [ **चै.मू.भा./गा.१८** ] इति च[7] वचनमाश्रित्य कुर्वन्ति ३ ॥ **वन्दनकचूर्णा**वप्युक्तम् —

---

१. L.P.। °हि–मु० ॥ २. यतो भाष्यम्–मु० ॥ ३. नवकारेण० मु० ॥ ४. तुला–सङ्घाचारभाष्यवृत्तिः प० १७६ ॥ ५. वि–L.P.C. ॥ ६. वा–L.P.C. । उ–इति प्रवचनसारोद्धारे गा० ४३९ ॥ ७. च–मु० नास्ति ॥

**"तं च चेइअवंदणं जहन्नमज्झिमुक्कोसभेअओ[1] तिविहं"** [वन्द.चू.]। **जओ[2] भणिअं –**

> **नवकारेण जहन्ना, दंडगथुइजुअलमज्झिमा णेया ।**
> **संपुण्णा[3] उक्कोसा, विहिणा खलु वंदणा तिविहा" ॥१॥** [ ]

**तत्थ नवकारेण एगसिलोगोच्चारणओ पणामकरणेण जहण्णा, तहा अरिहंतचेइआण-मिच्चाइदंडगं भणित्ता काउस्सग्गं पारित्ता थुई दिज्जइ त्ति दंडगस्स थुइए अ जुअलेणं-दुगेणं मज्झिमा । भणिअं च कप्पे –**

> **"निस्सकडमनिस्सकडे, वावि चेइए सव्वहिँ थुई तिण्णि ।**
> **वेलं च चेइआणि व, नाउं एक्केक्किआ वा वि" ॥१॥** [बृ.क.भा./१८०४]

**"तहा सक्कत्थयाइदंडगपंचगथुइचउक्कपणिहाणकरणतो संपुण्णा एसा उक्कोस त्ति"** ।

> **"अन्ने बिंति इगेणं, सक्कथएणं जहन्नवंदणया ।**
> **तद्दुगतिगेण मज्झा, उक्कोसा चउहिँ पंचहिँ वा" ॥१॥** [चै.वं.भा.गा.२४]

अथवा प्रकारान्तरेण वन्दनात्रैविध्यम् । यथा **पञ्चाशके –**

> **"अहवा वि भावभेआ, ओघेणं अपुणबंधगाईणं ।**
> **सव्वा वि तिहा णेआ, सेसाणमिमा ण जं समए" ॥१॥** [पञ्चा.३।३]

व्याख्या –अथवापीति निपातः पूर्वोक्तप्रकारापेक्षया प्रकारान्तरत्वद्योतनार्थः, भावभेदात्[4]-परिणामविशेषात्, गुणस्थानकविशेषसम्भवात्, प्रमोदमात्ररूपाद्वा, वन्दनाधिकारे[5] जीवगता त्रिधा ज्ञेयेति संबन्धः । ओघेनसामान्येनाविवक्षितपाठक्रियाल्पत्वादितयेत्यर्थः । केषाम् ? इत्याह –'अपुनर्बन्धकादीनां' वन्दनाधिकारिणां, तत्रापुनर्बन्धकः –सम्यक्त्वप्राप्तिप्रक्रमे व्याख्यातपूर्वः, आदिशब्दादविरतसम्यग्दृष्टिदेशसर्वविरतग्रहः, सर्वाऽपिनमस्कारादिभेदेन जघन्यादिप्रकारापि, आस्तामेका काचिदिति । तत्रापुनर्बन्धकस्य जघन्या तत्परिणामस्य विशुद्ध्यपेक्षया जघन्यत्वाद्, अविरतसम्यग्दृष्टेर्मध्यमा, तत्परिणामस्य विशुद्धिमङ्गीकृत्य मध्यमत्वात्, सामान्यविरतस्योत्कृष्टा तत्परिणामस्य तथाविधत्वादेवेति । अथवा अपुनर्बन्ध-कस्यापि त्रिधा प्रमोदरूपभावत्रैविध्यादेवमितरयोरपीति । अथापुनर्बन्धकादीनामिति कस्मादुक्तम् ? मार्गाभिमुखादेरपि भावभेदसद्भावाद्, इत्याह –'शेषाणाम्' अपुनर्बन्धकादि व्यतिरिक्तानां सकृद्बन्धकमार्गाभिमुखमार्गपतिततदितरमिथ्यादृशां 'इम' त्ति इयमधिकृतभावभेदेन भेदवती[6]

---

१. °स भेयतो–P. ॥ २. जतो–P. ॥ ३. संपुन्ना–C. । संपन्ना–L.P. ॥ ४. °रिजीव° C. ॥ ५. जीवगतात् त्रिधा–इति पञ्चाशकवृत्तौ ॥ ६. भेदवती तु स्यादपि–L.P.C. । भेदवती वन्दना । पाठादिभेदवती तु स्यादपि–इति पञ्चाशकवृत्तौ पाठः ॥

(अन्या) तु स्यादपि, न नैव, यद् —यस्मात् , समये —सिद्धान्ते, भणितेतिशेषः, तेषां तद्योग्यताविकलत्वादिति गाथार्थः'' **[ पञ्चाशकटीका प० ५४ ]**

इत्थं च भाववन्दनायाः शुद्धद्रव्यवन्दनायाश्चाधिकारिणोऽपि एते त्रय एव, सकृद्बन्धकादीनां तु अशुद्धद्रव्यवन्दनैव । यतस्तत्रैव —

**''एतेऽहिगारिणो इह, ण उ सेसा दव्वओ वि जं एसा ।**
**इअरीएँ जोग्गयाए, सेसाण उ अप्पहाण[1] त्ति''** ॥१॥ **[ पञ्चा.३।७ ]** कण्ठ्या ॥

नवरं 'इयरीएँ'त्ति इतरस्या भाववन्दनाया योग्यत्वेन या प्रधाना द्रव्यवन्दना साऽधिकारिणाम् , शेषाणां सकृद्बन्धकादीनां तु भाववन्दनाया अकारणत्वादप्रधानेतिभावः । *[2]एवं च जघन्याद्येकैकस्या अपि चैत्यवन्दनाया अधिकारित्रयसंभवान्नवधा चैत्यवन्दनेति ज्ञेयम्* ।

इह च **केचिन्**मन्यन्ते —शक्रस्तवमात्रमेव वन्दनं श्रावकस्य युक्तम् , **जीवाभिगमा**दिषु तन्मात्रस्यैव तस्य देवादिभिः कृतत्वेन प्रतिपादितत्वात् , ततस्तदाचरितप्रामाण्यात् तदधिकतरस्य च गणधरादिकृतसूत्रेऽनभिधानान्न शक्रस्तवातिरिक्तं तदस्तीति । अत्रोच्यते —यदुक्तमाचरितप्रामाण्यादिति तदयुक्तम् , यतो यदिदं **जीवाभिगमा**दिसूत्रं तद्विजयदेवादिचरितानुवादपरमेवेति न ततो विधिवादरूपाधिकृतवन्दनोच्छेदः कर्तुं शक्यः, तेषां ह्यविरतत्वात् प्रमत्तत्वाच्च तावदेव तत् युक्तम् , तदन्येषां पुनरप्रमादविशेषवतां विशेषभक्तिमतां तदधिकत्वेऽपि न दोषः । यदि पुनराचरितमवलम्ब्य प्रवृत्तिः कार्या तदा बह्वन्यदपि कर्त्तव्यं स्याद् , विधेयतयाऽङ्गीकृतमपि वर्ज्जनीयं स्यादिति । यच्चोक्तम् **''तदधिकतरस्यानभिधानादि''** [ ] इति तदयुक्तम् , **''तिण्णि वा कड्ढई जाव, थुईओ तिसिलोइआ'' [ गा० ३७७५ ]** इत्यादि**व्यवहारभाष्य**वचनश्रवणात् , साध्वपेक्षया तदिति चेत् , मैवम् , साधुश्रावकयोर्दर्शनशुद्धेः कर्त्तव्यत्वाद् , दर्शनशुद्धिनिमित्तत्वाच्च वन्दनस्य । तथा संवेगादिकारणत्वादशठसमाचरितत्वाज्जीतलक्षणस्येहोपपद्यमानत्वात् **चैत्यवन्दनभाष्य**कारादिभिरेतत्करणस्य समर्थितत्वाच्च तदधिकतरमपि नायुक्तमित्यलं प्रसङ्गेन ।

[3]चैत्यवन्दनाश्च प्रत्यहं सप्त **महानिशीथे** साधोः प्रोक्ताः, श्राद्धस्याप्युत्कर्षतः सप्त । यद् **भाष्यम्** —

**''पडिकमणे १ चेइअ २ जिमण ३ चरिम ४ पडिक्कमण ५ सुअण ६ पडिबोहे ७ ।**
**चिइवंदण इअ जइणो, सत्त उ वेला अहोरत्ते ॥१॥ [ चै.भू.भा./गा.५९ ]**

---

१. L.P.C. । °णं ति–मु० ॥ २. ** चिह्नद्वयमध्यवर्तिपाठः मु० मध्ये [ ] कोष्ठके C. प्रतौ पार्श्वभागे ॥ ३. तुला–श्राद्धविधिवृत्तिः प० ५७ ॥

**''पडिकमिणो(मओ) गिहिणो वि हु, सगवेला पंचवेल इअरस्स ।**
**पूआसु तिसंझासु अ, होइ तिवेला जहन्नेणं'' ॥२॥** [चै.मू.भा./गा.६०]

तत्र द्वे आवश्यकयोः २ द्वे स्वापावबोधयोः ४ त्रिकालपूजानन्तरं तिस्रश्चेति सप्त ७, एकावश्यकरणे तु षट्, स्वापादिसमये तदकरणे पञ्चादयोऽपि, बहुदेवगृहादौ तु समधिका अपि, यदा पूजा न स्यात् तदापि त्रिसन्ध्यं देवा वन्द्याः श्राद्धेन । यद् **आगमः** –

**''भो भो देवाणुप्पिआ ? अज्जप्पभिइए जावजीवाए तिकालिअं अव्वक्खित्ता-चलेगग्गचित्तेणं चेइए वंदिअव्वे, इणमेव भो मणुअत्ताओ असुइअसासयखणभंगुराओ सारं ति, तत्थ पुव्वण्हेसु ताव उदगपाणं न कायव्वं जाव चेइए साहू अ न वंदिए, तह मज्झण्हे ताव असणकिरिअं न कायव्वं जाव चेइए न वंदिए, तहा अवरण्हे चेव तहा कायव्वं जाव अवंदिएहिं चेइएहिं नो सिज्जायलमइक्कमिज्ज''** [ ] त्ति ।

तथा **''सुपभाए समणोवासगस्स पाणं पि कप्पइ न पाउं ।**
**नो जाव चेइआइं, साहू वि अ वंदिआ विहिणा ॥१॥** [ ]
**मज्झण्हे पुणरवि वंदिऊण निअमेण कप्पई भोत्तुं ।**
**पुण वंदिऊण ताइं, पओससमयंमि तो सुअइ'' ॥२॥** [ ] त्ति ।

उत्कृष्टतश्चैत्यवन्दनविधिश्च सविस्तरमग्रे वक्ष्यते ।

गीतनृत्याद्यग्रपूजायामुक्तं भावपूजायामप्यवतरति, तच्च महाफलत्वान्मुख्यवृत्त्या स्वयं करोत्**युदायन**नृपराज्ञी **प्रभावती** यथा । य**न्निशीथचूर्णिः** –

**''पभावई ण्हाया कयबलिकम्मा कयकोउअमंगल्ला सुक्किल्लवासपरिहिआ जाव अट्ठमीचउद्दसीसु अ भत्तिरागेण य सयमेव राओ नट्टोवयारं करेइ, राया वि तयाणु-वित्तीए मुरयं वाएति''** [नि.चू.]

पूजाकरणावसरे चार्हच्छद्मस्थकेवलिस्थसिद्धस्थावस्थात्रयं भावयेत् । यद् **भाष्यम्** –

**''ण्हवणच्चगेहिं छउमत्थ १ वत्थपडिहारगेहिँ केवलिअं २ ।**
**पलिअंकुस्सग्गेहि अ, जिणस्स भाविज्ज सिद्धत्तं'' ॥१॥** [चै.मू.भा./गा.१२]

स्नापकैः परिकरोपरिघटितगजारूढकरकलितकलशैरमरैरर्चकैश्च तत्रैव घटितमालाधारैः कृत्वा जिनस्य छद्मस्थावस्थां भावयेत् । छद्मस्थावस्था त्रिधा –जन्मावस्था १, राज्यावस्था

१. पडिकमिणो–L.P.C. । पडिकमओ–इति श्राद्धविधिवृत्तौ चैत्यवन्दनभाष्ये च ॥ २. सप्तधिका–इति श्राद्धविधिवृत्तौ ॥ ३. जावज्जीवं–इति श्राद्धविधिवृत्तौ ॥ ४. ण्हाया–मु० C. नास्ति । L.P. श्राद्धविधिवृत्तावपि अस्ति ॥

२, श्रामण्यावस्था ३ च। तत्र स्नपनकारैर्जन्मावस्था १, मालाधारै राज्यावस्था २, श्रामण्यावस्था भगवतोऽपगतकेशशीर्षमुखदर्शनात् [1]सुज्ञातैव ३। प्रातिहार्येषु परिकरोपरितनकलशोभयपार्श्व-घटितैः पत्रैः कङ्केल्लिः १, मालाधारैः पुष्पवृष्टिः २, वीणावंशकरैः प्रतिमोभयपार्श्ववर्त्तिभिर्दिव्यो ध्वनिः ३, शेषाणि स्फुटान्येव इति भावपूजा ३।

अन्यरीत्याऽपि पूजात्रयं **बृहद्भाष्याद्यु**क्तम् यथा —

''**पंचोवयारजुत्ता, पूआ अट्ठोवयारकलिआ य ।**
**[2]रिद्धिविसेसेणं पुण, नेआ सव्वोवयारा वि ॥१॥**
**[3]तत्थ य पंचुवयारा, कुसुम १ ऽक्खय २ गंध ३ धूव ४ दीवेहिं ५ ॥२॥**
**कुसुम १ क्खय २ गंध ३ पईव ४ धूव ५ नेवेज्ज ६ फल ७ जलेहिं ८ पुणो ।**
**अट्ठविहकम्मदलणी, अट्ठुवयारा हवइ पूआ ॥३॥**
**सव्वोवयारपूआ, ण्हवणच्चणवत्थभूसमाईहिं ।**
**फलबलिदीवाईहिं नट्टगीआरत्तिआहिंति**'' ॥४॥ [ चे.वं.म.२०९-२१२ ]

शास्त्रान्तरे चानेकधाऽपि पूजाभेदा उक्ताः सन्ति । तद्यथा —

''**सयमाणयणे पढमा, बीआ आणायणेण अन्नेहिं ।**
**तइआ मणसा संपाडणेण वरपुप्फमाईणं**'' ॥१॥ [ सं.प्र.देवा./१८९ ] इति ।

कायवाङ्मनोयोगितया करणकारणानुमतिभेदतया च पूजात्रिकम् । तथा —

''**पूअं पि पुप्फामिसथुइपडिवत्तिभेअओ चउव्विहं पि जहासत्तीए कुज्जा**'' [ ]

**ललितविस्तरादौ** तु —''**पुष्पामिषस्तोत्रप्रतिपत्तिपूजानां यथोत्तरं प्राधान्यम्**'' [ ] इत्युक्तम्, तत्रामिषमशनादि भोग्यं वस्तु, प्रतिपत्तिः पुनरविकलाप्तोपदेशपरिपालना इत्यागमोक्तं पूजाभेदचतुष्कम् । तथा —

''**दुविहा जिणिंदपूआ, दव्वे भावे अ तत्थ दव्वंमि ।**
**दव्वेहिं जिणपूआ, जिणआणापालणं भावे**'' ॥१॥ [ सं.प्र.दे.१९१ ] इति भेदद्वय्यपि ।

तथा सप्तदशभेदा यथा —

''**ण्हवणविलेवण अंगंमि १, चक्खुजुअलं च वासपूआए २ ।**
**पुप्फारुहणं ३ मालारुहणं ४ तह वन्नयारुहणं ५ ॥१॥** [ ]
**चुण्णारुहणं जिणपुंगवाण ६ आहरणरोहणं चेव ७ ।**
**पुप्फगिह ८ पुप्फपगरो ९ आरत्तीमंगलपईवो १० ॥२॥** [ ]

---

१. P. । °सुज्ञानैव-मु० ॥ २. इड्ढि वि° इति चैत्यवन्दभाष्ये ॥ ३. तहियं पंचु° इति चैत्यवन्द-भाष्ये श्राद्धविधिवृत्तौ च ॥

**दीवो ११ धुवुक्खवो १२ [1]नेवेज्जं १३ सुहफलाण ढोअणयं १४ ।**

**गीअं १५ नट्टं १६ वज्जं १७, पूआभेआ इमे सतर'' ॥३॥ [ ]**

एकविंशतिभेदास्त्वनुपदमेव वक्ष्यमाणा ज्ञेयाः । एते सर्वेऽप्यङ्गादिपूजात्रये सर्वव्यापकेऽन्तर्भवन्ति । अङ्गादिपूजात्रयफलं त्वेवमाहुः —

**''[2]विग्घोवसामगेगा, अब्भुदयसाहणी भवे बीआ ।**

**निव्वुइकरणी तइआ, फलयाउ जहत्थनामेहिं ॥१॥ [ सं.प्र.दे.१९४, चे.म.२१३ ]**

[सात्त्विक्यादिभेदैरपि पूजात्रैविध्यमुक्तम् । यतो **विचारामृतसंग्रहे —**

**''सात्त्विकी राजसी भक्तिस्तामसीति त्रिधाऽथवा ।**

**जन्तोस्तत्तदभिप्रायविशेषादर्हतो भवेत् ॥१॥ [ वि.सं.१/१९७ ]**

**अर्हत्सम्यग्गुणश्रेणिपरिज्ञानैकपूर्वकम् ।**

**अमुञ्चता मनोरङ्गमुपसर्गेऽपि भूयसि ॥२॥ [ वि.सं.१/१९८ ]**

**अर्हत्सम्बन्धिकार्यार्थं, सर्वस्वमपि दित्सुना ।**

**भव्याङ्गिना महोत्साहात् , क्रियते या निरन्तरम् ॥३ ॥ [ वि.सं.१/१९९ ]**

**भक्तिः शक्त्यनुसारेण, निःस्पृहाशयवृत्तिना ।**

**सा सात्त्विकी भवेद् भक्तिर्लोकद्वयफलावहा ॥४॥ [ वि.सं.१/२०० ]**

**[3]यदैहिकफलप्राप्तिहेतवे कृतनिश्चया ।**

**लोकरञ्जनवृत्त्यर्थं, राजसी भक्तिरुच्यते ॥५॥ [ वि.सं.१/२०१ ]**

**द्विषदां यत्प्रतीकारभिदे या कृतमत्सरम् ।**

**दृढाशयं विधीयेत, सा भक्तिस्तामसी [4]भवेत् ॥६॥ [ वि.सं.१/२०२ ]**

**रजस्तमोमयी भक्तिः, सुप्रापा सर्वदेहिनाम् ।**

**दुर्लभा सात्त्विकी भक्तिः, शिवावधिसुखावहा ॥७॥ [ वि.सं.१/२०३ ]**

**उत्तमा सात्त्विकी भक्तिर्मध्यमा राजसी पुनः ।**

**जघन्या तामसी ज्ञेया, नादृता तत्त्ववेदिभिः'' ॥८॥] [ वि.सं.१/२०४ ]**

अत्र च प्रागुक्तमङ्गाग्रपूजाद्वयं चैत्यबिम्बकारणयात्रादिश्च द्रव्यस्तवः । यदाह —

**''जिणभवणबिंबठावणजत्तापूआइ सुत्तओ विहिणा ।**

**दव्वत्थओ त्ति ते उ, भावत्थयकारणत्तेणं ॥१॥ [ सं.प्र.दे./१९५ ]**

---

१. नेवज्जं–L.P.C. ॥ २. नेव्वाणसाहणी तह–इति चैत्यवन्दनभाष्ये ॥ ३. L.P.C. । त्रिभिर्विशेषकम् ॥ यदै° मु० ॥ ४. मता–L. ॥

णिच्चं चिअ संपुण्णा, जइवि हु एसा न तीरए काउं ।
तह वि अणुचिट्ठिअव्वा, अक्खयदीवाइदाणेणं ॥२॥ [ सं.प्र.दे./१९६ ]
एगं पि उदगबिंदू , जह पक्खित्तं महासमुद्दंमी ।
जायइ अक्खयमेवं, पूआ वि हु वीअरागेसु ॥३॥ [ सं.प्र.दे./१९७ ]
एएणं बीएणं, दुक्खाइ अपाविऊण भवगहणे ।
अच्चंतुदारभोए, भोत्तुं सिज्झंति सव्वजिआ ॥४॥ [ सं.प्र.दे./१९८ ]
पूआए मणसंती, मणसंतीए अ उत्तमं झाणं ।
सुहझाणेण य मुक्खो[१], मुक्खे सुक्खं निराबाहं'' ॥ [ सं.प्र.दे./१९९ ] इति ।

पूजादिविधिसंग्राहकं **उमास्वातिवाचक**कृतं प्रकरणं चैवम् –

''स्नानं पूर्वामुखीभूय, प्रतीच्यां दन्तधावनम् ।
उदीच्यां श्वेतवस्त्राणि, पूजा पूर्वोत्तरामुखी ॥१॥ [ पूजा./१ ]
गृहे प्रविशतां वामभागे शल्यविवर्जिते ।
देवतावसरं कुर्यात् सार्द्धहस्तोर्ध्वभूमिके ॥२॥ [ पूजा./२ ]
नीचैर्भूमिस्थितं कुर्याद् देवतावसरं यदि ।
नीचैर्नीचैस्ततो वंशः, सन्तत्यापि सदा भवेत् ॥३॥ [ पूजा./३ ]
पूजकः स्याद्यथा पूर्व, उत्तरस्याश्च संमुखः ।
दक्षिणस्या दिशो वर्जं, विदिग्वर्जनमेव हि ॥४॥ [ पूजा./४ ]
पश्चिमाभिमुखं[२] कुर्यात् , पूजां जैनेन्द्रमूर्त्तये ।
चतुर्थसन्ततिच्छेदो, [३]दक्षिणस्यां न सन्ततिः ॥५॥ [ पूजा./५ ]
आग्नेय्यां तु यदा पूजा, धनहानिर्दिने दिने ।
वायव्यां सन्ततिर्नैव, नैऋत्यां च कुलक्षयः ॥६॥ [ पूजा./६ ]
ऐशान्यां कुर्वतां पूजा, संस्थितिर्नैव जायते ।
[४]अंह्रि २ जानु ४ करां ६ सेषु ८, मूर्ध्नि ९ पूजा यथाक्रमम् ॥७॥ [ पूजा./७ ]
श्रीचन्दनं विना नैव, पूजा कार्या कदाचन ।
भाले कण्ठे हृदम्भोजोदरे तिलककारणम् ॥८॥ [ पूजा./८ ]
नवभिस्तिलकैः पूजा, करणीया निरन्तरम् ।
प्रभाते प्रथमं वासपूजा कार्या विचक्षणैः ॥९॥ [ पूजा./९ ]

---

१. मुक्खं–L.P.C. ॥ २. °खः–मु० । L.P.C. श्राद्धविधिवृत्तौ °खं–इति ॥ ३. दक्षिणस्याम–सन्ततिः– इति श्राद्धविधिवृत्तौ L.P.C. ॥ ४. अङ्घ्रि–मु० ॥

मध्याह्ने कुसुमैः पूजा, सन्ध्यायां धूपदीपकृत् ।
वामांसे धूपदाहः स्यादग्रतूरं[१] तु संमुखम् ॥१०॥ [ पूजा./१० ]
अर्हतो दक्षिणे भागे, दीपस्य विनिवेशनम् ।
ध्यानं तु दक्षिणे भागे, चैत्यानां वन्दनं तथा ॥११॥ [ पूजा./११ ]
हस्तात् प्रस्खलितं क्षितौ निपतितं लग्नं क्वचित्-
पादयोर्यन्मूर्द्धोर्ध्वगतं धृतं कुवसनैर्नाभेरधो यद् धृतम् ।
स्पृष्टं दुष्टजनैर्घनैरभिहतं यद् दूषितं कीटकैस्त्याज्यं
तत् कुसुमं दलं फलमथो भक्तैर्जिनप्रीतये ॥१२॥ [ पूजा./१२ ]
नैकपुष्पं द्विधा कुर्यान्न छिन्द्यात् कलिकामपि ।
चम्पकोत्पलभेदेन, भवेद् दोषो विशेषतः ॥१३॥ [ पूजा./१३ ]
गन्धधूपाक्षतैः स्रग्भिः, प्रदीपैर्बलिवारिभिः ।
प्रधानैश्च फलैः पूजा, विधेया श्रीजिनेशितुः ॥१४॥ [ पूजा./१४ ]
शान्तौ श्वेतं तथा पीतं, लाभे श्यामं पराजये ।
मङ्गलार्थे तथा रक्तं, पञ्चवर्णं च सिद्धये ॥१५॥ [ पूजा./१५ ]
पञ्चामृतं तथा शान्तौ, दीपः स्यात् सघृतैर्गुडैः ।
वह्नौ लवणनिक्षेपः, शान्त्यै तुष्ट्यै प्रशस्यते ॥१६॥ [ पूजा./१६ ]
खण्डिते सन्धिते छिन्ने, रक्ते रौद्रे च वाससि ।
दानं पूजा तपो होमसङ्ख्या( न्ध्या )दि[२] निष्फलं भवेत् ॥१७॥ [ पूजा./१७ ]
पद्मासनसमासीनो, नासाग्रन्यस्तलोचनः ।
मौनी वस्त्रावृतास्योऽथ[३], पूजां कुर्याज्जिनेशितुः ॥१८॥ [ पूजा./१८ ]
स्नात्रं १ विलेपन २ विभूषण ३ पुष्प ४ दाम ५-
धूप ६ प्रदीप ७ फल ८ तन्दुल ९ पत्र १० पूगैः ११ ।
नैवेद्य १२ वारि १३ वसनै १४ श्चमरा १५ तपत्र १६-
वादित्र १७ गीत १८ नटन १९ स्तुति २० कोशवृद्ध्या २१ ॥१९॥ [ पूजा./१९ ]
इत्येकविंशतिविधा जिनराजपूजा, ख्याता सुरासुरगणेन कृता सदैव ।
खण्डीकृता कुमतिभिः कलिकालयोगाद् , यत् यत् प्रियं तदिह भाववशेन योज्यम्''॥
[ पूजा./२० ] इति ।

१. स्यादग्रकूरं तु-मु० । स्यादग्रतूरं-L.P.C. । स्याज्जलपात्रं तु-इति श्राद्धविधिवृत्तौ पाठः । 'स्यादग्रपूजा तु'-इति 'स्यादग्रपूरं तु' इति च श्राद्धविधिवृत्तौ पाठन्तरे ॥ २. होमसङ्ख्यादि-L.P.C. । होमसन्ध्यादि इति श्राद्धविधिवृत्तौ ॥ ३. °यं-L.P.C. श्राद्धविधिवृत्तौ च ॥

एवमन्यदपि जिनबिम्बवैशिष्ट्यकरणचैत्यगृहप्रमार्जनसुधाधवलनजिनचरित्रादि-विचित्रचित्ररचन[1]समग्रविशिष्टपूजोपकरणसामग्रीसमारचनपरिधापनिकाचन्द्रोदयतोरणप्रदानादि सर्वमङ्गादिपूजायामन्तर्भवति, सर्वत्र जिनभक्तेरेव प्राधान्यात्। गृहचैत्योपरि च धौतिकाद्यपि न मोच्यम्, चैत्यवत् तत्रापि चतुरशीत्याशातनाया वर्ज्जनीयत्वाद्। अत एव देवसत्कपुष्प-धूप-दीप-जलपात्र-चन्द्रोदयादिना गृहकार्यं किञ्चिदपि न कार्यमेव, नापि स्वगृहचैत्य-ढौकितचोक्षपूगीफलनैवेद्यादिविक्रयोत्थद्रव्यं व्यापार्यम्, चैत्यान्तरे तु स्फुटं तत्स्वरूपं सर्वेषां पुरतो विज्ञप्यारोप्यम्, अन्यथाऽर्पणे च मुधाजनप्रशंसादिदोषप्रसङ्गः। गृहचैत्यनैवेद्याद्यप्या-रामिकस्य मुख्यवृत्त्या मासदेयस्थाने न देयम्, शक्त्यभावे च आदावेव नैवेद्यार्पणेन मास-देयोक्तौ तु न दोष इति पूजाविधिः।

अथ गृहचैत्यपूजानन्तरं यत् कर्त्तव्यं तदाह –'तत' इति ततो देवपूजानन्तरं 'स्वयम्' आत्मना जिनानामग्रतः-पुरतस्तत्साक्षिकमितियावत् 'प्रत्याख्यानस्य' नमस्कारसहिता-द्याद्धारूपस्य ग्रन्थिसहितादेः सङ्केतरूपस्य च करणम् –उच्चारणं विशेषतो गृहिधर्मो भवतीति पूर्वप्रतिज्ञातेन सम्बन्धः। तथा 'विधिना' इति पदमुभयत्रापि योज्यम्, ततो विधिना जिनगृहे [त्रिविधप्रतिमापेक्षया भक्तिचैत्यरूपे पञ्चविधचैत्यापेक्षया तु निश्राकृतेऽनिश्राकृते वा] गत्वा विधिना जिनस्य –भगवतः, पूजनं-पुष्पादिभिरभ्यर्चनम्, वन्दनं –स्तुतिगुणो-त्कीर्त्तनमित्यर्थः। तच्च जघन्यतो नमस्कारमात्रमुत्कर्षतश्चेर्यापथिकीप्रतिक्रमणपूर्वकशक्र-स्तवादिभिः दण्डकैरिति।

[2]अत्र विधिना जिनगृहे गमनमुक्तम्, तद्विधिश्च –[3]यदि राजा महर्द्धिकस्तदा "**सव्वाए इड्ढीए, सव्वाए जुइए, सव्वबलेणं, सव्वपोरिसेणं**" [ ] इत्यादिवचनात् प्रभावनानिमित्तं महर्द्ध्या देवगृहे याति। अथ सामान्यविभवस्तदौद्धत्यपरिहारेण यथानुरूपाडम्बरं बिभ्रत् मित्र-पुत्रादिपरिवृतो याति, तत्र गतश्च पुष्पताम्बूलादिसचित्तद्रव्याणां परिहारेण १, किरीटवर्ज्ज-शेषाभरणाद्यचित्तद्रव्याणामपरिहारेण २, कृतैकपृथुलवस्त्रोत्तरासङ्गः, एतच्च पुरुषं प्रति द्रष्टव्यम्, स्त्री तु सविशेषप्रावृताङ्गी विनयावनततनुलतेति ३, दृष्टे जिनेन्द्रेऽञ्जलिबन्धं शिरस्यारोपयन् 'नमो जिणाणं' इति भणनप्रणमने ४, [अयमपि **सङ्घाचारवृत्तौ** स्त्रीणां निषिद्धः, तथा च पाठः –"**एकशाटिकोत्तरासङ्गकरणं १ जिनदर्शने शिरसि अञ्जलिबन्धश्चेति २ द्वौ पुरुष-माश्रित्योक्तौ, स्त्री तु [4]सविशेषप्रावृताङ्गी विनयावनततनुलतेति। तथा चागमः –"विण-**

१. सम्यग्वि° L. ॥ २. अत्र विधिना-मु० नास्ति ॥ ३. तुला-योगशास्त्रवृत्तिः ३।१२२, प० ५८१, पञ्चाशकटीका प० ३२, प्रवचनसारोद्धारवृत्तिः प० ३५ ॥ ४. विशेष० इति सङ्घाचारवृत्तौ ॥

**ओणयाए गायलट्ठीए**''[ ]त्ति एतावता शक्रस्तवपाठादावप्यासां[1] शिरस्यञ्जलिन्यासो न युज्यते, तथाकरणे हृदादिदर्शनप्रसक्तेः, यत्तु''**करयलं जाव कट्टु एवं वयासी**''[ ]**इत्युक्तं द्रौपदीप्रस्तावे तद्भक्त्यर्थं न्युञ्छनादिवदञ्जलिमात्रभ्रमणसूचनपरम् , न तु पुरुषैः सर्वसाम्यार्थं, न च तथास्थितस्यैव सूत्रोच्चारख्यापनपरं वा, अन्यदपि[2] नृपादिविज्ञपनादावप्यादौ तथा भणनात्**'' [ **तुला सङ्घाचारवृत्ति प० १५२-३** ] इत्याद्युक्तप्रायं परिभाव्यमत्रागमाद्यविरोधेनेति] मनस-श्चैकाग्र्यं कुर्वन्निति पञ्चविधाभिगमेन नैषेधिकीपूर्वं प्रविशति। यदाह[3] –

''**सच्चित्ताणं दव्वाणं विउसरणयाए १। अचित्ताणं दव्वाणं अविउसरणयाए २। एगल्लसाडएणं उत्तरासंगेणं ३। चक्खुफासे अंजलिपग्गहेणं ४। मणसो एगत्तीकरणेणं ५**'' त्ति [ **भगवतीसूत्र २।५, ज्ञाताधर्मकथा अध्ययन १ सू० २२, प० ४६**A ]

राजादिस्तु चैत्यं प्रविशंस्तत्कालं राजचिह्नानि त्यजति । यतः –

''**अवहट्टु रायककुआइं, पंच वररायककुअरूवाइं ।**
**खग्गं १ छत्तो २ वाणह ३ मउडं ४ तह चामराओ अ**'' ॥१॥

[ **विचारसारे गा० ६६५, श्राद्धदिनकृत्ये गा० ५०** ]

अग्रद्वारप्रवेशे[4] मनोवाक्कायैर्गृहव्यापारो निषिध्यते इति ज्ञापनार्थं नैषेधिकीत्रयं क्रियते, परमेकैवैषा गण्यते, गृहादिव्यापारस्यैकस्यैव निषिद्धत्वात् , कृतायां च नैषेधिक्यां सावद्य-व्यापारवर्ज्जनमेव न्याय्यम् , अन्यथा तद्वैयर्थ्यापत्तेः । यतो **दिनकृत्ये** –

''**मिहो कहाउ सव्वाउ, जो वज्जेइ जिणालए ।**
**तस्स निसीहिआ होइ, इइ केवलिभासिअं**'' ॥१॥ [ **श्राद्ध.गा.५६** ] ति ।

ततो मूलबिम्बस्य प्रणामं कृत्वा सर्वं[5] हि प्रायेणोत्कृष्टं वस्तु श्रेयस्कामैर्दक्षिणभाग एव विधेयमित्यात्मनो दक्षिणाङ्गभागे मूलबिम्बं कुर्वन् ज्ञानादित्रयाराधनार्थं प्रदक्षिणात्रयं करोति । उक्तं च –

''**तत्तो नमो जिणाणं त्ति भणिअ अद्धोणयं पणामं च ।**
**काउं पंचंगं वा, भत्तिब्भरनिब्भरमणेणं** ॥१॥ [ **चे.वं.म./१८९** ]
**पूअंगपाणिपरिवारपरिगओ गहिरमहुरघोसेण ।**
**पढमाणो जिणगुणगणनिबद्धमंगल्लथुत्ताइं** ॥२॥ [ **चे.वं.म./१९०** ]

---

१. शकस्तवपाठादप्यासां–C. मूल । शक्रस्तवपाठादावप्यासां–C. संशो० । शक्रस्तवादावप्यासां इति सङ्घाचारभाष्यवृत्तौ ॥ २. अन्यत्रापि–इति सङ्घाचारभाष्यवृत्तौ ॥ ३. तुला–श्राद्धविधिवृत्तिः प० ५२तः, योगशास्त्रवृत्तिः ३।१२४ प० ५८२तः प्रवचनसारोद्धारवृत्तिः प० ३६ ॥ ४. अग्रद्वाःप्रवेशे–मु० । C. श्राद्धविधिवृत्तावपि अग्रद्वारप्रवेशे–इति ॥ ५. तुला सङ्घाचारभाष्यवृत्तिः प० ४६ ॥

**करधरिअजोगमुद्दो, पए पए पाणिरक्खणाउत्तो ।**
**दिज्जा पयाहिणतिगं, एगग्गमणो जिणगुणेसुं ॥३॥ [ चे.वं.म./१९१ ]**
**गिहचेइएसु न घडइ, इअरेसु वि जइ वि कारणवसेणं ।**
**तह वि न मुंचइ मइमं, सया वि तक्करणपरिणामं'' ॥४॥ [ चे.वं.म./१९२ ]**

प्रदक्षिणादाने च समवसरणस्थचतूरूपं श्रीजिनं ध्यायन् गर्भागारदक्षिणपृष्ठवामदिक्त्रयस्थबिम्बत्रयं वन्दते। अत एव सर्वस्यापि चैत्यस्य समवसृतिस्थानीयतया गर्भगृहबहिर्भागे[1] दिक्त्रये मूलबिम्बनाम्ना बिम्बानि कुर्वन्ति, एवं च 'वर्जयेदर्हतः पृष्ठम्[2]'इत्युक्तोऽर्हत्पृष्ठनिवासदोषोऽपि चतुर्दिक्षु निवर्त्तते, ततश्चैत्यप्रमार्जनपोतकलेख्यकादिवक्ष्यमाणयथोचितचिन्तापूर्वं विहितसकलपूजासामग्रीको जिनगृहव्यापारनिषेधरूपां द्वितीयां नैषेधिकीं मुखमण्डपादौ कृत्वा मूलबिम्बस्य प्रणामत्रयपूर्वकं पूर्वोक्तविधिना पूजां कुरुते। यद् **भाष्यम् –**

**''तत्तो निसीहिआए, पविसित्ता मंडवंमि जिणपुरओ ।**
**[3]महिनिहिअजाणुपाणी, करेइ विहिणा पणामतिगं ॥१॥ [ चे.वं.म./१९३ ]**
**तयणु हरिसुल्लसंतो, कयमुहकोसो जिणिंदपडिमाणं ।**
**अवणेइ रयणिवसिअं, निम्मल्लं लोमहत्थेणं ॥२॥ [ चे.वं.म./१९४ ]**
**जिणगिहपमज्जणं तो, करेइ [4]कारेइ वा वि अन्नेणं ।**
**जिणबिंबाणं पूअं[5], तो विहिणा कुणइ जहजोगं'' ॥३॥ [ चे.वं.म./१९५ ]**

अत्र च विशेषतः शुद्धगन्धोदकप्रक्षालन-कुङ्कुममिश्रगोशीर्षचन्दनविलेपनाङ्गीरचन-गोरोचनमृगमदादिपत्रभङ्गकरण-नानाजातीयपुष्पमालारोपण-चीनांशुकवस्त्रपरिधापन-कृष्णागुरुमिश्रकर्पूरदहनानेकदीपोद्योतन-स्वच्छाखण्डाक्षताष्टमङ्गलालेखन-विचित्रपुष्पगृहरचनादि विधेयम्।

यदि च प्राक् केनापि पूजा कृता स्यात् तदा विशिष्टान्यपूजासामग्र्यभावे तां नोत्सारयेत्, भव्यानां तद्दर्शनजन्यपुण्यानुबन्धिपुण्यबन्धस्यान्तरायप्रसङ्गात्, किन्तु तामेव विशेषयेद्। यद् **बृहद्भाष्यम् –**

**''अह पुव्विं चिअ केणइ, हविज्ज पूआ कया सुविहवेणं ।**
**तं पि सविसेससोहं, जह होइ तहा तहा कुज्जा ॥१॥**
**[ चे.वं.म./१९६, सं.प्र.१५९ ]**

---

१. °बहिर्भागादित्रये-मु० । °बहिर्भागदिक्त्रये C. । P.L. श्राद्धविधिवृत्तौ च °बहिर्भागे दिक्त्रये-इति ॥ २. पृष्ठमित्युक्तेरर्ह° L. ॥ ३. खिइनि० मु० । L.P.C. चैत्यवन्दनभाष्ये श्राद्धविधिवृत्तावपि महिनि० इति ॥ ४. कीरेइ-P.C. ॥ ५. पूअं करेइ तत्तो जहाजोगं-इति चैत्यवन्दनभाष्ये ॥

**निम्मल्लं पि न एवं, भण्णइ निम्मल्ललक्खणाभावा ।**
**भोगविणट्ठं दव्वं, निम्मल्लं बिंति गीअत्था ॥२॥** [ सं.प्र./१६० ]
**इत्तो चेव जिणाणं, पुणरवि आरोवणं कुणंति जहा ।**
**वत्थाहरणाईणं, जुगलिअकुंडलिअमाईणं ॥३॥** [ सं.प्र./१६१ ]
**कहमन्नह एगाए, कासाईए जिणिंदपडिमाणं ।**
**अट्ठसयं लूहंता, विजयाई वण्णिआ समए'' ॥४॥** [ ]

एवं मूलबिम्बसविस्तरपूजानन्तरं सृष्ट्या सर्वापरबिम्बपूजा यथायोगं कार्या, द्वार-बिम्बसमवसरणबिम्बपूजापि मुख्यबिम्बपूजाद्यनन्तरं गर्भगृहनिर्गमसमये कर्त्तव्या संभाव्यते न तु प्रवेशे । प्रणाममात्रं त्वासन्नार्चादीनां पूर्वमपि युक्तमेव, तृतीयोपाङ्गाविसंवादिन्यां **सङ्घाचारोक्तविजयदेव**वक्तव्यतायामित्थमेव प्रतिपादनात् । तथाहि –

**''तो गंतुं सुहम्मसहं, जिणसकहा दंसणंमि पणमित्ता ।**
**उग्घाडित्तु समुग्गं, पमज्जए लोमहत्थेणं ॥१॥** [ संघा.वृ./गा.४८ ]
**सुरहिजलेणिगवीसं, वारा पक्खालिआणुलिंपित्ता ।**
**गोसीसचंदणेणं, ता कुसुमाईहि अच्चेइ ॥२॥** [ संघा.वृ./गा.४९ ]
**तो दारपडिमपूअं, सहासुहम्माइसु वि करइ पुव्वं व ।**
[1]**दारच्चणाइसेसं, तइअउवंगाओ नायव्वं'' ॥३॥** [ संघा.वृ./गा.५० ]

तस्मान्मूलनायकस्य पूजा सर्वेभ्योऽपि पूर्वं सविशेषा हि कार्या । उक्तमपि–

**''उचिअत्तं पूआए, विसेसकरणं तु मूलबिंबस्स ।**
**जं पडइ तत्थ पढमं, जणस्स दिट्ठी सह मणेणं'' ॥१॥** [ चे.म.१९७/सं.प्र.६० ]

शिष्यः–**''पूआवंदणमाई, काऊणेगस्स सेसकरणंमि ।**
**नायगसेवगभावो, होइ कओ लोगनाहाणं ॥२॥** [ चे.म.३९/सं.प्र.६१ ]
**एगस्सायरसारा, कीरइ पूआऽवरेसि थोवयरी ।**
**एसाऽवि महावण्णा, लक्खिज्जइ णिउणबुद्धीहिं'' ॥३॥** [ चे.म.४०/सं.प्र.६२ ]

आचार्यः–**''नायगसेवगबुद्धी, न होइ एएसु जाणगजणस्स ।**
**पिच्छंतस्स समाणं, परिवारं पाडिहेराई ॥४॥** [ चे.म.४१/सं.प्र.६३ ]
**ववहारो पुण पढमं, पइट्ठिओ मूलनायगो एसो ।**
**अवणिज्जइ सेसाणं, नायगभावो न उण तेणं ॥५॥** [ चे.म.५१/सं.प्र.६४ ]

---

१. दारच्चणाइमेसिं–मु० । L.P.C. सङ्घाचारभाष्यवृत्तावपि दारच्चणाइसेसं–इति पाठः ॥

**[1]चंदणपूअ( ण )बलिढोअणेसु , एगस्स कीरमाणेसु ।**
**आसायणा न दिट्ठा उचिअपवित्तस्स पुरिसस्स ॥६॥ [ ]**
**जह मिम्मयपडिमाणं[2], पूआ पुप्फाइएहिं खलु उचिआ ।**
**कणगाइनिम्मिआणं, उचिअतमा मज्जणाईहिं[3] ॥७॥** [ चे.म.५४/सं.प्र.६७ ]
**कल्लाणगाईकज्जा, एगस्स विसेसपूअकरणे वि ।**
**नावण्णापरिणामो, [4]जह धम्मिजणस्स सेसेसु ॥८॥** [ चे.म.५३/सं.प्र.६८ ]
**उचिअपवत्ति एवं, जहा कुणंतस्स होइ नावण्णा ।**
**तह मूलबिंबपूआविसेसकरणे वि तं नत्थि ॥९॥** [ सं.प्र./६९ ]
**जिणभवणबिंबपूआ, कीरंति जिणाण नो कए किंतु ।**
**सुहभावणानिमित्तं, बुहाण इयराण बोहत्थं ॥१०॥** [ चे.म.१४२/सं.प्र.७० ]
**चेइहरेणं केइ, पसंतरूवेण केइ बिंबेणं ।**
**पूयाइसया अन्ने, [5]अन्ने बुज्झंति उवएसा ॥११॥** [ चे.म.१४३/सं.प्र.७१ ] इति ।

पूर्वं मूलबिम्बपूजायुक्तिमत्येवेत्यलं प्रसङ्गेन । सविस्तरपूजावसरे च नित्यं विशेषतश्च पर्वसु त्रिपञ्चसप्तकुसुमाञ्जलिप्रक्षेपादिपूर्वं भगवतः स्नात्रं विधेयम् । तत्रायं विधिः —**योगशास्त्रवृत्तिश्राद्धविधिवृत्ति**लिखितः —

''प्रातः पूर्वं निर्माल्योत्सारणं प्रक्षालनं सङ्क्षेपपूजा आरात्रिकं मङ्गलप्रदीपश्च, ततः स्नात्रादिसविस्तरद्वितीयपूजाप्रारम्भे देवस्य पुरः [6]सकुङ्कुमजलकलशः स्थाप्यः । ततः —

**''मुक्तालङ्कारसारसौम्यत्वकान्तिकमनीयम् ।**
**सहजनिजरूपनिर्जितजगत्रयं पातु जिनबिम्बम्'' ॥१॥ [ ]**

इत्युक्त्वालङ्कारोत्ताणं ।

**''अवणिअकुसुमाहरणं, पयइपइट्ठिअमणोहरच्छायं ।**
**जिणरूवं [7]मज्जणपीढसंठिअं वो सिवं दिसउ'' ॥२॥ [ ]**

इत्युक्त्वा निर्माल्योत्तारणं । ततः प्रागुक्तकलशढालनं पूजा च, अथ धौतधूपितकलशेषु स्नात्रार्हसुगन्धिजक्षेपः, श्रेण्या तेषां व्यवस्थापनम् , सद्वस्त्रेणाच्छादनं च, ततः स्व-

---

१. चंदणपूअबलि° L.P.C. । वंदणपूयणबलि° इति चैत्यवन्दनमहाभाष्ये ॥ २. °ए-इति चैत्यवन्दनमहाभाष्ये ॥ ३. °हिं-मु० । L.P.C. चैत्यवन्दमहाभाष्येऽपि °वि-इति ॥ ४. धम्मियलोअस्स सेसेसु-इति चैत्यवन्दनमहाभाष्ये ॥ ५. बुज्झंति तहोवएसेणं-इति चैत्यवन्दनभाष्ये ॥ ६. सकुङ्कुमः-मु० C.P. श्राद्धविधिवृत्तौ अपि सकुङ्कुम° इति ॥ ७. मज्जणपीठ° इति C. श्राद्धविधिवृत्तौ च ॥

चन्दनधूपादिना कृततिलकहस्तकङ्कणहस्तधूपनादिकृत्याः श्रेणिस्थाः श्रावकाः कुसुमाञ्जलिपाठान् पठन्ति । तत्र —

''**सयवत्तकुंदमाइबहुविहकुसुमाइं पंचवण्णाइं ।**
**जिणनाहण्हवणकाले, दिंति सुरा कुसुमंजलिं**[1] **हिट्ठा**'' ॥१॥ [ ]

इत्युक्त्वा देवस्य मस्तकेषु पुष्पारोपणम् ।

''**गंधाइड्ढिअमहुअरमणहरझंकारसद्दसंगीआ ।**
**जिणचलणोवरि मुक्का, हरउ तुम्ह कुसुमंजली दुरिअं**'' ॥१॥ [ ]

इत्यादिपाठैः प्रतिगाथादिपाठं जिनचलनोपर्येकेन श्रावकेण कुसुमाञ्जलिपुष्पाणि क्षेप्याणि, सर्वेषु कुसुमाञ्जलिपाठेषु च तिलकपुष्पपत्रधूपादिविस्तरो ज्ञेयः । अथोदारमधुरस्वरेणाधिकृतजिनजन्माभिषेककलशपाठः, ततो घृतेक्षुरसदुग्धदधिसुगन्धिजल[2]पञ्चामृतैः स्नात्राणि, स्नात्रान्तरालेषु च धूपो देयः, स्नात्रकालेऽपि जिनशिरः पुष्पैरशून्यं कार्यं । यदाहु**र्वादिवैतालश्रीशान्तिसूरयः** —

''**आ स्नात्रपरिसमाप्तेरशून्यमुष्णीषदेशमीशस्य ।**
[3]**सान्तर्धानाब्धारापातं पुष्पोत्तमैः कुर्यात्**'' ॥१॥ [ **अर्हदभिषेके पर्व ३। श्लो. ४** ]

स्नात्रे च क्रियमाणे निरन्तरं चामरसङ्गीततूर्याद्याडम्बरः सर्वशक्त्या कार्यः, सर्वैः स्नात्रे कृते पुनरकरणाय शुद्धजलेन धारा देया । तत्पाठश्चायम् —

''[4]**अभिषेकतोयधारा, धारेव ध्यानमण्डलाग्रस्य ।**
**भवभवनभित्तिभागान् , भूयोऽपि भिनत्तु भागवती**'' ॥१॥ [ **अर्हद. पर्व ३। श्लो.१२** ]

ततोऽङ्गरूक्षण —विलेपनादिपूजा प्राक्पूजातोऽधिका कार्या, सर्वप्रकारैर्धान्य-पक्वान्न-शाक-विकृति-फलादिभिर्बलिढौकनम् , ज्ञानादिरत्नत्रयाढ्यस्य लोकत्रयाधिपतेर्भगवतोऽग्रे

---

१. कुसुमंजलिं(अंजलिं) हिट्ठा-मु० । कुसुमंजली हिट्ठा-L.P. । कुसुमंजलि हिट्ठा-C. । मूल देवपालकविकृतस्नात्रं द्रष्टव्यम् ॥ २. °जलैः-इति श्राद्धविधिवृत्तौ ॥ ३. सान्तर्धानधा(नमब्धा)रायातं-इति अर्हदभिषेकविधौ । ''सहान्तर्द्धानेन वर्तत इति सान्तर्धानमव्यवधानं पुष्पैरब्धारापात उदकधारानिपातो यस्मिन् उष्णीषदेशे स तथा तमिति । कैरशून्यम् ? पुष्पोत्तमैरिति । अर्हदभिषेकविधिपञ्जिका गा० ४ ॥ ४. अर्हदभिषेकविधौ तु-अभिषेकपयोधारा धारेव... ॥ गा० १२ ॥ 'अभिषेकाय या पयोधारा सा भव एव भवनं तस्य भित्तिभागान् कर्मसंस्थानीयान् भिनत्तु । भूयोऽपि पुनरपि शिवेत्यादिना प्रथममभिषेकोदकं शिवाय कथितम् , पुनरेतद् द्वितीयमितिभावना । कस्येयम् ? भगवत इयम् , सोत्प्रेक्ष्यते ध्यानमण्डलाग्रस्य ध्यानासेर्धारेव' इति तत्रैव पञ्जिकायाम् ॥

पुञ्जत्रयेणोचितम्। स्नात्रपूजादिकं पूर्वं श्रावकैर्वृद्धलघुव्यवस्थया[१], ततः श्राविकाभिः कार्यं, जिनजन्ममहेऽपि पूर्वमच्युतेन्द्रः स्वसुरयुतस्ततो यथाक्रममन्ये इन्द्राः स्नात्रादिः कुर्वन्ति। स्नात्रजलस्य च शेषावच्छीर्षादौ क्षेपेऽपि न दोषः सम्भाव्यो। यदुक्तं **हैमश्रीवीरचरित्रे** —

**''अभिषेकजलं तत्तु , सुरासुरनरोरगाः ।**
**ववन्दिरे मुहुः सर्वाङ्गीणं च परिचिक्षिपुः''** ॥१॥ [ त्रि.श.१०/२/६८ ]

**श्रीपद्मचरित्रे**ऽप्येकोनत्रिंशे उद्देसे आषाढशुक्लाष्टम्या आरभ्य **दशरथ**नृपकारिताष्टाहिका[२]चैत्यस्नात्रमहाधिकारे —

**''तं ण्हवणसंतिसलिलं, नरवइणा पेसिअं सभज्जाणं ।**
**तरुणवलयाहि नेउं, छूढं चिअ उत्तमंगेसु** ॥१॥ [ प.च.२९उ.श्लो./६ ]
**कंचुइहत्थोवगयं, जाव य गंधोदयं चिरावेइ ।**
**ताव य वरग्गमहिसी, पत्ता सोगं च कोवं च** ॥२॥ [ प.च.२९उ.श्लो./७ ] इत्यादि।
**सा कंचुइणा कुद्धा, अहिसित्ता तेण संतिसलिलेणं ।**
**निव्वविअमाणसग्गी, पसन्नहिअया तओ जाया''** ॥३॥ [ प.च.२९उ.श्लो./१८ ]

**बृहच्छान्तिस्तवेऽपि** —**''शान्तिपानीयं मस्तके दातव्यं''** इत्युक्तम् ,

श्रूयतेऽपि **जरासन्ध**मुक्तजरयोपद्रुतं स्वसैन्यं श्री**नेमि**गिरा **कृष्णो**नाराद्धनागेन्द्रात् पातालस्थश्री**पार्श्व**प्रतिमां **शङ्खेश्वर**पुरे आनाय्य तत्स्नपनाम्बुना पटूचक्रे। जिनदेशनासद्मनि नृपाद्यैः प्रक्षिप्तं कूररूपं बलिमर्द्धपतितं देवा गृह्णन्ति, तदर्द्धार्द्धं नृपः, शेषं तु जनाः। तत्सिक्थेनापि शिरसि क्षिप्तेन व्याधिरुपशाम्यति, षण्मासांश्चान्यो न स्याद् , इत्**यागमे**ऽपि।

ततः सद्गुरुप्रतिष्ठितः प्रौढोत्सवानीतो दुकूलादिमयो महाध्वजः प्रदक्षिणात्रयादिविधिना प्रदेयः, सर्वैर्यथाशक्ति परिधापनिका च मोच्या। अथारात्रिकं समङ्गलदीपमर्हतः[३] पुरस्तादुद्योत्यम् , आसन्नं च वह्निपात्रं स्थाप्यम् , तत्र लवणं जलं च पातयिष्यते —

**''उवणेउ मंगलं वो, जिणाण महुलालिजालसंवलिआ ।**
**तित्थपवत्तणसमए, तिअसविमुक्का कुसुमवुट्ठी''** ॥१॥ [ ]

इत्युक्त्वा प्रथमं कुसुमवृष्टिः। ततः —

**''उअह[४] पडिभग्गपसरं, पयाहिणं मुणिवइं करेऊणं ।**
**पडइ सलोणत्तणलज्जिअं[५] व लोणं हुअवहंमि''** ॥१॥ [ ]

---

१. °व्यवस्थया-L.P.C. मूल। °व्यवस्थया-C. संशो० ॥ २. °ष्टाह्निका° इति श्राद्धविधिवृत्तौ ॥ ३. समङ्गलप्रदीप° इति श्राद्धविधिवृत्तौ ॥ ४. उयह-इति श्राद्धविधिवृत्तौ ॥ ५. सलोणत्तेण° इति श्राद्धविधिवृत्तौ ॥

इत्यादिपाठैर्विधिना जिनस्य त्रिः सपुष्पलवणजलोत्तारणादि कार्यम् । ततः सृष्ट्या पूजयित्वा आरात्रिकं सधूपोत्क्षेपमुभयत उच्चैः सकलशजलधारं परितः श्राद्धैः प्रकीर्यमाणपुष्पप्रकरम् –

''**मरगयमणिघडिअविसालथालमाणिक्कमंडिअपईवं ।**
**ण्हवणयरकरुक्खित्तं, भमउ जिणारत्तिअं तुम्हं**[१]'' ॥१॥ [ ]

इत्यादिपाठपूर्वं प्रधानभाजनस्थं सोत्सवमुत्तार्यते त्रिवारम् । यदुक्तं **त्रिषष्टीयादिचरित्रे** –

''**कृतकृत्य इवाथापसृत्य किञ्चित् पुरन्दरः ।**
**पुरोभूय जगद्भर्त्तुरारात्रिकमुपाददे** ॥१॥ [ त्रि.प.१/५/९८ ]
**चलद्दीपत्विषा तेन, चकासामास कौशिकः ।**
[२]**भास्वदोषधिचक्रेण, शृङ्गेणेव महागिरिः** ॥२॥ [ त्रि.प.१/५/९९ ]
**श्रद्धालुभिः सुरवरैः, प्रकीर्णकुसुमोत्करम् ।**
**भर्त्तुरुत्तारयामास, ततस्त्रिदशपुङ्गवः**'' ॥३॥ [ त्रि.प.१/५/१०० ]

मङ्गलप्रदीपोऽप्यारात्रिकवत् पूज्यते –

''**कोसंबिसंठिअस्स व, पयाहिणं कुणइ मउलिअपईवो ।**
**जिणसोमदंसणे दिणयरु व्व तुह मंगलपईवो** ॥१॥ [ ]
**भामिज्जंतो सुरसुंदरीहिं तुह नाह ! मंगलपईवो ।**
**कणयायलस्स नज्जइ, भाणु व्व पयाहिणं दिंतो**'' ॥२॥ [ ]

इति पाठपूर्वं तथैवोत्तार्यते, देदीप्यमानो जिनचलनाग्रे मुच्यते, आरात्रिकं तु विध्याप्यते न दोषः, प्रदीपारात्रिकादि च मुख्यवृत्त्या घृत-गुड-कर्पूरादिभिः क्रियते, विशेषफलत्वात्, **लोके**ऽप्युक्तम् –

''**पुरः प्रज्वाल्य देवस्य, कर्पूरेण तु दीपकम् ।**
**अश्वमेघमवाप्नोति, कुलं चैव समुद्धरेत्**'' ॥१॥ [ ]

अत्र 'मुक्तालङ्कार'इत्यादिगाथाः श्री**हरिभद्रसूरि**कृताः[३] संभाव्यन्ते, तत्कृत**समरादित्यचरित्र**ग्रन्थस्यादौ ''**उवणेउ मंगलं वो**'' इति नमस्कारदर्शनात्, एताश्च गाथाः श्रीतपापक्षादौ प्रसिद्धा इति न सर्वा लिखिताः ।

स्नात्रादौ सामाचारीविशेषेण विविधविधिदर्शनेऽपि न व्यामोहः कार्यः, अर्हद्भक्तिफलस्यैव सर्वेषां साध्यत्वात् । गणधरादिसामाचारीष्वपि भूयांसो भेदा भवन्ति, तेन यद्यद्धर्माद्यविरुद्धमर्हद्भक्तिपोषकं तत्तन्न केषामप्यसंमतम्, एवं सर्वधर्मकृत्येष्वपि ज्ञेयम् ।

---

१. °म्ह–इति श्राद्धविधिवृत्तौ ॥ २. भास्वदौष° इति श्राद्धविधिवृत्तौ ॥ ३. नमस्कारस्य द° इति श्राद्धविधिवृत्तौ ॥

इह लवणारात्रिकाद्युत्तारणं संप्रदायेन सर्वगच्छेषु परदर्शनेष्वपि च सृष्ट्यैव क्रियमाणं दृश्यते, **श्रीजिनप्रभसूरिकृतपूजाविधौ** त्वेवमुक्तम् –"**लवणाइउत्तारणं पालित्तयसूरिमाइपुव्वपुरिसेहिं [1] संहारेण अणुन्नायं पि संपयं सिट्ठिए कारिज्जइ**"[ ] त्ति। स्नात्रकरणे च सर्वप्रकारसविस्तरपूजाप्रभावनादिसंभवेन प्रेत्य प्रकृष्टं फलं स्पष्टम्, जिनजन्मस्नात्रकर्तृचतुःषष्टिसुरेन्द्राद्यनुकारकरणादि चात्रापीति स्नात्रविधिः ।

प्रतिमाश्च विविधाः, तत्पूजाविधौ सम्यक्त्वप्रकरण इत्युक्तम् –

"**गुरुकारिआइ केई, अन्ने सयकारिआइ तं बिंति ।**
**विहिकारिआइ अन्ने, पडिमाए पूअणविहाणं**" ॥१॥ [ द.प्र./२५ ]

व्याख्या –गुरवो मातृपितृपितामहादयस्तैः कारितायाः केचिदन्ये स्वयंकारितायाः [2] विधिकारितायास्त्वन्ये प्रतिमायास्तत् –पूर्वाभिहितं पूजाविधानं ब्रुवन्ति कर्त्तव्यमिति शेषः । अवस्थितपक्षस्तु गुर्वादिकृतत्वस्यानुपयोगित्वात् ममत्वाग्रहरहितेन सर्वप्रतिमा अविशेषेणा पूजनीयाः **[ श्राद्धविधिवृत्तिः प० ५९-६० ]**

न चैवमविधिकृतामपि पूजयतस्तदनुमतिद्वारेणाज्ञाभङ्गलक्षणदोषापत्तिः, आगमप्रामाण्यात् । [3] तथाहि **श्रीकल्पबृहद्भाष्ये –**

"**निस्सकडमनिस्सकडे, चेइए सव्वहिं थुई तिन्नि ।**
**वेलं व चेइआणि अ, नाउं इक्किक्किआ वा वि**" ॥१॥ [ क.बृ.भा./१८०४ ]

निश्राकृते गच्छप्रतिबद्धे, अनिश्राकृते तद्विपरीते चैत्ये, [4] सर्वत्र तिस्रः स्तुतयो दीयन्ते, अथ प्रतिचैत्यं स्तुतित्रये दीयमाने वेलाया अतिक्रमो भवति भूयांसि वा तत्र चैत्यानि, ततो वेलां चैत्यानि [5] च ज्ञात्वा प्रतिचैत्यमेकैकाऽपि स्तुतिर्दातव्या ॥

अयं चैत्यगमनपूजास्नात्रादिविधिः सर्वोऽपि ऋद्धिप्राप्तमाश्रित्योक्तः, तस्यैवैतावद्योगसंभवात्, [6] अऋ(नृ)द्धिप्राप्तस्तु श्राद्धः स्वगृहे सामायिकं कृत्वा केनापि सह ऋणविवादाद्यभावे ईर्याद्युपयुक्तः साधुवच्चैत्यं याति, न च पुष्पादिसामग्र्यभावाद् द्रव्य- [7] *पूजायामशक्तः सामायिकं पारयित्वा, कायेन [8] यदि पुष्पग्रथनादि कार्यं कर्तव्यं स्यात्

१. सिंहारेण–L.P.C. मूल। संहारेण–C. संशो० ॥ २. °विधिकारिताया° मु० नास्ति ॥ ३. तुला–पञ्चाशकवृत्तिः ३।२, सङ्घाचारभाष्यवृत्तिः प० १७९, प० १८१ । चैत्यवन्दममहाभाष्येऽपि [गा० १६४] गाथेयं दृश्यते ॥ ४. सर्वत्र–मु० नास्ति। L.P.C. श्राद्धविधिवृत्तौ 'सर्वत्र'–अस्ति ॥ ५. वा इति श्राद्धविधिवृत्तौ प० ६१ ॥ ६. अऋद्धि° L.P.C. । अनृद्धि° इति श्राद्धविधिवृत्तौ प० ६१ ॥ ७. * * चिह्नद्वयवर्ती पाठः मु० नास्ति। L.P.C. श्राद्धविधिवृत्तावपि [प० ६१] अस्ति ॥ ८. यदि किञ्चित् पुष्प° इति श्राद्धविधिवृत्तौ प० ६१ ॥

तत् करोति, न च सामायिकत्यागेन द्रव्य*स्तवस्य[१] करणमनुचितमिति शङ्क्यं, सामायिकस्य स्वायत्ततया शेषकालेऽपि सुकरत्वात् , चैत्यकृत्यस्य च समुदायायत्तत्वेन कादाचित्कत्वात् , द्रव्यस्तवस्यापि शास्त्रे महाफलत्वप्रतिपादनाच्च । यतः **पद्मचरित्रे** –

**''मणसा होइ चउत्थं छट्ठफलं उट्ठिअस्स संभवइ ।**
**गमणस्स पयारंभे, होइ फलं अट्ठमोवासो** ॥१॥ [ प.च. ]
**गमणे दसमं तु भवे, तह चेव दुवालस गए किंचि ।**
**मज्झे[२] पक्खुववासो, मासुववासं च दिट्ठंमि** ॥२॥ [ प.च. ]
**संपत्तो जिणभवणे, पावि छम्मासिअं फलं पुरिसो ।**
**संवच्छरिअं तु फलं, दारुद्देसट्ठिओ लहइ** ॥३॥ [ प.च. ]
**पायक्खिणेण पावइ, वरिससयं तं फलं तओ[३] जिणे महिए ।**
**पावइ वरिससहस्सं, अणंतपुण्णं जिणे थुणिए** ॥४॥ [ प.च. ]
**सयं पमज्जणे पुण्णं सहस्सं च विलेवणे ।**
**सयसाहस्सिआ माला, अणंतं गीअवाइए''** ॥१॥ [ प.च. ] त्ति ।

प्रस्तावे च तस्मिन् क्रियमाणे विशेषपुण्यलाभः । यद् **आगमः** –

**''जीवाण बोहिलाभो, सम्मद्दिट्ठिण होइ पिअकरणं ।**
**आणा जिणिंदभत्ती, तित्थस्स पभावणा चेव''** ॥१॥ [ गाथा./२१९ ]

एवमनेके गुणास्ततस्तदेव कर्त्तव्यम् । यदुक्तं **दिनकृत्ये** –

**''एवं विही इमो सव्वो, रिद्धिमंतस्स देसिओ ।**
**इयरो निययगेहम्मि, काउं सामाइअं वयं[४]''** ॥१॥ [ श्रा.दि./गा.७७ ]
**जइ न कस्सइ धारेइ, न विवाओ अ विज्जए ।**
**उवउत्तो सुसाहु व्व, गच्छए जिणमंदिरे** ॥२॥ [ श्रा.दि./गा.७८ ]
**काएण अत्थि जइ किंचि, कायव्वं जिणमंदिरे ।**
**तओ सामाइअं मोत्तुं , करेज्ज करणिज्जयं** ॥३॥ [ श्रा.दि./गा.७९ ]

अत्र च सूत्रे विधिना जिनस्य पूजनं वन्दनं चेत्युक्त्या दशत्रिकादिचतुर्विंशति-मूलद्वारैर्भाष्याद्युक्तः सम्पूर्णो वन्दनाविधिरुपलक्षितः । स च यथा –

१. °स्य (सति चैत्यकरणीये सामायिकं विहाय तत्करोति, न च सामायिकत्यागाद् द्रव्यस्तवस्य) करणमनुचितमिति शङ्क्यम्–मु० ॥ २. मग्गे–मु० ॥ ३. तओ–मु० नास्ति ॥ ४. वए–मु० ॥

''तिन्नि[1] निसीही तिन्नि उ पयाहिणा तिन्नि चेव य पणामा ।
तिविहा पूआ य तहा, अवत्थतिअभावणं चेव ॥१॥ [ चै.भा.६/दं.प्र.३४ ]
तिदिसिनिरिक्खणविरई, पयभूमिपमज्जणं च तिक्खुत्तो ।
वण्णाइतिअं मुद्दातिअं च तिविहं च पणिहाणं ॥२॥ [ चै.भा.७/दं.प्र.३५ ]
पुप्फामिसथुइभेआ, तिविहा पूआ[2] अवत्थतिअगं तु ।
छउमत्थकेवलित्तं, सिद्धत्तं भुवणनाहस्स ॥३॥ [ द.प्र./३७ ]
वण्णाइतिअं तु पुणो, वण्णत्थालंबणस्सरूवं तु ।
मणवयकायाजणिअं, तिविहं पणिहाणमवि होइ ॥४॥ [ द.प्र./३८ ]

तथा- ''पंचंगो पणिवाओ, थयपाढो होइ जोगमुद्दाए ।
वंदण जिणमुद्दाए, पणिहाणं मुत्तसुत्तीए ॥५॥ [ चै.भा.१८/दं.प्र.४० ]
दो जाणू दुन्नि करा, पंचमयं होइ उत्तमंगं तु ।
सम्मं संपणिवाओ, नेओ पंचंगपणिवाओ'' ॥६॥ [ द.प्र./४१ ]

**वन्दनपञ्चाशकवृत्तौ** तु पञ्चाङ्ग्यपि स्वतन्त्रा मुद्रात्वेन प्रतिपादिता । तथा च तत्पाठः –

**''प्रणिपातदण्डकपाठस्यादाववसाने च प्रणामः पञ्चाङ्गमुद्रया क्रियते, पञ्चाङ्गानि – अवयवाः करजानुद्वयोत्तमाङ्गलक्षणानि विवक्षितव्यापारवन्ति यस्यां सा तथा, पञ्चाङ्ग्या अपि मुद्रात्वमङ्गविन्यासविशेषरूपत्वाद् योगमुद्रावद्''** [ ३।१७, प० ५९ ] इति ।

''अण्णोणंतरिअंगुलिकोसागारेहिँ दोहिँ हत्थेहिं ।
पिट्टोवरिकुप्परसंठिएहिँ तह जोगमुद्दत्ति ॥७॥ [ पञ्चा.३/१९ ]
चत्तारि अंगुलाइं, पुरओ ऊणाइँ जत्थ पच्छिमओ ।
पायाणं उस्सग्गो, एसा पुण होइ जिणमुद्दा ॥८॥ [ पञ्चा.३/२० ]
मुत्तासुत्तीमुद्दा, जत्थ समा दो वि गब्भिआ हत्था ।
ते पुण निडालदेसे, लग्गा अन्ने अलग्ग त्ति'' ॥९॥ [ पञ्चा.३/२१ ] इत्यादि ।

विधिनैव क्रियमाणं देवपूजादि धर्मानुष्ठानं महाफलम्, अन्यथा त्वल्पफलं, सातिचारतायां च, प्रत्युत प्रत्यपायादेरपि सम्भवः, अविधिना चैत्यवन्दने **महानिशीथे** प्रायश्चित्तस्य प्रतिपादनात् । तथाहि तत्**सप्तमाध्ययने –**

**''अविहीए चेइआइं वंदिज्जा, तस्स णं पायच्छित्तं उवइसिज्जा, जओ अविहीए चेइआइं**

१. गाथाद्वयं चैत्यवन्दनभाष्ये [गा० ६-७] चैत्यवन्दनमहाभाष्ये [गा० १८०-१] प्रवचनसारोद्धार [६६-७] विचारसारे [६९४-५] च दृश्यते ॥ २. पूआ य वत्थ° L.P.C. संशो० ॥

**वंदमाणो अण्णेसिं असद्धं जणेइ इइ काऊणं**''[ म.नि./अ.७ ] त्ति । अत एव च पूजादि-पुण्यक्रियाप्रान्ते सर्वत्राविध्याशातनानिमित्तं मिथ्यादुष्कृतं देयम् । अथ चेर्यापथिकी प्रतिक्रमणपूर्वकं चैत्यवन्दनमिति पूर्वमुक्तं, तच्च युक्तं, यतो **महानिशीथे** –''**इरिआवहिआए अपडिक्कंताए न किंचि कप्पइ चेइअवंदणसज्झायावस्सयाइ काउं**''[ म.नि. ] इति, अन्या अपि प्रतिक्रमणादिक्रिया एतत्प्रतिक्रमणपूर्विका: शुद्ध्यन्ति । यतो **विवाहचूलिकायाम्** –

''**दिव्विड्ढिकुसुमसेहर, मुच्चइ दिव्वाहिगारमज्झंमि ।**
**ठवणायरिअं ठविउं, पोसहसालाइ तो सीहो** ॥१॥ [ वि.चू. ]
**उम्मुक्कभूसणो सो, इरिआइपुरस्सरं च मुहपुत्तिं ।**
**पडिलेहिऊण तत्तो, चउव्विहं पोसहं कुणइ**'' ॥२॥ [ वि.चू. ] त्ति ।

तथाऽऽ**वश्यकचूर्णावपि** ''**तत्थ ढड्ढरो नाम सावओ सरीरचिंतं काऊण पडिस्सयं वच्चइ, ताहे तेण पूरएण[1] तिन्नि निसीहिआओ कयाओ, एवं सो इरिआई ढड्ढरेण सरेण करेइ**'' [ आ.चू.४०३ ] त्ति । तथा –

''**ववहारावस्सयमहानिसीहभगवइविवाहचूलासु ।**
**पडिक्कमणचुण्णिमाइसु , पढमं इरिआपडिक्कमणं**'' [ ] इत्याद्युक्तेः ।

[2]अतः प्रथममीर्यापथिकीसूत्रं व्याख्यायते, तच्च 'इच्छामि पडिक्कमिउं' इत्यादि 'तस्स मिच्छामि दुक्कडं' इत्यन्तम् । तत्र '**इच्छामि पडिक्कमिउं इरिआवहिआए विराहणाए**'त्ति इच्छामि–अभिलषामि प्रतिक्रमितुं–प्रतीपं क्रमितुम् , ईरणमीर्या गमन-मित्यर्थ: तत्प्रधान: पन्था ईर्यापथ: तत्र भवा ऐर्यापथिकी, विराधना–जन्तुबाधा, मार्गे गच्छतां या काचिद् विराधना भवति सा ऐर्यापथिकीत्युच्यते । तस्या ऐर्यापथिकी-विराधनाया: सकाशात् प्रतिक्रमितुमिच्छामीति सम्बन्ध: ।

अस्मिंश्च व्याख्याने ईर्यापथनिमित्ताया एव विराधनाया: प्रतिक्रमणं स्याद् , न तु शयनादेरुत्थितस्य कृतलोचादेर्वा, तस्मादन्यथा व्याख्यायते –ईर्यापथ: –साध्वाचार, यदाह – ''**ईर्यापथो ध्यानमौनादिकं भिक्षुव्रतम्**''[ ] तत्र भवा ऐर्यापथिकी विराधना नद्युत्तरण-शयनादिभि: साध्वाचारातिक्रमरूपा, तस्या विराधनाया: प्रतिक्रमितुमिच्छामीति सम्बन्ध: । साध्वाचारातिक्रमश्च प्राणातिपातादिरूप: । तत्र च प्राणातिपातस्यैव गरीयस्त्वम् , शेषाणां तु पापस्थानानामत्रैवान्तर्भाव:, अत एव प्राणातिपातविराधनाया [3]एवोत्तरप्रपञ्च: । सम्पत् १।

---

१. दूरे ठितेण–आ. चूर्णौ ॥ २. इतः आरभ्य तुल्यप्रायं–योगशास्त्रवृत्तौ ३।१२४, प० ५९० तः ६०२ ॥ ३. एवोत्तरः प्र° इति योगशास्त्रवृत्तौ ॥

क्व सति विराधना ? '**गमणागमणे**' गमनं चागमनं चेति समाहारद्वन्द्वतस्मिन्। तत्र गमनं स्वस्थानादन्यत्र यानम्, आगमनं च तद्व्यत्ययतः, सम्पत् २। तत्रापि कथं विराधनेत्याह—'**पाणक्कमणे**' इत्यादि प्राणिनो—द्वीन्द्रियादयस्तेषामाक्रमणे—सङ्घट्टने पादेन पीडने, तथा '**बीयक्कमणे**[1] **हरियक्कमणे,**' बीजाक्रमणे, हरिताक्रमणे, आभ्यां सर्वबीजानां शेषवनस्पतीनां च जीवत्वमाह, सम्पत् ३। तथा '**ओसाउत्तिंगपणगदग-मट्टीमक्कडासंताणासंकमणे**' [2]अवश्यायः—त्रेहः, अस्य च ग्रहणं सूक्ष्मस्याप्यप्कायस्स परिहार्यत्वख्यापनार्थम्, उत्तिङ्गा—भूम्यां वृत्तविवरकारिणो गर्दभाकारा जीवाः कीटिका-नगराणि वा, पनकः—[3]पञ्चवर्णा फुल्लिः दकमृत्तिका—अनुपहतभूमौ [4]चिक्खिल्लः, यद्वा दकम्—अप्कायो मृत्तिका—पृथ्वीकायः, मर्कटः—कोलिकस्तस्य सन्तानो—जालकं, ततश्चैषां पदानां द्वन्द्वः तेषां सङ्क्रमणे—आक्रमणे सम्पत् ४।

किं बहुना ? '**जे मे जीवा विराहिया**' ये केचन मया जीवा विराधिता—दुःखे स्थापिताः, सम्पत् ५। ते च के ? इत्याह—**एगेंदिआ इत्यादि**' एकमेव स्पर्शन-रूपमिन्द्रियं येषां ते एकेन्द्रियाः—पृथिव्यादयः, एवं स्पर्शनरसनोपेता द्वीन्द्रियाः—शङ्खादयः, स्पर्शनरसनघ्राणयुक्तास्त्रीन्द्रियाः—कीटिकादयः, स्पर्शनरसनघ्राणचक्षुः-समन्विताः चतुरिन्द्रियाः—वृश्चिकादयः, स्पर्शनरसनघ्राणचक्षुःश्रोत्रसहिताः पञ्चेन्द्रियाः—नारकतिर्यग्नरामरादयः, सम्पत् ६।

विराधनाप्रकारमाह—'**अभिहया इत्यादि**' [5]अभिमुखमागच्छन्तो हता अभिहताः—पादेन ताडिताः उत्क्षिप्य क्षिप्ता वा। 'वर्त्तिताः' पुञ्जीकृताः धूल्यादिना वा स्थगिताः। 'श्लेषिताः' भूम्यादौ लगिताः ईषत् पिष्टा वा। 'सङ्घातिताः' मिथो गात्रैः पिण्डीकृताः। 'सङ्घाट्टिताः' मनाक् स्पृष्टाः। 'परितापिताः' सर्वतः पीडिताः। 'क्लामिताः' ग्लानिं प्रापिताः मारणान्तिकसमुद्घातं नीता इत्यर्थः। 'अवद्राविता' उत्त्रासिताः। 'स्थानात् स्थानं सङ्क्रामिता' स्वस्थानात् परस्थानं नीताः। 'जीविताद्व्यपरोपिताः' मारिता इत्यर्थः। सम्पत् ७।

'**तस्स**'त्ति अभिहयेत्यादिविराधनाप्रकारस्य '**मिच्छा मि दुक्कडं**'ति मिथ्या मे दुष्कृतम्, एतद् दुष्कृतं मिथ्या-निष्फलं मे भवत्वित्यर्थः। अस्य चैतन्निरुक्तम्—

---

१. बीअक्कं° इति योगशास्त्रवृत्तौ प० ५९१ ॥ २. अवश्यायः जलविशेषः, अस्य-इति योगशास्त्रवृत्तौ प० ५९१ ॥ ३. पञ्चवर्णो-इति योगशास्त्रवृत्तौ प० ५९१ ॥ ४. चिक्खल्लः इति योगशास्त्रवृत्तौ प० ५९१ ॥ ५. अभिमुखागता हता इति योगशास्त्रवृत्तौ प० ५९२ ॥

**"मि त्ति मिउमद्दवत्ते, छत्ति य दोसाण छायणे होइ ।**
**मि त्ति य मेराइ ठिओ दु त्ति दुगुंछामि अप्पाणं ॥१॥** [ आ.नि./६८६ ]
**क त्ति[1] कडं मे पावं, ड त्ति य डेवेमि तं उवसमेणं ।**
**एसो मिच्छादुक्कडपयक्खरत्थो समासेण" ॥२॥** [ आ.नि./६८७ ] सम्पत् ८।

सम्यग्मिथ्यादुष्कृतकर्तुस्तत्क्षणादशेषमपि कर्म क्षीयते । अत्र च त्रिषष्ट्यधिकपञ्च-शतीमितानां जीवानामेवं मिथ्यादुष्कृतं दीयते, तद्भेदाश्च अष्टादश लक्षा चतुर्विंशतिसहस्राः एकं शतं विंशतिश्च १८२४१२० भवन्ति, तद्यथा —सप्तनरकभवाः पर्याप्तापर्याप्तभेदेन १४, भूजलज्वलनवाय्वनन्तवनस्पतयः पर्याप्तापर्याप्तसूक्ष्मबादरभेदैः २०, प्रत्येकवनस्पति-र्द्वित्रिचतुरिन्द्रियाश्च पर्याप्ता अपर्याप्ताश्चेति ८, जलस्थलखचरा उरोभुजपरिसर्पाश्च संज्ञ्यसंज्ञिपर्याप्तापर्याप्तभेदात् २०, एवं तिर्यग्भेदाः ४८। कर्मभुवः १५ अकर्मभुवः ३० अन्तरद्वीपाः ५६ एवं १०१ एषां, गर्भजानां पर्याप्तापर्याप्ततया २०२, संमूर्छजत्वेन पुनः ३०३ मनुष्यभेदाः। भवनपतयो १० व्यन्तराः १६ चरस्थिरभेदभिन्नज्योतिष्काः १० कल्पभवाः १२ ग्रैवेयकगाः ९ अनुत्तरोपपातिनः ५ लोकान्तिकाः ९ किल्बिषिका ३ भरतैरावत-वैताढ्यदशकस्थाः

**"अन्ने १ पाणे २ सयणे ३, वत्थे ४ लेणे अ ५ पुप्फ ६ फल ७ पुव्वा ८ ।**
**बहुफल ९ अविवत्तिजुआ १० जंभगादसविहा हुंति" ॥१॥** [ ] त्ति ।

जृम्भकाः १० परमाधार्मिकाः १५, सर्वे पर्याप्तापर्याप्तभेदात् १९८ देवभेदाः । सर्वे मिलिता ५६३ जीवभेदाः । अभिहयेत्यादि १० पदगुणिताः ५६३०, रागद्वेषगुणिता ११२६०, योगत्रयगुणिताः ३३७८०, कृतकारितानुमतिभिर्गुणिताः १०१३४०, एते च कालत्रयगुणिताः ३०४०२०, तेऽर्हत्सिद्धसाधुदेवगुर्वात्मसाक्षिभिर्गुणिताः १८२४१२० जाताः । एतदर्थाभिधायिन्यो गाथा यथा —

**"चउदसपय १ अडचत्ता २, तिगहिअतिसया ३ सय च अडनउअं ४ ।**
**चउगइ दसगुण मिच्छा, पणसहसा छसयतीसा य ॥१॥** [ वि.स./८ ]
**नेरइआ सत्तविहा, पज्जअपज्जत्तणेण चउदसहा ।**
**अडचत्ताइं संखा, तिरिनरदेवाण पुण एवं ॥२॥** [ वि.स./९ ]
**भूदग्गिवाउणंता, वीसं सेसतरु विगल अट्ठेव ।**
**गब्भेअरपज्जेअर, जल १ थल २ नह ३ उर ४ भुआ ५ वीसं ॥३॥** [ वि.स./१० ]

---

१. मिच्छा मि दुक्कड॰ इति चैत्यवंदनमहाभाष्ये [गा० ३८२] पाठः ॥

**पनरस १ तीस २ छपन्ना ३, कम्माकम्मा २ तहंतरद्दीवा ३ ।**
**[1]गब्भयपज्जअपज्जा, मुच्छय अपज्जा तिसय तिन्नि ॥४॥** [ वि.स./११ ]
**भवणा परमा जंभय वणयर दस पनर दस य सोलसगं ।**
**चरथिरजोईसदसगं, किव्विसितिअ नव य लोगंता ॥५॥** [ वि.स./१२ ]
**कप्पा गेविज्जणुत्तर, बारस नव पण पजत्त अपजत्ता ।**
**अडनउअसयं अभिहयवत्तिअमाईहिं दसगुणिआ ॥६॥** [ वि.स./१३ ]

एवं च– ''**अभिहयपयाइदसगुण, पणसहसा छसयतीसया भेया ।**
**ते रागदोसदुगुणा, इक्कारस दो सया सट्ठी ॥७॥** [ वि.स./१४ ]
**मणवयकाए गुणिआ, तित्तीससहस्स सत्तसयसीआ ।**
**कारणकरणाणुमई, लक्खसहस्सा तिसयचाला ॥८॥** [ वि.स./१५ ]
**कालतिगेण गुणिआ, तिलक्खचउसहस्स वीस अहिआ य ।**
**अरिहंतसिद्धसाहूदेवगुरुअप्पसक्खीहिं ॥९॥** [ वि.स./१६ ]
**अट्ठारस लक्खाइं, चउवीससहस्स एग वीसहिआ ।**
**इरियामिच्छादुक्कडपमाणमेवं सुए भणिअं ॥१०॥** [ वि.स./१७ ]

अस्यां च विश्रामाष्टकोल्लिङ्गनपदानि –

''**इच्छा गम पाण ओसा, जेमे एगिंदि अभिहया तस्स ।**
**अड संपय बत्तीसं, पयाइँ वण्णाण सट्ठसयं**'' ॥१॥ [ वि.सा./७०९ ]

[2]एवमालोचनाप्रतिक्रमणरूपं द्विविधं प्रायश्चित्तं [3]प्रतिपद्य कायोत्सर्गलक्षणप्रायश्चित्तेन पुनरात्मशुद्ध्यर्थमिदं पठति –

''**तस्स उत्तरीकरणेणमित्यादि ठामि काउस्सग्गं**'' इति पर्यन्तम् । तस्यआलोचितप्रतिक्रान्तस्यातिचारस्योत्तरीकरणादिना हेतुना 'ठामि काउस्सग्गं' इति योगः । [4]तत्रानुत्तरस्योत्तरस्य करणं पुनः संस्कारद्वारेणोपरिकरण[5]मुत्तरीकरणम्, अयं भावार्थः – यस्यातिचारस्य पूर्वमालोचनादि कृतम्, तस्यैव पुनः शुद्धये कायोत्सर्गस्य करणम् ।

तच्च प्रायश्चित्तकरणेन स्यात्, इत्याह –'पायच्छित्तकरणेणं' प्रायो –बाहुल्येन

---

१. L.P.C. । गब्भयपज्जअपज्जा–मु० । गब्भा पज्जअपज्जा–इति विचारसप्ततिकायाम् गा० ११ ॥ २. तुला–योगशास्त्रवृत्तिः प० ५९३ ॥ ३. प्रतिपाद्य–मु० । L.P.C. योगशास्त्रवृत्तावपि प्रतिपद्य–इति ॥ ४. तुला–आवश्यकचूर्णिः प० २५०-१, आवश्यकहरिभद्रीवृत्तिः प० ७७९ ॥ ५. °मुत्तरकरणं–इति योगशास्त्रवृत्तौ प० ५९३ ॥

चित्तं —जीवं मनो वा शोधयति पापं छिनत्तीति वाऽऽर्षत्वात् प्रायश्चित्तम्, तस्य करणेन हेतुना। तच्च विशुद्ध्या स्यात्, इत्याह —'**विसोहीकरणेणं**' विशोधनं विशोधिरतिचारापगमादात्मनो नैर्मल्यम्, तस्याः करणेन हेतुना।

तदपि विशल्यत्वे सति स्यात्, इत्याह —'**विसल्लीकरणेणं**' विगतानि शल्यानि मायादीनि यस्यासौ विशल्यः, अविशल्यस्य विशल्यस्य करणं विशल्यीकरणं तेन हेतुना।

किम् ? इत्याह —'**पावाणं कम्माणं निग्घायणट्ठाए**' पापानां भवहेतूनां कर्मणां ज्ञानावरणादीनां निर्घातनमुच्छेदः, स एवार्थः प्रयोजनम् तस्मै, '**ठामि**' अनेकार्थत्वाद्धातूनां करोमि '**कायोत्सर्गं**' कायव्यापारत्यागमित्यर्थः॥

किं सर्वथा ? न, इत्याह[1] —'**अन्नत्थ ऊससिएणम् इत्यादि**'। अन्यत्रोच्छ्वासितात् ऊर्ध्वं श्वासग्रहणात्' उत् ऊर्ध्वं प्रबलं वा श्वसितम् उच्छ्वसितमिति व्युत्पत्तेः अत्र पञ्चम्यर्थे तृतीया, तन्मुक्त्वा योऽन्यो व्यापारस्तेन व्यापारवतः कायस्योत्सर्ग इत्यर्थः। एवमुत्तरत्रापि। एवं 'निःश्वसितात्' श्वासमोक्षणात्। 'कासितात्' क्षुतात्। 'जृम्भिताद्' उद्गारितात्। एतानि प्रतीतानि। वातनिसर्गोऽधोवातनिसर्गस्तस्मात्। कासितादीनि च जीवरक्षार्थं मुखे हस्तदानादियतनया कार्याणि। 'भमलीए' अकस्माद् देहभ्रमेः। 'पित्तमुच्छाए' पित्तसंक्षोभादीषत्मोहो मूर्छा तस्याः तयोश्च सत्योरुपवेष्टव्यम्। सहसापतने मा भूत्[2] सँयमात्मविराधनेति।

'**सुहुमेहिं इत्यादि**' सूक्ष्मेभ्योऽङ्गसंचालेभ्यो रोमोत्कम्पादिभ्यः। सूक्ष्मेभ्यः खेलसंचालेभ्यः, खेलः —श्लेष्मा। सूक्ष्मेभ्यो दृष्टिसंचालेभ्यो निमेषादिभ्यः।

उच्छ्वसितादिभ्योऽन्यत्र कायोत्सर्गं करोमीति, तावता[3] किमुक्तं भवति ? '**एवमाइएहिं इत्यादि**' एवमादिभिरूच्छ्वसितादिभिः पूर्वोक्तैराकारैरपवादैरादिशब्दादन्येऽपि गृह्यन्ते, अग्नेर्विद्युतो वा ज्योतिषः स्पर्शने प्रावरणं गृह्णतोऽपि न भङ्गः।

[[4]ननु नमस्कारमेवाभिधाय किमिति तद्ग्रहणं न करोति। येन तद्भङ्गो न भवति ? उच्यते —नात्र नमस्कारेण पारणमेवाविशिष्टं कायोत्सर्गमानं क्रियते, किन्तु यो यत्परिमाणः कायोत्सर्ग उक्तस्तावन्तं कालं प्रतीक्ष्य तत ऊर्ध्वं, नमस्कारमपठित्वा पारयतो भङ्गः। [5]अपरिसमाप्तेऽपि च पठतो भङ्ग एव, तस्मात् यो यत्परिमाणः

१. इतः आरभ्य तुला-ललितविस्तरावृत्तिः प० ८६॥ २. P.C.। भूत् सँयता(मा)त्मविराधनेति-मु०। ३. एतावता-इति योगशास्त्रवृत्तौ प० ५९५॥ ४. तुला-आवश्यकहारिभद्रीयवृत्तिः प० ७८४, प्रवचनसारोद्धारवृत्तिः प० १६१॥ ५. अपरिसमाप्तौ च पठतोऽपि भङ्ग एव-इति प्रवचनसारोद्धारवृत्तौ प० १६१॥

कायोत्सर्गस्तस्मिन् पूर्ण एव 'नमो अरिहंताण' इति वक्तव्यम् तथा] मार्जार-मूषकादेः [1]पुरतो गमने अग्रतः [2]सरतोऽपि, चौरसम्भ्रमे राजसम्भ्रमे वा सर्पदष्टे आत्मनि परे वा साध्वादौ अपूर्णमपि कायोत्सर्गं पारयतोऽपि न भङ्गः । यदाहुः —

**''[3]अगणी उच्छिंदिज्ज व, [4]बोहीखोभाइ दीहडक्को वा ।**
**आगारेहिँ अभग्गो, उस्सग्गो एवमाईहिं''** ॥ [ आव.नि./१५१६ ]

''एतैः 'अभग्नः' सर्वथा अखण्डितः 'अविराधितो' देशतोऽप्यविनाशितो 'भवेन्मम कायोत्सर्गः' । कियन्तं कालं यावत् , इत्याह —'**जावेत्यादि**' यावदर्हतां भगवतां नमस्कारेण 'नमो अरिहंताणं'इत्यनेन 'न पारयामि' न पारं गच्छामि । तावत् किम् ? इत्याह —'**तावेत्यादि**' तावन्तं कालं 'कायं' देहं 'स्थानेन' ऊर्ध्वस्थानादिना 'मौनेन' वाग्निरोधेन 'ध्यानेन' मनःसुप्रणिधानेन 'अप्पाणं'ति आर्षत्वादात्मीयं कायं 'व्युत्सृजामि' कुव्यापारनिषेधेन त्यजामि[5] । अयमर्थः —पञ्चविंशत्युच्छ्वासमानं कालं यावदूर्ध्वस्थितः प्रलम्बितभुजो निरुद्धवाक्प्रसरः प्रशस्तध्यानानुगतस्तिष्ठामि स्थान-मौन-ध्यानक्रियाव्यतिरेकेण क्रियान्तराध्यासद्वारेण तु व्युत्सृजामि । पञ्चविंशतिरुच्छ्वासाश्चतुर्विंशतिस्तवेन 'चंदेसु निम्मलयरा' इत्यन्तेन चिन्तितेन पूर्यन्ते, ''**पायसमा ऊसासा**'' [ ] इति वचनात् ।

साम्प्रतं कायोत्सर्गस्य दोषवर्जनाय गाथाद्वयमिदम् —

**''घोडग १ लया २ य खंभे, कुड्डे ३ माले ४ य सबरि ५ वहु ६ नियले ७ ।**
**लंबुत्तर-८ थण ९ [6]उद्धी १० [7]संजइ ११ खलिणे १२ य वायस १३ कविट्ठे १४ ॥१॥**
**[8]सीसोकंपिय १५ मूए १६, अंगुलिभमुहा १७ य वारुणी १८ पेहा १९ ।**
**नाहीकरयलकुप्पर, उस्सारियपारियंमि थुई ॥२॥** [ आव.नि./१५४६-७ ]

अश्ववद्विषमपादः १, वाताहतलतावत् कम्पमानः २, स्तम्भे कुड्ये वाऽवष्टभ्य ३,

---

१. पुरोगमने इति प्रवचनसारोद्धारवृत्तौ प० १६१ ॥ २. सरोतोऽपि न भङ्गः, चौर० इति योगशास्त्र[प० ५९६]प्रवनचसारोद्धार[प० १६१]वृत्त्योः ॥ ३. अगणीओ छिंदिज्ज-मु० । अगणी उच्छिंदिज्ज-इति योगशास्त्रवृत्तौ प० ५९६ । अगणी उछिंदिज्ज-इति ललितविस्तरायाम् प०....॥ ४. बोहीखोभो य-मु० । L.P.C. आवश्यकनिर्युक्ति-योगशास्त्रवृत्ति-प्रवचनसारोद्धारवृत्त्यादिषु अपि बोहीखोभाइ-इति ॥ ५. इतोऽग्रे 'अन्ये तु अप्पाणमिति न पठन्ति'—इति अधिकं योगशास्त्रवृत्तौ प० ५९७ । 'अन्ये तु न पठन्ति एवैनमालापकम्' इति आवश्यकहारिभद्रयां वृत्तौ प० ७८० ॥ ६. उड्डी मु० ॥ ७. संजय-L.P.C. ॥ ८. तुला-योगशास्त्रवृत्तिः प० ७०३ तः, आवश्यकचूर्णिः प० २६८-९, प्रवचनसारोद्धारवृत्तिः प० १५५-१५१ ॥

माले चोत्तमाङ्गं निधाय ४, अवसनशबरीवत् गुह्याग्रे करौ कृत्वा ५ वधूवदवनतोत्तमाङ्गः ६, निगडितवच्चरणौ विस्तार्य[1] मेलयित्वा वा ७, नाभेरुपरि जानुनोरधश्च प्रलम्बमानवसनः ८., दंशादिरक्षार्थमज्ञानाद्वा हृदयं प्रच्छाद्य ९, शकटोद्धिवदङ्गुष्ठौ[2] पार्ष्णी वा मीलयित्वा १०, संयतीवत् प्रावृत्य ११, कविकवद्रजोहरणमग्रतः कृत्वा १२, वायसवच्चक्षुर्गोलकौ भ्रमयन् १३, कपित्थवत् परिधानं पिण्डयित्वा १४, यक्षाविष्ट इव शिरः कम्पयन् १५, मूकवत् हूहूकरणं १६, आलापकगणनार्थमङ्गुली भ्रूवौ वा चालयन् १७, वारुणी–सुरा तद्वत् बुडबुडयन् १८, अनुप्रेक्षमाणो वानर इव ओष्ठपुटं चालयंश्च कायोत्सर्गं करोतीत्येकोनविंशतिः १९।

सूत्रे सर्वमप्यनुष्ठानं साधुमुद्दिश्योक्तमतस्तद्विशेषमाह 'नाहि त्ति' नाभेरधश्चत्वार्यङ्गुलानि चोलपट्टः, 'करयल'त्ति दक्षिणोत्तरपाणिभ्यां मुखवस्त्रिका रजोहरणं च 'कुप्पर'त्ति कूर्पराभ्यां चोलपट्टश्च धरणीयः, 'उस्सारियपारियंमि थुइ'त्ति उत्सारिते पुरिते कायोत्सर्गे नमस्कारेण पारिते जिनस्तुतिर्भणनीया, पाठान्तरं वा[3] 'एगुणवीसा दोसा, काउस्सग्गस्स वज्जिज्जा' इति सुबोधं चैतदिति गाथार्थः । सम्पूर्णकायोत्सर्गश्च 'नमो अरिहंताणं'इति नमस्कारपूर्वकं पारयित्वा चतुर्विंशतिस्तवं सम्पूर्णं पठति । एवं[4] सन्निहिते गुरौ तत्समक्षं गुरुविरहे तु गुरुस्थापनां मनसिकृत्य ईर्यापथिकीप्रतिक्रमणं निर्वर्त्त्य चैत्यवन्दनमुत्कृष्टमारभते[5] ।

अत्र चैवं **बृहद्भाष्योक्तो** विधिः –

**''संनिहिअं भावगुरुं, आपुच्छित्ता खमासमणपुव्वं ।**
**इरिअं पडिक्कमिज्जा, ठवणाजिणसक्खिअं इहरा''** ॥१॥ **[ चे.म.भा./३६५ ]**

न तु जिनबिम्बस्यापि पुरतः स्थापनाचार्यः स्थापनीयो, यतस्तीर्थकरे सर्वपदभणनात् तद्बिम्बेऽपि सर्वपदस्थापनाऽवसीयते एवं । उक्तं च **व्यवहारभाष्ये** –

**''आयरियग्गहणेणं, तित्थयरो इत्थ होइ गहिओ अ ।**
**किं न भवइ आयरिओ, आयारं उवदिसंतो य ?** ॥१॥ **[ व्य.भा./४६८५ ]**
**निदरिसणमित्थ जह खंदएण पुट्ठो य गोयमो भयवं ! ।**
**केण तुहं सिट्ठं ति य, धम्मायरिएण पच्चाह** ॥२॥ **[ व्य.भा./४६८६ ]**

---

१. विस्तार्यते मेल° L. । 'विस्तार्याथवा मीलयित्वा–इति प्रवचनसारोद्धारवृत्तौ प० २६२ ॥ २. शकटोर्द्धिवद° मु० । शकटोद्धिका–इति योगशास्त्रवृत्तौ । शकाटोर्ध्विका–इति प्रवचनसारोद्धारवृत्तौ प० २६२ ॥ ३. वा–मु० C. नास्ति । ४. तुला–योगशास्त्रवृत्तिः प० ५९७ ॥ ५. °मारभ्यते–इति योगशास्त्रवृत्तौ प० ५९७ ॥

**स जिणो जिणाइसयओ १, सो चेव गुरू गुरूवएसाओ २ ।**
**करणाईविणयणाओ, सो चेव मओ उ उज्झाओ''** ॥३॥ [ वि.भा./३२१९ ] त्ति ।

तथा- ''**एवं स्कन्दकसाधुपुङ्गवपुरः श्रीगौतमेनोदिताः,**
**श्रुत्वाऽर्हद्गुरुतादिसर्वपदवीः श्रीवर्द्धमानप्रभोः ।**
**बुध्यध्वं भविकाः ! स्फुटं तदरि( रु )हद्बिम्बेष्वपि;**[1]
**स्थापनाचार्यत्वादि तथा क्षमाश्रमणकैः कार्यो विधिस्तत्पुरः''**[2] ॥१॥ [ ]

एवं साक्षात्समासन्नभावाचार्यासद्भावे क्षमाश्रमणपूर्वं जिनबिम्बाद्यापृच्छ्य[3] ईर्यापथिकी प्रतिक्रमणीया, न तु तद्विनापि । यद् **आगमः –**

''**गुरुविरहंमि य ठवणा, गुरूवएसोवदंसणत्थं च**''[ प० २६२ ] इत्यादि **सङ्घाचार-वृत्तौ ईर्यासम्पदधिकारे ।**

[4]जघन्य-मध्यमे तु चैत्यवन्दने ईर्यापथिकीप्रतिक्रमणमन्तरेणापि भवति इति । [5]उत्कृष्टया वन्दनया वन्दितुकामो विरतः साधुः श्रावकश्चाविरतसम्यग्दृष्टिरपुनर्बन्धको वा यथाभद्रकोऽपि[6] यथोचितं प्रतिलेखितप्रमार्जितस्थण्डिलो भुवनगुरौ विनिवेशितनयनमानसः संवेग-वैराग्यवशादुत्पन्नरोमाञ्चकञ्चुको [7]मुदश्रुपूर्णलोचनोऽतिदुर्लभं भगवत्पादवन्दनमिति बहुमन्यमानो महावृत्तानर्थयुक्तानपुनरुक्तान्नमस्कारान् भणित्वा योगमुद्रयाऽस्खलितादि-गुणोपेतं तदर्थानुस्मरणगर्भं प्रणिपातदण्डकं पठति,

[अत्र च **सङ्घाचारवृत्त्यु**क्तोऽयं विशेषः –'एको द्वौ यावदुत्कर्षतोऽष्टोत्तरं शतं यथाशक्ति भणित्वा पश्चाद्यथाविधि प्रागुक्तस्वरूपं प्रणिपातं कुर्यात् । तथा **चागमः –**

''**पयत्तेण धूवं दाऊण जिणवराणं, [8]अट्ठसयसुद्धगंथजुत्तेहिं अपुणरुत्तेहिं संथुणई**''[9] [ ] इत्यादि । प्रायः पुरुषाश्रितमिदं संभाव्यते, **सूर्याभविजयदेवा**दिविहितत्वेन **द्वितीय-तृतीयोपाङ्गादा**वेवंभणितेर्दर्शनात् **द्रौपद्या**दिप्रस्तावे त्वेतन्नमस्कारप्रधानालापकपरिहारेण **षष्ठाङ्गादा**[10]वतिदेशभणनाच्च । तथा च तत्राक्षराणि ''**तए णं सा दोवई रायवरकन्ना**''[ ] इत्यादि ''**जाव मज्जणघराओ पडिणिक्खमित्ता जेणेव जिणायतणे तेणेव उवागच्छइ,**

---

१. तदरिह° L.P.C. ॥ २. विधिः तत्पुरः C. संशो० । विधिं तत्पुरः–इति सङ्घाचारभाष्यवृत्तौ प० २६३ ।. ३. जिनबिम्बाद्यप्यापृच्छ्य–C. । जिनबिम्बाद्यन्यथापृच्छ्य–इति सङ्घाचारभाष्यवृत्तौ प० २६२ ॥ ४. तुला० योगशास्त्रवृत्तिः प० ५९७ ॥ ५. तुला–योगशास्त्रवृत्तिः ५९८ ॥ ६. यद्वा भ° इति योगशास्त्रवृत्तौ प० ५९८ ॥ ७. मुदाश्रु° इति योगशास्त्रवृत्तौ प० ५९८ ॥ ८. अट्ठसयविसुद्धग्रंथ° P. । अट्ठसयविशुद्धगुत्त° L. । ९. °हिं महावित्तेहिं संथुणइ–P. । १०. °वतिदेशविधानाच्च P.L. ॥

**जाव जिणपडिमाणं आलोए पणामं करेइ**'' [ ] इत्यादि ''**जहा सूरिआभे वामं जाणुं अंचेइ**''[ ] इत्यादि। एवं शिरोन्यस्ताञ्जलिना शक्रस्तवपाठोऽपि तासां विमर्श्यः, तथाभणने हृदादिदर्शनप्रसक्तेः, केवलमञ्जलिभ्रमणमात्रादि न्युञ्छनादिविधानवद्भक्त्यर्थं भवतु नाम, उक्तं च –''**विणओणयाए गायलट्ठीए, चक्खुप्फासे अंजलिप्पग्गहेणं**'' [ ] एवमेव नाममात्रादिना प्रणिधानाद्यपि ज्ञेयं, सर्वत्र विषमासनादित्वं वर्ज्यमित्यैदम्पर्यमस्य। एतदर्थिना **दशाश्रुतस्कन्धचूर्ण्याद्य**वलोक्यमित्यलं विस्तरेण। तत्र च प्रणिपातदण्डके] [१]तत्र त्रयस्त्रिंश-दालापकाः आलापकद्विकादिप्रमाणाश्च विश्रामभूमिरूपा नव सम्पदो भवन्ति। यदाह –

''**दो तिअ चउर ति पंचा दोन्नि अ चउरो अ हुंति [२]तिन्नेव।**
**सक्कथये नव संपय, तित्तीसं हुंति आलावा**'' ॥१॥ [ ]

एताश्च यथास्थानं नामतः प्रमाणतश्च [३]व्याख्यास्यन्ते।

अत्र सूत्रव्याख्या –''**नमोऽत्थु णं अरिहंताणं भगवंताणं**'', तत्र नम इति नैपातिकं पदं पूजार्थं, पूजा च द्रव्यभावसङ्कोचः तत्र कर-शिरः-पादादिद्रव्यसंन्यासो द्रव्यसङ्कोचः, भावसङ्कोचस्तु विशुद्धस्य मनसो नियोगः, अस्त्विति भवतु, प्रार्थना चैषा धर्मबीजम्, आशयविशुद्धिजनकत्वात्, णमिति वाक्यालङ्कारे, अतिशयपूजामर्हन्तीत्यर्हन्तः। यदाहुः –

''**अरिहंति वंदणनमंसणाइ, अरिहंति पूअसक्कारं।**
**सिद्धिगमणं च अरिहा, अरिहंता तेण वुच्चंति**'' ॥१॥ [**आव.नि./९२१**]

तथा अरिहननादर्हन्तः, अरयश्च मोहादयः साम्परायिककर्मबन्धहेतवः, तेषामरीणाम-नेकभवगहनव्यसनप्रापणकारणानां हननादर्हन्तः। तथारजोहननादर्हन्तः, रजश्च घातिकर्म-चतुष्टयम्, येनावृतस्यात्मनः सत्यपि ज्ञानादिगुणस्वभावत्वे घनसमूहस्थगितगभस्तिमण्डलस्य विवस्वत इव तद्गुणानामभिव्यक्तिर्न भवति तस्य हननादर्हन्तः। तथा रहस्याभावादर्हन्तः, तथाहि –भगवतां निरस्तनिरवशेषज्ञानावरणादिकर्मपारतन्त्र्याणां केवलमप्रतिहतमनन्तमद्भुतं ज्ञानं दर्शनं चास्ति, ताभ्यां जगदनवरतं युगपत् प्रत्यक्षतो जानतां पश्यतां च रहस्यं नास्ति, तस्माद्रहस्याभावादर्हन्तः। एषु त्रिष्वर्थेषु पृषोदरादित्वादर्हदिति सिध्यति।

'[४]अरिहंताणं' इति पाठान्तरं वा, तत्र कर्मारिहन्तृभ्यः। आह च –

---

१. तत्र च C. मूल। तत्र च प्रणिपातदण्डके-P. मूल। तत्र च मु० C. सं P. सं० नास्ति। तत्र-L.। तुला-योगशास्त्रवृत्तिः ३।१२३ प० ५९८ ॥ २. तिन्ने य-इति योगशास्त्रवृत्तौ प० ५९९ ॥ ३. व्याख्यास्यते-L.P.C.। कथयिष्यन्ते-इति योगशास्त्रवृत्तौ प० ५९९ ॥ ४. तुला योगशास्त्रटीका ३।१२३ प० ६०१ ॥

**''अट्ठविहं पि हु कम्मं[1], अरिभूयं होइ सयलजीवाणं ।**
**तं कम्मं अरि हंता, अरिहंता तेण वुच्चंति''** ॥१॥ [ आव.नि./९२९ ]

'अरुहंताणं' इत्यपि पाठान्तरम्, तत्र अरोहद्भ्यः —अनुपजायमानेभ्यः क्षीणकर्मबीजत्वात् । उक्तं च —

**''दग्धे बीजे यथाऽत्यन्तं, प्रादुर्भवति नाङ्कुरः ।**
**कर्मबीजे तथा दग्धे, न रोहति भवाङ्कुर''** ॥१॥
[ तत्त्वार्थसूत्रस्य अन्तिमकारिकासु श्लो. ८/शा.स./६१२ ]

शाब्दिकास्तु अर्हच्छब्दस्यैव प्राकृते रूपत्रयमिच्छन्ति, यदूचुर्**हेमसूरयः ''उच्चार्हति''** [ श्रीसि० ८-२-१११ ] चकारादर्दितावपि, तेभ्योऽर्हद्भ्यो नमोऽस्त्विति, नमःशब्दयोगाच्चतुर्थी, **''चतुर्थ्याः षष्ठी''** [ श्रीसि० ८-३-१३१ ] इति प्राकृतसूत्राच्चतुर्थ्याः स्थाने षष्ठी [2]बहुवचनं चाद्वैतव्यवच्छेदनार्हद्बहुत्वख्यापनार्थं, विषयबहुत्वेन नमस्कर्तुः फलातिशयज्ञापनार्थं च ।

एते चार्हन्तो नामाद्यनेकभेदा इति भावार्हत्संपरिग्रहार्थमाह —'भगवद्भ्यः' इति तत्र भगः —समग्रैश्वर्यादिलक्षणः । उक्तं च —

**''ऐश्वर्यस्य समग्रस्य, रूपस्य यशसः श्रिय ।**
**धर्मस्याथ प्रयत्नस्य, षण्णां भग इतीङ्गना''** ॥१॥ [ अ.ना./४२ ]

समग्रं चैश्वर्यं भक्तिनम्रतया त्रिदशपतिभिः शुभानुबन्धिमहाप्रातिहार्यकरणलक्षणं रूपं पुनः सकलसुरस्वप्रभावविनिर्मिताङ्गुष्ठरूपाङ्गारनिदर्शनातिशयसिद्धम्, [3]यशस्तु रागद्वेषपरीषहोपसर्गपराक्रमसमुत्थं त्रैलोक्यानन्दकार्याकालप्रतिष्ठं, श्रीः पुनर्घातिकर्मोच्छेदविक्रमावाप्तकेवलालोकनिरतिशयसुखसम्पत्समन्विता परा धर्मस्तु सम्यग्दर्शनादिरूपो दानशीलतपोभावनामयः साश्रवानाश्रवो महायोगात्मकः, प्रयत्नः पुनः परमवीर्यसमुत्थ एकरात्रिक्यादिमहाप्रतिमाभावहेतुः समुद्घातशैलेश्यव्यवस्थाव्यङ्ग्यः समग्र इति ।

अयमेवम्भूतो भगो विद्यते येषां ते भगवन्तः, तेभ्यो भगवद्भ्यो नमोऽस्त्विति, एवं सर्वत्र क्रिया योजनीया । तदेवम्भूता एव प्रेक्षावतां स्तोतव्या इत्याभ्यामालापकाभ्यां स्तोतव्यसम्पदुक्ता ।

साम्प्रतमस्या हेतुसम्पदुच्यते—**''आइगराणं तित्थगराणं सयंसंबुद्धाणं''** आदिकरणशीलाः

---

१. कम्ममरि-C. । कम्ममरिं-इति योगशास्त्रवृत्तौ प० ६०१ ॥ २. तुला-ललितविस्तरावृत्तिः प० १५ ॥ ३. इत आरभ्य गाथा पर्यन्तं तुला-योगशास्त्रवृत्तिः प० ६०२-६५० ॥

आदिकरणहेतवो वा आदिकराः, सकलनीतिनिबन्धनस्य श्रुतधर्मस्येति सामर्थ्याद् गम्यते, तेभ्यः "[1] **यद्यप्येषा द्वादशाङ्गी न कदाचिन्नासीत् न कदाचिन्न भवति न कदाचिन्न भविष्यति अभूच्च भवति च भविष्यति च**" [ **नन्दीसूत्रे सू० ११८** ] इतिवचनात् नित्या द्वादशाङ्गी, तथाप्यर्थापेक्षया नित्यत्वं शब्दापेक्षया तु स्वस्वतीर्थे श्रुतधर्मादिकरत्वमविरुद्धम् ।

एतेऽपि कैवल्यावाप्त्यनन्तरापवर्गवादिभिरतीर्थकरा एवेष्यन्ते "**अकृत्स्नक्षये कैवल्याभावात्**" [ ] इतिवचनादिति, तद्व्यपोहार्थमाह –'तीर्थकरेभ्यः तीर्यते संसारसमुद्रोऽनेनेति तीर्थं, तच्च प्रवचनाधारश्चतुर्विधः सङ्घः प्रथमगणधरो वा, तत्करणशीलास्तीर्थङ्करा न चाकृत्स्नक्षये कैवल्यं न भवति, घातिकर्मक्षये अघातिकर्मभिः कैवल्यस्याबाधनात् , एवं च ज्ञानकैवल्ये तीर्थकरत्वमुपपद्यते, मुक्तकैवल्ये तु तीर्थङ्करत्वमस्माभिरपि नेष्यते ।

एतेऽपि **सदाशिवा**नुग्रहात् कैश्चिद् बोधवन्त इष्यन्ते, यदाहुः –"**महेशानुग्रहाद् बोधनियमो**" [ ] इति तन्निराकरणार्थमाह –'**स्वयंसंबुद्धेभ्यः**,' स्वयम् –आत्मना तथाभव्यत्वादिसामग्री–परिपाकान्न तु परोपदेशात् , सम्यग् –अविपर्ययेण बुद्धाः –अवगततत्त्वाः स्वयंसंबुद्धाः, तेभ्यः । यद्यपि भवान्तरेषु तथाविधगुरुसन्निधानायत्तावबोधास्ते अभूवन् , तथापि तीर्थङ्करजन्मनि परोपदेशनिरपेक्षा एव बुद्धाः । यद्यपि च तीर्थकरजन्मन्यपि लोकान्तिकत्रिदशवचनात् "**भयवं ! तित्थं पवत्तेहि**" [ **आवश्यकनि० २१५** ] इत्येवंलक्षणाद् दीक्षां प्रतिपद्यन्ते, तथापि वैतालिकवचनानन्तरप्रवृत्तनरेन्द्रयात्रावत् स्वयमेव प्रव्रज्यां प्रतिपद्यन्ते ।

इदानीं स्तोतव्यसम्पद एव हेतुविशेषसम्पदुच्यते –"**पुरिसोत्तमाणं पुरिससीहाणं पुरिसवरपुंडरीयाणं पुरिसवरगंधहत्थीणं**" पुरि शरीरे शयनात् पुरुषा विशिष्टकर्मोदयाद्विशिष्टसंस्थानवच्छरीरवासिनः सत्त्वास्तेषामुत्तमाः सहजतथाभव्यत्वादिभावतः श्रेष्ठाः पुरुषोत्तमाः तथाहि –आसंसारमेते परार्थव्यसनिन उपसर्जनीकृतस्वार्था उचितक्रियावन्तोऽदीनभावाः [2] सफलारम्भिणोऽदृढानुशयाः कृतज्ञतापतयोऽनुपहतचित्ता देवगुरुबहुमानिनो गम्भीराशया इति । न खल्वसमारचितमपि [3] जात्यं रत्नं समानमितरेण, न च समारचितोऽपि काचादिर्जात्यरत्नीभवति, एवं च यदाहुः [4] **सौगताः** –"**नास्तीह कश्चिदभाजनं सत्त्वः**" [ ] इति "**सर्वे बुद्धा भविष्यन्ति**" [ ] इति तत् प्रत्युक्तम् ।

---

१. यद्यपि सैषा–इति योगशास्त्रवृत्तौ प० ६०४ । 'इच्चेइयं दुवालसंगं गणिपिडगं ण कयाइ णासी, ण कयाइ ण भवति, ण कयाइ ण भविस्सति, भुविं च भवति य भविस्सति य' इति नन्दीसूत्रे पाठः ॥ २. सफलारम्भिणो दृढा° मु० C. । ललितविस्तरा–योगशास्त्रवृत्त्योः [प० ६०६] सफलारम्भिणोऽदृढा° इति ॥ ३. जात्य° इति योगशास्त्रवृत्तौ प० ६०६ ॥ ४. °ति च तत्–इति योगशास्त्रवृत्तौ प० ६०६ ॥

एतेऽपि बाह्यार्थसंवादिसत्यवादिभिः[1] **संस्कृताचार्यशिष्यै**[2]र्निरुपमानस्तवार्हा एवेष्यन्ते "**हीनाधिकाभ्यामुपमा मृषे**" [ ] इतिवचनात्, तद्व्यवच्छेदार्थमाह—'पुरुषसिंहेभ्य' पुरुषाः सिंहा इव प्रधानशौर्यादिगुणभावेन पुरुषसिंहाः, यथा सिंहाः शौर्यादिगुणयोगिनः तथा भगवन्तोऽपि कर्मशत्रून् प्रति शूरतया[3], तदुच्छेदं प्रति क्रूरतया, क्रोधादीन् प्रत्यसहनतया, रागादीन् प्रति वीर्ययोगेन, तपःकर्म प्रति धीरतया ख्याताः । तथा एषामवज्ञा परीषहेषु, न भयमुपसर्गेभ्यः, न चिन्ताऽपीन्द्रियवर्गे, न खेदः सँयमाध्वनि, निष्प्रकम्पता[4] सद्ध्याने न चैवमुपमा मृषा, तद्द्वारेण तदसाधारणगुणाभिधानादिति ।

एते च **सुचारुशिष्यैः**[5] सजातीयोपमायोगिन एवेष्यन्ते, विजातीयेनोपमायां तत्सदृश-धर्मापत्या पुरुषत्वाद्यभावप्राप्तिः, यदाहुस्ते—"**विरुद्धोपमायोगे तद्धर्मापत्त्या तदवस्तुत्वम्**" [ ] इति, तद्व्यपोहायाह—'पुरुषवरपुण्डरीकेभ्यः' पुरुषा वरपुण्डरीकाणीव संसारजला-सङ्गादिना धर्मकलापेन पुरुषवरपुण्डरीकाणि तेभ्यः यथा हि पुण्डरीकाणि पङ्के जातानि जले[6] वर्धितानि तदुभयं विहायोपरि वर्त्तन्ते, प्रकृतिसुन्दराणि च भवन्ति, निवासो भुवनलक्ष्म्याः, आयतनं चक्षुराद्यानन्दस्य, प्रवरगुणयोगतो विशिष्टतिर्यग्नरामरैः सेव्यन्ते, सुखहेतवो भवन्ति । तथैतेऽपि भगवन्तः कर्मपङ्के जाताः दिव्यभोगजलेन वर्धिता, उभयं विहाय वर्त्तन्ते, सुन्दराश्चातिशययोगेन, निवासो गुणसम्पदः, हेतवः परमानन्दस्य, केवलादिगुणभावेन भव्यसत्त्वैः सेव्यन्ते, निर्वाणनिबन्धनं च जायन्त इति । नैवं भिन्नजातीयोपमायोगेऽप्यर्थतो विरोधाभावेन यथोदितदोषसम्भव इति । यदि तु विजातीयोपमायोगे तद्धर्मापत्तिरापाद्यते तर्हि सिंहादिसजातीयोपमायोगे तद्धर्माणां पशुत्वादीनामप्यापत्तिः स्यादिति ।

एतेऽपि यथोत्तरं गुणक्रमाभिधानवादिभिः **सुरगुरुविनयै**र्हीनगुणोपमायोग एवाधिक-गुणोपमार्हा इष्यन्ते । अभिधानक्रमाभावेऽभिधेयमपि तथा[7] "**अक्रमवदसत्**" [ ] इति वचनाद्, एतन्निरासायाह—'पुरुषवरगन्धहस्तिभ्यः' पुरुषा वरगन्धहस्तिन इव गजेन्द्रा इव क्षुद्रगजनिराकरणादिना धर्मसाम्येन पुरुषवरगन्धहस्तिनः, यथा गन्धहस्तिनां गन्धेनैव तद्देशविहारिणः क्षुद्रशेषगजा भज्यन्ते, तद्वदीतिपरचक्रदुर्भिक्षमारिप्रभृतयः सर्व एवोपद्रवगजा अचिन्त्यपुण्यानुभावतो भगवद्विहारपवनगन्धादेव भज्यन्त इति । न चैवमभिधानक्रमाभावे

---

१. L.P.C. योगशास्त्रवृत्तिः प० ६०६ । बाह्यार्थसत्त्वादिसत्य(सद्भाव)वादिभिः-मु० ॥ २. संकृता° इति योगशास्त्रटीका प० ६०६ ॥ ३. वीरतया-इति योगशास्त्रवृत्तौ प० ६०६ ॥ ४. न प्रकम्पो ध्याने इति योगशास्त्रवृत्तौ ॥ ५. °प्तेः-इति योगशास्त्रवृत्तौ ॥ ६. जलेन व° इति योगशास्त्रवृत्तौ प० ६०७ ॥ ७. तद्वद् अक्रम° इति योगशास्त्रवृत्तौ ॥

अभिधेयमक्रमवदसदिति वाच्यम् , सर्वगुणानामेकत्रान्योऽन्यसंवलितत्वेनावस्थानात् , तेषां तु यथारुचिस्तोत्राभिधाने न दोषः ।

एवं पुरुषोत्तमत्वादिना प्रकारेण [१]स्तोतव्यसम्पद एव सामान्येनोपयोगसम्पदमाह – ''**लोगुत्तमाणं लोगनाहाणं लोगहियाणं लोगपईवाणं लोगपज्जोअगराणं**'' '**समुदायेष्वपि प्रवृत्ताः शब्दा अनेकधाऽवयवेष्वपि प्रवर्त्तन्त**' इति न्यायाद्यद्यपि लोकशब्देन तत्त्वतः पञ्चास्तिकाया उच्यन्ते ।

''**धर्मादीनां वृत्तिर्द्रव्याणां भवति यत्र तत् क्षेत्रम् ।**
**तैर्द्रव्यैः सह लोकस्तद्विपरीतं ह्यलोकाख्यम्**'' ॥१॥ [ ] इति वचनात् ।

तथापीह लोकशब्देन भव्यसत्त्वलोक ए परिगृह्यते, सजातीयोत्कर्ष एवोत्तमत्वोपपत्तेः । अन्यथाऽभव्यापेक्षया सर्वभव्यानामप्युत्तमत्वान्नैषाममतिशय उक्तः स्यात् । ततश्च भव्यसत्त्वलोकस्य सकलकल्याणनिबन्धनतथाभव्यत्वभावेनोत्तमाः लोकोत्तमास्तेभ्यः ।

तथा 'लोकनाथेभ्यः' । इह लोकशब्देन बीजाधानादिना संविभक्तो रागाद्युपद्रवेभ्यो रक्षणीयो विशिष्टो भव्यलोकः परिगृह्यते, अस्मिन्नेव नाथत्वोपपत्तेः, ''**योगक्षेमकृन्नाथः**'' [ ] इति वचनात् । तदिह येषामेव बीजाधानोद्भेदपोषणैर्योगः, [२]क्षेमञ्च तत्तदुपद्रवाद्यभावेन, त एवेह भव्या लोकशब्देन गृह्यन्ते । न चैते योगक्षेमे सकलभव्यसत्त्वविषये कस्यचित् सम्भवतः, [३]सर्वेषां मुक्तिप्रसङ्गात् , तस्मादुक्तस्यैव लोकस्य नाथा इति ।

तथा 'लोकहितेभ्यः' इह लोकशब्देन सकल एव सांव्यवहारिकादिभेदभिन्नः प्राणिवर्गो गृह्यते, तस्मै सम्यग्दर्शनप्ररूपणरक्षणयोगेन हिताः [४]लोकहिताः ।

तथा 'लोकप्रदीपेभ्यः' अत्र लोकशब्देन विशिष्ट एव [५]तद्देशनाद्यंशुभिर्मिथ्यात्वतमोऽपनयनेन यथार्हं प्रकाशितज्ञेयभावः संज्ञिलोकः परिगृह्यते, तं प्रत्येव भगवतां प्रदीपत्वोपपत्तेः, न ह्यन्धं प्रति प्रदीपनं प्रदीपो नाम, तदेवंविधं लोकं प्रति प्रदीपा लोकप्रदीपाः ।

तथा 'लोकप्रद्योतकरेभ्यः' । इह लोकशब्देन विशिष्टचतुर्दशपूर्वविल्लोकः परिगृह्यते,

---

१. स्तोतव्यसम्पद एव हेतुविशेषसम्पत् तृतीया ३ । इदानीं॰ स्तोतव्यसम्पद् एव सामान्ये॰ इति योगशास्त्रवृत्तौ प० ६०८ ॥ २. क्षेमश्च–मु० । L.P. योगशास्त्रवृत्तावपि क्षेमञ्च–इति ।. ३. सर्वेषामेव मुक्ति॰ इति योगशास्त्रवृत्तौ प० ६०८ ॥ ४. लोकहितास्तथा–मु० नास्ति, L.P. । योगशास्त्रवृत्तावपि [प० ६०९] अस्ति ॥ ५. तद्–योगशास्त्रवृत्तौ [प० ६०९] नास्ति ॥

तत्रैव तत्त्वतः प्रद्योतकरत्वोपपत्तेः, प्रद्योत्यं च सप्तप्रकारं जीवादिवस्तुतत्त्वम् , तत्प्रद्योतकरणं च विशिष्टनामेव पूर्वविदां भवति, तेऽपि षट्स्थानपतिता एव श्रूयन्ते, न च तेषां सर्वेषामेव प्रद्योतः सम्भवति, प्रद्योतो हि विशिष्टा तत्त्वसंवेदनयोग्यता, सा च विशिष्टानामेव भवति। तेन विशिष्टचतुर्दशपूर्वविल्लोकापेक्षया प्रद्योतकराः ।

एवं लोकोत्तमत्वादिभिः पञ्चभिः प्रकारैः परार्थकरणात् स्तोतव्यसम्पदः सामान्येनोपयोगसम्पच्चतुर्थी ।

इदानीमुपयोगसम्पद एवं हेतुसम्पदुच्यते —''**अभयदाणं चक्खुदयाणं मग्गदयाणं सरणदयाणं बोहिदयाणं**''।

इह भयं सप्तधा, इहपरलोकाऽऽदानाकस्मादाऽऽजीवमरणाश्लाघाभेदेन[1]। एतत्प्रतिपक्षतोऽभयं विशिष्टमात्मनः स्वास्थ्यं निःश्रेयसधर्मभूमिकानिबन्धनभूतं, '**धृतिः**' इत्यन्ये। तदित्थम्भूतमभयं गुणप्रकर्षयोगादचिन्त्यशक्तियुक्तत्वात् सर्वथा परार्थकारित्वाद् भगवन्त एव ददतीत्यभयदास्तेभ्यः ।

तथा 'चक्षुर्देभ्यः' । इह चक्षुर्विशिष्टमात्मधर्मरूपं[2] तत्त्वावबोधनिबन्धनं[3] गृह्यते तच्च '**श्रद्धा**' इत्यपरे। तद्विहीनस्याचक्षुष्मत इव वस्तुतत्त्वदर्शनायोगात् , न च मार्गानुसारिणी श्रद्धा सुखेन अवाप्यते, सत्यां चास्यां कल्याणचक्षुषीव भवति वस्तुतत्त्वदर्शनम् , तदियं धर्मकल्पद्रुमस्यावन्ध्यबीजभूता भगवद्भ्य एव भवतीति चक्षुर्ददतीति चक्षुर्दाः ।

तथा 'मार्गदेभ्यः'। इह मार्गो भुजङ्गमनलिकायामतुल्यो विशिष्टगुणस्थानावाप्तिप्रवणः स्वरसवाही क्षयोपशमविशेषः, '**हेतुस्वरूपफलशुद्धा सुखा**' इत्यन्ये। अस्मिन्नसति न यथोचितगुणस्थानावाप्ति, मार्गविषमतया चेतःस्खलनेन प्रतिबन्धोपपत्तेः। मार्गश्च भगवद्भ्य एवेति मार्गं ददतीति मार्गदाः ।

तथा 'शरणदेभ्यः'। इह शरणं भयार्त्तत्राणम् , तच्च संसारकान्तारगतानामतिप्रबलरागादिपीडितानां दुःखपरम्परासङ्क्लेशविक्षोभतः समाश्वासनस्थानकल्पं तत्त्वचिन्तारूपमध्यवसानं, '**विविदिषा**' इत्यन्ये। अस्मिंश्च सति तत्त्वगोचराः शुश्रूषा-श्रवण-ग्रहण-धारणाविज्ञानेहापोहतत्त्वाभिनिवेशाः[4] प्रज्ञागुणा भवन्ति, तत्त्वचिन्तामन्तरेण तेषामभावात्। संभवन्ति[5] तामन्तरेणापि

१. °मरण° इति योगशास्त्रवृत्तौ प० ६०९ ॥ २. °मात्मरूपधर्मं-L. ॥ ३. तथावबोध° इति योगशास्त्रवृत्तौ प० ६१० । ललितविस्तरावृत्तौ तत्त्वावबोध° इति ॥ ४. विज्ञानोहापोह° इति योगशास्त्रवृत्तौ प० ६१० ॥ ५. सम्भवन्तु तु ताम° इति योगशास्त्रवृत्तौ प० ६१० ॥

तदाभासाः, न पुनः स्वार्थसाधकत्वेन भावसाराः। तत्त्वचिन्तारूपं च शरणं भगवद्भ्यः एव भवतीति शरणं ददतीति शरणदाः।

तथा 'बोधिदेभ्यः'। इह बोधिर्जिनप्रणीतधर्मप्राप्तिः, इयं पुनः यथाप्रवृत्ताऽपूर्वाऽनिवृत्तिकरणत्रयव्यापाराभिव्यङ्ग्यमभिन्नपूर्वग्रन्थिभेदतः पश्चानुपूर्व्या प्रशमसंवेग-निर्वेदाऽनुकम्पाऽऽस्तिक्याभिव्यक्तिलक्षणं तत्त्वार्थश्रद्धानं सम्यग्दर्शनमुच्यते, '**विज्ञप्तिः**' इत्यन्ये। पञ्चकमप्येतदपुनर्बन्धकस्य, पुनर्बन्धके यथोदितस्यास्याभावात्। एते च यथोत्तरं पूर्वपूर्वफलभूताः, तथाहि—अभयफलं चक्षुः, चक्षुःफलं मार्गो, मार्गफलं शरणम्, शरणफलं बोधिः सा च भगद्भ्य एव भवतीति बोधिं ददतीति बोधिदाः।

एवमभयदान-चक्षुर्दान-मार्गदान-शरणदान-बोधिदानेभ्य[1] एव यथोदितोपयोगसिद्धेरुप-योगसम्पद एव हेतुसम्पदुक्ता।

साम्प्रतं स्तोतव्यसम्पद एव विशेषेणोपयोगसम्पदुच्यते "**धम्मदयाणं धम्मदेसयाणं धम्मनायगाणं धम्मसारहीणं धम्मवरचाउरंतचक्कवट्टीणं**"। 'धर्मदेभ्यः', इह धर्मश्चारित्रधर्मो गृह्यते, स च यति-श्रावकसम्बन्धिभेदेन द्वेधा, यतिधर्मः सर्वसावद्ययोगविरतिलक्षणः, श्रावकधर्मस्तु देशविरतिरूपः। स चायमुभयरूपोऽपि भगवद्भ्य एव, हेत्वन्तराणां सद्भावेऽपि भगवतामेव प्रधानहेतुत्वादिति धर्मं ददतीति धर्मदाः।

धर्मदत्वं च धर्मदेशनाद्वारेणैव भवति, नान्यथेत्याह—'धर्मदेशकेभ्यः', धर्मं प्रस्तुतं यथाभव्यमवन्ध्यतया देशयन्तीति धर्मदेशकाः।

तथा 'धर्मनायकेभ्यः'। धर्मोऽधिकृत एव तस्य नायका स्वामिनः, तद्वशीकरण-भावात् तदुत्कर्षावाप्तेस्तत्प्रकृष्टफलभोगात्[2] तद्विधानानुपपत्तेश्च[3]

'धर्मसारथिभ्यः' प्रस्तुतस्य धर्मस्य स्वपरापेक्षया सम्यक्प्रवर्त्तन-पालन-दमनयोगतः सारथयो धर्मसारथयः।

तथा 'धर्मवरचातुरन्तचक्रवर्त्तिभ्यः'। धर्मः[4] प्रस्तुत एव, त्रिकोटिपरिशुद्धत्वेन **सुगता**दिप्रणीतधर्मचक्रापेक्षया उभयलोकहितत्वेन चक्रवर्त्त्यादिचक्रापेक्षया च वरं प्रधानं चतसृणां गतीनां नारकतिर्यग्नराऽमरलक्षणानामन्तो यस्मात् तच्चतुरन्तं, चक्रमिव चक्रं रौद्रमिथ्यात्वादिभावशत्रुलवनात्, ते न वर्त्तन्त इत्येवंशीला धर्मवरचतुरन्तचक्रवर्तिनः।

---

१. एव-योगशास्त्रवृत्तौ [प० ६११] नास्ति॥ २. तद्विधानानु(मु)पपत्तेश्च-मु०। L.P.C.। योगशास्त्रवृत्तावपि-[प० ६११] तद्विधानानुपपत्तेश्च-इति॥ ३. °श्च धर्मनायकाः। धर्मसा° इति योगशास्त्रवृत्तौ प० ६११॥ ४. प्रस्तुतः स एव-इति योगशास्त्रवृत्तौ प० ६११॥

'चाउरंत' इति [1]समृद्ध्यादित्वादात्त्वम् । धर्मदत्वादिभिः स्तोतव्यसम्पद [2]एवं विशेषोपयोगसम्पदुक्ता । इदानीं —

> ''**सर्वं पश्यतु वा मा वा, तत्त्वमिष्टं तु पश्यतु ।**
> **कीटसङ्ख्यापरिज्ञानं, तस्य नः क्वोपयुज्यते ?**'' ॥१ ॥ [ प्र.वा./१.३३ ]

इति सर्वदर्शनप्रतिक्षेपेणेष्टतत्त्वदर्शनवादिनः **सौगतान्** प्रतिक्षिपति '**अप्पडिहयवरनाणदंसणधराणं विअट्टछउमाणं**' । 'अप्रतिहते' सर्वत्राप्रतिस्खलिते 'वरे' क्षायिकत्वान् प्रधाने 'ज्ञानदर्शने' विशेषसामान्यावबोधरूपे धारयन्तीति अप्रतिहतवरज्ञानदर्शनधरास्तेभ्यः' । अप्रतिहतवरज्ञानदर्शनधरत्वं च निरावरणत्वेन सर्वज्ञानदर्शनस्वभावतया च । ज्ञानग्रहणं चादौ सर्वा लब्धयः साकारो[3]पयोग(गोप)युक्तस्य भवन्तीति ज्ञापनार्थमिति ।

एते च कैश्चित् तत्त्वतः खल्वव्यावृत्तच्छद्मान एवेष्यन्ते । **यदाहुः** —

> ''**ज्ञानिनो धर्मतीर्थस्य, कर्त्तारः परमं पदम् ।**
> **गत्वाऽऽगच्छन्ति भूयोऽपि भवं तीर्थनिकारतः** ॥१॥ [ ]

तथा- ''**दग्धेन्धनः पुनरुपैति भवं प्रमथ्य, निर्वाणमप्यनवधारितभीरुनिष्ठम् ।**
**मुक्तः स्वयं कृतभवश्च परार्थशूरस्त्वच्छासनप्रतिहतेष्विह मोहराज्यम्**'' ॥१॥
**[ सिद्धसेन. द्वात्रिंशिका २/१८ ]** इति ।

तन्निवृत्त्यर्थमाह —व्यावृत्तच्छद्मभ्यः' । छादयतीति च्छद्म ज्ञानावरणादिघातिकर्म तद्बन्धयोग्यतालक्षणो भवाधिकारश्च, व्यावृत्तं निवृत्तं छद्म [4]येभ्यस्ते तथाविधाः । नाक्षीणेसंसारे अपवर्गः, क्षीणे जन्मपरिग्रह इत्यसत्, हेत्वभावात् । न च तीर्थनिकारजन्मा पराभवो हेतुः, तेषां मोहाभावात्, मोहे वा अपवर्ग इति प्रलापमात्रम् । एवमप्रतिहतवरज्ञानदर्शनधरत्वेन व्यावृत्तच्छद्मतया च स्तोतव्यसम्पद एव सकारणा स्वरूपसम्पत् ।

एते च कल्पिताविद्यावादिभिः परमार्थेनाजिनादय एवेष्यन्ते, ''**भ्रान्तिमात्रमसदविद्या**'' [ ] इति वचनात् । एतद्व्यपोहायाह —''**जिणाणं जावयाणं**'' रागादिजेतृत्वाज्जिनाः । न च रागादीनामसत्त्वम्, प्रतिप्राण्यनुभवसिद्धत्वात् । न चानुभवोऽपि भ्रान्तः, सुखदुःखाद्यनुभवेष्वपि भ्रान्तिप्रसङ्गात् । एवं च जेयसम्भवाज्जिनत्वमविरुद्धम् । एवं रागादीनेव सदुपदेशादिना जापयन्तीति जापकास्तेभ्यः ।

---

१. अतः समृद्ध्यादौ वा [सि० हे० ८।१।४४] इति सूत्रेण आत्त्वम् इति ज्ञेयम् ॥ २. एवं-मु० नास्ति । L.P.C. योगशास्त्रवृत्तावपि [प० ६१२] अस्ति ॥ ३. °पयोगयुक्तस्य-L.P.C. । °पयोगोपयुक्तस्य-इति योगशास्त्रवृत्तौ प० ६१२ ॥ ४. येभ्यः तथा° L.P. । येभ्य तथा° C. ॥

एतेऽपि कालकारणवादिभिर**नन्तशिष्यै**र्भावतोऽतीर्णादय एवेष्यन्ते, "**काल एव कृत्स्नं जगदावर्त्तयति**" [ ] इतिवचनात्। एतन्निरासायाह –"**तिण्णाणं तारयाणं**'। सम्यग्ज्ञानदर्शनचारित्रपोतेन भवार्णवं तीर्णवन्तस्तीर्णाः न चैषां तीर्णानां पारगतानामावर्त्तः सम्भवति, तद्भावे मुक्त्यसिद्धेः। एवं च न मुक्तः पुनर्भवे भवतीति तीर्णत्वसिद्धिः। एवं तारयन्त्यन्यानपीति तारकास्तेभ्यः।

एतेऽपि परोक्षज्ञानवादिभि**र्मीमांसक**भेदैरबुद्धादय एवेष्यन्ते "**अप्रत्यक्षा हि नो बुद्धिः, प्रत्यक्षोऽर्थः**" [**शाबरभाष्य**] इतिवचनात्। एतद्व्यवच्छेदार्थमाह –**बुद्धाण बोहयाणं**"। अज्ञाननिद्राप्रसुप्ते जगत्यपरोपदेशेन जीवाजीवादिरूपं तत्त्वं स्वसंविदितेन ज्ञानेन बुद्धवन्तो बुद्धाः। न चास्वसंविदितेन ज्ञानेनार्थज्ञानं सम्भवति। न ह्यदृष्टप्रदीपो बाह्यमर्थं प्रत्यक्षं करोति। न चेन्द्रियवद[1]संविदितस्यापि ज्ञानस्यार्थप्रत्यक्षीकरणम्, इन्द्रियस्य भावेन्द्रियत्वात्, तस्य च स्वसंविदितरूपत्वात्। यदाह –

"[2]**अप्रत्यक्षोपलम्भस्य, नार्थदृष्टिः प्रसिद्ध्यति**" [**प्रमाणविनिश्चये परिच्छेद-१**]

एवं च सिद्धं बुद्धत्वम्। एवमपरानपि बोधयन्तीति बोधकास्तेभ्यः। एतेऽपि जगत्कर्तृलीनमुक्तवादिभिः **सन्तपनविनेयै**स्तत्त्वतोऽमुक्तादय एवेष्यन्ते "**ब्रह्मवद् ब्रह्मसङ्गतानां स्थितिः**" [ ] इतिवचनात्। एतन्निराचिकीर्षयाऽऽह –**मुत्ताणं मोअगाणं**"। चतुर्गतिविपाकचित्रकर्मबन्धमुक्तत्वान्मुक्ताः कृतकृत्या निष्ठितार्था इत्यर्थः, न च जगत्कर्त्तरि लये निष्ठितार्थत्वं सम्भवति, जगत्करणेन कृतकृत्यत्वायोगात्, हीनादिकरणे च रागद्वेषानुषङ्गः। न चान्यत्राऽन्यस्य लयः सम्भवति, एकतराभावप्रसङ्गात्। एवं जगत्कर्त्तरि लयाभावात् मुक्तत्वसिद्धिः। एवं मोचयन्त्यन्यानपीति मोचकास्तेभ्यः।

एवं च जिनत्व-ज्ञापकत्व-तीर्णत्व-तारकत्व-बुद्धत्व-बोधकत्व-मुक्तत्व-मोचकत्वैः स्वपरहितसिद्धेरात्मतुल्यपरफलकर्तृत्वसम्पदष्टमी।

एतेऽपि बुद्धियोगज्ञानवादिभिः **कापिलै**रसर्वज्ञा असर्वदर्शिनश्चेष्यन्ते "**बुद्ध्यध्यवसितमर्थं पुरुषश्चेतयते**" [ ] इतिवचनात्। एतन्निराकरणायाह –**सव्वण्णूणं सव्वदरिसीणं**"। सर्वं जानन्तीति सर्वज्ञाः, सर्वं पश्यन्तीत्येवंशीलाः सर्वदर्शिनः, तत्स्वभावत्[3]वे सति निरावरणत्वात्। उक्तं च –

---

१. स्वसंवि° इति योगशास्त्रवृत्तौ पृ० ६१४ ॥ २. "सहोपलम्भनियमादभेदो नीलतद्धियोः अप्रत्यक्षोपलम्भस्य नार्थदृष्टिः प्रसिध्यति" । इति बौद्धाचार्यधर्मकीर्तिविरचितं प्रमाणविनिश्चये प्रथमपरिच्छेदे"-इति योगशास्त्रे टिप्पणम् पृ० ६१४ ॥ ३. °त्वे पि सति-L.P.C. ॥

''**स्थितः शीतांशुवज्जीवः प्रकृत्या शुद्धभावया[1]।**
**चन्द्रिकावच्च विज्ञानं, तदावरणमभ्रवत्**'' ॥१॥ [ यो.दृ.स./१८३ ]

न कारणाभावे कर्त्ता तत्फलसाधक इत्यपि[2] नैकान्तिकम्, परनिष्ठितप्लवकस्य तरकाण्डाभावेऽपि प्लवदर्शनात्, इति बुद्धिलक्षणं[3] कारणमन्तरेणापि आत्मनः सर्वज्ञत्व-सर्वदर्शित्वसिद्धिः ।

**अन्यस्**त्वाह —ज्ञानस्य विशेषविषयत्वाद् दर्शनस्य च सामान्यविषयत्वात्तयोः सर्वार्थ-विषयत्वमयुक्तम्, तदुभयस्य सर्वार्थविषयत्वादिति । उच्यते, न हि सामान्यविशेषयोर्भेद एव, किन्तु त एव पदार्थाः समविषमतया सम्प्रज्ञायमानाः सामान्यविशेषशब्दाभिधेयतां प्रतिपद्यन्ते, ततश्च त एव ज्ञायन्ते त एव दृश्यन्ते इति युक्तं ज्ञानदर्शनयोः सर्वार्थविषयत्वमिति ।

आह —एवमपि ज्ञानेन विषमताधर्मविशिष्टा एव गम्यन्ते, न समताधर्मविशिष्टा अपि, दर्शनेन च समताधर्मविशिष्टा एव गम्यन्ते, न विषमताधर्मविशिष्टा अपि, ततश्च ज्ञानदर्शनाभ्यां समताविषमतालक्षणधर्मद्वयाग्रहणादयुक्तमेव तयोः सर्वार्थविषयत्वमिति । न, धर्मधर्मिणोः सर्वथा भेदानभ्युपगमात्, ततश्चाभ्यन्तरीकृतसमताख्यधर्माण एव विषमताधर्मविशिष्टा ज्ञानेन गम्यन्ते, अभ्यन्तरीकृतविषमताख्यधर्माण एव च[4] समताधर्मविशिष्टा दर्शनेन गम्यन्त इति ज्ञानदर्शनयोर्नासर्वार्थविषयत्वमिति सर्वज्ञा सर्वदर्शिनश्च, तेभ्यः ।

एते च सर्वेऽपि सर्वगतात्मवादिभिः मुक्तत्वे सति न नियतस्थानस्था एवेष्यन्ते । यदाहुस्ते —''**मुक्ताः सर्वत्र तिष्ठन्ति, व्योमवत् तापवर्जिताः**'' । [ ]

तन्निराकरणार्थमाह —''**सिवमयलमरुयमणंतमक्खयमव्वाबाहमपुणरावत्तिसिद्धि-गइनामधेयं ठाणं संपत्ताणं**'' । 'शिवं' सर्वोपद्रवरहितत्वात् । 'अचलं' स्वाभाविकप्रायोगिक-चलनक्रियारहितत्वात् । 'अरुजं' व्याधिवेदनारहितं, तन्निबन्धनयोः शरीरमनसोरभावात् । 'अनन्तम्' अनन्तज्ञानविषययुक्तत्वात् । 'अक्षयं' विनाशकारणाभावात् । सततमनश्वर-मित्यर्थः । 'अव्याबाधम्' अकर्मत्वात् । 'अपुनरावृत्ति' न पुनरावृत्तिः —संसारे अवतारो यस्मात् । 'सिद्धिगतिनामधेयं' सिद्ध्यन्ति निष्ठितार्था भवन्त्यस्यां प्राणिन इति सिद्धिः — लोकान्तक्षेत्रलक्षणा, सैव च[5] गम्यमानत्वाद्[7] गतिः सिद्धिगतिरेव नामधेयं यस्य तत्तथा[6] । तिष्ठन्त्यस्मिन्निति स्थानम् व्यवहारतः सिद्धिक्षेत्रम् । यदाहुः —

---

१. भावशुद्धया-इति योगशास्त्रवृत्तौ प० ६१५ ॥ २. इत्यप्यनैका° इति योगशास्त्रवृत्तौ प० ६१५ ॥ ३. P.C. योगशास्त्रवृत्तौ । बुद्धिलक्षण° मु० ॥ ४-५. च-योगशास्त्रवृत्तौ [प० ६१६, ६१७] नास्ति ॥ ६. तत्तथा स्थानम्, ति० इति योगशास्त्रवृत्तौ प० ६२७ ॥ ७. सिद्ध° L. ॥

"**इह बुंदिं चइत्ता णं, तत्थ गंतूण सिज्झइ** [ आ.नि./९५९ ] इति । निश्चयतस्तु स्वरूपमेव, "**सर्वे भावा आत्मभावे तिष्ठन्ति**" [ ] इतिवचनात् । विशेषणानि च निरुपचरितत्वेन यद्यपि मुक्तात्मन्येव भूयसा सम्भवन्ति, तथापि स्थानस्थानिनोर-भेदोपचारादेवं व्यपदेशः, तदेवंविधं 'स्थानं' सम्प्राप्ताः' सम्यगशेषकर्मक्षयविच्युत्या स्वरूपगमनेन परिणामान्तरापत्त्या प्राप्तास्तेभ्यः । न हि विभूनामेवंविधप्राप्तिसम्भवः, सर्वगतत्वे सति सदैकस्वभावत्वात् , नित्यानां चैकरूपतया अवस्थानं तद्भावाव्ययस्य नित्यत्वात् । अतः क्षेत्रासर्वगतपरिणामिनामेवैवं प्राप्तिसम्भव इति । अत एव "**कायप्रमाण आत्मा**" इति सुस्थितं वचनम् । तेभ्यो नम इति क्रियायोगः । एवम्भूता एव प्रेक्षावतां नमस्काराहाः, आद्यन्तसङ्गतश्च नमस्कारो मध्यव्यापीति भावना[1] ।

जितभया अप्येत एव नान्य इति प्रतिपादयितुमुपसंहरन्नाह –"**नमो जिणाणं जियभयाणं**", नमो जिनेभ्यो, जितभयेभ्यः, नमः पूर्ववत् जिना इति च, 'जितभयाः' भवप्रपञ्चनिवृत्तेः क्षपितभयाः ।

तदेवं 'सव्वण्णूणं सव्वदरिसीणं' इत्यत आरभ्य 'नमो जिणाणं जिअभयाणं'-मित्येवमन्तस्त्रिभिरालापकैः प्रधानगुणापरिक्षयप्रधानफलावाप्तिरूपा सम्पन्नवमी । अत्र स्तुतिप्रभावान्न पौनरुक्त्यशङ्का करणीया । यदाहुः –

"**सज्झाय-झाण-तव-ओसहेसु , उवएस-थुइ-पयाणेसु ।**
**संतगुणकित्तणेसु अ, न होंति पुणरुत्तदोसा उ**" ॥१॥ [ आव.नि./१५१८ ]

एताभिर्नवभिः सम्पद्भिः प्रणिपातदण्डक उच्यते, तत्पाठानन्तरं प्रणिपातकरणात् । [ **सङ्घाचारवृत्तौ** तु आदावन्ते च त्रीन् वारान् प्रणिपातः कर्तव्य उक्तः । तथा च तद्ग्रन्थः – "**कह नमंति सीसं ? 'सिरपंचमेणं काएणम्' इत्याचाराङ्गचूर्णिवचनात् पञ्चाङ्गप्रणामं कुर्वता तिक्खुत्तो मुद्धाणं धरणीतलंसि निवेसेइ**", **इत्यागमात् त्रीन् वारान् शिरसा भूमिं स्पृष्ट्वा भूनिहितजानुना करधृतयोगमुद्रया**[2] **शक्रस्तवदण्डको भणनीयः । तदन्ते च पूर्ववत्प्रणामः कार्यः ।** [ **प० १३२** ] इति] जिनजन्मादिषु स्वविमानेषु तीर्थप्रवृत्तेः पूर्वमपि शक्रोऽनेन भगवतः स्तौतीति शक्रस्तवोऽप्युच्यते । अयं च प्रायेण भावार्हद्विषयो, भावार्हदध्यारोपाच्च स्थापनार्हतामपि पुरः पठ्यमानो न दोषाय ।

"**तित्तीसं च पयाइं, नव संपय वण्ण दुसयबासट्ठा ।**
**भावजिणत्थयरूवो, अहिगारो एस पढमो त्ति**" ॥१॥ [ ]

---

१. भावना-योगशास्त्रवृत्तौ [प० ६१७] नास्ति ॥ २. तुला-योगशास्त्रटीका प० ६१८ ॥

अतोऽनन्तरं त्रिकालवर्त्तिद्रव्यार्हद्वन्दनार्थमिमां गाथां **पूर्वाचार्याः** पठन्ति —

**''जे य अईया सिद्धा, जे य भविस्संतणागए काले ।**
**संपइ य वट्टमाणा, सव्वे तिविहेण वंदामि''** ॥१॥ [ **शक्रस्तवे** ] कण्ठ्या ।

ननु कथं द्रव्यार्हन्तो नरकादिगतिं गता अपि भावार्हद्वन्दनार्हा इति चेत् ? उच्यते, सर्वत्र तावन्नाम-स्थापना-द्रव्याऽर्हन्तो भावार्हदवस्थां हृदि व्यवस्थाप्य नमस्कार्या इति । द्रव्यार्हद्वन्दनार्थोऽयं द्वितीयोऽधिकारः ।

[१] ततश्चोत्थाय स्थापनार्हद्वन्दनार्थं पादाश्रितया जिनमुद्रया हस्ताश्रितया च योगमुद्रयापि '**अरिहंतचेइआणं**' इत्यादि सूत्रं पठति । अर्हतां-पूर्वोक्तस्वरूपाणां चैत्यानि — प्रतिमालक्षणानि अर्हच्चैत्यानि । चित्तमन्तःकरणं तस्य भावः कर्म वा वर्णदृढादित्वाट् ट्यण् [ **श्रीसि० ''वर्णदृढादिभ्यष्ट्यण् वा''** ७-१-५९ ] चैत्यं बहुविषयत्वेन चैत्यानि । तत्रार्हतां प्रतिमाः प्रशस्त[२]समाधिवच्चित्तोत्पादकत्वादर्हच्चैत्यानि भण्यन्ते, तेषां वन्दनादिप्रत्ययं कायोत्सर्गं करोमीति सम्बन्धः । कायस्य-शरीरस्य उत्सर्गः कृताकारस्य स्थानमौन-ध्यानक्रियाव्यतिरेकेण क्रियान्तराध्यासमधिकृत्य परित्यागस्तं करोमि । '**वंदणवत्तिआए**' इति, वन्दनम् —अभिवादनं प्रशस्तकायवाङ्मनःप्रवृत्तिरित्यर्थः, तत्प्रत्ययं तन्निमित्तं कथं नाम कायोत्सर्गादेव मम वन्दनं स्याद् ? इति । वत्तियाए इत्यार्षत्वात् सिद्धम् , एवं सर्वत्र द्रष्टव्यम् । तथा **पूयणवत्तियाए**' पूजनप्रत्ययं पूजननिमित्तम् , पूजनं —गन्धमाल्यादि-भिरभ्यर्चनम् , तथा '**सक्कारवत्तियाए**' सत्कारप्रत्ययं सत्कारनिमित्तम् , सत्कारः — प्रवरवस्त्राभरणादिभिरभ्यर्चनम् ।

ननु [३]च यतेः पूजनसत्कारौ अनुचितौ, द्रव्यस्तवत्वात् , श्रावकस्य तु साक्षात् पूजा-सत्कारकर्त्तुः कायोत्सर्गद्वारेण तत्प्रार्थना निष्फला । उच्यते —साधोर्द्रव्यस्तवप्रतिषेधः स्वयङ्करणमधिकृत्य, न पुनः कारणाऽनुमती, यतः —''**अकसिणपवत्तगाणं**''[ आ.नि.भा./ १९४ ] इत्यादि । तथा —''**यस्तृणमयीमपि कुटीम्**'' [ ] इत्यादि । तथा —

**''जिनभवनं जिनबिम्बं, जिनपूजां जिनमतं च यः कुर्यात् ।**
**तस्य नरामरशिवसुखफलानि करपल्लवस्थानि''** ॥ [ उ.सा./२७ ]

इत्युपदेशदानतः कारणसद्भावो, भगवतां च पूजासत्कारदर्शनात् प्रमोदेनानुमतिरपि । यदाह—

**''[४]सुव्वइ अ वइररिसिणा, कारवणं पि य अणुट्ठियमिमस्स ।**
**वायगगंथेसु तहा, एयगया देसणा चेव''** ॥१॥ [ पञ्चव./१२२७ ]

---

१. तुला-योगशास्त्रटीका प० ६१८ ॥ २. °समाधिचित्त° इति योगशास्त्रवृत्तौ प० ६१८ ॥ ३. च-योगशास्त्रटीकायां नास्ति ॥ ४. सुच्चइ-मु० C. । पञ्चवस्तुके-योगशास्त्रवृत्तौ च सुव्वइ-इति । 'श्रूयते च वज्रर्षिणा...' इति पञ्चवस्तुकवृत्तौ ॥

श्रावकस्तु सम्पादयन्नप्येतौ भावातिशयादधिकसम्पादनार्थं पूजासत्कारौ प्रार्थयमानो न निष्फलारम्भः । तथा '**सम्माणवत्तियाए**' सन्मानप्रत्ययं सन्माननिमित्तम् , सन्मानः- स्तुत्यादिभिर्गुणोन्नतिकरणम् , मानसः प्रीतिविशेष इत्यन्ये ।

अथ वन्दनादयः किंनिमित्तम् ? इत्याह –'**बोहिलाभवत्तियाए**' बोधिलाभोऽर्हत्प्रणीत- धर्मावाप्तिस्तत्प्रत्ययं तन्निमित्तम् । बोधिलाभोऽपि किंनिमित्तम् ? इत्याह –'**निरुव- सग्गवत्तियाए**' जन्माद्युपसर्गाभावेन निरुपसर्गो मोक्षस्तत्प्रत्ययं निमित्तम् । ननु साधु- श्रावकयोर्बोधिलाभोऽस्त्येव, तत् किं सतस्तस्य प्रार्थनया ? बोधिलाभमूलो मोक्षोऽप्यन- भिलषणीय एव । उच्यते, क्लिष्टकर्मोदयवशेन बोधिलाभस्य प्रतिपातसम्भवात् , जन्मान्तरे च तस्यार्थ्यमानत्वात् , निरुपसर्गोऽपि तद्द्वारेण प्रार्थ्यत एवेति [1]युक्तोऽनयोरुपन्यासः ।

अयं च कायोत्सर्गः क्रियमाणोऽपि श्रद्धादिविकलस्य नाभिलषितार्थप्रसाधनायालम् इत्याह –"**सद्धाए मेहाए धिईए धारणाए अणुप्पेहाए वड्ढमाणीए ठामि काउस्सग्गं**" '**श्रद्धा**' मिथ्यात्वमोहनीयकर्मक्षयोपशमादिजन्योदकप्रसादकमणिवच्चेतसः प्रसादजननी, तया श्रद्धया, न तु बलाभियोगादिना । एवं मेधया, न जडत्वेन, मेधा च सच्छास्त्रग्रहणपटुः पापश्रुतावज्ञाकारी ज्ञानावरणीयक्षयोपशमजश्चित्तधर्मः, अथवा मेघया –मर्यादावर्त्तितया, नासमञ्जसत्वेन । एवं धृत्या –मनःसमाधिलक्षणया न रागद्वेषाद्याकुलतया । एवं धारणया – अर्हद्गुणाविस्मरणरूपया, न तु तच्छून्यतया । एवमनुप्रेक्षया –अर्हद्गुणानामेव मुहुर्मुहुरनु- स्मरणेन, न तद्वैकल्येन । वर्द्धमानयेति श्रद्धादिभिः प्रत्येकमभिसम्बध्यते । श्रद्धादीनां क्रमोपन्यासो लाभापेक्षया, श्रद्धायां हि सत्यां मेधा, तद्भावे, धृतिः, ततो धारणा, तदन्वनुप्रेक्षा, [2]वृद्धिरप्यासामित्थमेव । तिष्ठामि –करोमि । ननु प्राक् 'करोमि कायोत्सर्गम्'इत्युक्तम् , साम्प्रतं तिष्ठामीति किमर्थमुच्यते ? सत्यम् , '[3]**सत्सामीप्ये सद्वत्प्रत्ययो भवति**' इति करोमि करिष्यामीति क्रियाभिमुख्यं पूर्वमुक्तम् , इदानीं त्वासन्नतरत्वात् क्रियाकालनिष्ठाकालयोः कथञ्चिदभेदात् तिष्ठाम्येवाहमिति ।

किं सर्वथा तिष्ठामि कायोत्सर्गं ? न, इत्याह –'**अन्नत्थ ऊससिएणं**' इत्यादि व्याख्या पूर्ववत् । अत्रापि विश्रामाष्टकोल्लिङ्गनपदानि –

---

१. युक्तस्तयोरुपः° । C. योगशास्त्रवृत्तौ च [प० ६२०] युक्तोऽनयोरुप° इति ॥ २. वृद्धि- रप्यासामेवमेव, तिष्ठामि करोमि कायोत्सर्गम् । ननु-इति योगशास्त्रवृत्तौ प० ६२१ ॥ ३. सत्सामीप्ये सद्वद्वा (सिद्धहैम० ५।४।१) इति सूत्रेण इति ज्ञेयम् ॥

**''अरिहं १ वंदण २ सद्धा ३, अन्न ४ सुहुम ५ एव ६ जा ७ ताव ८ ।**
**अड पय संपय तेआला, वण्णा दुसय तीसहिआ''** ॥२॥ **[ चैत्य./२६ ]**

एष स्थापनार्हद्वन्दनाख्यस्तृतीयोऽधिकार । द्वितीयो दण्डकः । कायोत्सर्गश्चाष्टोच्छ्वासमात्रः, न त्वत्र ध्येयनियमोऽस्ति । कायोत्सर्गान्ते च यद्येक एव ततो 'नमो अरिहंताणं' इति नमस्कारेण पारयित्वा यत्र चैत्यवन्दनां कुर्वन्नस्ति तत्र यस्य भगवतः सन्निहितं स्थापनारूपं तस्य स्तुतिं पठति अत बहवस्तत एक एव स्तुतिं पठति, अन्ये तु कायोत्सर्गस्थिता एव शृण्वन्ति, यावत् स्तुतिसमाप्तिः, ततः सर्वेऽपि नमस्कारेण पारयन्तीति ।

[1]तदन्तरमेतस्यामेवावसर्पिण्यां ये भारते वर्षे तीर्थकृतोऽभूवन् [2]तेषामेकक्षेत्रनिवासादिना आसन्नोपकारित्वेन कीर्त्तनाय [3]चतुर्विंशतिस्तवं पठति पठन्ति वा —

**''लोगस्स उज्जोअगरे, धम्मतित्थयरे जिणे ।**
**अरहंते कित्तइस्सं, चउवीसं पि केवली''** ॥१॥

'अरहंते' इति विशेष्यपदम् , अर्हत उक्तनिर्वचनान् , कीर्त्तयिष्ये —नामोच्चारणपूर्वकं स्तोष्ये । ते च राज्याद्यवस्थासु द्रव्यार्हन्तो भवन्तीति भावार्हत्त्वप्रतिपादनायाह 'केवलिनः' [4]इति, उत्पन्नकेवलज्ञानान् भावार्हत इत्यर्थः, अनेन ज्ञानातिशय उक्तः । तत्सङ्ख्यामाह — 'चतुर्विंशतिम्' अपिशब्दादन्यानपि । किंविशिष्टान् ? 'लोकस्योद्योतकरान्' [5] लोक्यते प्रमाणेन दृश्यत इति लोकः —पञ्चास्तिकायात्मकस्तस्योद्योतकरणशीलान् , केवलालोकप्रदीपेन सर्वलोकप्रकाशकरणशीलानित्यर्थः । ननु केवलिन इत्यनेनैव गतार्थमेतत् , लोकोद्योतकरणशीला एव हि केवलिनः, सत्यम् , विज्ञानाद्वैतनिरासेनोद्योतादुद्योत्यस्य भेददर्शनार्थम् , लोकोद्योतकरत्वं तत् श्रावकानामुपकाराय, न चानुपकारिणः केऽपि स्तौतीति उपकारकत्वप्रदर्शनायाह —'धर्मतीर्थकरान् । धर्म उक्तस्वरूपः, तीर्यतेऽनेनेति तीर्थम् , धर्मप्रधानं तीर्थं धर्मतीर्थम् , धर्मग्रहणाद् द्रव्यतीर्थस्य नद्यादेः **शाक्यादि**सम्बन्धिनश्चाधर्मप्रधानस्य परिहारः, तत्करणशीला धर्मतीर्थकरास्तान् , सदेवमनुजासुरायां पर्षदा सर्वभाषापरिणामिन्या वाचा धर्मतीर्थप्रवर्त्तकानित्यर्थः, अनेन पूजातिशयो वागतिशयश्चोक्तः । अपायापगमातिशयमाह 'जिनान्' रागद्वेषादिजेतृनित्यर्थः । यदुक्तं —'कीर्त्तयिष्यामि' इति तत्कीर्त्तनं कुर्वन्नाह —

१. तदनन्तरं तस्या॰ इति योगशास्त्रवृत्तौ प॰ ६२१ । पुनरत्रान्तरेऽस्मिन्नेवावसर्पिणीकाले-' इतिललितविस्तरायां पाठः ॥ २. तेषामेकैकक्षेत्र॰ C. । तेषामेवैकक्षेत्र॰ इति योगशास्त्रवृत्तौ प॰ ६२१ ॥ ३. तुला-ललितविस्तरा पत्र ८९तः ॥ ४. इति योगशास्त्रवृत्तौ [प॰ ६२२] नास्ति ॥ ५. केवला लोकदीपेन-इति योगशास्त्रवृत्तौ प॰ ६२२ ॥

**"उसभमजियं च वंदे, संभवमभिनंदणं च सुमइं च ।**
**पउमप्पहं सुपासं, जिणं च चंदप्पहं वंदे ॥२॥**
**सुविहिं च पुप्फदंतं, सीयल-सिज्जंस-वासुपुज्जं च ।**
**विमलमणंतं च जिणं, धम्मं संतिं च वंदामि ॥३॥**
**कुंथुं अरं च मल्लिं, वंदे मुणिसुव्वयं नमिजिणं च ।**
**वंदामि रिट्ठनेमिं, पासं तह वद्धमाणं च" ॥४॥**

समुदाय: सुगमार्थ: । पदार्थस्तु विभज्यते—स च सामान्यतो विशेषतश्च । तत्र सामन्यत: ऋषति गच्छति परमपदमि ति ऋषभ:, "**उद्दत्वादौ**" [ **श्रीसि० ८-१-१३१** ] इत्युत्त्वे उसहो । वृषभ इत्यपि, वर्षति सिञ्चति देशनाजलेन दु:खाग्निना दग्धं जगदिति अस्यान्वर्थ:, "**वृषभे वा वा**" [ **श्रीसि० ८-१-१३२** ] इति वकारेण ऋत उत्त्वे अस्यापि उसहो । विशेषतस्तु ऊर्वोर्वृषभो लाञ्छनमभूद् भगवत:, जनन्या च चतुर्दशानां स्वप्नानां आदावृषभो दृष्ट:, तेन ऋषभो वृषभो वा ।१।

परीषहादिभिरनिर्जित इत्यजित: । तथा गर्भस्थे भगवति जननी द्युते राज्ञा न जितेत्यजित: ।२।

सम्भवन्ति प्रकर्षेण भवन्ति चतुस्त्रिंशदतिशयगुणा अस्मिन्निति सम्भव:, शं सुखं भवत्यस्मिन् स्तुते इति शम्भवो वा, तत्र "**शषो: स:**" [ **श्रीसि० ८-१-२६०** ] इति सत्वे सम्भव: । तथा गर्भागतेऽप्यस्मिन्नभ्यधिकसस्यसम्भवात् सम्भव: ।३।

अभिनन्द्यते देवेन्द्रादिभिरित्यभिनन्दन:, तथा गर्भात् प्रभृत्येवाभीक्ष्णं [1]शक्राभिनन्द-नादभिनन्दन: ।४।

सु शोभना मतिरस्येति सुमति:, तथा गर्भस्थे जनन्या: सुनिश्चिता मतिरभूदिति सुमति: ।५।

निष्पङ्कतामङ्गीकृत्य पद्मस्येव प्रभा यस्यासौ पद्मप्रभ:, तथा पद्मशयनदोहदो मातुर्देवतया पूरित इति, पद्मवर्णश्च भगवानिति पद्मप्रभ: ।६।

[2]शोभनानि पार्श्वान्यस्येति सुपार्श्व:, तथा गर्भस्थे भगवति जनन्यपि सुपार्श्वा जातेति सुपार्श्व: ।७।

---

१. शक्राद्यभि° इति योगशास्त्रवृत्तौ प० ६२४ ॥ २. शोभना: पार्श्वा अस्येति–इति योग-शास्त्रवृत्तौ प० ६२४ ॥

चन्द्रस्येव प्रभा ज्योत्स्ना सौम्यलेश्याविशेषोऽस्येति चन्द्रप्रभः, तथा देव्याश्चन्द्रपानदोहदोऽभूच्चन्द्रसमवर्णश्च भगवानिति चन्द्रप्रभः ।८।

शोभनो विधिः सर्वत्र कौशलमस्येति सुविधिः, तथा गर्भस्थे भगवति जनन्यप्येवमिति सुविधिः । पुष्पकलिकामनोहरदन्तत्वात् पुष्पदन्त इति द्वितीयं नाम ।९।

सकलसत्त्वसन्तापहरणात् शीतलः, तथा गर्भस्थे भगवति पितुः पूर्वोत्पन्नो-[1]ऽचिकित्स्यपित्तदाहो जननीकरस्पर्शादुपशान्त इति शीतलः ।१०।

सकलभुवनस्यापि प्रशस्यतमत्वेन श्रेयान् , श्रेयांसावंसावस्येति पृषोदरादित्वाच्छ्रेयांसो वा । तथा गर्भस्थेऽस्मिन् केनाप्यनाक्रान्तपूर्वा देवताधिष्ठितशय्या जनन्या आक्रन्तेति श्रेयो जातमिति श्रेयांसः ।११।

वसवो देवविशेषास्तेषां पूज्यो वसुपूज्यः, "**प्रज्ञादित्वादणि**" [ **श्रीसि० प्रज्ञादिभ्योऽण् ७-२-१६५** ] वासुपूज्यः । तथा गर्भस्थेऽस्मिन् वसु हिरण्यं तेन वासवो राजकुलं पूजितवानिति वासुपूज्यः, वसुपूज्यस्य राज्ञोऽयमिति वा "**तस्येदम्**" [ **श्रीसि० ६-३-१६०** ] इत्यणि वासुपूज्यः ।१२।

विगतमलो विमलानि वा ज्ञानादीन्यस्येति विमलः । तथा गर्भस्थे मातुर्मतिस्तनुश्च विमला जातेति विमलः ।१३।

अनन्तकर्मांशान् जयति, अनन्तैर्वा ज्ञानादिभिर्जयति इति अनन्तजित् । तथा गर्भस्थे जनन्या अनन्त[2]रत्नदाम दृष्टम् । जयति च त्रिभुवनेऽपीति अनन्तजित् , '**भीमो भीमसेन**' इति न्यायादनन्त इति ।१४।

दुर्गतौ प्रपतन्तं सत्त्वसङ्घातं धारयतीति धर्मः । तथा गर्भस्थे जननी दानादिधर्मपरा जातेति धर्मः ।१५।

शान्तियोगात् तदात्मकत्वात् तत्तत्कर्तृत्वाद्वा शान्तिरिति । तथा गर्भस्थे पूर्वोत्पन्नाशिवशान्तिरभूदिति शान्तिः ।१६।

कुः पृथ्वी तस्यां स्थितवानिति निरुक्तात् कुन्थुः तथा [3]गर्भस्थे रत्नानां कुन्थुराशिं दृष्टवतीति कुन्थुः ।१७।

---

१. पूर्वत्पन्नाचिकि° इति योगशास्त्रवृत्तौ प० ६२५ ॥ २. रत्नं दाम-इति योगशास्त्रवृत्तौ प० ६२५ ॥ ३. गर्भस्थे जननी रत्नानां कुन्थुं राशिं इति योगशास्त्रवृत्तौ प० ६२६ ॥

''[1]सर्वोत्तमे महासत्त्वकुले य उपजायते ।
तस्याभिवृद्धये वृद्धैरसावर उदाहृतः'' ॥१॥ [ ]

इतिवचनादरः तथा गर्भस्थे जनन्या स्वप्ने रत्नमयोऽरो दृष्टः इति अरः ।१८।

परीषहादिमल्लजयात् निरुक्तात् मल्लिः । तथा गर्भस्थे मातुः सुरभिकुसुममाल्य-शयनीयदोहदो देवतया पूरित इति मल्लिः ।१९।

मन्यते जगतस्त्रिकालावस्थामिति मुनिः, ''**मनेरुदेतौ चास्य वा**'' [ **श्रीसि० उणादिसू० ६१२** ] इति इप्रत्यये उपान्तस्योत्त्वं, शोभनानि व्रतान्यस्येति सुव्रतः, मुनिश्चासौ सुव्रतश्च मुनिसुव्रतः, तथा गर्भस्थे जननी मुनिवत्सुव्रता जातेति मुनिसुव्रतः ।२०।

[2]परीषहोपसर्गादिनामनाद् ''**नमेस्तु वा**'' इति विकल्पेनोपान्त्यस्येकाराभावपक्षे नमिः, तथा गर्भस्थे भगवति परचक्रनृपैरपि प्रणतिः कृतेति नमिः ।२१।

धर्मचक्रस्य नेमिवन्नेमिः, तथा गर्भस्थे भगवति जनन्या रिष्टरत्नमयो महानेमिर्दृष्ट इति रिष्टनेमिः, अपश्चिमादिशब्दवत् नञ्पूर्वत्वेऽरिष्टनेमिः ।२२।

पश्यति सर्वभावानिति निरुक्तात् पार्श्वः, तथा गर्भस्थे जनन्या निशि शयनीयस्थया अन्धकारे सर्पो दृष्ट इति गर्भानुभावोऽयमित मत्वा पश्यतीति पार्श्वः, पाश्र्वोऽस्य वैयावृत्त्य-करस्तस्य नाथः [3]पार्श्वनाथः '**भीमो भीमसेन**' इतिवत् पार्श्वः ।२३।

उत्पत्तेरारभ्य ज्ञानादिभिर्वर्द्धत इति वर्द्धमानः । तथा गर्भस्थे भगवति ज्ञातकुलं धन-धान्यादिभिर्वर्द्धत इति वर्द्धमानः ।२४।

विशेषाभिधानार्थसंग्राहिकाश्चेमाः **श्रीभद्रबाहुस्वामि**प्रणीता गाथाः —

''[4]**उरूसूसहलंछणमुसभं सुमिणंमि तेण उसहजिणो ।**
**अक्खेसु जेण अजिया, जणणी अजिओ जिणो तम्हा ॥१॥** [ आ.नि./१०९३ ]
**अभिसंभूआ [5]सस्स त्ति, संभवो तेण वुच्चई भयवं ।**
**अभिनंदई अभिक्खं, सक्को अभिनंदणो तेणं ॥२॥** [ आ.नि./१०९४ ]
**जणणी सव्वत्थविणिच्छएसु सुमइ त्ति तेण सुमइजिणो ।**
**पउमसयणम्मि जणणीइ डोहलो तेण पउमाभो ॥३॥** [ आ.नि./१०९५ ]

१. सर्वो नाम महा० इति योगशास्त्रवृत्तौ प० ६२६ ॥ २. 'क्रमिस्तमिस्तम्भेरिच्च नमेस्तु वा'' [उणादि सू० ६१३]इति सूत्रेणेति ज्ञेयम् ॥ ३. पार्श्वनाथः–मु० नास्ति । योगशास्त्रवृत्तावपि [प० ६२७] अस्ति ॥ ४. ऊरूसु उसह° इति आवश्यकनिर्युक्तौ ॥ ५. सास त्ति–आवश्यकनिर्युक्तौ योगशास्त्रवृत्तौ [प० ६२७] च ॥

**गब्भगए जं जणणी[1], जाय सुपासा तओ सुपासजिणो ।**
**जणणिइ चंदपिअणंमि डोहलो तेण चंदाभो ॥४॥** [ आ.नि./१०९६ ]
**सव्वविहीसु अ कुसला, गब्भगए जेण होइ सुविहिजिणो ।**
**पिउणो दाहोवसमो, गब्भगए सीयलो तेणं ॥५॥** [ आ.नि./१०९७ ]
**महरिहसिज्जारुहणम्मि, डोहलो तेण होइ सेज्जंसो ।**
**पूएइ वासवो जं, अभिक्खणं तेण वसुपुज्जो ॥६॥** [ आ.नि./१०९८ ]
**विमलतणुबुद्धिजणणी, गब्भगए तेण होइ विमलजिणो ।**
**रयणविचित्तमणंतं, दामं सुमिणे तओऽणंतो ॥७॥** [ आ.नि./१०९९ ]
**गब्भगए जं जणणी, जाय सुधम्म त्ति तेण धम्मजिणो ।**
**जाओ असिवोवसमो, गब्भगए तेण संतिजिणो ॥८॥** [ आ.नि./११०० ]
**थूहं रयणविचित्तं, कुंथु सुमिणम्मि तेण कुंथुजिणो ।**
**सुविणे[2] अरं महरिहं, पासइ जणणि अरो तम्हा ॥९॥** [ आ.नि./११०१ ]
**वरसुरहिमल्लसुअणम्मि, डोहलो तेण होइ मल्लिजिणो ।**
**जाया जणणी जं, सुव्वइ[3] त्ति मुणिसुव्वओ तम्हा ॥१०॥** [ आ.नि./११०२ ]
**पणया पच्चंतनिवा, दंसियमित्ते जिणम्मि तेण नमी ।**
**रिट्ठरयणं च नेमिं, उप्पयमाणं तओ नेमी ॥११॥** [ आ.नि./११०३ ]
**सप्पं सयणे जणणी, जं पासइ तमसि तेण पासजिणो ।**
**वद्धइ नायकुलं ति अ, तेण जिणो वद्धमाणो त्ति'' ॥१२॥** [ आ.नि./११०४ ]

[4]कीर्त्तनं कृत्वा चेतःशुद्ध्यर्थं प्रणिधानमाह —

**''एवं मए अभिथुआ, विहुअरयमला पहीणजरमरणा ।**
**चउवीसं पि जिणवरा, तित्थयरा मे पसीयंतु'' ॥५॥**

'एवं' अनन्तरोदितेन विधिना 'मया'इत्यात्मनिर्देशः, 'अभिष्टुता' आभिमुख्येन स्तुताः स्वनामभिः कीर्त्तिता इत्यर्थः, किंविशिष्टास्ते ? 'विधूतरजोमलाः' रजश्च मलं च रजोमले विधूते प्रकम्पिते अनेकार्थत्वादपनीते रजोमले यैस्तै विधूतरजोमलाः, बध्यमानं च कर्म रजः, पूर्वबद्धं तु मलम्, अथवा बद्धं रजो निकाचितं मलम्,

---

१. जयणी-मु० । आवश्यकनिर्युक्तौ योगशास्त्रवृत्तौ [प० ९२८] च जणणी-इति ॥ २. सुमिणे-आवश्यकनिर्युक्तौ योगशास्त्रवृत्तौ [प० ६२९] च ॥ ३. सुव्वय त्ति-आवश्यकनिर्युक्तौ योगशास्त्रवृत्तौ [प० ६२९] च ॥ ४. तुला ललितविस्तरा-प० ९२ ॥

अथवा ऐर्यापथं रजः साम्परायिकं मलमिति । यतश्चैवम्भूता अत एव 'प्रक्षीण-जरामरणाः' कारणाभावात् 'चतुर्विंशतिरपि', अपिशब्दादन्येऽपि, 'जिनवराः' श्रुतादि-जिनेभ्यः प्रकृष्टाः, ते च 'तीर्थकरा' इति पूर्ववत् , 'मे' मम, किम् । ? 'प्रसीदन्तु' प्रसादपरा भवन्तु । ते च वीतरागत्वाद्यद्यपि स्तुतास्तोषम् , निन्दिताश्च द्वेषं न यान्ति, तथाऽपि स्तोता स्तुतिफलं निन्दकश्च निन्दाफलमाप्नोत्येव, यथा चिन्तामणिमन्त्रा-द्याराधकः । यदुक्तं **वीतरागस्तवे श्रीहेमसूरिभिः** –

''**अप्रसन्नात् कथं प्राप्यं फलमेतदसङ्गतम् ।**
**चिन्तामण्यादयः किं न, फलन्त्यपि विचेतनाः ?**'' ॥१॥ [ वी.स्त.१९।३ ] इति ।

अथ यदि न प्रसीदन्ति तत् किं प्रसीदन्त्विति वृथा प्रलापेन ?, नैवम् , [1]भक्त्यतिशयेन एवमभिधानेऽपि न दोषः । यदाह –

''**क्षीणक्लेशा एते, न हि प्रसीदन्ति न स्तवोऽपि वृथा ।**
[2]**तत्स्वभावविशुद्धेः, प्रयोजनं कर्म्मविगम इति**'' ॥१॥ [ ]

तथा- ''**कित्तियवंदियमहिआ, जेए लोगस्स उत्तमा सिद्धा ।**
**आरोग्गबोहिलाभं, समाहिवरमुत्तमं दिंतु**'' ॥६॥ [ ]

'कीर्त्तिताः' स्वनामभिः प्रोक्ताः, 'वन्दिताः' त्रिविधयोगेन सम्यग् स्तुताः, 'महिताः' पुष्पादिभिः पूजिता । मइआ इति पाठान्तरम् [3]तत्र मया, क एते ? इत्याह – 'य एते' 'लोकस्य' प्राणिवर्गस्य कर्ममलकलङ्काभावेनोत्तमाः प्रकृष्टाः, सिद्ध्यन्ति स्म सिद्धाः कृतकृत्या इत्यर्थः, अरोगस्य भाव आरोग्यं सिद्धत्वम् तदर्थं बोधिलाभ अर्हत्प्रणीतधर्मप्राप्ति-रारोग्यबोधिलाभः, स ह्यनिदानो मोक्षायैव भवति तम् तदर्थं च समाधिवरं वरसमाधिं परमस्वास्थ्यरूपं भावसमाधिमित्यर्थः । असावपि तारतम्यभेदादनेकधैव अत आह – 'उत्तमं' सर्वोत्कृष्टम् , 'ददतु' प्रयच्छन्तु , एतच्च भक्त्योच्यते । यत उक्तम् –

''**भासा असच्चमोसा, नवरं भत्तीइ भासिआ एसा ।**
**न हु खीणपेज्जदोसा, दिंति समाहिं च बोहिं च**'' ॥१॥ [ आ.नि./११०८ ]

तथा- ''**चंदेसु निम्मलयरा, आइच्चेसु अहियं पयासयरा ।**
**सागरवरगंभीरा, सिद्धा सिद्धिं मम दिसंतु**'' ॥८॥

---

१. भक्त्यतिशयत-इति योगशास्त्रवृत्तौ प० ६३० ॥ २. तत्स्वभाव(स्वाभाव्य)विशुद्धेः मु० । तत्स्वभावभाव(सद्भाव)विशुद्धेः-इति ललितविस्तरायां प० ९३ । L.P.C. योगशास्त्रवृत्तावपि-तत्स्वभावविशुद्धेः-इति ॥ ३. तत्र मयका मया एते ? इति योगशास्त्रवृत्तौ प० ६३१ ॥

''**पञ्चम्यास्तृतीया च**'' [ श्रीसि० ८-३-१३६ ] इति पञ्चम्यर्थे सप्तमी, अतश्चन्द्रेभ्यो निर्मलतराः, सकलकर्ममलापगमात् । पाठान्तरं वा 'चंदेहिं निम्मलयरा' । एवमादित्येभ्यः अधिकं प्रकाशकराः, केवलोद्योतेन लोकालोकप्रकाशकत्वात् । उक्तं च –

''**चंदाइच्चगहाणं, पहा पयासेइ परिमियं खित्तं ।**
**केवलियनाणलंभो, लोआलोअं पयासेइ**'' ॥१॥ [ आ.नि./११०२ ]

सागरवरः स्वयम्भूरमणाख्यः समुद्रः परीषहोपसर्गाद्यक्षोभ्यत्वात् तस्मादपि गम्भीराः, सिद्धाः कर्मविगमात् कृतकृत्याः, सिद्धिं परमपदप्राप्तिम्, मम दिशन्तु प्रयच्छन्तु ।

''**अडवीसपयपमाणा, इह संपय वण्ण दुसयछप्पन्ना ।**
**नामजिणत्थयरूवो चउत्थओ एस अहिगारो**'' ॥१॥ [ ]

इति नामार्हद्वन्दनाधिकाररूपश्चतुर्थोऽधिकारस्तृतीयो दण्डकः ।

[१]एवं चतुर्विंशतिस्तवमुक्त्वा सर्वलोक एवार्हच्चैत्यानां वन्दनाद्यर्थं कायोत्सर्गकरणायेदं पठति पठन्ति वा –''**सव्वलोए अरिहंतचेइयाणं करेमि काउस्सग्गमित्यादि वोसिरामि**'' इति यावत् । व्याख्या पूर्ववत् । नवरं –[२]सर्वश्चासौ लोकश्च अधऊर्ध्वतिर्यग्भेदस्तस्मिंस्त्रैलोक्य इत्यर्थः, अधोलोके हि चमरादिभवनेषु, तिर्यग्लोके द्वीपाचलज्योतिष्कविमानादिषु, ऊर्ध्वलोके सौधर्मादिषु सन्त्येवार्हच्चैत्यानि । ततश्च [३]मौलचैत्यं समाधिकारणमिति मूलप्रतिमायाः प्राक् स्तुतिरुक्ता । इदानीं सर्वे अर्हन्तस्तद्गुणा इति सर्वलोकग्रहः, तदनुसारेण सर्वतीर्थकरसाधारणी [४]स्तुतिः । अन्यथा अन्यकायोत्सर्गेऽन्या स्तुतिरिति न सम्यग्, अतिप्रसङ्गात्, इति सर्वतीर्थकराणां स्तुतिरुक्ता । एष सर्वलोकस्थापनार्हत्स्तवरूपः पञ्चमोऽधिकारः ।

इदानीं येन ते भगवन्तस्तदभिहिताश्च भावाः स्फुटमुपलभ्यन्ते तत्प्रदीपस्थानीयं सम्यक् श्रुतमर्हति कीर्त्तनम्, तत्रापि तत्प्रणेतॄन् भगवतस्तत्प्रथमं स्तौति –

''[५]**पुक्खरवरदीवड्ढे, धायइसंडे य जंबुदीवे य ।**
**भरहेरवयविदेहे, धम्माइगरे नमंसामि**'' ॥१॥

भरतं भरतक्षेत्रम्, ऐरवतमैरवतक्षेत्रम्, विदेहमिति '**भीमो भीमसेन**' इति न्यायात्

---

१. तुला–ललितविस्तरा प० ९६ ॥ २. तुला–आवश्यकचूर्णिः प० २५७, आवश्यकहरिभद्रीवृत्तिः प० ७८७ ॥ ३. मौलं चैत्यं–इति ललितविस्तरायां प० ९७ A ॥ ४. स्तुतिरुक्ता–L. ॥ ५. तुला–आवश्यकचूर्णिः प० २५८, आवश्यकहारिभद्रीवृत्तिः प० ७८८, ललितविस्तरा प० ॥

महाविदेहक्षेत्रं एवं[1] समाहारद्वन्द्वः तेषु भरतैरवतविदेहेषु , 'धर्मस्य' श्रुतधर्मस्य, 'आदिकरान्' सूत्रतः प्रथमकरणशीलान् 'नमस्यामि' स्तुवे। क्व[2] तानि भरतैरवतमहाविदेहक्षेत्राणि ? इत्याह — पुष्पकराणि पद्मानि, तैर्वर पुष्करवरः, स चासौ द्वीपश्च पुष्करवरद्वीपस्तृतीयो द्वीपस्तस्यार्द्धं मानुषोत्तरचलादर्वाग्भागवर्त्ति, तत्र द्वे भरते द्वे ऐरवते द्वे महाविदेहे तथा धातकीनां खण्डानि वनानि यस्मिन् स धातकीखण्डो द्वीपस्तस्मिन् द्वे भरते द्वे ऐरवते द्वे महाविदेहे । जम्ब्वा उपलक्षितस्तत्प्रधानो वा द्वीपो जम्बूद्वीपः, अत्रैकं भरतमेकमैरवतमेकं च महाविदेहमित्येताः पञ्चदश कर्मभूमयः । शेषास्त्वकर्मभूमयः । यदाह —"**भरतैरवतविदेहाः कर्मभूमयोऽन्यत्र देवकुरूत्तरकुरुभ्यः**"[ **श्रीतत्त्वा० अ० ३-१६** ] महत्तरक्षेत्रप्राधान्याङ्गीकरणाच्च पश्चानुपूर्व्या निर्देशः । धर्मादिकरत्वं च वचनापौरुषेयत्वनिराकरणादेव व्यक्तम् । उक्तं च —"**इणमच्चंत-विरुद्धं, वयणं चापोरुसेअं च**"[ ] त्ति ।

नन्वेवमपि कथं धर्मादिकरत्वं भगवताम् ? "**तप्पुव्विआ अरहया**"[ **आवश्यकनिर्युक्तौ गा० ५६७** ] इति वचनात् वचनस्यानादित्वात् ? नैवम् , बीजाङ्कुरवत्तदुपपत्तेः, बीजाद्धि अङ्कुरो भवति, अङ्कुराच्चबीजमिति । एवं भगवतां पूर्वजन्मनि श्रुतधर्माभ्यासात् तीर्थकरत्वम् , तीर्थकृतां च श्रुतधर्मादिकरत्वमदुष्टमेव । न चैवमपि वचनपूर्वकमेव सर्वज्ञत्वमिति नियमः, **मरुदेव्या**दौ व्यभिचारादिति वाच्यम् । इत्थमपि शब्दरूपवचनपूर्वकत्वनियमाभावेऽपि अर्थपरिज्ञानरूपवचनपूर्वकत्वनियमस्याव्याहतत्वादित्यलं प्रसङ्गेन ।

एवं श्रुतधर्मादिकराणां स्तुतिरुक्ता, एष षष्ठोऽधिकारः । इदानीं श्रुतधर्मस्याह —

"**तमतिमिरपडलविद्धंसणस्स सुरगणनरिंदमहिअस्स ।**
**सीमाधरस्स वंदे, पप्फोडियमोहजालस्स**" ॥२॥

तमोऽज्ञानम् , तदेव तिमिरम् , अथवा बद्ध-स्पृष्ट-निधत्तं ज्ञानावरणीयं कर्म तमः, निकाचितं तिमिरम् ततस्तमस्तिमिरस्य, तमस्तिमिरयोर्वा पटलं वृन्दम् , तद्विध्वंसयति विनाशयतीति "**नन्द्यादित्वादने**" [ **श्रीसि० ५-१-१२** ] तमस्तिमिरपटलविध्वंसनस्तस्य, अज्ञाननिरासेनैवास्य प्रवृत्तेः । 'सुरगणैः' चतुर्विधामरनिकायैः 'नरेन्द्रैः' चक्रवर्त्यादिभिः 'महितः' पूजितस्तस्य । आगममहिमां हि कुर्वन्त्येव सुरादयः । सीमां मर्यादां[3] धारयतीति सीमाधरस्तस्य, श्रुतधर्मस्य[4] इति विशेष्यम् , ततः कर्मणि द्वितीया, तस्याश्च "**क्वचिद् द्वितीयादेः**" [ **श्रीसि० ८-३-१३४** ] इति प्राकृतसूत्रात् षष्ठी, अतस्तं वन्दे । तस्य वा

---

१. एवं (षां) समा° मु० । L.P.C. । योगशास्त्रवृत्तावपि [प० ६३३] एवं समा० इति ॥ २. क्व त्यानि-मु० । क्व यानि-इति योगशास्त्रवृत्तौ प० ६३३ ॥ ३. मर्यादां सीमायां वा धार° इति योगशास्त्रवृत्तौ प० ६३५ ॥ ४. श्रुतधर्म इति-इति योगशास्त्रवृत्तौ प० ६३५ ॥

यन्माहात्म्यं तद्वन्दे इति सम्बन्धे षष्ठी, अथवा तस्य वन्दे वन्दनं करोमीति । प्रकर्षेण स्फोटितं विदारितं मोहजालं मिथ्यात्वादिरूपं येन स तथा तस्य। श्रुतधर्मे हि सति विवेकिनो मोहजालं विलयमुपयात्येव ।

इत्थं श्रुतमभिवन्द्य तस्यैव गुणोपदर्शनद्वारेणाप्रमादगोचरतां प्रतिपादयन्नाह —

**''जाईजरामरणसोगपणासणस्स, कल्लाणपुक्खलविसालसुहावहस्स ।**
**को देवदाणवनरिंदगणच्चियस्स, धम्मस्स सारमुवलब्भ करे पमायं''** ॥३॥

कः ? सचेतनो 'धर्मस्य' श्रुतधर्मस्य 'सारं' सामर्थ्यं 'उपलभ्य' विज्ञाय, श्रुत-धर्मोदितेऽनुष्ठाने 'प्रमादम्' अनादरं कुर्यात्, न कश्चिद् कुर्यादित्यर्थः । किंविशिष्टस्य श्रुतधर्मस्य ? जातिर्जन्म, जरा विस्रसा[1], मरणं प्राणनाशः, शोको मानसो दुःखविशेषः, तान् प्रणाशयति अपनयति जातिजरामरणशोकप्रणाशनस्तस्य । श्रुतधर्मस्यानुष्ठाद्धि[2] जात्यादयः प्रणश्यन्त्येव, अनेनास्यानर्थप्रतिघातित्वमुक्तम्। कल्यमारोग्यमणति शब्दयतीति कल्याणम्, पुष्कलं सम्पूर्णम्, न च तदल्पम्, किन्तु विशालं विस्तीर्णम्, एवम्भूतं सुखमावहति प्रापयतीति कल्याणपुष्कलविशालसुखावहस्तस्य, तथा च श्रुतधर्मोक्तानुष्ठानादुक्त-लक्षणमपवर्गसुखमवाप्यत एव, अनेन चास्य विशिष्टार्थप्रापकत्वमाह । देवानां दानवानां नरेन्द्राणां च गणैरर्चितस्य पूजितस्य। सुरगणनरेन्द्रमहितस्येत्यस्यैव निगमनं देवदाणवेत्यादि । यतश्चैवतमतः —

**''सिद्धे भो पयओ नमो जिणमए नंदी सया संजमे,**
**देवंनागसुवण्णकिन्नरगणस्सब्भूयभावच्चिए ।**
**लोगो जत्थ पइट्ठिओ जगमिमं तेलुक्कमच्चासुरं;**
**धम्मो वड्ढउ सासओ विजयओ धम्मुत्तरं वड्ढउ''** ॥४॥

'सिद्धः' फलाव्यभिचारेण प्रतिष्ठितः, अथवा सिद्धः सकलनयव्यापकत्वेन त्रिकोटी-परिशुद्धत्वेन च प्रख्यातस्तस्मिन्[3] । भो इत्यतिशायिनामामन्त्रणम्, पश्यन्तु भवन्तः, प्रयतोऽहं यथाशक्त्येतावन्तं कालं प्रकर्षेण यतः, इत्थं परसाक्षिकं प्रयतो भूत्वा पुनर्नमस्करोति 'नमो जिणमए' नमो जिनमताय, प्राकृतत्वाच्चतुर्थ्याः, सप्तमी, कुर्वे इति शेषः । प्रयतो भूत्वा जिनमताय नमस्करोमीत्यर्थः । अस्मिंश्च सति 'नन्दिः' समृद्धिः

१. विश्रसा-इति योगशास्त्रवृत्तौ प० ६३२ ॥ २. श्रुतधर्मोक्तानुष्ठानाद्धि-इति योगशास्त्रवृत्तौ प० ६३५ ॥ ३. प्रत्याख्यात° मु० C.P. मूल L. मूल । P. सं L. सं० योगशास्त्रवृत्तावपि [प० ६३६] प्रख्यात° इति । सिद्धे प्रतिष्ठिते प्रख्याते इति ललितविस्तारायाम् प० १०२ ॥

'सदा' सर्वकालम्, 'संयमे' चारित्रे भूयात्। उक्तं च –'**पढमं नाणं तओ दया**' [ **दशवैकालिके ४-१०** ] किंविशिष्टे संयमे ? 'देवनागसुपर्णकिन्नरगणैः सद्भूतभावेनार्चिते' देवा [१]वैमानिनः, नागा धरणादयः, सुपर्णा गरुडाः, किन्नरा व्यन्तरविशेषाः, उपलक्षणं शेषाणाम्, देवमित्यनुस्वारश्छन्दःपूरणे, तथा च संयमवन्तोऽर्च्यन्त एव देवादिभिः। यत्र जिनमते, किं यत्र ? लोकनं लोको ज्ञानम्, प्रतिष्ठितस्तद्वशीभूतः, तथा जगदिदं ज्ञेयतया प्रतिष्ठितमिति योगः। केचिन्मनुष्यलोकमेव जगन्मन्यन्ते अत आह –'त्रैलोक्यमर्त्यासुरम्, आधाराधेयरूपम्, अयमित्थम्भूतो 'धर्मः' श्रुतधर्मो 'वर्द्धतां' वृद्धिमुपयातु, शाश्वतमिति क्रियाविशेषणं शाश्वतमप्रच्युत्या, वर्द्धतामिति, 'विजयतः' परप्रवादिविजयेन, 'धर्मोत्तरं' चारित्रधर्मोत्तरं चारित्रधर्मप्राधान्यं यथा स्यादित्यर्थः। 'वर्द्धतां' पुनर्वृद्ध्यभिधानं मोक्षार्थिना प्रत्यहं ज्ञानवृद्धिः कार्येति प्रदर्शनार्थम्। तथा च तीर्थकरनामकर्म्महेतून् प्रतिपादयतोक्तम्।

"**अपुव्वनाणगहणे**" [ **आवश्यकनिर्युक्तौ १८१** ] इति। प्रणिधानमेतन्मोक्षबीजकल्पं [२]परमार्थतोऽनाशंसारूपमेवेति प्रणिधानं कृत्वा श्रुतस्यैव वन्दनाद्यर्थं कायोत्सर्गार्थं पठति पठन्ति वा –

"**सुअस्स भगवओ करेमि काउस्सग्गमित्यादि वोसिरामि**" इति यावत्। अर्थः पूर्ववत्, नवरं –'श्रुतस्य' इति प्रवचनस्य **सामायिकादेर्बिन्दुसार**पर्यन्तस्य 'भगवतो' यशोमाहात्म्यादियुक्तस्य। ततः कायोत्सर्गकरणम्, पूर्ववत् पारयित्वा श्रुतस्य स्तुतिं पठति।

"**सुअनाणत्थयरूवो, अहिगारो होइ एस सत्तमओ।**
**इह पय संपय सोलस, नवुत्तरा वण्ण दुन्निसया**" ॥१॥ [ ]

चतुर्थो दण्डकः। ततश्चानुष्ठानपरम्पराफलभूतेभ्यः सिद्धेभ्यो नमस्कारकरणायेदं पठति पठन्ति वा –[३]

"**सिद्धाणं बुद्धाणं, पारगयाणं परंपरगयाणं।**
**लोअग्गमुवगयाणं, नमो सया सव्वसिद्धाणं**" ॥१॥ [ ]

सिद्ध्यन्ति स्म सिद्धाः, ये येन गुणेन निष्पन्ना परिनिष्ठिताः सिद्धौदनवन्न पुनः साधनीया इत्यर्थः, तेभ्यो नम इति योगः। ते च सामान्यतः कर्मादिसिद्धा अपि भवन्ति। यथोक्तम् –

---

१. विमा° इति योगशास्त्रवृत्तौ प० ६३६ ॥ २. परमार्थतो नाशंसा° मु० ॥ ३. दृश्यताम् आवश्यकचूर्णिः प० २६२, आवश्यकहारिभद्रीयवृत्तिः प० ७८९, ललितविस्तरा प० १०६ ॥

**"कम्मे सिप्पे य विज्जा य[1] मंते जोगे य आगमे ।**
**अत्थ-जत्ता अभिप्पाए, तवे कम्मक्खए इय"** ॥१॥ [ ]

तत्र [2]कर्माचार्योपदेशरहितं भारवहन-कृषि-वाणिज्यादि, तत्र सिद्धः परिनिष्ठितः **सह्यगिरिसिद्ध**वत् । शिल्पं त्वाचार्योपदेशजं तत्र सिद्धः [3]**कोकासवार्द्धकि**वत् । विद्या जपहोमादिना फलदा, मन्त्रो जपादिरहितः पाठमात्रसिद्धः, स्त्रीदेवताधिष्ठा[4]ना (वा) विद्या, पुरुषदेवताधिष्ठानस्तु मन्त्रः । तत्र विद्यासिद्धः **आर्यखपुट**वत्, मन्त्रसिद्ध **स्तम्भाकर्षक**वत् । योग [5]ओषधिसंयोगः तत्र सिद्धो योगसिद्धः **आर्यसमित**वत् । आगमो द्वादशाङ्गं प्रवचनं तत्रासाधारणार्थावगमात् सिद्धः आगमसिद्धो **गौतम**वत् । अर्थो धनं स इतरासाधारणो यस्य सोऽर्थसिद्धो **मम्मण**वणिग्वत् । जले स्थले वा यस्याविघ्ना यात्रा स यात्रासिद्धः **तुण्डिक**वत् । यमर्थमभिप्रैति तमर्थं तथैव यः साधयति सोऽभिप्राय-सिद्धो**ऽभयकुमार**वत् । यस्य सर्वोत्कृष्टं तपः स तपःसिद्धो **दृढप्रहारि**वत् । यः कर्मक्षयेण ज्ञानावरणीयाद्यष्टकर्मनिर्मूलनेन सिद्धः स कर्मक्षयसिद्धो **मरुदेवी**वत् । अतः कर्मादिसिद्धव्यपोहेन कर्मक्षयसिद्धपरिग्रहार्थमाह 'बुद्धेभ्यः' अज्ञाननिद्राप्रसुप्ते जगति अपरोपदेशेन जीवादिरूपं तत्त्वं बुद्धवन्तो बुद्धाः बुद्धत्वानन्तरं कर्मक्षयं कृत्वा सिद्धा इत्यर्थः, तेभ्यः ।

एते च संसारनिर्वाणोभयपरित्यागस्थितिमन्तः कैश्चिदिष्यन्ते –

**"न संसारे न निर्वाणे, स्थितो भ[6]( भु )वनभूतये ।**
**अचिन्त्यः सर्वलोकानां, चिन्तारत्नाधिको महान्"** ॥ [ ]

इति वचनात् । एतन्निरासायाह –'पारगतेभ्यः' पारं पर्यन्तं संसारस्य प्रयोजनव्रातस्य वा गताः पारगतास्तेभ्यः ।

एते च यदृच्छावादिभिः कैश्चिद्दरिद्रराज्याप्तिवदक्रमसिद्धत्वेनाभिधीयन्ते, तद्व्यु-दासार्थमाह–'परम्परगयाणं' परम्परया चतुर्दशगुणस्थानक्रमारोहरूपया अथवा कथञ्चित् कर्मक्षयोपशमादिसामग्र्या सम्यग्दर्शनम्, तस्मात् सम्यग्ज्ञानम्, तस्मात् सम्यक्चारित्र-मित्येवम्भूतया 'गताः' मुक्तिस्थानं प्राप्ताः परम्परागतास्तेभ्यः ।

---

१. ए-इति योगशास्त्रवृत्तौ प- ६३८ ॥ २. विस्तरेण जिज्ञासुभिः द्रष्टव्या आवश्यकसूत्रस्य मलयगिरिया वृत्तिः ॥ ३. कोकासवर्ध° इति योगशास्त्रवृत्तौ प० ६३८ ॥ ४. °ना विद्या-L.P.C. । °ना वा विद्या-इति योगशास्त्रवृत्तौ प० ६३८ ॥ ५. औषधसंयोगः-इति योगशास्त्रवृत्तौ प० ६३८ ॥ ६. भवन° L.P.C. । भुवन° योगशास्त्रवृत्तौ प० ६३९ ॥

एते च कैश्चिदनियतदेशा अभ्युपगम्यन्ते –

**''यत्र क्लेशक्षयस्तस्य, विज्ञानमवतिष्ठते ।**
**बाधा च सर्वथास्येह, तदभावान्न जातुचिद्''** ॥१॥ [ ]

इति वचनात् । एतन्निरासायाह –'लोकाग्रमुपगतेभ्यः' लोकाग्रमीषत्प्राग्भाराख्यायाः पृथिव्या उपरि क्षेत्रं तदुप सामीप्येन तदपराभिन्नदेशतया निःशेषकर्मक्षयपूर्वकं गताः प्राप्ताः । उक्तं च –

**''जत्थ य एगो सिद्धो, तत्थ अणंता भववक्खयविमुक्का ।**
**[1]अण्णोण्णमणाबाहं, चिट्ठंति सुही सुहं पत्ता''** ॥१॥ [ आ.नि./९७५ ] तेभ्यः ।

ननु क्षीणकर्मणो जीवस्य कथं लोकाग्रं यावद् गतिः ? उच्यते, पूर्वप्रयोगादियोगात् ।

**''[2]पूर्वप्रयोगसिद्धेर्बन्धच्छेदादसङ्गभावाच्च ।**
**गतिपरिणामाच्च तथा, सिद्धस्योर्ध्वं गतिः सिद्धा''** ॥१॥ [ प्रश./श्लो.२९५ ]

ननु सिद्धक्षेत्रात् परतोऽधस्तिर्यग्वा कस्मान्न गच्छ[3]ति ? अत्राप्युक्तम् –

**''नाधो गौरवविग[4]मादसङ्गभावाच्च गच्छति विमुक्तः ।**
**लोकान्तादपि न परं, प्लवक इवोपग्रहाभावात्** ॥१॥ [ प्रश./श्लो.२९३ ]

**''योगप्रयोगयोश्चाभावात् तिर्यग् न तस्य गतिरस्ति ।**
**[5]तस्मात् सिद्धस्योर्ध्वं, ह्यालोकान्ताद् गतिर्भवति''** ॥२॥ [ प्रश./श्लो.२९४ ] इति ।

'नमः सदा सर्वसिद्धेभ्यः' नमोऽस्तु सदा सर्वकालम्, सर्वसिद्धेभ्यः सर्वं साध्यं सिद्धं येषां ते सर्वसिद्धास्तेभ्यः, अथवा सर्वसिद्धेभ्यः तीर्थसिद्धादिभेदेभ्यः । यथोक्तम् –

**''तित्थसिद्धा, अतित्थसिद्धा, तित्थयरसिद्धा, अतित्थयरसिद्धा, सयंबुद्धसिद्धा,**

---

१. ''गाथेयं ललितविस्तरायामित्थमेवोद्धृता, किन्तु दिव्यदर्शनसाहित्यसमित्या प्रकाशितायां ललितविस्तरायाम् ''अन्नोन्नसमोगाढा पुट्ठा सव्वे य लोगंते'' । इति उत्तरार्द्धं प्रत्यन्तरपाठत्वेन निर्दिष्टं वर्तते इत्यपि ध्येयम् । गाथेयम् आचार्यश्री हरिभद्रसूरिविरचिते विंशतिविंशतिकाप्रकरणे १९तम्यां सिद्धविभक्तिविंशिकायां [गा० २०], २०तम्यां सिद्धसुखविंशिकायाम् [गा० १८] अपि वर्तते । आवश्यकनिर्युक्तौ तु ''जत्थ य एगो सिद्धो तत्थ अणंता भवक्खयविमुक्का । अन्नोन्नसमोगाढा पुट्ठा सव्वे अ लोगंते ॥९७५॥...इअ सव्वं कालतित्ता अउलं निव्वाणमुवगया सिद्धा । सासयमव्वाबाहं चिट्ठंति सुही सुहं पत्ता ॥९६८॥ इति पाठः-' इति योगशास्त्रे टिप्पणम् पत्र ६४०, टि० ३॥ २. पूर्व-प्रयोगात् यदाह- ॥ ३. °न्ति-इति योगशास्त्रवृत्तौ प० ६४१ ॥ ४. °मादशक्यभावाच्च-इति प्रशमरतौ ॥ ५. तस्मात् सिद्धस्योर्ध्वं मुक्तस्यालोकान्ताद् गतिर्भवति-इति प्रशमरतौ ॥

**पत्तेयबुद्धसिद्धा, बुद्धबोहिअसिद्धा, थीलिंगसिद्धा, पुरिसलिंगसिद्धा, नपुंसगलिंग-सिद्धा, सलिंगसिद्धा, अन्नलिंगसिद्धा, गिहिलिंगसिद्धा, एगसिद्धा, अणेगसिद्धा''** । **[ प्रज्ञापनासूत्रे १।१६ ]** ॥

तत्र तीर्थे चतुर्विधश्रमणसङ्घे उत्पन्ने सति ये सिद्धास्ते तीर्थसिद्धाः ।

अतीर्थे जिनान्तरे साधुव्यवच्छेदे सति जातिस्मरणादिना अवाप्तापवर्गमार्गाः सिद्धा अतीर्थसिद्धाः, **मरुदेवी**प्रभृतयो वा तदा तीर्थस्यानुत्पन्नत्वात् ।

तीर्थकरसिद्धाः तीर्थकरत्वमनुभूय सिद्धाः ।

अतीर्थकरसिद्धाः सामान्यकेवलित्वे सति सिद्धाः ।

स्वयंबुद्धाः सन्तो ये सिद्धाः ते स्वयंबुद्धसिद्धा ।

प्रत्येकबुद्धाः सन्तो ये सिद्धास्ते प्रत्येकबुद्धसिद्धाः । स्वयंबुद्धप्रत्येकबुद्धयोश्च बोध्युपधि — श्रुतलिङ्गकृतो विशेषः, स्वयंबुद्धा बाह्यप्रत्ययमन्तरेण बुध्यन्ते, [१]प्रत्येकबुद्धाः पुनर्बाह्यप्रत्ययेन वृषभादिना **करकण्डवा**दिवत् । उपधिस्तु स्वयंबुद्धानां पात्रादिर्द्वादशधा, प्रत्येकबुद्धानां प्रावरणवर्जो नवविधः । स्वयंबुद्धानां पूर्वाधितश्रुते[२] न नियमः, प्रत्येकबुद्धानां तु नियमतो भवत्येव । लिङ्गप्रतिपत्तिस्तु स्वयंबुद्धानां गुरुसन्निधावपि भवति, प्रत्येकबुद्धानां[३] देवता लिङ्गं प्रयच्छति । बुद्धा आचार्या अवगतत्त्वाः तैर्बोधिताः सन्तो ये सिद्धास्ते बुद्धबोधितसिद्धाः ।

एते च सर्वेऽपि केचित् स्त्रीलिङ्गसिद्धाः, केचित्पुँल्लिङ्गसिद्धाः, केचिन्नपुंसकलिङ्ग-सिद्धाः । ननु तीर्थकरा अपि किं स्त्रीलिङ्गसिद्धा भवन्ति ? भवन्त्येव । यत उक्तं **सिद्ध-प्राभृते —''[४]सव्वथोवा तित्थयरिसिद्धा, तित्थयरितित्थे नोतित्थयरसिद्धा असंखेज्जगुणा,**

---

१. प्रत्येकबुद्धास्तु बाह्य° इति योगशास्त्रवृत्तौ प० ६४२ ॥ २. °तेऽनियमः—इति योगशास्त्र-वृत्तौ प० ६४२ ॥ ३. °नां तु देव° इति योगशास्त्रवृत्तौ प० ६४२ ॥ ४. ''**सव्वत्थोवा तित्थयरिसिद्धा, तित्थयरितित्थे नोतित्थयरसिद्धा ( नोतित्थसिद्धा ?) असंखेज्जगुणा, तित्थयरितित्थे नोतित्थयरिसिद्धाओ असंखेज्जगुणाओ तित्थयरितित्थे नोतित्थयरसिद्धा असंखेज्जगुणा'' इति योगशास्त्रवृत्तौ प० ६३४-४ ।** ''अत्रेदमवधेयम् —निम्नदर्शितरूपा विविधाः पाठभेदा अत्रोपलभ्यन्ते । ''तित्थदारमाह-**थोवा तित्थगरीओ अतित्थसिद्धा य साहूणी साहू ? कमसो संखा तित्थंकरा अणंता पुणो संखा** ॥१००॥ [टीका-] तित्थदारं ॥ थोवा तित्थगरीओ° गाहा । सव्वत्थोवा तित्थगरिसिद्धा १, तित्थगरितित्थे णोतित्थसिद्धा संखेज्जगुणा २, तित्थगरितित्थे णोतित्थगरिसिद्धाओ संखेज्जगुणा ३, तित्थगरितित्थे णोतित्थगरसिद्धा संखेज्जगुणा ४। तेहिंतो तित्थगरा अणंतगुणा, पुणो संखगुणा तिण्णि भंगा

**तित्थयरितित्थे नोतित्थयरिसिद्धाओ असंखेज्जगुणाओ, तित्थयरतित्थे णोतित्थयरसिद्धा संखेज्जगुणा''** [ सि.प्रा. ]

नपुंसकलिङ्गसिद्धास्तु तीर्थकरसिद्धा न भवन्त्येव, प्रत्येकबुद्धसिद्धास्तु पुँल्लिङ्गसिद्धा एव।

स्वलिङ्गेन रजोहरणादिना द्रव्यलिङ्गेन सिद्धाः स्वलिङ्गसिद्धाः।

अन्येषां परिव्राजकादीनां लिङ्गेन सिद्धा अन्यलिङ्गसिद्धाः।

गृहिलिङ्गसिद्धा **मरुदेव्यादयः**।

एकैकस्मिन समये एकाकिनः सिद्धाः एकसिद्धा।

एकस्मिन् समये अष्टोत्तरं शतं यावत् सिद्धा अनेकसिद्धाः। यत उक्तम् –

**''बत्तीस अडयाला, सट्ठी बावत्तरी अ बोद्धव्वा।**
**चुलसीई छन्नउई, दुरहियमट्ठुत्तरसयं च''** ॥१॥ [ जी.स.२४९/बृ.सं./३३३ ]

---

जहपकमेणं ति दारं'' ॥१००॥ इति सटीके सिद्धप्राभृते पाठः पृ० २३॥ **यत उक्तं ''सिद्धप्राभृते –''सव्वत्थोवा तित्थयरिसिद्धा, तित्थयरितित्थे णोतित्थयरसिद्धा असंखेज्जगुणा, तित्थयरितित्थे णोतित्थयरिसिद्धा असंखेज्जगुणाओ''** [ ] इति इति आचार्य श्री हरिभद्रसूरिविरचितायां ललितविस्तरायां पाठः।

**यत उक्तं ''सिद्धप्राभृते –सव्वत्थोवा तित्थगरीसिद्धा, तित्थगरितित्थे णोतित्थसिद्धा संखेज्जगुणा तित्थगर ( रि ? ) तित्थे णोतित्थगरिसिद्धाओ संखेज्जगुणाओ तित्थगरितित्थे णोतित्थगरसिद्धा संखेज्जगुणा'** [ ] इति। इति आचार्य श्री**हरिभद्रसूरि**विरचितायां **नन्दीवृत्तौ** पाठः। ''इहानन्तरसिद्धाः सत्पदप्ररुपणा १ द्रव्यप्रमाण २ क्षेत्र ३ स्पर्शना ४ काला ५ ऽन्तर ६ भावा ७ ऽल्पबहुत्व ८ रुपैरष्टभिरनुयोगद्वारैः परम्परसिद्धाः सत्पदप्ररूपणा १ द्रव्यप्रमाण २ क्षेत्र ३ स्पर्शना ४ काला ५ ऽन्तर ६ भावा ७ ऽल्पबहुत्व ८ सन्निकर्ष ९ रुपैर्नवभिरनुयोगद्वारैः क्षेत्रादिषु पञ्चदशसु द्वारेषु **सिद्धप्राभृते** चिन्तिताः, तत्स्तदनुसारेण वयमपि विनेयजनानुग्रहार्थं लेशतश्चिन्तयामः **[ पृ० ११३ ]...** नोतीर्थसिद्धाः प्रत्येकबुद्धाः **[ पृ० १२२ ]** तीर्थद्वारे सर्वस्तोकाः तीर्थकरीसिद्धाः, ततः तीर्थकरीतीर्थे प्रत्येकबुद्धसिद्धाः संख्येयगुणाः, तेभ्योऽपि तीर्थकरीतीर्थेऽतीर्थकरीसिद्धाः संख्येयगुणाः तेभ्योऽपि तीर्थकरीतीर्थे एवातीर्थकरसिद्धाः संख्येयगुणाः, तेभ्यः तीर्थकरसिद्धा अनन्तगुणाः, तेभ्योऽपि तीर्थकरतीर्थे प्रत्येकबुद्धसिद्धाः संख्येयगुणाः तेभ्योऽपि तीर्थकरतीर्थ एव साध्वीसिद्धाः संख्येयगुणाः, तेभ्योऽपि तीर्थकरतीर्थे एवातीर्थकरसिद्धाः संख्येयगुणाः [पृ० १२६]'' इति मलयगिरिसूरिविरचितायां नन्दीसूत्रटीकायाम्''। **इति योगशास्त्रे टिप्पणम् पृ० ६४३-४** ॥

[१]नन्वेते सिद्धभेदा आद्ययोस्तीर्थसिद्धाऽतीर्थसिद्धयोरेवान्तर्भवन्ति, तीर्थकरसिद्धादयो हि तीर्थसिद्धाः स्युरतीर्थसिद्धा वेति ? सत्यम् , सत्यप्यन्तर्भावे पूर्वभेदद्वया[२]देवोत्तर-भेदाप्रतिपत्तेरज्ञातज्ञापनार्थं भेदाभिधानमदुष्टमिति । एष सिद्धस्तुतिरूपोऽष्टमोऽधिकारः । इत्थं सामान्येन सर्वसिद्धनमस्कार कृत्वा आसन्नोपकारित्वाद् वर्त्तमानतीर्थाधिपतेः श्रीमन्**महावीरवर्द्धमान**स्वामिनः स्तुतिं करोति —

**''जो देवाण वि देवो, जं देवा पंजली नमंसंति ।**
**तं देवदेवमहिअं, सिरसा वंदे महावीरं'' ॥२॥**

'यो' भगवान्महावीरो 'देवानामपि' भवनस्यादीनां पूज्यत्वाद् देवः, अत एवाह — 'यं देवाः' 'प्राञ्जलयो' विनयरचित[३]करसम्पुटाः सन्तो 'नमस्यन्ति' प्रणमन्ति 'तं' भगवन्तं 'देवदेवैः' शक्रादिभिः 'महितं' पूजितं 'वन्दे' 'शिरसा' उत्तमाङ्गेन, आदर-प्रदर्शनार्थं चैतत् । [४]कं तम् ? '**महावीरं**' विशेषेण ईरयति कर्म गमयति याति वा शिवमिति वीरः, महांश्चासौ वीरश्च महावीरस्तम् । इत्थं स्तुतिं कृत्वा पुनः परोपकाराया-त्मभाव[५]वृद्धये च फलप्रदर्शनपरमिदं पठति —

**''एक्को वि नमुक्कारो, जिणवरवसहस्स वद्धमाणस्स ।**
**संसारसागराओ, तारेइ नरं व नारिं वा'' ॥३॥ [ ]**

एकोऽप्यासतां बहवो नमस्काराः, नमस्कारो द्रव्यभावसङ्कोचलक्षणो 'जिनवरवृषभाय' जिनाः श्रुतावधिजिनादयस्तेषां वराः केवलिनस्तेषां वृषभस्तीर्थकरनामकर्मोदयादुत्तमो जिनवरवृषभस्तस्मै । स च **ऋषभादि**रपि भवति, इत्याह —'**वर्धमानाय**' यत्नात् कृतः सन्नितिशेषः किम् ? संसरणं संसारस्तिर्यग्नरनारकामरभवानुभवलक्षणः स एव भवस्थिति-कायस्थितिभ्यामनेकधाऽवस्थानेनालब्धपारत्वात् सागर इव संसारसागरस्तस्मात् तारयतीति पारं नयतीत्यर्थः । कम् ? इत्याह —'नरं वा नारीं वा' । नरग्रहण पुरुषोत्तमधर्मप्रतिपादनार्थम् , नारीग्रहणं तासामपि तद्भव एव संसारक्षयो भवतीति ज्ञापनार्थं । यथोक्तं [६]**यापनीयतन्त्रे** —

**''नो खलु इत्थी अजीवो, न यावि अभव्वा, न यावि दंसणविरोहिणी, नो अमाणुसा,**

---

१. तुला-नन्दीसूत्रस्य हारिभद्रीयवृत्तिः प० ३९, प्रवचनसारोद्धारवृत्तिः प० ३११ (भा० १) ॥ २. °यादेवोत्तरोत्तर° इति ललितविस्तरायां योगशास्त्रवृत्तौ [प० ६४५] च ॥ ३. °करपुटाः-इति योगशास्त्रवृत्तौ ६४५ ॥ ४. तं कम् ? इति योगशास्त्रवृत्तौ प० ६४५ ॥ ५. °वृत्त(द्ध)ये-मु० । योगशास्त्रवृत्तावपि [प० ६४६] °वृद्धये-इति । °वृद्धयै-इति ललितविस्तरायाम् प० १०९ ॥ ६. अस्य यापनीयतन्त्रस्य विस्तरेण व्याख्या ललितविस्तरायां वर्तते ॥

**नो [1]अणायरिउप्पन्ना, नो असंखेज्जाउया, नो अइकूरमई, नो न उवसंतमोहा, नो [2]असुद्धाचारा, नो असुद्धबुंदी, नो ववसायवज्जिया, नो अपुव्वकरणविरोहिणी, नो नवगुणट्ठाणरहिया, नो अजोग्गा लद्धीए, नो अकल्लाणभायणं ति, कहं न [3]उत्तमधम्मस्स साहग त्ति"** [ ] अयमत्र भावः —सति सम्यग्दर्शने परया भावनया क्रियमाण एकोऽपि नमस्कारस्तथाभूतस्याध्यवसायस्य हेतुर्भवति, यथाभूतात् श्रेणिमवाप्य निस्तरति भवमहोदधिमिति, अतः '**कार्ये कारणोपचाराद्**'एवमुच्यते, न च चारित्रस्य वैफल्यम्, तथाभूताध्यवसायस्यैव चारित्ररूपत्वादिति । एष नवमोऽधिकारः । एतास्तिस्रः स्तुतयो गणधरकृतत्वान्नियमेनोच्यन्ते, **केचित्** तु अन्ये अपि स्तुति पठन्ति, यदाह **आवश्यकचूर्णिकृत्** —"**सेसा जहिच्छाए**" [ ] त्ति । ते यथा —

"**उज्जिंतसेलसिहरे, दिक्खा नाणं निसीहिया जस्स ।**
**तं धम्मचक्कवट्टिं, अरिट्ठनेमिं नमंसामि**" ॥४॥ कण्ठ्या ।

नवरं 'निसीहिअ त्ति' सर्वव्यापारनिषेधात् नैषेधिकी मुक्तिः, एष दशमोऽधिकारः ।

"**चत्तारि अट्ठ दस दो य वंदिआ जिणवरा चउव्वीसं ।**
**परमट्ठनिट्ठिअट्ठा, सिद्धा सिद्धिं मम दिसंतु**" ॥५॥

'परमट्ठनिट्ठिअट्ठ त्ति' परमार्थेन न कल्पनामात्रेण, निष्ठिता अर्था येषां ते तथा, शेषं व्यक्तम्, एष एकादशोऽधिकारः १।

"**संपय पयप्पमाणा, इह वीस [4]बिहुत्तरं च वण्णसयं ।**
**पणिवायदंडगाइसु , पंचमओ दंडओ अ इमो**" ॥१॥ [ ]

एवमेतत्पठित्वोपचितपुण्यसम्भार उचितेष्वौचित्येन प्रवृत्तिरिति ज्ञापनार्थं पठति पठन्ति वा —

"**वेयावच्चगराणं संतिगराणं सम्मद्दिट्ठिसमाहिगराणं करेमि काउस्सग्गं**"

'वैयावृत्त्यकराणां' प्रवचनार्थं व्यापृतभावानां **गोमुखयक्षाऽप्रतिचक्रा**प्रभृतीनाम्, 'शान्तिकराणां' सर्वलोकस्य, 'सम्यग्दृष्टिविषये समाधिकराणाम्, एषां सम्बन्धिनं षष्ठ्याः सप्तम्यर्थत्वादेतद्विषयमेतान् वा आश्रित्य, 'करोमि कायोत्सर्गम्।

अत्र च वन्दनादिप्रत्ययमित्यादि न पठ्यते, अपि तु अन्यत्रोच्छ्वसितेनेत्यादि,

---

१. अणारिउप्पत्ति-इति ललितविस्तरायाम् ॥ २. न सुद्धा॰ इति योगशास्त्रवृत्तौ प॰ ६४६ ॥ ३. उत्तमधम्मसाहिग त्ति-इति ललितविस्तरायाम् ॥ ४. बहु॰ L.P.C. ॥

तेषामविरतत्वाद् । इत्थमेव तद्भाववृद्धेरुपकारदर्शनात् । एतद्व्याख्या च पूर्ववत् । नवरं स्तुतिर्वैयावृत्त्यकराणाम् । [१] पुनस्तेनैव विधिनोपविश्य पूर्ववत् प्रणिपातदण्डकं पठित्वा मुक्ताशुक्तिमुद्रया प्रणिधानं कुर्वन्ति । यथा —

**''जय वीयराय ! जगगुरू ! होउ ममं तुहप्पभावओ भयवं ! ।**
**भवनिव्वेओ मग्गाणुसारिया इट्ठफलसिद्धी ॥१॥**
**लोगविरुद्धच्चाओ, गुरुजणपूआ परत्थकरणं च ।**
**सुहगुरुजोगो तव्वयणसेवणा आभवमखंडा'' ॥२॥**

जय वीतराग ! जगद्गुरो ! इति भगवतस्त्रिलोकनाथस्य बुद्धौ सन्निधानार्थमामन्त्रणं, भवतु जायतां, ममेत्यात्मनिर्देशः, तव प्रभावतस्तव सामर्थ्येन, भगवन्निति पुनः सम्बोधनं भक्त्यतिशयख्यापनार्थम् । किं तद् ? इत्याह—'भवनिर्वेदः' संसारनिर्वेदः न हि भवादनिर्विण्णो मोक्षाय यतते, अनिर्विण्णस्य तत्प्रतिबन्धात् मोक्षे यत्नोऽयत्न एव, निर्जीवक्रियातुल्यत्वात् । तथा 'मार्गानुसारिता' असद्ग्रहविजयेन तत्त्वानुसारिता, तथा 'इष्टफलसिद्धिः' अभिमतार्थनिष्पत्तिरैहलोकिकी, ययोपगृहीतस्य चित्तस्वास्थ्यं भवति, तस्माच्चोपादेयप्रवृत्तिः । तथा 'लोकविरुद्धत्यागः' सर्वजननिन्दादिलोकविरुद्धानुष्ठान-वर्जनम् । यदाह —

**''सव्वस्स चेव निंदा, विसेसओ तहय गुणसमिद्धाणं ।**
**उजुधम्मकरणहसणं, रीढा जणपूयणिज्जाणं ॥१॥ [ पञ्चा.२/८ ]**
**बहुजणविरुद्धसंगो, देसादाचारलंघणं चेव ।**
**उव्वणभोओ अ तहा, दाणाइ वि पयडमन्ने उ ॥२॥ [ पञ्चा.२/९ ]**
**साहुवसणम्मि तोसो, सइ सामत्थम्मि अपडिआरो अ ।**
**एमाइआइँ इत्थं, लोगविरुद्धाइं णेआइं'' ॥३॥ [ पञ्चा.२/१० ]**

गुरुजनस्य 'पूजा' उचितप्रतिपत्तिर्गुरुजनपूजा, गुरवश्च यद्यपि धर्माचार्या एवोच्यन्ते, तथाऽपीह मात्रापित्रादयोऽपि गृह्यन्ते । यदुक्तम् —

**''माता पिता कलाचार्य, एतेषां ज्ञातयस्तथा ।**
**वृद्धा धर्मोपदेष्टारो, गुरुवर्गः सतां मतः ॥१॥ [ यो.बिं./११० ]**

'परार्थकरणं' हितार्थकरणं, जीवलोकसारं पौरुषचिह्नमेतत् । सत्येतावति लौकिके

---

१. 'पुनः स ते वा विधिना'—इति योगशास्त्रवृत्तौ प० ६४८ ॥ 'पुनः स ते वा संवेग-भावितमतयो विधिना उपविश्य...प्रणिधानं करोति कुर्वन्ति वा'' । इति ललितविस्तरायाम् ॥

सौन्दर्ये लोकोत्तरधर्माधिकारी भवतीत्याह – 'शुभगुरुयोगो' विशिष्टचारित्रयुक्ताचार्यसम्बन्धः तथा 'तद्वचनसेवा' सद्गुरुवचनसेवना न जातुचिदयमहितमुपदिशति, 'आभवम्' आसंसारम् 'अखण्डा' सम्पूर्णा। इदं च प्रणिधानं न निदानरूपम्, प्रायेण निःसङ्गाभिलाषरूपत्वात्[1]। एतच्चाप्रमत्तसंयतादर्वाक् कर्त्तव्यम्, अप्रमत्तादीनां मोक्षेऽप्यनभिलाषात्। तदेवंविधशुभफलप्रणिधानपर्यन्तं चैत्यवन्दनमिति उत्कृष्टवन्दनविधिः ॥६१॥

अथापि जिनगृहविषयाण्येव शेषकरणीयान्याह –

**आशातनापरिहारं, स्वशक्त्योचितचिन्तनम् ।**
**प्रत्याख्यानक्रियाऽभ्यर्णे, गुरोर्विनयपूर्वकम् ॥६२॥**

ज्ञानाद्यायस्य शातना खण्डना **आशातना** निरुक्त्या यलोपः, तासां **परिहारो** वर्ज्जनं विशेषतो गृहिधर्म इति सम्बन्धः पूर्ववद् दृष्टव्यः, एवमग्रेऽपि। आशातनाश्चात्र जिनस्य प्रस्तुताः प्रसङ्गतोऽन्या अपि प्रदर्श्यन्ते, यथा ता ज्ञानदेवगुर्वादीनां जघन्यादिभेदात् त्रिविधाः।

तत्र जघन्या ज्ञानाशातना ज्ञानोपकरणस्य निष्ठीवनस्पर्शः, अन्तिकस्थे च तस्मिन्नधोवातनिसर्गः, हीनाधिकाक्षरोच्चार इत्यादिका १। मध्यमा आकालिकं निरुपधानतपो वा अध्ययनम्, भ्रान्त्याऽन्यथाऽर्थकल्पनम्, ज्ञानोपकरणस्य प्रमादात् पादादिस्पर्शो भूपातनं चेत्यादिरूपा २। उत्कृष्टा तु निष्ठ्यूतेनाक्षरमार्जनं उपर्युपवेशनशयनादि ज्ञानोपकरणेऽन्तिकस्थे उच्चारादिकरणम्, ज्ञानस्य ज्ञानिनां वा निन्दा प्रत्यनीकतोपघातकरणमुत्सूत्रभाषणं चेत्यादिस्वरूपा ३।

[2]जघन्य देवाशातना वासकुम्पिकाद्यास्फालनश्वासवस्त्राञ्चलादिस्पर्शाद्या १। मध्यमा शरीराद्यशुद्ध्या पूजनम्, प्रतिमाभूनिपातनं चेत्याद्या २। उत्कृष्टा प्रतिमायाश्चरणश्लेष्मस्वेदादिस्पर्शनं भङ्गजननावहीलनाद्या च ३।

अथवा देवाशातना जघन्या दश मध्यमाश्चत्वारिंशद् उत्कृष्टाश्चतुरशीतिः। ताश्च क्रमेणैवामाहुः –

**"तम्बोल १ पाणु २ भोअण ३, वाहण ४ थीभोग ५ [3]सुवण ६ निट्ठुवणं ७ ।**
**मुत्तुच्चारं ९ जूअं १०, वज्जे जिणमंदिरस्संते[4]"॥१॥ [ सं.प्र.८७, प्र.सा.४३२, चै.बृ.६३ ]**

---

१. निस्सङ्गा° इति योगशास्त्रवृत्तौ प० ६५० ॥ २. तुला–श्राद्धविधिवृत्तिः प० ७१तः ॥ ३. सुयणनिट्ठवणे–इति प्रवचनसारोद्धारे। सुवण्णनिट्ठवणं–इति श्राद्धविधिवृत्तौ प० ७१ ॥ ४. °ता–इति श्रद्धाविधिवृत्तौ ॥

इति जघन्यतो दश देवाशातनाः ।

**''मुत्त १ पुरीसं २ पाणं ३, पाणा ४ सण ५ सयण ६ इत्थि ७ तंबोलं ८ ।**
**निट्ठीवणं च ९ जूअं १०, जूआइपलोयणं ११ विगहा १२ ॥१॥ [ सं.प्र./२४८ ]**
**पल्हत्थीकरणं १३ पि हु , पायपसारण १४ परुप्परविवाओ १५ ।**
**परिहासो १६ मच्छरिआ १७, सीहासणमाइपरिभोगो १८ ॥२॥ [ सं.प्र./२४९ ]**
**केससरीरविभूसण १९, छत्ता २० ऽसि २१ किरीड २२ चमरधरणं च २३ ।**
**धरणं २४ जुवईहिं सविआरहास[1] २५ खिड्डुप्पसंगा य २६ ॥३॥ [ सं.प्र./२५० ]**
**अकयमुहकोस २७ मलिणंगवत्थ २८ जिणपूअणापवित्तीए ।**
**मणसो अणेगयत्तं २९, सचित्तदविआण अविमुअणं ३० ॥४॥ [ सं.प्र./२५१ ]**
**[2]अचित्तदविअवुस्सग्गणं च ३१ तह णेगसाडिअत्तमवि ३२ ।**
**जिणदंसणे अणंजलि ३३, जिणंमि दिट्ठंमि अ अपूआ ३४ ॥५॥ [ सं.प्र./२५२ ]**
**अहवा अणिट्ठकुसुमाईपूअणं[3] ३५ तह अणायरपवित्ती ३६ ।**
**[4]जिणपडिणीअनिवारण ३७, चेइअदव्वस्सुवेक्खणमो[5] ३८ ॥६॥ [ सं.प्र./२५३ ]**
**सइ सामत्थि उवाणह ३९ पुव्वं चिइवंदणाइपढणं च ४० ।**
**जिणभवणाइठिआणं, चालीसासायणा एए ॥७॥ [ सं.प्र./२५४ ]**

इति मध्यमतश्चत्वारिंशदाशातनाः ।

**''खेलं १ केलि २ कलिं ३ कला ४ कुललयं ५ तम्बोल ६ मुग्गालयं ७,**
**गाली ८ कङ्गुलिआ ९ सरीरधुवणं १० केसे ११ नहे १२ लोहिअं १३ ।**
**भत्तोसं १४ तय १५ पित्त १६ वंत १७ दसणा १८ विस्सामणा १९ दामणं २०;**
**दन्त २१ च्छी २२ नह २३ गल्ल[6] २४ नासिअ २५ सिरो २६ सोत्त[7] २७ च्छवीणं मलं २८ ॥१॥**
**[8]मन्तं २९ मीलण ३० लिक्खयं ३१ विभजणं ३२ भंडार ३३ दुट्ठासणं ३४,**
**छाणी ३५ कप्पड ३६ दालि ३७ पप्पड ३८ वडी विस्सारणं ३९ नासणं ४० ।**
**अक्कंदं ४१ विकहं ४२ सरुच्छुघडणं[9] ४३ तेरिच्छसंठावणं ४४;**
**अग्गीसेवण ४५ रंधणं ४६ परिखणं ४७ निस्सीहिआभंजणं ४८ ॥२॥**

---

१. सविहासरस–इति संबोधप्रकरणे ॥ २. अचित्तद्रव्यअविउज्जणं च–इति सम्बोधप्रकरणे ॥ ३. °कुसुमेहिं पूअणं–इति सम्बोधप्रकरणे ॥ ४. जिणपडणीयअ° इति सम्बोधप्रकरणे ॥ ५. °स्सुव्वेअणमो–C. । स्सुवेहणमो–इति सम्बोध प्र० ॥ ६. गंड–इति प्रवचनसारोद्धारे ॥ ७. सायछवीणं–इति धर्मरत्नप्रकरणे ॥ ८. मंतुम्मीलण–इति धर्मरत्नप्रकरणे ॥ ९. सरुच्छ° इति श्राद्धविधिवृत्तौ । सरत्थ° इति प्रवचनसारोद्धारे ॥

**छत्तो ४९ वाणह ५० सत्थ ५१ चामर ५२ मणोऽणेगत्त ५३ मब्भंगणं ५४,**
**सच्चित्ताणमचाय ५५ चायमजिए ५६ दिट्ठीइ नो अंजली ५७ ।**
**साडेत्तरसंगभंग[1] ५८ मउडं ५९ मोलिं ६० सिरोसेहरं ६१;**
**हुड्डा ६२ जिंडुहगेड्डिआइ रमणं ६३ जोहार ६४ भंडक्किअं ६५ ॥३॥**
**रेक्कारं ६६ धरणं ६७ रणं ६८ विवरणं वालाण ६९ पल्हत्थिअं ७०,**
**पाऊ ७१ पायपसारणं ७२ पुडपुडी ७३ पंकं ७४ रओ ७५ मेहुणं ७६ ।**
**जूअं ७७ जेमण ७८ गुज्झ ७९ विज्ज ८० वणिजं ८१ सिज्जं ८२ जलं ८३ मज्जणं ८४;**
**एमाईअमवज्जकज्जमुजुओ वज्जे जिणिंदालए ॥४॥ [ प्र.सा./४३३-४३६ ]**

विषमपदार्थो यथा –खेलं[2] श्लेष्माणं जिनगृहे निक्षिपति १। केलिर्द्यूतक्रीडादिका २, कलिः कलहः ३, कला धनुर्वेदादिका ताः प्रयुङ्क्ते ४, कुललयं गण्डूषम् ५, ताम्बूलं भक्षयति ६, उद्गालनं च ताम्बूलस्य निक्षिपति ७, गालीर्दत्ते ८, 'कंगुलय'त्ति लघुवृद्धनीतिकरणम् ९, शरीरपादाद्यङ्गधावनं कुरुते १०, केश ११ नख १२समारचनम्, रुधिरं पातयति १३, 'भत्तोसं' सुखभक्षिकां भक्षयति १४, त्वचं व्रणादिसम्बन्धिनीं पातयति १५, पित्तं धातुविशेषमौषधादिना पातयति १६, एवं वान्तम् १७, दन्तं च १८। विश्रामणां कारयति १९, दामनमजाश्वादीनाम् २०, दन्ता २१ ऽक्षि २२ नख २३ गण्ड २४ नासिका २५ शिरः २६ श्रोत्र २७ च्छवीनां २८ मलं जिनगृहे पातयति, छविः शरीरं शेषास्तदवयवाः मन्त्रं भूतादिनिग्रहलक्षणं करोति राजादिकार्यालोचनं वा २९, मीलनं ज्ञात्यादिसमुदायस्य ३०, लेख्यकं व्यवहारादि ३१, विभजनं दायादादीनां तत्र करोति ३२, भाण्डागारो निजद्रव्यादेः ३३, दुष्टासनं पादोपरिपादस्थापनादिकं ३४, छाणी गोमयपिण्डः ३५, कर्पटं वस्त्रम् ३६, दालिर्मुद्गादिदलरूपा ३७, पर्पटः ३८ वटी एषामुपलक्षणत्वादन्येषामपि करीरचिर्भटकादीनां[3] विस्सारणं –उद्वापनकृते विस्तारणं ३९, नाशनं राजादिभयेनान्तर्द्धानम् ४०, आक्रन्दं रोदनम् ४१, विकथाश्चतस्रः ४२, शराणां बाणानां इक्षूणां च घटनं, सरत्थेति[4] पाठे शराणां अस्त्राणां च धनुरादीनां घटनम् ४३, तिरश्चां गवादीनां तत्स्थापनम् ४४, शीतार्त्तोऽग्निं सेवते ४५, रन्धनं धान्यादेः ४६, परीक्षणं नाणकस्य ४७, कृतायामपि नैषेधिक्यां सावद्यव्यापारकरणादि ४८, छत्रोपानह–

---

१. °मंगभंग–L.P.C. ॥ २. तुला–प्रवचनसारोद्धारवृत्तिः भा० १ प० २८५–८ ॥ ३. करीर–चिर्भिट° मु० करीरचिर्भिटिका° C. । L.P. श्राद्धविधिवृत्तावपि [प० ७२] करीरचिर्भटि° इति ॥ ४. सरच्छेति–मु० । C. प्रवचनसारोद्धारवृत्तावपि सरत्थेति ॥

शस्त्रचामराणां[१] देवगृहाद् बहिरमोचनम् ५२, मनस ऐकाग्र्यं न करोति ५३, अभ्यङ्गं तैलादिना ५४, सचित्तानां पुष्पादीनामत्यागः—त्यागपरिहारः ५५, 'अजिए'त्ति अजीवानां हारमुद्रिकादीनाम् ५६, दृष्टे जनेऽञ्जलिं न बध्नाति ५७, एकशाटोत्तरासङ्गं न कुरुते ५८, मुकुटस्य मस्तके धरणं ५९, मौलिः शिरोवेष्टनविशेषः ६०, शेखरं कुसुमादिमयं विधत्ते ६१, हुड्डा—पणकरणं तां पातयति ६२, जिण्डुकः कण्डुकः[२] ६३, जोत्कारकरणं पित्रादीनाम् ६४, भाण्डक्रिया कक्षावादनादिका[३] ६५, रेकारस्तिरस्कारार्थं कस्यचित् करोति ६६, धरणं लभ्यद्रव्यग्रहणार्थं लङ्घनपूर्वमुपवेशनं ६७, रणं संग्रामं ६८, विवरणं वालानां विजटीकरणं ६९, पर्यस्तिकाकरणं ७०, पादुका चरणरक्षोपकरण् ७१, पादयोः प्रसारणम् ७२, पुडपुडीदापनम् ७३, पङ्करणं निजदेहावयवक्षालनादिना ७४, रजःपातनम् ७५, मैथुनं कामक्रीडा ७६, यूकाचयनम् ७७, जेमनं भोजनम् ७८, गुह्यं लिङ्गं तस्यासंवृतता ७९, वैद्यकम् ८०, वाणिज्यं क्रयविक्रयादि ८१, शय्या शयनम् ८२, जलं पानाद्यर्थं तत्र मुञ्चति पिबति वर्षासु गृह्णाति वा ८३, मज्जनं स्नानम् ८४ । इत्युत्कर्षतश्चतुरशीत्याशातनाः ।

**बृहद्भाष्ये** तु पञ्चैवाशातनाः प्रोक्ता यथा ।

**''जिणभवणमि अवण्णा १, पूआई अणायरो २ तहा भोगो ३ ।**
**दुप्पणिहाणं ४ अणुचिअवित्ती ५ आसायणा पंच'' ॥१॥ [ सं.प्र./८० ]**

**''तत्थ अवन्नासायण, पल्हत्थिअ देवपिट्ठिदाणं च ।**
**पुडपुडअपयपसारण, दुट्ठासणसेव जिणगेहे'' ॥२॥ [ सं.प्र./८१ ]**
**जारिसतारिसवेसो, जहा तहा जंमि तंमि कालंमि ।**
**पुआइ कुणइ सुन्नो, अणायरासायणा एसा ॥३॥ [ सं.प्र./८२ ]**
**भोगो तंबोलाई, कीरंतो जिणगिहे कुणइवस्सं ।**
**नाणाइआण आयस्स, सायणं तो तमिह वज्जे ॥४॥ [ सं.प्र./८३ ]**
**रागेण व दोसेण व, मोहेण व दूसिआ मणोवित्ती ।**
**दुप्पणिहाणं भण्णइ, जिणविसए तं न कायव्वं ॥५॥ [ सं.प्र./८४ ]**
**धरणरणरुअणविगहातिरिबंधणरंधणाई गिहिकिरिआ ।**
**गालीविज्जवणिज्जाइ, चेइए वयणुचिअवित्ती ॥६॥ [ सं.प्र./८५ ]**

---

१. °चम° L.C. ॥ २. कन्दुकः-इति प्रवचनसारोद्धारवृत्तौ ॥ ३. °का-मु० C. नास्ति । L.P. प्रवचनसारोद्धारवृत्तावपि °का- अस्ति ॥

आशातनाश्चात्यन्तविषयिणः सतताविरता देवा अपि देवगृहादौ सर्वथा वर्जयन्ति, उक्तं हि –

**''देवहरयंमि देवा, विसयविसविमोहिआ वि न कया वि ।**
**अच्छरसाहिं पि समं, हासक्कीडाइ[1] वि कुणंति''** ॥१॥ [श्रा.दि./१२४]

एताश्चाशातना जिनालये क्रियमाणा न केवलं गृहिणामेव निषिद्धाः, किन्तु यथासम्भवं साधूनामपीति ज्ञेयम् । यत उक्तम् –

**''आसायणा उ भवभमणकारणं इय विभाविउं जइणो ।**
**मलमलिणु त्ति न जिणमंदिरंमि निवसंति इइ समओ''** ॥१॥ [प्र.सा./४३७] त्ति[2] ।

गुर्वाशातनापि त्रिधा–तत्र गुरोः पादादिना सङ्घट्टादौ जघन्या १, श्लेष्मनिष्ठीवनलवस्पर्शनादौ मध्यमा २, गुर्वादेशाकरणविपरीतकरणपरुषभाषणादावुत्कृष्टा ३। सङ्ख्यया च गुरुवन्दनाधिकारे वक्ष्यमाणास्त्रयस्त्रिंशत् ।

[3]स्थापनाचार्याशातनापि त्रिधा–तस्येतस्ततश्चालनपादस्पर्शादौ जघन्या १, भूमिपातनावज्ञा[4]मोचनादौ मध्यमा २, प्रणाशनभङ्गादावुत्कृष्टा ३। एवं ज्ञानोपकरणवद्दर्शनचारित्रोपकरणस्य रजोहरण–मुखवस्त्रिका–दण्डकादेरपि **''अहवा णाणाइतिगं''**[ ] इति वचनाद् गुरुस्थाने स्थाप्यत्वेन विविधव्यापारणादधिका तदाशातनापि वर्ज्या । यदुक्तं **महानिशीथे –**

**''अविहीए निअंसणुत्तरिअं रयहरणं दंडग वा परिभुंजे चउत्थं''**[ ] इति ।

तेन श्राद्धैश्चरवलकमुखवस्त्रिकादेर्विधिनेव व्यापारणस्वस्थानस्थापनादि कार्यमन्यथा धर्मावज्ञादिदोषापत्तेः । एतासु चोत्सूत्रभाषणार्हद्गुर्वाद्यवज्ञादि महत्याशातनाऽनन्तसंसारिताहेतुश्च । यतः –

**''उस्सुत्तभासगाणं, बोहिणासो अणंतसंसारो ।**
**पाणच्चए वि धीरा, उस्सुत्तं ता न भासंति** ॥१॥ [संस./२९]
**तित्थयरपवयणसुअं, आयरिअं गणहरं महड्ढीअं ।**
**आसायंतो बहुसो, अणंतसंसारिओ होइ''** ॥२॥ [उ.प./४२३] इति ।

''एवं देव–ज्ञान–साधारणद्रव्याणां गुरुद्रव्यस्य च वस्त्रपात्रदेर्विनाशे तदुपेक्षायां च महत्याशातना । यदूचे –

---

१. हासखिडाइ–इति श्राद्धदिनकृत्ये । ''हासः प्रतीत एव, खेला–क्रीडा'' इति तत्रैव वृत्तौ भा० १ प० २७१ ॥ २. त्ति–मु० नास्ति ॥ ३. तुला–श्राद्धविधिवृत्तिः प० ७३ तः ॥ ४. °वज्ञाय (ज्ञया) मो° मु० । L.P.C. श्राद्धविधिवृत्तावपि °वज्ञामो° इति ॥

**''चेइअदव्वविणासे, इसिघाए पवयणस्स उड्डाहे ।**
**संजइचउत्थभंगे, मूलग्गी बोहिलाभस्स''** ॥१॥ [ सं.प्र.दे./१०५ ]

विनाशोऽत्र भक्षणोपेक्षणादिलक्षणः । **श्रावकदिनकृत्यदर्शनशुद्ध्या**दावपि –

**''चेइअदव्वं साहारणं च, जो दुहइ मोहिअमईओ ।**
**धम्मं च सो न याणइ, अहवा बद्धाउओ नरए''** ॥१॥ [ सं.प्र.दे./१०७ ]

चैत्यद्रव्यं प्रसिद्धं, साधारणं च चैत्यपुस्तकापद्गतश्राद्धादिसमुद्धरणयोग्यं ऋद्धिमच्छ्रावकमीलितम्, एते द्वे यो द्रुह्यति विनाशयति दोग्घि वा व्याजव्यवहारादिना तदुपयोगमुपभुङ्क्त इत्यर्थः ।

**''चेइअदव्वविणासे, तद्दव्वविणासणे दुविहभेए ।**
**[1]साहू उविक्खमाणो, अणंतसंसारिओ होइ** ॥१॥ [ सं.प्र.दे./१०६ ]

चैत्यद्रव्यं हिरण्यादि तस्य विनाशे, तथा तस्य चैत्यस्य द्रव्यं दारूपलेष्टकादि तस्य विनाशने विध्वंसने, कथम्भूते ? द्विविधे योग्यातीतभावविनाशभेदात्, तत्र योग्यं नव्यमानीतम्, अतीतभावलग्नोत्पाटितम् । अथवा मूलोत्तरभेदाद्द्विविधे, तत्र मूलं स्तम्भकुम्भादि, उत्तरं [2]तु च्छादनादि, स्वपक्ष-परपक्षकृतविनाशभेदाद्वा द्विविधे, स्वपक्षः साधर्मिकवर्गः, परपक्षो वैधर्मिकलोकः, एवमनेकधा द्वैविध्यम् । अत्रापिशब्दस्याध्याहारादास्तां श्रावकः, सर्वसावद्यविरतः साधुरप्यौदासीन्यं कुर्वाणो देशनादिभिरनिवारयन्नन्तसंसारिको भणित इति वृत्तिः'' ।

ननु त्रिधा प्रत्याख्यातसावद्यस्य यतेश्चैत्यद्रव्यरक्षायां को नामाधिकारः इति चेदुच्यते, राजादेः सकाशाद् गृहग्रामाद्यादेशादिनाऽभ्यर्थ्य नव्यमुत्पादयतो यतेर्भवति भवदुक्तदूषणावकाशः, परं केनचिद्यथाभद्रकादिना प्राग्वितीर्णमन्यद्वा जिनद्रव्यं विलुप्यमानं रक्षति, तदा नाभ्युपेतार्थहानिः, प्रत्युत धर्मपुष्टिरेव, जिनाज्ञाराधनात्, **आगमे**ऽप्येवमेव । यदाह –

**''चोइए चेइआणं, खित्तहिरण्णे अ [3]गामगोवाई ।**
**लग्गंतस्स उ जइणो, तिगरणसोही कहं नु भवे ?** ॥१॥ [ पं.क.भा./१५६९ ]
**भण्णइ इत्थ विभासा, जो एआइ सयं विमग्गिज्जा ।**
**तस्स न होइ विसोही, अह कोइ हरिज्ज एआइं** ॥२॥ [ पं.क.भा./१५७० ]

---

१. उत्तरार्धं [ ] कोष्ठके-मु० ॥ २. तु (त्व) च्छा० । L.P.C. श्राद्धविधिवृत्तौ च [प० ७४] तु च्छा° ॥ ३. गामगा° मु० । L.P.C. श्राद्धविधिवृत्तौ च गामगो° ॥

''**तत्थ करंतु उवेहं, सा जा भणिआ उ तिगरणविसोही।**
**सा य न होइ अभत्ती, तस्स य तम्हा निवारिज्जा** ॥३॥ [ पं.क.भा./१५७१ ]
**सव्वत्थामेण तहिं, संघेण य होइ लग्गिअव्वं तु ।**
**सचरित्तचरित्तीण य, सव्वेहिं होइ कज्जं तु**'' ॥४॥ [ वि.सा./६५३ ]

**व्यवहारभाष्ये**ऽपि –

''**चेइअदव्वं गिह्णत्तु , भुंजए जो उ देइ साहूणं ।**
**सो आणाअणवत्थं, पावइ लिंतो वि दिंतो वि**'' ॥१॥ [ श्रा.दि./१३२ ] इति ।

देवद्रव्यभक्षणरक्षणवर्धनेषु यथाक्रमं फलानि यथा –

''[1]**जिणपवयणवुड्ढिकरं, पभावगं नाणदंसणगुणाणं ।**
**भक्खंतो जिणदव्वं, अणंतसंसारिओ होइ** ॥१॥ [ श्रा.दि./१४२ ]

जिणपवयण त्ति सति हि देवद्रव्ये प्रत्यहं चैत्यसमारचन[2]महापूजासत्कारसम्भवः, तत्र च प्रायो यतिजनसम्पातः, तद्व्याख्यानश्रवणादेश्च जिनप्रवचनवृद्धिः । एवं ज्ञानादिगुणानां प्रभावना चेत्यर्थः ।

''[3]**जिणपवयणवुड्ढिकरं, पभावगं नाणदंसणगुणाणं ।**
**रक्खंतो जिणदव्वं, परित्तसंसारिओ होइ** ॥२॥ [ सं.प्र./९८, श्रा.दि./१४३ ]

परित्त त्ति परिमितभवस्थितिः ।

''[4]**जिणपवयणवुड्ढिकरं पभावगं नाणदंसणगुणाणं ।**
**वु( व )ड्ढंतो जिणदव्वं, तित्थयरत्तं लहइ जीवो** ॥३॥ [ श्रा.दि./१४४,सं.प्र./९७ ]

वृद्धिरत्र सम्यग्रक्षणपूर्वाऽपूर्वधनप्रक्षे[5]पादितोऽवसेया वृद्धिरपि कुव्यापारवर्जं सद्व्यवहारदिविधिनैव कार्या । यतः –

''**जिणवरआणारहिअं, वद्धारंता वि के वि जिणदव्वं ।**
**बुडुंति भवसमुद्दे, मूढा मोहेण अन्नाणी**'' ॥१॥ [ सं.प्र.दे./१०२ ]

केचित्तु श्राद्धव्यतिरिक्तेभ्यः समधिकग्रहणकं गृहीत्वा कलान्तरेणापि न वृद्धिरुचितेत्याहुः, **सम्यक्त्ववृत्त्यादौ** [6]**शङ्काशकथायां** तथोक्तेः । तथा मालापरिधापनादौ

१. तुला सम्बोधप्रकरणे (दे० गा० ९९ त) ॥ २. °महा° मु० C. नास्ति । L.P. श्राद्धविधिवृत्तौ [प० ७४] अस्ति ॥ ३. जिणपवयण° रक्खंतो–L.P.C. ॥ ४. जिणपवयण० वुड्ढंतो–L.P.C. । जिणपवयणप्रावता वुड्ढंतो–मु० । जिणपवयणवुड्ढिकरं पभावगं नाणदंसणगुणाणं वुड्ढंतो–इति श्राद्धविधिवृत्तौ प० ७४ ॥ ५. पादिनाऽवसेया–इति श्राद्धविधिवृत्तौ ॥ ६. सङ्काश° इति श्राद्धविधिवृत्तौ ॥

देवसत्कं कृतं द्रव्यं सद्य एव देयम्, अन्यथा पूर्वोक्तदेवद्रव्योपभोगदोषप्रसङ्गात्, सद्योऽर्पणासमर्थस्तु पक्षाद्यवधिं स्फुटं कुर्यात्, तदन्तर्देयम्, तदुल्लङ्घने तु देवद्रव्योपभोगदोषः स्फुट एव । देवसत्कं वादित्रमपि गुरोः सङ्घस्यापि चाग्रे न वाद्यम्, **केचित्** त्वाहुः –पुष्टावलम्बने बहुनिष्क्रियार्पणपूर्वं व्यापार्यते अपि । यतो –

**''मुल्लं विणा जिणाणं, उवगरणं चमरछत्तकलसाई ।**
**जो वावारइ मूढो, निअकज्जे सो हवइ दुहिओ''** ॥१॥ [ गाथा./४७७ ]

स्वयं च व्यापारयता जातु भङ्गे उपकरणस्य स्वद्रव्येण नव्यसमारचनम् । स्वगृहदीपश्च देवदर्शनार्थमेव देवाग्रे आनीतोऽपि देवसत्को न स्यात् । पूजार्थमेव देवाग्रे मोचने तु देवसत्क एव, परिणामस्यैव प्रामाण्यात् ।

एवं ज्ञानद्रव्यमपि देवद्रव्यवन्न कल्प्यते, ज्ञानसत्कं कागदपत्रादि साध्वाद्यर्पितं श्राद्धेन स्वकार्ये न व्यापार्यम्, साध्वादिसत्कमुखवस्त्रिकादेरपि व्यापारणं न युक्तम्, गुरुद्रव्यत्वात् ।

[उक्तं च **श्राद्धजीतकल्पे** –

**''मुहपत्तिआसणाइसु, [2]भिन्न जलन्नाइसु गुरुलहूगाई ।**
**जइदव्व[3]भोगि इअ पुण, वत्थाइसु [4]देवदव्वं व''** ॥१॥ [ श्रा.जी./गा.६८ ]

[5]भावार्थो यथा गुरुयतिसत्केषु मुखवस्त्रिका-ऽऽसना-ऽशनादिषु परिभुक्तेषु भिन्नम्, [6]तथा जलेऽन्ने आदिशब्दाद्वस्त्रादौ च **विक्रमार्का**दिनेव केनापि [7]साधुनिश्राकृते लिङ्गिसत्के कनकादौ वा [8]परिभुक्ते गुरु-लघुकादयः क्रमेण स्युः । [9]अयमर्थः गुरुसत्के जले भुक्ते री, अन्ने ४ वस्त्रादौ ६ लघवः ४ कनकादौ ६ इति । एवं च गुरुद्रव्यं भोगार्ह-पूजार्हभेदाभ्यां द्विविधम् –[10]तत्राद्यं वस्त्र-पात्रा-ऽशनादि, द्वितीयं च तन्निश्राकृतं सौवर्णमुद्रादी[11]ति पर्यवसन्नम्]

साधारणं तु सङ्घदत्तं कल्पते । अत एव च मुख्यवृत्त्या धर्मव्ययः साधारण एव

---

१. तुला-श्राद्धविधिवृत्तिः प० ७९ ॥ २. L.P.C. श्राद्धविधिवृत्तौ च ॥ भिण्णं जलण्णमाइसु-मु० ॥ ३. L.P.C. । °भोगि अ पुण मु० । भोगि इय-श्राद्धविधिवृत्तौ ॥ ४. L.P.C. । देवदव्व व्व-मु० ॥ ५. P. । भावार्थो यथा- L.C. नास्ति ॥ ६. तथा यतिसत्केषु जले-L. ॥ ७. L. श्राद्धविधिवृत्तौ च । साधुनिश्राकृते-P.C. मु० ॥ ८. L.P. । परिभुक्ते गुरु । P. भुक्ते सति गुरु मु० ॥ ९. अयमर्थः गुरुसत्के जले भुक्ते री अन्ने ४-L. । जले ६ लघवः अन्ने ४ गुरवः वस्त्रादौ ६ लघवः ४ कनकादौ ६ गुरवः एते । एवं च-मु० ॥ १०. तत्र भोगार्हं वस्त्रपात्राशनादि पूजार्हं तु तन्नि° L. ॥ ११. °ति स्थितम्-L. ॥

क्रियते, तस्याशेषधर्मकार्ये उपभोगागमनात् । धर्मस्थाने प्रतिज्ञातं च द्रव्यं पृथगेव व्ययितव्यम् , न तु स्वयं क्रियमाणभोजनदानादिरूपव्यये क्षेप्यम् , एवं स्फुटमेव धर्मधनोपयोगदोषात् । एवं सति ये यात्रादौ भोजन-शकटसंप्रेषणादिव्ययं सर्वं मानितव्ययमध्ये गणयन्ति, तेषां मूढानां न ज्ञायते का गतिः ? । उद्यापनादावपि प्रौढाडम्बरेण स्वनाम्ना मण्डिते जनबहुश्लाघादि स्यात् , निष्क्रयं तु स्तोकं मुञ्चतीति व्यक्त एव दोषः । तथाऽन्यप्रदत्तधर्मस्थानव्ययितव्यधनव्ययसमये तन्नाम स्फुटं ग्राह्यम् , एवं सामुदायिकस्यापि, अन्यथा पुण्यस्थाने स्तैन्यादिदोषापत्तेः । एवमन्त्यावस्थायां पित्रादिनां यन्मान्यते तत्सावधानत्वे गुर्वादिसङ्घसमक्षमित्थं वाच्यं — यद्भवन्निमित्तमियद्दिनमध्ये इयद्व्ययिष्यामि, तदनुमोदना भवद्भिः कार्येति । तदपि च सद्यः सर्वज्ञातं व्ययितव्यम् , न तु स्वनाम्ना । अमारिद्रव्यं तु देवभोगेऽपि नायाति । इत्येवं सर्वत्र धर्मकार्ये आशातनावारणाय विवेकः कार्यो विवेकिभिरित्यलं प्रसङ्गेन ।

तथा **स्वशक्त्या** निजशक्त्यनुसारेण, न तु स्वशक्त्यतिक्रमेण, तथा सति लोकोपहासार्त्तध्यानादिप्रवृत्तेः । **उचितानि** चैत्यसम्बन्धियोग्यकार्याणि एतच्चैत्यप्रदेश-संमार्जन चैत्यभूमिप्रमार्जनपूजोपकरणसमारचन-प्रतिमापरिकरादिनैर्मल्यापादान-विशिष्ट-पूजाप्रदीपादिशोभाविर्भावना-ऽक्षतनैवेद्यादिवस्तुस्तोमसत्यापन-चन्दनकेसरधूपघृतादि-संचयन-देवद्रव्योद्ग्राहणिकाकरणोद्यमन-तत्सुस्थानस्थापन-तदायव्ययादिसुव्यक्त-लेख्यकविवेचन-कर्मकरस्थापनप्रभृतीनि, तेषां **चिन्तनं**[1] चिन्ताकरणं अन्वयस्तूक्त एव । अयं भावः —आढ्यस्य द्रव्यपरिजनादिबलसाध्या चिन्ता सुकरा, अनाढ्यस्य तु स्ववपुःकुटुम्बादिसाध्या दुष्करा, ततो यस्य यत्र यथा सामर्थ्यम् , स तत्र तथा विशेषतः प्रवर्त्तते, तत्रापि या चिन्ता स्वल्पसमयसाध्या तां द्वितीयनैषेधिक्या अर्वाग् विधत्ते, शेषां तु पश्चादपि यथायोग्यम् । एतदेव च गार्हस्थ्यसारम् । तथा चाह —

**''तं नाणं तं च विन्नाणं, तं कलासु अ कोसलं ।**
**सा बुद्धी पोरिसं तं च, देवकज्जेण जं वए''** ॥१॥ [ श्रा.दि./९९ ] इति ।

जीर्णोद्धारकरणे च महाफलं । यदाह —

**''अप्पा उद्धरिओ च्चिअ, उद्धरिओ तह य तेहि निअवंसो ।**
**अन्ने अ भव्वसत्ता, अणुमोअंता उ जिणभवणं** ॥१॥ [ श्रा.दि./१०१ ]

१. L.P. । चिन्तनं चिन्ताकरणं विशेषतो गृहिधर्म इति योगः करणं अन्वय०-मु० C. ॥

**खविअं नीआगोअं, उच्चागोअं च बंधिअं तेहिं ।**
**कुगइपहो निट्ठविओ, सुगईपहो अज्जिओ तह य ॥२॥** [ श्रा.दि./१०२ ]
**इहलोगंमि सुकित्ती, सुपुरिसमग्गो अ देसिओ होई ।**
**अन्नेसिं भव्वाणं, जिणभवणं उद्धरंतेणं ॥३॥** [ श्रा.दि./१०३ ]
**सिज्झंति केइ तेणेव, भवेण सिद्धत्तणं च पाविंति ।**
**इंदसमा केइ पुणो, सुरसुक्खं अणुभवेऊणं'' ॥४॥** [ श्रा.दि./१०४ ]

एवं धर्मशालागुरुज्ञानादेरपि यथोचितचिन्तायां स्वशक्त्या यतनीयम्, न हि देवगुर्वादीनां श्रावकं विनाऽन्यः कश्चिच्चिन्ताकर्त्ताऽस्तीति । इदानीं[1] जिनपूजादिकार्यानन्तरकरणीयमाह —'**प्रत्याख्यान**' इत्यादि, '**गुरोः**' धर्माचार्यस्य देववन्दनार्थमागतस्य, स्नात्रादिदर्शनधर्मदेशनाद्यर्थं तत्रैव स्थितस्य, वसतौ वा चैत्यवन्नैषेधिकीत्रयाधिगमपञ्चकादियथार्हविधिना गत्वा, धर्मदेशनायाः प्राक् पश्चाद्वा, **तस्याभ्यर्णे** —उचिते समीपे, उचितत्वं चार्द्धचतुर्थहस्तप्रमाणात् क्षेत्राद्बहिरवस्थानम्, **विनयो** —व्याख्यास्यमानवन्दनकादिरूपस्**तत्पूर्वकं** तमादौ कृत्वेत्यर्थः । **प्रत्याख्यानस्य** देवसमीपे कृतस्य, ततो विशिष्टस्य वा, **क्रिया** —करणं गुरुमुखेन प्रतिपत्तिरित्यर्थः । अयं च विशेषतो गृहिधर्म इत्यन्वयः । त्रिविधं हि प्रत्याख्यानकरणम् —आत्मसाक्षिकं १ देवसाक्षिकं २ गुरुसाक्षिकं ३ चेति, गुरोः[2] पार्श्वे प्रत्याख्यानं कार्यम् । उक्तं च —

''**प्रत्याख्यानं यदासीत्, तत्करोति गरुसाक्षिकम् ।**
**विशेषेणाथ गृह्णाति, धर्मोऽसौ गुरुसाक्षिकम्'' ॥१॥** [ ]

गुरुसाक्षिकत्वे हि दृढता भवति प्रत्याख्यानपरिणामस्य । ''**गुरुसक्खिओ हु धम्मो**'' [ ] इति जिनाज्ञाराधनम्, गुरुवाक्योद्भूतशुभाशयाधिकः क्षयोपशमस्तस्माच्चाधिका प्रतिपत्तिरित्यादिर्गुणः । तत् प्रोक्तं **श्रावकप्रज्ञप्तौ** —

''**संतंमि वि परिणामे, गुरुमूलपवज्जणंमि एस गुणो ।**
**दढया आणाकरणं, कम्मखओवसमवुड्ढी अ'' ॥१॥** [ श्रा.प्र./१११ ]

एवं चान्येऽपि नियमाः सति सम्भवे गुरुसाक्षिकं स्वीकार्याः । प्रत्याख्यानकरणं च गुरोर्विनयपूर्वकमित्युक्तं, स च वन्दनादिरूपस्तत्र वन्दनं[3] त्रिधा–यद्[4] **भाष्यम्** —

''**गुरुवंदणमह तिविहं, तं फिट्टा १ छोभ २ बारसावत्तं ३ ।**
**सिरनमणाइसु पढमं, पुण्णखमासमणदुगि बीअं ॥१॥** [ गु.भा./१ ]

---

१. तुला–योगशास्त्रटीका ३।१२४ प० ६५० ॥ २. तुला–श्राद्धविधिवृत्तिः प० ८२ ॥ ३. L.P.C. । वन्दनं स्फेटाछोभद्वादशावर्तभेदात् त्रिधा L. संशो० मु० ॥ ४. तुला–श्राद्धविधिवृत्तिः प० ८१ ॥

**तइअं तु छंदणदुगे, तत्थ मिहो आइमं सयलसंघे ।**
**बीअं तु दंसणीण य, पयट्ठिआणं च तइअं तु ॥२॥** [ गु.भा./४ ]

येन च प्रतिक्रमणं मण्डल्यां कृतं न स्यात् तेन विधिना बृहद्वन्दनं दातव्यम् । तद्विधिश्चैवं **भाष्ये –**

"**इरिआकुसुमिणुसग्गो, चिइवंदणपुत्तिवंदणालोअं ।**
**वंदणखामणवंदणसंवरचउछोभदुसज्झाओ ॥१॥** [ गु.भा./३८ ]
**इरिआचिइवंदणपुत्तिवंदणचरिमवंदणालोअं ।**
**वंदणखामणचउछोभदिवसुस्सग्गो दुसज्झाओ**" ॥२॥ [ गु.भा./३९ ]

अनयोर्व्याख्या –प्रथमम् ईर्यापथिकीप्रतिक्रमणम् , ततः कुसुमिणेत्यादिकायोत्सर्गः शतोच्छ्वासमानः कुस्वप्नाद्युपलम्भे त्वष्टोत्तरशतोच्छ्वासमानः, ततश्चैत्यवन्दना, ततः 'पुत्ति त्ति' मुखवस्त्रिका क्षमाश्रमणपूर्वं प्रतिलेख्या, ततो वन्दनकद्वयम् , आलोचनं च पुनर्वन्दनकद्वयम् , क्षमणकं च, पुनर्वन्दनकद्वयम् , 'संवर त्ति' प्रत्याख्यानं च 'चउछोभ त्ति' भगवन् इत्यादीनि चत्वारि क्षमाश्रमणानि, ततः'सज्झाय संदिसावउं सज्जाय करउं' इति क्षमाश्रमणद्वयं दत्त्वा स्वाध्यायः कार्य इति प्रातस्त्यवन्दनविधिः ।

प्रथममीर्यापथिकीप्रतिक्रमणम् , ततश्चैत्यवन्दना, क्षमाश्रमणपूर्वं मुखवस्त्रिकाप्रति-लेखनम् , वन्दनकद्वयम् , दिवसचरिममिति प्रत्याख्यानं च, ततो वन्दनकद्वयम् , आलोचनं च, वन्दनकद्वयं च, क्षमणकं च, भगवन् इत्यादिछोभवन्दनानि चत्वारि, ततो देवसिअपायच्छित्तेतिकायोत्सर्गः, ततः प्राग्वत् क्षमाश्रमणद्वयपूर्वं स्वाध्यायः, अयं सान्ध्यवन्दनविधिः ।

अत्र[१] च द्वादशावर्त्तवन्दने अष्टनवत्यधिकशतसङ्ख्यस्थानानि ज्ञेयानि । तानि यथा –

"**मुहणंतय २५ देहा २५ वस्सएसु २५ पणवीस हुंति पत्तेअं ।**
**छट्ठाण ६ छगुरुवयणा ६, छच्च गुणा ६ हुंति नायव्वा ॥१॥** [ गुरु./१ ]
**अहिगारिणो य पंच य ५, इअरे पंचेव ५ पंच आहरणा ५ ।**
**एगोवग्गह १ पंचाभिहाण ५ पंचेव पडिसेहा ५ ॥२॥** [ गुरु./२ ]
**आसायण तित्तीसं ३३, दोसा बत्तीस ३२ कारणा अट्ठ ८ ।**
**छद्दोसा ६ अडनउअं, ठाणसयं वंदणे होइ १९८**" ॥ [ गुरु./३ ]
[ तुला-प्र.सा./९३-९५ ]

---

१. अथ–मु० ॥

एतद्विवरणं यथा —

**"दिट्ठिपडिलेह एगा, पप्फोडा तिन्नि तिन्नि अंतरिआ ।**
**अक्खोडा पक्खोडा, नव नव मुहपत्ति पणवीसा** ॥१॥ [ गुरु./४ ]
**पायाहिणेण तिअ तिअ, बाहुसु सीसे मुहे अ हिअए अ ।**
**पिट्ठीइ हुंति चउरो छप्पाए देहपणवीसा**" ॥२॥ [ र.सं./३८ ]

एताश्च देहप्रतिलेखनाः पञ्चविंशतिः पुरुषानाश्रित्य ज्ञेया, स्त्रीणां तु गोप्यावयवगोपनाय हस्तद्वयवदनपादद्वयानां प्रत्येकं तिस्रः २ प्रमार्जना इति पञ्चदशैव भवन्तीति **प्रवचनसारोद्धारवृत्तौ [ तुला प० ५७ ]** । तथा [1]मुखकायप्रतिलेखनासु मनसः स्थिरीकरणार्थमेवं विचिन्तयेत् —

**"सुत्तत्थतत्तदिट्ठी १, दंसणमोहतिगं च ४ रागतिगं ७ ।**
**देवाईतत्ततिगं १०, तह य अदेवाइतत्ततिगं १३** ॥१॥ [ प.कु./१ ]
**नाणाइतिगं १६ तह तव्विराहणा १९ तिन्निगुत्ति २ दंडतिगं २५ ।**
**इअ मुहणंतगपडिलेहणाइ कमसो विचिंतिज्जा** ॥२॥ [ प.कु./२ ]
**हासो रई अ अरई ३, भय सोग दुगुंछया य ६ वज्जिज्जा ।**
**भुअजुअलं पेहंतो, सीसे अपसत्थलेसतिगं ९** ॥३॥ [ प.कु./३ ]
**गारवतिगं च वयणे १२, उरि सल्लतिगं १५ कसायचउ पिट्ठे १९ ।**
**पयजुगि छज्जीववहं २५, तणुपेहाए वि जाणमिणं** ॥४॥ [ प.कु./४ ]
**जइ वि पडिलेहणाए, हेऊ जिअरक्खणं जिणाणा य ।**
**तह वि इमं मणमक्कड-निजंतणत्थं मुणी बिंति**" ॥५॥ [ प.कु./५ ]

आवश्यकानि २५ —

"[2]**दुओणयं अहाजायं, किइकम्मं बारसावयं ।**
**चउस्सिरं तिगुत्तं च, दुपवेसं [3]इगनिक्खमणं**" ॥१॥ [ आ.नि./१२०२ ] ति ।

द्वे अवनमने —'इच्छामि खमासमणो वंदिउं जावणिज्जाए निसीहिआए' इत्यभिधाय गुरोश्छन्दोऽनुज्ञापनाय प्रथममवनमनम् ॥१॥

यदा पुनः कृतावर्त्तो निष्क्रान्त इच्छामीत्यादिसूत्रमभिधाय पुनश्छन्दोऽनुज्ञापनायैव तदा द्वितीयम् ॥२॥

---

१. L.P. । मुखकायप्रतिलेखनायां (सु) मनसः–मु० । मुखवस्त्रिकाकायप्रतिलेखनायां मनसः–C. ॥ २. तुला–आवश्यकचूर्णिः प० ४१–९, आवश्यकहारिभद्रीयवृत्तिः प० ५४२–९, योगशास्त्रवृत्ति प० ६५४ तः ॥ ३. L.P.C. । इक्क° मु० । एग° योगशास्त्रवृत्तौ ॥

तथा यथाजातं –जातं जन्म, तच्च द्वेधा –प्रसवः प्रव्रज्याग्रहणं च । तत्र प्रसवकाले रचितकरम्पुटो जायते, प्रव्रज्याकाले च गृहीतरजोहरणमुखवस्त्रिकः इति, अत एव रजोहरणादीनां पञ्चानां शास्त्रे यथाजातत्वमुक्तम् । तथा च तत्पाठः –

''**पंच अहाजायाइं, चोलपट्टो १ तहेव रयहरणं २ ।**
**उण्णिअ ३ खोमिअ ४ निस्सिज्जजुअलं तह य मुहपत्ती**'' ॥१॥ [ **प्र.सा./८६०** ]

यथा जातम् अस्य स यथाजातस्तथाभूत एव वन्दते इति वन्दनमपि यथाजातम् ।३।

तथा द्वादशावर्त्ताः-कायचेष्टाविशेषा गुरुचरणन्यस्तहस्तशिरःस्थापनारूपा[1] यस्मिन् तद् द्वादशावर्त्तम् , इह च प्रथमप्रविष्टस्य 'अहोकायं' इत्यादिसूत्रोच्चारणगर्भाः षडावर्त्ता, निष्क्रम्य पुनः प्रविष्टस्यापि त एव षडिति द्वादश १५।

चत्वारि शिरांसि यस्मिन् तच्चतुःशिरः, प्रथमप्रवेशे क्षमणाकाले शिष्याचार्ययोरवनमच्छिरोद्वयं, निष्क्रम्य पुनः प्रवेशे तथैव शिरोद्वयम् १९।

त्रिगुप्तं मनोवाक्कायकर्मभिर्गुप्तम् २२।

तथा प्रथमोऽनुज्ञाप्य प्रवेशो द्वितीयः पुनर्निर्गत्य प्रवेश इति द्वौ प्रवेशौ यत्र तद् द्विप्रवेशम् २४।

एकं निष्क्रमणमावश्यिक्या[2] निर्गच्छतो यत्र तदेकनिष्क्रमणम् २५।

तथा षट् स्थानानि शिष्यस्य –

''[3]**इच्छा य १ अणुन्नवणा २, अव्वाबाहं च ३ जत्त ४ जवणा य ५ ।**
**अवराहखामणा वि अ ६, वंदणदायस्स छट्ठाणा**'' ॥१॥ [ **आ.नि.१२३२,गु.भा.३३** ]

गुरुवचांस्यपि षडेव –

''**छंदेण १ ऽणुजाणामि २, तह त्ति ३ तुब्भं पि वट्टए ४ एवं ५ ।**
**अहमवि खामेमि तुमं[4] ६, आलावा[5] वंदणरिहस्स**'' ॥१॥
[ **आवश्यकनिर्युक्तौ १२३८, गुरुवन्दनभाष्ये २४, प्रवचनसारोद्धारे १०१** ]

एते द्वयेऽपि यथास्थानं सूत्रव्याख्यायां दर्शयिष्यन्ते ।

---

१. स्थापनरूपा-इति योगशास्त्रवृत्तौ प० ६५५ ॥ २. °मावश्यक्या-इति आवश्यकहारिभद्र्यां प० ५४३ ॥ ३. तुला-योगशास्त्रवृत्तिः प० ६६१, प्रवचनसारोद्धारः गा० ९९, विचारसार प्र० गा० ७२७ ॥ ४. तुमे-इति योगशास्त्र-प्रवचनसारोद्धारवृत्त्योः ॥ ५. वयणाइं-इति आवश्यकनिर्युक्तौ, गुवन्दनभाष्यप्रवचनसारोद्धारविचारसारेषु ॥

गुणास्त्वमी —

**''विणओवयार १ माणस्स, भंजणा २ पूअणा गुरुजणस्स ३ ।**
**तित्थयराण य आणा ४, सुअधम्माराहणा ५ ऽकिरिआ ६ ॥१॥**

**[ आवश्यकनिर्युक्तौ १२२९, प्रवचनसारोद्धारे १००, विचारसारे ७१८ ]**

विनय एवोपचारो —भक्तिविशेषः १। तया मानस्याहङ्कृतेर्भञ्जनम् २। गुरुजनस्य पूजना ३, तीर्थकराणां चाज्ञा ४, श्रुतधर्माराधना ५, अक्रियेति —सर्वक्रियाविगमादचिरेण मोक्षश्च वन्दनेन स्यादिति ६।

वन्द्या वन्दनार्हा —

**''आयरिअ उवज्झाए, पवित्ति थेरे तहेव रायणिए ।**
**एएसिं किइकम्मं, कायव्वं निज्जरट्ठाए''** ॥१॥ [ प्र.सा./१०२ ]

आचार्यादिस्वरूपं चेदम् —

**''पंचविहं आयारं, आयरमाणा तहा पभासंता ।**
**आयारं दंसंता, आयरिआ तेण वुच्चंति** ॥१॥ [ आ.नि./९९९ ]
**बारसंगो जिणक्खाओ, सज्झाओ कहिओ बुहेहिं ।**
**तं उवइसंति जम्हा उज्झाया तेण वुच्चंति** ॥२॥ [ आ.नि./१००१ ]
**तवसंजमजोगेसुं , जो जोगो तत्थ तं पवत्तेइ ।**
**असुहं च नियत्तेई, गणतत्तिल्लो पवत्ती उ** ॥३॥ [ आ.नि./११०४ ]
**थिरकरणा पुण थेरो, पवत्तिवावारिएसु अत्थेसु[1] ।**
**जो जत्थ सीयइ जई, संतबलो तं थिरं कुणइ** ॥४॥ [ आ.नि./११०७ ]

गणावच्छेदकोऽप्यत्रानुपात्तोऽपि साहचर्यादत्र द्रष्टव्यः । स च —

**''उद्धावणा पहावण, खित्तोवहिमग्गणासु अविसाई ।**
**सुत्तत्थतदुभयविऊ, गणवच्छो एरिसो होइ''** ॥५॥ [ व्य.भा./९६२ ]

एते पञ्चापि न्यूनपर्याया अपि वन्दनीया, रत्नाधिकस्तु पर्यायज्येष्ठ एव । **चूर्णौ त्वन्यमते** इत्थमपि यथा —

**''अन्ने पुण भणंति —अन्नो वि जो तहाविहो रायणिओ सो वंदेयव्वो, रायणिओ नाम जो नाणदंसणचरणसाहणेसु सुट्ठु पयओ''** [ आवश्यकचूर्णौ ] त्ति ।

अवन्द्या निष्कारणे वन्दनानर्हाः यथा —

**''पासत्थो ओसन्नो, होइ कुसीलो तहेव संसत्तो ।**
**अहछंदो वि य एए, अवंदणिज्जा जिणमयंमि''** ॥१॥[ सं.प्र.गु.८,प्र.सा.१०३ ]

---

१. L.P.C. । °सुं–मु० ॥

[1]तत्र पार्श्वे ज्ञानादीनां तिष्ठतीति पार्श्वस्थः, अथवा मिथ्यात्वादयो बन्धहेतवः पाशास्तेषु तिष्ठतीति पाशस्थः । [यथा–]

**''सो पासत्थो दुविहो, सव्वे देसे य होइ नायव्वो ।**
**सव्वंमि नाणदंसणचरणाणं जो उ पासंमि ॥१॥ [ सं.प्र.गु./९ ]**
**देसंमि य पासत्थो, सिज्जायरभिहडरायपिंडं च ।**
**नियं च अग्गपिंडं, भुंजइ निक्कारणे चेव ॥२॥ [ सं.प्र.गु./१० ]**
**कुलनिस्साए विहरइ, ठवणकुलाणि य अकारणे विसइ ।**
**संखडिपलोयणाए, गच्छइ तह संथवं कुणइ'' ॥३॥ [ सं.प्र.गु./११ ]**

अवसीदति स्म क्रियाशैथिल्यान्मोक्षमार्गे श्रान्त इवावसन्नः । [यथा–]

**''ओसन्नो वि य दुविहो, सव्वे देसे य तत्थ सव्वंमि ।**
**उउबद्धपीठफलगो, ठवियगभोई य[2] नायव्वो ॥१॥ [ सं.प्र.गु./१२, प्र.सा.१०६ ]**
**आवस्सयसज्झाए, पडिलेहणझाणभिक्खअभतट्ठे ।**
**आगमणे निग्गमणे, ठाणे निसीयण तुयट्टे ॥२॥ [ सं.प्र.गु./१३, प्र.सा.१०७ ]**
**आवस्सयाइआइं, न करइ[3] अहवा[4] विहीणमहिआइं ।**
**गुरुवयणबलाइ[5] तहा, भणिओ एसो उ ओसन्नो'' ॥३॥ [ सं.प्र.गु./१४, प्र.सा.१०८ ]**

कुत्सितं ज्ञानादित्रयविराधकं शीलं स्वभावो यस्य स कुशीलो । [यथा–]

**''कालविणयाइरहिओ, नाणकुसीलो अ दंसणे इणमो ।**
**निस्संकिआइ[6]विजुओ, चरणकुसीलो इमो होइ ॥१॥ [ सं.प्र.गु./१५ ]**
**कोऊअभूइकम्मे, पसिणापसिणे निमित्तमाजीवी ।**
**कक्ककरुआइलक्खण, उवजीवइ विज्जमंताई'' ॥२॥ [ सं.प्र.गु./१६, प्र.सा.१११ ]**

संविग्नासंविग्नसंसर्गात् तत्तद्भावं संसजति स्मेति संसक्तो । [यथा–]

**''पासत्थाईएसुं संविग्गेसुं च जत्थ मिलई उ ।**
**तहि तारिसओ होई, पिअधम्मो अहव इअरो अ ॥१॥ [ प्रव.सा./१२० ]**
**सो दुविअप्पो भणिओ, जिणेहिं जिअरागदोसमोहेहिं ।**
**एगो अ संकिलिट्ठो, असंकिलिट्ठो तहा अण्णो'' ॥२॥ [ प्रव.सा./११८ ]**

---

१. तुला–प्रवचनसारोद्धारटीका भा० १ प० ६७–६८ ॥ २. व० इति संबोधप्र० ॥ ३. करेइ–इति प्रवचनसारोद्धारे गा० १०७ ॥ ४. अहवा करेइ हीण० इति संबोधप्र० ॥ ५. बला वि य तहा–इति संबोधप्रकरणे । बला य तहा–इति प्रवचनसारोद्धार गा० १०७ ॥ ६. °इरहिओ–इति सम्बोधप्र० ॥

[१]यथाकथञ्चिद् गुर्वागमनिरपेक्षतया सर्वकार्येषु छन्दोऽभिप्रायो यस्य स यथाछन्दो यथा –

**''उस्सुत्तमणुवइट्ठं, सच्छंदविगप्पिअं अणणुवाई ।**
**[२]परतत्ति पवत्तेइ, तिणेअ इणमो अहाछंदो''** ॥१॥ [ प्र.सा./१२२ ]

**''पासत्थाइ वंदमाणस्स, नेव कित्ती न निज्जरा होइ ।**
**कायकिलेसं एमेव, कुणई तह कम्मबंधं च''** ॥१॥ [ आ.नि./११८८ ]

किं बहुना ? तैः संसर्गं कुर्वन्तो गुणवन्तोऽप्यवन्दनीयाः । यतः –

**''असुइट्ठाणे पडिआ, चंपगमाला न कीरई सीसे ।**
**पासत्ताईठाणेसुं , वट्टमाणा तह अपुज्जा** ॥१॥ [ आ.नि./११११ ]
**पक्कणकुले वसंतो, सउणीपारो वि गरहिओ होइ ।**
**इअ गरहिआ सुविहिआ, मज्झि वसंता कुसीलाणं''** ॥२॥ [ आ.नि./१११२ ] इति ।

ज्ञातानि–

**''दव्वे भावे वंदण १, रयहरणा २ ऽऽवत्त ३ नमण ४ विणएहिं ५ ।**
**सीअल १ खुड्डुय २ कण्हे ३, सेवय ४ पालय ५ उदाहरणा''** ॥१॥ [ ]

तत्र वन्दने गुणस्तुतौ **शीतलाचार्य**दृष्टान्तः १। द्रव्यचितौ रजोहरणादिधारणे भावचितौ ज्ञानादित्रये **क्षुल्लकाचार्य**कथा २। आवर्त्तादिकृतिकर्मणि **कृष्ण**दृष्टान्तः ३। शिरोमनमनपूजायां **सेवकद्वय**दृष्टान्तः ४। विनयकर्मणि **शाम्बपालक**दृष्टान्तः ५। कथानकविस्तरस्तु ग्रन्थान्तरादवसेयः । एकोऽवग्रहः सार्द्धत्रयहस्तमानः सूत्रव्याख्यायां वक्ष्यमाणः ।

नामानि ५–

**''वंदण १ चिइ २ किइकम्मं, ३, पूआकम्मं च ४ विणयकम्मं ५ ।**
**वंदणगस्स य एए, नामाइँ हवंति पंचेव** ॥१॥ [ प्रव.सा./१२७ ]

एतानि प्रागुक्त**शीतला**दिदृष्टान्तेषु भावितार्थानि ।

वन्दनकस्य पञ्चैते निषेधा निषेधस्थानानि –

**''वक्खित्तपराहुत्ते, [३]पमत्ते मा कयाइ वंदिज्जा ।**
**आहारं च करिंते, नीहारं वा जइ करेइ''** ॥१॥ [ आ.नि./११९८, प्र.सा./१२४ ]

व्याक्षिप्तोऽनुयोगप्रतिलेखनादावन्यत्र कर्मणि दत्तमनाः, प्रमत्तो निद्राद्यैः, शेषं व्यक्तम् । आशातनाश्च त्रयस्त्रिंशत्सूत्रेण सह व्याख्यास्यन्ते ।

---

१. L.P.C. । तथा यथा–मु० ॥ २. परतत्तिपवत्ती तिंतिणो य–इति प्रवचनसारोद्धारे ॥ ३. अ पमत्ते–इति योगशास्त्रवृत्तौ प० ६५९ ॥

दोषा[१]: ३२–

**''अणाढिअं च थद्धं[२] च, पविद्धं परिपिंडिअं ।**
**टोलगइ अंकुसं चेव, तहा कच्छभरिंगिअं ॥१॥ [ आ.नि./१२२१, प्र.सा./१५० ]**
**मच्छुव्वत्तं मणसा वि, पउट्ठं तह य वेइयाबद्धं ।**
**भयसा चेव भयंतं, मित्ति-गारव-कारणा ॥२॥ [ आ.नि./१२२२, प्र.सा./१५१ ]**
**तेणियं [३]पडिणीयं चेव, रुट्ठं तज्जियमेव य ।**
**सढं च हीलियं चेव, तहा [४]विपलिउंचियं ॥३॥ [ आ.नि./१२२३, प्र.सा./१५२ ]**
**दिट्ठमदिट्ठं च तहा, सिंगं च करमोअणं ।**
**[५]आलिद्धमणालिद्धं, ऊणं उत्तरचूलिअं ॥४॥ [ आ.नि./१२२४, प्र.सा./१५३ ]**
**मूअं च ढड्ढरं चेव, [६]चुडलियं च अपच्छिमं ।**
**बत्तीसदोसपरिसुद्धं, किइकम्मं पउंजए ॥५॥ [ आ.नि./१२२५, प्र.सा./१५४ ]**

आसां व्याख्या —अनादृतम् —सम्भ्रमरहितं वन्दनम् । निरादरवन्दनमित्यर्थः । [तद्दोषदुष्टमिति सर्वत्र योज्यम्] १।

स्तब्धं —मदाष्टकवशीकृतस्य वन्दनं, देहमनसोः स्तब्धत्वाच्चतुर्द्धा २।

प्रविद्धं —वन्दनं ददत एव पलायनम् ३।

[७]परिपिण्डितं —प्रभूतानां युगपद्वन्दनम् , यद्वा कुक्ष्योरुपरि हस्तौ व्यवस्थाप्य परिपिण्डित-करचरणस्याव्यक्तसूत्रोच्चारणपुरस्सरं वन्दनम् ४।

टोलगतिं —तिड्डुवदुत्प्लुत्योत्प्लुत्य विसंस्थुलं वन्दनम् ५।

अङ्कुशम् —[८]उपकरणचोलपट्टककल्पादौ हस्ते वाऽवज्ञया समाकृष्याङ्कुशेन गजस्येवाचार्यस्योद्ध्वस्थितस्य शयितस्य प्रयोजनान्तरव्यग्रस्य वा वन्दनकार्थमासने उपवेशनम् , न हि पूज्याः कदाचिदप्याकर्षणमर्हन्ति, अविनयत्वादस्य । यद्वा रजोहरणमङ्कुशवत् करद्वयेन गृहीत्वा वन्दनम् यदि वा अङ्कुशाक्रान्तहस्तिन इव शिरोनमनोन्नमने कुर्वाणस्य वन्दनम् ६।

---

१. तुला–योगशास्त्रवृत्तिः प० ६५६ ॥ २. थड्ढं–इति योगशास्त्रवृत्तौ प० ६५६ ॥ ३. पडणीयं–इति योगशास्त्रवृत्तौ प० ६५६ ॥ ४. विप्प° इति प्रवचनसारोद्धारे ॥ ५. आलिद्धमणालिट्ठं–इति आवश्यकनिर्युक्तौ । आलिट्ठमणालिट्ठं'–इति प्रवचनसारोद्धारे ॥ ६. चुडुलिं–आवश्यकनिर्युक्तौ ॥ ७. परिपिण्डनं–मु० । C. योगशास्त्रवृत्तावपि परिपिण्डितं ॥ ८. तुला–योगशास्त्रवृत्तिः प० ६५८, प्रवचनसारोद्धारवृत्तिः प० ९७ । उपकरणे–इति प्रवचनसारोद्धारवृत्तौ योगशास्त्रवृत्तौ च । 'उवगरणे हत्थंमि व घेत्तुं निवेसेइ अंकुसं बिंति । इति प्रवचनसारोद्धारे गा० १५८ ॥

कच्छपरिङ्गितम् –उद्ध्र्वस्थितस्य 'तेत्तीसण्णयराए' इत्यादिसूत्रमुच्चारयत उपविष्टस्य वा 'अहोकायं काय' इत्यादि सूत्रमुच्चारयतोऽग्रतोऽभिमुखं पश्चादमिभुखं च रिङ्गतश्चलतो वन्दनम् ७।

मत्स्योद्वृत्तम् –उत्तिष्ठन्निविशमानो वा जलमध्ये मत्स्य इवोद्वर्त्तते उद्वेल्लते[1] यत्र तत् । यद्वा एकं वन्दित्वा द्वितीयस्य साधोर्द्रुतं द्वितीयपार्श्वेन रेचकावर्त्तेन मत्स्यवत् परावर्त्तमानस्य वन्दनम् ८।

मनसा प्रदुष्टम् –शिष्यस्तत्सम्बन्धी वा गुरुणा किञ्चित् परुषमभिहितो यदा भवति तदा मनसो दुषितत्वात् मनसा प्रदुष्टम् यद्वा वन्द्यो हीनः केनचिद् गुणेन, ततोऽहमेवंविधेनापि वन्दनं दापयितुमारब्ध इति चिन्तयतो वन्दनम् ९।

वेदिकाबद्धं –[2]जान्वोरुपरि हस्तौ निवेश्याधो वा पार्श्वयोर्वा उत्सङ्गे वा [3]एकं जानु करद्वयान्तः कृत्वा वा इति पञ्चभिर्वेदिकाभिर्बद्धं युक्तं वन्दनम् १०।

बिभ्यत् –'सङ्घात् कुलाद् गच्छात् क्षेत्राद् वा निष्कासयिष्येऽहम्' इति भयाद् वन्दनम् , ११।

भजमानम् –'भजते मां सेवायां [4]पतितः, अग्रे वा मम भजनं करिष्यति, अतोऽहमपि वन्दनसत्कं निहोरकं निवेशयामि' इतिबुद्ध्या वन्दनम् १२।

मैत्रीतो –मम मित्रमाचार्य इति, आचार्येणेदानीं मैत्री वा भवत्विति वन्दनम् १३।

[5]गौरवाद् –वन्दनकं सामाचारीकुशलोऽहमिति गर्वादन्येऽप्यवगच्छन्तु मामिति यथावदावर्त्तादीनाराधयतो वन्दनम् १४।

कारणात् –ज्ञानादिव्यतिरिक्ताद् वस्त्रादिलाभहेतोर्वन्दनम् , यद्वा ज्ञानादिनिमित्तमपि लोकपूज्योऽन्येभ्यो वाऽधिकतरो भवामीति अभिप्रायतो वन्दनं, यद्वा वन्दनकमूल्यवशीकृतो मम प्रार्थनाभङ्गं न करिष्यतीति बुद्ध्या वन्दनम् १५।

---

१. °ति–योगशास्त्र [प० ६५८] प्रवचनसारोद्धार[प० ९७]वृत्त्योः ॥ २. जान्वोः–मु० C. संशोधिते च । जानुनोः C. मूल योगशास्त्रप्रवचनसारोद्धारवृत्त्योः ॥ ३. एक– C. । एकं वा–इति प्रवचनसारोद्धारवृत्तौ ५.९८ । एकं–योगशास्त्रवृत्तौ [प० ६५८] नास्ति ॥ ४. पतितः मम अग्रे–इति योगशास्त्रवृत्तौ । 'एष तावद्भजते–अनुवर्तते मां सेवायां पतितो वर्तते ममेत्यर्थः, अग्रे च मम भजनं करोत्यसौ' इति प्रवचनसारोद्धारवृत्तौ ५.९८ ॥ ५. गौरवात् वन्दनकसमा° इति योगशास्त्रवृत्तौ । '' 'गारव त्ति' गौरवनिमित्तं वन्दनकमिति कथम् ? 'सिक्खाविणीओऽहं' ति शिक्षा–वन्दनक–प्रदानादिसामाचारी'' इति प्रवचनसारोद्धारवृत्तौ प० ९८–९९ ॥

स्तैनिकम् —वन्दमानस्य मे लाघवं भविष्यतीति परेभ्य आत्मानं गूहयतो वन्दनम्, अयमर्थः —एवं नाम शीघ्रं वन्दते यथा स्तेनवत् केन(चित्)[1] दृष्टः केनचिन्नेति १६।

प्रत्यनीकम् —आहारादिकाले वन्दनम्, यदाह —"**वक्खित्तपराहुत्ते**"[2] [ **आवश्यनि० १२१२** ] इत्यादि १७।

रुष्टम् —क्रोधाध्मातस्य गुरोर्वन्दनम्, आत्मना वा क्रुद्धेन वन्दनम् १८।

तर्ज्जितम् —'अवन्द्यमानो न कुप्यसि, वन्द्यमानश्चाविशेषज्ञतया न मे प्रसीदसि'इति निर्भर्त्सयतो, यद्वा 'बहुजनमध्ये मां वन्दनं दापयंस्तिष्ठसि ज्ञास्यते मया तवैकाकिनः' इति धिया, तर्जन्या शिरसा वा तर्जयतो वा[3] वन्दनम् १९।

शठम् —शाठ्येन विश्रम्भार्थं वन्दनम्, ग्लानादिव्यपदेशं वा कृत्वा न सम्यग् वन्दनम् २०।

हीलितम् —हे गणिन् वाचक ! किं भवतां वन्दितेनेत्यादिना अवजानतो वन्दनम् २१।

विपरिकुञ्चितम् —अर्द्धवन्दित एव देशादिकथाकरणम् २२।

दृष्टादृष्टम् —तमसि स्थितः केनचिदन्तरित एवमेवास्ते, दृष्टस्तु वन्दते २३।

शृङ्गम् —'अहोकायं काय' इत्याद्यावर्त्तानुच्चारयतो ललाटमध्यदेशमस्पृशतः, शिरसो वामदक्षिणे शृङ्गे स्पृशतो वन्दनम् २४।

'कर[4]—इव राजदेयभाग इवार्हत्प्रणीतो वन्दनकरोऽवश्यं दातव्यः' इतिधिया वन्दनम् २५।

मोचनम् —लौकिककराद् वयं मुक्ता, न मुच्यामहे वन्दनकरादिति बुद्ध्या वन्दनम् २६।

आश्लिष्टानाश्लिष्टम् —अत्र चतुर्भङ्गी, सा च 'अहोकायं काय' इत्यावर्त्तकाले भवति। रजोहरणस्य शिरसश्च कराभ्यामाश्लेषणम् १, रजोहरणस्य न शिरसः २, शिरसो न रजोहरणस्य ३,न रजोहरणस्य नापि शिरसः ४। अत्र प्रथमः शुद्धः, शेषास्त्वशुद्धाः २७।

न्यूनम् —व्यञ्जनाभिलापावश्यकैरसम्पूर्णम् २८।

उत्तरचूडम् —वन्दनं दत्त्वा महता शब्देन 'मस्तकेन वन्दे' इत्यभिधानम् २९।

मूकम् —आलापाननुच्चारयतो वन्दनम् ३०। ढड्ढरम् —महता शब्देनोच्चारयतो वन्दनम् ३१।

---

१. केन दृष्टः–L.P.C. । केनचिद् दृष्टः इति योगशास्त्रवृत्तौ प० ६५९ ॥ २. वक्खित्त–इत्यादि–मु० C. सं० ॥ ३. वा–योगशास्त्रवृत्तौ नास्ति प० ६६० ॥ ४. करमिव राजदेयभागमिव–इति प्रवचन–सारोद्धारवृत्तौ प० १०१ ।

चुंडली[1]–उल्मूकम् यथोल्मूकं गृह्यते तथा रजोहरणं गृहीत्वा वन्दनम्, यद्वा दीर्घहस्तं प्रसार्य 'वन्दे' इति भणतो वन्दनम्, अथवा हस्तं भ्रमयित्वा[2] 'सर्वान् वन्दे' इति वदतो वन्दनम् ३२।

**''किइकम्मं पि कुणंतो, न होइ किइकम्मनिज्जराभागी ।**
**बत्तीसामन्नयरं, साहू ठाणं विराहंतो ॥१॥** [ आ.नि./१२०५ ]
**बत्तीसदोसपरिसुद्धं, किइकम्मं जो पउंजइ गुरूणं ।**
**सो पावइ निव्वाणं, अचिरेण विमाणवासं वा''** ॥२॥ [ आ.नि./१२०७ ]

कारणानि ८-

**''पडिक्कमणे १ सज्झाए २ काउस्सग्गा ३ वराह ४ पाहुणए ५ ।**
**आलोयण ६ संवरणे ७, उत्तमट्ठे य ८ वंदणयं''** ॥१॥ [ आ.नि./१२०० ]

सर्वमप्यनुष्ठानं प्रथमं साधूनुद्दिश्य सूत्रेऽभिहितम्, श्राद्धस्य तु यथायोग्यमायोजनीयमिति साधूनां वन्दनदानेऽष्टौ कारणानि । तत्र प्रतिक्रमणे चत्वारि वन्दनकानि द्विकद्विकरूपाणि स्युः, तानि च सामान्यत एकमेव १।

स्वाध्याये वाचनादिविषये त्रीणि –

**''सज्झाए वंदित्ता पट्ठवेइ पढमं १। पट्ठविए पवेइअंतस्स बितिअं २। पच्छा उद्दिट्ठं समुद्दिट्ठं पढइ, उद्देससमुद्देसवंदणाणमिहेवंतब्भावो, तओ जाहे चउभागावसेसा पोरिसी ताहे पाए पडिलेहेइ, जइ न पढिउकामो तो वंदइ, अह पढिउकामो तो अवंदित्ता पाए पडिलेहेइ, पडिलेहित्ता पच्छा पढइ, कालवेलाए वंदिउं पडिक्कमइ, एवं तइअं ३''** [ ]।

एतान्यपि त्रीणि सामान्यतश्चैकमेव २। एवं पूर्वाह्ने सप्त । अपराह्णेऽपि सप्तैव भवन्ति, अनुज्ञावन्दनानां स्वाध्यायवन्दनेष्वेवान्तर्भावात् । एतानि ध्रुवाणि कृतिकर्माणि चतुर्दश भवन्ति, अभक्तार्थिकस्य । इतरस्य तु प्रत्याख्यानवन्दनेनाधिकानि भवन्ति । यत उक्तम् –

**''चत्तारि पडिक्कमणे, किइकम्मा हुंति तिन्नि सज्झाए ।**
**पुव्वण्हे अवरण्हे, किइकम्मा चोद्दस हवंति''** ॥१॥ [ आ.नि./१२०१ ]

---

१. चुडुली–इति योगशास्त्रवृत्तौ प० ६६१ । 'चुडलिं व गिण्हिऊणं रयहरणं होइ चुडलिं तु' इति प्रवचनसारोद्धारे [गाथा १७३] 'चुडुलिय व्व त्ति [चुडुलिं व त्ति–जे० प्रतेः पाठान्तरम्] उल्कामिव' इति तत्रैव वृत्तौ प० १०२ ॥ २. P. सं० योगशास्त्रवृत्तौ च प० ६६१ । भ्रमयन्–इति प्रवचनसारोद्धार-वृत्तौ प० १०२ । भ्रमित्वा–मु० C.P. मूल ॥

इति कृतं प्रसङ्गेन २। तथा कायोत्सर्गे –विकृत्यनुज्ञारूपे, यो हि विकृतिपरिभोगाय आचाम्लविसर्जनार्थं क्रियते ३। अपराधे गुरुविनयलङ्घनरूपे[1] यतस्तं वन्दित्वा क्षमयति, पाक्षिकवन्दनान्यपराधे पतन्ति ४। प्राघूर्णके –ज्येष्ठे समागते सति वन्दनकं भवति । अत्र चायं विधिः –

**''संभोइ अण्णसंभोइआ य, दुविहा हवंति पाहुणया ।**
**संभोइए आयरिअं, आपुच्छित्ता उ वंदंति ॥१॥ [ ]**
**इअरे पुण आयरियं, वंदित्ता संदिसाविअं तह य ।**
**पच्छा वंदंति जइ, गयमोहा अहव वंदावे'' ॥२॥ [ ] ५।**

तथा आलोचनायां च ६। संवरणे भुक्तानन्तरं प्रत्याख्यानकरणे दिवसचरिमरूप इत्यर्थः । अथवा भक्तार्थिनः केनचित् कारणेन पुनरभक्तार्थप्रत्याख्याने ७। उत्तमार्थे चाराधनाकाले ८ इति ।

दोषाः ६– **''माणो अविणयखिंसा, नीयागोयं अबोहिभववुड्ढी ।**
**अनमंते छद्दोसा, एवं अडनउयसयमिहयं'' ॥१॥ [ ]**

अथ सूत्रम् –''**इच्छामि[2] खमासमणो ! वंदिउं जावणिज्जाए निसीहिआए[3], अणुजाणह मे मिउग्गहं, णिसीहि । अहोकायं कायसंफासं खमणिज्जो भे किलामो, अप्पकिलंताणं[4] बहुसुभेण भे दिवसो वइक्कंतो ? जत्ता भे ? जवणिज्जं च भे ? खामेमि खमासमणो देवसिअं[5] वइक्कमं, आवस्सियाए पडिक्कमामि खमासमणाणं देवसिआए आसायणाए तित्तीसन्नयराए जं किंचि मिच्छाए मणदुक्कडाए वयदुक्कडाए काय-दुक्कडाए कोहाए माणाए मायाए लोभाए सव्वकालियाए सव्वमिच्छोवयाराए सव्वधम्मा-इक्कमणाए आसायणाए जो मे अइयारो कओ तस्स खमासमणो ! पडिक्कमामि निंदामि गरिहामि अप्पाणं वोसिरामि**'' ॥

अत्र हि शिष्यो गुरुवन्दनेन[6] वन्दितुकामः पूर्वं लघुवन्दनपुरस्सरं सन्दंशकौ प्रमृज्योपविष्ट एव मुखवस्त्रिकां पञ्चविंशतिकृत्वः प्रत्युपेक्षते, तया च शरीरं पञ्चविंशतिकृत्व एव प्रमृज्य परेण विनयेन मनोवाक्कायसंशुद्धो गुरोः सकाशादात्मप्रमाणात् क्षेत्राद्बहिःस्थितोऽधिज्यचाप-वदवनतकायः करद्वयगृहीतरजोहरणादिर्वन्दनायोद्यत एवमाह –

---

१. L.P.C. सं । गुरविनयबन्धन(योल्लङ्घन)रूपे–मु० ॥ २. तुला–योगशास्त्रटीका प० ६६२-७ ॥ ३. निसीही–यो० टी० प० ६६२ ॥ ४. °ण–यो०टी० ॥ ५. ते° यो० टी० ॥ ६. गुरुं°–यो०टी० ॥

‘इच्छामि’ अभिलषामि, अनेन बलाभियोगः [1]परिहृतः, ‘क्षमाश्रमण’ ‘‘**क्षमूष् सहने**’’ [ **पाणिनीयधातुपाठे ४४२** ] [2]इत्यस्यार्षत्वादङि क्षमा, सहनमित्यर्थः, श्राम्यति संसारविषये खिन्नो भवति तपस्यतीति [3]वा नन्द्यादित्वात् कर्त्तर्यने श्रमणः, क्षमाप्रधानः श्रमणः क्षमाश्रमणस्तस्य सम्बोधने प्राकृते ‘खमासमणो’ ‘‘**डो दीर्घो वा**’’ [ **सिद्धहेम ८-३-३८** ] इति आमन्त्र्ये सेर्डोकारः । क्षमाग्रहणेन मार्दवार्जवादयो गुणाः सूचिताः । ततश्च ‘क्षमादिगुणोपलक्षितो यतिः प्रधानः’ अनेन वन्दनार्हत्वं तस्यैव सूचितम् । किं कर्त्तुम् ? वन्दितुं –नमस्कर्तुम् , भवन्तमिति गम्यते । कया ? यापनीयया नैषेधिक्या, अत्र नैषेधिक्येतिविशेष्यम् , यापनीययेति विशेषणम् , ‘‘**षिधु गत्याम्**’’ [ **हैम धा० पा० १।३२०** ] इत्यस्य निपूर्वस्य घञि निषेधः प्राणातिपातादिनिवृत्तिः, स प्रयोजनमस्या नैषेधिकी –तनुः, तया [4]प्राणातिपातादिनिवृत्तया तन्वा इत्यर्थः । कीदृश्या ? यापनीयया, ‘‘**यांक् प्रापणे**’’ [ **धा० पा० २-४-१०६२** ] अस्य णिगन्तस्य प्वागमे यापयतीति यापनीया, प्रवचनीयादित्वात् कर्त्तर्यनीयः, तया, शक्तिसमन्वितयेत्यर्थः ।

अयं समुदायार्थः –हे श्रमणगुणयुक्त ! अहं शक्तिसमन्वितशरीरः प्रतिषिद्धपाप-क्रियश्च त्वां वन्दितुमिच्छामि । अत्र विश्रामः । इदं चेच्छानिवेदनं प्रथमं स्थानम् ।

अत्र चान्तरे गुरुर्यदि व्याक्षेपबाधादियुक्तस्तदा भणति –‘प्रतीक्षस्व’ इति । तच्च बाधादिकारणं यदि कथनयोग्यं भवति तदा कथयति, अन्यथा तु नेति [5]**चूर्णिकार**मतं । [6]**वृत्तिकार**स्य तु मतं त्रिविधेनेति भणति मनसा वचसा कायेन प्रतिषिद्धोऽसीत्यर्थः । ततः शिष्यः [7]संक्षेपवन्दनं करोति । व्याक्षेपादिरहितश्चेद् गुरुस्तदा वन्दनमनुज्ञातुकामश्छन्देनेति वदति, छन्देन –अभिप्रायेण, ममाप्येतदभिप्रेतमित्यर्थः । [8]ततो विनेयोऽवग्रहाद्बहिः-

---

१. परिहृतः-L.P. ॥ २. इत्यस्यार्थत्वा(स्यार्षत्त्वा)दङि-मु० । ‘क्षमौषि सहने ।...षित्त्वादङि क्षमा’ । इति धातुपारायणे [१/७८८, पृ० १००] ॥ ३. च-यो० टी० ६६३ ॥ ४. प्राणातिपातनिवृ० L.P.C. ॥ ५. कहिं कहिं पुण एत्थ उवरमो ? भण्णति-‘इच्छामि खमासमणो ! वंदितुं जावणिज्जाए निसीहियाए’ एस एक्को फुडवियडसुद्धवंजणो उच्चारेतव्वो सव्वविधीए । तत्थ जदि बाधा अत्थि काइ तो भणति–अच्छ ताव जदि तं अक्खाइतव्वं तो अक्खाति, अह रहस्सं तो रहकस्स चेव कज्जति । जदि पडिच्छितुकामो ताहे भणति ‘छंदेणं’ । छंदेणं नाम अभिप्पाएणं, ममाभिप्रेत-मित्यर्थः’ । इति आवश्यकचूर्णौ भा० २ प० ४ ॥ ६. ‘‘अत्रान्तरे गुरुर्व्याक्षेपादियुक्तः ‘त्रिविधेन’ इति भणति, ततः शिष्यः संक्षेपवन्दनं करोति । व्याक्षेपादिविकलस्तु ‘छन्दसा’ इति भणति’’ इति आवश्यकसूत्रस्य हारिभद्र्यां वृत्तौ प० ५४७ ॥ ७. P. सं० यो० टी० प० ६६४ ॥ संक्षेपः व° मूल ॥ संक्षेपतः-मु० ॥ ८. दृष्टव्या आवश्यकहारिभद्रीयटीका प० ५४७ ॥

D:\new/d-2.pm5\3rd proof

स्थित एवेदमाह —'अनुजानीत' —अनुमन्यध्वं, 'मे' इत्यात्मनिर्देशे, किम् ? मितश्चा-सावग्रहश्च मितावग्रहः, इहाचार्यस्य चतसृषु दिक्षु आत्मप्रमाणं क्षेत्रमवग्रहस्तस्मिन्ना-चार्यानुज्ञां विना प्रवेष्टुं न कल्पते । यदाह —

**''आयप्पमाणमित्तो, चउद्दिसि होइ[१] उग्गहो गुरुणो ।**
**अणणुण्णायस्स सया, न कप्पए तत्थ पविसेउं'' ॥१॥**

**[ प्र.सा./१२५, वि.सा./७३४, गुरु./१७ ]**

इति अनुज्ञापनं द्वितीयं स्थानम् । ततो गुरुर्भणति 'अनुजानामि' । ततः शिष्यो भुवं प्रमृज्य नैषेधिकीं कुर्वन् गुर्ववग्रहं प्रविशति । 'निसीहि' इति निषिद्धसर्वाशुभव्यापारः सन् प्रविशाम्यहमित्यर्थः । ततः सन्दंशप्रमार्जनपूर्वकमुपविशति । गुरुपादान्तिके च भूमौ निधाय रजोहरणं तन्मध्ये च गुरुचरणयुगलं संस्थाप्य मुखवस्त्रिकया वामकर्णादारभ्य वामहस्तेन दक्षिणकर्णं यावत् ललाटमविच्छिन्नं च वामजानुं[२] त्रिः प्रमृज्य मुखवस्त्रिकां वामजानूपरि स्थापयति । ततोऽकारोच्चारणसमकालं रजोहरणं कराभ्यां संस्पृश्य होकारोच्चारणसमकालं ललाटं स्पृशति । ततः काकारोच्चारणसमकालं रजोहरणं स्पृष्ट्वा यंकारोच्चारणसमकालं ललाटं स्पृशति । पुनश्च काकारोच्चारणसमकालं रजोहरणं स्पृष्ट्वा यकारोच्चारणसमकालं ललाटं स्पृशति । ततः 'संफासं' इति वदन् शिरसा पाणिभ्यां च रजोहरणं स्पृशति । ततः शिरसि बद्धाञ्जलिः 'खमणिज्जो भे किलामो' इत्यारभ्य 'दिवसो वइक्कंतो' इति यावत् गुरुमुखे निविष्टदृष्टिः पठति । अधस्तात् कायोऽधःकायः — पादलक्षणस्तं प्रति, कायेन — निजदेहेन हस्तललाटलक्षणेन, संस्पर्शः —आमर्शस्तं 'करोमि'इति गम्यते । एतदपि 'ममानुजानीध्वम्'इत्यनेन योगः । आचार्यमननुज्ञाप्य हि संस्पर्शो न कार्यः ।

ततो वक्ति 'खमणिज्जो' क्षमणीयः सोढव्यः, 'भे' भवद्भिः 'किलामो' क्लमः संस्पर्शे सति देहग्लानिरूपः । तथा 'अप्पकिलंताणं'[३] अल्पं —स्तोकं क्लान्तं —क्लमो येषां ते अल्पक्लान्तास्तेषामल्पवेदनानामित्यर्थः । 'बहुसुभेण' बहु च तच्छुभं च बहुशुभम्, तेन बहुसुखेनेत्यर्थः । 'भे' भवतां 'दिवसो वइक्कंतो' ? दिवसो व्यति-क्रान्तः ? अत्र दिवसग्रहणं रात्रिपक्षादीनामुपलक्षणं द्रष्टव्यमिति ।

एवं योजितकरसम्पुटं गुरोः प्रतिवचनमीक्षमाणं शिष्यं प्रत्याह गुरुः —'तह त्ति' तथेति, प्रतिश्रवणेऽत्र तथाकारः, यथा भवान् ब्रवीति तथेत्यर्थः । एवं तावदाचार्यशरीरवार्त्ता पृष्टा ।

---

१. होइऽवग्गहो–यो० टी० प० ६६५ ॥ २. वामं–यो० टी० प० ६६६ ॥ ३. °ण–यो० टी० प० ६६६ ॥

अथ तपोनियमविषयां वार्तां पृच्छन्नाह —'जत्ता भे' 'ज' इत्यनुदात्तस्वरेणोच्चारयन् रजोहरणं कराभ्यां स्पृष्ट्वा रजोहरणललाटयोरन्तराले 'त्ता' इति स्वरितेन स्वरेणोच्चार्य, उदात्तस्वरेण 'भे' इत्युच्चारयन् गुरुमुखनिविष्टदृष्टिर्ललाटं स्पृशति । यात्रा —संयम-तपो-नियमादिलक्षणा। क्षायिकक्षायोपशमिकौपशमिकभावलक्षणा[1] भवतां 'उत्सर्प्पति'इति गम्यते। इति यात्रापृच्छारूपं तुर्यस्थानम्। अत्रान्तरे गुरोः प्रतिवचनं 'तुब्भं पि वट्टए[2]' मम तावदुत्सर्पति भवतोऽप्युत्सर्पति ? ।

अधुना नियन्त्रणीयपदार्थविषयां वार्तां पृच्छन् पुनरप्याह विनेयः —'जवणिज्जं च भे,' 'ज' इत्यनुदात्तस्वरेण रजोहरणं स्पृष्ट्वा, 'व' इति स्वरितस्वरेण रजोहरणललाटयोरन्तराले उच्चार्य, 'णि' शब्दमुदात्तस्वरेणोच्चारयन् कराभ्यां ललाटं स्पृशति, न पुनः प्रतिवचनं प्रतीक्षते, अर्द्धसमाप्तत्वात् प्रश्नस्य। ततो 'ज्जं' इत्यनुदात्तस्वरेणोच्चार्य कराभ्यां रजोहरणं स्पृशन् , पुनरेव रजोहरण-ललाटान्तराले 'च' इति स्वरितस्वरेणोच्चार्य, 'भे' इत्युदात्तस्वरेणोच्चारयन् कराभ्यां ललाटं स्पृष्ट्वा प्रतिवचनं शुश्रूषमाणस्तथैवाऽऽस्ते। ''जवणिज्जं च' यापनीयम् —इन्द्रियनोइन्द्रियोपशमादिना प्रकारेणाबाधितं च 'भे' भवतां शरीरमिति गम्यम्। एवं [3]परया भक्त्या पृच्छता विनेयेन विनयः कृतो भवतीति यापनाप्रच्छनं पञ्चमं स्थानम्।

अत्रान्तरे गुरुराह —'एवं' [4]आमं, 'यापनीयं च मे' इत्यर्थः । इदानीमपरा[5]धक्षामणां कुर्वन् रजोहरणोपरिन्यस्तहस्तमस्तको विनेय इदमाह —'खामेमि खमासमणो ! देवसिअं वइक्कमं' क्षमयामि क्षमाश्रमण ! दिवसे भवो दैवसिकस्तं व्यतिक्रममवश्यकरणीययोग-विराधनारूपमपराधमित्यपराधक्षमणारूपं षष्ठं स्थानम् ।

अत्रान्तरे च गुरुर्वदति 'अहमवि खामेमि' अहमपि क्षमयामि दैवसिकं व्यतिक्रमं — प्रमादोद्भवमविधिशिक्षणादिकम् ।

ततो विनेयः प्रणमन् क्षमयित्वा '[6]आवस्सियाए इत्यादि जो मे अइयारो कओ' इत्यन्तं स्वकीयातिचारनिवेदनपरमालोचनार्हप्रायश्चित्तसूचकं सूत्रं 'तस्स खमासमणो ! पडिक्कमामि' इत्यादिकं च प्रतिक्रमणार्हप्रायश्चित्ताभिधायकं च पुनरकरणेनाभ्युत्थित

---

१. °णा वा भे भवतां-यो० टी० इ० ६६७ ॥ २. °इ-यो० टी० प० ६६७ ॥ ३. परया मु० नास्ति । L.P.C. यो० टी० [प० ६६७] परया अस्ति ॥ ४. आम-मु० C. । आमं P. आवश्यकहारिभद्रयां [प० ५४७] यो० टी० प० ६६७ । अभिधानचिन्तामणौ तु ''स्यादां ओं परमे मते'' । ६।१७६ इति ॥ ५. °धक्षमणां-L.P.C. सं० । °धक्षामणां-C. मूल यो० टी० प० ६६७ ॥ ६. आवसि° यो० टी० प० ६६७ ॥

आत्मानं शोधयिष्यामीति बुद्ध्या अवग्रहान्निःसृत्य पठति । अवश्यं[1] कर्त्तव्येषु चरण-करणेषु भवा क्रिया[2] तया आसेवनाद्वारेण हेतुभूतया यदसाध्वनुष्ठितं[3] तस्मात् प्रतिक्रमामि निवर्त्ते, इत्थं सामान्येनाभिधाय विशेषेणाभिधत्ते —क्षमाश्रमणानां सम्बन्धिन्या दैवसिक्या ज्ञानाद्यायस्य शातना खण्डना आशातना तया । किंविशिष्टया ?—'त्रयस्त्रिंशदन्यतरया' 'त्रयस्त्रिंशत्सङ्ख्यानामाशातनानामन्यतरया कयाचिद् , उपलक्षणत्वाद् द्वाभ्यां तिसृभिरपि । यतो दिवसमध्ये सर्वा अपि सम्भवन्ति ।

ताश्चेमाः[4] —गुरोः पुरतो गमनं शिष्यस्य निष्कारणं विनयभङ्गहेतुत्वादाशातना, मार्ग-दर्शनादिकारणे तु न दोषः १। गुरोः पार्श्वाभ्यामपि गमनम् २, पृष्ठतोऽप्यासन्नगमनम् , निःश्वास-क्षुत[5]-श्लेष्मपातादिदोषप्रसङ्गात् । ततश्च यावता भूभागेन गच्छता[6] आशातना न भवति तावता गन्तव्यम् ३। एवं पुरतः पार्श्वतः पृष्ठतश्च स्थानम् ६, तथा पुरतः पार्श्वतः पृष्ठतो वा निषीदनम् ७-८-९ । आचार्येण सहोच्चारभूमिं गतस्य आचार्यात् प्रथममेवाचमनम् १०। गुरोरालापनीयस्य[7] कस्यचिच्छिष्येण प्रथममालापनं[8] ११। शिष्याचार्येण सह बहिर्गतस्य पुनर्निवृत्तस्याचार्यात् प्रथममेव गमनागमनालोचनम् १२। भिक्षामानीय शिष्येण गुरोः पूर्वं शैक्षस्य कस्यचित् पुरतः आलोच्य पश्चाद् गुरोरालोचनम् १३। भिक्षामानीय प्रथमं शैक्षस्य कस्यचिदुपदर्श्य गुरोर्दर्शनम् १४। गुरुमनापृच्छ्य[9] शैक्षाणां यथारुचि प्रभूतभैक्षदानम् १५। भिक्षामानीय शैक्षं कञ्चन निमन्त्र्य पश्चाद् गुरोरुपनिमन्त्रणम् १६। शिष्येण भिक्षामानीय आचार्याय यत्किञ्चिद्दत्वा स्वयं[10] स्निग्ध-मधुर-मनोज्ञाहार-शाकादीनां वर्ण[11]-गन्ध-स्पर्श-रसवतां च द्रव्याणां स्वयमुपभोगः १७। रात्रौ आर्याः ! कः स्वपिति जागर्त्ति वा ? इति गुरोः पृच्छतोऽपि जाग्रतापि शिष्येणाप्रतिश्रवणम् १८। शेषकालेऽपि[12] गुरौ व्याहरति यत्र तत्र

---

१. अवश्य॰ मु० । अवश्यं-P. यो० टी० ६६७ ॥ २. क्रिया (आवश्यकी) तया हेतुभूतया आसेवनाद्वारेण यद॰ मु॰ । क्रिया तया आसेवनाद्वारेण हेतुभूतया यद॰ C.P. यो० टी० ॥ ३. यत् साध्व॰ इति यो० टी० पाठान्तरम् ॥ ''अयं पाठः समीचीनतरो यद्यपि भाति तथापि आवश्यकहारिभद्र्यां [प० ५४७] धर्मसङ्ग्रहवृत्तौ अपि च इति पाठस्य दर्शनात् स एवादृतोऽस्माभिरिति ध्येयम्'' । इति योगशास्त्रे टिप्पणम् प० ६६८ ॥ ४. तुला-योगशास्त्रटीका प० ७६७-६८१ । प्रवचनसारोद्धारटीका प० ८५ । दशाश्रुतस्कन्ध प० । आवश्यकहारिभद्रीयवृत्तिः प० ७२५-७ ॥ ५. ॰क्षुत्॰ इति प्रवचनसारोद्धारवृत्तौ प० ८६ ॥ ६. ॰त-यो० टी० प० ६७७ ॥ ७. गुरोरालप॰ यो० टी० [प० ६७७] प्र० सा० टी० [प्र० ८६] ॥ ८. प्रथममालपनं-यो० टी० प० ६७७ ॥ ९. भिक्षामानीय गुरुमना॰ यो० टी० प० ६७७ ॥ १०. स्वयं- यो० टी० नास्ति प० ६७८ ॥ ११. वर्णगन्धरसस्पर्शवतां- यो० टी० प० ६७८ ॥ १२. शेषकालेऽपि १९-C. मु० ॥

स्थितेन शयितेन वा शिष्येण प्रतिवचनदानम् १९। आहूतेनासनं शयनं वा त्यक्त्वा सन्निहितीभूय 'मस्तकेन वन्दे' इति वदता गुरुवचनं श्रोतव्यम् , तदकुर्वत आशातना २०। गुरुणाऽऽहूतस्य शिष्यस्य 'किम्' इति वचनम् , भणितव्यं च 'मस्तकेन वन्दे' इति २१। गुरुं प्रति शिष्यस्य त्वङ्कारः २२। गुरुणा ग्लानादिवैयावृत्त्यादिहेतोरिदं कुर्वित्यादिष्टस्त्वमेव किं न कुरुषे ? इति, 'त्वमलस' इत्युक्ते 'त्वमप्यलस' इति च शिष्यस्य तज्जातवचनम् २३। गुरोः पुरतो बहोः कर्कशस्योच्चैः स्वरस्य च शिष्येण वदनम् २४। गुरौ कथां कथयति 'एवमित्येतद्' इत्यन्तराले शिष्यस्य वचनम् २५। गुरौ धर्मकथां कथयति 'न स्मरसि त्वमेतमर्थं, नायमर्थः सम्भवति' इति शिष्यस्य वचनम् २६। गुरौ धर्मं कथयति सौमनस्य-रहितस्य गुरूक्तमननुमोदमानस्य 'साधूक्तं भवद्भि'रित्यप्रशंसतः शिष्यस्योपहतमनस्त्वम् २७। गुरौ धर्मं कथयति 'इयं भिक्षावेला, सूत्रपौरुषीवेला, भोजनवेला,' इत्यादिना शिष्येण पर्षद्भेदनम् २८ गुरौ धर्मकथां कथयति 'अहं कथयिष्यामि' इति शिष्येण कथाछेदनम् २९। तथा आचार्येण धर्मकथां कृतायामनुत्थितायामेव पर्षदि स्वस्य पाटवादिज्ञापनाय शिष्येण सविशेषं धर्मकथनम् ३०। गुरोः पुरतः उच्चासने समासने वा शिष्यस्योपवेशनम् ३१। गुरोः शय्यासंस्तारकादिकस्य पादेन घट्टनम् , अननुज्ञाप्य हस्तेन वा स्पर्शनम् , घट्टयित्वा स्पृष्ट्वा वा अक्षामणम् । यदाह –

**''संघट्टइत्ता काएणं, तहा उवहिणामवि ।**
**खमेह अवराहं मे, वइज्ज न पुण त्ति अ''** ॥१॥ [ दश.सू.९-२-१८ ] ॥३२॥

गुरोः शय्यासंस्तारकादौ स्थानं निषीदनं शयनं चेति ३३।

एतदर्थसंवादिन्यो गाथाः –

**''[1]पुरओ १ पक्खा २ ऽऽसन्ने ३ गमणं ३ ठाणं ३ निसीअणं ३ ति नव ।**
**सेहे पुव्वं आयमइ[2] १० आलवइ ११ य तह य आलोए १२** ॥१॥ [ ]
**असणाइअमालोएइ[3] १३, पडिदंसइ १४ देइ[4] १५ उवनिमंतेइ १६ ।**
**सेहस्स तहाहाराइलुद्धो निद्धाइ गुरुपुरओ १७** ॥२॥ [ ]
**राओ गुरुस्स वयओ, तुसिणी सुणिरो वि १८ सेसकाले वि १९ ।**
**तत्थगओ वा पडिसुणइ २० बेइ किं ति व २१ तुमं ति गुरू[5] २२** ॥३॥ [ ]

१. तुला-प्रवचनसारोद्धार गाथा १२९-१४९, विचारसार प्र० गा० ७३८ तः ७४३ ॥ २. °ई-मु० । C.P. यो० टी० प० ६८० च °इ ॥ ३. °लोअइ यो० टी० प० ६८० ॥ ४. देई-यो० टी० प० ६८० ॥ ५. गुरु°-यो० टी० ॥

**"तज्जाए[1] पडिहणइ २३, बेइ बहुं २४ तह कहंतरे वयइ ।**
**एवमिमंति अ २५ न सरसि २६, नो सुमणे २७ भिंदई परिसं २८ ॥४॥[ ]**
**छिंदइ कहं २९ तहाणुट्ठिआइ परिसाइ कहइ सविसेसं ३० ।**
**गुरुपुरओ वि निसीअइ, ठाइ समुच्चासणे सेहो ३१ ॥५॥[ ]**
**संघट्टइ पाएणं, सिज्जासंथारयं गुरुस्स तहा ३२ ।**
**तत्थेव ठाइ निसीअइ, सुअइ व सेहो त्ति ३३ तेत्तीसं" ॥६॥[ ]**

आशातना हि यत्यनुसारेण यथासम्भवं श्रावकस्यापि वाच्याः । साम्प्रतमेतास्वेव किञ्चिद्विशेषेणाऽऽह –'जं किंचि मिच्छाए' त्ति यत्किञ्चन[2] कदालम्बनमाश्रित्य, मिथ्यया-मिथ्यायुक्तेन कृतयेत्यर्थः, मिथ्याभावोऽत्रास्तीति अभ्रादित्वादकारे[3] मिथ्या, एवं क्रोधयेत्यादावपि। मनसा दुष्कृता मनोदुष्कृता, तया, प्रद्वेषनिमित्तयेत्यर्थः। वाग्दुष्कृतया – असभ्यपरुषादिवचननिमित्तया। कायदुष्कृतया आसन्नगमनस्थानादिनिमित्तया। क्रोधया – क्रोधयुक्तया । मानया –मानयुक्तया । मायया-मायायुक्तया । लोभया –लोभयुक्तया । अयं भावः –क्रोधाद्यनुगतेन या काचिद् विनयभ्रंशादिलक्षणा आशातना कृता तयेति। एवं दैवसिक्याशातनोक्ता।

अधुना पक्ष[4]-चातुर्मास-संवत्सरकालकृता इहभवान्यभवकृता[5]ऽतीतानागतकालकृता वा[6] या आशातना तस्याः संग्रहार्थमाह –'सव्वकालियाए' सर्वकालेषु भवा सर्वकालिकी,[7] तया। अनागतकाले कथमाशातनासम्भव इति चेत् , उच्यते –'श्वोऽस्य गुरोरिदमिदं वाऽनिष्टं कर्त्ताऽस्मि'इति चिन्तया। इत्थं भवान्तरेऽपि तद्वधादिनिदानकरणेन सम्भवत्येव। सर्व एव मिथ्योपचारा मातृस्थानगर्भाः क्रियाविशेषा यस्यां सा सर्वमिथ्योपचारा, तया, सर्वे धर्माः – अष्टौ प्रवचनमातरः सामान्येन करणीयव्यापारा वा, तेषामातिक्रमणं –लङ्घनं विराधनं यस्यां सा सर्वधर्मातिक्रमणा, एवम्भूतया आशातनया यो मयाऽतिचारः –अपराधः कृतो – विहितस्तस्य अतिचारस्य हे क्षमाश्रमण! युष्मत्साक्षिकं प्रतिक्रमामि[8]-अपुनःकरणेन निवर्त्ते। तथा दुष्टकर्मकारिणं निन्दाम्यात्मानम् , भवोद्विग्नेन प्रशान्तेन चेतसा। तथा गर्हे –आत्मानं दुष्टकर्मकारिणं युष्मत्साक्षिकम् । व्युत्सृजाम्यात्मानं दुष्टकर्मकारिणं तदनुमतित्यागेन ।

---

१. एणं-यो० टी० ॥ २. तुला-योगशास्त्रटीका प० ६६८-६४६ ॥ ३. 'अभ्रादिभ्यः' सि० हे० ७-२-४६ ॥ ४. पक्षचतु° यो० टी० प० ६६९ ॥ ५. °भगवता° यो० टी० प० ६६९ ॥ ६. च-यो० टी० प० ६६९ ॥ ७. सार्व° इति आवश्यकहारिभद्रीयवृत्तौ प० ५४८ यो० टी० ६६९ च ॥ ८. प्रतिक्रामामि-यो० टी० प० ६६९ ॥

एवं तत्रस्थ एवार्द्धावनतकायः पुनरेवं भणति 'इच्छामि खमासमणो' इत्यारभ्य यावद् 'वोसिरामि' इति' । परमयं विशेषः –अवग्रहाद् बहिर्निष्क्रमणरहितआवश्यकी[1]विरहितं दण्डकसूत्रं पठति ।

वन्दनकविधिविशेषसंवादिकाश्चेमा गाथाः –

''आयारस्स उ मूलं, विणओ सो गुणवओ अ पडिवत्ती ।
सा य विहिवंदणाओ, विही इमो बारसावत्ते ॥१॥ [ बृ.वं.भा./गा.३ ]
[2]होउमहाजाओवहि, संडासं पमज्ज उक्कुडुअठाणो ।
पडिलेहिअ मुहपोत्ती, पमज्जिओवरिमदेहद्धो ॥२॥ [ बृ.वं.भा./गा.४ ]
उट्ठेउं परिसंठिअकुप्प[3]रधिअपट्टगो नमियकाओ ।
जुत्तिपिहिअपच्छद्धो, पवयणकुच्छा जह न होइ[4] ॥३॥ [ बृ.वं.भा./गा.५ ]
वामंगुलिमुहपोत्ती, करजुअलतलत्थजुत्तरयहरणो ।
अवणिय जहुत्तदोसं, गुरुसमुहं भणइ पयडमिणं ॥४॥ [ बृ.वं.भा./गा.६ ]
इच्छामि[5] खमासमणो, इच्चाई जा निसीहियाए त्ति ।
छंदेणं निसुणेउं, गुरुवयणं उग्गहं जाए ॥५॥ [ बृ.वं.भा./गा.७ ]
अणुजाणह मे मिउग्गहमणुजाणामि त्ति भासिए गुरुणा ।
उग्गहखेत्तं पविसइ, पमज्ज संडासए निसिए ॥६॥ [ बृ.वं.भा./गा.८ ]
[6]संदंसं रयहरणं, पमज्ज भूमीइ संठवेऊणं[7] ।
सीसफुसणेण होही, कज्जंति तओ पढममेव ॥७॥ [ बृ.वं.भा./गा.९ ]
वामकरगहियपोत्तीइ[8], एगद्देसेण वामकन्नाओ ।
आरंभिऊण निडालं[9], पमज्ज जा दाहिणो कण्णो ॥८॥ [ बृ.वं.भा./गा.१० ]
अव्विच्छिन्नं वामयजाणु , निसीऊण[10] तत्थ मुहपोत्तिं ।
रयहरणमज्झदेसंमि ठावए पुज्जपायजुगं ॥९॥ [ बृ.वं.भा./गा.११ ]
सुपसारियबाहुजुओ, ऊरुयजुयलंतरं अफुसमाणो ।
जमलट्ठिअग्गपाणी, अकारमुच्चारयं फुसइ ॥१०॥ [ बृ.वं.भा./गा.१२ ]

---

१. आवश्यि° यो० टी० ॥ २. होउमहाजाओ बहि° मु० C.P. । होउमहाजाओवहि–इति बृहद्वन्दनकभाष्ये, योगशास्त्रवृत्तौ [प० ६७०] पाठः ॥ ३. °रट्ठिअ° यो० टी० ५.६७० ॥ ४. °ई–यो० टी० प० ६७१ ॥ ५. तिसु° यो० टी० प० ६७१ ॥ ६. वामदसं रय° यो० टी० ६७२ ॥ ७. °ण–यो० टी० ॥ ८. °ए–यो० टी० प० ६७२ ॥ ९. णडालं–यो०टी० ॥ १०. नसी० यो० टी० ॥

अब्भंतरपरियट्टिय, करयलमुवणीअसीसफुसणंतं ।
तो करजुयलं निज्जा, होक्कोरो[१]च्चारसमकालं ॥११॥ [ बृ.वं.भा./गा.१३ ]
पुण हिट्ठामुहकरयल, काकारसमं छिविज्ज रयहरणं ।
यंसद्देणं समयं, पुणो वि सीसं तह च्चेव ॥१२॥ [ बृ.वं.भा./गा.१४ ]
काकारसमुच्चारणसमयं, रयहरण[२]मालिहेऊणं ।
यत्तिअसद्देण समं, पुणो वि सीसं [३]तहा चेव ॥१३॥ [ बृ.वं.भा./गा.१५ ]
संफासं ति भणंतो, सीसेणं पणमिऊण रयहरणे ।
उन्नामिअमुद्धंजलि, अव्वाबाहं तओ पुच्छे ॥१४॥ [ बृ.वं.भा./गा.१६ ]
खमणिज्जो भे किलामो, अप्पकिलंताण बहुसुभेणं भे ।
दिणपक्खो वरिसो वा, वइक्कंतो इय तओ तुसिणी ॥१५॥ [ बृ.वं.भा./गा.१७ ]
[४]गुरुणो तह त्ति भणिए, जत्ता[५]जवणी य पुच्छियव्वा य ।
परिसंठिएण इणमो, सराण जोएण कायव्वं ॥१६॥ [ बृ.वं.भा./गा.१८ ]
तत्थ य परिभासे[६]सा, मंदमइविणेयगाहणट्ठाए ।
नीउच्चमज्झिमाओ, सरजुत्तीओ [७]ठवेयव्वा ॥१७॥ [ बृ.वं.भा./गा.१९ ]
नीओ तत्थणुदत्तो, रयहरणे उच्चओ अदत्तो अ ।
सीसे णिदंसणीओ, तदंतरालंमि सरिओ य ॥१८॥ [ बृ.वं.भा./गा.२० ]
अणुदत्तो अ जकारो, त्ता सरिओ होइ भे उदत्तसरो ।
पुणरवि [८]जवणीसद्दा, अणुदत्ताई मुणेअव्वा ॥१९ ॥ [ बृ.वं.भा./गा.२१ ]
[९]जं अणुदत्तो अ पुणो, च स्सरिओ भे [१०]उदत्तसरणामो ।
एवं रयहरणाइसु , तिसु ठाणेसुं सरा णेया ॥२०॥ [ बृ.वं.भा./गा.२२ ]
पढमं आवत्ततिगं, वण्णदुगेणं तु रइयमणुकमसो ।
बीयावत्ताण तिगं, [११]तिहि तिहि वण्णेहि निप्फण्णं ॥२१॥ [ बृ.वं.भा./गा.२३ ]
रयहरणंमि जकारं, त्ताकारं करजुएण मज्झंमि ।
भेकारं सीसम्मि य, काउं गुरुणो वयं सुणसु ॥२२॥ [ बृ.वं.भा./गा.२४ ]

---

१. °च्चारणस° C. । °च्चारणस° यो० टी० ॥ २. °मालुहेऊण–यो० टी० ॥ ३. तह च्चेव–यो० टी० । तहा चेअ–C. ॥ ४. गुरुणा–यो० टी० ६७३ ॥ ५. °जवणा य–यो० टी० प० ७६३ ॥ ६. °सा–मु० । °मा–L.P. । °मो–यो० टी० प० ६७४ ॥ ७. वि णेयव्वा–मु० । ठवेयव्वा–C.P. यो० टी० प० ६७४ ॥ ८. जवणि० यो० टी० प० ६७४ ॥ ९. ज्जं- यो० टी० प० ६७४ ॥ १०. उदत्तपरिणामो–यो० टी० पाठान्तरम् प० ६७४ ॥ ११. तिहिं तिहिं–L.P. ॥

**तुब्भं पि वट्टइ त्ति य, गुरुणा भणियंमि सेस आवत्ता ।**
**दुण्णि वि काउं तुसिणी, जा गुरुणा भणिअ[1] एवं ति ॥२३॥** [ बृ.वं.भा./गा.२५ ]
**अह सीसो रयहरणे, कयंजली भणइ सविणयं सिरसा ।**
**खामेमि खमासमणो, देवसिआईवइक्कमणं ॥२४॥** [ बृ.वं.भा./गा.२६ ]
**अहमवि खामेमि तुमे, गुरुणा अणुणाए[2] खामणे सीसो ।**
**निक्खमइ उग्गहाओ, आवसिआए भणेऊणं ॥२५॥** [ बृ.वं.भा./गा.२७ ]
**ओणयदेहा[3] अवराहखामणं सव्वमुच्चरेऊणं ।**
**निंदिअगरहिअवोसट्ठसव्वदोसो पडिक्कंतो ॥२६॥** [ बृ.वं.भा./गा.२८ ]
**खामित्ता विणएणं, तिग्गुत्तो तेण पुणरवि तहेव ।**
**उग्गहजायणपविसणदुओणयं दोपवेसं च ॥२७ ॥** [ बृ.वं.भा./गा.२९ ]
**पढमे छच्चावत्ता बीअपवेसमि हुंति छच्चेव ।**
**ते अ अहोइच्चाई, असंकरेणं पउत्तव्वा ॥२८॥** [ बृ.वं.भा./गा.३० ]
**पढमपवेसे सिरनामणं दुहा बीअए अ तह चेव ।**
**तेणेअ चउसिरं तं, भणियमिणं एगनिक्खमणं ॥२९॥** [ बृ.वं.भा./गा.३१ ]
**एवमहाजाएगं, तिगुत्तिसहिअं च हुंति चत्तारि ।**
**सेसेसुं खित्तेसुं , पणवीसावस्सया हुंति ॥३०॥** [ [4]बृ.वं.भा./गा.३२ ]

[5]इह यतिरेव वन्दनककर्त्ता उक्तो न श्रावकस्तथापि यतेः कर्त्तुर्भणनात् श्रावकोऽपि कर्त्ता विज्ञेयः । प्रायेण यतिक्रियानुसारेणैव श्रावकक्रियाप्रवृत्तेः । श्रूयते च **कृष्ण-वासुदेवेना**ष्टादशानां यतिसहस्राणां द्वादशावर्त्तवन्दनमदायीति ।

एवं वन्दनकं दत्त्वा अवग्रहमध्यस्थित एव विनेयोऽतिचारालोचनं कर्त्तुकामः किञ्चिदवनतकायो गुरुं प्रतीदमाह —**''इच्छाकारेण संदिसह [6]भगवन् ! देवसिअं आलोएमि''** [7]इच्छाकारेण-निजेच्छया, संदिशत —आज्ञां [8]ददत, दैवसिकं —दिवसभवमतिचारमिति गम्यम् , एवं रात्रिक-पाक्षिकादिकमपि द्रष्टव्यम् , आलोचयामि —मर्यादया सामस्त्येन

१. भणियमेवं ति-यो० टी० प० ६७५ ॥ २. अणुण्णाए- यो० टी० प० ६७५ ॥ ३. °हो-यो० टी० ॥ ४. इदं बृहद्वन्दनकभाष्यं श्रीऋषभदेवजी केसरीमलजी जैनश्वेताम्बर पेढी रतलाम, इत्यतः प्रकाशित सिरिपयरणसंदोहे १७-२१ पत्रेषु वर्तते । कर्त्तारः श्रीअभयदेवसूरयः ॥ ५. तुला-योगशास्त्रटीका प० ६८१-८ । इह यद्यपि-यो० टी० ॥ ६. भगवन्-यो० टी० नास्ति प० ६८१ ॥ ७. इति इच्छा० यो० टी० प० ६८१ ॥ ८. दत्त-यो० टी० प० ६८१ ॥

वा प्रकाशयामि । इह च दैवसिकादीनामयं कालनियमः –यथा दैवसिकं मध्याह्नादारभ्य निशीथं यावद्भवति, रात्रिकं निशीथादारभ्य मध्याह्नं यावद्भवति, पाक्षिक–चातुर्मासिक–सांवत्सरिकाणि पक्षाद्यन्ते भवन्ति ।

अत्रान्तरे 'आलोअह' इति गुरुवचनमाकर्ण्य एतदेव शिष्यः समर्थयन्नाह –"**इच्छं आलोएमि**" इच्छामि –अभ्युपगच्छामि गुरुवचः, आलोचयामि –पूर्वमभ्युपगतमर्थं क्रियया प्रकाशयामीति । इत्थं प्रस्तावनामभिधायालोचनामेव साक्षात्कारेणाह —

"**जो मे देवसिओ अइयारो कओ काइओ वाइओ माणसिओ उस्सुत्तो उम्मग्गो अकप्पो अकरणिज्जो दुज्झाओ दुव्विचिंतिओ अणायारो अणिच्छिअव्वो असावग-पाउग्गो, नाणे दंसणे चरित्ताचरित्ते, सुए सामाइए तिण्हं गुत्तीणं, चउण्हं कसायाणं, पंचण्हमणुव्वयाणं तिण्हं गुणव्वयाणं, चउण्हं सिक्खावयाणं, बारसविहस्स सावग-धम्मस जं खंडिअं जं विराहिअं तस्स मिच्छा मि दुक्कडं**" ॥

व्याख्या –'यो'[1] 'मया' दिवसे भवो दैवसिकः 'अतिचारो' ऽतिक्रमः 'कृतो' निवर्त्तितः, स पुनरतिचार उपाधिभेदेनानेकधा भवति, अत एवाह –'काइओ' कायः प्रयोजनं प्रयोजकोऽस्यातिचारस्येति कायिकः । एवं 'वाइओ' वाक्प्रयोजनमस्य वाचिकः । एवं मनः प्रयोजनमस्येति मानसिकः । 'उस्सुत्तो' सूत्रादुत्क्रान्त उत्सूत्रः, सूत्रमतिक्रम्य कृत इत्यर्थ । 'उम्मग्गो' मार्गः –क्षायोपशमिको भावस्तमतिक्रान्त उन्मार्गः, क्षायोपशमिक-भावत्यागेन औदयिकभावसङ्क्रमः[2] कृत इत्यर्थः । 'अकप्पो' कल्पो न्यायो विधिराचार-श्चरणकरणव्यापार इतियावत्, न कल्पोऽकल्पः अतद्रूप इत्यर्थः । 'करणीयः' सामान्येन कर्त्तव्यो न करणीयोऽकरणीयः, हेतुहेतुमद्भावश्चात्र यत एवोत्सूत्रोऽत एवोन्मार्ग इत्यादिः । उक्तः तावत् कायिको वाचिकश्च ।

अधुना मानसिकमाह –'दुज्झाओ' दुष्टो ध्यातो दुर्ध्यात एकाग्रचित्ततया आर्त्त-रौद्रलक्षणः । 'दुव्विचिंतिओ' दुष्टो विचिन्तितो दुर्विचिन्तितः अशुभ एव चलचित्ततया ।

"**जं थिरमज्झवसाणं, तं झाणं जं चलं तयं चित्तं**" [**ध्यानशतके गा० २**] इतिवचनात् ।

यत एवेत्थम्भूतस्तत एव 'अणायारो' आचरणीयः –श्रावकाणामाचारः, न आचारो अनाचारः । यत एव[3] नाचरणीयः अत एव 'अणिच्छिअव्वो' अनेष्टव्यः मनागपि

१. तुला–आवश्यकहारिभद्रीयवृत्तिः प० ५६१–२ ॥ २. °म–यो० टी० प० ६८२ ॥ ३. एवानाच° यो० टी० प० ६८३ ॥

मनसाऽपि न एष्टव्यः, आस्तां तावत् कर्त्तव्यः । यत एवेत्थम्भूतः अत एव 'असावगपाउग्गो' अश्रावकप्रायोग्यः 'अभ्युपेतसम्यक्त्वः प्रतिपन्नाणुव्रतश्च प्रतिदिवसं यतिभ्यः सकाशात् साधूनामगारिणां च सामाचारीं शृणोति' इति श्रावकः, तस्य प्रायोग्य —उचितः श्रावकप्रायोग्यः न तथा श्रावकानुचित इत्यर्थः ।

अयं चातिचारः क्व विषये ? इत्याह[१] —'णाणे दंसणे चरित्ताचरित्ते' इति ज्ञानविषये दर्शनविषये स्थूलसावद्ययोगनिवृत्तिभावाच्चारित्रं च सूक्ष्मसावद्ययोगनिवृत्त्यभावादचारित्रं च चारित्राचारित्रं तस्मिन् देशविरतिविषय इत्यर्थः ।

अधुना भेदेन व्याचष्टे 'सुए' श्रुतविषये श्रुतग्रहणं मत्यादिज्ञानोपलक्षणम् , तत्र विपरीतप्ररूपणा अकालस्वाध्यायश्चातिचारः । 'सामाइए' सामायिकविषये, सामायिकग्रहणात् सम्यक्त्वसामायिक-देशविरतिसामायिकयोर्ग्रहणम् । तत्र सम्यक्त्वसामायिकातिचारः शङ्कादिः, देशविरतिसामायिकातिचारं तु भेदेनाह —'तिण्हं गुत्तीणं' तिसृणां गुप्तीनाम् , 'यत्खण्डितमित्यादिना सर्वत्र योगः । मनोवाक्कायगोपनात्मिकास्तिस्रो गुप्तयस्तासां[२] चाश्रद्धानविपरीत*[३]प्ररूपणाभ्यां खण्डना विराधना च । 'चतुर्णां' क्रोधमानमायालोभलक्षणानां 'कषायाणां' प्रतिषिद्धानां करणेनाश्रद्धानविपरीत*प्ररूपणाभ्यां च 'पञ्चानामणुव्रतानां''त्रयाणां गुणव्रतानां' 'चतुर्णां शिक्षाव्रतानां' उक्तस्वरूपाणाम् , अनुव्रतादिमीलनेन 'द्वादशविधस्य श्रावकधर्मस्य' यत्खण्डितमित्यादिना सर्वत्र योगः, देशतो भग्नम् , यद्विराधितं सुतरां भग्नम् , न पुनरेकान्ततोऽभावमापादितम् , 'तस्स मिच्छा मि दुक्कडं' तस्य —दैवसिकाद्यतिचारस्य ज्ञानादिगोचरस्य, तथा गुप्तीनां कषायाणां द्वादशविधश्रावकधर्मस्य च[४] यत्खण्डनं विराधनं चातिचाररूपं तस्य, मिथ्येति प्रतिक्रामामि, दुष्कृतमेतदकर्त्तव्यमिदं ममेत्यर्थः ।

अत्रान्तरे विनेयः पुनरप्यर्द्धावनतकायः प्रवर्द्धमानसंवेगो मायामदविप्रमुक्तः, आत्मनः सर्वातिचारविशुद्ध्यर्थं सूत्रमिदं पठति —''**सव्वस्स वि देवसिय दुच्चिंतिय दुब्भासिय दुच्चिट्ठिय इच्छाकारेण संदिसह**'' सर्वाण्यपि लुप्तषष्ठीकानि पदानि ।

ततोऽयमर्थः —सर्वस्यापि दैवसिकस्य अणुव्रतादिविषये प्रतिषिद्धाचरणादिना जातस्यातिचारस्येति गम्यते, पुनः कीदृशस्य ? 'दुश्चिन्तितस्य' दुष्टमार्त्तरौद्रध्यानतया चिन्तितं यत्र स तथा, तस्य, दुश्चिन्तितोद्भवस्येत्यर्थः, अनेन मानसमतीचारमाह । दुष्टं

---

१. भवतीत्याह-यो० टी० प० ६८३ ॥ २. गुप्तयः व्याख्याताः, तासां चाश्र° यो० टी० ६८४ ॥ ३. * * चिह्नद्वयमध्यवर्तीपाठः C. प्रतौ पार्श्वभागे, मु० मध्ये ईदृशे कोष्ठके [ ] ॥ ४. च-मु० नास्ति । L.P. यो० टी० प० ६८४ च-अस्ति ॥

सावद्यवाग्रूपं भाषितं यत्र [१]तत्तथा, तस्य, दुर्भाषितोद्भवस्येत्यर्थः, अनेन वाचिकं सूचयति। दुष्टं प्रतिषिद्धं धावनवल्गनादि कायक्रियारूपं चेष्टितं यत्र [२]तत्तथा, तस्य, दुश्चेष्टितोद्भवस्येत्यर्थः, अनेन कायिकमाह। अस्यातिचारस्य किम् ? इत्याह –'इच्छाकारेण संदिसह' इति, आत्मीयेच्छया मम प्रतिक्रमणाज्ञां प्रयच्छत। इत्युक्त्वा तूष्णीको गुरुमुखं प्रेक्षमाण आस्ते।

ततो गुरुराह –'पडिक्कमह' प्रतिक्रामत। शिष्यः प्राह –'इच्छं' इच्छाम्ये[३]तद्भगवद्वचः, 'तस्स' तस्य दैव[४]सिकातिचारस्य, 'मिच्छा मि दुक्कडं' आत्मीयदुष्कृतं मिथ्येति, जुगुप्से इत्यर्थः। तथा द्वितीयच्छ(व)न्दनकेऽवग्रहान्तःस्थित एव विनेयोऽर्द्धावनतकायः स्वापराधक्षामणां चिकीर्षुर्गुरुं प्रतीदमाह –''**इच्छाकारेण संदिसह**'' इति इच्छाकारेण स्वकीयाभिलाषेण न पुनर्बलाभियोगादिना, संदिशत आज्ञां प्रयच्छत यूयम्। आज्ञादानस्यैव विषयमुपदर्शयन्निदमाह –

''**अब्भुट्ठि[५]ओऽम्हि अब्भिंतरदेवसिअं खामेमि**'' अभ्युत्थितोऽस्मि –प्रारब्धोऽस्मि अहम्, [६]अनेनान्याभिलाषमात्रस्य व्यपोहेन क्षमणक्रियायाः प्रारम्भमाह –'अब्भिंतरदेवसियं' इति दिवसाभ्यन्तरसम्भवमतिचारमिति गम्यते, क्षमयामि –मर्षया[७]मि, इत्येका वाचना।

अन्ये त्वेवं पठन्ति ''**इच्छामि खमासमणो ! अभुट्ठिओ म्हि अब्भिंतरदेवसिअं खामेउं**'' इति इच्छामि –अभिलषामि क्षमयितुमितियोगः। हे क्षमाश्रमण ! न केवलमिच्छामि, किन्तु अब्भुट्ठिओ[८]ऽम्हीत्यादि पूर्ववदेव।

एवं स्वाभिप्रायं प्रकाश्य तूष्णीमास्ते यावद् गुरुराह –''खामेह'' इति क्षमयस्वेत्यर्थः। ततः सद्गुरुवचनं बहुमन्यमानः प्राह –''**इच्छं खामेमि**'' इति, इच्छं –इच्छामि भगवदाज्ञाम्, खामेमि –क्षमयामि च स्वापराधम्, अनेन क्षमणक्रियायाः प्रारम्भमाह। ततो विधिवत्पञ्चभिरङ्गैः स्पृष्टधरणीतलो मुखवस्त्रिकया स्थगितवदनदेश इदमाह –

''**जं किंचि अपत्तिअं परपत्तिअं भत्ते पाणे विणए वेयावच्चे आलावे संलावे उच्चासणे समासणे अंतरभासाए उवरिभासाए जं किंचि मज्झ विणयपरिहीणं सुहुमं वा बायरं वा तुब्भे जाणह अहं न याणामि तस्स मिच्छा मि दुक्कडं**''

व्याख्या –'जं किंचि' यत्किञ्चित् सामान्यतो निरवशेषं वा, 'अपत्तिअं' आर्षत्वाद-

---

१. स तथा-यो० टी० प० ६८४॥ २. स तथा-यो० टी० प० ६८४॥ ३. °तद्भवद्वचः-मु० C.। °तद्भगवद्वचः-L.P. यो० टी०॥ ४. द्वितीयछन्दकाऽव° L.P.C.॥ ५. °ओहं-मु०। L.P.C. यो० टी० प० ६८५ °ओ म्हि-इति॥ ६. अनेनाभि° यो० टी०॥ ७. म्हि-यो० टी०॥ ८. °ऽमीत्यादि-मु० L.P.C.। यो० टी० प० ६८५ °ऽम्हीत्यादि॥

प्रीतिकम् अप्रीतिमात्रम् , 'परपत्तिअं' प्रकृष्टमप्रीतिकं परप्रत्ययं वा परहेतुकमुपलक्षणत्वाद-स्यात्मप्रत्ययं चेति द्रष्टव्यम् , युष्मद्विषये मम जातम् , युष्माभिर्वा मम जनितमिति वाक्यशेषः । तस्स मिच्छा मीत्युत्तरेण सम्बन्धः । तथा 'भत्ते' भक्ते भोजनविषये, 'पाणे' पानविषये 'विणए' विनये अभ्युत्थानादिरूपे, 'वेयावच्चे' [१]वैयावृत्त्ये वैयापृत्ये वा औषधपथ्यादिना अवष्टम्भरूपे 'आलावे' आलापे [२]सकृज्जल्पनरूपे 'संलावे' मिथः-कथारूपे, 'उच्चासणे' गुरोरासनादुच्चैरासने, 'समासणे' गुर्वासनेन तुल्ये आसने, 'अंतरभासाए' [३]अन्तर्भाषायां गुरोर्भाषमाणस्य [४]विचालभाषणरूपायाम् , 'उवरिभासाए' उपरिभाषायां गुरोर्भाषणानन्तरमेव विशेषभाषणरूपायाम् , एष भक्तादिषु '[५]जं किंचि' यत् किञ्चित् समस्तं सामान्यतो वा 'मज्झ' मम 'विणयपरिहीणं' विनयपरिही[६]नं शिक्षावियुक्तं सञ्जातमितिशेषः । विनयपरि[७]हीनस्यैव द्वैविध्यमाह –'सुहुमं वा बायरं वा' सूक्ष्ममल्पप्रायश्चित्तविशोध्यम् , बादरं बृहत्प्रायश्चित्तविशोध्यम् , वाशब्दौ द्वयोरपि मिथ्यादुष्कृतविषयत्वतुल्यतोद्भावनार्थौ, 'तुब्भे जाणह' इति यूयं जानीथ सकलभाववेदकत्वात् , 'अहं न याणामि' अहं पुनर्न जानामि मूढत्वात् । तथा यूयं न जानीथ प्रच्छन्नकृतत्वादिना, अहं जानामि स्वयङ्कृतत्वात् , तथा यूयं न जानीथ परेण कृतत्वादिना, अहं न जानामि विस्मरणादिना, तथा यूयमपि जानीथ अहमपि जानामि द्वयोः प्रत्यक्षत्वात् , एतदपि द्रष्टव्यम् । 'तस्स' तस्य षष्ठी-सप्तम्योरभेदात् तस्मिन्नप्रीतिकविषये विनयपरीहीणविषये च 'मिच्छा मि दुक्कडं' मिथ्या मे दुष्कृतमिति स्वदुश्चरितानुतापसूचकं स्वदोषप्रतिपत्तिसूचकं वा प्रतिक्रमणमिति पारिभाषिकं वाक्यं प्रयच्छामीति शेषः, अथवा तस्येति विभक्तिपरिणामात् तदप्रीतिकं विनयपरिहीनं च मिथ्या मोक्षसाधनविपर्ययभूतं वर्त्तते, मे मम, तथा दुष्कृतं पापमिति स्वदोषप्रतिपत्ति-रूपमपराधक्षमणमिति । क्षमयित्वा च पुनर्वन्दकं ददाति । वन्दनपूर्वके चालोचनक्षमणे इतिकृत्वा वन्दनकानन्तरं ते व्याख्याते, अन्यथा च प्रतिक्रमणे तयोरवसर इति द्वादशावर्त्तवन्दनविधिः । अथ च गुरोर्व्याक्षिप्तत्वादिना बृहद्वन्दनकायोगे छोभवन्दनेनापि गुरून् वन्दते । वन्दनकस्य च फलं कर्मनिर्जरा । यदाहुः–

**''[८]वंदएणं भंते ! जीवे किं अज्जिणइ ? गोअमा ! अट्ठकम्मपगडीओ निविड-**

---

१. L.P. । वैयावृत्त्यै औष० मु० । वैयापृत्ये वैयावृत्त्ये वा औष० यो० टी० प० ६८६ ॥ २. सकृज्जल्परूपे संलावे संलापे-यो० टी० प० ६८६ ॥ ३. अन्तरभाषायां-यो० टी० प० ६८६ ॥ ४. 'वचमां बोलवुं' इति गूर्जरगिरायाम् ॥ ५. 'जे'० L. ॥ ६. °णं-यो० टीका ॥ ७. °हीणस्यै° यो० टीका ॥ ८. वंदणएणं-यो० टी० प० ६८७ ॥

**बंधणबद्धाओ सिढिलबंधणबद्धाओ करेइ, चिर[1]कालठिइआओ अप्प[2]कालठिइआओ करेइ, तिव्वाणुभावाओ मंदाणुभावाओ करेइ, बहुपएसग्गाओ अप्पएसग्गाओ करेइ, अणाइअं अणवदग्गं संसारकंतारं नो परिअट्टइ''** ।[ ]

तथा ''[3]**वंदएणं भंते ! जीवे किं अज्जिणइ ? गोयमा ! [4]वंदएणं नीआगो[5]अं कम्मं खवेइ, उच्चागो[6]अं कम्मं निबंधइ, सोहग्गं च अप्पडिहयं आणाफलं निव्वत्तेइ''** । त्ति **[ उत्तराध्ययने ३०-१० ]**।

एवं बृहद्वन्दनेन गुरून् वन्दित्वा तन्मुखेन स्वशक्त्यनुरूपं प्रत्याख्यानं करोति । अत्र –

**''प्रत्याख्यानानि १ तद्भङ्गा २, ऽऽकार ३ सूत्रा ४ ऽर्थ ५ शुद्धयः ६ ।**
**प्रत्याख्यानफलं ७ चाथ, किञ्चिदेवोच्यतेऽधुना''** ॥१॥ [ ]

तत्र [7]प्रत्याख्यानं ''**ख्या( ख्याङ्क् ) प्रकथने**'' इत्यस्य प्रत्याङ्पूर्वस्य, ल्युडन्तस्य रूपम्, [8]प्रतीति प्रतिकूलतया आ मर्यादया ख्यानं प्रकथनं प्रत्याख्यानम् । कृत्यल्युटो [9]**बहुलमि**तिवचनादन्यथाप्यदोषः । अथवा प्रत्याख्यायते निषिध्यतेऽनेन मनोवाक्कायजालेन किञ्चिदनिष्टमिति प्रत्याख्यानम्, '**क्रिया-क्रियावतोः कथञ्चिदभेदात्**' प्रत्याख्यानक्रियैव प्रत्याख्यानम्, प्रत्याख्यायतेऽस्मिन् सति वा प्रत्याख्यानम् ।

तच्च द्वेधा –मूलगुणरूपम्, उत्तरगुणरूपं च । एकैकमपि सर्व-देशभेदात् द्विविधम्, सर्वमूलगुणप्रत्याख्यानं साधूनां पञ्च महाव्रतानि, देशमूलगुणप्रत्याख्यानं श्राद्धानां पञ्चाणुव्रतानि । सर्वोत्तरगुणप्रत्याख्यानं च यतीनामनेकधा । यथा –

**''पिंडस्स जा विसोही, समिईओ भावणा तवो दुविहो ।**
**पडिमा अभिग्गहा वि अ, उत्तरगुणमो विआणाहि''** ॥१॥ [ गु.वि./१-९४ ]

श्राद्धानां देशोत्तरगुणप्रत्याख्यानं सप्त शिक्षाव्रतानि, तत्र मूलगुणानां प्रत्याख्यानत्वं हिंसादिनिवृत्तिरूपत्वात्, उत्तरगुणानां तु पिण्डविशुद्ध्यादीनां दिग्व्रतादीनां च प्रतिपक्षनिवृत्तिरूपत्वात् इत्**यावश्यकवृत्तियोगशास्त्रवृत्त्योः [ आवश्यकहारिभद्र्या प० ८०३ योगशास्त्रवृत्तौ प० ७०० ]** उभयोरपि ।

---

१. °कालठिइआओ-C. । चिरकालट्ठिआओ-यो० टी० प० ६८८ ॥ २. °कालट्ठि° यो० टी० प० ६८८ ॥ ३-४. वंदणएणं-यो० टी० प० ६८८ ॥ ५-६. °त्त-यो० टी० ॥ ७. प्रत्याख्यानं-इति ख्या प्रकथने-P.L. । प्रत्याख्यानं ख्या प्रकथने-C. ॥ ८. तुला-आवश्यकहारिभद्रीयवृत्तिः प० ८०३, योगशास्त्रटीका-प० ७०७, प्रवचनसारोद्धारटीका प० । प्रति प्रवृत्तिप्रतिकूलतया-यो० टी० ॥ ९. 'बहुलं' सिद्धहैम ५।१।२ सूत्रानुसारेण इति ज्ञेयम् ॥

सर्वोत्तरगुणप्रत्याख्यानं यथायोग्यमनागतादि दशधा । यथा—

**"[1]अणागयमइक्कंतं, कोडिसहिअं निअंटिअं चेव ।**
**सागारमणागारं, परिमाणकडं निरवसेसं ॥१॥** [ आ.नि./१५६४ ]
**संकेअं चेव अद्धाए, पच्चक्खाणं तु दसविहं होइ ।**
**सयमेवणुपाल[2]णया, दाणुवएसे जह समाही" ॥२॥** [ आ.नि./१५६५ ]

तत्र पर्युषणादौ ग्लानवैयावृत्त्यादिकारणसद्भावे तदर्वागपि यदष्टमादि क्रियते तदनागतम् १।

एवमतिक्रान्ते पर्वणि यत् क्रियते तदतिक्रान्तम् २।

एकस्य निष्ठाकालेऽन्यस्य च ग्रहणकाले प्रत्याख्यानस्याद्यन्तकोटिद्वयमीलनात् कोटिसहितम्, षष्ठा-ष्टमा-ऽऽचामाम्ल-निर्विकृतिकैकासनादि[3]षु* सर्वेषु सदृशेषु चतुर्थादिषु च विसदृशेष्वपि* भाव्यम् ३।

अमुष्मिन् मासे दिवसे वा यदष्टमादि विधेयं हृष्टेन ग्लानेन वा तन्नियन्त्रितम्, एतच्चतुर्दशपूर्विषु जिनकल्पेन सह व्यवच्छिन्नम् ४।

सहाकारैर्महत्तराकाराद्यैर्यत् वर्त्तते तत् साकारम् ५।

निर्गतं महत्तराद्याकारान्निराकारं, निराकारेप्यनाभोगसहसाकाररूपाकारद्वयस्यावश्यम्भावा[4]न्महत्तराकाराद्याकारवर्जनाश्रयणम् ६।

दत्तिकवलादीयत्तया परिमाणकृतम् ७।

सर्वाशनपानत्यागान्निरवशेषम् ८।

अङ्गुष्ठमुष्टिग्रन्थ्यादिचिह्नोपलक्षितं सङ्केतम्, तच्च [5]श्रावकः पौरुष्यादिप्रत्याख्यानं कृत्वा क्षेत्रादौ गतो गृहे वा तिष्ठन् 'भोजनप्राप्तेः प्राक् प्रत्याख्यानरहितो मा भूवम्' इत्यङ्गुष्ठादिकं सङ्केतं करोति, 'यावदङ्गुष्ठं मुष्टिं [6]ग्रन्थिं (वा) न मुञ्चामि, गृहं वा [7]न प्रविशामि, स्वेदबिन्द[8]वो यावन्न शुष्यन्ति, एतावन्तो वा उच्छ्वासा यावन्न भवन्ति,

---

१. तुला-प्रवचनसारोद्धारः गा० १८७, २०६ ॥ २. °णय-C. । °णियं-इति आवश्यक-निर्युक्तौ ॥ ३. * * चिह्नद्वयमध्यवर्ती पाठः-मु० मध्ये कोष्ठके [ ] C. प्रतौ पार्श्वभागे वर्तते ॥ ४. °महत्तराद्याकार० मु० ॥ ५. तुला-योगशास्त्रवृत्तिः प० ७०७, प्रवचनसारोद्धारवृत्तिः भा० १ प० १२० ॥ ६. ग्रन्थिं न-P.C. ॥ ग्रन्थिं वा न-इति योगशास्त्र-प्रवचनसारोद्धारवृत्त्योः ॥ ७. न-नास्ति प्रवचनसारोद्धारवृत्तौ प० १२१ ॥ ८. °वो वा यावन्न-इति योगशास्त्रवृत्तौ ॥

जलादिमञ्चिकायां यावदेते बिन्दवो न शुष्यन्ति, दीपो वा यावन्न निर्वाति, तावन्न भुञ्जे इति । यदाहुः –

**''अंगुट्ठमुट्ठिगंठीघरसेऊसासथिबुगजोइक्खे ।**
**एअं संकेअ[1]( अं ) भणिअं, धीरेहिँ अनंतनाणीहिं ॥९॥** [ आ.नि./१५७८ ]

अद्धा कालस्तद्विषयं प्रत्याख्यानं, तच्च दशविधं । यदाहुः –

**''नवकारपोरसीए, पुरिमड्ढेगासणेगठाणे अ ।**
**आयंबिलअभत्तट्ठे, चरमे अ अभिग्गहे विगई''॥१०॥**[ आ.नि./१६११,प्र.सा.गा./२०२ ]

[2]नन्वेकाशनादिप्रत्याख्यानं कथमद्धाप्रत्याख्यानं ? न हि तत्र कालनियमोऽस्ति, सत्यम् , अद्धाप्रत्याख्यानपूर्वाण्येकाशनादीनि प्रायेण क्रियन्त इत्यद्धाप्रत्याख्यानत्वेनोच्यन्ते । यतः **पञ्चाशकवृत्तौ –**

**''एकाशनाऽऽचाम्लादिप्रत्याख्यानं च यद्यपि परिमाणकृतं, तथाऽप्यद्धाप्रत्याख्यान-पूर्वकत्वेनाद्धाप्रत्याख्यानमध्य एव गण्यते''**।[ ]इति। सर्वोत्तरगुणप्रत्याख्याने च सङ्केतप्रत्या-ख्यानमद्धाप्रत्याख्यानं चेति द्विविधं प्रतिदिनोपयोगि ज्ञेयम्। द्वारम् १। भङ्गकास्तु सप्तचत्वारिंशं शतं भवन्ति, ते च [3]पूर्वं व्रताधिकारे उक्ताः, तद्ज्ञानपूर्वं च प्रत्याख्यानं शुद्धम्। यतः

**'' सीआलं भंगसयं, पच्चक्खाणंमि जस्स उवलद्धं ।**
**सो खलु पच्चक्खाणे, कुसलो सेसा अकुसला उ''** ॥१॥[ श्रा.प्र.८,प्रव./१३३८ ]इति।

यद्वा इत्थम्–

**''पच्चक्खाया पच्चक्खा[4]वितियाण चउभंगा ।**
**जाणगजाणपएहिं, निप्फण्णा हुंति णायव्वा''** ॥१॥ [ आ.नि./१६१३ ]

इह किल [5]स्वयं कृतप्रत्याख्यानः काले विनयपूर्वकं सम्यगुपयुक्तो गुरुवचन[6]मनूच्चरन् स्वयं जानन् ज्ञस्यैव गुरोः पार्श्वे प्रत्याख्यानं करोति। तत्र ज्ञत्वे चतुर्भङ्गी[7]–द्वयोर्ज्ञत्वे प्रथमो भङ्गः शुद्धः १। गुरोर्ज्ञत्वे शिष्यस्याज्ञत्वे द्वितीयः तत्र तत्कालं शिष्यं संक्षेपतः प्रबोध्य यदा गुरुः प्रत्याख्यानं कारयति तदाऽयमपि शुद्धः, अन्यथा त्वशुद्धः २। ज्ञोऽज्ञस्य पार्श्वे, गुर्वाद्यभावे बहुमानतो गुरुपितृव्यादिसकाशे करोति, अयमपि शुद्धः ३। द्वयोरज्ञत्वे त्वशुद्ध एव ४। अत्र च गुरोः स्वस्य वा ज्ञत्वं प्रत्याख्यानतदुच्चारस्थानभङ्गाकारशुद्धिसूत्रार्थफल-कल्प्याकलप्यविभागादिज्ञाने सत्येव भवति ।

---

१. C. । सकेअ–मु० संकेय– योगशास्त्रवृत्तौ ॥ २. तुला पञ्चाशकटीका प० ८८, प्रवचन-सारोद्धारवृत्तिः भा० १ प० १२३ ॥ ३. प्रथमभागे १६२पत्रे ॥ ४. °वितयाण–मु० ॥ ५. तुला-योगशास्त्रवृत्तिः प० ७०७ ॥ ६. °मनूच्चारयन्–यो० टी० ॥ ७. °ति ज्ञत्वे च चतु° यो० टी० ॥

तत्र प्रत्याख्यानोच्चारस्थानानि पञ्च —आद्यस्थाने नमस्कारसहितादिकालप्रत्याख्यानानि ५, सङ्केताख्यानि ८ च प्रायश्चतुर्विधाहाराणि १। द्वितीयस्थाने विकृतिनिर्विकृत्याचामाम्लोच्चारः, विकृतिप्रत्याख्यानं चास्वीकृतविकृतिनैयत्यानामपि प्रायेणा[1]भक्ष्यविकृतिचतुष्कत्यागात् सर्वेषां स्यात् २। तृतीये एकद्व्यासनैकस्थाननियमो द्वित्रिचतुर्विधाहारः ३। चतुर्थस्थाने पाणस्सेत्यादि ४। पञ्चमस्थाने देशावकाशिकव्रतं प्राग्गृहीतसचित्तादिचतुर्दशनियमसंक्षेपरूपमुच्चार्यम् ५। एवमुपवासे चत्वारि प्रथमेऽभक्तार्थकरणम् १, द्वितीये पानाहारप्रत्याख्यानम् २, तृतीये 'पाणस्से'त्यादि ३, चतुर्थे देशावकाशिकमिति ४। उक्तं च —

**''पढमे ठाणे तेरस, बीए तिन्नि उ तिगा य तइअंमि ।**
**पाणस्स चउत्थंमि, देसवगासाइ पंचमए''** ॥१॥ **[ प्रत्याख्यानभाष्ये गा./६ ]**

अत्र चोपवासा-ऽऽचामाम्ल-निर्विकृत्यादीनि [2]पौरुष्यादीनि च प्रायस्त्रिचतुर्विधाहाराणि, अपवादात् तु निर्विकृत्यादि पौरुष्यादि च द्विविधाहारमपि। नमस्कारसहितं तु चतुर्विधाहारमेव स्यादिति संप्रदायः । यत उक्तं —

**''चउहाहारं तु नमो, रत्तिं पि मुणीण सेस दुतिचउहा''** । **[ प्रत्या.भा.गा./१२पू. ]**

तथा- **''साहूणं रयणीए, नवकारसहिअं चउव्विहाहारं ।**
**भवचरिमं उववासो, अंबिल तिहचउव्विहाहारं** ॥१॥ [ ]
**सेसा पच्चक्खाणा, दुह तिह चउहा वि हुंति आहारे ।**
**इअ पच्चक्खाणेसुं , आहारविगप्पणा नेया** ॥२॥ [ ]

**यतिदिनचर्या**यां तु संकेतप्रत्याख्यानमपि चतुर्विधाहारं प्रोक्तम् । तथा च तद्वचः—

**''संकेअपच्चक्खाणं, साहूणं रयणिभत्तवेरमणं ।**
**तह य नवकारसहिअं, निअमेण चउव्विहाहारं''** ॥१॥ **[ देव.यति.दि.गा./५० ]** इति ।

निर्विकृतिकाचामाम्लादौ कल्प्याकल्प्यविभागश्च स्वस्वसामाचारीतो ज्ञेयः । प्रत्याख्यानभेदतद्भङ्गादयस्तु व्याख्यायन्त एवेत्यलं प्रसङ्गेन । प्रकृतमनुसरामः । द्वारम् २।

[3]प्रत्याख्यानं चापवादरूपाकारसहितं कर्त्तव्यमन्यथा तु भङ्गः स्यात् , स च दोषाय । यदाह —

**''वयभङ्गे गुरु दोसो, थेवस्स वि पालणा गुणकरी उ ।**
**गुरुलाघवं च णेयं, धम्मंमि अओ अ आगारा''** ॥१॥ **[ पञ्चा.५।१२, पञ्च.५१२, प्रव.२१६ ]**

---

१. L.P.C. । हि-मु० ॥ २. L.P.C. । पौरुष्यादीनि-मु० नास्ति ॥ ३. तुला-योगशास्त्रवृत्तिः प० ७०९ ॥

आक्रियन्ते विधीयन्ते प्रत्याख्यानभङ्गपरिहारार्थमित्याकाराः । ते च नमस्कार-सहितादिषु यावन्तो भवन्ति तावन्त उपदर्श्यन्ते —

**''दो चेव नमोक्कारे, आगारा छच्च पोरसीए उ ।**
**सत्तेव उ पुरिमड्ढे, एगासणगंमि अट्ठेव ॥१॥**
**सत्तेगट्ठाणस्स उ, अट्ठेव य अंबिलंमि आगारा ।**
**पंचेव अभत्तट्ठे, छ प्पाणे चरिम चत्तारि ॥२॥**
**पंच चउरोभिग्गहि, निव्वीए अट्ठ नव य आगारा ।**
**अप्पाउरणे पंच य, हवंति सेसेसु चत्तारि ॥४॥**
**[ आवश्यकनि. १५९९-१६०१, पञ्चाशके ५।८-१०, प्रवचनसारो.२०३-५ ]**

निर्विकृतौ अष्ट नव च कथं ?

**''नवणीओगाहिमए, अद्दवदहिपिसिअघणगुडे चेव ।**
**नव आगारा एसिं, सेसदवाणं तु अट्ठेव'' ॥३॥ [ आ.नि.१६०२, प्र.सा.२०६ ]**

अप्रावरणे चोलपट्टाकारः पञ्चमः । विवरणं तु सूत्रव्याख्यासहगतमेवावसेयम् । द्वारम् ३।

साम्प्रतं सूत्रार्थौ —**''उग्गए सूरे नमुक्कारसहिअं पच्चक्खाइ, चउव्विहं पि आहारं असणं पाणं खाइमं साइमं, अन्नत्थणाभोगेणं सहसागारेणं वोसिरइ'' [ प्रत्याख्यान आवश्यकसू० हारिभद्रीयवृत्तिः प० ८४९ ]**

[1]व्याख्या —उद्गते सूर्ये, सूर्योद्गमादारभ्येत्यर्थः, नमस्कारेण —परमेष्ठिस्तवेन सहितं—युक्तं नमस्कारसहितं प्रत्याख्याति, **'सर्वे धातवः करोत्यर्थेन व्याप्ता'** इति न्यायात् नमस्कारसहितं प्रत्याख्यानं करोति विधेयतयाऽभ्युपगच्छतीत्यर्थः । इदं गुरोरनुवादभङ्ग्या वचनम् , शिष्यस्तु 'प्रत्याख्यामि'इत्याह । एवं व्युत्सृजती[त्यत्रापि वाच्यम् । कथं प्रत्याख्याति ? इत्याह —चतुर्विधमप्याहारमिति न पुनरेकविधादिकम् , आहारमभ्यवहार्यं, व्युत्सृजती]त्युत्तरेण योगः इदं [2]च चतुर्विधहारस्यैव भवतीत्युक्तमेव, रात्रिभोजनतीरणप्रायत्वादस्य । तथा मुहूर्त्तमानं नमस्कारोच्चारणावसानं च ।

[3]ननु कालस्यानुक्तत्वात् सङ्केतप्रत्याख्यानमेवेदं, मैवं, सहितशब्देन मुहूर्त्तस्य

---

१. तुला–पञ्चवस्तुकटीका प० ८३-४, पञ्चाशकटीका प० ९१-५, योगशास्त्रटीका प० ७११, प्रवचनसारोद्धारटीका भ० १ प० १२४-१३१ । व्याख्या उद्गते सूरे-इति यो० टी० ॥ २. च-यो० टी० नास्ति ॥ ३. तुला–पञ्चाशकटीका प० ९०-९५, योगशास्त्रटीका प० ७१०, प्रवचनसारोद्धारवृत्तौ भा० १ प० १२४-१३१ ॥

विशेषणात् । अथ मुहूर्त्तशब्दो न श्रूयते तत्कथं तस्य विशेष्यत्वम् ? । उच्यते — अद्धाप्रत्याख्यानमध्येऽस्य पाठबलात्, पौरुषीप्रत्याख्यानस्य च वक्ष्यमाणत्वादवश्यं तदर्वाग्मुहूर्त्त एवावशिष्यते । अथ मुहूर्त्तद्वयादिकमपि कुतो न लभ्यते ? । उच्यते — अल्पाकारत्वादस्य, पौरुष्यां हि षडाकारास्तदस्मिन् प्रत्याख्याने आकारद्वयवति स्वल्प एव कालोऽवशिष्यते । स च नमस्कारेण सहितः, पूर्णेऽपि काले नमस्कारपाठमन्तरेण प्रत्याख्यानस्यापूर्यमाणत्वात्, सत्यपि नमस्कारपाठे मुहूर्त्ताभ्यन्तरे प्रत्याख्यानभङ्गात् । तत् सिद्धमेतद् —मुहूर्त्तमानकालं नमस्कारसहितप्रत्याख्यानमिति ।

अथ चतुर्विधाहारमेव व्यक्त्या प्रदर्शयति —अशनं १ पानं २ खादिमं ३ स्वादिमं चेति ४। तत्राश्यते इति अशनम्, "**अश भोजने**" [ ] इत्यस्य ल्युडन्तस्य भवति । तथा पीयत इति पानम्, **पा**धातोः । तथा खाद्यत इति खादिमं "**खाद्द भक्षणे**" [ ] इत्यस्य वक्तव्यादिमत्प्रत्ययान्तस्य । एवं स्वाद्यत इति स्वादिमं, "[1]**स्वद आस्वादने**" [ ] इत्यस्य च रूपम् । अथवा खाद्यं स्वाद्यं चेति । अशनाद्याहारविभागश्चैवं **श्राद्धविधि**वृत्तौ —

"अशनं शाल्यादि [2]मुद्गादि सक्त्वादि पेयादि मोदकादि क्षीरादि सूरणादि [3]मण्डादि च । यदाह —

"**असणं ओअण[4]सत्तुगमुग्गजगाराइ खज्जगविही अ ।**
**खीराई सूरणाई, मंडगपभिई अ विण्णेयं**" ॥१॥ [ पंचा.५/२७, प्र.सा./२०७ ]

पानं सौवीर-यवादिधावनं सुरादि सर्वश्चाप्कायः कर्कटजलादिकं च । यदाह —

"**पाणं सोवीरजवोदगाई चित्तं सुराइअं चेव ।**
**आउक्काओ सव्वो, कक्कडगजलाइअं च तहा**" ॥२॥ [ पंचा.५/२८, प्र.सा./२०८ ]

खाद्यं [5]भृष्टधान्य-गुडपर्पटिका-खर्जूर-नालिकेर-द्राक्षा-कर्कट्याम्र-पनसादि । यदाह—

"**भत्तोसं दंताई, खज्जूरग-नालिकेर-दक्खाई ।**
**कक्कडि-अंबग-फणसाइ बहुविहं खाइमं नेअं**" ॥३॥ [ पंचा.५/२९, प्र.सा./२०९ ]

स्वाद्यं दन्तकाष्ठ-ताम्बूल-तुलसिका-[6]पिण्डार्ज्जक-मधुपिप्पल्यादि । यदाह —

"**दंतवणं तंबोलं, चित्तं तुलसी कुहेडगाईयं ।**
**महुपिप्पलिसुंठाई, अणेगहा साइमं होइ**" ॥४॥ [ पंचा.५/३०, प्र.सा./२१० ]

---

१. स्वर्द-P.L. ॥ २. मुद्गादि-मु० C. नास्ति । L.P. योगशास्त्रवृत्तौ श्राद्धविधिवृत्तावपि अस्ति ॥ ३. मण्डकादि-यो० टी० ॥ ४. °सत्थुग° इति प्रवचनसारोद्धारे ॥ ५. भृष्टधान्यं गलु० यो० टी० ॥ ६. °पिण्डार्द्रक° इति प्रवचनसारोद्धारे, °पिण्डार्ज्जक° इति तत्रैव पाठान्तरम् ॥

अनेकधेति [1]**श्राद्धविधिवृत्तौ [ प० ४५ ]** यथा –सुण्ठी-हरितकी-पिप्पली-मरीच-जीरक-अजमक-जातिफल-जावन्त्रीक-से[2]ल्लक-कत्थक-खदिरवटिका-जेष्ठीमधु-तमालपत्र-एलालविङ्ग-काठी-विडङ्ग-विडलवण-अज्जक-अजमोद-कुलिञ्जण-पिप्पलीमूल-चिणीकबाबा-कव्वूरक-मुस्ता-कंटासेलिओ-कर्पूर-सौर्वचल-हरडां-बिभीतक-कुम्भठो-बब्बूल-धव-खदिर-खीचडादिकछल्ली-पत्र-पूग-हिङ्गुलाष्टक-हिङ्गुत्रेवीसु-पञ्चकूल-जवासकमूल-वावची-तुलसी-कर्पूरीकन्दादिकम् ।

जीरकं **स्वभाष्य[3]प्रवचनसारोद्धारा**भिप्रायेण स्वाद्यम्, **कल्पवृत्त्य**भिप्रायेण तु खाद्यम्, अजमकं खाद्यमिति **केचित्** । सर्वं स्वाद्यं एलाकर्पूरादिजलं च द्विविधाहारप्रत्याख्याने कल्पते । वेसण-विरहाली-सोआ-कोठवडी-आमलागण्ठी-आंबा-गोली-कउचिली-चूइपत्रप्रमुखं खाद्यत्वाद्[4] द्विविधाहारे न कल्पते ।

त्रिविधाहारे तु जलमेव कल्पते । शास्त्रेषु मधु-गुड-शर्करा-खण्डाद्यपि खाद्यतया द्राक्षाशर्करादिजलं तक्रादि च पानकतयोक्तमपि द्विविधाहारादौ न कल्पते । उक्तं च –

**''दक्खापाणाईअं, पाणं तह साइमं गुडाईअं ।**
**पढिअं सुअंमि तह वि हु , तित्तीजणगंति नायरिअं''** ॥१॥ [ नाग.प्रत्या.भा. ]

अनाहारतया व्यवह्रियमाणान्यपि प्रसङ्गतो दर्श्यन्ते यथा –पञ्चाङ्गनिंब-गुडूची-कडू-किरिआतुं-अतिविस-चीडि-सूकडि-रक्षा-हरिद्रा-रोहिणी-उपलोट-वज्र-त्रिफला-बाउलछल्लीत्**यन्ये** धमासो-नाहिआ-सन्धिरीङ्गणी-एलीओ-[5]गुग्गुल-हरडीदल-[6]वउणि-बदरी-कंथेरिकरीरमूल-पूंआड-मजीठ-बोल-बीउ-कुंआरि-चीत्रक-कुन्दरुप्रभृत्यनिष्टास्वादानि रोगाद्यापदि चतुर्विधाहारेऽप्येतानि कल्प्यानीति **[ श्राद्ध-विधिवृत्तौ प० ४५ ]** कृतं प्रसङ्गेन ।

[7]अत्र नियमभङ्गभयादाकारावाह –'अन्नत्थणाभोगेणं सहसागारेणं', अत्र पञ्चम्यर्थे तृतीया, अन्यत्रेति परिवर्जनार्थः, यथा 'अन्यत्र द्रोणभीष्माभ्यां, सर्वे योद्धाः पराङ्मुखाः' इति, ततोऽन्यत्रानाभोगात् सहसाकाराच्च, एतौ वर्ज्जयित्वेत्यर्थः । तत्रानाभोगोऽत्यन्त-विस्मृतिः । सहसाकारोऽति[8]प्रवृत्तयोगानिवर्त्तनमिति ।

---

१. श्राद्धविधिवृत्तौ यथा-मु० नास्ति ॥ २. °बिड° L.P. ॥ ३. गा० २१० टीका द्रष्टव्या ॥ ४. °द् द्विधा° मु० ॥ ५. L.P. । गुग्गुल-मु० नास्ति । 'गूगुल' श्राद्धविधिवृत्तौ ॥ ६. °चूणि° L. ॥ ७. तुला-योगशास्त्रटीका प० ७११ ॥ ८. °प्रवृत्ति° इति आवश्यकहारिभद्र्यां वृत्तौ, पञ्चवस्तु [प० ९१] पञ्चाशक[प० ८३]योगशास्त्रवृत्तिषु-°प्रवृत्त° इति ॥

अथ पौरुषीप्रत्याख्यानम् —"[1]**पोरुसिं पच्चक्खाइ, उग्गए सूरे चउव्विहं पि आहारं असणं ४, अण्णत्थणाभोगेणं सहसागारेणं पच्छन्नकालेणं दिसामोहेणं साहूवयणेणं सव्वसमाहिवत्तियागारेणं वोसिरइ**" । [ प्रत्याख्यानावश्यके, हारिभद्रीय-वृत्तिः प० ८५२ ]

पुरुषः प्रमाणस्याः सा पौरुषी छाया, कथम् ? कर्कसङ्क्रान्तौ पूर्वाह्णेऽपराह्णे वा यदा शरीरप्रमाणा छाया स्यात् तदा पौरुषी, तद्युक्तः कालोऽपि पौरुषी प्रहर इत्यर्थः । तद्रेखां याम्योत्तरायतां यदा देहच्छायापर्यन्तः स्पृशति, तदा सर्वदिनेषु पौरुषी । यद्वा पुरुषस्योर्ध्वस्य दक्षिणकर्णनिवेशिता[2]र्कस्य दक्षिणायनाद्यदिने यदा जानुच्छाया द्विपदा तदा पौरुषी । यथा —

"**आसाढे मासे दुपया, पोसे मासे चउप्पया ।**
**चित्तासोएसु मासेसु , तिपया होइ पोरुसी**" ॥१॥ [ ओघ.नि./२८४ ]

हानिवृद्धी त्वेवम् —

"**अङ्गुलं सत्तरत्तेणं, पक्खेण तु दुअंगुलं ।**
**वड्ढए हायए वा वि, मासेणं चउरंगुलं**" ॥१॥ [ ओघ.नि/२८५ ] इति ।

'साहूवयणेणं इत्यत्र च पादोनप्रहरेणाप्यधिकारः, अतस्तत्र पौरुषीच्छायोपरि प्रक्षेपोऽयं —

"**जिट्ठामूले आसाढसावणे छहिँ अंगुलेहिं पडिलेहा ।**
**अट्ठहिँ बीअतइअंमि, तइए दस अट्ठहिँ चउत्थे** ॥१॥ [ य.दि./४८ ]

पौरुषीप्रत्याख्यानसमानप्रत्याख्याना सार्द्धपौरुषी त्वेवम् —

"**पोसे तणुछायाए, नवहिँ पएहिं तु पोरिसी सड्ढा ।**
**तावेक्केक्का हाणी, जावासाढे पया तिन्नि**" ॥१॥ [ ]

पूर्वार्द्धोऽग्रे वक्ष्यमाणोऽपि प्रमाणप्रस्तावादिहैव विज्ञेयः —

"**पोसे विहत्थिछाया, बारसअंगुलपमाण पुरिमड्ढे ।**
**मासि दुअंगुलहाणी, आसाढे निट्ठिआ सव्वे**" ॥१॥ [ ]

सुखावबोधार्थं स्थापना चैषाम् —

---

१. तुला–श्राद्धदिनकृत्यटीका प० २३० ॥ २. °तार्कबिम्बस्य–इति श्राद्धदिनकृत्यवृत्तौ ॥

| मासाः १२ | पद | अंगुल | प्रक्षेप | प० | अं | प० | अं | प० | अं |
|---|---|---|---|---|---|---|---|---|---|
| आषाढः १ | २ | ० | ६ | २ | ६ | ३ | ० | ० | ० |
| श्रावणः २ | २ | ४ | ६ | २ | १० | ४ | ० | ० | २ |
| भाद्रपदः ३ | २ | ८ | ८ | ३ | ४ | ५ | ० | ० | ४ |
| आश्विनः ४ | ३ | ० | ८ | ३ | ८ | ६ | ० | ० | ६ |
| कार्तिकः ५ | ३ | ४ | ८ | ४ | ० | ७ | ० | ० | ८ |
| मार्गशीर्ष : ६ | ३ | ८ | १० | ४ | ६ | ८ | ० | ० | १० |
| पौषः ७ | ४ | ० | १० | ४ | १० | ९ | ० | ० | १२ |
| माघः ८ | ३ | ८ | १० | ४ | ६ | ८ | ० | ० | १० |
| फाल्गुनः ९ | ३ | ४ | ८ | ४ | ० | ७ | ० | ० | ८ |
| चैत्रः १० | ३ | ० | ८ | ३ | ८ | ६ | ० | ० | ६ |
| वैशाखः ११ | २ | ८ | ८ | ३ | ४ | ५ | ० | ० | ४ |
| ज्येष्ठः १२ | २ | ४ | ६ | २ | १० | ४ | ० | ० | २ |
| | पौरुषीयन्त्रं | | पादोनपौरुषीयन्त्रं | | | सार्द्धपौरुषीयन्त्रं | | पूर्वार्धयन्त्रं | |

साम्प्रतं सूत्रशेषो व्याख्यायते –पौरुषीं प्रत्याख्याति पौरुषीप्रत्याख्यानं करोतीत्यर्थः, कथं ? चतुर्विधमशनपानखाद्यस्वाद्यलक्षणम्, आहारम् अभ्यवहार्यं, व्युत्सृजतीत्युत्तरेण योगः ।[1]अत्र च षडाकाराः । प्रथमौ द्वौ पूर्ववत् । अन्यत्र प्रच्छन्नकालात्, साधुवचनात्, दिग्मोहात्, सर्वसमाधिप्रत्ययाकाराच्च । प्रच्छन्नता च कालस्य यदा मेघेन रजसा गिरिणा वान्तरितत्वात् सूरो न दृश्यते, तत्र पौरुषीं पूर्णां ज्ञात्वा भुञ्जानस्यापूर्णायामपि तस्यां न भङ्गः, ज्ञात्वा त्वर्द्धभुक्तेनापि तथैव स्थातव्यम्, यावत् पौरुषी पूर्णा भवति, पूर्णायां ततः परं भोक्तव्यम्, न पूर्णेति ज्ञाते भुञ्जानस्य भङ्ग एव । दिग्मोहस्तु यदा पुर्वामपि पश्चिमेति जानाति, तदा अपूर्णायामपि पौरुष्यां मोहाद् भुञ्जानस्य न भङ्गः, मोहविगमे तु पूर्ववदर्द्धभुक्तेनापि स्थातव्यम्, निरपेक्षतया भुञ्जानस्य भङ्ग एवेति । साधुवचनं 'उद्घाटपौरुषी'इत्यादिकं विभ्रमकारणम्, तच्छ्रुत्वा भुञ्जानस्य न भङ्गः, भुञ्जानेन तु ज्ञाते अन्येन वा कथिते पूर्ववत् तथैव स्थातव्यम्, तथा कृतपौरुषीप्रत्याख्यानस्य समुत्पन्नतीव्र-शूलादिदुःखतया सञ्जातयोरार्त्तरौद्रध्यानयोः सर्वथा निरासः सर्वसमाधिस्तस्य प्रत्ययः –कारणं स एवाकारः –प्रत्याख्यानापवादः सर्वसमाधिप्रत्ययाकारः समाधिनिमित्तमौषध-

१. तुला–योगशास्त्रटीका प० ७१२ ॥

D:\new/d-2.pm5\3rd proof

पथ्यादिप्रवृत्तावपूर्णायामपि पौरुष्यां भुङ्क्ते तदा न भङ्गः, इत्यर्थः । वैद्यादिर्वा कृतपौरुषी-प्रत्याख्यानोऽन्यस्यातुरस्य समाधिनिमित्तं यदा अपूर्णायामपि पौरुष्यां भुङ्क्ते तदा न भङ्गः, अर्द्धभुक्ते त्वातुरस्य समाधौ मरणे वोत्पन्ने सति[1] तथैव भोजनस्य त्यागः ।

सार्द्धपौरुषीप्रत्याख्यानं पौरुषीप्रत्याख्यान एवान्तर्भूतम् ।

अथ पूर्वार्द्धप्रत्याख्यानम् —"**सूरे उग्गए पुरिमड्ढं पच्चक्खाइ, चउव्विहं पि आहारं असणं पाणं खाइमं साइमं, अन्नत्थणाभोगेणं सहसागारेणं पच्छन्नकालेणं दिसामोहेणं साहुवयणेणं महत्तरागारेणं सव्वसमाहिवत्तिआगारेणं वोसिरइ**" ।

पूर्वं च तदर्धं च पूर्वार्द्धं दिनस्याद्यं प्रहरद्वयम्, पूर्वार्द्धं प्रत्याख्याति पूर्वार्द्धप्रत्याख्यानं करोति । षडाकाराः पूर्ववत् । 'महत्तरागारेणं' इति, महत्तरं —प्रत्याख्यानानुपालनलभ्य-निर्जरापेक्षयाबृहत्तरनिर्जरालाभहेतुभूतं पुरुषान्तरासाध्यं ग्लान-चैत्य-सङ्घादिप्रयोजनम् तदेवाकारः-प्रत्याख्यानापवादो महत्तराकारस्तस्मादप्यन्यत्रेति योगः । यच्चात्रैव महत्तरा-कारस्याभिधानं नमस्कारसहितादौ तत्र कालस्याल्पत्वं महत्त्वं च कारणमाचक्षते ।

अथैकाशनप्रत्याख्यानं-तत्राष्टावाकाराः । यत्सूत्रम् —

"**एगासणं पच्चक्खाइ, चउव्विहं पि आहारं असणं पाणं खाइमं साइमं, अन्नत्थणा-भोगेणं सहसागारेणं सागारिआगारेणं आउंटणपसारणेणं गुरुअब्भुट्ठाणेणं पारिट्ठावणिया-गारेणं महत्तरागारेणं सव्वसमाहिवत्तियागारेणं वोसिरइ**" ।[ **प्रत्याख्यानावश्यके हारिभद्रीय-वृत्तौ प० ८५३** ]

एकं सकृदशनं भोजनमेकं[2] चाऽऽसनं पुताचालनतो यत्र तदेकाशनमेकासनं च, प्राकृते द्वयोरपि एगासणमि[3]तिरूपम्, तत्प्रत्याख्याति एकाशनप्रत्याख्यानं करोतीत्यर्थः । अत्राद्यावन्त्यौ च द्वावाकारौ (च) पूर्ववत्, 'सागारियागारेणं' सह अगारेण वर्त्तते इति सागारः, स एव सागारिको —गृहस्थः, स एवाकारः-प्रत्याख्यानापवादः सागारिकाकार-स्तस्मादन्यत्र । गृहस्थसमक्षं हि साधूनां भोक्तुं न कल्पते, प्रवचनोपघातसम्भवात् । अत एवोक्तम् —

"**छक्कायदयावंतोऽवि, संजओ दुल्लहं कुणइ बोहिं ।**
**आहारे नीहारे, दुगुंछिए पिंडगहणे य**" ॥१॥ [ **ओ.नि./गा.४४१** ]

ततश्च भुञ्जानस्य यदा सागारिकः समायाति, स यदि चलस्तदा क्षणं प्रतीक्षते, अथ

---

१. ज्ञाते सति-यो० टी० ॥ २. वा° मु० C. ॥ ३. °रौ च पू° L.P.C. । °रौ पू° यो० टी० ॥

स्थिरस्तदा स्वाध्यायादिव्याघातो मा भूदिति ततः स्थानादन्यत्रोपविश्य भुञ्जानस्यापि न भङ्गः । गृहस्थस्य तु येन दृष्टं भोजनं न जीर्यति [1]तदादिः सागारिकः ।

'आउंटणपसारणेणं' आउण्टणम् आकुञ्चनं जङ्घादेः सङ्कोचनम्, प्रसारणं च तस्यैवाऽऽकुञ्चितस्य [2]ऋजुकरणम्, आकुञ्चने प्रसारणे चासहिष्णुतया क्रियमाणे किञ्चिदासनं चलति ततोऽन्यत्र ।

'गुरुअब्भुट्ठाणेणं' गुरोरभ्युत्थानार्हस्याचार्यस्य प्राघूर्णकस्य वाभ्युत्थानं [3]प्रतीत्यासन-त्यजनं गुर्वभ्युत्थानम् ततोऽन्यत्र । अभ्युत्थानं चावश्यकर्त्तव्यत्वाद् भुञ्जानेनापि कर्त्तव्य-मिति न तत्र प्रत्याख्यानभङ्गः ।

'पारिट्ठावणियागारेणं' साधोरेव, यथा परिष्ठापनं–सर्वथा त्यजनं प्रयोजनमस्य पारिष्ठापनिकमन्नम्, तदेवाकारः पारिष्ठापनिकाकारस्ततोऽन्यत्र । तत्र हि त्यज्यमाने बहुदोषसम्भवादाश्रीयमाणे चागमिकन्यायेन गुणसम्भवाच्च [4]तस्य गुर्वाज्ञया पुनर्भुञ्जानस्य न भङ्गः ।

**"विहिगहिअं विहिभुत्तं, उद्धरिअं जं भवे असणमाई ।**
**तं गुरुणाणुन्नायं, कप्पइ आयंबिलाईणं"** ॥१॥ [ आ.नि./१६११ ]

श्रावकस्त्वखण्डसूत्रत्वादुच्चरति । 'वोसिरइ' इति अनेकासनमनेकाशनाद्याहारं च परिहरति ।

अथैकस्थानकम् –तत्र सप्ताकाराः, अथ सूत्रम् –"**एगट्ठाणं' पच्चक्खाई**"इत्याद्येकासन-वदाकुञ्चनप्रसारणाकारवर्जं। एकमद्वितीयं स्थानमङ्गविन्यासरूपं यत्र तदेकस्थानं प्रत्याख्यानम्। यद्यथा भोजनकालेऽङ्गोपाङ्गं स्थापितं तस्मिंस्तथा [5]स्थापित एव भोक्तव्यम्, मुखस्य पाणेश्चाशक्यपरिहारत्वाच्चलनं न प्रतिषिद्धम्। आकुञ्चनप्रसारणाकारवर्जनं च एकाशनतो भेदज्ञापनार्थम्। अन्यथा एकाशनमेव स्यात्।

अथाचामाम्लं –तत्राष्टावाकाराः, अथ सूत्रम् –"**आयंबिलं पच्चक्खाइ, अन्नत्थणा-भोगेणं सहसागारेणं लेवालेवेणं गिहत्थसंसट्ठेणं उक्खित्तविवेगेणं पारिट्ठावणियागारेणं महत्तरागारेणं सव्वसमाहिवत्तिआगारेणं वोसिरइ**" ॥

---

१. तदा हि–मु० C. । तदादिः सागारिकः–L. यो० टी० प० ७१४ । तत्प्रमुखः सागारिकः–प्रवचनसारोद्धारटीका । भा० १ प० १२७ ॥ २. ऋजूकरणं–योगशास्त्र [प० ७१५]प्रवचनसारोद्धार-[प० १२८]वृत्त्योः ॥ ३. तं प्रतीत्या° यो० टी० । तमाश्रित्या° प्रवचनसारोद्धारटीका ॥ ४. तस्य–यो० टी० प्रव० सारो० टी० नास्ति ॥ ५. स्थित–यो० टी० प्रव० सारो० टी० ॥

आचामोऽवश्रावणम् , अम्लं चतुर्थो रसः, त[1] एव प्रायेण व्यञ्जने यत्र भोजने ओदन-कुल्माष-सक्तुप्रभृतिके तदाचामाम्लं समयभाषयोच्यते, तत्प्रत्याख्याति —आचामाम्ल-प्रत्याख्यानं करोतीत्यर्थः । आद्यावन्त्याश्च त्रय आकाराः पूर्ववत् ।

'लेवालेवेणं' लेपो भोजनभाजनस्य विकृत्या तीमनादिना वा आचामाम्लप्रत्याख्यातुर-कल्पनीयेन लिप्तता, अलेपो विकृत्यादिना लिप्तपूर्वस्य भोजनभाजनस्यैव हस्तादिना संलेखनतोऽलिप्तता, लेपश्चालेपश्च लेपालेपम् तस्मादन्यत्र, भाजने विकृत्याद्य-वयवसद्भावेऽपि न भङ्ग इत्यर्थः ।

'उक्खित्तविवेगेणं' शु[2]ष्कौदनादिभक्ते पतितपूर्वस्याचामाम्लप्रत्याख्यानवतामयोग्य-स्याद्रवविकृत्यादिद्रव्यस्योत्क्षिप्त[3]स्योद्धृतस्य विवेको निःशेषतया त्याग उत्क्षिप्तविवेकः, उत्क्षिप्य त्याग इत्यर्थः, तस्मादन्यत्र, भोक्तव्यद्रव्यस्याभोक्तव्यद्रव्यस्पर्शेनापि न भङ्ग इति भावः । यत् तूत्क्षेप्तुं न शक्यं तस्य भोजने भङ्गः ।

'गिहत्थसंसट्ठेणं' गृहस्थस्य भक्तदायकस्य सम्बन्धि करोटिकादिभाजनं विकृत्यादि-द्रव्येणोपलिप्तं गृहस्थसंसृष्टम् , ततोऽन्यत्र । विकृत्यादिसंसृष्टभाजनेन हि दीयमानं भक्तमकल्प्यद्रव्यावयवमिश्रं भवति, न च तद्भुञ्जानस्यापि भङ्गः, यद्यकल्प्यद्रव्यरसो बहु न ज्ञायते । 'वोसिरइ' इति अनाचामाम्लं [4]चतुर्विधाहारं च व्युत्सृजति ।

अथाभक्तार्थप्रत्याख्यानं —तत्र पञ्चाकाराः, यत्सूत्रम् —"**सूरे उग्गए अभत्तट्ठं पच्चक्खाइ, चउव्विहं पि आहारं असणं पाणं खाइमं साइमं, अन्नत्थणाभोगेणं सहसागारेणं पारिट्ठावणिआगारेणं महत्तरागारेणं सव्वसमाहिवत्तिआगारेणं वोसिरइ**" ।

'सूरे [5]उग्गए' सूर्योद्गमादारभ्य, अनेन च भोजनानन्तरं प्रत्याख्यानस्य निषेध इत्याह। भक्तेन भोजनेनार्थः प्रयोजनं भक्तार्थः, न भक्तार्थो ऽभक्तार्थः, अथवा न विद्यते भक्तार्थो यस्मिन् प्रत्याख्यानविशेषे सोऽभक्तार्थ उपवास इत्यर्थः । आकाराः पूर्ववत् । नवरं 'पारिष्ठापनिकाकारे विशेषः —यदि त्रिविधाहारस्य प्रत्याख्याति, तदा पारिष्ठापनिकं कल्पते, यदि [6]च चतुर्विधाहारस्य प्रत्याख्याति, पानकं च नास्ति, तदा न कल्पते, पानके तूद्धरिते कल्पते । 'वोसिरइ' इति भक्तार्थमशनादि च व्युत्सृजति ।

---

१. तुला-आवश्यचूर्णिः प० ३१७, आवश्यकहारिभद्रीयटीका प० ८५४-५, पञ्चाशकटीका प० ९३ ॥ २. प्रवचनसोराद्धारवृत्तो-शुष्कौ इति । °शुष्को° मु० L.P.C. ॥ ३. °स्योद्वृत्तस्य-मु० । °स्योद्धृतस्य-यो० टी० ॥ ४. चतुर्विधाहारं च-योगशास्त्र-प्रवचनसारोद्धारवृत्त्योर्नास्ति ॥ ५. उगए-मु० ॥ ६. तु यो० टी०, प्रव० सारो० टी० ॥ ॥

अथ पानकम् —तत्र पौरुषी-पूर्वार्द्धैकाशनैकस्थाना-ऽऽचामाम्ला-ऽभक्तार्थ-प्रत्याख्यानेषूत्सर्गतश्चतुर्विधाहारस्य प्रत्याख्यानं न्याय्यम्। यदि तु त्रिविधाहारस्य प्रत्याख्यानं करोति तदा पानकमाश्रित्य षडाकारा भवन्ति । यत्सूत्रम् —

"**पाणस्स लेवाडेण वा अलेवाडेण वा अच्छेण वा [1]बहुलेण वा ससित्थेण वा असित्थेण वा वोसिरइ**" ।

इह 'अन्यत्र' इत्यस्यानुवृत्तेस्तृतीयाया: पञ्चम्यर्थत्वाद् 'लेवाडेण व त्ति' कृतलेपाद्वा पिच्छिलत्वेन भाजनादीनामुप[2]लेपकात् खर्जुरादिपानकादन्यत्र तद्वर्जयित्वेत्यर्थ: । त्रिविधाहारं 'व्युत्सृजति' इतियोग:, वाश[3]ब्दो लेपकृतपानकापेक्षया अवर्जनीयत्वाविशेषद्योतनार्थ:, अलेपकारिणेव लेपकारिणाप्युपवासादेर्न भङ्ग इति भाव: । ग्रं० ७००० । एवमलेपकृताद्वा [4]अपिच्छिलात् सौवीरादे:, अच्छाद्वा निर्मलादुष्णोदकादे:, [5]बहुलाद्वा गडुलात् तिल-तन्दुलधावनादे:, ससिक्थाद्वा भक्तपुलाकोपेतादवश्रावणादे:, असिक्थाद्वा सिक्थवर्जितात् पानकाहारात् ।

अथ चरमम् —चरमोऽन्तिमो भाग:, स च दिवसस्य भवस्य चेति द्विधा । तद्विषयं प्रत्याख्यानमपि चरमम् । इह भवचरमं यावज्जीवम्, तत्र द्विविधेऽपि चत्वार आकारा भवन्ति । यत्सूत्रम् —

"[6]**दिवसचरमं भवचरमं वा पच्चक्खाइ, चउव्विहं पि आहारं असणं पाणं खाइमं साइमं, अन्नत्थणाभोगेणं सहसागारेणं महत्तरागारेणं सव्वसमाहिवत्तियागारेणं वोसिरइ**" ।

ननु दिवसचरमप्रत्याख्यानं निष्फलम् । एकाशनादिप्रत्याख्यानेनैव गतार्थत्वात् । नैवम्, एकाशनादिकं ह्यष्टाद्याकारमेव, एतच्च चतुराकारमत आकाराणां सङ्क्षेप-करणात् सफलमेव, अत एवैकाशनादिकं दैवसिकमेव भवति, रात्रिभोजनस्य त्रिविधं त्रिविधेन यावज्जीवं प्रत्याख्यातत्वात् । गृहस्थापेक्षया पुनरिदमादित्योद्गमान्तम् । दिवसस्याहोरात्रमितिपर्यायतयापि दर्शनात् । तत्र च येषां रात्रिभोजननियमोऽस्ति, तेषामपीदं सार्थकम्, अनुवादत्वेन स्मारकत्वात् । भवचरमं तु द्व्याकारमपि भवति । यदा जानाति महत्तर-सर्वसमाधिप्रत्ययरूपाभ्यामाकाराभ्यां न प्रयोजनं तदा अनाभोग-सहासाकाराकारौ

---

१. बहलेण-यो० टी० [प० ७१७] प्रव० सारो० टी० प० १३० ॥ २. °लेपकारका° यो० टी० ॥ ३. ब्दोऽलेप° यो० टी० ॥ ४. अपिच्छ° पञ्चाशकटीका, प्रव० सारो० टी० प० १३० ॥ ५. बहला° पञ्चाशकवृत्तौ प्रव० सारो० टी० कायाश्च ॥ ६. दिवसचरिमं-यो० टी०, प्रव०, सारो० टी० ॥

भवतः, अङ्गुल्यादेरनाभोगेन सहसाकारेण वा [१]मुखप्रक्षेपसम्भवात्, अत एवेदमनाकार-मप्युच्यते, [२]आकारद्वयस्यापरिहार्यत्वात् ।

अथाभिग्रहप्रत्याख्यानम् । तच्च दण्डप्रमार्जनादिनियमरूपम्, तत्र चत्वार आकारा भवन्ति । तद्यथा —

''**अन्नत्थणाभोगेणं सहसागारेणं महत्तरागारेणं सव्वसमाहिवत्तियागारेणं वोसिरइ**'' ।

यदा त्वप्रावरणाभिग्रहं गृह्णाति, [३]तदा 'चोलपट्टगागारेणं' इति पञ्चम आकारो भवति, चोलपट्टकाकारादन्यत्रेत्यर्थः ।

अथ विकृतिप्रत्याख्यानम्—तत्र नव अष्टौ वा आकाराः । यत्सूत्रम्—

''**विगईओ पच्चक्खाइ, अण्णत्थणाभोगेणं सहसागारेणं लेवालेवेणं गिहत्थ-संसट्ठेणं उक्खित्तविवेगेणं पडुच्चमक्खिएणं पारिट्ठावणियागारेणं महत्तरागारेणं सव्व-समाहिवत्तिआगारेणं वोसिरइ**'' ॥

मनसो विकृतिहेतुत्वात् विकृतयस्ताश्च दश । यदाहुः —

''[४]**खीरं दहि णवणीयं, घयं तहा तेल्लमेव गुड मज्जं ।**
**महु मंसं चेव तहा, उग्गाहिमगं च विगईओ**'' ॥१॥ [ **पञ्चव./३७१** ]

तत्र पञ्च क्षीराणि [५]गोमहिष्यजोष्ट्र्येलकासम्बन्धिभेदात् । दधि-नवनीत-घृतानि च चतुर्भेदानि, उष्ट्रीणां तदभावात् । तैलानि चत्वारि-तिला-ऽतसी-लट्टा-सर्षपसम्बन्धि-भेदात् । शेषतैलानि तु न विकृतयः, लेपकृतानि तु भवन्ति । गुडः —इक्षुरसक्वाथः, स द्विधा-पिण्डो द्रवश्च । मद्यं द्वेधा-काष्ठपिष्टोद्भवत्वात् । मधु त्रेधा-माक्षिकं [६]कौत्तिकं भ्रामरं च । मासं त्रिविधं-जल-स्थल-खचरजन्तूद्भवत्वात्, अथवा मांसं त्रिविधं-चर्म-रुधिर-मांसभेदात् ।

अवगाहेन स्नेहबोलनेन निर्वृत्तं अवगाहिमं पक्वान्नम्, ''**भावादिमः**'' [ **श्रीसि.-६-४-२१** ] इतीमः । यत् तापिकायां घृतादिपूर्णायां चलाचलं खाद्यकादि पच्यते, तस्यामेव तापिकायां तेनैव घृतेन द्वितीयं तृतीयं च खाद्यकादि विकृतिः, ततः परं पक्वान्नानि, अयोग-

---

१. मुखे- यो० टी० प्रव० सारो० टी० ॥ २. आकारद्वयस्यापि परि° मु० L.P.C. । आकाद्वयस्यापरि° इति यो० टी० प्रवचनसारोद्धारवृत्तेः जेसलमेरस्थप्राचीनहस्तलिखितप्रते च पाठः ॥ ३. तथा(दा)-मु० ॥ ४. छीरं-यो० टी० प० ७१९ ॥ ५. P. यो० टी० । गोमहिष्यजोष्ट्रैलका° मु० ॥ ६. P. यो० टी० कौन्तिकं-मु० । कुत्तिकाकृतम्—इति प्रवचनसारोद्धारे प० १४० ॥

वाहिनां निर्विकृतिप्रत्याख्यानेऽपि कल्पन्ते । अथैकेनैव पूपकेन तापिका पूर्यते, तदा द्वितीयं पक्वान्नं, निर्विकृतिप्रत्याख्यानेऽपि कल्पते, लेपकृतं तु भवतीत्येषा **वृद्धसामाचारी** ।

एवं शेषाण्यपि विकृतिगतानि । तानि चामूनि –

"**अह पेया १ दुद्धट्टी २ दुद्धवलेही य ३ दुद्धसाडी य ४ ।**
**पंच य विगइगयाइं, दुद्धंमि खीरसहियाइं ५** ॥१॥ [प्र.सा./२२७]
**अंबिलजुअंमि दुद्धे, दुद्धट्टी दक्खमीसरद्धंमि ।**
**पयसाडी तह तंदुलचुण्णयसिद्धंमि अवलेही**" ॥२॥ [प्र.सा./२२८]

व्याख्या –अल्पतन्दुलसहिते दुग्धे राद्धे पेयोच्यते १, अम्लयुते तु दुग्धाटी, अन्ये तु [१]बलहिकामाहुः २, तन्दुलचूर्णयुते चावलेखिका ३, द्राक्षासहिते पयःशाटी ४, बहुतन्दुलयुक्ते च दुग्धे राद्धे क्षैरेयीति पञ्च दुग्धविकृतिगतानि, विकृतिर्गता एष्वि(भ्य इ)ति विकृतिगतानि निर्विकृतिकानीत्यर्थः ।

"**दहिए विगइगयाइं, घोलवडां १ घोल २ सिहरिणि ३ करंबो ४ ।**
**लवणकणदहियमहियं ५, संगरिगाइंमि अप्पडिए**" ॥१॥ [प्र.सा./२२९]

वस्त्रगालितदधिघोलयुक्तानि वटकानि घोलवटकानि १, घोलं वस्त्रगलितं दधि २, करमथितखण्डयुतं दधि शिखरिणि ३, करम्भो दधियुक्तकूरनिष्पन्नः प्रसिद्धः ४, करमथितं दधि लवणकणयुतं च राजिकाखाटमित्यर्थः, तच्च साङ्गरिकादिकेऽपतितेऽपि विकृतिगतं भवति, तस्मिन् पतिते पुनर्भवत्येव, एतानि पञ्च दधिनिर्विकृतानि ।

"**पक्कघयं १ घयकिट्टी २, पक्कोसहि उवरि तरिय सप्पि च ३ ।**
**निब्भंजण ४ विस्संदण५गाइं [२]घयविगइगयाइं**" ॥१॥ [प्र.सा./२३०]

पक्वघृतम् , आमलकादिसम्बन्धि १, घृतकिट्टकं प्रसिद्धम् २, घृतपक्वौषधितरिका ३, पक्वान्नोत्तीर्णं दग्धघृतं निर्भञ्जनम् ४, दधितरिकाकणिक्कानिष्पन्नद्रव्यविशेषो विस्स-(स्य)न्दनं ५ चेति पञ्च घृतनिर्विकृतिकानि **बृहत्कल्प-पञ्चवस्तु**वृत्त्योस्तु विस्यन्दनं नामार्धनिर्दग्धघृतमध्यक्षिप्ततन्दुलनिष्पन्नमित्युक्तम् ।

"**तिल्लमल्ली १ तिलकुट्टी २, दद्धतिल्लं ३ तहोसहुव्वरियं ४ ।**
**लक्खाइदव्वपक्कं, तिल्लं ५ तिल्लंमि पंचेव**" ॥१॥ [प्र.सा./२३१]

---

१. P. सं। बहलि(लिहि)कामाहुः–मु० C. बलिहि–P. मूल॥ २. घयविगइविगइगयाइं–प्र.सा.मु. ॥

तैलमलम् १, तिलकुट्टिश्च २ प्रसिद्धे, पक्वान्नोत्तीर्णं दग्धतैलम् ३, तैलपक्वोषधितरिका ४, लाक्षादिद्रव्यपक्वं तैलम् ५ चेति तैलनिर्विकृतानि ।

**''अद्धकओ इक्खुरसो १, गुलवाणिअयं च २ सक्करा ३ खंडा ४ ।**
**पायगुडो ५ गुलविगइविगइगयाइं तु पंचेव''** ॥१॥ [ प्र.सा./२३२ ]

अर्द्धकृतेक्षुरसः १, गुडपानीयम् २, शर्करा ३, खण्डा ४, पाकगुडो येन खज्ञकादि लिप्यते ५ इति पञ्च गुडनिर्विकृतिकानि ।

**''एगं एगस्सुवरिं १ तिण्होवरि, बीयगं च जं पक्कं ।**
**तुप्पेणं तेण चिय २, तइयं गुलहाणियापभिई ३** ॥१॥ [ प्र.सा./२३३ ]
**चउत्थं जलेण सिद्धा, लप्पसिया ४ पंचमं तु पूअलिया ५ ।**
**तुप्पडियताविआए[1], परिपक्का[2] ६ तीस मिलिएसुं''** ॥२॥ [ प्र.सा./२३४ ]

प्रक्षिप्तघृतादिके तापके एकेन पूपकेन पूरितेन द्वितीयः पूपकादिः प्रक्षिप्तो निर्विकृतिरेव[3] १, त्रयाणां घाणानामुपरि अप्रक्षिप्तापरघृतं यत्तेनैव घृतेन पक्वं तदपि २, तथा गुडधानाः ३, समुत्तारिते सुकुमारिकादौ पश्चादुद्धरितघृतेन खरण्टितायां तापिकायां जलेन सिद्धा लपनश्री 'लहिगटुं' इति प्रसिद्धम् ४, स्नेहदिग्धतापिकायां परिपक्वः पोततः ५, एतानि पक्वान्न-निर्विकृतिकानि । मिलितानि च त्रिंशद्भवन्तीति ज्ञेयम् ३०।

[4]अथैतासु च दशसु विकृतिषु मद्य-मांस-मधु-नवनीतलक्षणाश्चतस्रो विकृतयोऽभक्ष्याः, शेषास्तु षट् भक्ष्याः । तत्र भक्ष्यासु विकृतिष्वेकादिविकृतिप्रत्याख्यानं षड्विकृतिप्रत्याख्यानं च निर्विकृतिकसंज्ञं विकृतिप्रत्याख्यानेन संगृहीतम् आकाराः पूर्ववत् । नवरं 'गिहत्थसंसट्ठेणं' इति गृहस्थेन स्वप्रयोजनाय दुग्धेन संसृष्ट ओदनो, दुग्धं च तमतिक्रम्योत्कर्षतश्चत्वार्यङ्गुलानि यावदुपरि वर्त्तते तदा तद् दुग्धमविकृतिः, पञ्चमाङ्गुलारम्भे तु विकृतिरेव । अनेन न्यायेनान्यासामपि विकृतीनां गृहस्थसंसृष्टमागमोक्तं[5] । यथा —

**''खीरदहिविअडाणं, चत्तारि अ अंगुलाइ संसट्ठं ।**
**फाणिअतिल्लघयाणं, अंगुलमेगं तु संसट्ठं** ॥१॥ [ प्र.सा./२२२ ]
**मुहुपुग्गलरसयाणं, अद्धंगुलयं तु होइ संसट्ठं ।**
**गुलपोग्गलनवणीए, अद्दामलगं तु संसट्ठं''** ॥२॥ [ प्र.सा./२२३ ] ति ।

---

१. चोप्प° प्र०मु० ॥ २. °क्कं प्र०मु० ॥ ३. L. संशो० P. । निर्विकृतमे(तिरे)व-मु० C. मू० ॥ ४. तुला-योगशास्त्रटीका प० ७२१ ॥ ५. गृहस्थसंसृष्टत्वमाग० यो० टी० ॥

अनयोर्व्याख्या –दुग्ध-दधि-मद्यानां चत्वार्यङ्गुलानि संसृष्टम् विकृतिर्न भवति, उपरि तु विकृतिरेवेत्यर्थः । फाणितो द्रवगुडस्तेन तैल-घृताभ्यां च मिश्रिते कूररोट्टिकादौ यद्येकमङ्गुलमुपरि चटितं तदा न विकृतिः, मधूनि च पुद्गलानि च मांसानि तेषां रसैः संसृष्टम् अङ्गुलस्यार्द्धं संसृष्टं भवति, अङ्गुलार्द्धात् परतो विकृतिरेव, गुडपुद्गलनवनीतविषये एतैः संसृष्टमिति यावदार्द्रामलकम्, तुशब्दस्यावधारणार्थत्वादार्द्रामलकमेव न विकृतिर्भवति। आर्द्रामलकशब्देन पीलुवृक्षसम्बन्धी 'मुहुर' इत्युच्यते। 'उक्खित्तविवेगेणं'[१] इति उत्क्षिप्तविवेक आचाम्लवदुद्धर्तुं शक्यासु विकृतिषु द्रष्टव्यः, द्रवविकृतिषु तु नास्ति।'पडुच्चमक्खिएणं' इति, प्रतीत्य सर्वथा रूक्षं मण्डकादिकमपेक्ष्य म्रक्षितं स्नेहितमीषत्सौकुमार्योत्पादनात् म्रक्षणकृतविशिष्टस्वादुतायाश्चाभावात् म्रक्षितमिव यद्वर्त्तते तत् प्रतीत्यम्रक्षितं म्रक्षिताभासमित्यर्थः ।

इह चायं विधिः –यद्यङ्गुल्या तैलादि गृहीत्वा मण्डकादि म्रक्षितं तदा कल्पते निर्विकृतिकस्य, धारया तु न कल्पते । व्युत्सृजति विकृतिं त्यजतीत्यर्थः । इह च यासु विकृतिषूत्क्षिप्तविवेकः सम्भवति तासु नवाकाराः, अन्यासु द्रवरूपास्वष्टौ। ननु निर्विकृतिक एवाकाराभिधानाद्विकृतिपरिमाणप्रत्याख्याने कुत आकारा अवगम्यन्ते ? उच्यते, निर्विकृतिग्रहणे विकृतिपरिणामस्यापि सङ्ग्रहो भवति, ततस्त एवाकारा भवन्ति । तथा एकासनस्य पौरुष्याः पूर्वार्द्धस्यैव च सूत्रेऽभिधानेऽपि द्व्यासनकस्य सार्द्धपौरुष्या अपार्द्धस्य च प्रत्याख्यानमदुष्टम्, अप्रमादवृद्धेः सम्भवात् । आकारा अप्येकासनादिसम्बन्धिन एवान्येष्वपि न्याय्याः, आसनादिशब्दसाम्यात्, चतुर्विधाहारपाठेऽपि द्विविधत्रिविधाहार-प्रत्याख्यानवत् । ननु द्व्यासनादीन्यभिग्रहप्रत्याख्यानानि, ततस्तेषु चत्वार एवाकाराः प्राप्नुवन्ति। नैवं, एकाशनादिभिस्तुल्ययोगक्षेमत्वात् ।

अन्ये तु मन्यन्ते –एवं हि प्रत्याख्यानसङ्ख्या विशीर्येत । तत एकासनादीन्येव प्रत्याख्यानानि, तदशक्तस्तु यावत्सहिष्णुस्तावत्पौरुष्यादिकं प्रत्याख्याति, तदुपरि ग्रन्थिसहितादिकमिति ।

ग्रन्थसहितं च नित्यमप्रमत्ततानिमित्ततया महाफलम् । उक्तं[२] च –

**''जे निच्चमप्पमत्ता, गंठिं बंधंति गंठिसहिअस्स ।**
**सग्गापवग्गसुक्खं, तेहिं निबद्धं सगंठंमी ॥१॥ [ य.दि./५६ ]**

---

१. तुला–योगशास्त्रटीका प० ७२२ ॥ २. तुला–श्राद्धविधिवृत्तिः प० ४४ ॥

**भणिऊण नमुक्कारं निच्चं विस्सरणवज्जिआ धन्ना ।**
**धारं ( छोडं[१] ) ति गंठिसहिअं, गंठिं सह कम्मगंठिहिं ॥२॥ [ य.दि./५७ ]**
**इइ कुणई अब्भासं, अब्भासं सिवपुरस्स जइ महसि( इ ) ।**
**अणसणसरिसं पुण्णं, वयंति एअस्स समयण्णू'' ॥३॥ [ य.दि./५८ ]**

रात्रिचतुर्विधाहारपरिहारस्थानोपवेशनपूर्वकताम्बूलादिव्यापारणमुखशुद्धिकरणादिविधिना ग्रन्थिसहितप्रत्याख्यानपालने एकवारभोजिनः प्रतिमासमेकोनत्रिंशत् द्विवारभोजिन-स्त्वष्टाविंशतिर्निर्जला उपवासाः स्युरिति वृद्धाः । भोजनताम्बूलजलव्यापारणादौ हि प्रत्यहं घटीद्वयद्वयसम्भवे मासे एकोनत्रिंशत्, घटीचतुष्टयचतुष्टयसम्भवे त्वष्टाविंशतिः । यदुक्तं **पद्मचरित्रे** –

**''भुंजइ अणंतरेणं, दुन्नि उ वेलाउ जो निओगेणं ।**
**सो पावइ उववासं, अट्ठावीसं तु मासेणं ॥१॥ [ प.च. ]**
**इक्कं पि अह मुहुत्तं, परिवज्जइ जो चउव्विहाहारं ।**
**मासेणं तस्स जायइ, उववासफलं तु परलोए ॥२॥ [ प.च. ]**
**दसवरिससहस्साऊं, भुंजइ जो अप्पदेवयाभत्तो ।**
**पलिओवमकोडी पुण, होइ ठिई जिणवरतवेणं ॥३॥ [ प.च. ]**
**एवं मुहुत्तबुद्धी, उववासे छट्ठअट्ठमाईणं ।**
**जो कुणइ जहाथामं, तस्स फलं तारिसं भणिअं'' ॥४॥ [ प.च. ]**

एवं युक्त्या ग्रन्थिसहितप्रत्याख्यानफलमप्यनन्तरोदितं भाव्यं, द्वारम् ५।
अधुना शुद्धिः, सा च षोढा । यथा –

**''सा पुण सद्दहणा १ जाणणा य २ विणय ३ अणुभासणा ४ चेव ।**
**अणुपालणाविसोही ५, भावविसोही भवे छट्ठा ६ ॥१॥ [ आव.नि./१५८६ ]**
**पच्चक्खाणं सव्वण्णुदेसिअं जं जहिं जहा काले ।**
**तं जो सद्दहई नरो, तं जाणसु सद्दहणसुद्धं ॥२॥ [ आव.भा./२४६ ]**
**पच्चक्खाणं जाणइ, कप्पे जं जंमि होइ कायव्वं ।**
**मूलगुणे उत्तरगुणे, तं जाणसु जाणणासुद्धं ॥३॥ [ आव.भा./२४७ ]**
**किइकम्मस्स विसुद्धिं, पउंजई जो अहीणमइरित्तं ।**
**मणवयणकायगुत्तो, तं जाणसु विणयओ सुद्धं ॥४॥ [ आव.भा./२४८ ]**

---

१. छोडंति–P.L. । पारंति–इति श्राद्धविधिवृत्तौ ॥

**अणुभासइ गुरुवयणं, अक्खरपयवंजणेहिं परिसुद्धं ।**
**पंजलिउडो अभिमुहो, तं जाणणुभासणासुद्धं ॥५॥** [ आव.भा./२४९ ]
**कंतारे दुब्भिक्खे, आयंके वा महासमुप्पन्ने ।**
**जं पालिअं न भग्गं, तं जाणसु पालणासुद्धं ॥६॥** [ आव.भा./२५० ]
**रागेण व दोसेण व, परिमाणे व न दूसिअं जं तु ।**
**तं खलु पच्चक्खाणं, भावविसुद्धं मुणेअव्वं ॥७॥** [ आव.भा./२५१ ]

यद्वा– ''**फासिअं १ पालिअं चेव २, सोहिअं ३ तीरिअं ४ तहा ।**
**किट्टिअं ५ आराहिअं चेव, एरिसंमि जइअव्वं ॥८॥** [ प्र.सा./२१२ ]
**उचिए काले विहिणा, पत्तं जं फासिअं तयं भणिअं १ ।**
**तह पालिअं च असई, सम्मं उवओगपडिअरिअं ॥९॥** [ प्र.सा./२१३ ]
**गुरुदत्तसेसभोअणसेवणाए अ सोहिअं** * [1] **जाण ।**
**पुण्णे वि थेवकालावत्थाणा तीरिअं होइ ॥१०॥** [ प्र.सा./२१४ ]
**भोअणकाले अमुगं, पच्चक्खाणं ति सरइ किट्टिअं ५ ।**
**आराहिअं** * [2] **पयारेहिं, सम्ममेएहिं पडिअरिअं ६''** ॥११॥ [ प्र.सा./२१५ ]

प्रत्याख्यानं हि स्पर्शनादिगुणोपेतं सुप्रत्याख्यानं भवतीति द्वारम् ६।

साम्प्रतं फलम्—प्रत्याख्यानस्यानन्तर्येण पारम्पर्येण चेदम्—

''**पच्चक्खाणंमि कए, आसवदाराइं हुंति पिहिआइं ।**
**आसवदारप्पिहणे** [3]**, तण्हावुच्छेअणं होई ॥१॥** [ आव.नि./१५९४ ]
**तण्हावुच्छेएण य, अउलोवसमो भवे मणुस्साणं ।**
**अउलोवसमेण पुणो, पच्चक्खाण हवइ सुद्धं ॥२॥** [ आव.नि./१५९५ ]
**तत्तो चरित्तधम्मो, कम्मविवेगो अपुव्वकरणं च ।**
**तत्तो केवलनाणं, सासयसोक्खो तओ मोक्खो ॥३॥** [ आव.नि./१५९६ ]

इति गुरुवन्दनप्रत्याख्यानकरणयोर्विधिः । एवमन्येऽपि यत्किञ्चिन्नियमा गुरुवन्दनपूर्वं तत्समीप एव ग्राह्याः, तेष्वपि चानाभोगसहसाकाराद्याकारचतुष्कं चिन्त्यते, ततोऽनाभोगादिना नियमितवस्तुग्रहणे भङ्गो न स्यात्, किन्त्वतिचारमात्रम्, ज्ञात्वा त्वंशमात्रग्रहणेऽपि भङ्ग एव । जातु दुष्कर्मपारवश्येन ज्ञात्वाऽपि नियमभङ्गोऽग्रतः स पाल्य एव धर्मार्थिना ।

---

१. * * चिह्नद्वयमध्यवर्तिपाठः प्रतौ पार्श्वभागे, मु० मध्ये कोष्ठके [ ] वर्तते ॥ २. तुला– योगशास्त्रटीका प० ७२४ ॥ ३. °पिहाणे– यो० टी० ॥

D:\new/d-2.pm5\3rd proof

प्रतिपन्नपञ्चमी-चतुर्दश्यादितपोविशेषणापि तपोदिने तिथ्यन्तरभ्रान्त्यादिना सचित्त-जल[१]पानताम्बूलभक्षणकियद्भोजनादौ कृते तपोदिनज्ञाने मुखान्तःस्थमपि न गिलनीयम्, किन्तु तत् त्यक्त्वा प्रासुकवारिणा मुखशुद्धिं विधाय तपोरीत्यैव स्थेयम्, यदि न तद्दिने पूर्णं भुक्तम् तदा द्वितीयदिने दण्डनिमित्तं तत्तपः कार्यं, तपःसमाप्तौ च तत्तपो वर्द्धमानं कार्यम्, एवं चातिचारः स्यात् न तु भङ्गः, तपोदिनज्ञानानन्तरं सिक्थादिमात्रगिलने तु भङ्ग एव। दिनसंशये कल्प्याऽकल्प्यसंशये वा कल्प्यग्रहणेऽपि भङ्गः स्यात्। तथाऽऽगाढमान्द्ये भूतादिदोषपारवश्यके सर्पदंशाद्यसमाधौ च यदि तत्तपः कर्त्तुं न शक्यते, तदापि तुर्याकारोच्चारान्न भङ्ग इत्यादिविवेकः **श्राद्धविधि**गतो ज्ञेय इत्यलं प्रसङ्गेन ॥६२॥

अथ प्रत्याख्यानकरणानन्तरं यत् कर्त्तव्यं तदाह —

**धर्मोपदेशश्रवणमशनादिनिमन्त्रणम् ।**
**गत्वा यथोचिते स्थाने, धर्म्यमर्थार्जनं तथा ॥६३॥**

**धर्मः** —श्रुतचारित्रलक्षणस्तस्योपदेशो —देशना [२]**तस्य श्रवणं** श्रुतिर्विशेषतो गृहिधर्मो भवतीति योगः, एवमग्रेऽपि, धर्मश्रवणादेव हि श्रावकशब्दोऽन्वेति, तद्विधिस्त्वेवं **दिनकृत्ये** —

''**नासन्ने नाइदूरंमि, नेव उच्चासणे विऊ ।**
**समासणं च वज्जिज्जा, चिट्ठिज्जा धरणीअले ॥१॥ [ श्रा.दि./८६ ]**
[३]**न पक्खओ न पुरओ, नेव किच्चाण पिट्ठओ ।**
**न य ऊरुं समासज्ज, चिट्ठिज्जा गुरुणंतिए ॥२॥ [ श्रा.दि./८७ ]**
''**नेव पल्हत्थिअं कुज्जा, पक्खपिंडं च संजए ।**
**पाए पसारिए वा वि, न चिट्ठे गुरुणंतिए ॥३॥ [ श्रा.दि./८८ ]**

'पक्खपिंडं' बाहुपर्यस्तिकां 'संजए' इति प्रस्तावाद् देशसंयत इति तद्वृत्तिः ॥३॥
**[ श्राद्धदिनकृत्यवृत्तौ प० २४३ ]**

''**निद्दाविगहापरिवज्जिएहिं गुत्तेहिं पंजलिउडेहिं ।**
**भत्तिबहुमाणपुव्वं, उवउत्तेहिं सुणेअव्वं ॥४॥ [ पञ्च./१००६ ]**

इत्यादिश्रुतोक्तविधिना गुरोराशातनावर्जनार्थमर्धचतुर्थहस्तप्रमाणादवग्रहक्षेत्राद् बहिर्निर्जन्तु

१. L.P. । °पान° मु० C. नास्ति ॥ २. L.P. । तस्येति योगः [श्रवणं श्रुतिर्विशेषतो गृहिधर्मो भवतीति योगः] मु० C. प्रतौ पार्श्वभागे च ॥ ३. तुला-श्राद्धविधिवृत्तिः प० ८२ ॥

भूभागेऽवस्थाय धर्मदेशना श्रोतव्या । तच्छ्रवणेन चाज्ञानव्यपगम-सम्यक्तत्त्वावगम-निःसंशयत्व-धर्मदृढत्व-व्यसनाद्युन्मार्गनिवृत्ति-सन्मार्गप्रवृत्ति-कषायादिदोषोपशम-विनयादिगुणार्जनोपक्रम-कुसंसर्गपरिहरण-सुसंसर्गाङ्गीकरण-भवनिर्विण्णता-सम्यक्-श्राद्धसाधुधर्माभ्युपगमन-सर्वाङ्गीणतदैकाग्र्याराधनप्रमुखा अनेके गुणाः प्रकटा एव ।

ततः किं कर्त्तव्यम् ? इत्याह —'**अशनादिनिमन्त्रणम्** इति, अशनादिभिरशन-पान-खादिम-स्वादिम-वस्त्र-पात्रकम्बल-पादप्रोञ्छन-प्रातिहारिक-पीठफलक-शय्या-संस्तारकौषधभैषज्यादिभिर्निमन्त्रणम् , प्रस्तावाद् गुरोरेव, तच्च गुरोः पदोर्लगित्वा ''[1]**इच्छकारि भगवन् ! पसाओगरी फासुएणं एसणिज्जेणं असण-पाण-खाइम-साइमेणं वत्थ-[2]पडिग्गह -कंबल-पायपुंछणेण पाडिहारि[3]अ-पीढ-फलग-सिज्जा-संथारेणं ओसह-भेसज्जेण य भयवं ! अणुग्गहो कायव्वो**'' त्ति पाठपूर्वं भक्त्या कार्यम् ।

एतच्चोपलक्षणं शेषकृत्यप्रश्नस्यापि । यतो **दिनकृत्ये** —

''**पच्चक्खाणं च काऊणं, पुच्छए सेसकिच्चयं ।**
**कायव्वं [4]मणसा काउं, तओ अण्णं करे इमं**'' ॥१॥ [ श्रा.दि./८४ ]

पुच्छए इत्यादि, पृच्छति [5]साधुधर्मनिर्वाहशरीरनिराबाधवार्त्ताद्यशेषकृत्यम् , यथा निर्वहति युष्माकं संयमयात्रा सुखम् ? रात्रिर्गता भवताम् !, निराबाधाः शरीरेण यूयम् ?, न बाधते वः कश्चिद् व्याधिः ?, न प्रयोजनं किञ्चिदौषधादिना ?, नार्थः कश्चित् पथ्यादिना ?, इत्यादि । एवंप्रश्नश्च महानिर्जराहेतुः । यदुक्तम् —

''**अभिगमणवंदणनमंसणेणं पडिपुच्छणेण साहूणं ।**
**चिरसंचिअं पि कम्मं, खणेण विरलत्तणमुवेइ** ॥१॥ [ उ.मा./१६६ ] इति ।

प्राग्वन्दनावसरे [6]च सामान्यतः सुहराई सुहतपसरीरनिराबाधेत्यादिप्रश्नकरणेऽपि विशेषेणात्र प्रश्नः सम्यक् स्वरूपपरिज्ञानार्थस्तदुपायकरणार्थश्चेति प्रश्नपूर्वं निमन्त्रणं युक्तिमदेवेति ।

सम्प्रति त्विदं निमन्त्रणं गुरूणां बृहद्वन्दनदानान्तरं श्राद्धाः कुर्वन्ति, येन च प्रतिक्रमणं गुरुभिः सह कृतम् , स सूर्योदयादनु यदा स्वगृहादौ याति तदा तत् करोति, येन च प्रतिक्रमणं बृहद्वन्दनकं चेत्युभयमपि न कृतम् , तेनापि वन्दनाद्यवसरे एवं

१. तुला-श्राद्धविधिवृत्तिः- प० ८४ ॥ २. [पडिग्गह]-मु० । L.P. प्रत्योः C. प्रतौ पार्श्वभागे श्राद्धविधिवृत्तावपि अस्ति ॥ ३. तु-इति श्राद्धदिनकृत्ये ॥ ४. च मणे-इति श्राद्धदिनकृत्ये ॥ ५. साधुकर्म्म शरीर॰ इति श्राद्धदिनकृत्यवृत्तौ प० २४२ ॥ ६. P. । च-मु० नास्ति । स च-L. ॥

निमन्त्रणं क्रियते । ततश्च यथाविधि साध्वादिचतुर्विधं सङ्घं वन्दते इत्युक्तं **श्रावकदिनकृत्ये**, तथा च तद्ग्रन्थः –

"**साहुसाहुणिमाईणं, काऊणं च जहोचिअं ।**
**समणोवासगमाईणं, वंदे वंदे त्ति जंपइ** ॥१॥ [ श्रा.दि./८५ ]

वृत्तिः –यथा साधु-साध्व्यादीनाम् आदिशब्दादवमग्नानां[1] च, निश्राकृते चैत्ये तेषामपि भावात्[2], यथोचितं यथायोग्यम्, वन्दन-छोभवन्दन[3]-वाग्नमस्कारादिकं कृत्वा, यतोऽवमग्नानामपि कारणेन सूत्रे नमस्कारादेरुक्तत्वात् । यदार्षं चोदकप्रश्नपूर्वकं यतिमाश्रित्य –

"**जइ लिंगमप्पमाणं, न नज्जई निच्छएण को भावो ।**
**दट्ठूण समणलिंगं, किं कायव्वं तु समणेणं ?** ॥१॥ [ आव.नि./११२४ ]

व्याख्या –यदि लिङ्गं द्रव्यलिङ्गमप्रमाणम् अकारणं वन्दनप्रवृत्तौ, इत्थं तर्हि न ज्ञायते नावगम्यते, निश्चयेन परमार्थेन, छद्मस्थेन जन्तुना कस्य को भावः, यतोऽसंयता अपि लब्ध्यादिनिमित्तं संयम(त)वच्चेष्टन्ते, संयता अपि च कारणतोऽसंयतवदिति । तदेवं(वम)व्यवस्थितं दृष्ट्वाऽवलोक्य श्रमणलिङ्गं –साधुलिङ्गं किं पुनः कर्त्तव्यं श्रमणेन साधुना ? । एवं चोदकेन पृष्टः सन्नाचार्यः प्राह –

"**अप्पुव्वं दट्ठूणं, अब्भुट्ठाणं तु होइ कायव्वं ।**
**साहुंमि दिट्ठपुव्वे, जहारिहं जस्स जं जोग्गं**" ॥२॥ [ आव.नि./११२५ ]

अदृष्टपूर्वं साधुं दृष्ट्वाऽऽभिमुख्येन अभ्युत्थानम् आसनत्यागलक्षणं तुशब्दाद् दण्डकादिग्रहणं च कर्त्तव्यम्, किमिति ? कदाचिदाचार्यादिर्विद्यातिशयसम्पन्नः तत्प्रदानायैवागतो भवेत्, प्रशिष्यसकाशमाचार्य**कालिक**वत्, स खल्वविनीतं सम्भाव्य न तत्प्रयच्छतीति । तथा दृष्टपूर्वास्तु द्विप्रकाराः –उद्यतविहारिणः शीतलविहारिणश्च, तत्रोद्यतविहारिणि दृष्टपूर्वे यथायोग्यम् अभ्युत्थानवन्दनादि यस्य बहुश्रुतादेर्यद्योग्यं तत्कर्त्तव्यं भवति । यः पुनः शीतलविहारी न तस्याभ्युत्थानवन्दनाद्युत्सर्गतः किञ्चित् कर्त्तव्यमिति ।

साम्प्रतं कारणतः शीतलविहारिगतविधिप्रतिपादनाया सम्बन्धगाथामाह –

"**मुक्कधुरासंपाडगसेवीचरणकरणपब्भट्ठे ।**
**लिंगावसेसमेत्ते, जं कीरइ तं पुणो वोच्छं** ॥३॥ [ बृ.क.भा./४५४४ ]

---

१. °मग्ना(सन्ना)नां-मु० । L.P. श्राद्धदिनकृत्यवृत्तावपि मग्नानां- ॥ २. संभवात्-इति श्राद्धदिनकृत्यवृत्तौ ॥ ३. वन्दनं छोभ° इति श्राद्धदिनकृत्योवृत्तौ ॥

मुक्ता संयमधूर्येन स[1]:, सम्प्रकटं प्रवचनोपघातनिरपेक्षमेव मूलोत्तरगुणजालं प्रतिसेवितुं शीलमस्येति, ततो द्वन्द्वः । एतेन सालम्बनप्रतिसेवी वन्द्य एवेत्यापन्नम् । उक्तमपि **कल्पभाष्ये**, पार्श्वस्थानां वन्द्याऽवन्द्यत्वविवेकप्रस्तावे –

''**संकिन्नवराहपदे, अणाणुतावी अ होइ अवरद्धे ।**
**उत्तरगुणपडिसेवी, आलंबणवज्जिओ वज्जो ॥१॥** [ बृ.क.भा./४५२४ ]

मूलगुणप्रतिसेवी नियमादचारित्री, स च स्फुटमेवावन्दनीय इति न तद्विचारणा, उत्तरगुणसेविनस्तु विचारणेतिभावः । नन्वेवमर्थादापन्नं सालम्बन उत्तरगुणप्रतिसेव्यपि वन्दनीयः ?, सूरिराह –न केवलं स एव वन्द्यः, किन्तु मूलगुणप्रतिसेव्यप्यालम्बन-सहितः, कथमिति चेद् ? उच्यते –

''**हिट्ठट्ठाणठिओ वि हु , पावयणि गणट्ठया उ अधरे उ ।**
**कडजोगि जं निसेवइ, आइनिअंठु व्व सो पुज्जो ॥२॥** [ बृ.क.भा./४५२५ ]

प्रावचनिकस्याचार्यस्य गच्छस्यानुग्रहार्थमधरे आत्यन्तिके कारणे समुपस्थिते कृतयोगी गीतार्थः ।

''**कुणमाणो अकडणं( अ अकज्जं ) कयकरणो दोसमेवमब्भेइ ।**
**अप्पेण बहुं इच्छइ, विसुद्धआलंबणो समणो ॥३॥** [ बृ.क.भा./४५२६ ]

सदृष्टान्तं फलितमाह –

''**तुच्छमवलंबमाणो, पडइ निरालंबणो अ दुग्गंमी ।**
**सालंबणिरालंबे, अह दिट्ठंतो णिसेवंते ॥४॥** [ बृ.क.भा./४५३१ ]

अत एव–''**दंसणनाणचरित्तं, तवविणयं जत्थ जत्तिअं पासे ।**
**जिणपण्णत्तं भत्तीइ, पूअए तं तहिं भावे ॥१॥** [ बृ.क.भा./४५५३ ]

इत्यलं प्रसक्तानुप्रसक्तेन[2], सम्बन्धगाथाया एव शेषमर्थं प्रस्तुमः । तथा चरणकरणाभ्यां प्रकर्षेण भ्रष्टस्ततोऽपि पूर्वेण द्वन्द्वः । इत्थम्भूते लिङ्गावशेषमात्रे केवलद्रव्यलिङ्गयुक्ते, यत् क्रियते किमपि तत्पुनर्वक्ष्ये, पुनःशब्दो विशेषणार्थः किं विशेषयति ? कारणापेक्षं कारणमाश्रित्य यत् क्रियते तद्वक्ष्ये, कारणाभावपक्षे तु प्रतिषेधः कृत एवेति । किं तत् क्रियते ? इत्यत आह –

''**वायाइ नमुक्कारो, हत्थुस्सेहो अ सीसणमणं च ।**
**संपुच्छणांछणं छोभवंदणं वंदणं वा वि ॥३॥** [ बृ.क.भा./४५४५ ]

---

१. सः तथा–L.P. ॥ २. प्रसक्तानु–C.–प्रतौ पार्श्वभागे, मु० मध्ये [ ] कोष्ठके ॥

'वायाए त्ति' निर्गमभूम्यादौ दृष्टस्य वाचाऽभिलापः क्रियते, कीदृशस्त्वम् ? इत्यादि । सम्प्रच्छनं कुशलस्य, 'अंछणं ति' बहुमानं तत्संनिधावासनं कियत्कालमिति। एष बहिर्दृष्टस्य विधिः । कारणविशेषे तु तत्प्रतिश्रयेऽपि गम्यते, तत्राप्येष एव विधिरग्रेतनोऽपि च । कारणान्याह –

**''परिआय-परिस-पुरिसं, खेत्तं कालं च आगमं नच्चा ।**
**कारणजाए जाए, जहारिहं जस्स जं जोग्गं ॥४॥** [ बृ.क.भा./४५५० ]

पर्यायो ब्रह्मचर्यं तत्प्रभूतकालं ये पालितम्, परिषद्विनीता साधुसंहतिस्तत्प्रतिबद्धा, पुरुषं, ज्ञात्वा, कथं ? कुल-गण-सङ्घकार्याण्यस्यायत्तानीति, एवं तदधीनं क्षेत्रमिति, कालम्, अवमप्रतिजागरणमस्य गुण इति, आगमं सूत्रार्थोभयरूपमस्यास्तीति ज्ञात्वेति।

साम्प्रतमेतदकरणे दोषमाह –

**''एआइँ अकुव्वंतो, जहारिहं अरिहदेसिए मग्गे ।**
**ण भवइ पवयणभत्ती, अभत्तिमंताइआ दोसा ॥५॥** [ बृ.क.भा./४५४९ ]

तथा- **''उपन्नकारणंमि, किइकम्मं जो न कुज्ज दुविहं पि ।**
**पासत्थाईआणं, उग्घाया तस्स चत्तारि ॥१॥** [ बृ.क.भा./४५४० ]

दुविहं पीति अभ्युत्थान-वन्दनलक्षणमित्यलं प्रसङ्गेन । प्रकृतमनुसरामः । तथा श्रमणोपासकादीनामादिशब्दाच्छ्राविकाणां च वन्दे वन्द इत्यपभ्रंशभाषया जल्पति, वन्दे वन्दे इति वा क्रिया, द्वित्वे सर्वान् श्रावकान् श्राविकाश्च नमस्कुर्व इत्यर्थः, इति । अथ कदाचित् सूरिस्तत्र चैत्ये नागतस्तदोपाश्रये स्वद्धर्या गत्वा वन्दनादिः सकलोऽपि विधिः कार्यो । यतो **दिनकृत्ये** –

**''अह धम्मदेसणत्थं च, तत्थ सूरी न आगओ ।**
**पुव्वुत्तेण विहाणेणं, वसहीए गच्छए तओ ॥१॥** [ श्रा.दि./१४६ ] त्ति ।

ततः किं कर्त्तव्यम् ? इत्याह **–तथेत्यादि, तथे**ति धर्मान्तरसमुच्चयार्थः, '**यथोचिते**' यथायोग्ये **स्थाने** हट्टादौ, '**गत्वा**' गमनं कृत्वा '**धर्म्यं**' [1]धर्माविरुद्धं धर्मात् स्वयंस्वीकृतव्रताभिग्रहादिरूपाद् व्यवहारशुद्ध्यादेर्वाऽनपेतमिति व्युत्पत्तेः, '**अर्थार्जनं**' द्रव्योपार्जनकरणम्, अन्वयः प्राग्वदेव। यथोचितमिति यदा राजादिस्तदा धवलगृहम्, यद्यमात्यादिस्तदा करणम्, अथ वणिगादिस्तदा आपणमिति ।

---

१. L.P. । धर्माविरुद्धं-मु० मध्ये कोष्ठके [ ], C. प्रतौ पार्श्वभागे ॥

बहुकालं हि चैत्यायतनेऽवस्थितिर्दोषाय । यत उक्तं [1]साधुनुद्दिश्य **व्यवहारभाष्ये –**

"**जइ वि न आहाकम्मं, भत्तिकयं तह वि वज्जयंतेहिं ।**
**भत्ती खलु होइ कया, जिणाण लोए वि दिट्ठं तु ॥१॥** [ व्य.भा./३७७२ ]
**बंधित्ता कासवओ, वयणं अट्ठपुडसुद्धपोत्तीए ।**
**पत्थिवमुवासए खलु , वित्तिनिमित्तं भयाई वा ॥२॥** [ व्य.भा./३७७३ ]

पार्थिवस्थानीयायास्तीर्थकरप्रतिमाया भक्तिनिमित्तं चैत्यायतनं साधवः प्रविशन्ति, न तु तत्रैव तिष्ठन्ति इति **तद्वृत्तिः** । कुत इत्याह –

"[2]**दुब्भिगन्धपरि( मल )स्सावी, तणुरप्पेसण्हाणिआ ।**
**दुहा वाउवहो चेव, तेण ट्ठंति न चेइए ॥३॥** [ व्य.भा./३७७४ ]
**तिन्नि वा कड्ढई जाव, थुइओ तिसिलोइआ ।**
**ताव तत्थ अणुण्णायं, कारणेण परेण वि**[3] ॥ [ व्य.भा./३७७५ ]

*[4]एतयोर्भावार्थः –साधवश्चैत्यगृहे न तिष्ठन्ति, अथवा चैत्यवन्दनान्त्यशक्रस्तवाद्यनन्तरं तिस्रः स्तुतिः श्लोकत्रयप्रमाणाः प्रणिधानार्[5]थं यावत् कर्षन्ति, प्रतिक्रमणानन्तरं मङ्गलार्[6]थं स्तुतित्रयपाठवत् , तावच्चैत्यगृहे साधूनामनुज्ञातं निष्कारणं न परतः, सिद्धाणमित्यादि-श्लोकत्रयमात्रान्तपाठे तु सम्पूर्णवन्दनाभाव एव [7]प्रसजति, श्लोकत्रयपाठानन्तरं चैत्यगृहे अवस्थानाननुज्ञातेन प्रणिधानासद्भावात् । भणितं **चागमे**-वन्दनान्ते प्रणिधानम् , यथा – "**वंदइ नमंसइ**"[ ]त्ति सूत्रम् , वृत्तिः –वन्दते ताः प्रतिमाश्चैत्यवन्दनादिविधिना प्रसिद्धेन, नमस्कारोति पश्चात् प्रणिधानादियोगेनेति तिस्रः स्तुतयोऽत्र प्रणिधानस्वरूपा ज्ञेयाः । सर्वथा परिभाव्यम् , अत्र पूर्वापराविरोधेन प्रवचनगाम्भीर्यं मुक्त्वाऽभिनिवेशमिति **सङ्घाचारवृत्तौ*** इति । तावत्कालमेव जिनमन्दिरेऽनुज्ञातमवस्थानं यतीनाम् , कारणेन पुनर्धर्मश्रवणाद्यर्थ-

१. L.P. । साधुनूद्दिश्य (चैत्यावस्थाननिषेधे) व्य° मु० C. मूल ॥ २. गाथाद्वयं प्रवचनसारोद्धारे श्राद्धदिनकृत्ये [गा० १४७-८] उद्धृतम् । दुब्भिगंधपरिस्सावी-L.P. श्राद्धदिनकृत्ये ॥ ३. इतोऽग्रे मु० मध्ये ( ) कोष्ठके L.C. मूल इत्थं पाठः-तिस्रः स्तुतयः कायोत्सर्गानन्तरं या दीयन्ते ता यावत् कर्षति भणतीत्यर्थः । किंविशिष्टाः ? तत्राह-त्रिश्लोकिकाः त्रयः स्लोकाः छन्दोविशेषरूपा आधिक्येन यासु तास्तथा 'सिद्धाणं बुद्धाणं' इत्येकः श्लोको 'जो देवाण वि' इति द्वितीयः, 'इक्को वि नमोक्कारो' इति तृतीयः इति । अग्रेतनगाथाद्वयं स्तुतिश्च चतुर्थी गीतार्थाचरणेनैव क्रियते । गीतार्थाचरणं तु मूलगणधरभणितमिव सर्वं विधेयमेव सर्वैरपि मुमुक्षुभिरिति" ॥ ४. * * चिह्नद्वय-मध्यवर्तिपाठः L.P.C. पार्श्वभागे मु० मध्ये कोष्ठके ॥ ५-६. L.P. । °र्थे-मु० C. ॥ ७. L. । (प्रसजति)-मु० P.C. नास्ति ॥

मुपस्थितभविकजनोपकारादिना परतोऽपि-चैत्यवन्दनाया अग्रतोऽपि यतीनामवस्थान-मनुज्ञातम्, शेषकाले साधूनां जिनाशातनादिभयान्नानुज्ञातमवस्थानं तीर्थकरगणधरादिभिः, ततो व्रतिभिरप्येवमाशातनाः परिह्रियन्ते गृहस्थैस्तु सुतरां परिहरणीया इति। तस्माच्चैत्या-लयाद्यथोचिते स्थाने गमनं युक्तिमत्।

अत्र चार्थार्जनमित्यनुवाद्यं न तूपदेश्यम्, तस्य स्वयंसिद्धत्वात्, धर्म्यमिति तु विधेयमप्राप्तत्वात्, '**अप्राप्ते हि शास्त्रमर्थवत्**'। न हि गृहस्थोऽर्थमर्जयेद् बुभुक्षितो-ऽश्नीयादित्यत्र शास्त्रमुपयुज्यते, अप्राप्ते त्वामुष्मिके मार्गे नैसर्गिकमोहान्धतमस-विलुप्तावलोकस्य लोकस्य शास्त्रमेव परमं चक्षुरित्येवमुत्तरत्राप्यप्राप्ते विषये उपदेशः सफल इति चिन्तनीयम्। न च सावद्यारम्भेषु शास्तॄणां वाचनिक्यप्यनुमोदना युक्ताः। यदाहुः –

''**सावज्जणवज्जाणं, वयणाणं जो ण जाणइ विसेसं।**
**वुत्तुं पि तस्स न खमं, किमंग पुण देसणं काउं**'' ॥१॥ [ य.स./७४ ] इति।

धर्माविरोधश्च राज्ञां दरिद्रेश्वरयोर्मान्यामान्ययोरुत्तमाधमयोश्च माध्यस्थ्येन न्याय-दर्शनाद् बोद्धव्यः। नियोगिनां धर्माविरोधो राजप्रजार्थयोः साधनेन **अभयकुमारा**दिवत्। [१]वणिगादीनां च धर्माविरोधो व्यवहारशुद्धिदेशादिविरुद्धकृत्यपरिहारोचितकार्याचरणैरा-जीविकां कुर्वतां भवति। तथैव चोक्तम् –

''**ववहारसुद्धिदेसाइविरुद्धच्चायउचिअचरणेहिं।**
**ता कुणइ अत्थचिंतं, निव्वाहिंतो निअं धम्मं** ॥१॥ [ श्रा.वि./७ ] ति।

व्याख्या –आजीविका च सप्तभिरुपायैः स्यात्, वाणिज्येन १, विद्यया २, कृष्या ३, शिल्पेन ४, पाशुपाल्येन ५, सेवया ६, भिक्षया च ७। तत्र वाणिज्येन वणिजाम् १, विद्यया वैद्यानाम् २, कृष्या कौटुम्बिकादीनाम् ३, पाशुपाल्येन गोपालादीनाम् ४, शिल्पेन चित्रकरादीनाम् ५, सेवया सेवकानाम् ६, भिक्षया भिक्षाचराणाम् ७। एषु च वणिजां वाणिज्यमेव मुख्यवृत्त्यार्थार्जनोपायः श्रेयान्। पठ्यतेऽपि –

''**महुमहणस्स य वच्छे, न चेव कमलायरे सिरी वसइ।**
**किंतु पुरिसाण ववसायसायरे तीर सुहडाणं** ॥१॥ [ ]

वाणिज्यमपि स्वसहायनीवीबलस्वभाग्योदयकालाद्यनुरूपमेव कुर्यादन्यथा सहसा त्रुट्याद्यापत्तेः। वाणिज्ये व्यवहारशुद्धिश्च द्रव्यक्षेत्रकालभावभेदाच्चतुर्द्धा –तत्र द्रव्यतः पञ्चदशकर्मादानादि बह्वारम्भादिनिदानं भाण्डं सर्वात्मना त्याज्यम्, [२]स्वल्पारम्भ एव

१. तुला–श्राद्धविधिवृत्तिः प० ९० ॥ २. तुला–श्राद्धविधिवृत्तिः ॥

वाणिज्ये यतनीयम्, दुर्भिक्षादावनिर्वाहे तु यदि बह्वारम्भं खरकर्माद्यप्याचरति, तदाऽनिच्छुः स्वं निन्दन् सशूकतयैव करोति । यदुक्तं **भावश्रावकलक्षणे –**

**''वज्जइ तिव्वारंभं, कुणइ अकामो अनिव्वहंतो अ ।**
**थुणइ निरारंभजणं, दयालुओ सव्वजीवेसुं** ॥१॥ [ ध.र./६५ ]
**धन्ना य महामुणिणो, मणसा वि करंति जे न परपीडं ।**
**आरंभपावविरया, भुंजंति तिकोडिपरिसुद्धं** ॥२॥ [ ]

अदृष्टमपरीक्षितं च पण्यं न स्वीकार्यं, समुदितं शङ्कास्पदं च समुदितैरेव ग्राह्यम्, न त्वेकाकिना, विषमपाते तथैव साहायकादिभावात् ।

क्षेत्रतः स्वचक्रपरचक्रमान्द्यव्यसनाद्युपद्रवरहिते धर्मसामग्रीसहिते च क्षेत्रे व्यवहार्यं, न त्वन्यत्र बहुलाभेऽपि । कालतोऽष्टाहिकात्रयपर्वतिथ्यादौ व्यापारस्त्याज्यस्तथा वर्षादिकालविरुद्धोऽपि व्यापारस्त्याज्यः । भावतस्त्वनेकधा क्षत्रियादिसायुधैः[1] सह व्यवहारः स्वल्पोऽपि प्रायो न गुणाय, उद्धारके च नट-विटादिविरोधकारिभि- सह न व्यवहार्यम् । कालान्तरव्यवहारोऽपि समधिकग्रहणकादानादिनैवोचितोऽन्यथा तन्मार्गणादिहेतुक्लेशविरोधधर्महान्याद्यनेकानर्थप्रसङ्गात् । अनिर्वहंस्तु यदि उद्धारके व्यवहरति, तदा सत्यवादिभिरेव सह, कलान्तरमपि देशकालाद्यपेक्षयैकद्विक-त्रिक-चतुष्क-पञ्चकवृद्ध्यादिरूपं विशिष्टजनानिन्दितमेव ग्राह्यम्, स्वयं वा वृद्ध्या धने गृहीते तद्दायकस्यावधेः प्रागेव देयम्, जातु धनहान्यादिना तथाऽशक्तोऽपि शनैःशनैस्तदर्पण एव यतते, अन्यथा विश्वासहान्या व्यवहारभङ्गप्रसङ्गः, ऋणच्छेदे च न विलम्बनीयम् । तदुक्तम् –

**''धर्मारम्भे ऋणच्छेदे, कन्यादाने धनागमे ।**
**शत्रुघातेऽग्निरोगे च, कालक्षेपं न कारयेत्''** ॥१॥ [ ]

स्वनिर्वाहाक्षमतया ऋणदानाशक्तेन तूत्तमर्णगृहे कर्मकरणादिनापि ऋणमुच्छेद्यम्, अन्यथा भवान्तरे तद्गृहे कर्मकर-महिष–वृषभ-करभ-रासभादित्वस्यापि सम्भवात् । उत्तमर्णेनापि सर्वथा ऋणदानाशक्तो न याच्यो, मुधाऽऽर्तध्यानक्लेशपापवृद्ध्यादिप्रादुर्भावात्, किन्तु यदा शक्नोषि तदा दद्या नो चेदिदं मे धर्मपदे भूयादिति वाच्यो न त ऋणसम्बन्धश्चिरं स्थाप्यः । तथा सत्यायुःसमाप्तौ भवान्तरे द्वयोर्मिथःसम्बन्धवैरवृद्ध्याद्यापत्तेः, अन्यत्रापि व्यवहारे निजस्वस्यावलने धर्मार्थमिदमिति चिन्त्यं धर्मार्थिनाऽतः साधर्मिकैरेव सह मुख्यवृत्त्या व्यवहारो

---

१. L.P.C. । क्षत्रियादि(भि)सायुधैः-मु० । क्षत्रियव्यापारिनृपाद्यैः सह-ईति श्राद्धविधिवृत्तौ प० ९० ॥

न्याय्यस्तत्पार्श्वे स्थितस्य निजस्वस्य धर्मोपयोगित्वसम्भवात्। तथा परमत्सरमपि न कुर्यात्, कर्मायत्ता हि भूतयः, किं मुधा मत्सरेण भवद्वयेऽपि दुःखकरेण, तथा धान्यौषधवस्त्रादि-वस्तुविक्रयार्ता(र्था)वपि दुर्भिक्षव्याधिवृद्धिवस्त्रादिवस्तुक्षयादि जगद् दुःखकृत् सर्वथा नाभिलषेत्, नापि दैवात् तज्जातमनुमोदेत, मुधा मनोमालिन्याद्यापत्तेः। तदाहुः —

''**उचिअं मुत्तूण कलं, दव्वाइकमागयं च उक्करिसं।**
**निवडिअमवि जाणंतो, परस्स संतं न गिण्हिज्जा ॥१॥** [ सं.प्र./१४४५ ]

व्याख्या —उचितं कलाशतं प्रति चतुष्क-पञ्चकवृद्ध्यादिरूपा, ''**व्याजे स्याद् द्विगुणं वित्तं**'' [ ] इत्युक्ते —द्विगुण(णा)द्रव्य(व्ये)त्रिगुणधान्यादिरूपा[1] वा ताम्। तथा द्रव्यं-गणिमधरिमादि, आदिशब्दात् तत्तद्गतानेकभेदग्रहस्तेषां द्रव्यादीनां क्रमेण द्रव्यक्षयलक्षणेनागतः[2] सम्पन्नो य उत्कर्षोऽर्थवृद्धिरूपस्तं मुक्त्वा शेषं न गृह्णीयात्। कोऽर्थः ? यदि कथञ्चित् पूगफलादिद्रव्याणां क्षयाद् द्विगुणादिलाभः स्यात् तदा तमदुष्टाशयतया गृह्णाति, न त्वेतच्चिन्तयेत् —सुन्दरं जातम्, यत्पूगफलादीनां क्षयोऽभूदिति। तथा निपतितमपि परसत्कं जानन्न गृह्णीयात्, कलान्तरादौ क्रयविक्रयादौ च देशकालाद्यपेक्षया य उचितः शिष्टजनानिन्दितो लाभः स एव ग्राह्य'' इत्युक्त**माद्यपञ्चाशकवृत्तौ**। [ **गा० १३-१४** ] ?

तथा कूटतुलामान-न्यूनाधिक-वाणिज्यरसमेलवस्तुमेलाऽनुचितकलान्तरग्रहण-लञ्चाप्रदानग्रहण-कूटकरकर्षण-कूटघृष्टनाणकाद्यर्पण-परकीयक्रयविक्रयभञ्जन-परकीय-ग्राहकव्युद्ग्राहण-वर्णिकान्तरदर्शन-सान्धकारस्थानवस्त्रादिवाणिज्यमषीभेदादिभिः सर्वथा परवञ्चनं वर्ज्यम्। यतः —

''**विधाय मायां विविधैरुपायैः, परस्य ये वञ्चनमाचरन्ति।**
**ते वञ्चयन्ति त्रिदिवापवर्गसुखान्यहो मोहविजृम्भितानि ॥१॥** [ सू.मु./५४ ] इति।

स्वामिमित्रविश्वस्तदेवगुरुवृद्धबालद्रोहन्यासापहारादीनि तु तद्धत्याप्रायाणि महापातकानि सर्वथा विशिष्य वर्जनीयानि। इह पापं द्विधा —गोप्यं स्फुटं च। गोप्यमपि द्विधा — लघु महच्च। तत्र लघु कूटतुलामानादि, महद्विश्वासघातादि। स्फुटमपि द्विधा —कुलाचारेण निर्लज्जत्वादिना च। कुलाचारेण गृहिणामारम्भादि, म्लेच्छादीनां हिंसादि च। निर्लज्जत्वादिना तु यतिवेषस्य हिंसादि, तत्र निर्लज्जत्वादिना स्फुटेऽनन्तसंसारित्वाद्यपि, प्रवचनोड्डाहादे-र्हेतुत्वात्। कुलाचारेण पुनः स्फुटे स्तोकः कर्मबन्धः, गोप्ये तु तीव्रतरोऽसत्यमयत्वात्। असत्यं च महत्तमं पातकम्। यतो **योगशास्त्रान्तरश्लोके** —

---

१. °द्विगुणद्रव्यत्रि° L.P.C. ॥ २. L.P. । °तं-मु० C. ।

"**एकत्रासत्यजं पापं, पापं निःशेषमन्यतः ।**
**द्वयोस्तुलाविधृतयोराद्यमेवातिरिच्यते**" ॥१॥ [ **यो.शा.२।६४ वृत्तौ** ] इति ।

प्रीतिपदे च सर्वथाऽर्थसम्बन्धादि वर्जयेत् । न च साक्षिणं विना मित्रगृहेऽपि स्थापनिका मोच्या, मित्रादिहस्ते न द्रव्यप्रेषणाद्यपि[1] युक्तम्, अविश्वासस्यार्थमूलत्वाद् विश्वासस्यानर्थमूलत्वाच्च । यथा तथा शपथादिकं च न विदध्यात्, विशिष्य देवगुर्वादिविषयम् । नापि परप्रतिभूत्वादिसङ्कटे प्रविशेत् । समुदितक्रयविक्रयादिप्रारम्भे वाऽविघ्नेनाभिमतलाभादि कार्यसिद्ध्यर्थं पञ्चपरमेष्ठिस्मरण-श्रीगौतमादिनामग्रहण-कियत्तद्वस्तुश्रीदेवगुर्वाद्युपयोगित्वकरणादि कर्त्तव्यम्, धर्मप्राधान्येनैव सर्वत्र साफल्यात् । धनार्जनार्थमुद्यच्छता च सप्तक्षेत्रीव्ययादिधर्ममनोरथा महान्त एव नित्यं कर्त्तव्याः । सति च लाभसम्भवे तान् सफलानपि कुर्यात् ।

"**ववसायफलं विहवो, विहवस्स फलं सुपत्तविणिओगो ।**
**तयभावे ववसाओ, विहवो वि अ दुग्गइनिमित्तं**" ॥१॥ [ **पु.मा./५६** ]

एवं च धर्मर्द्धिर्भवति, अन्यथा तु भोगर्द्धिः पापर्द्धिर्वा । उक्तं च –

"**धम्मिद्धी १ भोगिद्धी २ पाविद्धी ३ इअ तिहा भवे इद्धी ।**
**सा भणइ धम्मिड्ढी, जा णिज्जइ धम्मकज्जेसु** ॥१॥ [ ]
**सा भोगिड्ढी गिज्झइ, सरीरभोगंमि जीइ उवओगो ।**
**जा दाणभोगरहिआ, सा पाविड्ढी अणत्थफला**" ॥२॥ [ ]

अतो देवपूजा-दानादिकैर्नैत्यिकैः सङ्घपूजा-साधर्मिकवात्सल्यादिकैश्चावसरिकैः पुण्यैर्निजर्द्धिः पुणयोपयोगिनी कार्या । अवसरपुण्यकरणमपि नित्यपुण्यकरणकर्तुरेवौचितीकरम् । लाभेच्छा तु स्वभाग्यनुसारेणैव कुर्यादन्यथाऽऽर्त्तध्यानप्रवृद्धिः स्यात्, ततश्च मुधा कर्मबन्धः । व्ययं चायोचितं कुर्यात् । यतः –

"**पादमायान्निधिं कुर्यात् पादं वित्ताय कल्पयेत् ।**
**धर्मोपभोगयोः पादं, पादं भर्त्तव्यपोषणे**" ॥१॥ [ ]

**केचित्** त्वाहुः- "**आयादर्द्धं नियुञ्जीत, धर्मे समधिकं ततः ।**
**शेषेण शेषं कुर्वीत, यत्नतस्तुच्छमैहिकम्**" ॥१॥ [ ]

निर्द्रव्यसद्रव्ययोरयं विभाग इत्येके । इह न्यायार्जितवित्त-सत्पात्रविनियोगाभ्यां चतुर्भङ्गी –तत्र न्यायार्जितविभवसत्पात्रविनियोगरूपः पुण्यानुबन्धिपुण्यहेतुः **शालि-**

---

१. द्रव्यपेष(र)णाद्यपि-मु० ॥

**भद्रा**दिवत् १, न्यायागतविभवत्तत्पात्रपोषरूपो द्वितीयो भङ्गः पापानुबन्धिपुण्यहेतुर्लक्ष-भोज्यकृद् **विप्रवत्** २, अन्यायायातविभवसत्पात्रपोषरूपस्तृतीयः राजादिबह्वारम्भिणामनुज्ञातः ३, अन्यायोपार्जितार्थकुपात्रपोषरूपश्चतुर्थस्त्याज्य एव विवेकिना ४। एवं न्यायेनार्थार्जने यतनीयम् । व्यवहारशुद्ध्यैव च सर्वोऽपि धर्मः सफलः । यद् **दिनकृत्ये** —

**''ववहारसुद्धी धम्मस्स, मूलं सव्वन्नूभासए ।**
**ववहारेणं तु सुद्धेणं, अत्थसुद्धी तओ[1] भवे ॥१॥** [ श्रा.दि./१५९ ]
**सुद्धेणं चेव अत्थेणं, आहारो होइ सुद्धओ ।**
**आहेरेणं तु सुद्धेणं, देहसुद्धी जओ भवे ॥२॥** [ श्रा.दि./१६० ]
**सुद्धेणं चेव देहेणं धम्मजुग्गो[2] अ जायई ।**
**जं जं कुणइ किच्चं तु , तं तं से सफलं भवे ॥३॥** [ श्रा.दि./१६१ ]
**अण्णहा अफलं होइ, जं जं किच्चं तु सो करे ।**
**ववहारसुद्धिरहिओ, धम्मं खिंसावए जओ ॥४॥** [ श्रा.दि./१६२ ]
**धम्मखिंसं कुणंताणं, अप्पणो अ परस्स य ।**
**अबोही परमा होइ, इअ सुत्ते वि[3] भासिअं ॥५॥** [ श्रा.दि./१६३ ]
**तम्हा सव्वपयत्तेणं, तं तं कुज्जा वियक्खणो ।**
**जेण धम्मस्स खिंसं तु , न करे अबुहो जणो'' ॥६॥** [ श्रा.दि./१६४ ]

अतो व्यवहारशुद्ध्यै सम्यगुपक्रम्यम् । इति व्यवहारशुद्धिस्वरूपम् ॥

तथा देशादिविरुद्धपरिहारो देश-काल-नृप-लोक-धर्मविरुद्धवर्जनम्। यदुक्तं **हितोपदेशमालायाम्** —

**''देसस्स य कालस्स य, निवस्स लोगस्स तह य धम्मस्स ।**
**वज्जंतो पडिकूलं, धम्मं सम्मं च लहइ नरो'' ॥१॥** [ हि.मा./३२० ]

तत्र यद्यत्र देशे शिष्टजनैरनाचीर्णं तत्तत्र देशविरुद्धम् , यथा सौवीरेषु कृषिकर्मेत्यादि । अथवा जातिकुलाद्यपेक्षयाऽनुचितं देशविरुद्धम् , यथा ब्राह्मणस्य सुरापानमित्यादि १।

कालविरुद्धं त्वेवं —शीतर्त्तौ हिमालयपरिसरे, ग्रीष्मर्त्तो मरौ, वर्षासु अपरदक्षिण-समुद्रपर्यन्तभूभागेषु , महारण्ये यामिनीमुखवेलायां वा प्रस्थानम् । तथा फाल्गुन-मासाद्यनन्तरं तिलपीलनम् , तद्व्यवसायादि, वर्षासु वा पत्रशाकग्रहणादि ज्ञेयम् २।

---

१. जओ-इति श्राद्धदिनकृत्ये ॥ २. धम्मे जोग्गो इति श्राद्धदिनकृत्ये ॥ ३. सुत्ते विभा° मु० । ''एतद् सूत्रेऽपि छेदग्रन्थलक्षणे भाषितम्'' इति श्राद्धदिनकृत्यवृत्तौ प० २८१ ॥

राजविरुद्धं च राज्ञः सम्मतानामसम्माननम्, राज्ञोऽसम्मतानां सङ्गतिः, वैरिस्थानेषु लोभाद् गतिर्वैरिस्थानागतैः सह व्यवहारादि, राजदेयभागशुल्कादिखण्डनमित्यादि ३।

लोकविरुद्धं तु लोकस्य निन्दा विशिष्यस्य च गुणसमृद्धस्येयम्, आत्मोत्कर्षश्च। यतः –

**''परपरिभवपरिवादादात्मोत्कर्षाच्च बध्यते कर्म ।**
**नीचैर्गोत्रं प्रतिभवमनेकभवकोटिदुर्मोचम् ॥१॥** [ प्रश./१०० ]

तथा ऋजूनामुपहासः । गुणवत्सु मत्सरः, कृतघ्नत्वं च, बहुजनविरुद्धैः सह सङ्गतिः, जनमान्यानामवज्ञा, धर्मिणां स्वजनानां वा व्यसने तोषः, शक्तौ तदप्रतिकारो, देशाद्युचिताचारलङ्घनम्, वित्ताद्यननुसारेणात्युद्भटातिमलिनवेशादिकरणम्, एवमादि-लोकविरुद्धमिहाप्यपकीर्त्यादिकृत् । यदाह **वाचकमुख्यः** –

**''लोकः स्वल्वाधारः, सर्वेषां धर्मचारिणां यस्मात् ।**
**तस्माल्लोकविरुद्धं, धर्मविरुद्धं च संत्याज्यम् ॥१॥** [ प्रश./१३१ ]

तत्त्यागे च जनानुरागस्वधर्मनिर्वाहरूपो गुणः । आह च –

**''एआइँ परिहरंतो, सव्वस्स जणस्स वल्लहो होइ ।**
**जणवल्लहत्तणं पुण, नरस्स सम्मत्ततरुबीयं'' ॥१॥** [ हि.मा./३४८ ]

अथ धर्मविरुद्धं चैवं –मिथ्यात्वकृत्यम्, निर्दयं गवादेस्[1]ताडनबन्धनादि, निराधारं यूकादेरातपे च मत्कुणादेः क्षेपः, शीर्षे महाकङ्कतक्षेपः, लिक्षास्फोटनादि, उष्णकाले त्रिः शेषकाले च द्विर्दढबृहद्गलनकेन सङ्खारादिसत्यापनादियुक्त्या जलगालने धान्येन्धन-शाक-ताम्बूल-फलादिशोधनादौ च सम्यगप्रवृत्तिः । अक्षत-पूग-खारिक-वालु-ओलि-फलकादेर्मुखे क्षेपः । नालकेन धारया वा जलादिपानम्, रन्धन-खण्डन-पेषण-घर्षण-मलमूत्रश्लेष्मगण्डूषादिजलताम्बूलत्यागादौ सम्यगयतना । धर्मकर्मण्यनादरो, देव-गुरु-साधर्मिषु विद्वेषश्चेत्यादि । तथा देव-गुरु-साधारणद्रव्यपरिभोगो, निर्द्धर्मसंसर्गो, धार्मिकोपहासः, कषायबाहुल्यम्, बहुदोषः, क्रयविक्रयः, खरकर्मसु पापमयाधिकारादौ च प्रवृत्तिरेवमादि धर्मविरुद्धम् । देशादिविरुद्धानामपि धर्मवता आचरणे धर्मनिन्दोपपत्ते-र्धर्मविरुद्धतैव ५। तदेवं पञ्चविधं विरुद्धं श्राद्धेन परिहार्यमिति देशादिविरुद्धत्यागः ।

[2]तथोचितस्योचितकार्यस्याचरणं –करणम् उचिताचरणम्, तच्च पित्रादिविषयं नवविधम्, इहापि स्नेहवृद्धिकीर्त्यादिहेतु**हितोपदेशमाला**गाथाभिः प्रदर्श्यते –

---

१. L.P.C. । ताडनबन्ध(वध)बन्धनादि-मु० ॥ २. तुला-श्राद्धविधिवृत्तिः प० १०५ ॥

**''सामन्ने मणुअत्ते, जं केई पाउणंति इह किंत्तिं ।**
**तं मुणह[1] निव्विअप्पं, उचिआचरणस्स माहप्पं ॥१॥** [ हि.मा./२७१ ]
**तं पुण पिइ १ माइ २ सहोअरेसु ३ पणइणि ४ अवच्च ५ सयणेसुं ६ ।**
**गुरुजण ७ नायर ८ परतित्थिएसु ९ पुरिसेण कायव्वं'' ॥२॥** [ हि.मा./२७२ ]

तत्र पितृविषयं कायवाग्मनांसि प्रतीत्य त्रिविधमौचित्यं क्रमेणाह –

**''पिउणो तणुसुस्सूसं, विणएणं किंकरु व्व कुणइ सयं ।**
**वयणं पि से पडिच्छइ, वयणाओ अपडिअं चेव'' ॥३॥** [ हि.मा./२७३ ]

तनूशुश्रूषां चरणक्षालन-संवाहनोत्थापन-निवेशनादिरूपाम्, देश-काल-सात्म्यौचित्येन भोजन-शयनीय-वसना-ऽङ्गरागादिसम्पादनरूपां च, विनयेन न तु परोपरोधावज्ञादिभिः, स्वयं करोति न तु भृत्यादिभ्यः[2](भिः) कारयति । यतः –

**''गुरोः पुरो निषण्णस्य, या शोभा जायते सुनोः ।**
**उच्चैः सिंहासनस्थस्य, शतांशेनापि सा कुतः ?'' ॥१॥** [ ]

अपडिअं ति वदनादपतितमुच्चार्यमाणमेवादेशः प्रमाणमेष करोमीति सादरं प्रतीच्छति, न पुनरनाकर्णितशिरोधूननकालक्षेपार्द्धविधानादिभिरवजानाति ।

**''चित्तं पि हु अणुअत्तइ, सव्वपयत्तेण सव्वकज्जेसुं ।**
**उवजीवइ बुद्धिगुणे, निअसब्भावं पयासेइ'' ॥४॥** [ हि.मा./२७४ ]

स्वबुद्धिविचारितमवश्यविधेयमपि कार्यं तदेवारभते यत्पितुर्मनोऽनुकूलमितिभावः । बुद्धिगुणान् शुश्रूषादीन् सकलव्यवहारगोचरांश्चोपजीवति अभ्यस्यति, बहुदृश्वानो पितृप्रभृतयः सम्यगाराधिताः प्रकाशयन्त्येव कार्यरहस्यानि, निजसद्भावं चित्ताभिप्रायं प्रकाशयति –

**''आपुच्छिउं पयट्टइ, करणिज्जेसुं निसेहिओ ठाइ ।**
**खलिए खरं पि भणिओ, विणीअयं न हु विलंघेइ ॥५॥** [ हि.मा./२७५ ]
**सविसेसं परिपूरइ, धम्माणुगए मणोरहे तस्स ।**
**एमाइ उचिअकरणं, पिउणो जणणीइ वि तहेव ॥६॥** [ हि.मा./२७६ ]

तस्य पितुरितरानपि मनोरथान् पूरयति, **श्रेणिकचिल्लणादेरभयकुमार**वत् । धर्मानुगतान् सुदेवपूजा-गुरुपर्युपास्ति-धर्मश्रवण-विरतिप्रतिपत्त्यावश्यकप्रवृत्ति-सप्तक्षेत्रीवित्तव्यय-तीर्थयात्रा-दीनानाथोद्धरणादीन् मनोरथान् सविशेषं बह्वादरेणेत्यर्थः । कर्त्तव्यमेव चैतत्

---

१. P. सं० श्राद्धविधौ च । सुणह-मु० मूल P. ॥ २. भृत्यादिभ्यः L.P.C. ॥

सदपत्यानामिह लोकगुरुषु पितृषु । न चार्हद्धर्मसंयोजनमन्तरेणात्यन्तं दुष्प्रतिकारेषु तेषु अन्योऽस्ति प्रत्युपकारप्रकारः । तथा च **स्थानाङ्गसूत्रम्** –

''**तिण्हं दुप्पडिआरं समणाउसो !** तंजहा –**अम्मापिउणो १, भट्टिस्स २, धम्मायरिअस्स ३**'' । [ ३-१-१३५ ] इत्यादिः समग्रोऽप्यालापको वाच्यः ।

[१] अथ मातृविषयौचित्ये विशेषमाह –

''**नवरं से सविसेसं, पयडइ भावाणुवित्तिमप्पडिमं ।**
**इत्थीसहावसुलहं, पराभवं वहइ न हु जेणं**'' ॥७॥ [ हि.मा./२७७ ]

सविसेसं ति जनकान्मातुः पूज्यत्वाद् । अपि यन्**मनुः** –

''**उपाध्याया दशाचार्य, आचार्याणां शतं पिता ।**
**सहस्रं तु पितुर्माता, गौरवेणातिरिच्यते** ॥१॥ [ **मनुस्मृतौ २-१४५** ]

''**उचिअं एअं पि सहोअरंमि जं निअइ अप्पसममेअं ।**
**जिट्ठं व कणिट्ठं पि हु , बहुमन्नइ सव्वकज्जेसुं**'' ॥८॥ [ हि.मा./२७८ ]

निअइ त्ति पश्यति जिट्ठं व त्ति ज्येष्ठो भ्राता पितृतुल्यस्तमिव । तथा –

''**दंसइ न पुढोभावं, सब्भावं कहइ पुच्छइ अ तस्स ।**
**ववहारंमि पयट्टइ, न निगूहइ थेवमवि दविणं**'' ॥९॥ [ हि.मा./२७९ ]

पयट्टइ त्ति व्यवहारे प्रवर्त्तते न त्वव्यवहारे, निगूहइ त्ति द्रोहबुद्ध्या नापह्नुते, सङ्कटे निर्वाहार्थं तु धनं निधिं करोत्येव ।

कुसंसर्गादिना बन्धाववनीते किं कृत्यमित्याह –

''**अविणीअं अणुअत्तइ, मित्तेहिंतो रहो उवालभइ ।**
**सयणजणाओ सिक्खं, दावइ अन्नावएसेणं** ॥१०॥ [ हि.मा./२८० ]
**हिअए ससिणेहो वि हु , पयडइ कुविअं व तस्स अप्पाणं ।**
**पडिवन्नविणयमग्गं, आलवइ अछम्मपिम्मपरो**'' ॥११॥ [ हि.मा./२८१ ]

अछम्मि त्ति निश्चयप्रेमवान् , एवमप्यगृहीतविनयं तु प्रकृतिरियमस्येति जानन् सन्नुदास्त एव ।

''**तप्पणइणिपुत्ताइसुं , समदिट्ठी होइ दाणसम्माणे ।**
**सावक्कंमि उ इत्तो, सविसेसं कुणइ सव्वं पि**'' ॥१२॥ [ हि.मा./२८२ ]

---

१. तुला–श्राद्धविधिवृत्तिः प० १०६ ॥

समदिट्ठि त्ति स्वपत्न्यपत्यादिष्विव समदृष्टिः, सावक्कंमि त्ति सापत्नेऽपरामातृके भ्रातरि, तत्र हि स्तोकेऽप्यन्तरे व्यक्तीकृते तस्य वैचित्यं जनापवादश्च स्यात् । एवं पितृ-मातृ-भ्रातृतुल्येष्वपि यथार्हमौचित्यं चिन्त्यम्[1] । यतः –

**''जनकश्चोपकर्त्ता च, यस्तु विद्याप्रयच्छकः ।**
**अन्नदः प्राणदश्चैव, पञ्चैते पितरः स्मृताः ॥१॥ [ ]**
**राज्ञः पत्नी गुरोः पत्नी, पत्नीमाता तथैव च ।**
**स्वमाता चोपमाता च, पञ्चैता मातरः स्मृताः ॥२॥ [ ]**
**सहोदरः सहाध्यायी, मित्रं वा रोगपालकः ।**
**मार्गे वाक्यसखा यस्तु , पञ्चैते भ्रातरः स्मृताः ॥३॥ [ ]**

भ्रातृभिश्च मिथो धर्मकार्यविषये स्मारणादि सम्यक् कार्यं । यतः –

**''भवगिहमज्झंमि पमायजलणजलिअंमि मोहनिद्दाए ।**
**उट्ठवइ जो सुअंतं, सो तस्स जणो परमबंधू ॥१॥ [ ]**

भ्रातृवन्मित्रेऽप्येवमनुसर्त्तव्यम् ।

**''इअ भाइगयं उचिअं, पणइणिविसयं पि किं पि जंपेमो ।**
**सप्पणयवयणसम्माणणेण तं अभिमुहं कुणइ ॥१३॥ [ हि.मा./२८३ ]**
**सुस्सूसाइ पयट्टइ, वत्थाभरणाइ समुचिअं देइ ।**
**नाडयपिच्छणयाइसु , जणसंमद्देसु वारेइ ॥१४॥ [ हि.मा./२८४ ]**
**रुंभइ रयणिपयारं, कुसीलपासंडिसंगमवणेइ ।**
**गिहकज्जेसु निओअइ, न विओअइ अप्पणा सद्धिं'' ॥१५॥ [ हि.मा./२८५ ]**

रजन्यां प्रचारं राजमार्गवेश्मगमनादिकं निरुणद्धि, धर्मावश्यकादिप्रवृत्तिनिमित्तं च जननीभगिन्यादिसुशीलललितावृन्दमध्यगतामनुमन्यत एव, न विओअइ त्ति न वियोजयति, यतो दर्शनसाराणि प्रायः प्रेमाणि । यथोक्तम् –

**''अवलोअणेण आलावणेण गुणकित्तणेण दाणेणं ।**
**छंदेण वट्टमाणस्स, निब्भरं जायए पिम्मं ॥१॥ [ ]**
**अद्दंसणेण अइदंसणेणं दिट्ठं अणालवंतेण ।**
**[2]माणेणऽपमाणेण य, पंचविहं झिज्जए पेम्मं ॥२॥ [ ]**

---

१. चिन्त्यं–मु० नास्ति, L.P. श्राद्धविधिवृत्तौ [प० १०७] अस्ति ॥ २. माणेणऽवमाणे-(पवासे)ण–मु० । माणेण पवासेण–L. । माणेण पमाणेण–P. श्राद्धविधिवृत्तौ च ॥

**अवमाणं न पयासइ, खलिए सिक्खेइ कुविअमणुणेइ ।**
**धणहाणिवुड्ढिघरमंतवइअरं पयडइ न तीसे'' ॥१६॥ [ हि.मा./२८६ ]**

अपमानं निर्हेतुकं नास्यै प्रदर्शयति, स्खलिते किञ्चिदपराधे निभृतं शिक्षयति, कुपितां चानुनयति, अन्यथा सहसाकारितया कूपपाताद्यमप्यनर्थं कुर्यात् , पयडइ त्ति धनहानिव्यतिकरं न प्रकटयति, प्रकटिते तु धनहानिव्यतिकरे तुच्छतया सर्वत्र तद् वृत्तान्तं व्यञ्जयति, धनवृद्धि-व्यतिकरे च व्यक्तीकृते निरर्गलं व्यये प्रवर्त्तते, तत एव गृहे स्त्रियाः प्राधान्यं न कार्यं ।

**''सुकुलुग्गयाहिं परिणयवयाहिं निच्छम्मधम्मनिरयाहिं ।**
**सयणरमणीहिं पीइं, पाउणइ समाणधम्माहिं ॥१७॥ [ हि.मा./२८७ ]**

पाउणइ त्ति प्रापयति ।

**''रोगाइसु नोविक्खइ, सुसहाओ होइ धम्मकज्जेसुं ।**
**एमाइ पणइणिगयं, उचिअं पाएण पुरिसस्स ॥१८॥ [ हि.मा./२८८ ]**
**पुत्तं पइ पुण उचिअं, पिउणो लालेइ बालभावंमि ।**
**उम्मीलिअबुद्धिगुणं, कलासु कुसलं कुणइ कमसो ॥१९॥ [ हि.मा./२८९ ]**
**गुरुदेवधम्मसुहिसयणपरिचयं कारवेइ निच्चं पि ।**
**उत्तमलोएहिं समं, मित्तीभावं रयावेइ ॥२०॥ [ हि.मा./२९० ]**
**गिह्नावेइ अ पाणिं, समाणकुलजम्मरूवकन्नाणं ।**
**गिहभारंमि निजुंजइ, पहुत्तणं विअरइ कमेणं ॥२१॥ [ हि.मा./२९१ ]**
**पच्चक्खं न पसंसइ, वसणोवहयाण कहइ [2]दुरवत्थं ।**
**आयं वयमवसेसं च, सोहए सयमिमाहिंतो'' ॥२२॥ [ हि.मा./२९२ ]**

**''प्रत्यक्षे गुरवः स्तुत्याः, परोक्षे मित्रबान्धवाः ।**
**कर्मान्ते दासभृत्याश्च, पुत्रा नैव मृताः [1]स्त्रियः'' ॥१॥ [ ]**

इति वचनात् पुत्रप्रशंसा न युक्ता, अन्यथा निर्वाहादर्शनादिहेतुना चेत् कुर्यात् तदापि न प्रत्यक्षम् , गुणवृद्ध्यभावाभिमानादिदोषापत्तेः । द्यूतादिव्यसनिनां निर्द्धनत्वन्यत्कारतर्ज्जन-ताडनादिदुरवस्थाश्रवणे तेऽपि नैव व्यसने प्रवर्त्तन्ते । आयं व्ययं व्ययादुत्कलितं शेषं च पुत्रेभ्यः शोधयति, एवं स्वस्याप्रभुत्वं पुत्राणां स्वच्छन्दत्वमपास्तम् ।

**''दंसेइ नरिंदसभं, देसंतरभावपयडणं कुणइ ।**
**इच्चाइ अवच्चगयं, उचिअं पिउणो मुणेअव्वं ॥२३॥ [ हि.मा./२९३ ]**

---

१. P. । स्त्रीयां–मु० ॥ २. पुर° L.P. ॥

**सयणेसु समुचिअमिणं, जं ते निअगेहवुड्ढिकज्जेसुं ।**
**सम्माणिज्ज सया वि हु , करिज्ज हाणीसु वि समीवे ॥२४॥[ हि.मा./२९४ ]**

पितृमातृपत्नीपक्षोद्भवा पुंसां स्वजनाः, वृद्धिकार्याणि पुत्रजन्मादीनि ।

**''सयमवि तेसिं वसणूसवेसु होअव्वमंतिअंमि सया ।**
**खीणविहवाण रोगाउराण कायव्वमुद्धरणं ॥२५॥ [ हि.मा./२९५ ]**

**खाइज्ज पिट्ठिमंसं, न तेसि कुज्जा न सुक्ककलहं च ।**
**तदमित्तेहिं मित्तिं, न करिज्ज करिज्ज मित्तेहिं'' ॥२६॥ [ हि.मा./२९६ ]**

शुष्ककलहो हास्यादिना ।

**''तयभावे तग्गेहे, न वइज्ज चइज्ज अत्थसंबंधं ।**
**गुरुदेवधम्मकज्जेसु , एगचित्तेहिं होअव्वं'' ॥२७॥ [ हि.मा./२९७ ]**

न विज्ज त्ति न व्रजेत् ।

**''एमाई सयणोचिअमह धम्मायरिअसमुचिअं भणिमो ।**
**भत्तिबहुमाणपुव्वं, तेसि तिसंझं पि पणिवाओ ॥२८॥ [ हि.मा./२९८ ]**

**तद्दंसिअनीईए, आवस्सयपमुहकिच्चकरणं च ।**
**धम्मोवएससवणं तदंतिए सुद्धसद्धाए ॥२९॥ [ हि.मा./२९९ ]**

**आएसं बहुमन्नइ, इमेसि मणसा वि कुणइ नावन्नं ।**
**रुंभइ अवन्नवायं, थुइवायं पयडइ सया वि ॥३०॥ [ हि.मा./३०० ]**

**न हवइ छिद्दप्पेही, सुहि व्व अणुअत्तए सुहदुहेसुं ।**
**पडिणीअपच्चवायं, सव्वपयत्तेण वारेइ ॥३१॥ [ हि.मा./३०१ ]**

सुहि व्व त्ति सुहृदिवानुवर्त्तते ।

**''खलिअंमि चोइओ गुरुजणेण मन्नह तह त्ति सव्वं पि ।**
**चोएइ गुरुजणं पि हु , पमायखलिएसु एगंते'' ॥३२॥ [ हि.मा./३०२ ]**

चोएइ त्ति भगवन् ! किमिदमुचितं सच्चरित्रवतां तत्रभवतां भवतामित्यादिना ।

**''कुणइ विणओवयारं, भत्तीए समयसमुचिअं सव्वं ।**
**गाढं गुणाणुरायं, निम्मायं वहइ हिअयंमि'' ॥३३॥ [ हि.मा./३०३ ]**

सव्वं ति सम्मुखागमना-ऽभ्युत्थाना-ऽऽसनदान-संवाहनादि, शुद्धवस्त्र-पात्रा-ऽऽहारादिप्रदानादिकं च ।

---

१. मित्तं-मु० । L.P. श्राद्धविधिवृत्तावपि-मित्तिं-इति ॥

''भावोवयारमेसिं, देसंतरिओ वि सुमरइ सया वि ।
इअ एवमाइ गुरुजणसमुचिअमुचिअं मुणेअव्वं'' ॥३४॥ [ हि.मा./३०४ ]

भावोपकारः सम्यक्त्वदानादि ।

''जत्थ सयं निवसिज्जइ, नयरे तत्थेव जे किर वसंति ।
ससमाणवित्तिणो ते नायरया नाम वुच्चंति'' ॥३५॥ [ हि.मा./३०५ ]

स्वसमानवृत्तयो वणिग्वृत्तिजीविनः ।

''समुचिअमिणमो तेसिं, जमेगचित्तेहिं समसुहदुहेहिं ।
वसणूसवतुल्लगमागमेहिं निच्चं पि होअव्वं ॥३६॥ [ हि.मा./३०६ ]
कायव्वं कज्जे वि हु , न इक्कमिक्केण दंसणं पहुणो ।
कज्जो न मंतभेओ, पेसुन्नं परिहरेअव्वं ॥३७॥ [ हि.मा./३०७ ]
समुवट्ठिए विवाए, तुलासमाणेहिं चेव होयव्वं ।
कारणसाविक्खेहिं, विहुणेअव्वो न नयमग्गो'' ॥३८॥ [ हि.मा./३०८ ]

कारण त्ति स्वजनसम्बन्धिज्ञातेयलञ्चोपकारादिसापेक्षैर्नयमार्गो न विधूनयितव्यः ।

''बलिएहिं दुब्बलजणो, सुंककराईहिं नाभिभविअव्वो ।
थेवावराहदोसे वि, दंडभूमिं न नेअव्वो'' ॥३९॥ [ हि.मा./३०९ ]

शुल्ककराधिक्यनृपदण्डादिभिः पीड्यमाना जना मिथो विरक्ताः संहतिमुज्झन्ति, परं न सा त्यक्तव्या, संहतिरेव श्रेयस्करीतिभावः ।

''कारणिएहिं च समं, कायव्वो ता न अत्थसंबंधो ।
किं पुण पहुणा सद्धिं, अप्पहिअं अहिलसंतेहिं'' ॥४०॥ [ हि.मा./३१० ]
एअं परुप्परं नायराण, पाएण समुचिआचरणं ।
परतित्थिआण समुचिअमह किं पि भणामि लेसेणं'' ॥४१॥ [ हि.मा./३११ ]

''एएसि तित्थिआणं, भिक्खट्ठमुवट्ठिआण निअगेहे ।
कायव्वमुचिअकिच्चं, विसेसओ रायमहिआणं'' ॥४२॥ [ हि.मा./३१४ ]

उचितकृत्यं यथार्हदानादि ।

''जइ वि मणंमि न भत्ती, न पक्खवाओ अ तग्गयगुणेसुं ।
उचिअं गिहागएसुं , तह वि हु धम्मो गिहीण इमो'' ॥४३॥ [ हि.मा./३१५ ]

पक्षपातोऽनुमोदना, धर्म आचारः ।

**''गेहागयाणमुचिअं, वसणावडिआण तह समुद्धरणं ।**
**दुहिआण दया एसो, सव्वेसिं सम्मओ धम्मो''** ॥४४॥ [ हि.मा./३१६ ]

पुरुषमपेक्ष्य मधुरालापनाऽऽसननिमन्त्रणाकार्यानुयोगतन्निर्माणादिकमुचितमाचरणीयं निपुणैः । अन्यत्राप्यूचे —

**''सव्वत्थ उचिअकरणं, गुणाणुराओ रई अ जिणवयणे ।**
**अगुणेसु अ मज्झत्थं, सम्मद्दिट्ठिस्स लिंगाइं** ॥१॥ [ पु.मा./११ ]
**मुंचंति न मज्जायं, जलनिहिणो नाचला वि हु चलंति ।**
**न कया वि उत्तमनरा, उचिआचरणं विलंघन्ति** ॥४५॥ [ हि.मा./३१८ ]
**तेणं चिअ जगगुरुणो, तित्थयरा वि हु गिहत्थवासंमि ।**
**अम्मापिऊणमुचिअं, अब्भुट्ठाणाइं कुव्वंति''** ॥४६॥ [ हि.मा./३१९ ]

इत्थं नवधौचित्यम् । इत्थं च व्यवहारशुद्ध्यादिभिरर्थोपार्जनं विशेषतो गृहिधर्म इति निष्कर्षः ॥६३॥

साम्प्रतं [1]मध्याह्नादिविषयं यत्कर्त्तव्यं तद्दर्शयन्नाह ।

**मध्याह्नेऽर्चा च सत्पात्रदानपूर्वं तु भोजनम् ।**
**संवरणकृतिस्तद्विज्ञैः, सार्द्धं शास्त्रार्थचिन्तनम् ॥६४॥**

'**मध्याह्ने**' मध्याह्नकाले, '**चः**' पुनरर्थे, पूर्वोक्तविधिना विशिष्य च प्रधानशाल्योदनादिनिष्पन्नविशेषरसवतीढौकनादिना द्वितीयवारमित्यर्थः । '**अर्चा**' पूजा श्रावकाधिकारप्रस्तावाज्जिनपूजा विशेषतो गृहिधर्मो भवतीत्यन्वयः । एवमग्रेऽपि । तथा **सत्पात्रं** साध्वादि, **तस्मिन् , दानपूर्वं** —दानं दत्त्वेत्यर्थः, '**भोजनम्**' अभ्यवहरणम् '**तुः**' एवकारार्थस्ततः सत्पात्रदानपूर्वमेव भोजनमिति निष्कर्षः, अन्वयस्तूक्त एव । अत्र च [2]भोजनमित्यनुवादः । माध्याह्निकपूजा-भोजनयोश्च न कालनियमः, '**तीव्रबुभुक्षोर्हि बुभुक्षाकालो भोजनकालः**' इति रूढेर्मध्याह्नादर्वागपि गृही[3]तं प्रत्याख्यानं तीरयित्वा देवपूजापूर्वकं भोजनं कुर्वन्न दुष्यति । अत्र चायं विधिः —भोजनवेलायां साधूनिमन्त्र्य तैः सह गृहमायाति, स्वयमागच्छतो वा मुनीन् दृष्ट्वा सम्मुखं गमनादिकं करोति । साधूनां हि प्रतिपत्तिपूर्वकं प्रतिलम्भनं न्याय्यं श्रावकाणाम् । सा चेत्थं **योगशास्त्रे** —

---

१. L.P.C. संशो । [मध्याह्नादिविषयं यत्कर्तव्यं तद्दर्शयन्नाह] अत तदनन्तरकरणीयविशेषगृहिधर्मान्तरमाह-मु० । अत्र कोष्ठकगतपाठः C. संशोधितः पार्श्वभार्ग वर्तते, कोष्ठकबाह्यपाठः C. मूल इति ध्येयम् । २. तुला-योगशास्त्रटीका प० ६५२ ॥ ३. °त-यो० टी० ॥

**''अभ्युत्थानं तदाऽऽलोकेऽभियानं च तदागमे ।**
**शिरस्यञ्जलिसंश्लेषः, स्वयमासनढौकनम्'' ॥१॥ [ यो.शा./३-१२५ ]**
**आसनाभिग्रहो भक्त्या, वन्दना पर्युपासनम् ।**
**तद्यानेऽनुगमश्चेति, प्रतिपत्तिरियं गुरोः'' ॥ [ यो.शा./३-१२६ ]**

**दिनकृत्ये**ऽपि–

**''आसणेण निमंतेत्ता, तओ परिअणसंजुओ ।**
**वंदए मुणिणो ताहे[1], खंताइगुणसंजुए'' ॥१॥ [ श्रा.दि./१७३ ]**

एवं प्रतिपत्तिं विधाय सविनयं संविग्ना-ऽसंविग्नभावितक्षेत्रं १ सुभिक्ष-दुर्भिक्षादिकालं २ सुलभ-दुर्लभादि देयं च द्रव्यं ३ विचार्य आचार्योपाध्याय-गीतार्थ-तपस्वि-बाल-वृद्ध-ग्लान-सहाऽसहादिपुरुषाद्यपेक्षया च स्पर्द्धा-महत्त्व-मत्सर-स्नेह-लज्जा-भय-दाक्षिण्य-परानुवर्त्तना-प्रत्युपकारेच्छा-माया-विलम्बाऽनादर-विप्रियोक्ति-पश्चात्ताप-दीनाननादिदोषवर्ज्जमेकान्तात्मानुग्रहबुद्ध्या द्विचत्वारिंशद्भिक्षादोषाद्यदूषितं निःशेष-निजान्न-पान-वस्त्रादेर्भोजनाद्यनुक्रमेण स्वयं दानं दत्ते दापयति वा पार्श्वे स्थित्वा भार्यादिपार्श्वाद्। यतो **दिनकृत्ये –**

**''देसं[2] खित्तं तु जाणित्ता, अवत्थं पुरिसं तहा ।**
**विज्जु व्व रोगिअस्सेव, तओ किरिअं पउंजए'' ॥१॥ [ श्रा.दि./१७४ ]**

'देशं मगधाऽवन्त्यादि साधुविहारयोग्यायोग्यरूपम् १, क्षेत्रं संविग्नैर्भावितमभावितं वा, तुशब्दात् द्रव्यमिदं सुलभं दुर्लभं वा, अवस्थां सुभिक्ष-दुर्भिक्षादिकाम्, पुरुष-माचार्योपाध्याय-बाल-बृद्ध-ग्लान-सहाऽसहादिकं च ज्ञात्वा, 'विज्जु[3] व्व रोगिअस्स'त्ति, यथा किल भिषग् देशकालादि विचार्य व्याधिमतश्चिकित्सां करोत्येवं श्रावकोऽपि । ततः क्रियामाहारादिदानरूपां प्रयुङ्क्त' इति **तद्वृत्तिः [ श्राद्धदिनकृत्यवृत्तौ प० २९३ ]**।

तत्र च साधूनां यद्योग्यं तत् तत् सर्वं विहारयितुं प्रत्यहं नामग्राहं कथयति, अन्यथा प्राक्कृतनिमन्त्रणस्य वैफल्यापत्तेः, नामग्राहं कथने तु यदि साधवो न विहरन्ति, तथापि कथयितुः पुण्यं स्यादेव, अकथने तु विलोक्यमानमपि साधवो न विहरन्तीति हानिः । [4]एवं गुरून्प्रति-लम्भ्य(?भ्य) वन्दित्वा च गृहद्वारादि यावदनुव्रज्य च निवर्त्तते। साध्वभावे त्वनभ्रवृष्टिवत्साध्वा-गमनं जातु स्यात् तदा कृतार्थः स्यामिति दिगालोकं कुर्यात्। तथा चाहुः –

---

१. पाहे-इति श्राद्धदिनकृत्ये ॥ २. P.L. विज्जो व्व-मु० C. ॥ ३. विज्जो व-इति श्राद्धदिनकृत्यवृत्तौ प० २९३ ।. ४. तुला-श्राद्धदिनकृत्यवृत्ति प० २९२-३ ॥

**''जं साहूण न दिण्णं, कहिं पि तं सावया न भुंजंति ।**
**पत्ते भोअणसमए, बारस्सालोअणं कुज्जा''** ॥१॥ [ न.प्र./१२५ ]

दानक्रियायामुत्सर्गापवादौ त्वेवम् —

**''संथरणंमि असुद्धं, दुण्ह वि गिण्हंतदिंतयाणऽहिअं ।**
**आउरदिट्ठंतेणं, तं चेव हिअं असंथरणे** ॥१॥ [ श्रा.दि./१७५ ]

[1]संस्तरणे प्रासुकैषणीयाहारादिप्राप्तौ साधूनां निर्वाहे सति, अशुद्धं द्विचत्वारिंशद्दोष-दूषितमाहारादि, द्वयोरपि गृहीतृ-दात्रोः, अहितं संसारप्रवृद्धेरल्पायुष्कतायाश्च हेतुत्वाद-पथ्यं स्याद् । यद् **आगमः** —

**''जो जह व तह व लद्धं, गिण्हइ आहारमुवहिमाईअं ।**
**समणगुणमुक्कजोगी, संसारपवड्ढओ भणिओ''** ॥१॥ [ ओ.नि./४४७ ]

तथा दायकस्य —**''कहण्णं भंते ! जीवा अप्पाउत्ताए कम्मं पकरिंति ? गोअमा ! पाणे अइवाइत्ता भवइ, मुसं वइत्ता भवइ, तहारूवं समणं वा माहणं वा अफासुएणं अणेसणिज्जेणं असणपाणखाइमसाइमेण पडिलाभित्ता भवइ, एवं खलु जीवा अप्पाउअत्ताए कम्मं पकरेंति''** [ भगवतीसूत्रे २०३ ] त्ति ।

इत्थं चोत्सर्गत उभयोरपि दोषदुष्टमहितमेव, [2]अपवादतस्तु आउरेत्यादि, आतुरो रोगी, तस्य दृष्टान्तस्तेन, यथा हि रोगिणः कामप्यवस्थामाश्रित्य पथ्यमप्यपथ्यं स्यात्, [3]काञ्चित् पुनः समाश्रित्यापथ्यमपि पथ्यं स्याद्, एवमत्र 'तं चेव'त्ति तदेवाशुद्धमपि ग्रहीतृ-दात्रोर्हितमवस्थोचितत्वात् पथ्यं स्यात्, क्व ? इत्याह —असंस्तरणेऽनिर्वाहे, दुर्भिक्ष-ग्लानाद्यवस्थायामित्यर्थः । अयमभिप्रायो —यद्यप्येतत्कर्मबन्धहेतुर्वर्णितम् । तथापि —

**''सव्वत्थ संजमं, संजमाओ अप्पाणमेव रक्खिज्जा ।**
**मुच्चइ अइवायाओ, पुणो विसोही न याविरई''** ॥१॥ [ ओ.नि./४७ ]

इत्याद्यागमाभिज्ञैर्यथावसरं बहुतरगुणलाभकाङ्क्षया गृह्यमाणं दीयमानं च न दोषाय । तथा **चागमः** —

**''अप्पेण बहुमेसेज्जा, एअं पंडिअलक्खणं ।**
**सव्वासु पडिसेवासु , एअं अट्ठापयं विऊ** ॥१॥ [ ]

---

१. तुला-श्राद्धदिनकृत्यवृत्तिः प० २९४ ॥ २. तुला-श्राद्धदिनकृत्यवृत्तिः प० २९८ ॥ ३. किञ्चित्पुनः-इति श्राद्धदिनकृत्यवृत्तौ ॥

**''काहं अच्छित्तिं अदुवा अहिस्सं, तवोविहाणेसु अ उज्जमिस्सं ।**
**गणं व निईसु य सारइस्सं, सालंबसेवी समुवेइ मुक्खं ॥२॥** [ प्र.सा./७७९ ] इति ।

दायकस्य गुणो यथा –

**''समणोवासयस्स णं भंते ! तहारूवं समणं वा माहणं वा अफासुएणं अणेसणिज्जेणं असणपाणखाइमसाइमेणं पडिलाभेमाणस्स किं कज्जइ ? गोयमा ! बहुतरिया से णिज्जरा कज्जइ, अप्पतरए से पावकम्मे कज्जइ त्ति''** । [ भगवतीसूत्रे २६३ ]

तथा- ''[1]**पहसंतगिलाणेसुं , आगमगाहीसु तहय कयलोए ।**
**उत्तरपारणगम्मि अ, दिण्णं सुबहुप्फलं होइ** '' ॥१॥ [ श्रा.दि./२७३ ]

इदमत्रावधेयम् –सकलोऽप्ययं दानविधिः ऋद्धिमच्छ्रावकमाश्रित्य ज्ञेयः, यतः स हि स्वपरपक्षाद्यविशेषेण सर्वसाधुभ्योऽन्नपानवस्त्रपात्रादि सर्वं ददाति । दरिद्रश्रावकस्तु तथादानाशक्तौ दानश्रद्धालुगृहाणि साधुभ्यो दर्शयति, तुच्छो ह्यविशेषेण दातुमशक्तोऽतोऽसौ धर्मगुरूणां दुष्प्रतिकारतया विशेषपूजनीयत्वात् तेभ्यस्तत्परिवाराय वा ददाति, शेषसाधुभ्यो गृहाण्युपदर्शयतीतिभावः । अत एवोच्यत –

**''सड्ढेणं सइ विहवे, साहूणं वत्थमाइ दायव्वं ।**
**गुणवंताणऽविसेसो, दिसाइ तत्थ वि न जेसत्थि''** ॥१॥ [ ]

तुच्छेन दिशा देयम् , तत्रापि येषां साधूनां वस्त्रादि नास्ति तेभ्यो देयमित्यर्थः । तदुक्तं **प्रत्याख्यानपञ्चाशके** –

**''संतेअरलद्धिजुए, असइभावेसु होइ तुल्लेसुं ।**
**दाणं दिसाइभेए, तीएऽदिंतस्स आणाई''** ॥१॥ [ पञ्चा./५-४३ ]

[2]व्याख्या –इहाविशेषेण साधुभ्यो दानं दातव्यं श्रावकेण, अथ तुच्छद्रव्यत्वादविशेषेण दानाशक्तिः ते च सद्वस्त्रत्वादिभिर्धर्मैस्तुल्यास्तदा को विधिः ?, अत्रोच्यते, सन्ते त्ति सत् –विद्यमानं वस्त्रादि, इतरच्च –अविद्यमानं वस्त्राद्येव, तदसत्त्वेऽपि लब्धियुतश्च –वस्त्रादिलाभयोग्यतायुतः, इतरश्च –तद्विकल इति द्वन्द्वः, ते आदिर्येषां ते तथा, आदिशब्दात् सपक्षसत्त्वेन सम्भाव्यमानवस्त्रादिलाभतदितरादिग्रहः । एतानि च सदादिपदानि लुप्तभावप्रत्ययानि द्रष्टव्यानि । ततश्च ते भावाश्च –साधूनामवस्थाः सदितरलब्धियुतेतरादिभावास्तेषु तुल्येषु –समेषु सत्सु , किम् ? इत्याह –भवति –वर्त्तते तुच्छस्येति प्रक्रमः, दानं –वस्त्रादिवितरणम् ,

---

१. उद्धृतं श्राद्धदिनकृत्ये गा० २७२ ॥ २. L.P. । व्याख्या–मु० नास्ति ॥

दिगादिभेदे[1] दिगादिभिर्भेदे सति दिगाद्यपेक्षयेत्यर्थः तथाहि –द्वयोः साध्वोः सद्वस्त्रत्वे सति यो दिशाऽऽसन्नस्तस्मै देयम् , एवमसद्वस्त्रत्वे लब्धियुतत्वे तदितरत्वे चेति । अथ तुल्येऽपि भावे दिशमतिक्रम्य ददतः किं स्याद् ? इत्याह –तया दिशाऽददतः –अप्रयच्छत आज्ञा भङ्गानवस्थामिथ्यात्वलक्षणा दोषा भवन्तीति गाथार्थ **[ पञ्चाशकटीका प०१०६ ]**

आभवद्व्यवहारापेक्षया च दिग् गृहस्थस्य प्रविव्रजिषोरुत्प्रव्रजितस्य वाऽऽगमे दृश्यते, नान्यस्य, यत इयं **कल्पव्यवहारो**क्ता दिग्व्यवस्था –यः प्रव्रजितुकामः सामायिकादि-पाठप्रवृत्तः स त्रीणि वर्षाणि यावत् प्रतिबोधकाचार्यस्यैव सत्को भवति । यदाह –

**''सामाइआइए खलु , धम्मायरिअस्स तिण्णि जा वासा ।**
**नियमेण होइ सेहो, उज्जमओ तदुवरिं भयणा** ॥१॥ [ ]

यस्तु निह्नवादिर्भूत्वा पुनः प्रव्रजति, तस्य स्वेच्छया दिक्, अत्यक्तसम्यक्त्वस्तू-त्प्रव्रज्य यः प्रव्रजति स त्रीणि वर्षाणि यावत्पूर्वाचार्यस्यैव । आह च –

**''परलिंगिनिण्हए वा, सम्मद्दंसणजढे उ उवसंते ।**
**तद्दिवसमेव इच्छा, सम्मत्तजुए समा तिण्णि''** ॥१॥ [ प्रत्या./२७१ ]

उत्प्रव्रजितस्तु द्विधा –सारूपी गृहस्थश्च, तत्र सारूपी रजोहरणवर्जसाधुवेषधारी, स च यावज्जीवं पूर्वाचार्यस्य, तन्मुण्डीकृतानि च[2], यानि च तेन न मुण्डितानि केवलं बोधितान्येव, तानि यमाचार्यमिच्छन्ति तस्यासौ ददाति, तदीयानि च तानि भवन्ति ।

अपत्यानां चायं विधिः –तदपत्यानि पूर्वाचार्यस्यैव । आह च –

**''सारूवी जाजीवं, पुव्वायरिअस्स जे अ पव्वावे ।**
**अपव्वाविए सछंदो, इच्छाए जस्स सो देइ''** ॥१॥ [ गु.वि./२-२२८ ]

गृहस्थः पुनर्द्विविधो –मुण्डितः सशिखश्च, स च द्विविधोऽपि पूर्वाचार्यस्य, यानि च तेनोत्प्रव्रजनानन्तरं वर्षत्रयाभ्यन्तरे बोधयित्वा मुण्डीकृतानि तानि चेति । आह च –

**''जो पुण गिहत्थमुंडो, अहवाऽमुंडो उ तिण्ह वरिसाणं ।**
**आरेणं पव्वावे, सयं च पुव्वायरिअ सव्वो''** ॥१॥ **[ प्रत्या./२७६ ]**

इति कृतं प्रसक्तानुप्रसक्तेन । अत्र चोपयोगी साधुनिमन्त्रणभिक्षाग्रहणादिविशेषोऽतिथि-संविभागव्रताधिकार उक्त एव । इदं च सुपात्रदानं दिव्यौदारिकाद्यभीष्टसुखसमृद्धि-साम्राज्यादिसंयोगप्रतिपूर्वकविर्निलम्बनिर्वाणपदप्राप्तिफलं । यतः –

---

१. P. पञ्चाशकटीका । [दिगादिभेदे]-मु० C. प्रतौ पार्श्वभागे ॥ २. च-L.P. नास्ति ॥

''अभयं सुपत्तदाणं, अणुकंपाउचिअकीत्तिदाणं च ।
दोहि वि मुक्खो भणिओ, तिण्णि वि भोगाइअं दिंति'' ॥१॥ [ र.सं./१७७ ]

पात्रता त्वेवमुक्ता –

''उत्तमपत्तं साहू , मज्झिमपत्तं च सावया भणिआ ।
अविरयसम्मद्दिट्ठी, जहन्नपत्तं मुणेअव्वं ॥१॥ [ गाथा./१४४ ]

तथा च– ''मिथ्यादृष्टिसहस्त्रेषु , वरमेको ह्यणुव्रती ।
अणुव्रतिसहस्त्रेषु , वरमेको महाव्रती ॥१॥ [ ]
महाव्रतिसहस्त्रेषु , वरमेको हि तात्त्विकः ।
तात्त्विकस्य समं पात्रं, न भूतं न भविष्यति'' ॥२॥ [ ]

एवं साध्वादिसंयोगेऽवश्यं सुपात्रे दानं विवेकिना विधेयम् , तथा यथाशक्ति तदवसराद्यायातसाधर्मिकानपि सह भोजयति, तेषामपि सुपात्रत्वात् । वात्सल्यमपि महते फलाय । यतो **दिनकृत्ये** –

''साहम्मिआण वच्छल्लं, कायव्वं भत्तिनिब्भरं ।
देसिअं सव्वदंसीहिं, सासणस्स पभावणं'' ॥१॥ [ श्रा.दि./२०० ]

तद्विधिस्तु वार्षिककृत्याधिकारे वक्ष्यते । तथा ददात्यौचित्येनान्येभ्योऽपि द्रमकादिभ्यः, न प्रत्यावर्त्तयति तान्निराशान् , न कारयति कर्मबन्धम् , न भवति निष्ठुरहृदयः, भोजनावसरे हि द्वारपिधानादि न महतां दयावतां वा लक्षणम् । यतः –

''नेव दारं पिहावेइ, भुंजमाणो सुसावओ ।
अणुकंपा जिणिंदेहिं, सड्ढाणं न निवारिआ ॥१॥ [ श्रा.दि./२२१ ]
दट्ठुण पाणिनिवहं, भीमे भवसायरंमि दुक्खत्तं ।
अविसेसओऽणुकंपं, दुहा वि सामत्थओ कुणइ'' ॥२॥ [ द.प्र./२५८ ]

दुहा वि त्ति द्रव्यभावाभ्यां द्विधा, द्रव्यतो यथार्हमन्नादिदानेन, भावतस्तु धर्ममार्गप्रवर्त्तनेन । **श्रीपञ्चमाङ्गादावपि श्राद्धवर्णनाधिकारे** –''**अवंगुयदुवारा**'' [ भ.सू. ] इत्युक्तम् , श्रीजिनेनापि सांवत्सरिकदानेन दीनोद्धार कृत एव न तु केनापि प्रतिषिद्धः –

''सव्वेहिं पि जिणेहिं, दुज्जयजिअरागदोसमोहेहिं ।
अणुकंपादाणं सड्ढयाण न [१] कहिं पि पडिसिद्धं'' ॥१॥ [ गाथा./१९० ]

---

१. कहिं पि–मु० । कहिंचि–L.P.C. श्राद्धदिनकृत्ये ।

न कहिं[१] पि त्ति न कस्मिन् सूत्रे प्रतिषिद्धं, प्रत्युत देशनाद्वारेण **राजप्रश्नीयोपाङ्गे केशिनो**पदेशितम् । तथाहि –

"**मा णं तुमं पएसी ! पुव्विं रमणिज्जे भवित्ता पच्छा अरमणिज्जे भविज्जासि**" इत्यादि ।

तथा मातृ-पितृ-भ्रातृ-भगिन्यादीनामपत्य-स्नुषादीनां ग्लान-वृद्धगवादीनां च भोजनाद्युचितचिन्तां कृत्वा पञ्चपरमेष्ठिप्रत्याख्याननियमस्मरणपूर्वं सात्म्याविरोधेन भुञ्जीत। यतः –

"**पितुर्मातुः शिशूनां च, गर्भिणीवृद्धरोगिणाम् ।**
**प्रथमं भोजनं दत्त्वा, स्वयं भोक्तव्यमुत्तमैः ॥१॥ [ ]**
**चतुष्पदानां सर्वेषां, धृतानां च तथा नृणाम् ।**
**चिन्तां विधाय धर्मज्ञः, स्वयं भुञ्जीत नान्यथा ॥२॥ [ ]**

सात्म्यलक्षणं च पञ्चत्रिंशद्गुणेषूक्तमेव । इत्थं च लौल्यपरिहारेणाभक्ष्यानन्तकायादिबहुसावद्यवस्तुवर्जं यथाग्निबलं भुञ्जीत । **नीतिशास्त्रे** त्वेवमुक्तम् –

"**अधौतमुखहस्ताङ्घ्रिर्नग्नश्च मलिनांशुकः ।**
**सव्येन हस्तेनानात्तस्थालो भुञ्जीत न क्वचित् ॥१॥**
**एकवस्त्रान्वितश्चार्द्रवासावेष्टितमस्तकः ।**
**अपवित्रोऽतिगर्ह्यश्च, न भुञ्जीत विचक्षणः ॥२॥**
**उपानत्सहितो व्यग्रचित्तः केवलभूस्थितः ।**
**पर्यङ्कस्थो विदिग्याम्याननो नाद्यात् कृशाननः ॥३॥**
**आसनस्थपदो नाद्यात् , श्वचण्डालैर्निरीक्षितः ।**
**पतितैश्च तथा भिन्ने, भाजने मलिनेऽपि च ॥४॥**
**अमेध्यसम्भवं नाद्याद् दृष्टं भ्रूणादिघातकैः ।**
**रजस्वलापरिस्पृष्टमाघ्रातं गोश्वपक्षिभिः ॥५॥**
**अज्ञातागममज्ञातं, पुनरुष्णीकृतं तथा ।**
**युक्तं चबचबाशब्दैर्नाद्याद् वक्त्रविकारवान् ॥६॥**
**आह्वानोत्पादितप्रीतिः, कृतदेवाभिधास्मृतिः ।**
**समे पृथावनत्युच्चैर्निविष्टो विष्टरे स्थिरे ॥७॥**

---

१. 'कहिंचि पडिसिद्धंति न कस्मिंश्चिदङ्गोपाङ्गादिसूत्रे प्रतिषिद्धम्' । इति श्राद्धदिनकृत्यवृत्तौ प० ४१९॥

**मातृष्वस्त्रम्बिकाजामिभार्याद्यैः पक्तमादरात् ।**
**शुचिभिर्युक्तिमद्भिश्च, दत्तं चाद्याज्जनेऽसति ॥८॥**
**कृतमौनमवक्राङ्गं, वहद्दक्षिणनासिकम् ।**
**प्रतिभक्ष्यं समाघ्राणहृतदृग्दोषविक्रियम् ॥९॥**
**नातिक्षारं न चात्यम्लं, नात्युष्णं नातिशीतलम् ।**
**नातिगौल्यं नातिशाकं, मुखरोचकमुच्चकैः'' ॥१०॥**

तथा- ''**अङ्गमर्दननीहारभारोत्क्षेपोपवेशनम् ।**
**स्नानाद्यं च कियत्कालं, भुक्त्वा कुर्यान्न बुद्धिमान् ॥११॥**
**भुक्त्वोपविशतस्तुन्दं, बलमुत्तानशायिनः ।**
**आयुर्वामकटिस्थस्य, मृत्युर्धावति धावतः ॥१२॥**
**भोजनानन्तरं वामकटिस्थो घटिकाद्वयं ।**
**शयीत निद्रया हीनं, यद्वा पदशतं व्रजेत् ॥१३॥** [ ] इति ।

अथोत्तरार्द्धव्याख्या '**संवरणेति**[1]**( त्यादि' )** भोजनानन्तरं **संवरणं** —प्रत्याख्यानं दिवसचरमं ग्रन्थिसहितादि वा, तस्य **कृतिः** —करणम् , सति सम्भवे देव-गुरुवन्दनपूर्व-मित्यनुक्तमप्यवसेयम् । यतो **दिनकृत्ये** —

''**देवं गुरुं च वन्दित्ता, काउ संवरणं तदा**'' [ श्रा.दि./२२५ ] इति ।

तथा 'ततः' प्रत्याख्यानकरणानन्तरं, **शास्त्रार्थानां** —शास्त्रप्रतिपादितभावनां **चिन्तनं** — स्मरणं विचारणं वा इदमित्थं भवति न वेति संप्रधारणमितियावत् । कथम् ? '**सार्द्धं**' सह, कैः ? '**तज्ज्ञैः**', तं शास्त्रार्थं जानन्तीति तज्ज्ञास्तैर्गीतार्थयतिभिः प्रवचनकुशलश्राद्धपुत्रैर्वेत्यर्थः गुरुमुखाच्छ्रुतान्यपि शास्त्रार्थरहस्यानि परिशीलनाविकलानि न चेतसि सुदृढप्रतिष्ठानि भवन्तीतिकृत्वा ॥६४॥

सम्प्रति सन्ध्याविषयं यत्कर्त्तव्यं तदाह —

**सायं पुनर्जिनाभ्यर्चा, प्रतिक्रमणकारिता ।**
**गुरोर्विश्रामणा चैव, स्वाध्यायकरणं तथा ॥६५॥**

'**सायं**' सन्ध्यासमयेऽन्तर्मुहूर्त्तादर्वाक्, पुनस्तृतीयवारमित्यर्थः । '**जिनाभ्यर्चा**' देवपूजनम् , विशेषतो गृहिधर्म इति[2] सण्टङ्कः । एवमग्रेऽपि । अत्र चायं विशेष — उत्सर्गतः श्रावकेणैकवारभोजिनैव भाव्यम् । यदभाणि **दिनकृत्ये** —

---

१. संवरणेत्यादि-L.P. ॥ २. भवतीति-L. ॥

**''उस्सग्गेणं तु सड्ढो उ, सचित्ताहारवज्जओ ।**
**इक्कासणगभोई अ, बंभयारी तहेव य ॥१॥ [ श्रा.दि./२२६ ]**

यश्चैकभक्तं कर्त्तुं न शक्नोति, स दिवसस्याष्टमे भागेऽन्तर्मुहूर्त्तद्वयलक्षणे, यामिनी-मुखादौ तु रजनीभोजनमहादोषप्रसङ्गादन्तर्मुहूर्त्तादर्वागेव वैकालिकं करोति । यतो **दिनकृत्य** एव —

**''अह न सक्केइ काउं जो, एगभत्तं जओ गिही ।**
**दिवसस्सट्ठमे भागे, तओ भुंजे सुसावओ'' ॥१॥ [ श्रा.दि./२२७ ]**

वैकालिकानन्तरं च यथाशक्ति दिवसचरमं सूर्योद्गमान्तं मुख्यवृत्त्या दिवसे सति द्वितीयपदे रात्रावपि करोति, कृत्वा च सन्ध्यायां अर्द्धबिम्बदर्शनादर्वाग् पुनरपि यथाविधि जिनं पूजयति [1]सा च दीपधूपरूपाऽवसेयेति भावः । तथा **प्रतिक्रमणस्य** —सामायिकं १ चतुर्विंशतिस्तवो २ वन्दनकं ३ प्रतिक्रमणं ४ कायोत्सर्गः ५ प्रत्याख्यानं ६ चेति षड्विधाव-श्यकक्रियालक्षणस्य **कारिता** —करणं, [2]विशेषतो गृहिधर्म इति सम्बन्धः । अयं भावः — सन्ध्यायां जिनपूजनानन्तरं श्रावकः साधुपार्श्वे पोषधशालादौ वा गत्वा प्रतिक्रमणं करोति, प्रतिक्रमणशब्दश्चावश्यकविशेषवाच्यपि अत्र सामान्येन सामायिकादिषड्विधावश्यक-क्रियायां रूढः, अध्ययनविशेषवाचिनोऽपि प्रतिक्रमणशब्दस्य नोआगमतो भावनिक्षेपमपेक्ष्य षडावश्यकरूपज्ञानक्रियासमुदायप्रवृत्तेरविरोधात् , क्रियारूप एकदेशे आगमस्याभावान्नो-आगमत्वं, नोशब्दस्य देशनिषेधार्थत्वात् , उक्तं च —**''किरिआऽऽगमो ण होइ, तस्स णिसेधंमि नोसद्दो त्ति** [ ] तत्र सामायिकम् —आर्त्तरौद्रध्यानपरिहारेण धर्मध्यानकरणेन शत्रुमित्रकाञ्चनादिषु समता, तच्च पूर्वमुक्तं । चतुर्विंशतिस्तवः —चतुर्विंशतेस्तीर्थकराणां नामोत्कीर्त्तनपूर्वकं गुणकीर्त्तनं, तस्य च कायोत्सर्गे मनसाऽनुध्यानं शेषकालं व्यक्तवर्णपाठः, अयमपि पूर्वमुक्तः । वन्दनं —वन्दनायोग्यानां धर्माचार्याणां पञ्चविंशत्यावश्यकविशुद्धं द्वात्रिंशद्दोष-रहितं नमस्करणं, तदप्युक्तमेव ।

[3]प्रतिक्रमणं —प्रतीत्युपसर्गः प्रतीपे प्रातिकूल्ये वा, **''क्रमू पादविक्षेपे''** **[ धा० पा० ३८५ ]** अस्य प्रतिपूर्वस्य भावे ल्युडन्तस्य प्रतीपं क्रमणं, अयमर्थः —शुभयोगेभ्योऽशुभ-योगान्तरं क्रान्तस्य शुभेष्वेव क्रमणात् प्रतीपं क्रमणं प्रतिक्रमणम् । यदाह —

---

१. पूजा च–L.P. संशो० ॥ * * चिह्नद्वयमध्यवर्तिपाठः मु० मध्ये कोष्ठके [ ] L.C. प्रतौ पार्श्वभागे ॥ २. विशेषतो गृहिधर्म इति सम्बन्धः–L.P. नास्ति ॥ ३. तुला–आवश्यकचूर्णिः प० ५२, आवश्यकहारिभद्रीय वृत्तिः प० ५५१, योगशास्त्रटीका प० ६८८, प्रवचनसारोद्धारवृत्तिः भा० १ प० १०३ ॥

**"स्वस्थानाद् यत्[1]परस्थानं, प्रमादस्य वशाद् गतः ।**
**तत्रैव क्रमणं भूयः, प्रतिक्रमणमुच्यते"** ॥१॥ [ ]

प्रतिकूलं वा गमनं प्रतिक्रमणं । यदाह —

**"क्षायोपशमिकाद् भावादौदयिकवशं गतः ।**
**तत्रापि च स एवार्थः, प्रतिकूल[2]गमात् स्मृतः** ॥१॥ [ ]

प्रति प्रति क्रमणं वा प्रतिक्रमणम् । उक्तं च —

**"प्रति प्रति वर्त्तनं वा, शुभेषु योगेषु मोक्षफलदेषु ।**
**निःशल्यस्य यतेर्यत्तद्वा ज्ञेयं प्रतिक्रमणम्"** ॥१॥ [ ]

तच्चातीतानागतवर्त्तमानकालत्रयविषयम्, नन्वतीतविषयमेव प्रतिक्रमणं । यत उक्तं — **"अईअं पडिक्कमामि, पडुप्पन्नं संवरेमि, अणागयं पच्चक्खामि"** [**पक्खीसूत्रे**] इति तत्कथं त्रिकालविषयता ?, उच्यते —अत्र प्रतिक्रमणशब्दोऽशुभयोगनिवृत्तिमात्रार्थः —

**"मिच्छत्तपडिक्कमणं, तहेव अस्संजमे पडिक्कमणं ।**
**कसायाण पडिक्कमणं, जोगाण य अप्पसत्थाणं** ॥१॥ [आ.नि./१२६४]

ततश्च निन्दाद्वारेणाशुभयोगनिवृत्तिरूपमतीतविषयं प्रतिक्रमणम्, प्रत्युत्पन्नविषयमपि संवरद्वारेण, अनागतविषयमपि प्रत्याख्यानद्वारेणेति न कश्चिद्दोषः । इत्थं त्रिकालविषयं प्रतीपक्रमणादि प्रतिक्रमणमिति सिद्धम् । एतच्च व्युत्पत्तिमात्रम्, रूढिश्च क्वचिदावश्यक-विशेषे, क्वचिच्च षडावश्यकक्रियायामित्युक्तमेव । इत्थमेव च वक्ष्यमाणः प्रतिक्रमण-विधिर्घटते ।

[3]तच्च प्रतिक्रमणं दैवसिक १ रात्रिक २ पाक्षिक ३ चातुर्मासिक ४ सांवत्सरिक ५ भेदात् पञ्चविधम्, तत्र [4]दिवसस्यान्ते दैवसिकमेतस्य कालस्तूत्सर्गेणैवमुक्तः —

**"अद्धनिबुड्डे बिंबे, सुत्तं कड्ढंति गीअत्था ।**
**इअ वयणपमाणेणं, देवसिआवस्सए कालो"** ॥१॥ [य.दि./३२४]

रात्रेरन्ते रात्रिकं । तस्य चैवं कालः —

**"आवस्सयस्स समए, निद्दामुद्दं चयंति आयरिआ ।**
**तह तं कुणंति जह दसपडिलेहाणंतरं सूरो"** ॥१॥

अपवादतस्तु दैवसिकं दिवसतृतीयप्रहारादन्वर्द्धरात्रं यावत् । **योगशास्त्रवृत्तौ** तु —

---

१. °परं–आवश्यकचूर्णौ प्रवचनसारोद्धारे च ॥ २. P. संशो० योगशास्त्रटीका । गमाः स्मृताः (त्स्मृतः)– मु० P. मू० C. ॥ ३. तुला–श्राद्धविधिवृत्तिः प० १४५ ॥ ४. तुला–योगशास्त्रटीका प० २०८ ॥

मध्याह्नादारभ्यार्द्धरात्रं यावद् इत्युक्तं । रात्रिकमर्द्धरात्रादारभ्य मध्याह्नं यावत्। उक्तमपि —

**''उग्घाडपोरिसिं जा, राइअमावस्सयस्स चूलाए ।**
**ववहाराभिप्याया, तेण परं जाव पुरिमड्ढं''** ॥१॥ [ पा.स./९ ]

पाक्षिकादित्रयं तु पक्षाद्यन्ते भवति, तत्रापि पाक्षिकं च चतुर्दश्यामेव, यदि पुनः पञ्चदश्यां स्यात् तदा चतुर्दश्यां पाक्षिके चोपवासस्योक्तत्वात् पाक्षिकमपि षष्ठेन स्यात् , तथा च ''**अट्ठमछट्ठचउत्थं, संवच्छरचाउमासपक्खीसुं**''[ ] इत्याद्यागमविरोधः। तथा यत्र चतुर्दशी गृहीता तत्र न पाक्षिकं, यत्र च पाक्षिकं न तत्र चतुर्दशी। तथाहि —''**अट्ठमीचउद्दसीसु उववासकरणम्**''इति **पाक्षिकचूर्णौ**। [तथा''**सागरचंदो कमलामेला वि सामिपासे धम्मं सोऊण गहिआणुव्वयाणि सावगाणि संवुत्ताणि, तओ सागरचंदो अट्ठमिचउद्दसीसुं सुण्णघरेसु मसाणेसु एगराइअं पडिमं ठाइ**''[ ]इति।''**सो अट्ठमिचउद्दसीसु उववासं करेइ**''[ ] इति।''**अट्ठमिचउद्दसीसु अरहंता साहुणो अ वंदेअव्वा**'' इति **चावश्यकचूर्णौ** ।

[१]तथा—''**संते बलवीरिअपुरिसक्कापरक्कमे अट्ठमिचउद्दसीणाणपंचमीपज्जोसवणाचाउम्मासिए चउत्थछट्ठट्ठमे न करिज्जा पच्छित्तं**'' इति **महानिशीथ प्रथमाध्ययने**। इति पाक्षिककृत्योपलक्षितचतुर्दशीशब्दप्रतिपादकाक्षराणि] तथा —

''**चउत्थछट्ठट्ठमकरणे अट्ठमिपक्खचउमासवरिसेसु**'' [२]इति **व्यवहारभाष्यषष्ठोद्देशके** च। ''**पक्खस्स अट्ठमी खलु , मासस्स या पक्खियं मुणेअव्वं**''[ ] इत्यादिव्याख्यायां वृत्तौ चूर्णौ च पाक्षिकशब्देन चतुर्दश्येव व्याख्या[३]ता, ततश्चतुर्दशीपाक्षिकयोरैक्यमिति निश्चीयते, अन्यथा तु क्वचिदुभयोपादानमपि स्यादेव। चातुर्मासिक-सांवत्सरिके तु पूर्वं पूर्णिमा-पञ्चम्योः क्रियमाणे अपि **श्रीकालिकाचार्या**चरणातश्चतुर्दशी-चतुर्थ्योः क्रियेते, प्रामाणिकं चैतत् , सर्वसंमतत्वाद्। उक्तं च **कल्पभाष्ये** —

**''असढेण समाइण्णं, जं कत्थइ केणई असावज्जं ।**
**न निवारिअमन्नेहिं, बहुजणमयमेअमायरिअं''** ॥१॥[ बृ.क./४४९९ ] इति।

तथा ध्रुवाध्रुवभेदाद् द्विधा प्रतिक्रमणम् , तत्र ध्रुवं भरतैरवतेषु प्रथमचरमतीर्थकरतीर्थेषु ,

---

१. अथ-P. संशो० ॥ २. पच्छित्तं-इति-P. ॥ ३. इतो अग्रे- ''तथा अट्ठमछट्ठे चउत्थं संवच्छरी-चाउमासि-पक्खेअ पोसहि तवे भणिए बितिअं असहू गिलाए अ इत्यादि पाक्षिकशब्द-प्रतिपादकाक्षराणि'' इति L.P. प्रत्योरधिकः पाठः ॥

अपराधो भवतु मा वा, परमुभयकालं प्रतिक्रमणं कर्त्तव्यम् , अध्रुवं मध्यमतीर्थकरतीर्थेषु विदेहेषु च कारणे जाते प्रतिक्रमणम् । यदाह –

''**सपडिक्कमणो धम्मो, पुरिमस्स य पच्छिमस्स य जिणस्स ।**
**मज्झिमगाण जिणाणं, कारणजाए पडिक्कमणं**'' ॥१॥ [ कल्पपंचा./३२ ]

प्रतिक्रमणविधिश्चैवं **प्रतिक्रमणहेतुगर्भा**दौ उक्तः –

''**साधुना श्रावकेणापि अनुयोगद्वारगत 'तदप्पिअकरणे' इति पदस्य करणानि – तत्साधकतमानि देहरजोहरणमुखवस्त्रिकादीनि तस्मिन्नेव-आवश्यके यथोचितव्यापार-नियोगेनार्पितानि-नियुक्तानि येन स तदर्पितकरणः, सम्यक् यथावस्थानन्यस्तोपकरण इत्यर्थः**'' [ ] इति **वृत्तिः ।**

तथा–''**जो मुहपोत्तियं अपडिलेहित्ता वंदणं देइ, तो गरुअं तस्स पायच्छित्तं**'' [ ] इति **व्यवहारसूत्रम् ।**

''**पोसहसालाए ठवित्तु ठवणायरियं मुहपत्तिअं पमज्ज तो सीहो गिण्हइ पोसहं**'' [ ] इति **व्यवहारचूलिका ।**

''**पावरणं मोत्तूणं, गिण्हित्ता मुहपोत्तिअं ।**
**वत्थकायविसुद्धीए, करेइ पोसहाइअं**'' ॥२॥ [ ]

इति च **व्यवहारचूर्णि**रित्येवमादिग्रन्थप्रामाण्यात् मुखवस्त्रिकारजोहरणादियुक्तेन द्विसन्ध्यं विधिना प्रमार्जितादौ स्थाने जातु तदभावेऽपि ससाक्षिकं कृतमनुष्ठानमत्यन्तं दृढं जायत इति गुरुसाक्षिकं तदभावे च नमस्कारपूर्वं स्थापनाचार्यं स्थापयित्वा पञ्चाचारविशुद्ध्यर्थं प्रतिक्रमणं विधेयम् ।

अत्राह कश्चित् – ननु

''**गुरुविरहंमि उ ठवणा, गुरूवएसोवदंसणत्थं च ।**
**जिणविरहंमि व जिणबिंबसेवणामंतणं सहलं**'' ॥१॥ [ वि.भा./३४६५ ] इत्यादि

**विशेषावश्यक**वचनप्रमाणात् यतिसामायिकप्रस्तावे भदन्तशब्दं व्याख्यानयता **भाष्यकृता** साधुमाश्रित्य स्थापनाचार्यस्थापनमुक्तं न श्रावकमाश्रित्येति कुतस्तेषां स्थापनाधिकार इति चेत् , न, भदन्तशब्दं भणतां तेषां स्थापनाचार्यस्थापनं युक्तमेव, अन्यथा भदन्तशब्दपठनं व्यर्थमेव स्यात् , अथ च स्थापनाचार्यस्थापनमन्तरेणापि वन्दनाद्यनुष्ठानं विधीयते, तदा **वन्दनकनिर्युक्तौ –''आयप्पमाणमित्तो, चउद्दिसि होइ उग्गहो गुरुणो**'' [ ] इत्यक्षरैर्गुरोवग्रहप्रमाणमुक्तं तत् कथं घटते ?, न हि गुर्वभावे

गुरुगतावग्रहप्रमाणं घटमानं स्याद्, **ग्रामाभावे तत्सीमाव्यवस्थावत्**, तथा तत्रैव यदपरमुक्तं –"**चउसिरं तिगुत्तं च, दुपवेसं एगनिक्खमणं**" [ गुरुवन्दनभा० १९ ] इत्यादि, तदपि न युक्तं भवेद्, यतश्चतुःशीर्षत्वं वन्दनकदातृ-तत्प्रतीच्छकसद्भावे सति भवति, न तु साक्षाद् गुर्वभावे स्थापनाचार्यस्यानभ्युपगमे च, एवं द्विप्रवेशैकनिष्क्रमणे अपि दूरापास्ते एव, अवधिभूतगुरोः स्थापनाचार्यस्य वाऽभावात्, न च हृदयमध्य एव गुरुरस्तीति वाच्यम्, तथा सति प्रवेशनिर्गमयोरविषयत्वादिति । तस्मात्

"**अक्खे वराडए वा, कट्ठे पुत्थे अ चित्तकम्मे अ ।**
**सब्भावमसब्भावं, गुरुठवणा इतरावकहं**" ॥१॥ [ गु.भा./२९ ]

इतिवचनप्रमाणाच्च [1] साधूनां श्रावकाणां स्थापनाचार्यस्थापनं समानमेवेति व्यवस्थितम् ।

पञ्चाचाराश्च ज्ञान-दर्शन-चारित्र-तपो-वीर्याचारा इति । तत्र सामायिकेन चारित्राचारस्य शुद्धिः क्रियते १, चतुर्विंशतिस्तवेन दर्शनाचारस्य २, वन्दनकेन ज्ञानाद्याचाराणां ३, प्रतिक्रमणेन तेषामतिचारापनयनरूपा ४, प्रतिक्रमणेनाशुद्धानां तदतिचाराणां कायोत्सर्गेण ५, तपआचारस्य प्रत्याख्यानेन ६, वीर्याचारस्यैभिः सर्वैरपीति । यत**श्चतुःशरणप्रकीर्णके** –

"**चारित्तस्स विसोही, कीरइ सामाइएण [2] किर इहयं**" [ च.प्र./७२ ] इत्यादिगाथाः प्रसिद्धाः ।

तत्र चावश्यकारम्भे चैत्यवन्दनाधिकारोक्तागमवचनप्रामाण्यात्

"**जइ गमणागमणाई, आलोइअ निंदिऊण गरहित्ता ।**
**हा दुट्ठुऽम्हेहि कयं, मिच्छादुक्कडमिअ भणित्ता** ॥१॥ [ ]
**तह काउस्सग्गेणं, तयणुरूवपच्छित्तमणुचरित्ता णं ।**
**जं आयहिअं चिइवंदणाइ णुट्ठिज्ज उवउत्तो** ॥२॥ [ ]
**दव्वच्चणे पवित्तिं, करेइ जह काउ बज्झतणुसुद्धिं ।**
**भावच्चणं तु कुज्जा, तह इरिआए विमलचित्तो**" ॥३॥ [ ]

इत्यादियुक्तेश्च पूर्वमीर्यापथिकीं प्रतिक्रामति । प्रतिक्रामता च तां मनसोपयोगं दत्त्वा त्रीन् वारान् पदन्यासभूमिः प्रमार्जनीया, एवं च तां प्रतिक्रम्य साधुः कृतसामायिकश्च श्रावक आदौ श्रीदेवगुरुवन्दनं विधत्ते, सर्वमप्यनुष्ठानं श्रीदेवगुरुवन्दनविनयबहुमानादि-भक्तिपूर्वकं सफलं भवतीति । आह च –

---

१. P. संशो० L. । साधुश्रावकाणां-मु० P. मूल । २. L.P. । इह किरयं (किल इहयं) मु० ॥

D:\new/d-2.pm5\3rd proof

**''विणयाहीआ विज्जा, दिंति फलं इह परे अ लोगंमि ।**
**न फलंति विणयहीणा, सस्साणि व तोअहीणाणि ॥१॥** [ प्र.ग./१० ]
**भत्तीइ जिणवराणं, खिज्जंति पुव्वसंचिआ कम्मा ।**
**आयरिअनमुक्कारेण, विज्जा मंता य सिज्झंति'' ॥२॥** [ प्र.ग./११ ] इतिहेतोः ।

**''पढमहिगारे वंदे, भावजिणे १ बीअए उ दव्वजिणे २ ।**
**इगचेइअठवणजिणे, तइअ ३ चउत्थंमि नामजिणे ३ ॥१॥** [ चै.वं.भा./४३ ]
**तिहुअणठवणजिणे पुण, पंचमए ५ विहरमाणजिण छट्ठे ६ ।**
**सत्तमए सुअनाणं ७, अट्ठमए सव्वसिद्धथुई ८ ॥२॥** [ चै.वं.भा./४४ ]
**तित्थाहिववीरथुई, नवमे ९ दसमे अ उज्जयंतथुई १० ।**
**अट्ठावयाइ इगदसि ११, सुदिट्ठिसुरसमरणा चरिमे १२ ॥३॥** [ चै.वं.भा./४५ ]
**नमु १ जे अ अईअ २ अरिहं ३ लोग ४ सव्व ५ पुक्ख ६ तम ७ सिद्ध ८ जो देवा ९ ।**
**उज्जि १० चत्ता ११ वेयावच्च १२ अहिगारपढमपया ॥४॥** [ चै.वं.भा./४२ ]

इति **चैत्यवन्दनभाष्य**गाथोक्तैर्द्वादशभिरधिकारैः पूर्वोक्तविधिना देवान् वन्दित्वा चतुरादिक्षमाश्रमणैः श्रीगुरून् वन्दते । लोकेऽपि हि राज्ञः प्रधानादीनां च बहुमानादिना स्वसमीहितकार्यसिद्धिर्भवति । अत्र राजस्थानीयाः श्रीतीर्थकराः, प्रधानादिस्थानीया आचार्यादय इति । श्राद्धस्तु तदनु 'समस्तश्रावको वांदुं' इति भणति । ततः चारित्राचारादिशुद्धिं विधित्सुस्तत्सिद्धिमभिलषमाणश्चारित्राचाराद्याराधकान् सम्यक् प्रणिपत्यातिचारभारभारित इवावनतकाययष्टिर्भूनिहितशिराः सकलातिचारबीजं ''**सव्वस्स वि देवसिअ**'' इत्यादिसूत्रं भणित्वा मिथ्यादुष्कृतं दत्ते । इदं च सकलप्रतिक्रमणबीजभूतं ज्ञेयम्, अन्यत्रापि च ग्रन्थादौ आदौ बीजस्य दर्शनात् । तत उत्थाय ज्ञानादिषु चारित्रं गरिष्ठम्, तस्य मुक्तेरनन्तरकारणत्वात्, ज्ञानादेस्तु परम्पराकारणत्वात्, तथाहि – सर्वात्मना चारित्रं हि शैलेष्यवस्थायामेव, तदनन्तरं चावश्यं मुक्तिः, ज्ञानं तु सर्वात्मना क्षीणमोहानन्तरम्, न च तदनन्तरमवश्यं मुक्तिः, जघन्यतोऽप्यन्तराले प्रत्येकमान्तर्मुहूर्तिकगुणस्थानकद्वयभावात् । तथा –

**''जम्हा दंसणनाणा, संपुण्णफलं न दिंति पत्तेयं ।**
**चारित्तजुया दिंति अ, विसिस्सए तेण चारित्तं'' ॥१॥** [ आ.नि./११७९ ]

तथा– **''सम्मत्तं अचरित्तस्स, हुज्ज भयणाइ निअमसो णत्थि ।**
**जो पुण चरित्तजुत्तो, तस्स उ निअमेण संमत्तं'' ॥२॥** [ आ.नि./११७४ ]

तथा- "**गोत्रवृद्धैर्नरो नैव, सद्गुणोऽपि प्रणम्यते ।**
**अलङ्कृतनृपश्रीस्तु , वन्द्यते नतमौलिभिः** ॥१॥ [ ]
**एवं न केवलज्ञानी, गृहस्थो नम्यते जनैः ।**
**गृहीतचारुचारित्रः, शक्रैरपि स पूज्यते** ॥२॥ [ ]
**अतो दिशन्ति चारित्रं, केवलज्ञानतोऽधिकम् ।**
**तस्मिन् लब्धेऽपि तल्लब्धुं , तेन धावन्ति धीधनाः**" ॥३॥ [ ]

इति हेतोरादौ चारित्राचारविशुद्ध्यर्थं 'करेमि भंते सामाइअं' इत्यादिसूत्रत्रयं पठित्वा द्रव्यतो वपुषा भावतश्च शुद्धपरिणामेनोच्छ्रितोच्छ्रितं वक्ष्यमाणलक्षणं कायोत्सर्गं कुर्यात् , कायोत्सर्गे च साधुः प्रातस्त्यप्रतिलेखनायाः प्रभृति दिवसातिचारांश्चिन्तयति । यतः —

"**पाभाइअपडिक्कमणाणंतरमुहपुत्तिपमुहकज्जेसु ।**
**जाव इमो उस्सग्गो, अइआरे ताव चिंतेज्जा**" ॥१॥ [ य.दि./३३० ] इति ।

मनसा संप्रधारयेच्च **सयणासणे**त्यादिगाथाचिन्तनतः, श्राद्धस्तु 'नाणंमि दंसणं-मीत्यादिगाथाष्टकचिन्तनतः । ताश्चेमाः —

"[१]**नाणंमि दंसणंमि य, चरणंमि तवंमि तहय विरियंमि ।**
**आयरणं आयारो, इय एसो पंचहा भणिओ** ॥१॥ [ द.वै.नि./१८१ ]
**काले विणए बहुमाणे, उवहाणे तह अनिण्हवणे ।**
**वंजणअत्थतदुभए, अट्ठविहो नाणमायारो** ॥२॥ [ द.वै.नि./१८४ ]
**निस्संकिय निक्कंखिय, निव्वितिगिच्छा अमूढदिट्ठी य ।**
**उववूह थिरीकरणे, वच्छल्ल पभावणे अट्ठ** ॥३॥ [ द.वै.नि./१८२ ]
**पणिहाणजोगजुत्तो, पंचहिँ समिईहिँ तीहिँ गुत्तीहिं ।**
**एस चरित्तायारो, अट्ठविहो होइ नायव्वो** ॥४॥ [ द.वै.नि./१८५ ]
**बारसविहंमि वि तवे, सब्भिंतरबाहिरे कुसलदिट्ठे ।**
**अगिलाई अणाजीवी, नायव्वो सो तवायारो** ॥५॥ [ द.वै.नि./१८६ ]
**अणसणमूणोअरिया, वित्तीसंखेवणं रसच्चाओ ।**
**कायकिलेसो संलीणया य बज्झो तवो होइ** ॥६॥ [ द.वै.नि./४७ ]
**पायच्छित्तं विणओ, वेयावच्चं तहेव सज्झाओ ।**
**झाणं उस्सग्गो वि अ, अब्भिंतरओ तवो होइ** ॥७॥ [ द.वै.नि./४८ ]

---

१. इदं तु ध्येयं-नाणंमि सूत्रस्य प्रथमा गाथा नन्दिसूत्रे [२९], ३, ६, ७ गाथा उत्तराध्ययने [३०/८, ३०] अपि दृश्यन्ते ॥

**अणिगूहियबलविरिओ, परक्कमइ जो जहुत्तमाउत्तो ।**
**जुंजइ अ जहाथामं, नायव्वो वीरियायारो''** ॥८॥ [ दश.वै.नि./१८७ ] इति ।

एतदतिचारचिन्तनं मनसा, सङ्कलनं च श्रीगुरुसमक्षमालोचनार्थम्, अन्यथा तत् सम्यग् न स्यात् । लोकेऽपि हि राजादीनां किमपि विज्ञप्यं मनसां संप्रधार्य कागदादौ लिखित्वा वा विज्ञप्यते इति । ततश्च नमस्कारपूर्वं कायोत्सर्गं पारयित्वा चतुर्विंशतिस्तवं पठेत्, तदनु जानुपाश्चात्यभागपिण्डिकादि प्रमृज्योपविश्य च श्रीगुरूणां वन्दनकदानार्थं मुखवस्त्रिकां कायं च द्वावपि प्रत्येकं पञ्चविंशतिधा प्रतिलिख्य पूर्वोक्तविधिना वन्दनके दद्यात्, एतद्वन्दनकं च कायोत्सर्गावधारितातिचारालोचनार्थं । ततश्च सम्यगवनताङ्गः पूर्वं कायोत्सर्गे स्वमनोऽवधारितान् दैवसिकातिचारान् 'इच्छाकारेण संदिसह भगवन्? देवसिअं आलोएमि' इत्यादि सूत्रं चारित्रविशुद्धिहेतुकमुच्चरन् श्रीगुरुसमक्षमालोचयेत् । एवं दैवसिकातिचारालोचनानन्तरं मनोवचनकायसकलातिचारसंग्राहकं 'सव्वस्स वि देवसिय' इत्यादि पठेत् । 'इच्छाकारेण संदिसह भगवन्!' इत्यनेनानन्तरालोचितातिचारप्रायश्चित्तं च मार्गयेत्, गुरवश्च 'पडिक्कमह' इति प्रतिक्रमणरूपं दशविधप्रायश्चित्ते द्वितीयं प्रायश्चित्तमुपदिशन्ति, तच्च मिथ्यादुष्कृतादिरूपम् । उक्तं च —

**''पडिक्कमणं १ पडियरणा २ पडिहरणा ३ वारणा ४ निअत्ती ५ य ।**
**निंदा ६ गरहा ७ सोही ८ पडिक्कमणं अट्ठहा होइ''** ॥१॥ [ आव.नि./१२३३ ]

प्रथमप्रायश्चित्तं त्वालोचनारूपं प्राक्कृतमेव, गुरवः संज्ञादिना प्रायश्चित्तं ददते[1] न तु पडिक्कमह भाषन्ते इत्युक्तं **दिनचर्यायाम्** । तथा च तद्गाथा —

**''गंभीरिमगुणनिहिणो, मणवयकाएहिँ विहिअसमभावा ।**
**पडिक्कमह त्ति न जंपइ, भणंति तं पइ गुरू रुट्ठा''** ॥१॥ [ य.दि/२० ]

[2]रुष्टा इव भणन्तीत्यर्थः ततो विधिनोपविश्य समभावस्थितेन सम्यगुपयुक्तमनसाऽनवस्थाप्रसङ्गभीतेन पदे पदे संवेगमापद्यमानेन दंशमशकादीन् देहेऽगणयता श्राद्धेन सर्वं पञ्चपरमेष्ठिनमस्कारपूर्वं कर्म कर्त्तव्यमित्यादौ स पठ्यते । समभावस्थेन च प्रतिक्रमितव्यमित्यतः सामायिकसूत्रं भण्यते । तदनन्तरं दैवसिकाद्यतीचाराणामोघालोचनार्थं 'इच्छामि पडिक्कमिउं जो मे देवसिअ अइआरो कओ' इत्यादि भण्यते । तदनु **श्राद्धप्रतिक्रमणसूत्रं** पठ्यते, यावत् 'तस्स धम्मस्स' इति । साधुस्तु सामायिकसूत्रानन्तरं मङ्गलार्थं 'चत्तारि

१. °ति-P. ॥ २. रुष्टा इ[व भणन्ती]-मु० मध्ये कोष्ठके C. प्रतौ पार्श्वभागे । रुष्टा इव भणन्तीत्यर्थः L.P. ॥

**मङ्गलं**' इत्यादि भणति । ततो ओघतोऽतिचारालोचनार्थं 'इच्छामि पडिक्कमिउं' इत्यादि, विभागालोचनार्थं तु तदनु ईर्यापथिकीम् , ततश्च शेषाशेषातिचारप्रतिक्रमणार्थं मूलसाधु-प्रतिक्रमणसूत्रं' पठति, आचरणादिनैव चेयं भिन्ना रीतिः । प्रतिक्रमणसूत्रं च तथा भणनीयम् , यथा स्वस्य [1]पठतः शृण्वतां च परेषां संवेगभराद् रोमाञ्चो भवति । तदुक्तं **दिनचर्यायाम्** —

"**पभणंति तहा सुत्तं, न केवलं तेसि तह व अन्नेसिं ! ।**
**जह नयणजललवेणं, पए पए हुन्ति रोमंचो( चा )**" ॥१॥ [ दे.य.दि./३३३ ]

तदनु सकलातिचारनिवृत्त्याऽपगततद्भारो लघुभूत उत्तिष्ठति, एवं द्रव्यतो भावतश्चोत्थाय अब्भुट्ठिओमि'इत्यादिसूत्रं प्रान्तं यावत् पठति । ततः प्रतिक्रान्तातिचारः श्रीगुरुषु स्वकृता-पराधक्षमणार्थं वन्दनकं ददाति । प्रतिक्रमणे हि सामान्यतश्चत्वारि वन्दनकानि द्विकरूपाणि स्युः । तत्र प्रथममालोचनवन्दनकम् १, द्वितीयं क्षमणकवन्दनकम् २, तृतीयमाचार्यादिसर्व-सङ्घस्य क्षमणकपूर्वमाश्रयणाय ३, चतुर्थं प्रत्याख्यानवन्दनकमिति ४। ततो गुरून् क्षमयति पूर्वोक्तविधिना । तत्र [3]पञ्च(त्रि)कमध्ये तु ज्येष्ठमेवैकम् , [4]आचीर्णाभिप्रायेणेदमुक्तम् , अन्यथा तु गुरुमादिं कृत्वा ज्येष्ठानुक्रमेण सर्वान् क्षमयेत् , पञ्चप्रभृतिषु सत्सु त्रीन् गुरुप्रभृतीन् क्षमयेत् , इदं च वन्दनकम् 'अल्लिआवणवंदणयं' इत्युच्यते । आचार्यादीनामाश्रयणायेत्यर्थ इत्युक्तं **प्रवचनसारोद्धारवृत्तौ [ भा० १० प० १०६ ]** ।

ततश्च कायोत्सर्गकरणार्थं "**पडिक्कमणे १ सज्झाए २, काउस्सग्गावराह ४ पाहुणए**" **[ गु.भा./१७पू. ]** इत्यादिवचनाद्वन्दनकदानपूर्वकं भूमिं प्रमृज्य 'जे मे केइ कसाया' इत्याद्य-क्षरसूचितं कषायचतुष्टयात् प्रतीपं क्रमणमनुकुर्वन्निव पाश्चात्यपदैरवग्रहाद् बहिर्निःसृत्य 'आयरिअउवज्झाए' इत्यादि सूत्रं पठति । तत्राद्यश्चारित्रशुद्धये कायोत्सर्गो विधीयते, चारित्रं च कषायविरहेण शुद्धं भवति, तदभावे तस्यासारत्वात् । उक्तं च —

"**सामन्नमणुचरंतस्स, कसाया जस्स उक्कडा हुंति ।**
**मन्नामि उच्छुपुप्फं व, निप्फलं तस्स सामण्णं**" ॥१॥ [ दश.नि./३०५ ]

ततश्च चारित्रप्रकर्षकृते कषायोपशमाय च 'आयरिअउवज्झाए' इत्यादि गाथात्रयं पठित्वा चारित्रातिचाराणां 'पडिकमणसुद्धाणम्' इतिवचनात् प्रतिक्रमणेनाशुद्धानां शुद्धिनिमित्तं कायोत्सर्गं चिकीर्षुः 'करेमि भंते ! सामाइअम्' इत्यादि सूत्रत्रयं च पठित्वा

१. [पठतः शृण्वतां च]-मु० मध्यकोष्ठके C. प्रतौ पार्श्वभागे ॥ २. °रोमंचो-L.P.C. ॥ ३. पञ्चक° L.P.C. ॥ ४. आचीर्णं तु यदि पञ्चकादिगणो भवति तदा त्रितयं क्षमयति, अथ पञ्चकमध्ये तदा ज्येष्ठमेवैकमिति । इति प्रवचनसारोद्धारवृत्तौ भा० १ प० १०५-६ ॥

कायोत्सर्गं करोति। सामायिकसूत्रं च सर्वं धर्मानुष्ठानं समतापरिणामे स्थितस्य सफलमिति प्रतिक्रमणस्यादौ मध्येऽवसाने च पुनः पुनस्तत्स्मृत्यर्थमुच्चार्यमाणं गुणवृद्धये एव। आह च –

**''आइमकाउस्सग्गे, पडिक्कमतो अ काउ सामइअं ।**
**तो किं करेइ बीअं, तइअं च पुणो वि उस्सग्गे ? ॥१॥** [ आव.नि./१६९५ ]
**समभावंमि ठिअप्पा, उस्सग्गं करिअ तो अ पडिक्कमइ ।**
**एमेव य समभावे, ठिअस्स तइअं पि उस्सग्गे ॥२॥** [ आव.नि./१६९६ ]
**सज्झायझाणतवओसहेसु उवएसथुइपयाणेसुं ।**
**संतगुणकित्तणेसुं , न हुंति पुणरुत्तदोसा उ'' ॥३॥** [ आव.नि./१६९७ ] इति ।

कायोत्सर्गे च 'चंदेसु निम्मलयरा' इत्यन्तं चतुर्विंशतिस्तवद्वयं चारित्राचार-विशुद्ध्यर्थं चिन्तयति । पारयित्वा च कायोत्सर्गं सम्यग्दर्शनस्य सम्यग्ज्ञानहेतुत्वा-ज्ज्ञानाद् दर्शनं गरिष्ठमिति ज्ञानाचारात् पूर्वं दर्शनाचारविशुद्ध्यर्थं भरतक्षेत्रोत्पन्नत्वेनास-न्नोपकारित्वाच्छ्रीऋषभादिस्तुतिरूपं चतुर्विंशतिस्तवं 'सव्वलोए अरिहंतचेइयाणम्' इत्यादिसूत्रं च पठित्वा [1]तदर्थमेव कायोत्सर्गमेकचतुर्विंशतिस्तवचिन्तनरूपं करोति । तं च तथैव पारयित्वा सामायिकादिचतुर्दशपूर्वपर्यन्तश्रुतज्ञानाचारविशुद्ध्यर्थं 'पुक्खर-वरदीवड्ढे' इत्यादिसूत्रं 'सुअस्स भगवओ करेमि काउस्सग्गम्' इत्यादि च पठित्वैक-चतुर्विंशतिस्तवचिन्तनरूपं कायोत्सर्गं कुर्यात् । पारयित्वा च तं ज्ञानदर्शनचारित्राचार-निरतिचारसमाचरणफलभूतानां सिद्धानां 'सिद्धाणं बुद्धाणम्' इति स्तवं पठति । इह च चतुर्विंशतिस्तवद्वयचिन्तन[2]रूपोऽयं द्वितीयश्चारित्राचारविशुद्धिहेतुः कायोत्सर्गः एकस्य चारित्राचारशुद्धिहेतुकस्य दिवसातिचारचिन्तनार्थं प्राक्कृतत्वात् , [3]**आहु**रपि –**''दुन्नि अ हुंति चरित्ते, दंसणनाणे अ इक्किक्को''** [ ] इति वचनात् । अस्मिंश्च पूर्वोक्तयुक्त्या चारित्राचारस्य ज्ञानाद्याचारेभ्यो वैशिष्ट्यादिना चतुर्विंशतिस्तवद्वयचिन्तनं सम्भाव्यते, नाग्रेतनयोः तृतीय-चतुर्थयोर्दर्शनाचारज्ञानाचारविशुद्धिहेतुकयोरिति स्थितम् ।

अथ सिद्धस्तवपठनानन्तरं आसन्नोपकारित्वात् श्रीवीरं वन्दते, ततो महातीर्थ-त्वादिनोज्जयन्तालङ्करणं श्रीनेमिम् , ततोऽपि चाष्टापद-नन्दीश्वरादिबहुतीर्थनमस्काररूपां 'चत्तारिअट्ठदस' इत्यादिगाथां पठति ।

---

१. C. । तदर्थमेव-L.P. नास्ति ॥ २. दिवसातिचारचिन्तनार्थं-मु० मध्ये कोष्ठके० C. प्रतौ पार्श्वभागे ॥ ३. P.L. । आहुरपि-मु० नास्ति ॥

एवं चारित्राद्याचाराणां शुद्धिं विधाय सकलधर्मानुष्ठानस्य श्रुतहेतुकत्वात् तस्य समृद्ध्यर्थं 'सुअदेवयाए करेमि काउस्सग्गं अन्नत्थ' इत्यादि च पठित्वा श्रुताधिष्ठातृ-देवतायाः स्मर्तुः कर्मक्षयहेतुत्वेन श्रुतदेवताकायोत्सर्गं कुर्यात् । तत्र च नमस्कारं चिन्तयति । देवताद्याराधनस्य स्वल्पयत्नसाध्यत्वेनाष्टोच्छ्वासमान एवायं कायोत्सर्ग इत्यादि हेतुः सम्भाव्यः । पारयित्वा च तस्याः स्तुतिं पठति 'सुअदेवया भगवई' इत्यादि, अन्येन दीयमानां वा शृणोति । एवं क्षेत्रदेवताया अपि स्मृतिर्युक्तेति तस्याः कायोत्सर्गानन्तरं तस्या एव स्तुतिं भणति । यच्च प्रत्यहं क्षेत्रदेवतायाः स्मरणं, तत् तृतीयव्रतेऽभीक्ष्णावग्रहयाचनरूपभावनायाः सत्यापनार्थं सम्भाव्यते ।

ततः पञ्चमङ्गलभणनपूर्वं सन्दंशकं प्रमृज्योपविशति, ततो मुखवस्त्रिकां कायं च प्रतिलिख्य श्रीगुरूणां वन्दनके दत्त्वा 'इच्छामो अणुसट्ठिम्' इति भणित्वा जानुभ्यां स्थित्वा कृताञ्जलिर्नमोऽर्हत्सिद्धेतिपूर्वकं स्तुतित्रयं पठति । इदं च पूर्वोक्तवन्दनकदानं श्रीगुर्वाज्ञया कृतावश्यकस्य विनेयस्य मया युष्माकमाज्ञया प्रतिक्रान्तमिति विज्ञपनार्थम् । लोकेऽपि राजादीनामादेशं विधाय प्रणामपूर्वकं तेषामादेशकरणं निगद्यते, एवमिहापि ज्ञेयम् । एतदर्थश्चायं 'इच्छामः' अभिलषामः, 'अनुशास्तिं' गुर्वाज्ञाम् प्रतिक्रमणं कार्यमित्येवंरूपां, तां[2] च वयं कृतवन्तः स्वाभिलाषपूर्वकम् , न तु राजवेष्ट्यादिना । इत्थं सम्भावनाविधानं च 'इच्छामो अणुसट्ठिम्' इति [3]भणनानन्तरं श्रीगुरूणामादेश[4]स्याश्रवणात् । एवं च प्रतिक्रमणं सम्पूर्णं जातम् । तत्सम्पूर्णीभवनाच्च सम्पन्ननिर्भरप्रमोदप्रसराकुलवर्द्धमानस्वरेण वर्द्धमानाक्षरं तीर्थनायकत्वात् श्रीवर्द्धमानस्य स्तुतित्रयं 'नमोऽस्तु वर्द्धमानाय' इत्यादिरूपं श्रीगुरुभिरेकस्यां स्तुतौ पाक्षिकप्रतिक्रमणे तु श्रीगुरुपर्वणोर्विशेषबहुमानसूचनार्थं तिसृष्वपि स्तुतिषु भणितासु सतीषु सर्वे साधवः श्राद्धाश्च युगपत् पठन्ति ।

**''बालस्त्रीमन्दमूर्खाणां, नृणां चारित्रकाङ्क्षिणाम् ।**
**अनुग्रहार्थं सर्वज्ञैः, सिद्धान्तः प्राकृतः कृतः''** ॥१॥ [ ]

इत्याद्युक्तेः स्त्रीणां संस्कृतेऽनधिकारत्वसूचनात् साध्व्यः श्राविकाश्च 'नमोऽर्हत्सिद्ध'

---

१. कायोत्सर्ग पूरा करके सिद्धस्तव °पढे....उसके बाद भवनदेवी (शय्यादेवी) का कायोत्सर्ग करे उसमें २७ श्वासोश्वास पूरे करे यह आवश्यकचूर्णिका अभिप्राय है, परन्तु आचरणासे ८ श्वासोच्छ्वास पूरे करते है । इति प्रतिक्रमणविधिसङ्ग्रहे पंन्यास श्रीकल्याणविजयलिखिते पृ ३० ॥ २. P.L. प्रतिक्रमणविधिप्रकाशे च प० ३६ । तां-मु० नास्ति ॥ ३. L.P.C. प्रतिक्रमणविधिप्रकाशे च । प्रणामान° मु० ॥ ४. L.P. प्रतिक्रमणविधिप्रकाशे च । स्य० मु० C. ॥

इत्यादि सूत्रं न पठन्ति, 'नमोऽस्तु वर्द्धमानाय' इत्यादिस्थाने 'संसारदावानल' इत्यादि च पठन्ति, रात्रिकप्रतिक्रमणे तु विशाललोचनेत्यादिस्थाने । **केचित्** तु स्त्रीणां पूर्वाध्ययनेऽनधिकारित्वात् नमोऽस्तु वर्द्धमानेत्यादीनां च पूर्वान्तर्गतत्वेन सम्भाव्य-मानत्वान्न पठन्तीत्याहुः । यच्च श्रीगुरुकथनावसरे प्रतिस्तुतिप्रान्तं 'नमो खमासमणाणं' इति गुरुनमस्कारः साधुश्राद्धादिभिर्भण्यते, तन्नृपाद्यालापेषु प्रतिवार्त्ताप्रान्तं जीवेत्यादि-भणनवत् श्रीगुरुवचः प्रतीच्छादिरूपं सम्भाव्यते । स्तुतित्रयपाठानन्तरं शक्रस्तवपाठः । तत उदारस्वरेणैकः श्रीजिनस्तवं कथयति, अपरे च सर्वे सावधानमनसः कृताञ्जलयः शृण्वन्ति । स्तवनभणनानन्तरं च सर्वजिनस्तुतिरूपं 'वरकनक' इत्यादि पठित्वा चतुर्भिः क्षमाश्रमणैः श्रीगुर्वादीन् वन्दते ।

अत्र च देवगुरुवन्दनं नमोऽर्हत्सिद्धेत्यादेरारभ्य चतुःक्षमाश्रमणप्रदानं यावत् ज्ञेयम्, श्राद्धस्य तु 'अड्ढाइज्जेसु' इत्यादि भणनावधि ज्ञेयम् । इदं च देवगुरुवन्दनं प्रतिक्रमणस्य प्रारम्भे अन्ते च कृतम्, '**आद्यन्तग्रहणे मध्यस्यापि ग्रहणम्**' इति न्यायात् सर्वत्राप्यव-तरतीति । यथा शक्रस्तवस्यादावन्ते नमो इति भणनम् । ततोऽपि '**द्विर्बद्धं सुबद्धं भवति**' इतिन्यायेन पूर्वं चारित्राद्याचारशुद्ध्यर्थं कृतेष्वपि कायोत्सर्गेषु पुनः प्राणातिपातविरमणाद्यति-चाररूपदैवसिकप्रायश्चित्तविशोधनार्थं चतुश्चतुर्विंशतिस्तवचिन्तनरूपं कायोत्सर्गं कुरुते । अयं च कायोत्सर्गः सामाचारीवशेन कैश्चित् प्रतिक्रमणस्यादौ कैश्चित् त्वन्ते क्रियते । तदनु तथैव पारयित्वा चतुर्विंशतिस्तवं च मङ्गलार्थं पठित्वा क्षमाश्रमणद्वयपूर्वं मण्डल्यामुपविश्य सावधानमनसा स्वाध्यायं कुरुते मूलविधिना, पौरुषी यावत् सम्पूर्णा स्यात् ।

अत्राह परः —ननु प्रतिक्रमणं पञ्चाचारविशुद्ध्यर्थं प्रागुक्तम्, अत्र तु ज्ञानदर्शन-चारित्राचाराणामेव यथास्थानं शुद्धिरुक्ता, न च तपो-वीर्याचारयोः, तथा च प्रतिज्ञाहा-निरितिचेत् ? मैवम्, एतच्छुद्धिर्ज्ञानाद्याचारानन्तरीयका इति प्रतिपादितैव । तथाहि —सायं साधोः कृतचतुर्विधाहारप्रत्याख्यानस्य श्राद्धस्यापि कृतान्यतरप्रत्याख्यानस्य तद्भवति । प्रातरपि षाण्मासिकप्रभृतिनमस्कारसहितान्तं प्रत्याख्यानं करोतीति स्फुटैव तपआचारशुद्धिः । यथाविधि यथाशक्ति च प्रतिक्रामतो वीर्याचारशुद्धिरपि प्रतीतैवेति । अविधिना च कृते प्रायश्चित्तम्, तथा हि —काले आवश्यकाकरणे चतुर्लघुः, मण्डल्यप्रतिक्रान्तौ कुशीलैः सह प्रतिक्रान्तौ च चतुर्लघुः, निद्राप्रमादादिना प्रतिक्रमणे न मिलितः तत्रैकस्मि कायोत्सर्गे भिन्नमासः, द्वयोर्लघुमासः, त्रिषु गुरुमासः, तथा गुरुभिरपारिते कायोत्सर्गे स्वयं पारणे गुरुमासः, सर्वेष्वपि कायोत्सर्गेषु चतुर्लघुः, एवं वन्दनेष्वपि योज्यमिति **व्यवहारसूत्रे** ।

तथा साधवः प्रतिक्रमणानन्तरं तथैवान्तर्मुहूर्तमात्रमासते, कदाचिदाचार्या अपूर्वां सामाचारीमपूर्वमर्थं वा प्ररूपेयुरित्युक्त**मोघनिर्युक्तिवृत्तौ**। इति दैवसिकप्रतिक्रमणविधिः।

अथ [१]**रात्रिकप्रतिक्रमणविधि**र्यथा—पाश्चात्यनिशायामे पौषधशालायां गत्वा स्वस्थाने वा स्थापनाचार्यान् संस्थाप्य ईर्यापथिकीप्रतिक्रमणपूर्वं सामायिकं कृत्वा क्षमाश्रमणपूर्वं '**कुसुमिणदुस्सुमिण उहडावणिअं राइअपायच्छित्तविसोहणत्थं काउस्सग्गं करेमि**' इत्यादि भणित्वा चतुर्विंशतिस्तवचतुष्कचिन्तनरूपं शतोच्छ्वासमानं स्त्रीसेवादि-कुस्वप्नोपलम्भे तु अष्टोच्छ्वासमानं कायोत्सर्गं कुर्यात्। रागादिमयः कुस्वप्नः, द्वेषादि-मयो दुःस्वप्नः, एतद्विधिस्तु 'नमस्कारेणावबोध' इति प्रथमद्वार उक्त एव।

इह च सर्वं श्रीदेवगुरुवन्दनपूर्वं सफलमिति चैत्यवन्दनां विधाय क्षमाश्रमणद्वयपूर्वं स्वाध्यायं विधत्ते, यावत्प्राभातिकप्रतिक्रमणवेला। तदनु चतुरादिक्षमाश्रमणैः श्रीगुर्वादीन् वन्दित्वा क्षमाश्रमणपूर्वं 'राइअपडिक्कमणइ ठाउम्' इत्यादि भणित्वा भूनिहितशिराः 'सव्वस्स वि राइअ' इत्यादि सूत्रं सकलरात्रिकातिचारबीजकभूतं पठित्वा शक्रस्तवं भणति। प्राक्तनं चैत्यवन्दनं तु स्वाध्यायादिधर्मकृत्यस्य प्रतिबद्धम्, न तु रात्रिकावश्यकस्येति एतदारम्भे मङ्गलाद्यर्थं पुनः शक्रस्तवेन संक्षेपदेववन्दनम्। ततो द्रव्यतो भावतश्चोत्थाय 'करेमि भंते! सामाइअम्' इत्यादिसूत्रपाठपूर्वं चारित्र-दर्शन-ज्ञानातिचारविशुद्ध्यर्थं कायोत्सर्गत्रयं करोति। प्रथमे द्वितीये च कायोत्सर्गे चतुर्विंशतिस्तवमेकं चिन्तयति, '**सायसयं गोसद्धम्**' [ **प्र.स./१८५** ] इतिवचनात्। तृतीये तु सान्ध्यप्रतिक्रमणान्तोक्तवर्द्धमानस्तुतित्रयात्प्रभृति निशाति-चारांश्चिन्तयति, यतः—

''**दिवसावस्सयअंते, जं थुइतिअगं तयाइवावारे।**
**जा [२]पच्छि( य )मुस्सग्गं, चिंतिज्जसु ताव अइआरे**'' ॥१॥ [ **य.दि./१७** ] इति।

इह च पूर्वोक्तयुक्त्या चारित्राचारस्य ज्ञानाद्याचारेभ्यो वैशिष्ट्येऽपि यदेकस्यैव चतुर्विंशतिस्तवस्य चिन्तनम्, तद् रात्रौ प्रायोऽल्पव्यापारत्वेन चारित्रातिचाराणां स्वल्प-त्वादिना सम्भाव्यते। ततः कायोत्सर्गं पारयित्वा सिद्धस्तवं पठित्वा सन्दंशकप्रमार्जन-पूर्वमुपविशति।

अत्र च प्राभातिकप्रतिक्रमणे प्रादोषिकप्रतिक्रमणवत् प्रथमे चारित्रातिचारविशुद्धि-कायोत्सर्गे निशातिचारचिन्तनं यन्न कृतं, तन्निद्राभिभूतस्य सम्यक् स्मरणं न स्यादिति,

---

१. L.P.C. । रात्रि प्र० मु० ॥ २. L.P. । पच्छि(य)मु° मु० । पछियमु० C. ॥

D:\new/d-2.pm5\3rd proof

तृतीयकायोत्सर्गे च सावधानीभूतत्वात् सम्यग् स्यादिति तत्र निशातिचारचिन्तनमिति हार्दं। यत उक्तं **समयविद्भिः** —

**''निद्दामत्तो न सरइ, अइआरे कायघट्टणान्नोऽन्नं।**
**किइकरणे दोसा वा, गोसाई तिन्नि उस्सग्गा''** ॥१॥[ आ.नि./१५२५ ] इति।

ततः पूर्ववन्मुखवस्त्रिकाप्रतिलेखनापूर्वं वन्दनादिविधिः प्रतिक्रमणसूत्रानन्तरकायोत्सर्गं यावत् ज्ञेयः, पूर्वं चारित्राद्याचाराणां प्रत्येकं शुद्धये पृथक् कायोत्सर्गाणां कृतत्वेन साम्प्रतं तेषां समुदितानां प्रतिक्रमणेनाप्यशुद्धानां शोधनायायं कायोत्सर्गः सम्भाव्यते। अत्र च कायोत्सर्गे श्रीवीरकृतं षाण्मासिकं तपश्चिन्तयति, हे जीव ! श्री वीरेण षाण्मासिकमुत्कृष्टं तपः कृतम्, तत् त्वं कर्त्तुं शक्नोषि ? 卐*[1]न वा, जीवो वक्ति 'न शक्नोमि' तर्हि एकदिनोनं षाण्मासिकं कर्त्तुं शक्नोषि ?,* न शक्नोमि, एवं द्वित्रिचतुःपञ्चदिनैरूनं षाण्मासिकं कर्त्तुं शक्नोषि ? [2]पुनर्वक्ति न शक्नोमि, तर्हि षट्सप्ताष्टनवदशदिनोनं षाण्मासिकं कर्त्तुं शक्नोषि ?, एवं एकादशतः पञ्चदिनवृद्ध्या क्रमेणैकोनत्रिंशद्दिनानि यावच्चिन्तयति। एवं पञ्चमे चतुर्थे तृतीये द्वितीये मासेऽपि, प्रथमे तु रे जीव ! त्वमेकमासिकं कर्त्तुं शक्नोषि ? न शक्नोमि, ततः एकदिनोनं कर्त्तुं शक्नोषि ? न शक्नोमि, एवं यावत् त्रयोदशदिनोनं कर्त्तुं शक्नोषि ? न शक्नोमि, तर्हि चतुस्त्रिंशत्तमं कर्त्तुं शक्नोषि ? न शक्नोमि, द्वात्रिंशत्तमम्, त्रिंशत्तमम्, अष्टाविंशतितमम् षड्विंशतितमं चतुर्विंशतितमं द्वाविंशतितमं विंशतितमं अष्टादशं षोडशं चतुर्दशं द्वादशं दशमं षष्टं चतुर्थं कर्तुं शक्नोषीत्यादि विचिन्त्य यत् तपः कृतं स्यात् तत्र करणेच्छायां करिष्ये इति वक्ति, अन्यथा तु शक्नोमि, परं नाद्य मनो वर्त्तते इति, एवमाचाम्लनिर्विकृतिकैकाशनादिषु यत्र मनो भवतीति तन्मनसि निधाय पारयित्वा च कायोत्सर्गं मुखपोतिकाप्रतिलेखनापूर्वं वन्दनके दत्त्वा मनश्चिन्तितप्रत्याख्यानं विधत्ते। यत उक्तं **दिनचर्यायाम्** —

**''सामाइअच्छम्मास तवुस्सग्ग उज्जोय पुत्तिवंदणगं।**
**उस्सग्गचिंतियतवोविहाणमह पच्चखाणेणं** ॥१॥ [ यति.भाव./१३ ]
**इगपंचाइदिणूणं, पणमास चइत्तु तेरदिण उड्ढं।**
**च[3]उतीसाइ दिणूणं, चिंते नवकारसहियं जा** ॥२ ॥ [ यति.भाव./१४ ] इति[4]卐

---

१. L.P.। * * चिह्नद्वयमध्यवर्तिपाठ स्थाने 'न वेत्यादि' इति मु० मध्ये पाठः ॥ 卐卐 चिह्नद्वय-मध्यवर्तिपाठः C. नास्ति ॥ २. L.। पुनर्वक्ति–मु० नास्ति ॥ ३. L.P.। °उ–मु० ॥ ४. इतोऽग्रे–'ततश्च क्रमाद्धाया यत्कर्तुं शक्नोति तन्मनसि निधाय पारयित्वा च कायोत्सर्गं मुखपोतिकाप्रतिलेखनापूर्वं वन्दनके दत्वा मनश्चिन्तितं प्रत्याख्यानं विधत्ते'। इति C. प्रतौ ॥

तदनु 'इच्छामो अणुसट्ठिं' इति भणित्वोपविश्य स्तुतित्रयादिपाठपूर्वं चैत्यानि वन्दते । इदं च प्रतिक्रमणं मन्दस्वरेणैव कुर्यात्, अन्यथाऽऽरम्भिणां जागरणेनारम्भ-प्रवृत्तेः । ततश्च साधुः कृतपौषधः श्रावको वा क्षमाश्रमणद्वयेन 'भगवन्! बहुवेलं संदिसावेमि बहुवेलं करेमि' इति भणित, बहुवेलासम्भवीनि चोच्छ्वासादीनि कार्याणि बहुवेल इत्युच्यन्ते । ततश्च चतुर्भिः क्षमाश्रमणैः श्रीगुर्वादीन् वन्दते, श्राद्धस्तु 'अड्ढाइज्जेसु' इत्यादि च पठति । इति रात्रिकप्रतिक्रमणविधिः ।

अथ **पाक्षिकादिप्रतिक्रमणविधिः**, तानि च दैवसिक—रात्रिकाभ्यां शुद्धौ सत्यामपि सूक्ष्मबादरातिचारजातस्य विशेषेण शोधनार्थं युक्तान्येव । यतः —

**''जह गेहं पइदिवसं पि, सोहिअं तह वि पक्खसंधीसुं ।**
**सोहिज्जइ सविसेसं, एवं इहयं पि नायव्वं'' ॥१॥ [ ]**

अत्र पाक्षिके पूर्ववद्दिवसप्रतिक्रमणं प्रतिक्रमणसूत्रान्तं विधत्ते, ततः क्षमाश्रमणपूर्वं 'देवसिअं आलोइअ पडिक्कंता इच्छाकारेण संदिसह भगवन्! पाखी मुहपत्ती पडिलेहुं' इत्युक्त्वा तां कायं च प्रतिलिख्य वन्दनके दत्त्वा सम्बुद्धान् श्रीगुर्वादीन् क्षमयितुं क्षमाप्रधानं च सर्वमनुष्ठानं सफलमिति ज्ञापयितुं 'अब्भुट्ठिओमि संबुद्धाखामणेणं अब्भितरपक्खिअं खामेउं' इति भणित्वा 'इच्छं खामेमि पक्खिअं पन्नरसण्हं दिवसाणं, पन्नरसण्हं राईणं, जं किंचि अप्पत्तिअम्' इत्यादिना गुरुभिः स्थापनाचार्ये क्षमिते शिष्यः श्राद्धो वा श्रीगुर्वादीन् क्षमयति त्रीन् पञ्च वा, यदि द्वौ शेषौ, तत उत्थाय 'इच्छाकारेण संदिसह भगवन्! पक्खिअं आलोएमि ? इच्छं आलोएमि, जो मे पक्खिओ' इत्यादि सूत्रं भणित्वा संक्षेपेण विस्तरेण वा पाक्षिकानतिचारानालोच्य 'सव्वस्स वि पक्खिअ' इत्यादिभणिते गुरुराह—'पडिक्कमह' तत 'इच्छं'ति भणित्वा 'चउत्थेणम्' इत्यादिना गुरुदत्तमुपवासादिरूपं प्रायश्चित्तं प्रतिपद्यते ।

ततो वन्दनकदानपुरस्सरं प्रत्येकक्षमणकानि विधातुं गुरुरन्यो वा ज्येष्ठः पूर्वमुत्थायो-र्ध्वस्थित एव भणति—'देवसिअं आलोइअ पडिक्कंता, इच्छाकारेण संदिसह भगवन्! अब्भुट्ठिओऽहं [१]प्रत्येकखामणेणं अब्भितरपक्खिअं खामेउं, 'इच्छं' इच्छकारि अमुकतपोधन! स भणति 'मत्थएण वंदामि' क्षमाश्रमणपूर्वं । गुरुराह—'अब्भुट्ठिओमि पत्तेअखामणेणं अब्भितरपक्खिअं खामेउं' सोऽपि 'अहमवि खामेमि तुब्भे'त्ति भणित्वा भूमिनिहितशिराः पुनर्भणति 'इच्छं खामेमि पक्खिअं, पन्नरसण्हं दिवसाणं पन्नरसण्हं

१. L.P. । प्रत्येकखामणेणं–मु० C. ॥

D:\new/d-2.pm5\3rd proof

राईणम्' इत्यादि गुरुस्तु पन्नरसण्हमित्यादि 'उच्चासणे समासणे' इतिपदद्वयवर्ज्जं भणति, एवं सर्वेऽपि साधवः परस्परं क्षमयन्ति, लघुवाचनाचार्येण सह प्रतिक्रामतां साधूनां ज्येष्ठः प्रथमं स्थापनाचार्यं क्षमयति, ततः सर्वेऽपि यथारत्नाधिकम्, गुर्वभावे सामान्यसाधवः प्रथमं स्थापनाचार्यं क्षमयन्ति, यावद् द्वौ शेषो, एवं श्रावका अपि, परं वृद्ध-श्रावकोऽमुकप्रमुखसमस्तश्रावको वांदुं वांदुं इति भणित्वा 'अब्भुट्ठिओमि प्रत्येकखामणेणं अब्भिंतरपक्खिअं खामेउं'ति इतरे च भणन्ति 'अहमवि खामेमि तुब्भे' ततो वृद्ध इतरे चेति उभयेऽपि भणन्ति 'पन्नरसण्हं दिवसाणं पन्नरसण्हं राईणं भण्यां भास्यां मिच्छा मि दुक्कडं' ॥

ततो वन्दनकदानपूर्वं 'देवसिअं आलोइअ पडिक्कंता इच्छाकारेण संदिसह भगवन्! पक्खिअं पडिक्कमावेह' ? गुरूर्भणति 'सम्मं पडिक्कमह' तत 'इच्छं'ति कथनपूर्वं सामायिकसूत्रं 'इच्छामि पडिक्कमिउं जो मे पक्खिओ' इत्यादि भणित्वा क्षमाश्रमणपूर्वम् 'इच्छाकारेण संदिसह भगवन्! पक्खिअसुत्तं कड्ढेमि'त्ति उक्त्वा गुरुस्तदादिष्टोन्यो वा साधुः सावधानमना व्यक्ताक्षरं नमस्कारत्रिकपूर्वं पाक्षिकसूत्रं कथयति, इतरे च क्षमा-श्रमणपूर्वं 'संभलेमि'त्ति भणित्वा यथाशक्ति कायोत्सर्गादौ स्थित्वा शृण्वन्ति । पाक्षिकसूत्रभणनानन्तरं 'सुअदेवया भगवई' इति स्तुतिं भणित्वोपविश्य पूर्वविधिना पाक्षिकप्रतिक्रमणसूत्रं पठित्वोत्थाय च तच्छेषं कथयित्वा 'करेमि भंते! सामाइअम्' इत्यादि सूत्रत्रयं पठित्वा च प्रतिक्रमणेनाशुद्धानामतीचाराणां विशुद्ध्यर्थं द्वादश-चतुर्विंशतिस्तवचिन्तनरूपं कायोत्सर्गं कुर्यात् ।

ततो मुखवस्त्रिकाप्रतिलेखनापूर्वं वन्दनकं दत्त्वा[१] 'इच्छाकारेण संदिसह भगवन्! अब्भुट्ठिओमि समाप्तखामणेणं अब्भिंतरपक्खिअं खामेउं' इत्यादि भणित्वा क्षमणकं विधत्ते। अत्र पूर्वं सामान्यतो विशेषतश्च पाक्षिकापराधे क्षमितेऽपि कायोत्सर्गे स्थितानां शुभैकाग्र-भावमुपगतानां किञ्चिदपराधपदं स्मृतं भवेत्, तस्य क्षमणनिमित्तं पुनरपि क्षमणकरणं युक्तमेव। तत उत्थाय 'इच्छाकारेण संदिसह भगवन्! पाखीखामणां खामुं ? इच्छं' ततः साधवः चतुर्भिः क्षमाश्रमणैः चत्वारि पाक्षिकक्षमणानि कुर्वन्ति । तत्र च राजानं यथा माणवका अतिक्रान्ते माङ्गल्यकार्ये बहुमन्यन्ते यदुत—अखण्डितबलस्य ते सुष्ठु कालो गतोऽन्योऽप्येवमेवोपस्थित, एवं पाक्षिकं विनयोपचारं 'इच्छामि खमासमणो पिअं च मे' इत्यादिप्रथमक्षामणसूत्रेण तथास्थित एव साधुराचार्यस्य करोति । ततो द्वितीये क्षमणके

१. L.P. । इतोऽग्रे–क्षमाश्रमणपूर्वं–इति मु० C. ॥

चैत्यसाधुवन्दनं निवेदयितुकाम 'इच्छामि खमासमणो पुव्विं' इत्यादि भणति । तदनु तृतीये आत्मानं गुरून् निवेदयितुं 'इच्छामि खमासमणो अब्भुट्ठिओऽहं तुब्भण्हम्' इत्यादि भणति । चतुर्थे तु यच्छिक्षां ग्राहितस्तमनुग्रहणं बहुमन्यमानः 'इच्छामि खमासमणो ! अहमवि पुव्वाइम्' इत्यादि वक्ति । एतेषां चतुर्णां पाक्षिकक्षमणकानां प्रत्येकमन्ते 'तुब्भेहिं समं १, अहमवि वंदामि चेइआइं २, आयरिससंतिअं ३, नित्थारपारगा होह ४, इति श्रीगुरूक्तौ शिष्य 'इच्छं'ति भणति । श्रावकाः पुनरेकैकनमस्कारं पठन्ति ।

तत 'इच्छामो अणुसट्ठिं'ति भणित्वा वन्दनदैवसिकक्षमणकवन्दनादि दैवसिक-प्रतिक्रमणं कुर्यात् । श्रुतदेवतायाः पाक्षिकसूत्रान्ते स्मृत्वेन तद्दिने तत्कायोत्सर्गस्थाने भवनदेवतायाः कायोत्सर्गः, क्षेत्रदेवतायाः प्रत्यहं स्मृतौ भवनस्य क्षेत्रान्तर्गतत्वेन तत्त्वतो भवनदेव्या अपि स्मृतिः कृतैव, तथापि पर्वदिने तस्या अपि बहुमानार्हत्वात् कायोत्सर्गः साक्षात् क्रियते । स्तवस्थाने च मङ्गलार्थमजितशान्तिस्तवपाठ इति ।

अत्रापि पाक्षिकप्रतिक्रमणे पञ्चविधाचारविशुद्धिस्तत्तत् सूत्रानुसारेण स्वयमभ्यूह्या । सा चैवं सम्भाव्यते-ज्ञानादिगुणवत्प्रतिपत्तिरूपत्वाद्वन्दनकानि सम्बुद्धक्षमणानि च ज्ञानाचारस्य, द्वादशलोगस्सकायोत्सर्गानन्तरं प्रकटचतुर्विंशतिस्तवकथनेन दर्शनाचारस्य, अतिचारालोचनप्रत्येकक्षमणकबृहल्लघुपाक्षिकसूत्रकथनसमाप्तिपाक्षिकक्षमणकादि-भिश्चारित्राचारस्य, चतुर्थतपःप्रभृतिद्वादशलोगस्सकायोत्सर्गादिभिर्बाह्याभ्यन्तरतपआचारस्य, सर्वैरप्येतैः सम्यगाराधितैर्वीर्याचारस्य शुद्धिः क्रियते । एतदनुसारेण चातुर्मासिकसांव-त्सरिकप्रतिक्रमणयोरपि सम्भाव्यम् इति पाक्षिकप्रतिक्रमणक्रमः । चातुर्मासिक-सांवत्सरिकयोरपि क्रम एष एव । नवरं नाम्नि विशेषः । कायोत्सर्गेऽपि चातुर्मासिक-प्रतिक्रमणक्रमणे विंशतिचतुर्विंशतिस्तवचिन्तनम्, सांवत्सरिकप्रतिक्रमणे च चत्वारिं-शच्चतुर्विंशतिस्तवास्तदन्ते एको नमस्कारश्च चिन्त्यते, क्षमणके च चउण्हं मासाणं, अट्ठण्हं पक्खाणं, इगसयवीसराइंदियाणं,' तथा 'बारसण्हं मासाणं, चउवीसण्हं पक्खाणं, तिन्निसयसट्ठिराइंदिआणं' इत्यादि वक्तव्यम् । साधवश्च पाक्षिकचातुर्मासिकयोः पञ्च सांवत्सरिके च सप्त गुर्वाद्याः क्षम्याः, यदि द्वौ शेषौ तिष्ठतः इति चातुर्मासिक-सांवत्सरिकप्रतिक्रमणक्रमः । एतद्विधिसंवादिन्यश्चेमाः **पूर्वाचार्य**प्रणीता [१]गाथाः —

**''पंचविहायारविसुद्धिहेउमिह साहु सावगो वा वि ।**
**पडिकमणं सह गुरुणा, गुरुविरहे कुणइ इक्को वि ॥१॥** [ प्र.स./२ ]

---

१. इमा गाथाः स्वल्पपाठभेदयुता योगशास्त्रप्रतौ प० ६९१तः दृश्यन्ते ॥

D:\new/d-2.pm5\3rd proof

वंदित्तु चेइआइं, दाउं चउराइए खमासमणे ।
भूनिहिअसिरो सयलाइआरमिच्छाकडं देई ॥२॥ [ प्र.स./३ ]
सामाइअपुव्वमिच्छामि, ठाउं काउस्सग्गमिच्चाइ ।
सुत्तं भणिअ पलंबिअभुअकुप्परधरिअपहिरणओ ॥३॥ [ प्र.स./४ ]
घोडगमाइअदोसेहिं, विरहिअं तो करेइ उस्सग्गं ।
नाहिअहो जाणुद्धं चउरंगुलट्ठविअकडिपट्टो ॥४॥ [ ]
तत्थ य धरेइ हिअए, जहक्कमं दिणकए अ अइआरे ।
पारेत्तु णमोक्कारेण पढइ चउवीसथयदंडं ॥५॥ [ प्र.स./७ ]
संडासगे पमज्जिअ, उवविसिअ अलग्गविअयबाहुजुओ ।
मुहणंतगं च कायं, पेहए पंचवीस इहं ॥६॥ [ प्र.स./८ ]
उठिओट्ठिओ सविणयं, विहिणा गुरुणो करेइ किइकम्मं ।
बत्तीसदोसरहिअं, पणविसावस्सगविसुद्धं ॥७॥ [ प्र.स./९ ]
अह सम्ममवणयंगो, करजुगविहिधरिअपुत्तिरयहरणो ।
परिचिंतिअअइआरे, जहक्कमं गुरुपुरो विअडे ॥८॥ [ प्र.स./१४ ]
अह उवविसित्तु सुत्तं, सामाइअमाइअं पढिअ पयओ ।
अब्भुट्ठिओ म्हि इच्चाइ, पढइ दुहओठिओ विहिणा ॥९॥ [ प्र.स./१५ ]
दाऊण वंदणं तो पणगाइसु जइसु खामए तिन्नि ।
किइकम्मं करिआयरिअमाइगाहातिगं पढइ ॥१०॥ [ प्र.स./१६ ]
इअसामाइअउस्सग्गसुत्तमुच्चरिअ काउस्सग्गठिओ ।
चिंतइ उज्जोअदुगं, चरित्तअइआरसुद्धिकए[1] ॥११॥ [ प्र.स./१७ ]
विहिणा पारिअ सम्मत्तसुद्धिहेउं च पढइ उज्जोअं ।
तह सव्वलोअअरिहंतचेइआराहणुस्सग्गं ॥१२॥ [ प्र.स./१८ ]
काउं उज्जोअगरं, चिंतिअ पारेइ सुद्धसम्मत्तो ।
पुक्खरवरदीवड्ढं, कड्ढइ सुअसोहणनिमित्तं ॥१३॥ [ प्र.स./१९ ]
पुण पणवीसुस्सासं, उस्सग्गं कुणइ पारए विहिणा ।
तो सयलकुसलकिरिआफलाण सिद्धाण पढइ थयं ॥१४॥ [ प्र.स./२० ]

---

१. अइआर–मु० मध्ये कोष्ठके० C. प्रतो पार्श्वभागे ॥

अह सुअसमिद्धिहेउं, सुअदेवीए करेइ उस्सग्गं ।
चिंतेइ नमोक्कारं, सुणइ व देई व तीइ थुइं ॥१५॥ [ प्र.स./२१ ]
एवं खित्तसुरीए, उस्सग्गं कुणइ सुणइ देइ थुइं ।
पढिऊण पंचमंगलमुवविसइ पमज्जसंडासे ॥१६॥ [ प्र.स./२२ ]
पुव्वविहिणेव पेहिअ, पुत्तिं दाउण वंदणं गुरुणो ।
इच्छामो अणुसट्ठिन्ति भणिउं जाणूहिं तो ठाई ॥१७॥ [ प्र.स./२३ ]
गुरुथुइगहणे थुइ तिण्णि, वद्धमाणक्खरस्सरो पढई ।
सक्कथयथवं पढिअ, कुणई पच्छित्तउस्सग्गं ॥१८॥ [ प्र.स./२४ ]
एवं ता देवसिअं, राइअमवि एवमेव नवरि तहिं ।
पढमं दाउं मिच्छा मि दुक्कडं पढइ सक्कथयं ॥१९॥ [ प्र.स./२५ ]
उट्ठिअ करेइ विहिणा, उस्सग्गं चिंतए अ उज्जोअं ।
बीअं दंसणसुद्धीएँ, चिंतए तत्थ इममेव ॥२०॥ [ प्र.स./२६ ]
तइए निसाइआरं, जहक्कमं चिंतिऊण पारेइ ।
सिद्धथयं पढित्ता, पमज्ज संडासमुवविसइ ॥२१॥ [ प्र.स./२७ ]
पुव्वं व पुत्तिपेहणवंदणमालोअ सुत्तपढणं च ।
वंदणखामणवंदणगाहातिगपढणमुस्सग्गो ॥२२॥ [ ग्रं ८०००[१] ] [ प्र.स./२८ ]
तत्थ य चिंतइ संजमजोगाण न होइ जेण मे हाणी ।
तं पडिवज्जामि तवं, छम्मासं ता न काउमलं ॥२३॥ [ प्र.स./२९ ]
एगाइ इगुणतीसूणयं पि, न सहो न पंचमासमवि ।
एवं चउतिदुमासं, न समत्थो एगमासं पि ॥२४॥ [ प्र.स./३० ]
जा तं पि तेरसूणं, चउतीसइमाइअं दुहाणीए ।
जा चउत्थं तो आयंबिलाइ जा पोरिसि[२] नमो वा ॥२५॥ [ प्र.स./३१ ]
जं सक्कं[३] तं हिअए, धरेत्तु पारेइ पेहए पुत्तिं ।
दाउं वंदणमसढो, तं चिअ पच्चक्खए विहिणा ॥२६॥ [ प्र.स./३२ ]
इच्छामो अणुसट्ठिन्ति भणिअ उवविसिअ पढइ तिण्णि थुई ।
मिउसद्देणं सक्कत्थयाइ तो चेइए वंदे ॥२७॥ [ प्र.स./३३ ]

---

१. L.P. । प्रत्योः ७००० ॥ २. L.P. । पोरुसि-मु० ॥ ३. सक्कइ प्र० स० ॥

**अह पक्खिअं चउद्दसिदिणंमि पुव्वं व तत्थ देवसिअं ।**
**सुत्तंतं पडिक्कमिउं, तो सम्ममिमं कमं कुणइ ॥२८॥** [ प्र.स./३४ ]
**मुहपत्ती वंदणयं, संबुद्धाखामणं तहाऽऽलोए ।**
**वंदणपत्तेअखामणं च वंदणयमह सुत्तं ॥२९॥** [ प्र.स./३५ ]
**सुत्तं अब्भुट्ठाणं, उस्सग्गो पुत्तिवंदणं तह य ।**
**पज्जंतिअखामणयं, तह चउरो छोभवंदणया ॥३०॥** [ प्र.स./३६ ]
**पुव्वविहिणेव सव्वं, देवसिअं वंदणाइ तो कुणइ ।**
**सेज्जसुरीउस्सग्गो, भेओ संतिथयपढणे अ ॥३१॥** [ प्र.स./३७ ]
**एवं चिअ चउमासे, वरिसे अ जहक्कमं विही णेओ ।**
**पक्खचउमासवरिसेसुं , नवरि नामंमि णाणत्तं ॥३२॥** [ प्र.स./३८ ]
**तह उस्सग्गुज्जोआ, बारस वीसा समंगलगचत्ता ।**
**संबुद्धखामणं तिपणसत्तसाहूण जह संखं'' ॥[1]३३॥** [ प्र.स./३९ ]

प्रतिक्रमणसूत्रविवरणं तु षडावश्यकप्रान्ते वक्ष्यते । [2]अथ कायोत्सर्गः —कायस्य-शरीरस्य स्थानमौनध्यानक्रियाव्यतिरेकेणान्यत्रोच्छ्वसितादिभ्यः क्रियान्तराध्यासमधिकृत्य य उत्सर्गः —त्यागो 'नमो अरिहंताणं' इति वचनात् प्राक् स कायोत्सर्गः । स च द्विधा — चेष्टायामभिभवे च । तत्र चेष्टायां गमनागमनादावीर्यापथिक्यादिप्रतिक्रमणभावी, अभिभवे च उपसर्गजयार्थं । यदाहुः —

''**सो उस्सग्गो दुविहो, चिट्ठाए अभिभवे अ नायव्वो ।**
**भिक्खायरिआइ पढमो, उवसग्गभिउंजणे बीओ'' ॥१॥** [ आ.नि./१४५२ ]

तत्राभिभवकायोत्सर्गो मुहूर्त्तादारभ्य संवत्सरं यावद् **बाहुबले**रिव भवति । स चानियत एव चेष्टायां त्वष्टपञ्चविंशतिसप्तविंशतित्रिशतीपञ्चशतीअष्टोत्तरसहस्रोच्छ्वासान् यावद् भवति । तत्र नियतानियतविभाग एवमुक्तः —

''**देसिअ राइअ पक्खिअ, चाउम्मासिअ तहेव वरिसे उ ।**
**एएसु होइ नियमा, उस्सग्गा अणिअया सेसा ॥१॥** [ आ.नि./१५२९ ]

शेषागमनादिविषया इति । नियतकायोत्सर्गाणामोघत उच्छ्वासमानं चैवमुक्तम् —

''**सायसयं गोसद्धं, तिण्णेव सया हवंति पक्खंमि ।**
**पंच य चाउम्मासे, अट्ठसहस्सं च वारिसए ॥१ ॥** [ प्र.स./१८५ ]

---

१. एताः सर्वा गाथाः योगशास्त्रविवरणे [३/१३०] अपि दृश्यन्ते ॥ २. तुला–योगशास्त्र-वृत्तिः ३। १२९ प० ७०२ प्रवचनसारोद्धारवृत्तिः भा० १ प० १५७ ॥

'साय'त्ति सायं—प्रदोषस्तत्र शतमुच्छ्वासानां भवति, चतुर्भिरुद्योतकरैरिति, भावित एवायमर्थः प्राक् । 'गोसद्धं ति' प्रत्यूषे पञ्चाशद्यतस्तत्रोद्योतकरद्वयं भवति, शेषं स्पष्टम् । उच्छ्वासमानं चोपरिष्टाद् वक्ष्यति ''**पायसमा ऊसासा**'' [ **आव० नि०** ] इत्यादिना । साम्प्रतं दैवसिकादिषूद्योतकरमानं यथा—

''**चत्तारि दो दुवालस, वीसं चत्ता य हुंति उज्जोया ।**
**देसिअ राइअ पक्खिअ चाउम्मासे अ वरिसे अ** ॥१॥ [ आव.नि./१५३१ ]

भावितार्था । अथ श्लोकमानं यथा—

''**पणवीसमद्धतेरस, सिलोग पण्णत्तरिं च बोद्धव्वा ।**
**सयमेगं पणवीसं, बेबावण्णा य वारिसए** ॥१॥ [ आव.नि./१५३२ ]

स्पष्टैव, नवरं चतुर्भिरुच्छ्वासैः श्लोकः परिगृह्यते, एकस्मिंश्चोद्योतकरे, षट् श्लोकास्ते चतुर्गुणाश्चतुर्विंशतिः एकश्च पादश्चतुर्गुण इत्येकः श्लोको, मिलिताः पञ्चविंशतिः श्लोका दैवसिके एवमग्रेऽपि भाव्यम् । इत्युक्ता नियतकायोत्सर्गवक्तव्यता । अथानियतस्य तमाह—

''**गमणागमणविहारे, सुत्तंमि अ सुमिणदंसणे राओ ।**
**नावाणइसंतरणे, इरिआवहिआपडिक्कमणं**'' ॥१॥ [ आव.नि./१५३३ ]

गमनं—भिक्षादिनिमित्तम् , आगमनं ग्रामादेस्ततश्चात्रेर्यापथिकीं प्रतिक्रम्य पञ्चविंशत्युच्छ्वासमानः कायोत्सर्गः कार्यः । यतः—

''**भत्ते पाणे सयणासणे अ अरहंतसमणसेज्जासुं ।**
**उच्चारे पासवणे, पणवीसं होंति उस्सासा**'' ॥१॥ [ आव.नि./२३४ ]

अस्या अर्थः—भक्तपाननिमित्तमन्यग्रामादौ गमनम् , ततो यदि सद्य एव न वलते तदेर्यापथिकीप्रतिक्रमणम् , ततश्चागमनेऽपि, एवं शयनासननिमित्तमपि, शयनं—संस्तारको वसतिर्वा, आसनं—पीठकादि, अरहंतश(अर्हच्छ)य्या—चैत्यगृहम् , श्रमणशय्या—साधुवसतिः, तत्रापि गत्यागत्योः पूर्ववत् , तथोच्चारे प्रश्रवणे च व्युत्सृष्टे हस्तमात्रादागमनेऽपि प्रतिक्रमणम् , यदि च मात्रके व्युत्सृष्टं तदा परिष्ठापकः प्रतिक्रामति, न[1] तु स्वयम् , हस्तशताद् बहिर्गमने तु स्वयमपीति । एतेषु स्थानेषु पञ्चविंशतिरुच्छ्वासाः कायोत्सर्गमानम् । अथ मूलगाथायां विहारे त्ति—सूत्रपौरुषीनिमित्तं स्ववसतेरन्यत्र गमनम् । यतः—

---

१. स्वयमपि कर्तव्यमिति व्यवहारसूत्राभिप्रायः-इति अत्रैव भाषान्तरग्रन्थे टिप्पणे पृ० ६०३ टि० १३५ ॥

**"निअयालयाओ गमणं, अण्णत्थ उ सुत्तपोरुसिनिमित्तं ।**
**होइ विहारो इत्थ वि, पणवीसं हुंति उस्सग्गा" ॥१॥** [ आव.भा.प्र./२३४ ]

सूत्रे च –उद्देशसमुद्देशयोः सप्तविंशतिः, अनुज्ञापनायां च । यतः –

**"उद्देससमुद्देसे, सत्तावीसं अणुण्णवणयाए ।**
**अट्ठेव य ऊसासा, पट्ठवणपडिक्कमणमाई" ॥१॥** [ आव.नि./१५३४ ]

उत्तरार्धव्याख्या –"**पट्ठविओ कज्जनिमित्तं जइ खलइ, अट्ठुस्सासं उस्सग्गं करिअ गच्छइ, बितिअवारं जइ तो सोलसुस्सासं, तइअवारं जइ तो न गच्छइ, अण्णो पट्ठविज्जइ, अवस्सकज्जे वा देवे वंदिअ पुरओ साहुं ठवेत्ता अण्णेण समं गच्छंति । कालपडिक्कमणे वि अट्ठुस्सासा, आदिसद्दाउ कालगिण्हणपट्ठवणे अ गोअरचरिआए सुअक्खंधपरिअट्टणे अट्ठ चेव, केसिंचि परिअट्टणे पणवीसा**" [ आव.नि.वृत्तौ ] ।

रात्रौ स्वप्नदर्शने –प्राणवधाद्यासेवने शतोच्छ्वासाः, मैथुनासेवने चाष्टतोच्छ्वासा इति भावितमेव । तथा नौनदीसन्तारे पञ्चविंशतिरुच्छ्वासाः । यतः –

**"नावाए उत्तरिउं, वहमाई तह नइं च एमेव ।**
**संतारेण चलेण व, गंतुं पणवीसमुस्सासा" ॥१॥** [ आव.नि./१५३८ ]

उच्छ्वासमानं चेत्थं –

**"पायसमा उस्सासा, कालपमाणेण हुंति णायव्वा ।**
**एवं कालपमाणं, उस्सग्गे होइ णायव्वं" ॥१॥** [ आव.नि./१५३९ ]

पादः श्लोकपादः । कायोत्सर्गविधिस्त्वेवम् –

**"पुव्वं ठंति अ गुरुणो, गुरुणा उस्सारिअंमि पारिंति ।**
**ठायंति उ सविसेसं, तरुणा अण्णोण्णचरिआ[1] उ ॥१॥** [ आव.नि./१५४४ ]
**चउरंगुलमुहपोत्ती, उज्जुए डब्बहत्थरयहरणं ।**
**वोसट्ठचत्तदेहो, काउस्सग्गं करेज्जाहि" ॥२॥** [ आव.नि./१५४५ ]

चउरंगुलं ति –चत्वार्यङ्गुलानि पादयोरन्तरं कार्यं, मुखपोतिका च उज्जुए त्ति – दक्षिणहस्ते ग्राह्या, शेष सुगमम् । स च कायोत्सर्गः उच्छ्रित १ निषण्ण २ शयित ३ भेदेन त्रिधा, एकैकश्चतुर्द्धा –उच्छ्रितोच्छ्रितो द्रव्यत उच्छ्रित ऊद्‌र्ध्वस्थानं भावत उच्छ्रितो धर्मशुक्लध्यान इति प्रथमः १, तथा द्रव्यत उच्छ्रित ऊद्‌र्ध्वस्थानं भावतोऽनुच्छ्रितः

---

१. °वरिआ–L.P.C. ॥

कृष्णादिलेश्यापरिणाम इति द्वितीयः २, द्रव्यतो नोच्छ्रितो नोद्र्ध्वस्थानं भावत उच्छ्रितो धर्मध्यानशुक्लध्याने इति तृतीयः ३, न द्रव्यतो नापि भावत उच्छ्रितो नोद्र्ध्वस्थानं कृष्णादिलेश्यापरिणामश्चेति चतुर्थः ४। एवं निषण्णशयितयोरपि चतुर्भङ्गी वाच्या । कायोत्सर्गस्य च सूत्रार्थ एकोनविंशतिर्दोषाश्च प्राग्व्याख्याता एव । कायोत्सर्गस्यापि फलं निर्जरैव । यदाहुः –

**''काउस्सग्गे जह संठिअस्स भज्जंति अंगमंगाइं ।**
**इय भिंदंति सुविहिया अट्ठविहकम्मसंघायं''** ॥ [ आव.नि./१५५१ ]

अथ प्रत्याख्यानम् , प्रति–प्रतिकूलतया आ–मर्यादया ख्यानं –प्रकथनं प्रत्याख्यानम् , तदपि पूर्वं व्याख्यातमेव । इति षडावश्यकक्रियालक्षणप्रतिक्रमणविधिः ।

इदं च प्रतिदिवसमुभयसन्ध्यमपि विधेयं श्राद्धेन अभ्यासाद्यर्थं च यथाभद्रकेणापि । अत्राह –नन्वप्रतिपन्नान्यतरव्रतस्य यथाभद्रकस्य तदतिचारासम्भवः, तदसम्भवे च तच्छुद्धि-रूपं प्रतिक्रमणकरणमनुचितम् , तथा च तत्पाठोच्चारणमप्यसङ्गतमेव, अन्यथा महाव्रताति-चाराणामप्युच्चारणप्रसङ्गः, इति चेत् ? नैवम् , यथाभद्रकस्यापि मार्गावतारणार्थं दीक्षाविधानमिव प्रतिक्रमणकारणमपि युक्तमेव, अप्रतिपन्नान्यतरव्रतस्यापि च तस्य तदतिचारोच्चारणतोऽश्रद्धानादिविषयस्य प्रतिक्रमणस्यानुमतत्वाद् । यत उक्तम् –

**''पडिसिद्धाणं करणे, किच्चाणमकरणे ( अ ) पडिक्कमणम् ।**
**असद्दहणे अ तहा, विवरीअपरूवणाए अ''** ॥१॥ [ वंदित्तुसूत्रे/४८ ]

अत एव साधुरप्रतिपन्नास्वप्युपासकभिक्षुप्रतिमासु 'एगारसहिं उवासगपडिमाहिं बारसहिं भिक्खुपडिमाहिं' इत्येवं प्रतिक्रामन् भणति । ननु यद्येवं तदा साधुप्रतिक्रमणसूत्रेणैव प्रतिक्रामतु इति चेत् ? अनुमतमेतत् , को वा किमाह ? केवलं श्रावकप्रतिक्रमणसूत्र-मणुव्रतादिविषयस्य प्रतिषिद्धाचरणस्य प्रपञ्चाभिधायकत्वेन सोपयोगतरमिति तेन ते प्रतिक्रामन्तीति **पञ्चाशकवृत्तौ** ।

[१] न चावश्यकर्तव्यमावश्यकं चैत्यवन्दनाद्येव श्रावकस्य न षड्विधमिति वक्तुं युक्तम् ।

**''समणेण सावएण य, अवस्सकायव्वयं हवइ जम्हा ।**
**अंतो अहोनिसिस्स य, तम्हा आवस्सयं नाम''** ॥१॥ [ अ.द्वा.गा./३, आव.मू./३ ]

आगमे श्रावकं प्रत्यप्यावश्यकविधेयत्वस्य स्पष्टमेवोक्तत्वात् । न चात्र चैत्यवन्द-

१. तुला–योगशास्त्रवृत्तिः २।१२९ प० ७२५ ॥

नाद्येवावश्यकं वक्तुमुचितम् , 'अज्झयणछक्कवग्गो' इत्यादितदेकार्थिकपदोपन्यासेन तस्य षड्विधत्वेन निश्चितत्वात् , 'अंतो अहोनिसिस्स य' इतिकालद्वयाभिधानाच्च, चैत्यवन्दनस्य च त्रैकालिकत्वेनोक्तत्वात् । **अनुयोगद्वारेष्वपि –**

''**जन्नं समणे वा समणी वा सावए वा साविआ वा तच्चित्ते तम्मणे तल्लेसे** [१]**तदज्झवसिए तदट्ठोवउत्ते तदप्पिअकरणे तब्भावणभाविए उभओकालं आवस्सयं करेइ, से तं लोउत्तरिअं भावावस्सयं**'' [ अ.द्वा.सू. २८ ] इत्युक्तं, ततः श्रावकस्यापि आवश्यककरणं युक्तमेव । अथ ब्रूषे –षड्विधावश्यकमतिचारशुद्धिरूपं वर्त्तते । न च श्रावकाणामालोचनादिदशप्रकारशुद्धेर्मध्यादेकापि **कल्पादि**ग्रन्थेषूपलभ्यते, न च तेषामतिचारा घटन्ते, संज्वलनोदय एव तेषामुक्तत्वाद् , अत्रोच्यते यद्यपि श्रावकाणां **प्रकल्पादिषु** शुद्धिर्न दृश्यते, तथाप्यसौ **श्रावकजीतकल्पादेः** सकाशादवश्य-मभ्युपगन्तव्या, अन्य**थोपासकदशासु** यदुक्तं –किल भगवान् **गौतम**मुनि**रानन्द**-श्रावकं प्रत्यवादीत् ।

''**तुम णं आणंदा ! एअस्स अट्ठस्स आलोआहि पडिक्कमाहि निंदाहि गरिहाहि अहारिहं तवोकम्मं पायच्छित्तं पडिवज्जाहि**'' [ उ.द.१/१४ ] इति कथं घटते ?, अत एव ज्ञापकादतिचारा अपि तेषां भवन्तीति सिद्धम् , यथा वा अतिचारा असंज्वलनोदयेऽपि भवन्ति तथा प्रागुक्तम् । किञ्च –

''**सव्वं ति भाणिऊणं, विरई खलु जस्स सव्विआ नत्थि ।**
**सो सव्वविरइवाई, चुक्कइ देसं च सव्वं च**'' ॥१॥ [ आव.नि./८०० ]

इत्यनया गाथया सामायिकसूत्रं सर्वशब्दवर्ज्जं श्रावकस्योक्तम् १।

चतुर्विंशतिस्तवस्तु सम्यग्दर्शनशुद्धिनिमित्तत्वात् , सम्यग्दर्शनस्य च श्रावकस्यापि शोधनीयत्वात् , कर्तृविशेषस्य चानभिहितत्वाच्चोपपन्न एवास्य, किञ्च –ईर्यापथिकी-प्रतिक्रमणस्य गमनागमनशब्देन **भगवत्यां शङ्खो**पाख्यानके **पुष्कलिश्रावक**कृतत्वेन दर्शितत्वाद् , गमनागमनशब्दस्य चेर्यापथिकीपर्यायतया **भगवत्या**मेव तेषु तदाख्यानकेषु **ओघनिर्युक्तिचूर्ण्यां** च प्रसिद्धत्वाद् ईर्यापथिकीकायोत्सर्गे च चतुर्विंशतिस्तवस्य प्रायश्चिन्तनीयत्वाच्चासौ सिद्ध इति २।

वन्दनकमपि गुणवत्प्रतिपत्तिरूपत्वाद् , गुणवत्प्रतिपत्तेश्च श्रावकस्याप्यविरुद्धत्वात् , **कृष्णादि**भिश्च तस्य प्रवर्त्तितत्वात् । सङ्गतमेवास्य ननु

---

१. तयज्झवसिए-इति अनुयोगद्वारे पाठ, योगशास्त्रवृत्तौ नास्ति एव पाठः ॥

''**पंचमहव्वयजुत्तो, अनलसमाणपरिवज्जिअमई अ ।**[१]

**संविग्गनिज्जरट्ठी, किइकम्मकरो हवइ साहू**'' ॥१॥ [ आ.नि./११९७ ] ति

इत्यनया **निर्युक्ति**गाथया साधुग्रहणेन श्रावकस्य व्यवच्छेदान्न संगतं तस्य वन्दनकम्, नैवम्, यतः साधुग्रहणं तत्र तदन्यवन्दनकोपलक्षणार्थं, यदि तु व्यवच्छेदार्थमभविष्यत् तदा साध्व्या अपि व्यवच्छेदोऽभविष्यत्, न चासौ सङ्गतः, मातुर्विशेषेण वन्दनकनिषेधात्, तथा 'पंचमहव्वयजुत्तो' अनेन यथा महाव्रतग्रहणादणुव्रतयुक्तस्य व्यवच्छेदस्तथा पञ्चग्रहणाच्चतुर्महाव्रतयुक्तस्य मध्यतीर्थसाधोरपि व्यवच्छेदः स्याद्, न चैतदिष्टमित्यतो निर्विशेषं वन्दनकमपीति ३।

प्रतिक्रमणं तु[२] सामान्यत ईर्यापथिकीप्रतिक्रमणभणनेनैव सिद्धम्, न च विचित्राभिग्रहवतां श्रावकाणां कथमेकेन प्रतिक्रमणसूत्रेण तदुपपद्यत इति वाच्यम्, प्रतिपन्नव्रतस्यातिचरणे प्रतिक्रमणं युक्तम्, अन्यस्य तु अश्रद्धानादिविषयस्यैव प्रतिक्रमणसमाधानस्य सुलभत्वात् ननु साधुप्रतिक्रमणाद् भिन्नं श्रावकप्रतिक्रमणसूत्रमयुक्तं, निर्युक्तिभाष्यचूर्ण्यादिभिरतन्त्रि-तत्वेनानार्षत्वात्, नैवम्, आवश्यकादिदशशास्त्रीव्यतिरेकेण निर्युक्तीनामभावेनौपपाति-काद्युपाङ्गानां च चूर्ण्यभावेनानार्षत्वप्रसङ्गात्, तत् प्रतिक्रमणमप्यस्ति तेषाम् ४। कायोत्सर्गस्तु ईर्यापथिकी प्रतिक्रमणात् पञ्चमप्रतिमाकरणात् **सुभद्रा**श्राविकादिनिदर्शनाच्च श्रावकस्य विधेयतया प्रतिपत्तव्यो, यदि हि साधवोऽपि भङ्गभयात् साकारं कायोत्सर्गं प्रतिपद्यन्ते, तदा गृहिभिः सुतरामसौ तथा प्रतिपत्तव्यः, साध्वपेक्षया तेषामनैष्ठिकत्वादिति ५। एवं प्रत्याख्यानमपि, ननु पारिष्ठापनिकादयश्चाकाराः साधूनामेव घटन्ते, ततो गृहिणामयुक्तमेव तद्, नैवं, यतो यथा गुर्वादयः पारिष्ठापनिकस्यानधिकारिणोऽपि यथा वा **भगवती**योगवाहिनो गृहस्थसंसृष्टाद्यनधिकारिणोऽपि पारिष्ठापनिकाद्याकारोच्चारणेन प्रत्याख्यान्ति, '**अखण्डं सूत्रमुच्चारणीयम्**' इतिन्यायाद्, एवं गृहस्था अपीति न दोषः ६। तस्मात् साधुवच्छ्रावकेणापि श्री**सुधर्मस्वाम्या**दिपरम्परायातविधिना प्रतिक्रमणं कार्यमित्यलं प्रसङ्गेन । अथ प्राक् यत् प्रतिज्ञातं —प्रतिक्रमणविवरणसूत्रं षडावश्यकप्रान्ते वक्ष्यत इति, तत्र च यतिप्रतिक्रमणसूत्र-विवरणस्य यतिधर्माधिकारे वक्ष्यमाणत्वात् श्रावकप्रतिक्रमणस्येदानीमवसरः, तत्र कृत-[३]सामायिकेन प्रतिक्रमणमनुष्ठेयम्, तस्य च सर्वातिचारविशोधकत्वेन विशिष्टश्रेयोभूत-त्वान्मङ्गलादिविधानार्थं प्रथमगाथामाह —

---

१. °माप° L.P.C. ॥ २. L.P. । तु-मु० C. नास्ति ॥ ३. तुला-वन्दारुवृत्तिः प० ८६ तः, श्राद्धदिनकृत्य भा० २ प० ७५ तः ऋषभदेवकेशरीमलसंस्करणे ॥

**''वंदित्तु सव्वसिद्धे, धम्मायरिए अ सव्वसाहू अ ।**
**इच्छामि पडिक्कमिउं, सावगधम्माइआरस्स'' ॥१॥**

'वन्दित्वा' नत्वा, सर्वं वस्तु विदन्ति सर्वेभ्यो हिता वेति सार्वास्तीर्थकृतः, सिध्यन्ति स्म सर्वकर्म्मक्षयान्निष्ठितार्था भवन्ति स्मेति सिद्धाः, सार्वाश्च सिद्धाश्च सार्वसिद्धास्तान्, तथा 'धर्माचार्यान्' श्रुतचारित्रधर्माचारसाधून् धर्मदातॄन् वा, चशब्दादुपाध्यायान् श्रुताद्यापकान् तथा 'सर्वसाधूंश्च' स्थविरकल्पिकादिभेदभिन्नान् मोक्षसाधकान् मुनीन्, चः समुच्चये एवं च विघ्नव्रातोपशान्तये कृतपञ्चनमस्कार इदमाह –'इच्छामि' अभिलषामि, 'प्रतिक्रमितुं' निवर्त्तितुम्, कस्मात् ? इत्याह – 'श्रावकधर्मातिचारात्' जातावेकवचनम्, पञ्चम्यर्थे षष्ठी, ततो ज्ञानाद्याचारपञ्चकस्य चतुर्विंशसतसङ्ख्यातिचारेभ्यः प्रतिक्रमितुमिच्छामीति गाथार्थः ॥१॥

सामान्येन सर्वव्रतातिचारप्रतिक्रमणार्थमाह –

**''जो मे वयाइयारो, नाणे तह दंसणे चरित्ते अ ।**
**सुहुमो य बायरो वा, तं निंदे तं च गरिहामि'' ॥२॥**

'य' इति सामान्ये, 'मे' मम सर्व 'व्रतातिचारः' अणुव्रतादिमालिन्यरूपः पञ्चसप्तति-सङ्ख्यः, सञ्जात इति शेषः तथा 'ज्ञाने' ज्ञानाचारे कालविनयाद्यष्टप्रकारे वितथाचरणरूपः, तथा 'दर्शने' सम्यक्त्वे शङ्कादीनां पञ्चानामासेवनाद्वारेण निःशङ्किताद्यष्टविधे च दर्शनाचारे अनासेवनाद्वारेण, तथा 'चारित्रे' समितिगुप्तिलक्षणेऽनुपयोगरूपो[१]ऽतिचारः, चशब्दात् तपो-वीर्याचारयोः संलेखनायां च, तत्र बाह्याभ्यन्तरभेदात् तपो द्वादशधा, वीर्यं मनोवाक्कायैस्त्रिधा, अतिचारता चानयोर्धर्मे स्वशक्तिगोपनात्, संलेखनायास्तु पञ्चातिचाराः, एवं चतुर्विंश-त्यधिकशतसङ्ख्यातिचारमध्ये यः 'सूक्ष्मो वा' अनुपलक्ष्यः, 'बादरो वा' व्यक्तः, 'तं निन्दामि' मनसा पश्चात्तापेन, 'तं च गर्हे' गुरुसमक्षमिति ॥२॥

प्रायोऽन्यव्रतातिचारा अपि परिग्रहात् प्रादुर्भवन्त्यतः सामान्येन तत्प्रतिक्रमणायाह–

**''दुविहे परिग्गहंमी, सावज्जे बहुविहे य आरंभे ।**
**कारावणे अ करणे, पडिक्कमे देसिअं सव्वं'' ॥१॥**

'द्विविधे परिग्रहे' सचित्ताचित्तरूपे, 'सावद्ये' सपापे, 'बहुविधे' अनेकप्रकारे, 'आरम्भे' प्राणातिपातरूपे, 'कारणे' अन्यैर्विधापने, 'कारणे' स्वयं निवर्त्तने, चशब्दात् क्वचिदनुमतावपि, यो मेऽतिचारस्तमित्यनुवर्त्तते, तं निरवशेषम्, देसिअं ति –आर्षत्वाद्

१. °ननुयोग° इति श्राद्धदिनकृत्ये ॥

दैवसिकम् , एवं रात्रिकपाक्षिकाद्यपि स्वस्वप्रतिक्रमणे, अशुभभावात् प्रातिकूल्येन क्रमामि[१] निवर्त्तेऽहमित्यर्थः । उक्तं च —

"**स्वस्थानाद् यत् परस्थानं, प्रमादस्य वशात् गतः ।**
**तत्रैव क्रमणं भूयः, प्रतिक्रमणमुच्यते**" ॥१॥ [ ] इति ॥३॥

अधुना ज्ञानातिचारनिन्दनायाह —

"**जं बद्धमिंदिएहिं, चउहिं कसाएहिं अप्पसत्थेहिं ।**
**रागेण व दोसेण व, तं निंदे तं च गरिहामि**" ॥४॥

'यद्बद्धं' यत् कृतमशुभं कर्म, प्रस्तावाद् विरतिनिबन्धनकाप्रशस्तेन्द्रियकषाय-वशगानां ज्ञानातिचारभूतम् । यदुक्तम् —

"**तज्ज्ञानमेव न भवति यस्मिन्नुदिते विभाति रागगणः ।**
**तमसः कुतोऽस्ति शक्तिर्दिनकरकिरणाग्रतः स्थातुम् ?**" ॥१॥ [ ]

'इन्द्रियैः' स्पर्शनेन्द्रियादिभिः स्पर्शादिविषयसम्बद्ध**सम्भूतसाधु-सोदासराज-घ्राणप्रियकुमार-मथुरावणिक्-सुभद्राश्रेष्ठिन्या**दिवत् तथा 'चतुर्भिः कषायैः' क्रोधादिभिरप्रशस्तैस्तीव्रौदयिकभावमुपगतै[२]**र्मण्डूकक्षपक-परशुराम-धनश्री-मम्म-णादिवत्** 'रागेण' दृष्टिरागादिरूपेण **गोविन्दवाचकोत्तरा**भ्यामिव, 'द्वेषेण' अप्रीतिरूपेण **गोष्ठामाहिला**दिवत् , वाशब्दौ विकल्पार्थौ, 'तं निन्दे' इत्यादि प्राग्वत् ॥४॥

साम्प्रतं सम्यग्दर्शनस्य चक्षुर्दर्शनस्य च प्रतिक्रमणायाह —

"**आगमणे निग्गमणे, ठाणे चंकमणे अणाभोगे ।**
**अभिओगे अ निओगे, पडिक्कमे देसिअं सव्वं**" ॥५॥

'आगमने' 'मिथ्यादृष्टिरथयात्रादेः सन्दर्शनार्थं कुतूहलेनासमन्ताद् गमने, 'निर्गमने' च, यद्बद्धमित्यनुवर्त्तते, तथा 'स्थाने' मिथ्यादृष्टिदेवकुलादावूद्ध्र्वस्थाने 'चङ्क्रमणे' च तत्रैवेतस्ततः परिष्वष्कणे, क्व सति ? इत्याह —'अनाभोगे' अनुपयोगे, 'अभियोगे' राजाभियोगादिके, 'नियोगे' श्रेष्ठिपदादिरूपे, शेषं पूर्ववत् ॥५॥

साम्प्रतं सम्यक्त्वातिचारप्रतिक्रमणायाह —

"**संका १ कंख २ विगिच्छा ३ पसंस ४ तह संथवो कुलिंगीसु ।**
**सम्मत्तस्सइयारे, पडि०**" ॥६॥

---

१. क्रमामि प्रतिक्रमामि नि° L.P. ॥ २. °र्मण्डुकी° प्रति श्राद्धदिनकृत्ये प० ७८ ॥

D:\new/d-2.pm5\3rd proof

तत्र तावद् दर्शनमोहनीयकर्मोपशमादिसमुत्थोऽर्हदुक्ततत्त्वश्रद्धानरूपः शुभ आत्म-परिणामः सम्यक्त्वं, तस्मिंश्च सम्यक्त्वे श्रमणोपासकेन शङ्कादयः पञ्चातिचारा ज्ञातव्याः, न समाचरितव्याः, तत्र 'संक त्ति' जीवादितत्त्वेषु अस्ति न वेति संशयकरणम् १। 'कंख त्ति' क्षमाऽहिंसादिगुणलेशदर्शनादन्यान्यदर्शनाभिलाषः काङ्क्षा २। 'विगिंछ त्ति' दानादौ फलं प्रति सन्देहो विचिकित्सा, 'विउंछ त्ति' पाठे तु मलाविलगात्रोपधीन साधून् दृष्ट्वा जुगुप्समानस्य विद्वज्जुगुप्सा ३। अहो महातपस्विन एते इत्यादि कुलिङ्गिषु वर्णनं प्रशंसा ४। विभक्तिव्यत्ययात् तैश्च सह परिचयः संस्तवः ५। दृष्टान्ताश्चात्र **पेयापायिनौ १ राजाऽमात्यौ २, जिनदत्तमित्रदुर्गन्धः** ३, **शकटालः** ४, **सुराष्ट्राश्रावक** ५, श्चेति स्वयमूह्याः । एतांश्च सम्यक्त्वातिचारानाश्रित्य यद्बद्धमित्यादि प्राग्वत् ॥६॥

इदानीं चारित्रातिचारप्रतिक्रमणमभिधित्सुः प्रथमं सामान्येनारम्भनिन्दनार्थमाह –

''**छक्कायसमारंभे, पयणे य पयावणे य जे दोसा ।**
**अत्तट्ठा य परट्ठा, उभयट्ठा तेव तं निंदे**'' ॥७॥

षट्कायानां –भूदकाग्निवायुवनस्पतित्रसरूपाणां समारम्भे –परितापने, '**तुला-दण्ड**'न्यायात् संरम्भारम्भयोश्च –सङ्कल्पापद्रावणलक्षणयोः, एतेषु सत्सु , 'ये' 'दोसा' पापानि, न त्वतिचाराः, अनङ्गकृते मालिन्याभावात् , क्व सति ? 'पचने च पाचने च' चशब्दादनुमतौ[1] च कमर्थम् इत्याह –'आत्मार्थं' स्वभोगार्थं 'परार्थं' प्राघूर्णकाद्यर्थं 'उभयार्थं च स्वपरार्थं, चशब्दोऽनर्थकद्वेषादिकृतदोषसूचकः, कारः प्रकारेयत्ताप्रदर्शकः, यद्वा 'आत्मार्थं' मुग्धमतित्वात् साध्वर्थमशने कृते मम पुण्यं भविष्यति, एवं परार्थोभयार्थावपि अथवा षट्कायसमारम्भादिष्वयत्नेनापरिशुद्धजलादिना ये दोषाः कृतास्तांश्च निन्दामीति ॥७॥

साम्प्रतं सामान्येन चारित्रातिचारप्रतिक्रमणायाह –

''**पंचण्हमणुव्वयाणं, गुणव्वयाणं च तिण्हमइयारे ।**
**सिक्खाणं च चउण्हं, पडि०**'' ॥८॥ [ ]

कण्ठ्या नवरम् –अनु सम्यक्त्वप्रतिपत्तेः पश्चात् अणूनि वा महाव्रतापेक्षया लघूनि व्रतानि अणुव्रतानि, तानि[2] पञ्चेति मूलगुणाः, तेषामेव विशेषगुणकारकाणि दिग्व्रतादीनि त्रीणि गुणव्रतानि, एतानि यावत् कथितानि, शिक्षाव्रतानि पुनरित्वरकालिकानि, शिक्षकस्य विद्याग्रहणमिव पुनः पुनरभ्यसनीयानि चत्वारि सामायिकादीनि ॥८॥

१. L.P.C. श्रा० दिन० प० ८३ । च–मु० नास्ति ॥ २. तानि च पञ्च–इति श्राद्धदिनकृत्ये प० ८४ ॥

अधुना प्रथमाह —

''**पढमे अणुव्वयंमी, थूलगपाणाइवायविरईओ ।**
**आयरियमप्पसत्थे इत्थप्पमायप्पसंगेणं**'' ॥९॥

'प्रथमे' सर्वव्रतानां सारत्वादादिमे, 'अणुव्रते' अनन्तरोक्तस्वरूपे, स्थूलको —बाह्यैरुपलक्ष्यत्वाद् बादरो गत्यागत्यादिव्यक्तलिङ्गद्वित्रिचतुष्पञ्चेन्द्रियजीवसम्बन्धिनां प्राणानाम् — इन्द्रियादीनामस्थ्याद्यर्थमतिपातो विनाशस्तस्य विरतिः —निवृत्तिस्तस्याः सकाशादतिचरितमतिक्रान्तं, एतच्च सर्वविरतिसङ्क्रमेऽपि स्याद् , न च तत् प्रतिक्रमणार्हमत आह — 'अप्रशस्ते' क्रोधादिनौदयिकभावे सति 'इत्थं'ति अत्रैव प्राणातिपाते, 'प्रमादप्रसङ्गेन' प्रमादो मद्यादि पञ्चधा, तत्र प्रसञ्जनं —प्रकर्षेण प्रवर्त्तनं प्रसङ्गस्तेन, '**एकग्रहणे तज्जातीयग्रहणाद्**' आकुट्ट्याद्यैरपि, यद्वा विरतिमाश्रित्य यदाचरितं वक्ष्यमाणवधबन्धादिकमसाध्वनुष्ठितमिति ॥९॥

तदेवाह —

''**वह १ बंध २ छविच्छेए ३, अइभारे ४ भत्तपाणवोच्छेए ५ ।**
**पढमवयस्सइयारे पडिक्कमे देसिअं सव्वं**'' ॥१०॥

'वधो' द्विपदादीनां निर्दयताडनम् , 'बन्धो' रज्ज्वादिभि संयमनम् , 'छविच्छेदः' कर्णादिच्छेदनं 'अतिभारः' शक्त्यनपेक्षं गुरुभारारोपणं 'भक्तपानव्यच्छेदो' अन्नपाननिरोधः, सर्वत्र क्रोधादिति गम्यते, एतांश्च प्रथमव्रतातिचारानाश्रित्य यद्बद्धम् , शेषं प्राग्वत् । वधादीनामतिचारता च प्रागतिचाराधिकारे भावितैव, अनाभोगातिक्रमादिना वा सर्वत्रातिचारताऽवसेया ॥९॥

द्वितीयव्रतमाह —

''**बीए अणुव्वयंमी, परिथूलगअलियवयणविरईओ ।**
**आयरियमप्पसत्थे, इत्थ०**'' ॥११॥

'द्वितीये अणुव्रते' परीत्यतिशयेन स्थूलकम् —अकीर्त्यादिहेतुरलीकवचनं कन्यालीकादि पञ्चधा, तत्र द्वेषादिभिरविषकन्यां विषकन्यामित्यादि वदतः कन्यालीकम् १, एवमल्पक्षीरां बहुक्षीरां गामित्यादि वदतो गवालीकम् २, परसत्कां भूमिमात्मसत्कां वदतो भूम्यलीकम् ३, उपलक्षणानि चैतानि सर्वद्विपदचतुष्पदापदालीकानाम् , न्यासस्य —धनधान्यादिस्थापनिकाया हरणम् —अपलापो न्यासापहारः ४, अत्र पूर्वत्र चादत्तादानत्वे सत्यपि वचनस्यैव प्राधान्यविवक्षणात् मृषावादत्वं लभ्यदेयविषये प्रमाणीकृतस्योत्कोचमत्सराद्यभिभूतस्य कूटसाक्षिदानात् कूटसाक्षिकत्वम् ५, अनयोश्च द्विपदाद्यलीकान्तर्भावेऽपि लोकेऽतिगर्हितत्वात्

पृथगुपादानम् , एतस्य पञ्चविधालीकस्य यद्वचनं –भाषणं तस्य विरतेः, आयरियेत्यादि प्राग्वत् ॥११॥

अस्यातिचारप्रतिक्रमणायाह –

''**सहसा रहस्सदारे, मोसुवएसे य कूडलेहे य ।**
**बीअवयस्सइयारे, पडि०**'' ॥१२॥ [ ]

तत्र 'सहस त्ति' 'सूचनात् सूत्रम्' इति सहसा –अनालोच्याभ्याख्यानम् –असद्-दोषाधिरोपणं चौरोऽयमित्याद्यभिधानं सहसाभ्याख्यानम् १, रहस्येकान्ते मन्त्रयमाणान् वीक्ष्येदं चेदं[1] च राजविरुद्धादिकमेते मन्त्रयन्ते इत्याद्यभ्याख्यानं रहोऽभ्याख्यानम् २, स्वदाराणां विश्रब्धभाषितस्यान्यस्मै कथनं स्वदारामन्त्रभेदः, ततो द्वन्द्वं कृत्वा तस्मिन् ३, अज्ञातमन्त्रौषधाद्युपदेशनं मृषोपदेशस्तस्मिन् ४, अन्यमुद्राक्षरबिन्द्वादिना कूटस्यार्थस्य लेखनं कूटलेखस्तस्मिंश्च, शेषं प्राग्वत् ॥१२॥

इदानीं तृतीयव्रतमाह –

''**तइए अणुव्वयंमि, थूलगपरदव्वहरणविरईओ ।**
**आयरियमप्पसत्थे, इत्थप्प०**'' ॥१३॥ [ ]

'तृतीये अणुव्रते' स्थूलकं–राजनिग्रहादिहेतुः परद्रव्यहरणं तस्य विरतिरित्यादि प्राग्वत् ॥१३॥

अस्यातिचारप्रतिक्रमणायाह[2] –

''**तेनाहडप्पओगे, तप्पडिरूवे विरुद्धगमणे य ।**
**कूडतुलकूडमाणे, पडि०**'' ॥१४॥

स्तेनाः –चौरास्तैराहृतं –देशान्तरादानीतं किञ्चित् कुङ्कुमादि तत्समर्घमितिलोभाद्य-त्काणत्रयेण गृह्यते तत् स्तेनाहृतम् १ 'पओगि त्ति' सूचनात् तस्करप्रयोगः, तदेव कुर्वन्तीति तस्कराः –चौराः तेषामुद्यतकदानादिना हरणक्रियायां प्रेरणं प्रयोगः २ 'तप्पडिरूव त्ति' तस्य –प्रस्तुतकुङ्कुमादेः प्रतिरूपं –सदृशं कुसुम्भादि कृत्रिमकुङ्कुमादि वा, तत्प्रक्षेपेण व्यवहारः तत्प्रतिरूपव्यवहारः ३, विरुद्धनृपयो राज्यं विरुद्धराज्यं तत्र ताभ्यामननुज्ञाते वाणिज्यार्थं अतिक्रमणं –गमनं विरुद्धगमनम् ४, कूटतुलाकूटमानं तन्न्यूनाधिकाभ्यां व्यवहरतः[3] ५, यदाह –'**उचियं मोत्तूण कलं, दव्वाइकमागयं च उक्करिसं । निवडियमवि जाणंतो, परस्स संतं न गिण्हिज्जा**' ॥१॥ [ **श्रा.प्र.२६९** ] एतेषु क्रियमाणेषु यद्बद्धमित्यादि प्राग्वत् ॥१४॥

---

१. विशुद्ध० इति श्राद्धदिनकृत्ये प० ८७ ॥ २. C.P. तेणा° मु० ॥ ३. इतोऽग्रे C. मूल पाठः [संबोध प्र० श्रा० व्र० २९] ॥

तुर्यव्रतमाह —

''**चउत्थे अणुव्वयंमि, निच्चं परदारगमणविरईओ ।**
**आयरियमप्पसत्थे इत्थ०**'' ॥१५॥

'चतुर्थे अणुव्रते' नित्यं सदा, परे-आत्मव्यतिरिक्ताः तेषां दाराः —परिणीतसंगृहीत-भेदभिन्नानि कलत्राणि तेषु गमनम् —आसेवनं तस्य विरतेरित्यादि प्राग्वत् ॥१५॥

अस्यातिचारप्रतिक्रमणायाह —

''**अपरिग्गहिया इत्तर, अणंग विवाह तिव्वअणुरागे ।**
**चउत्थ वयस्सइयारे, पडि०**'' ॥१६॥ [ ]

'अपरिगृहीता' विधवा तस्यां गमनमपरिगृहीतागमनम् १ 'इतर त्ति' इत्वरमल्पकालं भाटीप्रदानतः केनचित् स्ववशीकृता वेश्या तस्यां गमनं इत्वरपरिगृहीतागमनम् २ अणंग त्ति' अनङ्गः —कामस्तत्प्रधाना क्रीडा —अधरदशनालिङ्गनाद्या तां परदारेषु कुर्वतोऽनङ्गक्रीडा, **वात्स्यायना**द्युक्तचतुरशीतिकरणासेवनं वा 'विवाह त्ति' परकीयापत्यानां स्नेहादिना विवाहस्य करणं परविवाहकरणम् , स्वापत्येष्वपि सङ्ख्याभिग्रहो न्याय्यः ४ 'तिव्वअणुरागं[1] त्ति' काम-भोगतीव्रानुरागः, कामेषु —शब्दादिषु , भोगेषु —रसादिषु , तीव्रानुरागः —अत्यन्तं तदध्यवसायः ५, स्वदारसन्तोषिणश्च त्रय एवान्त्या अतिचाराः, आद्यौ तु भङ्गावेव, स्त्रिया अपि तथैव, यद्वाऽतिक्रमादिभिरतिचारता अवसेया[2], एतानाश्रित्य यद्बद्धमित्यादि प्राग्वत् ॥१६॥

पञ्चमाणुव्रतमाह —

''**इत्तो अणुव्वए पंचमंमि आयरियमप्पसत्थंमि ।**
**परिमाणपरिच्छेए, इत्थ०**'' ॥१७॥

'इतः' तुर्यव्रतानन्तरं, धनधान्यादिनवविधपरिग्रहपरिमाणलक्षणे 'पञ्चमे अणुव्रते' यदाचरितमप्रशस्ते भावे सति, क्व विषये ? 'परिमाणपरिच्छेदे' परिग्रहप्रत्याख्यान-कालगृहीतप्रमाणोल्लङ्घने, अत्रेत्यादि प्राग्वत् ॥१७॥

अस्यातिचारप्रतिक्रमणायाह —

''**धणधन्नखित्तवत्थुं , रुप्पसुवण्णे य कुवियपरिमाणे ।**
**दुपए चउप्पयंमी, पडि०**'' ॥१८॥ [ ]

---

१. L.P.C. । °रागो त्ति-मु० ॥ २. इतोऽग्रे C. ''उक्तं च-परदारवज्जिणो पंच दु तिन्नि उ सदारसंतुट्ठे । इत्थिइ तिन्नि पंच व नवविगप्पेहिं नायव्वं ति'' इति C. प्रतौ मूलपाठः अधिकः ॥

'धनं' गणिमादि चतुर्द्धा, तत्र गणिमं –पूगफलादि, धरिमं –गुडादि, मेयं –घृतादि, परिच्छेद्यं –माणिक्यादि, 'धान्यं' व्रीह्यादि चतुर्विंशतिधा, एतयोरतिक्रमोऽतिचारः, तत्रधनधान्यस्य प्रमाणप्राप्तस्याधमर्णादिभ्योऽधिकलाभे समुपस्थिते यावताऽग्रेतनं[1] विक्रीणीते तावत् तद्गृह एव तत्स्थापयतः, सत्यङ्कारेण वा स्वीकुर्वतः, स्थूलमूटकादि-बन्धनेन वा धनधन्यातिक्रमरूपः प्रथमोऽतिचारः 'क्षेत्रं' सेतुकेतूभयात्मकं 'वास्तु'-खातोच्छ्रितोभयात्मकं तयोरधिकसम्भवे द्व्यादिसंयोगजनितोऽतिचारः २, 'रूप्यं' रजतं 'सुवर्णं' कनकं, एतयोः पत्न्यादिभ्यः प्रदानेन ३, 'कुपितं' स्थालकच्चोलादि, तस्य स्थूलत्वादिविधानेन ४, 'द्विपदं' गन्त्रीदास्यादि 'चतुष्पदं' गवाश्वादि, तत्र द्विपदचतुष्पदां गर्भागणनेन ५, शेषं प्राग्वत् ॥१९॥

साम्प्रतं त्रीणि गुणव्रतानि, तत्राद्यप्रतिक्रमणायाह –

**''गमणस्स य परिमाणे, दिसासु उड्ढं अहे अ तिरिअं च ।**
**वुड्ढिसइअंतरद्धा, पढमंमि गुणव्वए निंदे'' ॥१९॥**

गमनस्य [च][2] परिमाणे' गतेरियत्ताकरणे, चशब्दाद् अतिक्रान्तम्, क्व विषये ? 'दिक्षु'तदेवाह –उड्ढं ति' उद्ध्र्वं योजनद्विती(त)यादिना[3] गृहीतप्रमाणस्यानाभोगादिना-ऽधिकगमनमूद्ध्र्वदिक्प्रमाणातिक्रमरूपः प्रथमोऽतिचारः १ एवमधस्तिर्यग्दिशोश्चाति-चारद्वयं वाच्यम् ३ 'वुड्ढि त्ति' क्षेत्रवृद्धिः, कोऽर्थः ? सर्वासु दिक्षु योजनशतादिना गृहीतप्राणस्यान्यतरस्यां दिशि योजनशतादेः परतः कायोत्पत्तावन्यादिक्सम्बन्धीनि कतिचिद्योजनानि जिगमिषितायां दिशि वर्द्धयतो दिग्द्वयमीलने त्वङ्गीकृतप्रमाणस्या-नतिक्रमाद् भङ्गाभङ्गलक्षणक्षेत्रवृद्धिरूपस्तुर्योऽतिचारः ४ 'सइअंतरद्ध त्ति' स्मृत्यन्तर्द्धा– स्मृतेर्भ्रंश इत्यर्थः यथा पूर्वस्यां दिशि कृतयोजनशतप्रमाण्यस्य गमनकाले च शतं[4] पञ्चाशद्वा कृतमिति सन्देहे व्यक्तमस्मरतः पञ्चाशत उपरि गच्छतः पञ्चमोऽतिचारः, शतात् परतो भङ्ग एव ५, तदेवं प्रथमे नियमितकतिपयभूभागं मुक्त्वा चतुर्दश-रज्जुप्रमाणलोकगतजन्तुजातयातना[5]रक्षणरूपाय गुणाय व्रतं तस्मिन् यदतिचरितमित्यादि प्राग्वत् ॥१९॥

साम्प्रतं द्वितीयं गुणव्रतम्, तच्च द्विधा –भोगतः कर्मतश्च, भोगोऽपि द्विधा –

---

१. यावन्नाऽग्रे० इति श्राद्धदिनकृत्ये प० ९८ ॥ २. च–L.P.C. नास्ति ॥ ३. °द्वितया° L.P.C. । °द्वितीया° इति श्राद्धदिनकृत्ये प० १०६ ॥ ४. किं शतं–इति श्राद्धदिनकृत्ये प० १०२ ॥ ५. °नाया र° इति श्राद्धदिनकृत्ये प० १०३ ॥

उपभोगपरिभोगभेदात्, तत्र उप इति सकृत् भोग-आहारमाल्यादेरासेवनमुपभोगः, परीत्यसकृद्भोगो –भवनाङ्गनादीनामासेवनं परिभोगः । तत्र गाथामाह –

**"मज्जंमि य मंसंमि य, पुप्फे य फले य गंधमल्ले य ।**
**उवभोगपरिभोगे, बीयंमि गुणव्वए निंदे"** ॥२०॥

श्रावकेण तावदुत्सर्गतः प्रासुकैषणीयाऽऽहारिणा भाव्यम्, असति सच्चित्तपरिहारिणा, तदसति बहुसावद्यमद्यादीन् वर्जयित्वा प्रत्येकमिश्रादीनां कृतप्रमाणेन भवितव्यम्, तत्र मद्यं –मदिरा, मांसं –पिशितम्, चशब्दाच्छेषाभक्ष्यद्रव्याणामनन्तकायादीनां च ग्रहः, तानि च प्रागुक्तानि पञ्चोदुम्बर्यादीनि, पुष्पाणि-करीरमधुकादिकुसुमानि, चशब्दात् त्रससंसक्त-पत्रादिपरिग्रहः, फलानि –जम्बूबील्वादीनि, एषु च मद्यादिषु राजव्यापारादौ वर्त्तमानेन यत् किञ्चित् [१]क्रापणादि कृतं तस्मिन्, एतैरन्तर्भोगः सूचितः, बहिस्त्वयं –'गन्धमल्ले त्ति' [२]गन्धाः –वासाः, माल्यानि –पुष्पस्रजः, अत्रोपलक्षणत्वाच्छेषभोग्यवस्तुपरिग्रहः, तस्मिन्नुक्तरूपे, 'उपभोगपरिभोगे' '**भीमो भीमसेन**' इति न्यायादुपभोगपरिभोगपरिमाणाख्ये 'द्वितीये गुणव्रते' अनाभोगादिना यदतिक्रान्तम्, तन्निन्दामि ॥२०॥

अत्र भोगतोऽतिचारप्रतिक्रमणायाह –

**"सच्चित्ते १ पडिबद्धे ३, अप्पोलदुप्पोलिए[३] य आहारे ।**
**तुच्छोसहिभक्खणया, पडि०"** ॥२१॥

कृतसच्चित्तप्रत्याख्यानस्य कृततत्परिमाणस्य वा सचित्तमतिरिक्तमनाभोगादिनाऽभ्यव-हरतः सच्चित्ताऽऽहारोऽतिचारः १ एवं वृक्षस्थं गुन्दादि राजादनादि वा सास्थिकफलं मुखे प्रक्षिपतः सच्चित्तप्रतिबद्धाहारः २ एवमपक्वस्याग्निनाऽसंस्कृतस्यापरिणतकणिकादेः पिष्टस्य भक्षणमपक्वौषधिभक्षणता ३ एवं दुष्पक्वस्य पृथुकादेर्दुष्पक्वौषधिभक्षणता ४ तुच्छा अतृप्तिहेतुत्वादसारा ओषधिः –कोमलमुद्गशिम्बादिका तां भक्षयतस्तुच्छौषधि-भक्षणता ५। एतद्विषये 'पडिक्कमे' इत्यादि प्राग्वत् ॥२१॥

अत्र व्रते भोगोपभोगोत्पादकानि बहुसावद्यानि कर्मतोऽङ्गारकर्मादीनि पञ्चदश कर्मादानानि तीव्रकर्मो[४]पादानानि श्रावकेण ज्ञेयानि, न तु समाचरणीयानि, अतस्तेषु यदनाभोगादिनाऽऽचरितं तत्प्रतिक्रमणाय गाथाद्वयमाह –

---

१. C. श्राद्धदिनकृत्ये °क्राय° L. मु० ॥ २. L.P. । गन्धा-मु० C. ॥ ३. °यं च आ० इति श्राद्धदिनकृत्ये प० १०७ ॥ ४. °पादाननिदानानि-इति श्राद्धदिनकृत्ये प० १७ ॥

**''इंगाली वणसाडी, भाडी फोडी सुवज्जए कम्मं ।**
**वाणिज्जं चेव य दंतलक्खरसकेसविसविसयं ॥२२॥**
**एवं खु जंतपीलणकम्मं निल्लंछणं च दवदाणं ।**
**सरदहतलायसोसं, असईपोसं च वज्जिज्जा'' ॥२३॥**

कर्मशब्दः पूर्वार्द्धे प्रत्येकं योज्यः, तेनाङ्गारकर्म, वनकर्म, शकटकर्म, भाटककर्म, स्फोटककर्म चेति पञ्च कर्माणि तत्राङ्गारकर्माङ्गारकरणम्, एवमन्यदपि वह्निसमारम्भेण यज्जीवनं तदङ्गारजीविका १ एवं वनकर्मादीन्यपि वाच्यानि, उत्तरार्द्धेन पञ्च वाणिज्यान्याह — 'वाणिज्जमित्यादि' विषयशब्दः प्रत्येकं योज्यस्ततो दन्तविषयं वाणिज्यं दन्तवाणिज्यम्, एवं लाक्षादिष्वपि, तत्राकरे दन्तिदन्तादित्रसाङ्गग्रहणं दन्तवाणिज्यम्, एवं लाक्षादिविक्रयो लाक्षावाणिज्यम्, मधुघृतादिविक्रयो रसवाणिज्यम्, गोमनुष्यादिविक्रयः केशवाणिज्यम्, विषशस्त्रादिविषयो विषवाणिज्यम्, एतत् पञ्चविधं वाणिज्यं पूर्वोक्तं च पञ्चप्रकारं कर्म श्रावको वर्ज्जयेदिति सण्टङ्कः । 'जंतपीलण त्ति' यन्त्रे —उलूखलादौ पीडनं —धान्यखण्डनादि तेन कर्म–जीविका यन्त्रपीडनकर्म 'निल्लंछण त्ति' नितरां लाञ्छनम् —अङ्गावयवच्छेदस्तेन कर्म —जीविका निर्लाञ्छनकर्म, 'दवदाण त्ति' अरण्येऽग्निप्रज्वालनं 'सरदह इत्यादि' सरोद्रहतटाकशोषः—सारणीकर्षणेन ततो जलनिष्कासनमित्यर्थः, 'असईपोसं ति' वृत्त्यर्थं दास्यादिदुःशीलजन्तुपोषणं, लिङ्गमतन्त्रं, सूत्रे च एवंखुशब्दौ गाथापर्यन्ते सम्बध्येते, ततश्चेवम्प्रकाराणि खरकर्माणि गुप्तिपालादीनि च, खु निश्चयेन, सुश्रावको वर्जयेदिति ॥२२-२३॥

साम्प्रतमनर्थदण्डाख्यं तृतीयं गुणव्रतम्, तत्रार्थो —देहस्वजनादीनां कार्यं तदभावोऽनर्थः, ततः प्राणी निष्प्रयोजनं पुण्यधनापहारेण दण्ड्यते —पापकर्मणा विलुप्यते येन सोऽपध्याना-चरितादिकश्चतुर्द्धाऽनर्थदण्डः, तस्य मुहूर्त्तादिकालावधिना निषेधोऽनर्थदण्डव्रतम् । तत्र चापध्यानाचरितपापोपदेशौ व्रताधिकारस्थव्याख्यानादेवावसेयौ, हिंस्रप्रदानप्रमादाचरिते तु बहुसावद्यत्वात् साक्षात्सूत्रकृदेव द्विसूत्र्याऽऽह —

**''सत्थग्गिमुसलजंतगतणकट्ठे मंतमूलभेसज्जे ।**
**दिन्ने दवाविए वा, पडि० ॥२४॥**
**ण्हाणुव्वट्टणवण्णगविलेवणे सद्दरूवरसगंधे ।**
**वत्थासणआभरणे, पडि०'' ॥२५॥**

'शस्त्राग्निमुशलानि' प्रतीतानि, 'यन्त्रकं' गन्त्र्यादि, 'तृणं' महारज्जुकरणादिहेतुर्दर्भादि

वा व्रणकृमिशोधनं बहुकरी वा, 'काष्ठं' अरघट्टयष्ट्यादि, 'मन्त्रो' विषापहारादिः वशीकरणादिर्वा, 'मूलं' नागदमन्यादि ज्वराद्युपशमनमूलिका वा गर्भशातनादि वा मूलकर्म, 'भेषजं' सांयोगिकद्रव्यमुच्चाटनादिहेतुः, एतच्छस्त्रादि प्रभूतभूतसङ्घातघातहेतुभूतं दाक्षिण्याद्यभावेऽन्येभ्यो यद् दत्तं दापितं वा तस्य 'पडिक्कमे इत्यादि' प्राग्वत् ॥२४॥

'स्नानं' अभ्यङ्गपूर्वकमङ्गप्रक्षालनम् , तच्चायतनया त्रससंसक्तभूम्यां सम्पातिमसत्त्वाकुले वाऽकाले वस्त्रापूतजलेन वा यत् कृतम् , 'उद्वर्त्तनं' संसक्तचूर्णादिभिः, उद्वर्त्तनिकाश्च न भस्मनि क्षिप्तास्ततस्ताः कीटिकाकुलाः श्वादिभिर्भक्ष्यन्ते, पादैर्वा मृद्यन्ते, 'वर्णकः' कस्तूरिकादिः 'विलेपनं' कुङ्कुमचन्दनादि, एते च सम्पातिमसत्त्वाद्यतनया कृते 'शब्दो' वेणुवीणादीनां कौतुकेन श्रुतः, शब्दो वा निश्युच्चैःस्वरेण कृतस्तत्र, 'आउज्जोयणविणए' इत्याद्यधिकरणं यदभूत् 'रूपाणि' नाटकादौ निरीक्षितानि, 'रसः' अन्येषामपि तद्गृद्धिहेतुर्वर्णितः, एवं 'गन्धादीन्यपि' अत्र विषयग्रहणात् तज्जातीयमद्यादिप्रमादस्य पञ्चविधस्यापि ग्रहः, यद्वाऽऽलस्येन तैलादिभाजनास्थगनं प्रमादाचरितं तस्मिंश्च 'पडिक्कमे इत्यादि' प्राग्वत् ॥२५॥

अत्रातिचारप्रतिक्रमणायाह —

**''कंदप्पे कुक्कुइए[1], मोहरिअहिगरणभोगअइरित्ते ।**
**दंडंमि अणट्ठाए, तइअंमि गुणव्वए निंदे''** ॥२६॥

'कन्दर्पो' मोहोद्दीपकं हास्यम् १, 'कौकुच्यं नेत्रादिविक्रियागर्भं हास्यजनकं विटचेष्टितम् २, 'मौखर्यं' असम्बद्धबहुभाषित्वम् ३, 'अधिकरण त्ति' संयुक्ताधिकरणता, तत्राधिक्रियते नरकादिष्वात्माऽनेनेत्यधिकरणं—मुशलोदूखलादि संयुक्तमर्थक्रियायां प्रगुणीकृतं तच्च तदधिकरणं च तद्भावः संयुक्ताधिकरणता इह विवेकिना संयुक्तं[2] गन्त्र्यादि न धरणीयं, तद् दृष्ट्वा जनो गृह्णन्न निवारयितुं शक्यते, विसंयुक्ते तु स्वत एव निवारितः स्यात् ४, 'भोगअइरित्ते त्ति' उपभोगपरिभोगातिरिक्तता, तदाधिक्यकरणे ह्यन्येऽपि तत्तैलामलकादि याचित्वा स्नानादौ प्रवर्त्तन्ते, 'दंडंमि अणट्ठाए त्ति' अनर्थदण्डाख्ये 'तइअंमीत्यादि' प्राग्वत् ॥२६॥

साम्प्रतं शिक्षाव्रतानि, तत्र प्रथमं सामायिकं, तत्स्वरूपं च पूर्वमुक्तमेव । तस्यातिचारप्रतिक्रमणायाह —

---

१. C. श्राद्धदिनकृत्ये प० ११२ । कु कु° मु० ॥ २. C.L. श्राद्धदिनकृत्ये प० ११२ । गन्धादि- मु० ॥

**''तिविहे दुप्पणिहाणे, अणवट्ठाणे तहा सइविहूणे ।**
**सामाइअ वितहकए, पढमे सिक्खावए निंदे'' ॥२७ ॥**

'त्रिविधं' त्रिप्रकारं 'दुष्प्रणिधानं' कृतसामायिकस्य मनोवाक्कायानां दुष्प्रयुक्तता, तत्र मनसा गृहादिव्यापारचिन्तनम् १, वाचा सावद्यकर्कशादिभाषणम् २, कायेनाप्रत्यु–पेक्षिताप्रमार्जितस्थण्डिलादौ निषदनादिविधानम् ३, 'अनवस्थानं' सामायिककालावधेरपूरणं यथाकथञ्चिद्वाऽनादृतस्य करणम् ४, तथा 'स्मृतिविहीनं' निद्रादिप्रमादात् शून्यतयाऽनुष्ठितम् ५, एतानाश्रित्य 'सामायिके' प्रथमे शिक्षाव्रते 'वितथाकृते' सम्यगननुपालिते, योऽतिचारस्तं निन्दामीति ॥२७॥

अधुना देशावकाशिकं व्रतं –तच्च पूर्वं योजनशतादिना यावज्जीवं गृहीतदिग्व्रतस्य तथाभीष्टकालं गृहशय्यास्थानादेः परतो गमननिषेधरूपं, सर्वव्रतसंक्षेपकरणरूपं वा । अस्यातिचारप्रतिक्रमणायाह –

**''आणवणे पेसवणे, सद्दे रूवे य पुग्गलक्खेवे ।**
**देसावगासियंमी, बीए सिक्खावए निंदे ॥२८॥**

गृहादौ कृतदेशावकाशिकस्य गृहादेर्बहिस्तात् केनचित् किञ्चिद्वस्त्वानयतः आनयन–प्रयोगः १ एवं प्रस्थापयतः प्रेष्यप्रयोगः २ गृहादेर्बहिःस्थस्य कस्यचित् काशितादिना कार्यकरणार्थमात्मानं ज्ञापयतः शब्दानुपातः ३ एवं [1]स्वरूपं दर्शयतो मालादावारुह्य पररूपाणि वा प्रेक्षमाणस्य रूपानुपातः ४ नियन्त्रितक्षेत्राद् बहिःस्थितस्य कस्यचित् लेष्ट्वादिक्षेपणेन स्वकार्यं स्मारयतः पुद्गलक्षेपः ५ 'देसावगासियंमीत्यादि' प्राग्वत् ॥२८॥

अधुना पोषधोपवासः –तत्र पोषं पुष्टिं प्रक्रमाद् धर्मस्य धत्त इति पोषधः – अवश्यमष्टम्यादिपर्वदिनानुष्ठेयो व्रतविशेषः, तत्रोपवसनं पोषधोपवासः । तद्भेदास्तु पौषधव्रते उक्तास्ततोऽवसेयाः । अत्र चातिचारप्रतिक्रमणायाह –

**''संथारुच्चारविही, पमाय तह चेव भोयणाभोए ।**
**पोसहविहिविवरीए, तइए सिक्खावए निंदे'' ॥२९॥**

'संस्तारकः' कम्बलादिमय उपलक्षणत्वाच्छय्यापीठफलकादि च, 'उच्चार त्ति' उच्चारप्रश्रवणभूमयो द्वादश[[2]द्वादश]विण्मूत्रस्थण्डिलानि, एषां विधौ प्रमादः, कोऽर्थः ? शय्यायां संस्तारके च चक्षुषा अप्रत्युपेक्षिते दुष्प्रत्युपेक्षिते वोपवेशनादि कुर्वतः प्रथमोऽतिचारः १ एवं रजोहरणादिना अप्रमार्जिते दुष्प्रमार्जिते च द्वितीयः २ एवमुच्चारादिभूमीनामपि

१. स्वं रूपं–इति श्राद्धदिनकृत्ये प० १२० ॥ २. द्वादश–L.P.C. नास्ति, श्राद्धदिनकृत्ये अस्ति ॥

द्वावतिचारौ, अतः प्रोच्यते —'तह चेव त्ति' तथैव 'भवत्यनाभोगे' अनुपयुक्ततायां सत्यामित्यतिचारचतुष्टयम् ४, तथा 'पोषधविधिविपरीतः' पोषधविधेश्चतुर्विधस्यापि विपरीतोऽसम्यक्पालनरूपः, यथा —कृतपौषधस्य क्षुधाद्यार्त्तस्य पौषधे पूर्णे श्वः स्वार्थ-माहारादि इत्थमित्थं कारयिष्ये इत्यादि ध्यायतः पञ्चमोऽतिचारः पाठान्तरं वा 'भोयणाभोय त्ति' भोजने —आहारे उपलक्षणत्वात् देहसत्कारादौ आभोग —उपयोगः[1], कदा पौषधः, पूर्णो भविष्यति ? येनाहं भोक्ष्ये इत्यादितत्परतेति पञ्चमः ५। एवं पञ्चभिरतिचारैः पौषध-विधिविपरीते वैपरीत्ये सति 'तइए इत्यादि' प्राग्वत् ॥२९॥

साम्प्रतमतिथिसंविभागाख्यं तुर्यं शिक्षाव्रतम् , तत्र तिथिपर्वादिलौकिकव्यवहारत्यागाद् भोजनकालोपस्थायी श्रावकस्यातिथिः साधुरुच्यते, तस्य सङ्गतो —निर्दोषो न्यायागतानां कल्पनीयान्नपानादीनां देशकालश्रद्धासत्कारक्रमयुक्तः पश्चात्कर्मादिदोषपरिहारेण विशिष्टो भाग आत्मानुग्रहबुद्ध्या दानमतिथिसंविभागः । अत्र चायं विधिः —कृतपौषधेन श्राद्धेन पारणकदिने साधुसद्भावेऽवश्यमतिथिसंविभागव्रतमासेव्य पारयितव्यम् , अन्यदा त्वनियमः, यदाह —''**पढमं जईण दाऊण**'' [ **उपदेशमाला २३८** ] इत्यादि ।

अत्रातिचारप्रतिक्रमणायाह —

''**सच्चित्ते निक्खिवणे, पिहिणे ववएस मच्छरे चेव ।**
**कालाइक्कमदाणे, चउत्थे सिक्खावए निंदे**'' ॥३०॥

देयस्यान्नादेरदानबुद्ध्याऽतिक्रमादिभिरनाभोगेन वा 'सच्चित्ते' पृथ्व्यादौ निक्षिपतः सच्चित्तनिक्षेपणतेति प्रथमोऽतिचारः १ एवं सच्चित्तेन पिदधतः सच्चित्तपिधानता २ स्वकीयमपि परकीयमिदमित्यभिदधतः परव्यपदेशः ३ किमस्मादप्यहं न्यून इतिमात्सर्याद् ददतो मत्सरिता ४ साधुभिक्षावेलामतिक्रम्य निमन्त्रयमाणस्य कालातिक्रमः ५ शेषं प्राग्वत् ॥३०॥

साम्प्रतमत्र यद्रागादिना दत्तं तत्प्रतिक्रमणायाह —

''**सुहिएसु य दुहिएसु य, जा मे अस्संजएसु अणुकंपा ।**
**रागेण व दोसेण व, तं निंदे तं च गरिहामि**'' ॥३१॥

साधुष्विति विशेष्यं गम्यं संविभागव्रतप्रस्तावात् , ततः साधुषु कीदृक्षु ? सुष्ठु हितं —ज्ञानादित्रयं येषां ते सुहितास्तेषु , पुनः कीदृक्षु ? 'दुःखितेषु' रुजा तपसा वा क्लान्तेषु प्रान्तोपधिषु वा, पुनः किंविशिष्टेषु ? [2]न स्वयं —स्वच्छन्देन यता —उद्यता

१. L.P.C. श्राद्धदिनकृत्ये च । उपभोगः-मु० ॥ २. L.P.C. श्राद्धदिनकृत्ये च प० १३४ । (न)-मुः ॥

अस्वंयतास्तेषु , गुर्वाज्ञया विहरत्सु इत्यर्थः । 'या' मया कृताऽनुकम्पा–अन्नादिदानरूपा भक्तिः, अनुकम्पाशब्देनात्र भक्तिः सूचिता । यथोक्तम् –

''**आयरिअणुकंपाए, गच्छो अणुकंपिओ महाभागो ।**
**गच्छाणुकंपमाए, अव्वुच्छित्ती कया तित्थे**'' ॥१॥ [ **ओ.नि.भा./१२७** ]

'रागेण' पुत्रादिप्रेम्णा, न तु गुणवत्त्ववुद्ध्या, तथा 'द्वेषेण' द्वेषोऽत्र साधुनिन्दाख्यः, यथा अदत्तदाना धनधान्यादिरहिता मलाविलसकलदेहा ज्ञातिजनपरित्यक्ताः क्षुधार्त्ताः सर्वथा निर्गतिका अमी, अत उपष्टम्भार्हा इत्येवं निन्दापूर्वकं याऽनुकम्पा सापि निन्दार्हा, अशुभदीर्घायुष्कहेतुत्वात् । यद् **आगमः** –

''**तहारूवं समणं वा माहणं वा संजयविरयपडिहयपच्चक्खायपावकम्मं हीलित्ता निंदित्ता खिंसित्ता गरहित्ता अवमन्नित्ता अमणुन्नेणं अपीइकारगेणं असणपाणखाइ-मसाइमेणं पडिलाभित्ता असुहदीहाउयत्ताए कम्मं पकरेइ**''[ ] यद्वा –सुखितेषु [१]दुःखितेषु वा, असंयतेषु पार्श्वस्थादिषु , शेषं तथैव । नवरं 'द्वेषेण' 'दगपाणं पुप्फफलम्' इत्यादि-तद्गतदोषदर्शनान्मत्सरेण, अथवा 'असंयतेषु' षड्विधजीववधकेषु कुलिङ्गिषु , 'रागेण' एकग्रामोत्पत्त्यादिप्रीत्या, 'द्वेषेण' प्रवचनप्रत्यनीकतादिदर्शनोद्भवेन, तदेवंविधं दानं निन्दामि, गर्हे च, यत् पुनरौचित्यदानं तन्न निन्दार्हं, जिनैरपि वार्षिकं दानं ददद्भिस्तस्य दर्शितत्वात् ॥३१॥

सम्प्रति साधुषु यन्न दत्तं तत्प्रतिक्रमितुमाह –

''**साहूसु संविभागो, न कओ तवचरणकरजुत्तेसु ।**
**संते फासुयदाणे, तं निंदे०**'' ॥३२॥

कण्ठ्या । नवरं –तपश्चरणकरणयुक्तेष्वित्यत्र तपसः पृथगुपादानमनेन निकाचितान्यपि कर्माणि क्षीयन्त इति प्राधान्यख्यापनार्थम् ॥३२॥

सम्प्रति संलेखनातिचारान् परिजिहीर्षुराह –

''**इहलोए परलोए, जीवियमरणे य आसंसपओगे ।**
**पंचविहो अइयारो, मा मज्झं हुज्ज मरणंते**'' ॥३३॥

अत्राशंसाप्रयोग इति सर्वत्र योज्यम् , तत्र प्रतिक्रामकं प्रतीत्येहलोको –नरलोक-स्तत्राशंसा –राजा स्यामित्याद्यभिलाषस्तस्याः प्रयोगो –व्यापार इहलोकाशंसाप्रयोगः १,

---

१. L.P.C. श्राद्धदिनकृत्ये च प० १३४ । दुःखितेषु–मु० नास्ति ॥

एवं देवः स्यामित्यादिपरलोकाशंसाप्रयोगः २, तथा कश्चित् कृतानशनः प्रभूतपौरजनव्रात-विहितमहामहसततावलोकनात् प्रचुरवन्दारुवृन्दवन्दनसम्मर्ददर्शनात् अस्तोकविवेकि-लोकसत्कृत[१]श्लोकसमाकर्णनात् पुरतः सम्भूय भूयो भूयः [२]सद्धार्मिकजनविधीयमानोप-बृंहणश्रवणात् अनघसमस्तसङ्घजनमध्यसमारब्धपुस्तकवाचनवस्त्रमाल्यादिसत्कार-निरीक्षणाच्चैवं मन्यते —प्रतिपन्नानशनस्यापि मम जीवितमेव सुचिरं श्रेयः, यत एवंविधा मदुद्देशेन विभूतिर्वर्त्तत इति जीविताशंसाप्रयोगः ३, तथा कश्चित् कर्कशक्षेत्रे कृतानशनः प्रागुक्तपूजाद्यभावे क्षुधाद्यार्त्तो वा चिन्तयति-किमिति शीघ्रं न म्रियेऽहमिति मरणाशंसाप्रयोगः ४, तथा कामभोगाशंसाप्रयोगः, तत्र कामौ—शब्दरूपौ, भोगा-गन्धरसस्पर्शाः, यथा ममास्य तपसः प्रभावात् प्रेत्य सौभाग्यादि भूयादिति ५ एष 'पञ्चविधोऽतिचारो' 'मा' 'मम' 'भूयान्' मरणान्ते यावच्चरमोच्छ्वास इति ॥३३॥

सर्वोऽप्यतिचारो योगत्रयसम्भवोऽतस्तमुद्दिश्य तैरेव प्रतिक्रामन्नाह —

''**काएण काईयस्सा, पडिक्कमे वाइयस्स वायाए ।**
**मणसा माणसियस्सा, सव्वस्स वयाइयारस्स**'' ॥३४॥

कायेन वधादिकारिणा शरीरेण कृतः कायिकस्तस्य, आर्षत्वादत्र दीर्घः, 'कायेन' तपःकायोत्सर्गाद्यनुष्ठानपरेण देहेन, एवं वाचा सहसाभ्याख्यानदानादिरूपया कृतस्य वाचिकस्य, वाचैव मिथ्यादुष्कृतकरणादिलक्षणया, तथा मनसा देवतत्त्वादिषु शङ्कादि-कलुषितेन कृतो मानसिकस्तस्य मनसैव हा दुष्टं कृतमित्याद्यात्मनिन्दापरेण, सर्वस्य व्रतातिचारस्य प्रतिक्रमामीति सामान्येन योगत्रयप्रतिक्रमणमुक्तम् ॥३४॥

सम्प्रति विशेषतस्तदेवाह —

''**वंदणवयसिक्खागारवेसु सन्नाकसायदंडेसु ।**
**गुत्तीसुसमिईसु य, जो अइयारो तयं निंदे**'' ॥३५॥

'वन्दनं' चैत्यवन्दनं गुरुवन्दनं च, 'व्रतानि' स्थूलप्राणातिपातादीनि पौरुष्यादि-प्रत्याख्यानरूपा नियमा वा, 'शिक्षा'ग्रहणासेवनरूपा द्विविधा, तत्र ग्रहणशिक्षा सामायिकादि-सूत्रार्थग्रहणरूपा । यदाह —

''**सावगस्स जहन्नेणं अट्ठप्पवयणमायाओ, उक्कोसेणं छज्जीवणिया सुत्तओ वि अत्थओ वि, पिंडेसणज्झयणं न सुत्तओ, अत्थओ पुण उल्लावेणं सुणइ त्ति**'' । [ ]
आसेवनशिक्षा तु '**नमस्कारेणावबोधः**' [ **श्राद्धदिनकृत्ये** ] इत्यादिदिनकृत्यलक्षणा,

---

१. °सत्कोप° इति श्राद्धदिनकृत्ये प० १३५ ॥ २ साधर्मि° इति श्राद्धदिनकृत्ये प० १३५ ॥

'गौरवाणि' जात्यादिमदस्थानानि, तानि प्रतीतानि, ऋद्ध्यादीनि वा[1], वन्दनं च व्रतानि चेत्यादिद्वन्द्वस्तेषु, तथा 'संज्ञाः' आहार १ भय २ मैथुन ३ परिग्रह ४ रूपाश्चतस्रः, तथा पराः षट् संज्ञाः क्रोध १ मान २ माया ३ लोभ ४ लोक ५ ओघ ६ रूपा मीलिताश्च दश, पञ्चदश वा ताश्च आहारादि ४ क्रोधादि ४ सुख-दुःख-मोह-वितिगिच्छा-शोक-धर्मौघरूपाः, आसु च लोकसंज्ञामीलने षोडशापि, तथा कषः –संसारस्तस्याऽऽयो – लाभो येभ्यस्ते कषायाः –क्रोधादयः, तथा दण्ड्यते धर्मधनापहारेण प्राणी यैस्तेऽशुभ-मनोवाक्कायरूपा दण्डा, मिथ्यादर्शनमायानिदानशल्यरूपा वा, तेषु, तथा 'गुप्तिषु' अशुभयोगनिरोधरूपासु, तथा 'ईर्यादिषु' पञ्चसु समितिषु, चशब्दाद् दर्शनप्रतिमाद्य-शेषधर्मकृत्येषु च, निषिद्धकरणादिना योऽतिचारस्तकं निन्दामीति ॥३५॥

साम्प्रतं सम्यग्दर्शनमाहात्म्योपदर्शनायाह –

**''सम्मद्दिट्ठी जीवो, जइ वि हु पावं समायरइ किंचि ।**
**अप्पो सि होइ बंधो, जेण न निद्धंधसं कुणइ''** ॥३६॥

सम्यग् –अविपरीता दृष्टिः –बोधो यस्य स सम्यग्दृष्टिर्जीवः, 'यद्यपि' कथञ्चिदनिर्वहन् 'पापं' कृष्याद्यारम्भं 'समाचरति' 'किञ्चित्' स्तोकं निर्वाहमात्रमित्यर्थः, हुरत्र तथापीत्यर्थे, ततस्तथाप्यल्पः–पूर्वगुणस्थानापेक्षया स्तोकः, 'सि'त्ति तस्य श्रावकस्य 'भवति' 'बन्धो' ज्ञानावरणादिकर्मणाम्, कुतः ? इत्याह –'येने'ति यस्मान्न 'निद्धंधसं ति' निर्दयम्, क्रियाविशेषणमिदम्, 'कुरुते' प्रवर्त्तते, पशुवधनिबन्धनवाणिज्योद्यत**चारुदत्त**वदिति ॥३६॥

ननु स्तोकस्य विषस्य विषमा गतिरित्यल्पस्यापि बन्धस्य का गतिरित्यत आह –

**''तं पि हु सप्पडिक्कमणं, सप्परियावं सउत्तरगुणं च ।**
**खिप्पं उवसामेई, वाहि व्व सुसिक्खिओ विज्जो''** ॥३७॥

'तदपि' यत्सम्यग्दृष्टिना कृतमल्पं पापम्, सह प्रतिक्रमणेन षड्विधावश्यकेन वर्त्तत इति सप्रतिक्रमणम्, 'सपरितापं' पश्चात्तापानुगतम्, पकारस्य द्वित्वमार्षत्वात्, 'सोत्तरगुणं च' गुरूपदिष्टप्रायश्चित्तचरणान्वितं 'क्षिप्रं' शीघ्रम्, 'उपशमयति' निष्प्रतापं करोति क्षपयति वा, श्रावकः हुरित्यस्यात्रैवार्थत्वात् निष्प्रतापं करोत्येवेत्यर्थः । कमिव ? इत्याह –'व्याधिमिव' साध्यरोगमिव 'सुशिक्षितो वैद्य' इति ॥३७॥

---

१. इतोऽग्रे ''तत्र प्रभूतधनस्वजनादिभिर्गर्वकरणमृद्धिगौरवम्, अबलाद्यवायदशार्णभद्रादेरिव, रसेसु-मधुरान्नपानादिषु गार्ध्यं रसगौरवं महद्दोषाय, मथुरामङ्गवादेरिव २, मृदुशय्यासनाद्यभिष्वङ्गः सातगौरवं दुर्गतिपाताय शशिराजादेरिव ३'' इति प्रतौ C. मूलपाठोऽधिकः । श्राद्धदिनकृत्यवृत्तौ प० १६९ द्रष्टव्यम् ॥

दृष्टान्तान्तरमाह —

**''जहा विसं कुट्ठगयं मंतमूलविसारया ।**
**विज्जा हणंति मंतेहिं, तो तं हवइ निव्विसं''** ॥३८॥

कण्ठ्या । नवरं —'विज्जा' इति वैद्याः 'तं ति' तत् पापम् , यद्यप्यसौ विषार्त्तस्तेषां मन्त्राक्षराणां न तथाविधमर्थमवबुद्ध्यते, तथाप्यचिन्त्यो हि मणिमन्त्रौषधीनां प्रभाव' इति तदक्षरश्रवणेऽपि गुणः संपनीपद्यते ॥३८॥

दार्ष्टान्तिकमाह —

**''एवं अट्ठविहं कम्मं, रागदोससमज्जियं ।**
**आलोयंतो य निंदितो, खिप्पं हणइ सुसावओ''** ॥३९॥

कण्ठ्या । नवरं —सुशब्दः पूजार्थः, स च ''**कयवयकम्मो**'' [ ] इत्यादिना पूर्वोक्त-षट्स्थानयुक्तस्य भावश्रावकत्वस्य सूचकः । एनमेवार्थं सविशेषमाह —

**''कयपावो वि मणुस्सो, आलोइयनिंदिओ गुरुसगासे ।**
**होइ अइरेगलहुओ, ओहरियभरु व्व भारवहो''** ॥४०॥

सुबोधा नवरं —मनुष्यग्रहणमेतेषामेव प्रतिक्रमार्हत्वख्यापनार्थम् , 'आलोइअनिंदिओ त्ति' आलोचितनिन्दितः सम्यक्कृतालोचननिन्दाविधिरित्यर्थः, 'गुरुसकाशे' इत्यनेन चागुरोरगीतार्थादेरन्तिके आत्मनैव वा क्रियमाणाया आलोनचायाः शुद्ध्यभावो दर्शितः, 'ओहरिअभरु व्व त्ति' अपहृतभार इवेति ॥४०॥

सम्प्रति श्रावकस्य बह्वारम्भरतस्याप्यावश्यकेन दुःखान्तो भवतीति दर्शयितुमाह —

**''आवस्सएण एएण, सावओ जइ वि बहुरओ होइ ।**
**दुक्खाणमंतकिरियं, काही अचिरेण कालेण''** ॥४१॥

आयश्यकेनैतेनेति —षड्विधभावावश्यकरूपेण, न तु दन्तधावनादिना द्रव्यावश्यकेन, 'श्रावको' 'यद्यपि' 'बहुरजा' बहुबध्यमानकर्मा बहुरतो वा विविधसावद्यारम्भासक्तो भवति, तथापीत्यध्याहाराद् 'दुःखानां'' शारीरमानसानां 'अंतकिरियं' अन्तक्रियां विनाशं 'करिष्यत्यचिरेण' स्तोकेनैव कालेन, अत्र चान्तक्रियाया अनन्तरहेतुर्यथाख्यातचारित्रम् , तथापि परम्पराहेतुरिदमपि जायते, **सुदर्शनादे**रिवेति ॥४१॥

सम्प्रति विस्मृतातिचारं प्रतिक्रमितुमाह —

**''आलोयणा बहुविहा, न य संभरिया पडिक्कमणकाले ।**
**मूलगुणउत्तरगुणे, तं निंदे तं च गरिहामि''** ॥४२॥

कण्ठ्या । नवरं–'आलोचना' गुरुभ्यो निजदोषकथनम्, उपचारात् तत्कारणभूता प्रमादक्रियाप्यालोचना, 'पडिक्कमणकाले त्ति' आलोचनानिन्दागर्हाऽवसरे ॥४२॥

एवं प्रतिक्रामको दुष्कृतनिन्दादीन् विधाय विनयमूलधर्माराधनाय कायेनाभ्युत्थितः 'तस्स धम्मस्स केवलीपण्णत्तस्स त्ति' भणित्वा मङ्गलगर्भमिदमाह–

**''अब्भुट्ठिओ मि आराहणाइ, विरओ विराहणाए अ ।**
**तिविहेण पडिक्कंतो, वंदामि जिणे चउव्वीसं''** ॥४३॥

'तस्य' गुरुपार्श्वे प्रतिपन्नस्य 'धर्मस्य' श्रावकधर्मस्य 'केवलिप्रज्ञप्तस्य' 'अभ्युत्थितोऽस्म्याराधनाय' उद्यतोऽहं सम्यक् पालनार्थम्, 'विरतश्च विराधनाया' निवृत्तः खण्डनायाः त्रिविधेनेत्यादि सुगमम् ॥४३॥

एवं भावजिनान्नत्वा सम्यक्त्वशुद्ध्यर्थं त्रिलोकगतस्थापनार्हद्वन्दनार्थमाह–

**''जावंति चेइयाइं०''** ॥४४॥

कण्ठ्या । नवरं–'इहसंतो त्ति' इहस्थितः ॥४४॥

साम्प्रतं सर्वसाधुवन्दनायाह–

**''जावंत के वि साहु , भर०''** ॥४५॥

'यावन्तः केचित् साधवो'[1] जिनस्थविरकल्पिकादिभेदभिन्नाः, उत्कर्षतो नवकोटिसहस्रसङ्ख्या, जघन्यतस्तु *द्विकोटिसहस्रप्रमिताः, भरतैरावतमहाविदेहेषु, चशब्दात् संहरणादिनाऽकर्मभूम्यादिषु च, सर्वेभ्यस्तेभ्यः प्रणतस्त्रि*विधेनेत्यादि सुगमम् ॥४५॥

एवमसौ प्रतिक्रामकः कृतसमस्तचैत्ययतिप्रणतिर्भविष्यत्कालेऽपि शुभभाव-[2]माशंसन्नाह–

**''चिरसंचियपावपणासणीइ भवसयसहस्समहणीए ।**
**चउवीसजिणविणिग्गयकहाइ वोलंतु मे दिअहा''** ॥४६॥

'कण्ठ्या । नवरं–'कथया' तन्नामोच्चारणतद्गुणोत्कीर्त्तनतच्चरितवर्णनादिकया वचनपद्धत्या, 'वोलंतु त्ति' व्रजन्तु ॥४६॥

सम्प्रति मङ्गल[3]पूर्वकं जन्मान्तरेऽपि समाधिबोध्याशंसामाह–

---

१. * * चिह्नद्वयमध्यवर्तिपाठः मु० मध्ये [ ] ईदृशे कोष्ठके C. प्रतौ पार्श्वभागे वर्तते ॥ २. °माशंसयन्नाह–इति श्राद्धदिनकृत्ये प० १४२ ॥ ३. °पूर्विकां–इति श्राद्धदिनकृत्ये प० १४२ ॥

''**मम मंगलमरिहंता[१], सिद्धा साहू सुअं च धम्मो य ।**
**समद्दिट्ठी देवा, दिंतु समाहिं च बोहिं च**'' ॥४७॥

'मम मङ्गलमर्हन्तः सिद्धाः साधवः' 'श्रुतं' चाङ्गोपाङ्गाद्यागमः, 'धर्मः' चारित्रात्मकः, चशब्दाल्लोकोत्तमाश्च, शरणं चैते इति द्रष्टव्यम् । चत्तारि मङ्गलमित्यादौ चत्वार्येव मङ्गलान्युक्तानि, अत्र तु धर्मान्तर्गत्वेऽपि श्रुतस्य पृथग्ग्रहणं ज्ञानक्रियाभ्यां समुदिताभ्यामेव मोक्ष इति ज्ञापनार्थम् , तथा 'सम्यग्दृष्टयः' अर्हत्पाक्षिका देवाश्च देव्यश्चेत्येकशेषाद् देवा — यक्षाम्बाप्रभृतयो 'ददतु' प्रयच्छन्तु 'समाधिं' चित्तस्वास्थ्यं 'बोधिं' प्रेत्य जिनधर्मप्राप्तिरूपाम्। आह —ते देवाः समाधिदाने किं समर्था न वा ?, यद्यसमर्थास्तर्हि तत्प्रार्थनस्य वैयर्थ्यं, यदि समर्थास्तर्हि दूरभव्याभव्येभ्यः किं न प्रयच्छन्ति ?, अथैवं मन्यते —योग्यानामेव ते समर्था, नायोग्यानां, तर्हि योग्यतैव प्रमाणम् , किं तैरजागलस्तनकल्पैः ?, अत्रोच्यते, सर्वत्र योग्यतैव प्रमाणम् , परं न वयं विचाराक्षमनियतिवाद्यादिवदेकान्तवादिनः, किन्तु जिनमतानुयायिनः, तच्च सर्वनयसमूहात्मकस्याद्वादमुद्रानतिभेदि, '**सामग्री वै जनिका**'इति वचनात् , यथा हि घटनिष्पत्तौ मृदो योग्यतायामपि कुलालचक्रचीवरदवरकदण्डादयोऽपि तत्र सहकारिकारणम् , एवमिहापि जीवयोग्यतायां सत्यामपि तथा तथा प्रत्यूहनिराकरणेन देवा अपि समाधिबोधिदाने समर्था भवन्ति **मेतार्यादे**रिव इत्यतो न निरर्थका तत्प्रार्थनेति ॥४७॥

ननु स्वीकृतव्रतस्य प्रतिक्रमणं युक्तं, न त्वव्रतिनां व्रतासत्त्वेनातिचारासंभवादिति चेत् , मैवं, यतो नातिचारेष्वेव प्रतिक्रमणं, किन्तु चतुर्षु स्थानेषु इति[२] । येषु चतुर्षु स्थानेषु प्रतिक्रमणं भवति तदुपदर्शनायाह —

''**पडिसिद्धाणं करणे, किच्चाणमकरणे अ पडिक्कमणं ।**
**अस्सद्दहणे अ तहा, विवरीअपरूवणाए य**'' ॥४८॥

'प्रतिषिद्धानां' सम्यक्त्वाणुव्रतादिमालिन्यहेतुशङ्कावधादीनां करणे' 'कृत्यानां' चाङ्गीकृतपूजादिनियमानामकरणे 'अश्रद्धाने' च निगोदादिविचारविप्रत्यये, तथा 'विपरीतप्ररूपणायां' उन्मार्गदेशनायाम् , इयं हि [३]चतुरन्तादभ्रभवभ्रमणहेतु**र्मरीच्यादे**रिव, तस्यां चानाभोगादिना कृतायां प्रतिक्रमणं भवतीति । ननु श्रावकस्य धर्मकथनेऽधिकारोऽस्ति ?, अस्तीति ब्रूमः, गीतार्थादधिगतसूत्रार्थस्य गुरुपरतन्त्रवचनस्य तस्यैव सूत्रार्थस्य

१. L.P. । °मरहंता-मु० C. ॥ २. इति । तान्याह-पडि° L.P. ॥ ३. दुरन्तादभ्र° इति श्राद्धदिनकृत्ये प० १४३ ॥

कथने को नाम नाधिकारः ?, "**पढइ सुणेइ गुणेइ, जणस्स धम्मं परिकहेइ**" [ ] इत्यादिवचनात्।

तथा **चूर्णिः**- '**सो जिणदाससावओ अट्ठमिचउद्दसीसुं उववासं करेइ पुत्थयं च वाएइ**'[ ] इत्यादि ॥४८॥

साम्प्रतमनादिसंसारसागरावर्त्तान्तर्गतानां सत्त्वानामन्योऽन्यं वैरसम्भवात् तत्क्षमणायाह[१] —

"**खामेमि सव्वजीवे, सव्वे जीवा खमंतु मे ।**
**मित्ती मे सव्वभूएसु , वेरं मज्झ न केणई**" ॥४९॥

'क्षमयामि सर्वजीवान्' अनन्तभवेष्वप्यज्ञानमोहावृतेन या तेषां कृता पीडा तयोरपगमान्मर्षयामि, सर्वे जीवाः क्षाम्यन्तु मे दुश्चेष्टितम्, अत्र हेतुमाह—'मैत्री मे सर्वभूतेषु' 'वैरं मम न केनचित्' कोऽर्थः ? मोक्षलाभहेतुभिस्तान् सर्वान् स्वशक्त्या लम्भयामि, न च केषाञ्चिद् विघ्नकृतामपि विघाते वर्त्तेऽहमिति । वैरं हि भूरिभव-परम्परा-ऽनुयायि **कमठ-मरुभूत्यादी**नामिवेति ॥४९॥

साम्प्रतं प्रतिक्रमणाध्ययनमुपसंहरन्नवसानमङ्गलप्रदर्शनार्थमाह—

"**एवमहं आलोइय, निंदिय गरहिय दुगंछिउं संमं ।**
**तिविहेण पडिक्कंतो, वंदामि जिणे चउव्वीसं**" ॥५०॥

कण्ठ्या । नवरं—'दुगुंछिउं'ति जुगुप्सित्वा धिग्मां पापकारिणमित्यादिना, सम्यगिति च सर्वत्र योज्यम्, इत्येवमल्परुचिसत्त्वबोधनाय **श्राद्धप्रतिक्रमणसूत्र**सङ्क्षेपार्थोऽत्र लिखितो, विस्तरार्थस्तु । **बृहद्वृत्तितश्चूर्णित**श्चावसेयः ।

अत्र च प्रसङ्गतोऽन्यान्यपि शेषसूत्राणि व्याख्यायन्ते—

"**आयरिअ उवज्झाए, सीसे साहम्मिए कुलगणे अ ।**
**जे मे केइ कसाया, सव्वे तिविहेण खामेमि**" ॥१॥

आचार्ये उपाध्याये शिष्ये साधर्मिके कुले गणे च ये मे केऽपि कषायाः कृताः सन्ति, तान् सर्वान् अहं त्रिविधेन मनोवाक्काययोगेन क्षमयामि ॥१॥

"**सव्वस्स समणसंघस्स, भगवओ अंजलिं करिअ सीसे ।**
**सव्वं खमावइत्ता, खमामि सव्वस्स अहयं पि**" ॥२॥

"सर्वस्य श्रमणसङ्घस्य भगवतः अञ्जलिं कृत्वा शीर्षे सर्वं क्षमयित्वा क्षाम्यामि सर्वस्य च अहमपि ॥२॥

---

१. °त्क्षाम° इति श्राद्धदिनकृत्ये प० १४३ ॥

**''सव्वस्स जीवरासिस्स, भावओ धम्मनिहिअनिअचित्तो ।**
**सव्वं खमावइत्ता, खमामि सव्वस्स अहयं पि''** ॥३॥

सर्वस्य जीवराशेः भावतो, धर्मे निहितं निजचित्तं येन स तथा ईदृशः, सर्वं क्षमयित्वा क्षाम्यामि सर्वस्य अहमपि ॥३॥

अथ स्तुतिः–''**सुअदेवया भगवई, नाणावरणीयकम्मसंघायं ।**
**तेसिं खवेउ सययं, जेसिं सुअसायरे भत्ती''** ॥१॥

श्रुतदेवता भगवती ज्ञानावरणीयकर्मसङ्घातं तेषां क्षपयतु सततं येषां श्रुतसागरे भक्तिरस्ति ॥१॥

**''जीसे खित्ते साहू , दंसणनाणेहिं चरणसहिएहिं ।**
**साहंति मुक्खमग्गं, सा देवी हरउ दुरिआइं''** ॥१॥

यस्याः क्षेत्रे चारित्रसहितैर्दर्शनज्ञानैः साधवो मोक्षमार्गं साधयन्ति सा देवी दुरितानि हरतु ॥१॥

अथ वर्द्धमानस्तुतिः –

**''नमोऽस्तु वर्द्धमानाय, स्पर्द्धमानाय कर्मणा ।**
**तज्जयावाप्तमोक्षाय, परोक्षाय कुतीर्थिनाम्''** ॥१॥

वर्द्धमानाय नमोऽस्तु , कीदृशाय ?–कर्मणा सह स्पर्द्धमानाय –स्पर्द्धां कुर्वाणाय, पुनः कीदृशाय ?–तज्जयावाप्तमोक्षाय, तस्य–कर्मणो, जयः –अभिभवस्तेनावाप्त –प्राप्तो मोक्षो येन स तस्मै, पुनः किंलक्षणाय ?–कुतीर्थिनां परोक्षाय –अदृश्याय ॥१॥

**''येषां विकचारविन्दराज्या, ज्यायःक्रमकमलावलीं दधत्या ।**
**सदृशैरतिसङ्गतं प्रशस्यं, कथितं सन्तु शिवाय ते जिनेन्द्राः''** ॥२॥

येषां जिनेन्द्राणां ज्यायः क्रमकमलावलीं –प्रधानपदपद्मश्रेणिं दधत्या –धारयन्त्या विकचारविन्दराज्या –उन्निद्रसुरसञ्चारितहेमकमलश्रेण्या कृत्वा सदृशैः सह अतिसङ्गतम् –अतिशयमिलनं प्रशस्यं –प्रशंसार्हम् इति कथितं बुधैरिति शेषः, ते जिनेन्द्राः शिवाय –कल्याणाय सन्तु –भवन्तु ॥२॥

**''कषायतापार्दितजन्तुनिर्वृतिं, करोति यो जैनमुखाम्बुदोद्‌गतः ।**
**स शुक्रमासोद्भववृष्टिसन्निभो, दधातु तुष्टिं मयि विस्तरो गिराम्''** ॥३॥

ये जैनमुखाम्बुदोद्‌गतः –जिनसम्बन्धिमुखरूपमेघोत्पन्नः, कषायतापार्दिजन्तुनिर्वृतिं –

कषायतापपीडितप्राणिसमाधिं करोति, स शुक्रमासोद्भववृष्टिसन्निभः —ज्येष्ठमासजन्य-वर्षासदृशो, गिरां विस्तरः —सिद्धान्तरूपो वाक्प्रसरः, मयि विषये, तुष्टिं —तोषम् , दधातु —पुष्णातु ॥३॥

तथा[1]—"**विशाललोचनदलं, प्रोद्यद्दंतांशुकेसरम् ।**
**प्रातर्वीरजिनेन्द्रस्य, मुखपद्मं पुनातु वः**" ॥१॥

विशाललोचनरूपपत्रं दीप्यद्दन्तकिरणकेसरं वीरजिनेन्द्रस्य मुखपद्मं प्रातर्वो —युष्माकं पुनातु ॥१॥

"**येषामभिषेककर्म कृत्वा, मत्ता हर्षभरात् सुखं सुरेन्द्राः ।**
**तृणमपि गणयन्ति नैव नाकं, प्रातः सन्तु शिवाय ते जिनेन्द्राः**" ॥२॥

येषां जिनेन्द्राणां अभिषेककार्यं विधाय, सुखमिति क्रियाविशेषणं, हर्षभरात् [मत्ताः[2]] सुरेन्द्राः, तृणमपि —तृणमात्रमपि, नाकं —स्वर्गम् , न गणयन्ति, ते जिनेन्द्राः प्रातर्वः शिवाय सन्तु ॥२॥

"**कलङ्कनि*[3]र्मुक्तममुक्तपूर्णतं, कुतर्कराहुग्रसनं सदोदयम् ।**
**अपूर्वचन्द्रं जिनचन्द्रभाषितं, दिनागमे नौमि बुधैर्नमस्कृतम् ***" ॥३॥

कलङ्कनिर्मुक्तं —कलङ्करहितम् , अमुक्ता पूर्णता येन तत् अमुक्तपूर्णतम् , पूर्णमित्यर्थः, कुतर्कराहुग्रसनं —कुविचाररूपराहुभक्षकम् , सदोदयम् , अतोऽपूर्वचन्द्रमिव, ईदृशं जिनचन्द्रभाषितं —जिनेन्द्रवचनम् , दिनागमे —प्रभाते, नौमि, पुनः कीदृशम् ?—बुधैर्नमस्कृतम् ॥३॥

अथ सप्ततिशतजिनस्तुतिः —

"**वरकनकशङ्खविद्रुममरकतघनसन्निभं विगतमोहम् ।**
**सप्ततिशतं जिनानां, सर्वामरपूजितं वन्दे**" ॥१॥

वरं —श्रेष्ठं यत् कनकं —स्वर्णं शङ्खः —कम्बुः विद्रुमः —प्रवालं मरकतं —नीलरत्नं घनो —मेघस्तैः सन्निभं तत् सदृशवर्णम् , पञ्चवर्णमित्यर्थः, तथा विगतमोहं —मोह-रहितम् , तथा सर्वामरपूजितं —सकलदेवमहितम् , ईदृशं जिनानां सप्ततिशतं-जिन-सम्बन्धि सप्तत्यधिकशतम् , वन्दे —नौमीत्यर्थलेशः ।

---

१. अथ-C. मूल L. ॥ २. मत्ताः-L.P.C. नास्ति ॥ ३. * * चिह्नद्वयमध्यवर्ती पाठः मु० मध्ये कोष्ठके C. प्रतौ पार्श्वभागे वर्तते ॥

साम्प्रतं प्रतिक्रमणकरणानन्तरं यत् कर्त्तव्यं तदाह —'गुरोः' धर्माचार्यस्य 'विश्रामणा' श्रमापनयनसम्बाधनादिरूपा, उपलक्षणत्वात् संयमयात्रापृच्छाद्यपि ग्राह्यम् , चः समुच्चये, एवो निश्चये, अन्वयस्तूक्त एव । अत्र च यद्यपि साधव उत्सर्गतः सम्बाधनां न कारयन्ति, "**संवाहणा दंतपहोअणा य**" [ **दशवैकालिक ३।३** ] इतिवचनात् , तथापि द्वितीयपदे साधुभ्यः सकाशात् , तदभावे तथाविधश्रावकादेरपि कारयन्त्येव, एवं श्रमापनयनाद्यपि, परिणामविशुद्ध्या तद्विषये क्षमाश्रमणं ददतो निर्जरालाभो विनयश्च कृतो भवतीति । ततो विश्रामणकरणानन्तरं स्वाध्यायस्याणुव्रतविध्यादिस्मरणस्य [1]नमस्कारादिपरावर्त्तनस्य वाचनादिपञ्चविधस्य वा करणं —विधानम् , यस्तु साधूपाश्रयमागन्तुमशक्तो राजादिर्वा महर्धिको वा बह्वपायः स स्वगृह एवावश्यकं स्वाध्यायं च करोति, स्वाध्यायस्य हि महाफलम् । यदाह —

"**बारसविहम्मि वि तवे, सब्भिंतरबाहिरे कुसलदिट्ठे ।**
**न वि किंचि अत्थि होही, सज्झायसमं तवो कम्मं**[2]" ॥१॥ [ ]

तथा- "**सज्झाएण पसत्थं, झाणं जाणइ अ सच्चपरमत्थं ।**
**सज्झाए वट्टंतो, खणे खणे जाइ वेरग्गं**" ॥१॥ [ उ.मा./३३८ ] इति ॥६५॥

साम्प्रतं रात्रिविषयं यद्विधेयं तद्दर्शयन्नाह —

**गत्वा गृहेऽथ कालेऽर्हद्गुरुस्मृतिपुरस्सरम् ।**
**अल्पनिद्रोपासनं च, प्रायेणाब्रह्मवर्ज्जनम् ॥६६॥**

**अथे**ति स्वाध्यायानन्तर्ये, '**गृहे गत्वा**' '**काले**' अवसरे रात्रेः प्रथमे यामेऽर्द्धरात्रे वा शरीरसात्म्येन, निजगृहे स्वकीयपुत्रादीनां पुरतो धर्मदेशनाकथनेन निद्रावसरे जात इत्यर्थः । **अल्पनिद्राया उपासनं** —सेवनं विशेषतो गृहिधर्मो भवतीति सम्बन्धः । यतो **दिनकृत्ये** —

"**काऊण सयणवग्गस्स, उत्तमं धम्मदेसणं ।**
**सिज्जाठाणं तु गंतूणं, [3]तओ अन्नं करे इमं**" ॥१॥ [ **श्रा.दि./२९४** ] इति ।

[4]अत्र '**अप्राप्ते हि शास्त्रमर्थवद्**'इति [निद्राया अल्पत्वे विधिरित्यवसेयम्] कथं

---

१. L.P. । नमस्काराप° C. । नमस्कारादपि° मु० ॥ २. [दशवैकालिकनि] ॥ ३. करे अन्नं तओ इमं-इति श्राद्धदिनकृत्ये ॥ ४. इतोऽग्रे "निद्रेति विशेष्यं, अल्पेति विशेषणं, विशेषणस्य चात्र विधिः, 'सविशेषणे हि विधिनिषेधौ विशेषणमुपसंक्रामेत' इति न्यायात् , निद्रेति विशेष्यं, तेन न तत्र विधिः, दर्शनावरणकर्मोदयेन निद्रायाः स्वतः सिद्धत्वात्' इति पाठ C. मूल, मु० मध्ये च ईदृशे [ ] कोष्ठके वर्तते, L.P. नास्ति ॥

निद्रां कुर्याद् इत्याह –**'अर्हदिति' अर्हन्त** –तीर्थकरा **गुरवो** –धर्माचार्यास्तेषां **स्मृतिः–** मनस्यारोपणं सा[1] **पुरस्सरा** –पूर्वं यस्य **तत्तथा,** क्रियाविशेषणमिदम् , उपलक्षणं चैतत् चतुःशरणगमन–दुष्कृतगर्हा–सुकृतानुमोदना–सर्वजीवक्षमण–प्रत्याख्यानकरणाऽष्टादश–पापस्थानवर्जन–पञ्चनमस्कारस्मरणप्रभृतीनाम् , न ह्येतद्विना श्रावकस्य शयनं युक्तम् , तत्र देवस्मृतिः–**नमो वीअरायाणं, सव्वण्णूणं, तेलोक्कपूइआणं,**[2] **जहट्ठिअवत्थुवाईणं [ पञ्चसूत्रे सूत्र/१ ]** इत्यादि, गुरुस्मृतिश्च 'धन्यास्ते ग्रामनगरजनपदादयो, येषु मदीय-धर्माचार्या विहरन्तीत्यादि' । चैत्यवन्दनादिना वा नमस्करणं स्मृतिः । यदाह **दिन-कृत्ये –''सुमरित्ता भुवणनाहे''** [ श्रा.दि./२९५ ] त्ति **वृत्तौ,–**स्मृत्वा धातूनामनेकार्थ-त्वाद् वन्दित्वा, भुवननाथान् जगत्प्रभून् , चैत्यवन्दनां कृत्वेत्यर्थः ।

चतुःशरणगमनं चैवम् –

**''क्षीणरागादिदोषौघाः, सर्वज्ञा विश्वपूजिताः ।**
**यथार्थवादिनोऽर्हन्तः, शरण्याः शरणं मम ॥१॥** [ ]
**ध्यानाग्निदग्धकर्माणः, सर्वज्ञाः सर्वदर्शिनः ।**
**अनन्तसुखवीर्येद्धाः, सिद्धाश्च शरणं मम ॥२॥** [ ]
**ज्ञानदर्शनचारित्रयुताः, स्वपरतारकाः ।**
**जगत्पूज्याः साधवश्च, भवन्तु शरणं मम ॥३॥** [ ]
**संसारदुःखसंहर्त्ता, कर्त्ता मोक्षसुखस्य च ।**
**जिनप्रणीतधर्मश्च, सदैव शरणं मम'' ॥४॥** [ ]

एवं श्रावकस्य चतुःशरणकरणं महते गुणाय । यदाह –

**''चउरंगो जिणधम्मो, न कओ चउरंगसरणमवि न कयं ।**
**चउरंगभवच्छेओ, न कओ हा हारिओ धम्मो'' ॥१॥** [ ] त्ति ।

दुष्कृतगर्हणं च –

**''जं मणवयकाएहिं, कयकारिअअणुमईहि आयरिअं ।**
**धम्मविरुद्धमसुद्धं, सव्वं गरिहामि तं पावं'' ॥१॥** [ ] इत्यादि ।

सुकृतानुमोदनं चेत्थम् –

**''अहवा सव्वं चिअ, वीअरायवयणाणुसारि जं सुकयं ।**
**कालत्तए वि तिविहं, अणुमोएमो तयं सव्वं'' ॥१॥** [ ] इत्यादि ।

---

१. L.P. । सा–मु० नास्ति ॥ २. देविंदपूइआणं इति पञ्चसूत्रे ॥

सर्वजीवक्षमणं यथा —

**''खामेमि सव्वजीवे, सव्वे जीवा खमंतु मे ।**
**मित्ती मे सव्वभूएसुं , वेरं मज्झ न केणई''** ॥ [ **वंदितुसूत्रे/४९** ] इत्यादि ।

प्रत्याख्यानं च चतुर्विधाहारविषयं ग्रन्थिसहितेन सर्वव्रतसङ्क्षेपरूपदेशावकाशिकव्रतस्वीकरणं च, यदुक्तं **दिनकृत्ये—''पाणिवहमुसादत्तं''** [ **श्राद्धदिनकृत्ये गा० ३००-१** ] इत्यादि गाथाद्वयं प्राग् लिखितमेव । तथा शेषपापस्थानवर्जनं यथा —

**''तहा कोहं च माणं च, मायं लोभं तहेव य ।**
**पिज्जं दोसं च वज्जेमि, अब्भक्खाणं तहेव य** ॥१॥ [ श्रा.दि./३०२ ]
**अरइरई पेसुन्नं, परपरिवायं तहेव य ।**
**मायामोसं च मिच्छत्तं, पावठाणाणि वज्जिमो** ॥२॥ [ श्रा.दि./३०३ ] इति ।

तथा- **''जइ मे हुज्ज पमाओ, इमस्स देहस्सिमाइ रयणीए ।**
**आहारमुवहि देहं, सव्वं तिविहेण वोसिरिअं''** ॥१॥ [ **सं.पो.सू.गा./४** ]

नमस्कारपूर्वमनया गाथया त्रिः साकारानशनस्वीकरणं पञ्चनमस्कारस्मरणं च स्वापावसरे कार्यम् , ततो विविक्तायामेव शय्यायां शयितव्यम् , न तु स्त्र्यादिसंसक्तायाम् , तथा सति सतताभ्यस्तत्वाद् विषयप्रसङ्गस्योत्कटत्वाच्च वेदोदयस्य पुनरपि तद्वासनया बाध्येत जन्तुः । अतः सर्वथोपशान्तमोहेन धर्मवैराग्यादिभावनाभावितेनैव च निद्रा कार्येति स्वापविधिः । तथा '**प्रायेण**' इति बाहुल्येन, गृहस्थत्वादस्य **अब्रह्म** —मैथुनं तस्य **वर्जनम्** —त्यजनं, गृहस्थेन हि यावज्जीवं ब्रह्मव्रतं पालयितुमशक्तेनापि पर्वतिथ्यादिबहुदिनेषु ब्रह्मचारिणैव भाव्यम् ॥६६॥

अथ निद्रान्ते किं कर्त्तव्यमित्याह —

**निद्राक्षयेऽङ्गनाऽङ्गनामशौचादेर्विचिन्तनम् ।**
**इत्याहोरात्रिकी चर्या, श्रावकाणामुदीरिता ॥६७॥**

ततः परिणतायां रात्रौ **निद्रायाः क्षये** —नाशे सत्यनादिभवाभ्यासरसोल्लसद्दुर्ज्जयकामरागजयार्थम् , **अङ्गनाः** —स्त्रियस्**तासामङ्गानां** —शरीराणां यद् **अशौचम्** —अपावित्र्यं तस्य **विचिन्तनं**—विशेषेण विचारणम् , **आदिशब्दात् जम्बूस्वामिस्थूलभद्रा**दिमहर्षिसुश्राद्धादिदुष्पालनशीलपालनपवित्रचरित्रकषायजयोपायभवस्थित्यत्यन्तदुःस्थताधर्ममनोरथानां ग्रहणम् , एषामपि चिन्तनमित्यर्थः, तद्विशेषतो गृहिधर्मो भवतीत्यन्वयः ।

तत्र स्त्रीशरीरेष्वशुचिचिन्तनमेवम् –

''**मंसं इमं मुत्तपुरीसमीसं, सिंहाण खेलाण य निज्जरंतं ।**
**एअं अणिच्चं किमिआण वासं, पासं नराणं मइबाहिराणं**''॥१॥[ श्रा.दि./३१४ ]इत्यादि ।

**जम्बूस्वामिस्थूलभद्रा**दिमहर्षिचरित्राणि तु प्रसिद्धान्येव । कषायजयोपायस्तु तत्तद्दोषप्रतिपक्षसेवादिना स्यात् । तथा हि –क्रोधः क्षमया १, मानो मार्दवेन २, मायाऽऽर्जवेन ३, लोभः सन्तोषेण ४, रागो वैराग्येण ५, द्वेषो मैत्र्या ६, मोहो विवेकेन ७, कामः स्त्रीशरीराशौचभावनया ८, मत्सरः परसम्पदुत्कर्षेऽपि चित्तानाबाधया ९, विषयाः संयमेन १०, अशुभमनोवाक्काययोगा गुप्तित्रयेण ११, प्रमादोऽप्रमादेन १२, अविरति-र्विरत्या १३ च सुखेन जीयन्ते । भवस्थितेरत्यन्तदुःस्थता च गतिचतुष्टयेष्वपि प्रायो दुःखप्राचुर्यानुभवाद्भावनीया । तत्र नारकतिरश्चां दुःखबाहुल्यं प्रतीतमेव । आह च –

''**अच्छिनिमीलणमित्तं, णत्थि सुहं दुक्खमेव अणुबद्धं ।**
**नरए नेरइआणं, अहोनिसं पच्चमाणाणं** ॥१॥ [ दे.श./९० ]
**जं नरए नेरइआ, दुक्खं पावंति गोअमा ! तिक्खं ।**
**तं पुण निगोअमज्झे, अणंतगुणिअं मुणेअव्वं** ॥२॥ [ दे.श./९१ ]

मानुष्यके गर्भजन्मजरामरणविविधाधिव्याधिदौःस्थ्याद्युपद्रवैर्दुःखितैव देवत्वेऽपि च्यवनदास्यपराभवेर्ष्यादिभिः । ऊचे च –

''**सुईहिं अग्गिवण्णाहिं, संभिण्णस्स निरंतरं ।**
**जारिसं गोअमा ! दुक्खं, गब्भे अट्ठगुणं तओ** ॥१॥ [ र.सं./३०० ]
**गब्भाओ नीहरंतस्स, जोणीजंतनिपीलणे ।**
**सयसाहस्सिअं दुक्खं, कोडाकोडीगुणं पि वा** ॥२॥ [ र.सं./३०१ ]
**चारगनिरोहवहबंधरोगधणहरणमरणवसणाइं ।**
**मणसंतावो अजसो, विग्गोवणया य माणुस्से** ॥३॥ [ उ.मा./२८३ ]
**चिंतासंतावेहि अ, दारिद्दरुआहि दुप्पउत्ताहिं ।**
**लद्धूण वि माणुस्सं, मरंति केई सुनिव्विण्णा**[1] ॥४॥ [ उ.मा./२८४ ]
**ईसाविसायमयकोहमायलोहेहिं एवमाईहिं ।**
**देवा वि समभिभूआ, तेसिं कत्तो सुहं नाम ?**'' ॥५॥[ उ.मा./२८७ ]इत्यादि ।

---

१. °न्ना–L.P.C. ॥

धर्ममनोरथभावना चैवम् —

**''सावयघरंमि वर हुज्ज चेडओ नाणदंसणसमेओ ।**
**मिच्छत्तमोहिअमई, मा राया चक्कवट्टी वि** ॥१॥ [ प्र.वि.कु./३२ ]
**कइआ संविग्गाणं, गीअत्थाणं गुरूण पयमूले ।**
**सयणाइसंगरहिओ, पव्वज्जं संपवज्जिस्सं** ॥२॥ [ चा.म./२ ]
**भयभेरवनिक्कंपो, सुसाणमाइसु विहिअउस्सग्गो ।**
**तवतणुअंगो कइआ, उत्तमचरिअं चरिस्सामि''** ॥३॥ [ चा.म./२२ ] इत्यादि ।

अथाहोरात्रिकी क्रियामुपसंहरन्नुत्तरार्द्धमाह —'**इति**' अमुना उक्तप्रकारेणाहोरात्रे[1] भवाऽऽ**होरात्रिकी** '**चर्या**' चरणा '**श्रावकाणाम्**' उक्तस्वरूपाणाम् '**उदीरिता**' निरूपिता, सा च विशेषतो गृहिधर्मो भवतीति पूर्वक्रियया सम्बन्धः ॥६७॥

एवं सविस्तरं श्रावकाणां दिनकृत्यानि गृहिधर्मत्वेन विधेयतयोपदर्श्याथ तेषामेव पर्वादिकृत्यानि पूर्वमुक्तप्रायाण्यपि व्यक्त्याऽतिदिशन्नाह —

**एवं पर्वसु सर्वेषु , चतुर्मास्यां च हायने ।**
**जन्मन्यपि यथाशक्ति, स्वस्वसत्कर्मणां कृतिः ॥६८॥**

'**एवम्**' उक्तेन प्रकारेण '**सर्वेषु**' न त्वेकद्व्यादिषु '**पर्वसु**' चतुर्दश्यादितिथिषु , '**चः**' समुच्चये, चतुर्णां मासानां समाहारश्च**तुर्मासी तस्यां च,** परं '**हायने**' वर्षे, तथा '**जन्मन्यपि**' न तु केवलं पर्वादिष्वेवेत्यपिशब्दार्थः । एतेषु '**यथाशक्ति**' शक्तिमनतिक्रम्य चित्तवित्तगतसामर्थ्यानुल्लङ्घनेनेत्यर्थः, तेषु किम् ? इत्याह —'**स्वेत्यादि**' स्वानि स्वानीति वीप्सायां द्वित्वम् , पर्वसु पर्वकर्माणि स्वान्युच्यन्ते, एवं चतुर्मास्यादौ भावनीयम् , तानि चाशोभनान्यपि भवन्त्यतो विशेषणमाह —सन्तीति,[2] **स्वानि स्वानि** यानि **सन्ति**-शोभनानि, धार्मिकाणीत्यर्थः, **कर्माणि** —कृत्यानि **तेषां कृतिः**[3] —करणम् , विशेषतो गृहिधर्मो भवतीति सम्बन्धः । नित्यकृत्यानि यथा नित्यं कार्याणि तथा पर्वादिकृत्यानि पर्वादिष्विति भावः । तत्र पर्वाणि चैवमूचुः —

**''अट्ठमि चउद्दसि[4] पुण्णिमा य तहमावसा[5] हवइ पव्वं ।**
**मासंमि पव्वछक्कं, तिन्नि अ पव्वाइं पक्खंमि''** ॥१॥ [ प्र.प./४९७ ]

---

१. निरूपिता । दिनकृत्यान्युपदर्श्य साम्प्रतं तेषामेव पर्वादिकृत्यानि व्यक्त्याऽतिदिशन्नाह- L.P. ॥ २. C. । सन्तीति-सदिति स्वानि-मु० सन्तीति-शोभनानि-L.P. ॥ ३. °णि पर्वादिकृत्यानि तथा पर्वा- L.P. ॥ ४. चा° L.P. ॥ ५. L.P.C. । तहा° मु० ॥

''**चाउद्दसट्ठमुद्दिट्ठपुण्णमासीसु**'' [ **प्र.प./२४७** ] त्ति सूत्रप्रामाण्यात् , **महानिशीथे,** तु –ज्ञानपञ्चम्यपि पर्वत्वेन विश्रुता । ''**अट्ठमीचउद्दसीसुं नाणपंचमीसु उववासं न करेइ पच्छित्तम्**'' [ **म.नि.** ] इत्यादिवचनात् । तथाऽन्यत्र च –

''**बीआ पंचमि अट्ठमि, एगारसि चउद्दसी पण तिहीउ ।**
**एआओ सुअतिहीओ, गोअमगणहारिणा भणिआ** ॥१॥ [ ]
**बीआ दुविहे धम्मे, पंचमि नाणेसु अट्ठकम्मे अ ।**
**एगारसि अंगाणं, चउद्दसी चउदपुव्वाणं**'' ॥२॥ [ ]

[1]एवं पञ्चपर्व्वी पूर्णिमामावास्याभ्यां सह षट्पर्वी च प्रतिपक्षं उत्कृष्टतः स्यात् । एषु च पर्वसु कृत्यानि यथा –पौषधकरणम् , प्रतिपर्व तत्करणाशक्तौ तु अष्टम्यादिषु नियमेन । यद् **आगमः** –

''**सव्वेसु कालपव्वेसु , पसत्थो जिणमए हवइ जोगो ।**
**अट्ठमिचउद्दसीसु अ, नियमेण हविज्ज पोसहिओ**'' ॥१॥ [ ] इति ।

यथाशक्तिग्रहणादष्टम्यादिष्वपि पौषधकरणाशक्तौ द्विष्प्रतिक्रमण-बहु-बहुतर-सामायिककरण-बहुसंक्षेपदेशावकासिकव्रतस्वीकरणादि कार्यम् । पौषधविधिश्च पूर्वं दर्शित एव । तथा तेषु स्नानशीर्षादिशोधन-ग्रथन-वस्त्रादिधावन-रञ्जन-शकटहलादि-खेटन-मूटकादिबन्धन-यन्त्रादिवाहन-दलन-[2]खण्डन-पेषण-पत्र-पुष्पफलादित्रोटन-सच्चित्तखटीवर्णिकादिमर्दन-धान्यादिलवन-लिम्पन-मृदादिखनन-कर्त्तन-गृहादि-निष्पादन-सच्चित्ताहारभक्षणादिसर्वारम्भवर्ज्जन-विशेषतपोऽभ्युपगमन-विशेषतः-स्नात्रपूजाचैत्यपरिपाटीकरण-सर्वसाधुनमस्करण-सुपात्रदान-ब्रह्मचर्यपालनादीनि धर्मानुष्ठानानि कार्याणि । यतः –

''**जइ सव्वेसु दिणेसुं , पालह किरिअं तओ हवइ लट्ठं ।**
**जं पुण तहा न सक्कह, तहा वि हु पालिज्ज पव्वदिणं**'' ॥१॥ [ ]

तथा- ''**नाहणचीवरधोअणमत्थयगुंथणमबंभचेरं च ।**
**खंडनपीसणलिप्पण, वज्जेअव्वाइं पव्वदिणे**'' ॥२॥ [ ]

आगमेऽपि पर्वतिथिपालनस्य शुभायुर्बन्धहेतुत्वादिना महाफलत्वं प्रतिपादितम् । यतः –''**भयवं ! बीअपमुहासु पंचसु तिहीसु विहिअं धम्माणुट्ठाणं किंफलं होइ ?,**

१. तुला–श्राद्धविधिवृत्तिः प० १५२ ॥ २. °कण्डन° श्राद्धदिनवृत्तिः गा० ११ ॥

**गोयमा ! बहुफलं होइ, जम्हा एआसु तिहीसु जीवो परभवाउअं समज्जिणइ, तम्हा तवोवहाणाइ धम्माणुट्ठाणं कायव्वं, जम्हा सुहाउअं समज्जिणइ''** [ ] इति ।

तथा वर्षामध्येऽश्विनचैत्रचातुर्मासिकवार्षिकाष्टाहिकाचतुर्मासकत्रयसांवत्सर-पर्वादिदिवसा अर्हज्जन्मादिपञ्चकल्याणकदिवसाश्चापि पर्वतिथित्वेन विज्ञेयाः, तत एष्वपि विशेषेण पूर्वोक्तो विधिर्विधेयः । उक्तं[1] च —

**''संवच्छरचाउम्मासिएसु अट्ठाहिआसु अ तिहीसुं ।**
**सव्वायरेण लग्गाइ, जिणवरपूआतवगुणेसुं''** ॥१॥ [ उ.मा./२४१ ]

अत्र गुणाः —ब्रह्मव्रतादयः । अष्टाहिकास्वपि चैत्राश्विनाष्टाहिके शाश्वत्यौ, तयोर्वैमानिकदेवा अपि नन्दीश्वरादिषु तीर्थयात्राद्युत्सवान् कुर्वन्ति । यदाहुः —

**''दो सासयजत्ताओ, तत्थेगा होइ चित्तमासंमी ।**
**अट्ठाहिआदिमहिमा, बीआ पुण अस्सिणे मासे** ॥१॥ [ श्रा.वि./गा.११वृ. ]
**एआओ दो वि सासयजत्ताओ करंति सव्वदेवा वि ।**
**नंदीसरंमि खयरा, अहवा निअएसु ठाणेसु** ॥२॥ [ श्रा.वि./गा.११वृ. ]
**तह चउमासिअतिअगं, पज्जोसवणा य तह य इअ छक्कं ।**
**जिणजम्मदिक्खकेवलनिव्वाणाइसु असासइआ ?''**॥३॥[ श्रा.वि./गा.११वृ. ]

**जीवाभिगमे** त्वेवम् —**''तत्थ णं बहवे भवणवइवाणमंतरजोइसवेमाणिआ देवा तिहिं चउमासिएहिं पज्जोसवणाए अट्ठाहिआओ महामहिमाओ करिंति''** [ ] इति ।

तिथिश्च प्रातः प्रत्याख्यानवेलायां या स्यात् सा[2] प्रमाणम्, सूर्योदयानुसारेणैव लोकेऽपि दिवसादिव्यवहारात् । आहुरपि —

**''चाउम्मासिअवरिसे, पक्खिअपंचट्ठमीसु नायव्वा ।**
**ताओं तिहीओ जासिं, उदेइ सूरो न अण्णाउ** ॥१॥ [ श्रा.वि./गा.११वृ. ]
**पूआपच्चक्खाणं, पडिकमणं तह य निअमगहणं च ।**
**जीए उदेइ सूरो, तीइ तिहीए उ कायव्वं** ॥२॥ [ श्रा.वि./गा.११वृ. ]
**उदयंमि जा तिही सा, पमाणमिअराइ कीरमाणीए ।**
**आणाभंगणवत्था, मिच्छत्तविराहणं पावे** ॥३॥ [ श्रा.वि./गा.११वृ. ]

---

१. तुला-श्राद्धविधिवृत्तिः गा० ११ ॥ २. स इति-श्राद्धविधिवृत्तौ ॥

**पारासरस्मृत्या**दावपि –

**''आदित्योदयवेलायां, या स्तोकाऽपि तिथिर्भवेत् ।**
**सा सम्पूर्णेति मन्तव्या, प्रभूता नोदयं विना''** ॥१॥ [ ]

**उमास्वातिवाचकप्रघोष**श्चैवं श्रूयते –

**''क्षये पूर्वा तिथिः कार्या, वृद्धौ कार्या तथोत्तरा ।**
**श्रीवीर[1]मोक्षकल्याणं, कार्यं लोकानुगैरिह''** ॥१॥ [ ] इति ।

एवं पौषधादिना पर्वदिवसा आराध्या इति पर्वकृत्यानि ।

[2]अथ चतुर्मासीकृत्यानि यथा –पूर्वप्रतिपन्नव्रतेन प्रतिचतुर्मासिकं तन्नियमाः संक्षेप्या अप्रतिपन्ननियमे तु आप्याः तु यथास्वं प्रतिचतुर्मासकं नियमा ग्राह्याः । वर्षाचतुर्मास्यां पुनर्ये नित्यनियमाः सम्यक्त्वाधिकारे प्रागुक्तास्ते विशिष्य ग्राह्याः । तथाहि –त्रिर्द्विर्वा देवपूजाऽष्टभेदादिका, सम्पूर्णदेववन्दनं चैत्ये, सर्वबिम्बानामर्चनं वंदनं वा, स्नात्रमहो महापूजाप्रभावनादि, गुरोर्बृहद्वन्दनम् , अङ्गपूजनप्रभावनास्वस्तिकरचनादिपूर्वव्याख्यान-श्रवणम् , विश्रामणा, अपूर्वज्ञानपाठाद्यनेकविधस्वाध्यायकरणम् , प्रासुकनीरपानम् , सचित्तत्यागस्तदशक्तावनुपयोगितत्त्यागः, गृह–हट्ट–भित्ति–स्तम्भ–खट्वाकपाटपट्टपट्टिका-सिक्कक–घृत–तैलजलादिभाजनेन्धन–धान्यादिसर्ववस्तूनां पनकादिसंसक्तिरक्षार्थं चूर्णकरक्षादिखरण्टन–मलापनयनाऽऽतपमोचन–शीतलस्थानस्थापनादिना, जलस्य द्विस्त्रिर्गालनादिना, स्नेह–गुड–तक्र–जलादीनां सम्यक् स्थगनादिना, अवश्रावण-स्नानजलादीनां पनकाद्यसंसक्तरजोबहुलभूमौ पृथक् पृथक् त्यागेन, चुल्ली-दीपादेरनुद्घाटमोचनेन, पेषण–रन्धन–वस्त्रभाजनादिक्षालनादौ सम्यक् प्रत्युपेक्षणेन, चैत्यशालादेरपि विलोक्यमानसमारचनेन, गृहे च व्यापारणस्थाने चन्द्रोदयबन्धनेन यथार्हं यतना। अभ्याख्यान–पैशुन्य–परुषवचन–निरर्थकमृषावर्जनम् , कूटतुलादिनाऽव्यवहरणम् , ब्रह्मचर्यपालनम् , तथाऽशक्तौ पर्वतिथिपालनम् , शेषदिनेषु दिवाऽब्रह्मत्यागो रात्रौ परिमाण-करणं च, इच्छापरिग्र[3]हपरिमाणसङ्क्षेपतरः, सर्वदिग्गमननिषेधस्तदशक्तावनुपयोगिदिग्ग-मननियमः, यथाशक्तिस्नान–शिरोगुम्फन–दन्तकाष्ठोपानहादित्यागः, भूखनन–वस्त्रादिरञ्जन-शकटखेटनादिनिषेधः वार्दलाब्दवृष्ट्यादिना इलिकादिपा[4]ते राजादनाम्रत्यागादि च,

---

१. °ज्ञाननिर्वाणं–C. श्राद्धविधिवृत्तौ च । °मोक्षकल्याण–L.P. मु० [ ] कोष्ठके ॥ २. तुला श्राद्धविधिवृत्तिः ४/१२, प० १५७ ॥ ३. C. सं L.P. । °हप्रमा° C. मूल । °हप्र(परि) मा° मु० ॥ ४. L.P.C. संशो० । °पातो (तात्) ॥

पर्युषितद्विदलपूपिकादिपर्यवटिकादिशुष्कशाकतन्दुलीयकादिपत्रशाकनागवल्लीदलटुप्पर-कखारिकखर्जूरद्राक्षाखण्डशुण्ठ्यादीनां फुल्लिकुन्थ्विलिकादिसंसक्तिसम्भवात् त्यागः । औषधादिविशेषकार्ये तु सम्यक् शोधनादियतनयैव तेषां ग्रहणम् , खरकर्मव्यापारवर्जनम् , जलक्रीडादिनियमनम् , स्नानोद्वर्त्तनरन्धनादिपरिमाणकरणम् , देशावकाशिकसामायिक-पौषधव्रतानां विशेषतः पर्वसु करणम् , नित्यं पारणे वाऽतिथिसंविभागः । यथाशक्त्युपधान-मासादिप्रतिमा-कषायेन्द्रिय[१]जयसंसारतारणाष्टाहिकापक्षक्षपणमासक्षपणादिविशेष-तपोविधानम् , रात्रौ चतुर्विधाहारस्य त्रिविधाहारस्य वा प्रत्याख्यानम् , दीनानाथा-द्युद्धरणमित्यादीनि । एतदर्थसंवादिन्यश्चतुर्मास्यभिग्रहप्रतिपादिकाः पूर्वाचार्यप्रणीता गाथाश्चोक्ताः **श्राद्धविधिवृत्तौ —**

[२]तथाहि- ''**चउम्मासि अभिग्गह, नाणे तह दंसणे चरित्ते अ ।**
**तवविरिआयारम्मि अ, दव्वाइ अणेगहा हुंति ॥१॥** [ श्रा.वि./गा.१२वृ. ]
**परिवाडी सज्झाओ, देसणसवणं च चिंतणी चेव ।**
**सत्तीए कायव्वं, सिअपंचमि नाणपूआ य ॥२॥** [ श्रा.वि./गा.१२वृ. ]
**संमज्जणोवलेवण, [३]गुंहलिया मंडणं च चिइभवणे ।**
**चेइअपूआवंदणनिम्मलकरणं च बिंबाणं ॥३॥** [ श्रा.वि./गा.१२वृ. ]
**चारित्तंमि जलूआ, जूआ गंडोलपाडणं चेव ।**
**वणकीडखारदाणं, इंधणजलणन्नतसरक्खा ॥४॥** [ श्रा.वि./गा.१२वृ. ]
**वज्जइ अब्भक्खाणं, अक्कोसं तह य रुक्खवयणं च ।**
**देवगुरुसवहकरणं, पेसुन्नं परपरीवायं ॥५॥** [ श्रा.वि./गा.१२वृ. ]
**पिइमाइदिट्ठिवंचण, जयणं निहिसुंकपडिअविसयंमि ।**
**दिणि बंभ रयणिवेला, परनरसेवाइ परिहारो ॥६॥** [ श्रा.वि./गा.१२वृ. ]
**धणधन्नाईनवविहइच्छामाणंमि निअमसंखेवो ।**
**परपेसणसंदेस य, अहगमणाई अ दिसिमाणे ॥७॥** [ श्रा.वि./गा.१२वृ. ]
**ण्हाणंगरायधूवणविलेवणाहरणफुल्लतंबोलं ।**
**घणसारागुरुकुंकुमपोहिसमयनाहिपरिमाणं ॥८॥** [ श्रा.वि./गा.१२वृ. ]
**मंजिट्ठलक्खकोसुंभगुलिअरागाण वत्थपरिमाणं ।**
**रयणं वज्जेमणिकणगरुप्प[४]मुत्ताइपरिमाणं ॥९॥** [ श्रा.वि./गा.१२वृ. ]

१. L.P. । जय॰ मु॰ C. नास्ति ॥ २. L.P. । तथाहि–मु॰ C. नास्ति ॥ ३. L.P. । गूहि॰ मु॰ । गूंह॰ इति श्राद्धविधौ ॥ ४. ॰मुत्ता॰ श्राद्धविधिवृत्तौ ॰सुत्ता॰ मु॰ C.L. ॥

जंबीरअंबजंबुअराइणनारिंगबीजपूराणं ।
कक्कडिअक्खोडवायमकविट्ठटिंबरुअबिल्लाणं ॥१०॥ [ श्रा.वि./गा.१२वृ. ]
खज्जूरदक्खदाडिमउत्तत्तिअनालिकेरकेलाइं ।
चिंचिणिअबो[1]रबिल्लुअफलचिब्भडचिब्भडीणं च ॥११॥ [ श्रा.वि./गा.१२वृ. ]
कयरकरमंदयाण, भोरंडनिंबूअअंबिलीणं च ।
अत्थाणं अंकूरिअनाणाविहफुल्लपत्ताणं ॥१२॥ [ श्रा.वि./गा.१२वृ. ]
सच्चित्तं बहुबीअं, अणंतकायं च वज्जए कमसो ।
विगईविगइगयाणं, दव्वाणं कुणइ परिमाणं ॥१३॥ [ श्रा.वि./गा.१२वृ. ]
अंसुअधोअणलिंपण[2]खत्तक्खणणं च ण्हाणदाणं च ।
जूआकड्ढणमन्नस्स, खित्तकज्जं च बहुभेअं ॥१४॥ [ श्रा.वि./गा.१२वृ. ]
खंडणपीसणमाईण कूडसक्खाइ कुणइ संखेवं ।
जलझिल्लणन्नरंधणउव्वट्टणमाइआणं च ॥१५॥ [ श्रा.वि./गा.१२वृ. ]
देसावगासिअवए, पुढवीखणणे जलस्स आणयणे ।
तह चीरधोअ[3]णे ण्हाणपिअण जलणस्स जालणए ॥१६॥ [ श्रा.वि./गा.१२वृ. ]
तह दीवबोहणे वायवीअणे हरिअछिंदणे चेव ।
अणिबद्धजंपणे गुरुजणेण य अदत्तए गहणे ॥१७॥ [ श्रा.वि./गा.१२वृ. ]
पुरिसासणसयणीए, तह संभासणपलोयणाईसुं ।
ववहारे परिमाणं, दिसिमाणं भोगपरिभोगे ॥१८॥ [ श्रा.वि./गा.१२वृ. ]
तह सव्वणत्थदंडे, सामाइअपोसहेऽतिहिविभागे ।
सव्वेसु वि संखेवं, काहं पइदिवसपरिमाणं ॥१९॥ [ श्रा.वि./गा.१२वृ. ]
खंडणपीसणरंधणभुंजणविक्खणणवत्थरयणं च ।
कत्तणपिंजणलोढणधवलणलिंपणयसोहणए ॥२०॥ [ श्रा.वि./गा.१२वृ. ]
वाहणरोहणलिक्खाइजोअणे वाणहाण परिभोगे ।
निंदणलूणणउंछणरंधणदलणाइकम्मे अ ॥२१॥ [ श्रा.वि./गा.१२वृ. ]
संवरणं कायव्वं, जहसंभवमणुदिणं तहा पढणे ।
जिणभवणदंसणे सुणणगुणणजिणभवणकिच्चे अ ॥२२॥ [ श्रा.वि./गा.१२वृ. ]

---

१. L.P.C. श्राद्धविधिवृत्तौ च० प० १५९ । °रबिल्ल° मु० ॥ २. °ख(क्खे)त्त° इति श्राद्धविधिवृत्तौ ॥ ३. °ण-इति श्राद्धविधिवृत्तौ ॥ ४. निन्नण-C. मूल, श्राद्धविधिवृत्तौ च ॥

D:\new/d-2.pm5\3rd proof

**अट्ठमीचउद्दसीसुं , कल्लाणतिहीसु तवविसेसेसुं ।**
**काहामि उज्जममहं, धम्मत्थं वरिसमज्झंमि** ॥२३॥ [ श्रा.वि./गा.१२वृ. ]
**धम्मत्थं मुहपत्ती, जलछाणण ओसहाइदाणं च ।**
**साहम्मिअवच्छल्लं, जहसत्ति गुरूण विणओ अ** ॥२४॥ [ श्रा.वि./गा.१२वृ. ]
**मासे मासे सामाइअं च वरिसंमि पोसहं तु तहा ।**
**काहामि ससत्तीए, अतिहीणं संविभागं च**'' ॥२५॥ [ श्रा.वि./गा.१२वृ. ]

इति चतुर्मासीकृत्यानि ।

अथ वार्षिककृत्यानि यथा–सङ्घार्चनादीनि बहुविधानि, यतः **श्राद्धविधा**वेकादशद्वारैः प्रतिपादितानि । गाथोत्तरार्द्धं –

''**पइवरिसं सङ्घच्चण १ साहम्मिअभत्ति २ जत्ततिगं ३** ॥१॥ [ श्रा.वि./गा.१२उ. ]
**जिणगिहण्हवणं ४ जिणधणवुड्ढी ५ महपूअ ६ धम्मजागरिआ ७ ।**
**सुअपूआ ८ उज्जवणं ९, तह तित्थपहावणा सोही १०** ॥२॥ [ श्रा.वि./गा.१३ ]

तत्र सङ्घपूजायां निजविभवाद्यनुसारेण भृशादरबहुमानाभ्यां साधुसाध्वीयोग्यमाधाकर्मादिदोषरहितं वस्त्र-कम्बल-पादप्रोञ्छन सूत्रोर्णापात्र-[1]दण्डक-दण्डिका-सूची-कण्टककर्षण-कागद-कुम्पक-लेखनी-पुस्तकादिकं श्रीगुरुभ्यो दत्ते । यद् **दिनकृत्यसूत्रम्** –

''**वत्थं पत्तं च पुत्थं च, कंबलं पायपुंछणं ।**
**दंडं संथारयं सिज्जं, अन्नं जं किंचि सुज्झई**'' ॥१॥ [ श्रा.दि./१७८ ]

एवं प्रातिहारिकपीठफलकपट्टिकाद्यपि संयमोपकारि सर्वं साधुभ्यः श्रद्धया देयम् । सूच्यादीनामुपकरणत्वं तु श्री**कल्पे** उक्तं । यथा –

''**असणाई वत्थाई, सूआइ चउक्कगा तिन्नि**'' [ ] अशनादीनि वस्त्रादीनि सूच्यादीनि चेति त्रीणि चतुष्कानि, सङ्कलनया द्वादश । यथा–अशनं १ पानं २ खादिमं ३ स्वादिमं ४, वस्त्रं १ पात्रं २ कम्बलं ३ पादप्रोञ्छनम् ४, सूची १ पिष्पलको २ नखच्छेदनकं ३ कर्णशोधनकं ४ चेति । एवं श्रावकश्राविकारूपसङ्घमपि यथाशक्ति सभक्तिपरिधापनकादिना सत्करोति, यथोचितं च देवगुर्वादिगुणगायकान् याचकादीनपि । सङ्घार्चा हि उत्कृष्टादिभेदात् त्रिधा–तत्रोत्कृष्टा सर्वपरिधापनेन, जघन्या सूत्रमात्रादिना, एकद्व्यादेर्वा, शेषा मध्यमा । तत्राधिकव्ययनेऽशक्तोऽपि प्रतिवर्षं गुरुभ्यो मुखवस्त्रादिमात्रं द्वित्रादिश्राद्धेभ्यः पूगादीनि दत्त्वा सङ्घार्चाकृत्यं भक्त्या सत्यापयति,

१. 'पात्रो दङ्ककतुम्बकदण्डक' इति श्राद्धदिनविधिवृत्तौ ॥

निःस्वस्य तावताऽपि महाफलत्वात्, शक्त्या च क्रियमाणेयं महागुणकरी । यतः **पञ्चाशके –**

**''सत्तीइ संघपूजा, विसेसपूजा उ बहुगुणा एसा ।**
**जं एस सुए भणिओ, तित्थयराणंतरो संघो ॥१॥ [ पञ्चा./८-३८ ]**

इति सङ्घार्चाविधिः १।

[1]साधर्मिकाणां वात्सल्यमपि प्रतिवर्षं यथाशक्ति कार्यम्, सर्वेषां तत्करणाशक्तेनाप्येकद्व्यादीनामवश्यं तत् कार्यम्, समानधर्माणो हि प्रायेण दुष्प्रापाः । यतः –

**''सर्वैः सर्वे मिथः सर्वसम्बन्धा लब्धपूर्विणः ।**
**साधर्मिकादिसम्बन्धलब्धारस्तु मिताः क्वचित्'' ॥१॥ [ ]**

तेषां महत्पुण्यलभ्यसङ्गमानां प्रतिपत्तेस्तु फलमतुलमेव । यतः –

**''एगत्थ सव्वधम्मो, साहम्मिअवच्छलं तु एगत्थ ।**
**बुद्धितुलाए तुलिआ, दो वि अ तुल्लाइं भणिआइं'' ॥१॥ [ ]**

साधर्मिकवात्सल्येनैव च राज्ञामतिथिसंविभागव्रताराधनम्, राजपिण्डस्य मुनीनामकल्पत्वादिति । तद्विधिस्त्वेवं –सति सामर्थ्ये प्रत्यहमेकद्व्यादिसाधर्मिकाणामन्यथा तु स्वपुत्रादिजन्मोत्सवे विवाहेऽन्यस्मिन्नपि प्रकरणे साधर्मिकजनानां सविनयं निमन्त्रणम्, भोजनवेलायां स्वयं पादप्रक्षालनादिप्रतिपत्तिपुरस्सरं विशिष्टासनेषु संनिवेश्य प्रवरभाजनेषु नानाव्यञ्जनसहितविशिष्टभोजनताम्बूलवस्त्राभरणादिदानम्, आपन्निमग्नानां च स्वधनव्ययेनाभ्युद्धरणम्, अन्तरायदोषाच्च विभवक्षये पुनः पूर्वभूमिकाप्रापणम्। उक्तमपि –

**''न कयं दीणुद्धरणं, न कयं साहम्मिआण वच्छल्लं ।**
**हिअयंमि वीअराओ, न धारिओ हारिओ जम्मो'' ॥१॥ [ वि.सा./४२९ ]**

धर्मे च विषीदतां तेन तेन प्रकारेण स्थैर्यारोपणं, प्रमाद्यतां च स्मारणवारणचोदनप्रतिचोदनादिकरणम् । यतः –

**''सारणा वारणा चेव, चोअणा पडिचोअणा ।**
**सावएणावि दायव्वा, [2]सावयस्स हिआवहा'' ॥१॥ [ श्रा.दि/२०९ ]**

एतदर्थो यथा –विस्मृतस्य धर्मकृत्यस्य ज्ञापनं स्मारणा, तथा कुसंसर्गाद्यकृत्यस्य निषेधनं वारणा, एतयोश्च सततं क्रियमाणयोर्हि कस्यचित् प्रमादबहुलस्य नियमस्खलितादौ

---

१. तुला– श्राद्धविधि प० २१ B ॥ २. सावयाणां–इति श्राद्धदिनकृत्ये । 'श्रावकाणामित्यत्र बहुवचनं दुष्षमादोषेण प्रमादप्राचुर्यख्यापनार्थमिति' इति तत्रैव वृत्तौ ॥

'युक्तं किं श्राद्धकुलोत्पन्नस्य[१] चेत्थं प्रवर्त्तितुं' ? इत्यादिवाक्यैः सोपालम्भं प्रेरणं चोदना, तथा तत्रैवासकृत्स्खलितादौ धिग् ते जन्मेत्यादिनिष्ठुरवाक्यैर्गाढतरप्रेरणा प्रतिचोदना। उक्तं च –

**''पम्हुट्ठे सारणा वुत्ता, अणायारस्स वारणा ।**
**चुक्काणं चोअणा होइ निट्ठुरं पडिचोअणा''** ॥१॥ [ गा.स./८० ] इति ।

एतश्च भाववात्सल्यम्। यतो **दिनकृत्ये** –

**''साहम्मिआण वच्छल्लं, एअं अन्नं विआहिअं ।**
**धम्मट्ठाणेसु सीअंतं, सव्वभावेण चोअणा''** ॥१॥ [ श्रा.दि./२०८ ]

साधर्मिकाणां वात्सल्यमेतदनन्तरोक्तं द्रव्यवात्सल्यम्, अन्यदिति भाववात्सल्यमिति तदर्थः । इत्थं च तेषां प्रतिपत्तिरेव श्रेयसी न तु तैः सह कलहादि । यतः –

**''विवायं कलहं चेव, सव्वहा परिवज्जए ।**
**साहम्मिएहिं सद्धिं तु , जओ एअं विआहियं** ॥१॥ [ श्रा.दि./२०२ ]
**जो किर पहणइ, साहम्मिअंमि कोवेण दंसणमयंमि ।**
**आसायणं तु सो कुणइ, निक्किवो लोगबंधूणं''** ॥२॥ [ श्रा.दि./२०३ ]

इति साधर्मिकवात्सल्यद्वारम् २।

अथ 'जत्ततिगं'ति प्रस्तावात् जिनयात्रात्रिकं –तत्र जिनयात्रेति कः शब्दार्थः ?, उच्यते **पञ्चाशक**गाथया –

**''जत्ता महूसवो खलु , उद्दिस्स[२] जिणाण कीरए जो उ ।**
**सो जिणजत्ता भण्णइ, तीइ विहाणं तु दाणाइ''** ॥१॥ [ पञ्चा.९।४ ]

महोत्सव एव यात्रा न तु देशान्तरगमनमिति **तद्वृत्तिः [ तुला प० १५१ ]** जिनानुद्दिश्य महोत्सवो जिनयात्रेतिभावः। तस्या विधानं तु –कल्पः, दानादि, सर्वयात्रासाधारणः। यथा –

**''दाणं तवोवहाणं, सरीरसक्कारमो जहासत्ति ।**
**उचिअं च गीअवाइअथुइथोत्ता पेच्छणाईआ''** ॥१॥ [ पञ्चा./९-५ ]

प्रेक्षणकानामवसरो हि यात्राया आरम्भो मध्यमन्तोऽपि च । यतः –**''पत्थावो पुण [३]होउ, इमेसिमारंभमाईओ''** [ पञ्चा.९/११ ] इति, दानस्यावसरस्तु यात्रारम्भकाल एव । यतस्तत्रैव –

१. L.P.C. । तवेत्थं–मु० श्राद्धदिनकृत्यवृत्तौ च० प० ४१४ ॥ २. जिणे स–इति पञ्चाशके । 'जिनान् अर्हतः, स इति महोत्सवः' इति तत्र वृत्तौ ॥ ३. णेओ–इति पञ्चाशके । 'ज्ञेय' इतिः तत्र वृत्तौ ॥

"**आरंभे च्चिअ दाणं, दीणादीण मणतुट्ठिजणणत्थं ।**
**रण्णामाघायकारणमणहं गुरुणा ससत्तीए" ॥१॥ [ पञ्चा.९/१२ ]**

उत्तरार्द्धव्याख्या –नृपेण[1] –राज्ञा, मा –लक्ष्मीः, सा च द्वेधा –धनलक्ष्मीः प्राणलक्ष्मीश्च' अतस्तस्या घातो –हननं तस्याभावः अमाघातोऽमारिरद्रव्यापहारश्चेत्यर्थः, तस्य कारणं –विधापनम्, अनघं–निर्दोषम्, वधप्रवृत्तभोजनवृत्तिमात्रसम्पादनेन, अन्यथा तद्वृत्त्यु-च्छेदापत्तेः, 'गुरुणा' प्रावचनिकेन, 'स्वशक्त्या' स्वसामर्थ्येन, तादृग्गुर्वभावे श्रावकादिभिरपि स्वद्रव्यप्रदानपूर्वं कारयितव्य इति भावः । सा च यात्रा त्रिविधा । यदुक्तं –

"**अष्टाहिकाभिधामेकां, रथयात्रामथापराम् ।**
**तृतीयां तीर्थयात्रां चेत्याहुर्यात्रां त्रिधा बुधाः" ॥१॥ [ ]**

तत्राष्टाहिकास्वरूपं पूर्वमुक्तम्, तासु च सविस्तरं सर्वचैत्यपरिपाटीकरणादि-महोत्सवोऽष्टहिकायात्रा। इयं चैत्ययात्राऽप्युच्यते। रथयात्रा तु शृङ्गारितप्रवररथे जिनप्रतिमां संस्थाप्य समहं स्नात्रपूजादिपुरस्सरं समस्तनगरे पूजाप्रवर्त्तनादिरूपा ।
यतो **हैमपरिशिष्टपर्वणि –**

"**सुहस्त्याचार्यपादानामवन्त्यामेव तस्थुषाम् ।**
**चैत्ययात्रोत्सवश्चक्रे, सङ्घेनान्यत्र वत्सरे ॥१॥ [ प.प.११/६६ ]**
**मण्डपं चैत्ययात्रायां, सुहस्ती भगवानपि ।**
**एत्य नित्यमलञ्चक्रे, श्रीसङ्घेन समन्वितः[2] ॥२॥ [ प.प.११/६७ ]**
**सुहस्तिस्वामिनः शिष्यः, परमाणुरिवाग्रतः ।**
**कृताञ्जलिस्तत्र नित्यं, निषसाद च सम्प्रतिः ॥३॥ [ प.प.११/६८ ]**
**यात्रोत्सवा[3]ङ्गे सङ्घेन, रथयात्रा प्रचक्रमे ।**
**यात्रोत्सवो हि भवति, सम्पूर्णो रथयात्रया ॥४॥ [ प.प.११/६९ ]**
**रथोऽथ रथशालाया, दिवाकररथोपमः ।**
**निर्ययौ स्वर्णमाणिक्यद्युतिद्योतितदिग्मुखः ॥५॥ [ प.प.११/७० ]**
**श्रीमदर्हत्प्रतिमाया, रथस्थाया महर्द्धिभिः ।**
**विधिज्ञैः स्नात्रपूजादि, श्रावकैरुपचक्रमे ॥६॥ [ प.प.११/७१ ]**

---

१. राज्ञा–नृपेण–इति पञ्चाशकवृत्तौ ॥ २. P.C. परिशिष्टपर्व–श्राद्धविधिवृत्त्योश्च । °ताः–मु० ॥ ३. °वान्ते–इतिपरिशिष्टपर्वणि ॥

**क्रियमाणेऽर्हतः स्नात्रे, स्नात्राम्भो न्यपतद् रथात् ।**
**जन्मकल्याणके पूर्वं, सुमेरुशिखरादिव ॥७॥ [ प.प.११/७२ ]**
**श्राद्धैः सुगन्धिभिर्द्रव्यैः, प्रतिमाया विलेपनम् ।**
**स्वामिविज्ञीप्सुभिरिवाकारि वक्त्राहितांशुकैः ॥८॥ [ प.प.११/७३ ]**
**मालतीशतपत्रादिदामभिः प्रतिमाऽर्हतः ।**
**पूजिताऽभात् कलेवेन्दोर्वृत्ता शारदवारिदैः ॥९॥ [ प.प.११/७४ ]**
**दह्यमानागरूत्थाभिर्धूमलेखाभिरावृता ।**
**[1]अराजत् प्रतिमा नीलवासोभिरिव पूजिता ॥१०॥ [ प.प.११/७५ ]**
**आरात्रिकं जिनाचार्याः, कृतं श्राद्धैर्ज्वलच्छिखम् ।**
**दीप्यमानौषधीचक्रशैलशृङ्गविडम्बकम् ॥११॥ [ प.प.११/७६ ]**
**वन्दित्वा श्रीमदर्हन्तमथ तैः परमार्हतैः ।**
**रथ्यैरिवाग्रतो भूयः, स्वयमाचकृषे रथः ॥१२॥ [ प.प.११/७७ ]**
**नागरीभिरुपक्रान्तसहल्लीसकरासकः ।**
**चतुर्विधाऽऽतोद्यवाद्यसुन्दरप्रेक्षणीयकः ॥१३॥ [ प.प.११/७८ ]**
**परितः श्राविकालोकगीयमानोरुमङ्गलः ।**
**प्रतीच्छन् विविधां पूजां, [2]प्रत्यट्टं प्रतिमन्दिरम् ॥१४॥ [ प.प.११/७९ ]**
**बहुलैः कुङ्कुमाम्भोभिरभिषिक्ताग्रभूतलः ।**
**सम्प्रतेः सदनद्वारमाससाद शनै रथः ॥१५॥ [ प.प.११/८० ] त्रिभिर्विशेषकम् ।**
**राजाऽपि सम्प्रतिरथ, रथपूजार्थमुद्यतः ।**
**आगात् पनसफलवत्सर्वाङ्गोद्भिन्नकण्टकः ॥१६॥ [ प.प.११/८१ ]**
**रथाधिरूढां प्रतिमां, पूजयाऽष्टप्रकारया ।**
**अपूजयन्नवानन्दसरोहंसोऽवनीपतिः ॥१७॥ [ प.प.११/८२ ]** इति ।

**महापद्मचक्रिणा**ऽपि मातुर्मनोरथपूर्त्तये रथयात्राऽत्याडम्बरैः चक्रे । **कुमारपाल**रथयात्रा त्वेवमुक्ता —

**''चित्तस्स अट्ठमिदिणे, चउत्थपहरे महाविभूईए ।**
**सहरिसमिलंतनायरजणकयमंगल्लजयसद्दो ॥१॥ [ श्रा.वि./गा.१२वृ. ]**

---

१. अशुभत्–इति परिशिष्टपर्वश्राद्धविधिवृत्त्योश्च ॥ २. प्रत्यहं–मु० श्राद्धविधिवृत्तिः ॥

**सोवण्णजिणवररहो, नीहरइ चलंतसुरगिरिसमाणो ।**
**कणगोरुदंडधयछत्त[1]चमरराईहिं दिप्पंतो ॥२॥** [ श्रा.वि./गा.१२वृ. ]
**ण्हविअविलित्तं [2]कुसुमेहिं पूईअं तत्थ पासजिणपडिमं ।**
**कुमरविहारदुवारे, महायणो ठवइ रिद्धीए ॥३॥** [ श्रा.वि./गा.१२वृ. ]
**तूररवभरिअभुवणो, सरभसणच्चंतचारुतरुणिगणो ।**
**सामंतमंतिसहिओ, वच्चइ निवमंदिरंमि रहो ॥४॥** [ श्रा.वि./गा.१२वृ. ]
**राया रहत्थपडिमं, पट्टंसुअकणयभूसणाईहिं ।**
**सयमेव अच्चिउं कारवेइ विविहाइ नट्टाइ ॥५॥** [ श्रा.वि./गा.१२वृ. ]
**तत्थ गमिऊण रयणिं, नीहरिओ सीहबारबाहिंमि ।**
**[3]वाएण चलिअधयतंडवंमि पडमंडवंमि रहो ॥६॥** [ श्रा.वि./गा.१२वृ. ]
**तत्थ पभाए राया, रहजिणपडिमाइ विरइउं पूअं ।**
**चउविहसंधसमक्खं, सयमेवारत्तिअं कुणइ ॥७॥** [ श्रा.वि./गा.१२वृ. ]
**तत्तो नयरंमि रहो, परिसक्कइ कुंजरेहिं जुत्तेहिं ।**
**ठाणे ठाणे पडमंडवेसु विउलेसु चिट्ठंतो ॥८॥** [ श्रा.वि./गा.१२वृ. ] इत्यादि ।

[4]अथ तीर्थयात्रास्वरूपं –तत्र तीर्थानि श्रीशत्रुञ्जयोज्जयन्तादीनि, तथा तीर्थकृज्जन्मदीक्षाज्ञाननिर्वाणविहारभूमयोऽपि प्रभूतभव्यस्य शुभभावसम्पादकत्वेन भवाम्भोनिधितारणात् तीर्थान्युच्यन्ते, तेषु सद्दर्शनविशुद्ध्यर्थं विधिवज्जिनानुद्दिश्य महोत्सवः तीर्थयात्रा । तत्रायं विधिः –प्रथमं मुख्यवृत्त्या ब्रह्मव्रतैकाहारपादचाराद्यभिग्रहान् प्रतिपद्यते, सत्यामपि वाहनसामग्र्यां पादचारणाद्युचितमेव । यतः –

**''एकाहारी दर्शनधारी, यात्रासु भूशयनकारी ।**
**सच्चित्तपरिहारी, पदचारी ब्रह्मचारी च ॥१॥** [ ]

ततो राजानमनुज्ञापयति, प्रगुणीकरोति च यथाशक्ति युक्तिविशिष्टान् यात्रार्थं देवालयान् , कारयति च विविधपटमण्डपप्रौढकटाहादिचलत्कूपसरोवरादीन् , सज्जयति शकटाद्यनेकविधवाहनानि, निमन्त्रयते च सबहुमानं श्रीगुरून् सङ्घं स्वजनवर्गं च, प्रवर्त्तयत्यमारिम् , करोति चैत्यादौ महापूजादिमहोत्सवम् , ददाति दीनादिभ्यो दानम् , प्रोत्साहयति निराधारेभ्यो विभववाहनादिदानविषयोद्घोषणापूर्वम् , आह्वयति कवचाङ्ग-

---

१. C. श्राद्धविधिवृत्ति । °चा° मु० ॥ २. कुसुमोह–इति श्राद्धविधिवृत्तौ ॥ ३. ठाइ एवं चिअध° इति श्राद्धविधिवृत्तौ ॥ ४. तुला–श्राद्धविधिवृत्तिः भाग–२ प० २३ ॥

काद्युपस्करार्पणादिसन्मानपूर्वमनेकोद्भटभटान् , प्रगुणयति च गीतनृत्यवाद्यादि, ततः करोति शुभेऽह्नि प्रस्थानमङ्गलम् , तत्र सकलसमुदायं विशिष्टभोज्यताम्बूलादिभिः परिभोज्य, परिधाप्य च दुकूलादिभिः विधापयति सुप्रतिष्ठधर्मिष्ठपूज्यभागवत्तरनरेभ्यः[१] सङ्घाधिपत्यतिलकम् , विदधाति सङ्घपूजामहम् , मार्गे च सम्यग् सङ्घसम्भालनां कुर्वन् प्रतिग्रामं प्रतिपुरं च चैत्येषु स्नात्रपूजाध्वजप्रदानचैत्यपरिपाट्याद्यतुच्छोत्सवं जीर्णोद्धारादिचिन्तां च विदधन् तीर्थं प्राप्नोति । तद्दर्शने च रत्नमौक्तिकादिवर्द्धापनलपनेप्सित[२]मोदकादिलम्भनिकादि कुरुते ।

तीर्थे चाष्टप्रकारादिमहापूजा-विधिस्नात्र-मालोद्घाटन-घृतधाराप्रदान-नवाङ्ग-जिनपूजन-दुकूलादिमयमहाध्वजप्रदान-रात्रिजागरण-गीतनृत्याद्युत्सवकरण-तीर्थोपवास-षष्ठादितपोविधान-विविधफलभोज्यादिवस्तुढौकन-परिधापनिकामोचन-विचित्र-चन्द्रोदयबन्धन-दीपतैलघृतधौतिकेसरचन्दनागुरुपुष्पचङ्गेरिकादिसमस्तपूजोपकरणप्रदान-नवदेवकुलिकादिविधापन-सूत्रधारादिसत्करण-तीर्थाशातकनिवारण-तीर्थरक्षकसन्मानन-तीर्थदायप्रवर्त्तन-साधर्मिकवात्सल्यगुरुसङ्घपरिधापनादिभक्ति-मार्गणदीनाद्युचितदानादि-सत्कृत्यानि कुरुते ।

एवं यात्रां कृत्वा प्रौढप्रवेशोत्सवैः स्वगृहमागतो देवाह्वानादिमहं विधाय सर्वसङ्घं भोजनादिसत्कारपूर्वकं विसर्ज्य वर्षादि यावत्तीर्थोपवासादिकरणादिना दिनमाराधयतीति तीर्थयात्राविधिः । यात्रा च कल्याणकदिवसेषु विशेषलाभकरी । यतः **पञ्चाशके** –

''**ता रहणिक्खमणाइ वि, एते उ दिणे पडुच्च कायव्वं ।**
**जं एसो च्चिअ विसओ, पहाणमो तिएँ किरिआए** ॥१॥ [ पञ्चा.९/४२ ]

तथा- ''**संवच्छरचाउम्मासिएसु अट्ठाहिआसु अ तिहीसु ।**
**सव्वायरेण लग्गइ, जिणवरपूआतवगुणेसु**'' ॥१॥ [ चे.म./८१९ ]

इत्यागमप्रामाण्यादेष्वपि दिवसेषु विशेषलाभकरी ज्ञेया, यात्रायाश्च दर्शनशुद्ध्यङ्गत्वात् प्रयत्नः श्रेयानेव । यतः –

''**दंसणमिह मोक्खंगं, परमं एअस्स अट्ठहाऽऽयारो ।**
**निस्संकादि भणिओ, पभावणं तो जिणिंदेहिं** ॥१॥ [ पञ्चा.९/२ ]
**पवरा पभावणा इह, असेसभावम्मि तीए सब्भावा ।**
**जिणजत्ता य तयंगं, जं पवरं तप्पयासोऽयं**'' ॥२॥ [ पञ्चा.९/३ ]

इति तृतीयद्वारं ३।

---

१. °भाग्य° इति श्राद्धविधिवृत्तौ ॥ २. °ता° श्राद्धविधिवृत्तौ ॥

जिनगृहे स्नपनं स्नात्रम्, तदपि प्रत्यहं पर्वसु वा करणाशक्तेनापि प्रतिवर्षमेकैकं साडम्बरसमग्रसामग्रीमेलनादिपूर्वं कार्यम् ४।

तथा देवद्रव्यवृद्ध्यर्थं प्रतिवर्षं ऐन्द्री अन्या वा माला यथाशक्ति ग्राह्या, एवं नवीनभूषणचन्द्रोदयादि यथाशक्ति मोच्यम् ५।

तथा सर्वाङ्गाभरणविशिष्टाङ्गपत्रभङ्गीरचन-पुष्पगृहकदलीगृहपुत्रिकाजलयन्त्रादि-रचना-नानागीतनृत्याद्युत्सवैर्महापूजा[१] रात्रिजागरणं च कार्ये ६-७।

श्रुतज्ञानस्य पुस्तकादेः कर्पूरादिना पूजामात्रं सर्वदाऽपि सुकरम्, तदशक्तेनापि प्रतिवर्षमेकशः कार्या ८।

तथा नमस्कारावश्यकसूत्रोपदेशमालादिज्ञानदर्शनविविधतपःसम्बन्धिषूद्यापनेषु जघन्यतोऽप्येकैकं तत्प्रतिवर्षं विधिवत्कार्यम्, नमस्कारस्योपधानोद्वहनादिविधिपूर्वक-मालारोपणेन आवश्यकादिसूत्राणाम्। एवं गाथासङ्ख्यचतुश्चत्वारिंशदधिकपञ्चशत्यादि-मोदकनालिकेरादिढौकनादिना, **उपदेशमाला**दीनां सौवर्णादिगर्भदर्शनमोदकलम्भनादिना, दर्शनादीनां शुक्लपञ्चम्यादिविविधतपसामपि तत्तदुपवासादिसङ्ख्यनाणकवर्तुलिकानालि-केरमोदकादिनानाविधवस्तुढौकनादिनोद्यापनानि कार्याणि ९।

तीर्थप्रभावनानिमित्तं प्रतिवर्षमेकैकशोऽपि गुरुप्रवेशोत्सवसङ्घपरिधापनिका प्रभावनादि च कार्यम्। तत्र गुरुप्रवेशोत्सवः सर्वाङ्गीणप्रौढाडम्बरचतुर्विधश्रीसङ्घसम्मुखगमन-श्रीगुर्वादिसङ्घसत्कारादिना यथाशक्ति कार्यः। यतः –"**अभिगमणवंदणनमंसणेण**" [ **उपदेशमाला/१६६** ] इत्यादि। न च साधूनां प्रवेशोत्सवोऽनुचित इति वाच्यम्, आगमे उपेत्य तत्करणस्य प्रतिपादनात्। तथाहि साधोः प्रतिमाधिकारे **व्यवहारभाष्यम् –**

**"तीरिअ उब्भामगनिउगदरिसणं सन्निसाहुमप्पाहे।**
**दंडिअभोइअ असई, सावगसंघो व सक्कारं"** ॥१॥ [ **व्य.भा./८०८** ]

अस्या भावार्थोऽयं –प्रतिमासमापकः साधुः प्रत्यासन्नग्रामे बहुसाधुगमनागमनस्थाने आत्मानं दर्शयति। दर्शयंश्चात्मानं प्रतिमां समाप्यागतोऽहमिति कथयति, ततो गुरवो राजादीन् कथयति –यदमुको महातपस्वी समाप्ततपा इति महता सत्कारेण गच्छे प्रवेशनीय इति राजा, तदभावे ग्रामाधिकारी, तदभावे समृद्धश्रावकस्तद्भावे च चतुर्विधः सङ्घः सत्कुरुते, जीतमेतदिति। तथा सङ्घस्यापि नालिकेरप्रदानादिरूपा प्रभावना कार्या, शासनप्रभावनायाश्च तीर्थकृत्त्वादिफलत्वात्। उक्तं च –

---

१. °नृत्ता° इति श्राद्धविधिवृत्तौ प० २५९ ॥

**"अप्पुव्वनाणगहणे, सुअभत्ती पवयणे पभावणया ।**
**एएहिं कारणेहिं, तित्थयरत्तं लहइ जीवो"** ॥१॥ [ उप.प./५०२ ]

तथा- "[1]**कारणादधिकां मन्ये, भावनातः प्रभावनाम् ।**
**भावना मोक्षदा स्वस्य, स्वान्ययोस्तु प्रभावना"** ॥२॥ [ ] इति १०।

तथा गुरुयोगे जघन्यतोऽपि प्रतिवर्षमालोचना गुरुभ्यो दातव्या । यतः —

**"प्रतिसंवत्सरं ग्राह्यं, प्रायश्चित्तं गुरोः पुरः ।**
**शोध्यमानो भवेदात्मा, येनादर्श इवोज्ज्वलः"** ॥१॥

**आवश्यकनिर्युक्तौ** तु तस्याः काल एवमुक्तः —

"[2]**पक्खिअचाउम्मासिअ, आलोयण णिअमसो उ दायव्वा ।**
**गहणं अभिग्गहाण य, पुव्वग्गहिए णिवेदेउं"** ॥१॥ [ पञ्चा.१५/१० ]

प्रथममालोचनेति कः शब्दार्थः ?, उच्यते, आ सामस्त्येन स्वगताकरणीयस्य वागादियोगत्रयेण गुरोः पुरो भावशुद्ध्या प्रकटनामालोचना । यतः **पञ्चाशके —**

**"आलोअणं अकिच्चे, अभिविहिणा दंसणं ति लिंगेहिं ।**
**वइमाइएहिँ सम्मं, गुरुणो आलोयणा णेआ"** ॥१॥ [ पञ्चा.१५/२ ]

तद्विधिश्चायं **श्राद्धजीतकल्पपञ्चाशका**द्युक्तो । यथा —

**"एत्थ पुण एस विही, अरिहो अरिहंमि दलइ अ कमेणं ।**
**आसेवणाइणा खलु , सम्मं दव्वाइ[3]सुद्धस्स"** ॥१॥ [ पञ्च.१५/८ ]

व्याख्या —अत्र —आलोचनायामेष —वक्ष्यमाणो विधिः —कल्पः, तद्यथा —अर्हः — आलोचनादानोचितः, अर्हे —आलोचनादानयोग्ये गुरौ विषयभूते, ददाति —प्रयच्छति, तथा क्रमेण, किंविधेन तेन ? इत्याह —आसेवनादिना, आदिशब्दादालोचनाक्रमग्रहः । आसेवनाक्रमेण आलोचनाक्रमेणेत्यर्थः, तथा 'सम्यक्' यथावत् , आकुट्टिकादिभाव-प्रकाशनतः, तथा द्रव्यादि ४ शुद्धौ सत्यां, प्रशस्तेषु द्रव्यादिष्वित्यर्थः, इति द्वारगाथा । अथार्हद्वारविवरणं —

**"संविग्गो उ अमायी, मइमं कप्पट्ठिओ अणासंसी ।**
**पण्णवणिज्जो सड्ढो, आणाउत्तो दुकडतावी** ॥१॥ [ पञ्चा.१५/१२ ]

---

१. कारणादधिकां मन्ये भावनातः प्रभावनाम्–L.C. नास्ति । 'प्रकारेणाधिका युक्तं भावनातः प्रभावना' इति अत्रैव उत्तरार्धं श्राद्धविधिवृत्तौ प० २७ A ॥ २. चाउम्मासिअ वरिसे आलो० इति श्राद्धविधिवृत्तौ ॥ ३. °सुद्धीए–इति पञ्चाशके ॥

**तव्विहिसमूसगो खलु , अभिग्गहासेवणाइलिंगजुओ ।**
**आलोअणापयाणे, जोग्गो भणिओ जिणिंदेहिं'' ॥२॥ [ पञ्चा.१५/१३ ]**

व्याख्या –[१]संविग्नस्तु संसारभीरुरेवालोचनाप्रदाने योग्य इति योगः, तस्यैव दुष्कर-करणाध्यवसायित्वात् , दुष्करं चालोचनादानम् । यदाह –

''**अवि राया चए रज्जं, न य दुच्चरिअं कहे**'' । [ ] १।

तथा 'अमायी' अशठः, मायी हि न यथावद् दुष्कृतं कथयितुं शक्नोति २। तथा 'मतिमान्' विद्वान् , तदन्यो हि आलोचनीयादिस्वरूपमेव न जानाति ३। तथा 'कल्पस्थितः' स्थविरजातसमाप्तकल्पादिव्यवस्थितः, तदन्यस्य हि अतिचारविषया जुगुप्सैव न स्यात् ४। तथा 'अनाशंसी आचार्याद्याराधनाशंसारहितः, सांसारिकफलानपेक्षो वा, आशंसिनो हि समग्रातिचारालोचनाऽसम्भवादाशंसाया एवातिचारत्वात् ५। तथा 'प्रज्ञापनीयः' सुखावबोध्यः, तदन्यो हि स्वाग्रहादकृत्यविषयान्निवर्त्तयितुं न शक्यते ६। तथा 'श्राद्धः' श्रद्धालुः, स हि गुरूक्तां शुद्धिं श्रद्धत्ते ७। तथा 'आज्ञावान्' आप्तोपदेशवर्त्ती, स हि प्रायोऽकृत्यं न करोत्येव ८। तथा दुष्कृतेन –अतिचारासेवनेन तप्यते –अनुतापं करोतीत्येवंशीलः दुष्कृततापी, स एव हि तदालोचयितुं शक्नोति ९। तथा 'तद्विधिसमुत्सुकः खलु' आलोचनाकल्पलालस एव स हि तदविधिं प्रयत्नेन परिहरति १०। तथा अभिग्रहासेवनादिभिः –द्रव्यादिनियमविधान-विधापनानुमोदनप्रभृतिभिर्लिङ्गैः –आलोचनायोग्यतालक्षणैर्युतो –युक्तो यः स तथा ११। आलोचनाप्रदाने प्रतीते, योग्यः –अर्हो भणितो जिनैरिति गाथाद्वयार्थः ॥

अथार्हगुरुद्वारविवरणं [२]**श्राद्धजीतकल्पे** एवं –

''**गिअत्थो कडजोगी, चारित्ती तह य गाहणाकुसलो ।**
**खेअन्नो अविसाई, भणिओ आलोअणायरिओ**'' ॥१॥ [ श्रा.जी.गा./८ ]

[३]गीतार्थः –अधिगतनिशीथादिश्रुतसूत्रार्थः, कृतः –अभ्यस्तो योगो –मनोवाक्काय-व्यापारः, शुभो विविधतपो वा स यस्यास्ति स कृतयोगी, विविधशुभध्यानतपोविशेषैः परिकर्मितात्मशरीर इत्यर्थः, चारित्री –निरतिचारचारित्रवान् , ग्राहणा –बहुयुक्तिभिरा-लोचनादायकानां विविधप्रायश्चित्तादितपोविधेरङ्गीकरणम् , तत्र कुशलः, खेदः –सम्यक्प्रायश्चित्तविधेः परिश्रमोऽभ्यास इत्यर्थः, तं जानातीति खेदज्ञः, अविषादी

---

१. तुल्यप्रायः पञ्चाशकवृत्तौ प० २४०तः ॥ २. तुला–श्राद्धविधिवृत्तिः प० १६७तः ॥
३. श्राद्धजीतकल्पवृत्तिः प० ७ ॥

महत्यप्यालोचकस्य पापविषे –पापे श्रुते न विषादवान्, प्रत्युताऽऽलोचनादायकस्य तत्तन्निदर्शनगर्भवैराग्यवचनैरुत्साहक इत्यर्थः ॥१॥

**पञ्चाशके** त्वित्थम् –

''**तह परहिअम्मि जुत्तो, विसेसओ सुहुमभावकुसलमती ।**
**भावाणुमाणवं तह, जोग्गो आलोअणायरिओ**'' ॥१॥ [ **पञ्चा.१५/१५** ]

'परहिते' परोपकारे, 'युक्त' उद्युक्त उद्यत इत्यर्थः, तथा 'विशेषतः' आचार्यान्तरापेक्षया विशेषेण, सूक्ष्मभावकुशलमतिः, अत एव 'भावानुमानवान्' परचेतसामिङ्गितादिभिर्निश्चायकः, अयम् 'आलोचनाचार्यो' विकटनागुरुः, उक्तगुणकलापशून्यो हि न शुद्धिकरणक्षम इति ।

आलोचनाचार्यस्यैतेऽष्टौ गुणाः –

''**आयारवमाहारव, ववहारुव्वीलए पकुव्वी अ ।**
**अपरिस्सावी निज्जव, अवायदंसी गुरू[1] भणिओ**'' ॥१॥ [ **श्रा.जी.गा./९** ]

व्याख्या–'आचारवान्' ज्ञानासेवाभ्यां ज्ञानादिपञ्चप्रकाराचारयुक्तः, अयं हि गुणित्वेन श्रद्धेयवाक्यो भवति । तथा 'आहारव'त्ति अवधार आलोचकोक्तापराधानामवधारणं तद्वान्, अयं हि सर्वापराधानां यथावधारणासमर्थो भवति । तथा 'ववहार'त्ति मतुब्लोपाद् व्यवहारवान्[2] आगम-श्रुताऽऽज्ञा-धारणा-जीतलक्षणपञ्चप्रकारव्यवहारान्यतरयुक्तः, व्यवहारवांश्च यथावच्छुद्धिकरणसमर्थो भवति । [3]तत्रागमव्यवहारः [4]केवलमनःपर्यायावधिज्ञानिचतुर्दशदशनवपूर्विषु १। श्रुतव्यवहारोऽष्टाद्येकार्द्धावसानपूर्वधरैकादशाङ्गिनिशीथाद्यशेषश्रुतज्ञेषु २। आज्ञाव्यवहारो दूरस्थगीतार्थाचार्ययोर्गूढपदैरालोचनाप्रायश्चित्तयोः प्रदानम् ३। धारणाव्यवहारो गुरुणा यदपराधे यद्यथा प्रायश्चित्तं दत्तं तत्तथैवान्यो दत्ते इत्यादि ४। जीतं [5]श्रुतोक्तादपि हीनमधिकं वा परम्परया आचीर्णम्, तेन व्यवहारो जीतव्यवहारः पञ्चमः ५, सम्प्रति मुख्यः । तथा अपव्रीडयति –लज्जयातिचारान् गोपायन्तमुपदेशविशेषैरपव्रीडयति विगतलज्जं करोत्यपव्रीडकः अयं ह्यालोचकस्यात्यन्तमुपकारको भवतीति । तथा 'पकुव्वी'त्ति

---

१. अपरिस्सावीय बोद्धव्वो-इति पञ्चाशके ॥ २. 'व्यवहारवान् प्ररूपणादिप्रकारेण व्यवह्रियते अपराधजातं प्रायश्चित्तप्रदानतो येन स व्यवहारः, आगमादिकः पञ्चप्रकारः' इति श्राद्धजीतकल्पवृत्तौ प० ७ ॥ ३. तुला-श्राद्धविधिवृत्तिः प० १६८ ॥ ४. केवलि॰ इति श्राद्धविधिवृत्तौ प० २७ B ॥ ५. श्रुतोक्तापतितो-इति श्राद्धविधिवृत्तौ ॥

आलोचितातिचाराणां प्रायश्चित्तप्रदानेन शुद्धिं प्रकर्षेण कारयतीत्येवंशीलः, इत्येतदर्थस्य कुर्वेत्यागमप्रसिद्धस्य[1] धातोर्दर्शनात् (ग्रं० [2]८०००) यस्य विकुर्वणेतिप्रयोगः । आचारवत्त्वादिगुणयुक्तोऽपि कश्चिञ्छुद्धिदानं नाभ्युपगच्छतीत्येतद् व्यवच्छेदार्थं प्रकुर्वीत्युक्तम् , चः समुच्चये, तथा न परिश्रवति आलोचकोक्तमकृत्यमन्यस्मै न निवेदयतीत्येवंशीलोऽपरिश्रावी, तदन्यो ह्यालोचकानां लाघवकारी स्यात् , तथा 'निज्जव'त्ति प्राकृतत्वान्निर्यापयति निर्वाहयतीतिनिर्यापकः यो यथा समर्थस्तस्य तथा प्रायश्चित्तं दत्ते इत्यर्थः । तथाऽपायान् दुर्भिक्षदुर्बलत्वादिकानैहिकानर्थान् पश्यति, अथवा दुर्लभबोधिकत्वादिकान् सातिचाराणां तान् दर्शयतीत्येवंशीलोऽपायदर्शी, अयं चात एवालोकस्योपकारी, एतादृशो 'गुरुः' आलोचनाचार्यो भणितो जिनैः ॥१॥ इत्यष्टौ गुरुगुणाः ।

**''आलोअणापरिणओ, सम्मं संपट्ठिओ गुरुसगासे ।**
**जइ अंतरा वि कालं, करेज्ज आराहओ तह वि''** ॥१॥ [ श्रा.जी.गा./३९ ]

अथालोचनाचार्येऽपवादमाह –

**''[3]आयरिआइ सगच्छे, संभोइअइअरगीअपासत्थो[4] ।**
**सारूवी य पच्छाकड देवय पडिमाअरिहसिद्धो[5]''** ॥३॥ [ श्रा.जी.गा./१२ ]

साधुना श्राद्धेन वा नियमतः प्रथमं स्वगच्छे आचार्यस्य तदयोगे उपाध्यायस्य एवं प्रवर्त्तिनः स्थविरस्य गणावच्छेदिनो वा आलोचनीयम् । स्वगच्छे पञ्चानामप्यभावे साम्भोगिक एकसामाचारीके गच्छान्तरे आचार्यादिक्रमेणालोच्यम् । तेषामप्यभावे इतरस्मिन्नसाम्भोगिके संविग्ने गच्छे स एव क्रमः, तेषामप्यभावे गीतार्थपार्श्वस्थस्य, तस्याप्यभावे गीतार्थसारूपिकस्य, तस्याप्यभावे गीतार्थपश्चात्कृतस्यालोचयितव्यम् । [6]सारूपिकः शुक्लाम्बरो मुण्डोऽबद्धकच्छो रजोहरणरहितोऽब्रह्मचर्योऽभार्यो भिक्षाग्राही, सिद्धपुत्रः सशिखः सभार्यश्च, पश्चात्कृतस्तु त्यक्तचारित्रवेषो गृहस्थः, पार्श्वस्थादेरपि गुरुवद्वन्दनकप्रदानादिविधिः कार्यो, विनयमूलत्वाद्धर्मस्य, यदि तु पार्श्वस्थादिः स्वं हीनगुणं पश्यन् न वन्दनं कारयति तदा तस्य निषद्यामारचय्य प्रणाममात्रं कृत्वा आलोचनीयम् , पश्चात्कृतस्य चेत्वरसामायिकारोपणं लिङ्गप्रदानं च कृत्वा यथाविध्यालोच्यम् , पार्श्वस्थादीनामप्यभावे यत्र [7]राजगृहे गुणशीला–

---

१. कुर्व करणे' इति धातुपारायणे तृतीयपरिशिष्टे प० ३६४ ॥ २. L.P. । ग्रं० ९००० मु० ॥ ३. तुला–श्राद्धविधिवृत्तिः प० १६८ ॥ ४. °त्थे–इति श्राद्धजीतकल्पे ॥ ५. °द्धे–इति श्राद्धजीतकल्पे ॥ ६. सारूपिकस्य पार्श्वे संयतवेषस्य गृहस्थस्य लिङ्गमात्रधारिण इत्यर्थः' इति श्राद्धजीतकल्पवृत्तौ प० ९ ॥ ७. कोरण्टकादौ–इति श्राद्धजीतकल्पवृत्तौ प० ९ ॥

दावर्हद्गणधराद्यैर्बहुशः प्रायश्चित्तप्रदानं यया देवतया दृष्टम् , तत्र तस्याः सम्यग्दृष्टेरष्ट-माद्याराधनेन प्रत्यक्षाया आलोच्यम् , जातु सा च्युताऽन्योत्पन्ना तदा महाविदेहेऽर्हन्तं पृष्ट्वा प्रायश्चित्तं दत्ते, तदयोगेऽर्हत्प्रतिमानां पुर आलोच्य स्वयं प्रायश्चित्तं प्रतिपद्यते । तासामप्ययोगे पूर्वोत्तराभिमुखोऽर्हत्सिद्धसमक्षमप्यालोचयेत् , न त्वनालोचित एव तिष्ठेत् , सशल्य-स्यानाराधकत्वात् । इत्थं च पार्श्वस्थादीनामपि गीतार्थानां पुर आलोचयितव्यं न तु संविग्नस्याप्यगीतार्थस्य पुरः । यतः —

''**अगीओ न वि जाणइ, सोहिं चरणस्स देइ ऊणहिअं ।**
**तो अप्पाणं आलोअगं च पाडेइ संसारे**'' ॥१॥ [ श्रा.जी.गा./२० ]

**व्यवहारसूत्रे**ऽप्येतदर्थसंवादी पाठः स्पष्ट एव । यतः —

''**भिक्खू अन्नयरं अकिच्चठाणं पडिसेवित्ता इच्छिज्जा आलोइअत्तए[१] पडिक्क-मित्तए निंदित्तए वा विउट्टित्तए वा विसोहित्तए वा अकरणयाए अब्भुट्ठित्तए वा अहारिहं तवोकम्मं पायच्छित्तं पडिवज्जित्तए वा, जत्थेव अप्पणो आयरिअउवज्झाए पासिज्जा कप्पइ से तस्संतिए आलोइत्तए जाव पडिवज्जित्तए । णो चेव णं अप्पणो आयरिअउवज्झाए पासिज्जा, जत्थेव संभोइअं साहम्मिअं बहुस्सुअं बज्झागमं पासेज्जा, कप्पइ से तस्संतिए आलोइत्तए जाव पडिवज्जित्तए वा । णो चेव णं संभोइअं साहम्मिअं बहुस्सुअं बज्झागमं पासेज्जा, जत्थेव अण्णसंभोइअं साहम्मिअं बहुस्सुअं बज्झागमं पासेज्जा, कप्पइ से तस्संतिए आलोइत्तए, जाव पडिवज्जित्तए वा । णो चेव णं अण्णसंभोइअं साहम्मिअं बहुस्सुअं बज्झागमं पासेज्जा, जत्थेव सारूविअं बहुस्सुअं बज्झागमं पासेज्जा, कप्पइ से तस्संतिए आलोइत्तए जाव पडिवज्जित्तए वा । णो चेव णं सारूविअं बहुस्सुअं बज्झागमं पासेज्जा, जत्थेव समणोवासगं पच्छाकडं बहुस्सुअं बज्झागमं पासेज्जा, कप्पइ से तस्संतिए आलोइत्तए जाव पडिवज्जित्तए वा । णो चेव णं समणोवासगं पच्छाकडं बहुस्सुअं बज्झागमं पासेज्जा, जत्थेव सम्मं भाविआइं चेइआइं पासेज्जा, कप्पइ से तस्संतिए आलोइत्तए जाव पडिवज्जित्तए वा । णो चेव णं सम्मं भाविआइं चेइआइं पासेज्जा, बहिआ गामस्स नयरस्स वा करयलपरिग्गहिअं सिरसावत्तं मत्थए अंजलिं कट्टु कप्पइ से एवं वइत्तए —एवइआ मे अवराहा, एवतिखुत्तो अहं अवरद्धो, अरहंताणं सिद्धाणं अंतिए आलोइज्जा पडिक्कमेज्जा जाव पायच्छित्तं पडिवज्जेज्जासि त्ति बेमि**'' [ सू० ३४-३९ ] **व्यवहारस्य प्रथमोद्देशके ।**

अत एव गीतार्थस्य दुर्लभत्वे कालतो द्वादश वर्षाणि, क्षेत्रतः सप्त योजनशतानि तद्गवेषणा कार्या, न तु अगीतार्थस्य पुरः आलोच्यम् । यतः—

---

१. आलोइअत्तए वा पडिक्कमित्तए वा निं° P. ॥

**"सल्लुद्धरणनिमित्तं, गीअत्थन्नेसणा उ उक्कोसा ।**
**जोअणसयाइं सत्त उ, बारसवरिसाइं कायव्वा" ॥१॥ [ पञ्चा.१५/४१, प्रव./८६२ ]**

इह च शेषविशेषणानुपादनेन यद् गीतार्थग्रहणं कृतम् , तत्सकलोक्तगुणयुक्ताचार्यालाभे संविग्नगीतार्थमात्रस्याप्यालोचनाचार्यत्वस्य ज्ञापनार्थम् इत्यलं प्रसङ्गेन ।

अथ पूर्वं द्वारगाथायां क्रमेणालोच्यमिति द्वारमुक्तं । तत्प्रकाशनायाह—

**"दुविहेणणुलोमेणं, आसेवणविअडणाभिहाणेणं ।**
**आसेवणाणुलोमं, जं जह आसेविअं विअडे ॥१॥ [ पञ्चा.१५/१६ ]**
**आलोयणाणुलोमं, गुरुगवराहे उ पच्छओ विअडे ।**
**पणगाइणा कमेणं, जह जह पच्छित्तवुड्ढी उ" ॥२॥ [ पञ्चा.१५/१७ ]**

"[1]व्याख्या—'द्विविधेन' द्विप्रकारेण, 'आनुलोम्येन' क्रमेण, द्वैविध्यमेवाह—आसेवनेन यदानुलोम्यं तदासेवनमेव, विकटनेन यत् तद् विकटनमेवातस्ते एवाभिधाने यस्य तत्तथा तेनासेवनविकटनाभिधानेनालोचनां ददातीति द्वारगाथायां सम्बन्धनीयम्। तत्राद्यं स्वरूपत आह—आसेवनानुलोम्यं तत् यत् येन क्रमेणासेवितं विकटयत्यालोचनाकारीति १। आलोचनानुलोम्यं पुनस्तत् , 'गुरुकापराधान्' महदतिचारान् 'पश्चात्' लघ्वपराधानन्तरं 'विकटयति' आलोचयति, कथम् ? इत्याह—पणग त्ति समयभाषात्वात् पञ्चक-दशक-प्रभृतिना क्रमेण प्रायश्चित्त[2]वृद्धिर्वर्धनं [3]यथा तथा विकटयतीति प्रकृतम्। इह च लघावतिचारे पञ्चकं नाम प्रायश्चित्तम् , गुरुके तु दशकम् , गुरुतरे तु पञ्चदशकमित्येवमादीति। अत्र गीतार्थ आलोचनानुलोम्येनैवालोचयति, कारणं तु गीतार्थगम्यम् , इतरस्त्वासेवनानुलोम्येन, आलोचनानुलोम्यानभिज्ञत्वात् तस्य। अत्र च कारणमतिचाराणां सुस्मरत्वमिति गाथाद्वयार्थः ॥

अथ सम्यगितिद्वारं विवृणोति—

**"तह आउट्टिअदप्पप्पमायओ कप्पओ व जयणाए ।**
**कज्जे वाऽजयणाए, जहट्ठिअं सव्वमालोए" ॥१॥ [ पञ्चा.१५/१८ ]**

[4]तथेतिशब्दो यथाक्रममालोचनाङ्गमेवमाकुट्ट्यादिकृतत्वमपीत्येतदर्थः । आकुट्टिका—उपेत्यकरणम् , दर्पो—वल्गनादिः, प्रमादो—मद्यादिः स्मृतिभ्रंशादिर्वा, एषां द्वन्द्वोऽत-स्तेभ्यस्तत आकुट्टिकादर्पप्रमादतः, तथा 'कल्पतो वा' अशिवादिपुष्टालम्बनतो वा, कल्पश्च यतनादिविषय इत्यत आह—यतनया यथाशक्ति संयमरक्षारूपया, 'कार्ये वा' प्रयोजने वा

---

१. तुला पञ्चाशकवृत्तिः प० २४२ ॥ २. °वृद्धिशुद्धिर्व° इति पञ्चाशकवृत्तौ ॥ ३. तथा यथा- C. । तथा-इति पञ्चाशकवृत्तौ प० २४२ A ॥ ४. तुला-पञ्चाशकटीका प० २४२ ॥ °तथा श° P. ॥

सम्भ्रमहेतौ प्रदीपनकादावयतनयाऽनपेक्षितसारेतरविभागतया यदासेवितं, तदिति गम्यम् यथास्थितं सर्वमालोचयेत् —गुरुभ्यो निवेदयेद् विशुद्धिकामो, न तु लज्जादिना किञ्चिद्-गोपयति। यतः —

**''जह बालो जंपंतो, कज्जमकज्जं च उज्जुअं भणइ ।**
**तं तह आलोइज्जा, मायामयविप्पमुक्को अ ॥१॥** [ पञ्चा.१५/४७ ]
**मायाइदोसरहिओ, पइसमयं वड्ढमाणसंवेगो ।**
**आलोइज्ज अकज्जं न पुणो काहंति निच्छयओ ॥२॥** [ सं.प्र.आ./२७ ]
**लज्जाइगारवेणं, बहुस्सुअमएण वा वि दुच्चरिअं ।**
**जो न कहेइ गुरूणं, न हु सो आराहओ भणिओ'' ॥३॥** [ सं.प्र.आ./२८ ]

गारवेण त्ति —[1]रसादिगारवप्रतिबद्धत्वेन, तपोऽचिकीर्षुतयेत्यर्थः ।

अथ द्रव्यादिशुद्धिमाह —

**''दव्वाईसु सुहेसुं , देआ आलोअणा जओ [2]जेसुं ।**
**होंति सुहभाववुड्ढी, पाएण सुहा उ सुहहेऊ'' ॥१॥** [ पञ्चा.१५/१९ ]

कण्ठ्या । शुभद्रव्यादिव्याख्यानायाह —

**''दव्वे खीरदुमाई, जिणभुवणाई अ होंति खित्तंमि ।**
**पुण्णतिहिपभिइकाले, सुहोवओगाइ भावेसुं'' ॥२॥** [ पञ्चा.१५/२० ]

सुगमा। नवरं क्षीरद्रुमो न्यग्रोधादिः, आदिशब्दाच्चम्पकाशोकादिपरिग्रहः। आह च —

**''दव्वे सुवण्णगाइसु , खीरदुमाइसु आलोए'** [ ] त्ति । जिन[3]भुवनादि, आदि शब्दादन्यदपि शुभक्षेत्रं । आह च —

**''उच्छुवणे सालिवणे, चेइहरे चेव होइ खेत्तम्मि ।**
**गंभीरसाणुणाये पयाहिणावत्तउदगे अ'' ॥१॥** [ पञ्चा.१५/२०वृ. ]

पूर्णाप्रभृतितिथयः, प्रभृतिग्रहणादशुभतिथिवर्ज्जतिथिग्रहः । यतः —

**''[4]पडिकूले [ वि ] अ दिवसे, वज्जेज्जा अट्ठमिं च नवमिं च ।**
**छट्ठिं च चउत्थिं च, बारसिं दोण्हंपि पक्खाणं'' ॥१॥** [ पञ्चा.१५/२०वृ. ]इति ।

---

१. L.P.C. श्राद्धविधिवृत्तौ च । रसादिगौ° मु० ॥ २. तेसुं–इति पञ्चाशके । तेषु–शुभद्रव्यादिषु–इति तत्र वृत्तौ ॥ ३. °भवनादि–इति पञ्चाशकवृत्तौ ॥ ४. पडिकूल अ (उण) दि° मु० । पडिकूले विअ दि° इति पञ्चाशकवृत्तौ ॥

शुभोपयोगादीत्यत्रादिशब्दान्निमित्तशास्त्रगतशुभभावपरिग्रहः । इति मूलद्वारगाथा विवरणम् । एवं विधिना शुद्धिः कार्या, यथा भावतो निःशल्यत्वं स्यात् , भावशल्यं तु स्वकृतदुश्चरितस्य सम्यक् परसाक्षिकमप्रकाशनम् । यतः –

**''सम्मं दुच्चरिअस्सा, परसक्खिअमप्पगासणं जं तु ।**
**एअं च भावसल्लं, पण्णत्तं वीअरागेहिं''** ॥१॥ [ पञ्चा.१५/३६ ]

अत्र परसाक्षिकमित्युक्तेश्च स्वयमालोच्य स्वकल्पनया शुद्धौ कृतायामपि सशल्यतैवेति ज्ञापितम् । यतः –

**''आलोअणं अदाउं, सइ अण्णंमि तहऽप्पणो दाउं ।**
**जे वि हु करेति सोहिं, ते वि ससल्ला विणिद्दिट्ठा''** ॥१॥ [ पञ्चा.१५/३९ ]

अनेन च परसद्भावे परस्यैव तां यच्छन् शुद्ध्यतीत्युक्तम् यदाह –

**''छत्तीसगुणसमन्नागएण तेण वि अवस्सकायव्वा ।**
**परसक्खिआ विसोहि, सुट्ठु वि ववहारकुसलेणं''** ॥१॥ [ श्रा.जी./१६ ]

पराभावे तु आत्मनोऽपि यच्छन् शुद्ध्यति, केवलं सिद्धान् साक्षीकृत्य । यदाह – **सिद्धावसाणे अत्ति** [ ] । एवं यथा तथापि निःशल्यतया भवितव्यम् , सशल्यमरणे च महान् दोषः । यतः –

**''जं कुणइ भावसल्लं, अणुद्धिअं उत्तमट्ठकालम्मि ।**
**दुल्लहबोहीगत्तं, अणंतसंसारीअत्तं च''** ॥१॥ [ पञ्चा.१५/३८ ]

इत्यादिशल्यानुद्धरणविपाकदर्शिनैव सम्यग् आलोचयितुमुत्सह्यते । यतः –

**''संवेगपरं चित्तं, काऊणं तेहिँ तेहिँ सुत्तेहिं ।**
**सल्लाणुद्धरणविवागदंसगाईहिं आलोए''** ॥१॥ [ पञ्चा.१५/३५ ]

[१]आलोचकस्य दश दोषानाह –

**''आकंपइत्ता अणुमाणइत्ता जं दिट्ठं बायरं [२]व सुहुमं वा ।**
**छन्नं सद्दाउलयं, बहुजणअव्वत्ततस्सेवी''** ॥१॥ [ आ.वि./११ ]

'आकम्प्य' वैयावृत्त्यादिना गुरुमावर्ज्यालोचयति, यथा स्तोकं प्रायश्चित्तं दत्ते इत्यभिप्राये प्रथमो दोषः १। 'अनुमान्य' अनुमानं कृत्वा लघुतरापराधनिवेदनेन मृदुदण्डादित्वमाचार्यस्याकलय्य २। यत्परैर्दृष्टं तदालोचयति न त्वदृष्टम् ३। बादरमालोचयति न तु सूक्ष्मम् ,

१. तुला–श्राद्धविधिवृत्तिः प० १६९ ॥ २. L.P.C. श्राद्धविधिवृत्तौ च । च–मु० ॥

तत्रावज्ञापरत्वात् ४। सूक्ष्मं तृणग्रहणादिरूपमालोचयति, न तु बादरम्, सूक्ष्मालोचको हि कथं बादरं नालोचयेदिति ज्ञापनार्थम् ५। छन्नमव्यक्तस्वरम् ६। तथा शब्दाकुलं यथा गुरुः सम्यग् नावगच्छति, यद्वाऽन्येऽपि यथा शृण्वन्ति तता शब्दाकुलम् ७। 'बहुजन'त्ति बहवो जना आलोचनागुरवो यत्रालोचने तद्बहुजनं यथा भवत्वेवमालोचयति, एकस्यापराधस्य बहुभ्यो निवेदनमित्यर्थः ८। अव्यक्तस्यानवगतच्छेदग्रन्थरहस्यस्य गुरोरालोचयति ९। यमपराधमालोचयिष्यति तमेवासेवते यो गुरुः स तत्सेवीति, यतः —समानशीलाय गुरवे सुखेनैव विवक्षितापराधो निवेदयितुं शक्यते इति तत्सेविने निवेदयतीति १०। तदेते दश दोषा आलोचकेन वर्ज्जनीयाः । अविधिनालोचने च प्रत्युतापायसम्भवात् । यतः —

''**इहरा विवज्जओऽवि हु , कुवेज्जकिरिआइ णायओ णेओ ।**
**अवि होय[1] ( ज्ज ) तत्थ सिद्धी, आणाभंगा न उण एत्थ**'' ॥१॥ [ **पञ्चा.१५/५** ] इति ।

सम्यगालोचने गुणानाह —

''**लहुआ १ ल्हाईजणणं २, अप्पपरनिवत्ति ३ अज्जवं ४ सोही ५ ।**
**दुक्करकरणं ६ आणा ७, निस्सल्लत्तं च ८ सोहिगुणा**'' ॥१॥ [ **सं.प्र.आ.२८, श्रा.जी.१९** ]

तथा भारवाहिनो भारेऽपहृते लघुता तथा शल्योद्धारे आलोचकस्यापि १, 'ल्हादिजननं' प्रमोदोत्पादः २, आत्मपरयोर्दोषेभ्यो निवृत्तिः, आलोचनादाने हि स्वयं दोषनिवृत्तिः प्रतीता, तत् दृष्ट्वाऽन्येऽप्यालोचनाभिमुखाः स्युरित्यन्येषामपि दोषेभ्यो निवृत्तिः ३, 'आर्जवं' निर्मायता सम्यगालोचनात् ४, 'शोधिः' शुद्धिता[2] अतिचारमलापगमात् ५, 'दुष्करकरणं' दुष्करकारिता, यतो यत्प्रतिसेवनं तन्न दुष्करम् अनादिभवाभ्यस्तत्वात्, यत्पुनरालोचयति तद् दुष्करं प्रबलमोक्षानुयायिवीर्योल्लासविशेषेणैव तस्य कर्तुं शक्यत्वात् । **निशीथचूर्णा**वप्यूचे —

''**तं न दुक्करं, जं पडिसेविज्जइ, तं दुक्करं, जं सम्म आलोइज्जइ त्ति**'' [ **नि.चू.** ]

अत एव आभ्यन्तरतपोरूपं[3] सम्यगालोचनं मासक्षपणादिभ्यो[4] दुष्करम् ६, तथा आज्ञा तीर्थकृतामाराधिता स्यात् ७, निःशल्यत्वं ८ स्पष्टम् । उक्तं चैकोनत्रिंश**दुत्तराध्ययने —**

''**आलोयणयाए णं भंते ! जीवे किं जणयइ[5] ?, आलोयणयाए णं मायानियाण-मिच्छादंसणसल्लाणं अणंतसंसारवड्ढमाणाणं उद्धरणं करेइ, उज्जुभावं च णं जणयइ ।**

---

१. होय(इ)-मु० । होज्ज-पञ्चाशके ॥ २. शुद्धता-इति श्राद्धविधिवृत्तौ प० २९ A ॥ ३. °तपोभेदरूपं-श्राद्धविधिवृत्तौ ॥ ४. °भ्योऽपि दु० इति श्राद्धविधिवृत्तौ ॥ ५. L.P. । जणइ-मु० C. ॥

**उज्जुभावपडिवन्ने[1] अ णं जीवे अमायी इत्थीवेअं नपुंसगवेअं च न बंधइ, पुव्वबद्धं च णं निज्जरेइ''** [ उ.सू.अ./२९ ] इति ।

एते शोधेरालोचनाया गुणाः । इति **श्राद्धजीतकल्प-तद्वृत्ति-पञ्चाशकतद्वृत्तिभ्य** उद्धृतः किञ्चिदालोचनाविधिः । तीव्रतराध्यवसायकृतं बृहत्तरमपि निकाचितमपि बालस्त्रीहत्यादि महापापं सम्यगालोच्य गुरुदत्तप्रायश्चित्तविधाने **दृढप्रहारि**प्रभृतिवत् तद्भवेऽपि क्षीयत इति प्रतिवर्षं प्रतिचातुर्मासकं वाऽऽलोचना दातव्येति वर्षकृत्यानि ॥

अथ जन्मकृत्यानि यथा –

> ''**चेइअ १ पडिम २ पइट्ठा ३, सुआइपव्वावणा य ४ पयट्ठवणा[2] ५ ।**
> **पुत्थयलेहणवायण ६ पोसहसालाइ कारवणं ७''** ॥१॥ [ श्रा.वि./१५ ]

तत्र 'चैत्यं' जिनभवनं तस्य निर्मापणम्, तच्च विधेयतया पूर्वं सप्तक्षेत्र्यधिकारे[3] उक्तमपीदानीं तद्विधिः प्रदर्श्यते –एवं जिनप्रतिमाकारण-पुस्तकलेखनयोरपि भाव्यम् । तत्र प्रथमं तदधिकारी इत्थं **षोडशके** –

> ''**न्यायार्जितवित्तेशो, मतिमान् स्फीताशयः सदाचारः ।**
> **गुर्वादिमतो जिनभवनकारणस्याधिकारीति''** ॥१॥ [ षोड.६/२ ]

**पञ्चाशके**ऽपि –

> ''**अहिगारी अ[4] गिहत्थो, सुहसयणो वित्तसंजुओ कुलजो ।**
> **अखुद्दो धिइबलिओ, मइमं तह धम्मरागी अ** ॥१॥ [ पञ्चा.७/४ ]
> **गुरुपूआकरणरई, सुस्सूसाइगुणसंगओ चेव ।**
> **णायाहिगयविहाणस्स धणिअमाणापहाणो य''** ॥२॥ [ पञ्चा.७/५ ] इति ।

कण्ठ्ये । नवरम् –'अखुद्द'त्ति अक्षुद्रोऽकृपणः, 'धृतिबलिकः' चित्तसमाधानलक्षण-सामर्थ्ययुक्तः, तथा 'ज्ञाता' विद्वान्, कस्य ? इत्याह –'अधिकृतविधानस्य' जिनभवन-कारणविधेः, तथा धनिकमत्यर्थम्, आज्ञाप्रधानश्च' आगमपरतन्त्रश्चेति । अथ तद्विधिर्यथा –

> ''**जिणभवणकारणविही, सुद्धा भूमी दलं च कट्ठाई ।**
> **भिअगाणइसंधाणं, सासयवुड्ढी अ जयणा य''** ॥१॥ [ पञ्चा.७/९ ]

द्वारगाथेयम् । जिनभवनकारणविधिः, किंविधः ? इत्याह –शुद्धा निर्दोषा, भूमिः

---

१. °भावं° इति श्राद्धजीतकल्पवृत्तौ प० १६ ॥ २. पयठवणा–C.L. श्राद्धविधिवृत्तौ च ॥ ३. सप्तक्षेत्र्यां धनवपनाधिकारे–C. मूल ॥ ४. उ–मु० पञ्चाशके । C.–नास्ति । अ–L.P. ॥

क्षेत्रम्, दलं चोपादानकारणं काष्टेष्टकादि, तथा भृतकानां —कर्मकराणामनतिसन्धानम्[1] —अवञ्चनम्, तथा स्वाशयस्य —शोभनाध्यवसायस्य वृद्धिः-वर्द्धनम्, सा च, तथा 'यतना' यथाशक्ति दोषत्यागेनेति द्वारगाथार्थः । अथ शुद्धभूमिं दर्शयन्नाह —

**''दव्वे भावे अ तहा, सुद्धा भूमी पएसऽकीला य ।**
**दव्वेऽपत्तिगरहिआ, अण्णेसिं होइ भावे उ''** ॥२॥ [ **पञ्चा.७/१०** ]

द्रव्यतः शुद्धा भूमिः प्रदेशे विशिष्टजनोचितभूभागे, अकीला च शङ्कुरहिता, उपलक्षणत्वादस्थ्यादिशल्यरहिता । भावतस्तु अप्रीतिरहिता अन्येषामिति गम्यम् । **षोडशके**ऽपि —

**''शुद्धाऽत्र वास्तुविद्याविहिता सन्न्यायतश्च योपात्ता ।**
**न परोपतापहेतुश्च, सा जिनेन्द्रैः समाख्याता''** ॥१॥ [ **षोड.६/४** ] इति ।

अथ दलद्वारं व्याख्यानयन्नाह —

**''कट्ठाई वि दलं इह, सुद्धं जं देवतादुववणाओ ।**
**णो अविहिणोवणीअं, सयं च काराविअं जं णो''** ॥३॥ [ **पञ्चा.७/१७** ]

तत्काष्ठादि दलं शुद्धं यद्देवतोपवनादेः —व्यन्तरकाननादेर्नानीतम्, तदानयने हि तस्याः प्रद्वेषसम्भवादिति । तथा अविधिना —द्विपदचतुष्पदशरीरादिसन्तापजननद्वारेण, नानीतम्, तथा स्वयं यन्न कारितं वृक्षच्छेदेष्टकापचनादिभिः, तच्छुद्धम् ।
यतः **षोडशके**ऽपि —

**''दलमिष्टकादि तदपि च, शुद्धं तत्कारिवर्गतः क्रीतम् ।**
**उचितक्रयेण यत् स्यादानीतं चैव विधिना तु''** ॥१॥ [ **षोड.६/७** ] इति ।

अथ दलस्यैव शुद्धाशुद्धपरिज्ञानोपायमाह —

**''तस्स वि अ इमो[2] णेओ, सुद्धासुद्धपरिजाणणोवाओ ।**
**तक्कहगहणादिम्मि, सउणेअरसण्णिवाओ जो''** ॥४॥ [ **पञ्चा.७/१८** ]

तस्य दलस्यापिशब्दाद् भूमेश्चायं शुद्धाशुद्धपरिज्ञानोपायो ज्ञेयः, तयोर्दल-भूम्योः कथाग्रहणपर्यालोचः, ग्रहणं च परतः स्वीकरणम्, तदादिर्यस्यानयनादेस्तत्तथा, तत्र तत्कथाग्रहणादौ, 'शकुनेतरसन्निपातः' साधकसाध्यच्छीत्कृतादिनिमित्तसम्बन्धो[3] यः स उपाय इति प्रस्तुतमिति गाथार्थः ।

---

१. C. पञ्चाशकटीकायां च । °सङ्घानम्-मु० ॥ २. L पञ्चाशकप्र० । °म्मी-मु० ॥ ३. साधका-ऽसाधकस्वीकृतादिनिमित्तः सम्बन्धः यः स इति पञ्चाशकवृत्तौ ॥

शकुनाशकुनयोरेव स्वरूपोद्देशमाह –

**''णंदाइ सुहो सद्दो, भरिओ कलसोऽत्थ सुंदरा पुरिसा ।**
**ज[1]( सु )हजोगाई सउणो, कंदिअसद्दादि इअरो उ'' ॥५॥ [ पञ्चा.७/१९ ]**

'नन्द्यादिः' नन्दीप्रभृतिः, तत्र नन्दीद्वादशतूर्यनिर्घोषः । तद्यथा –

**''भंभा-मउंग-मद्दल-कलंब-झल्लरि-हुडुक्ककंसाला ।**
**वीणा वंसो पडहो, संखो पणवो अ बारसमो'' ॥१॥ [ ]**

आदिशब्दात् घण्टाशब्दादिग्रहः । तथा 'भृतो' जलपरिपूर्णः 'कलसो' घटः, 'अत्र' व्यतिकरे, सुन्दराकारनेपथ्या नराः 'शुभयोगादि' प्रशस्तचेष्टाप्रभृति शुभचन्द्रनक्षत्रादि सम्बन्धादि वा 'शकुनो' विवक्षितार्थसिद्धिसूचकं निमित्तम्, 'क्रन्दितशब्दादि' आक्रन्दध्वनिप्रतिषेधवचनप्रभृति, पुनः इतरोऽशकुन इत्यर्थः । **षोडशकेऽपि** –

**''दार्वपि च शुद्धमिह यन्नानीतं देवताद्युपवनादेः ।**
**प्रगुणं सारवदभिनवमुच्चैर्ग्रन्थ्यादिरहितं च ॥१॥ [ षोड.६/८ ]**
**सर्वत्र शकुनपूर्वं, ग्रहणादावत्र वर्त्तितव्यमिति ।**
**पूर्णकलशादिरूपश्चित्तोत्साहानुगः शकुनः'' ॥२॥ [ षोड.६/९ ]**

अथ भृतकानतिसन्धानद्वारमाह –

**''कारवणेऽवि अ तस्सिह, भितगाणतिसंधणं ण कायव्वं ।**
**अविआहिगप्पदाणं, दिट्ठादिट्ठप्फलं एअं'' ॥६॥ [ पञ्चा.७/२१ ]**

'कारापणे' विधापने अपि, चैत्यस्य[2] –जिनभवनस्य, इह द्रव्यस्तवाधिकारे, भृतकानां कर्मकराणां सूत्रधारादीनाम्, अतिसन्धानं वञ्चनं देयद्रव्यापेक्षया न कर्त्तव्यम्, अपि च 'अधिकतरप्रदानं' प्रतिपन्नवेतनापेक्षया समर्गलतरद्रव्यवितरणम्, कर्त्तव्यमिति प्रक्रमः । यतो दृष्टादृष्टफलम् –उपलभ्यानुपलभ्यप्रयोजनमेतद् अधिकप्रदानमिति । अत्र च दृष्टफलं यथा ते भृतका वराका अधिकप्रदानेन तुष्टाः सम्यक् कार्यं कुर्वन्ति, अदृष्टफलं च धर्मप्रशंसया केचिद् बोधिबीजान्यप्युपार्जयन्तीति भावः । **षोडशके**ऽपि–

**''भृतका अपि कर्त्तव्या, य इह विशिष्टाः स्वभावतः केचित् ।**
**यूयमपि गोष्ठिका इह, वचनेन सुखं तु ते स्थाप्याः ॥१॥ [ षोड.६/१० ]**

१. सुहजोगाइ य सउणो–इति पञ्चाशके ॥ २. L.P.C. । चैत्यवत्तस्य–मु० ॥

**अतिसन्धानं चैषां, कर्त्तव्यं न खलु धर्ममित्राणाम् ।**
**न व्याजादिह धर्मो, भवति तु शुद्धाशयादेव"** ॥२॥ [ षोड.६/११ ]

अथ स्वाशयवृद्धिद्वारमाह –

**"सासयवुड्ढीऽवि इहं, भुवणगुरुजिणिंदगुणपरिण्णाए ।**
**तब्बिंबठावणत्थं, सुद्धपवित्तीएँ णिअमेणं"** ॥७॥ [ पञ्चा.७/२५ ]
**पेच्छिस्सं[1] इत्थमहं, वंदणगणिमित्तमागए साहू ।**
**कयपुण्णे भगवंते, गुणरयणणिही महासत्ते** ॥८॥ [ पञ्चा.७/२६ ]
**पडिबुज्झिस्संति इहं, दट्ठूण जिणिंदबिंबमकलंकं ।**
**अण्णेऽवि भव्वसत्ता, काहिंति ततो परं धम्मं** ॥९॥ [ पञ्चा.७/२७ ]
**ता एअं मे वित्तं, जमित्थमुवओगमेइ अणवरयं ।**
**इअ चिंताऽपरिवडिआ, सासयवुड्ढी अ मोक्खफला"** ॥१०॥[ पञ्चा.७/२८ ]

एताः कण्ठ्याः । नवरं –यस्मादिह जिनभवने सति तद्बिम्बस्थापनादि पूर्वोक्तं भविष्यति, तस्मादेतद्द्रव्यं मदीयमेव, यदत्र जिनभवने उपयोगं –विनियोगमेति, अन्यत् सर्वं परमार्थतः परकीयमेवेत्यर्थः । इत्येवम्प्रकारा चिन्ता –विकल्पोऽप्रतिपतिता –अविच्छिन्ना स्वाशयवृद्धिः –कुशलपरिणामवर्द्धनं भवतीति गम्यम् । सा च मोक्षफलैवेति ।

अथ यतनाद्वारमाह –

**"जयणा य पयत्तेणं, कायव्वा एत्थ सव्वजोगेसुं ।**
**जयणा उ धम्मसारा, जं भणिआ वीअरागेहिं"** ॥११॥ [ पञ्चा.७/२९ ]

सा च स्वरूपेणेत्थं –

**"सा इह परिणयजलदलविसुद्धिरूवा उ होइ णायव्वा ।**
**अण्णारंभणिवित्तीएँ, अप्पणाहिट्ठणं चेव"** ॥१२॥ [ पञ्चा.७/३३ ]

सा पुनर्यतना, इह जिनभवनविधाने, परिणतं –प्रासूकं जलं दलं च तयोर्विशुद्धिः –अनवद्यता, त्रसरहितत्वादिलक्षणा, तत्स्वरूपा ज्ञातव्या, तथा अन्यारम्भनिवृत्त्या –कृष्याद्यारम्भत्यागेन, आत्मना –स्वयमेवाधिष्ठानं –जिनभवनारम्भाणामध्यासनमेव च, एषा यतना भवति ज्ञातव्येति प्रकृतम् । जिनभवनारम्भाणां हि स्वयमधिष्ठायकत्वं प्रतिपन्नो यथोचितं जीवान् रक्षयन् कर्मकरांस्तदारम्भेषु प्रवर्त्तयति, निरधिष्ठायकास्तु ते यथा कथञ्चित्तेषु

---

१. इच्छिस्सं-P.C. ॥

प्रवर्त्तन्ते इत्यात्माधिष्ठायकत्वं यतनेति । इयं चान्याकुशलारम्भतो निवर्त्तनान्निवृत्तिरूपैव परमार्थत इति भाव इति जिनभवनकारणविधिः[१]

जीर्णोद्धारे त्वेवं विशिष्योपक्रम्यम् यतः–

**''नवीनजिनगेहस्य, विधाने यत्फलं भवेत् ।**
**तस्मादष्टगुणं पुण्यं, जीर्णोद्धारेण जायते ॥१॥ [ ]**
**जीर्णे समुद्धृते यावत्तावत् पुण्यं न नूतने ।**
**उपमर्दो महांस्तत्र, स्वचैत्यख्यातिधीरपि'' ॥२॥ [ ]**

तथा– **''राया अमच्चसिट्ठी, कोडंबीए वि देसणं काउं ।**
**जिण्णे पुव्वाययणे, जिणकप्पी[२] वा वि कारवइ'' ॥१॥ [ ]**

**''जिणभवणाइं जे उद्धरंति, भत्तीइ सडिअपडिआइं ।**
**ते उद्धरंति अप्पं, भीमाओ भवसमुद्दाओ'' ॥२॥ [ श्रा.दि./१०० ]**

जीर्णचैत्योद्वारकारणपूर्वकमेव च नव्यचैत्यकारापणमुचितम् , तत एव **सम्प्रति**नृपतिना एकोननवतिः सहस्रा जीर्णोद्धाराः कारिताः, नवचैत्यानि तु षट्त्रिंशत्सहस्रा एव । एवं **कुमारपालवस्तुपाला**द्यैरपि नव्यचैत्येभ्यो जीर्णोद्धारा एव बहवो व्यधाप्यन्त इति ।

चैत्ये च कुण्डिकाक[३]लशौरसप्रदीपादिसर्वाङ्गीणोपस्करणकारणं यथाशक्ति कोश-देवदायवाटिकादियुक्तिकरणं च, राजादेस्तु विधापयितुः प्रचुरतरकोशग्रामगोकुलादिदानम् , यथा अविच्छिन्ना पूजा प्रवर्त्तते इति द्वारम् ॥१॥

इत्थं च चैत्ये निष्पन्ने शीघ्रमेव प्रतिमां स्थापयेत् ।

यदाह **षोडशके श्रीहरिभद्रसूरिः –**

**''जिनभवने [४]जिनबिम्बं, कारयितव्यं द्रुतं तु बुद्धिमता ।**
**साऽधिष्ठानं ह्येवं, तद्भवनं वृद्धिमद् भवति'' ॥१॥ [ षोड.७/१ ]**

---

१. इतोऽग्रे ''न चात्र भूखनन-पूरण-दलपाटनानयन-शिलादिघटन-वपनादिमहारम्भदोष(षं)-आशङ्क्यः, यतनाप्रवृत्तत्वेन निर्दोषत्वादनेकप्रतिमास्थापन-पूजन-सङ्घसमागम-धर्मदेशना-करणाद्यनेकधर्मकृत्यानुमोदनाद्यनन्तपुण्यहेतुत्वेन शुभोदर्कत्वाच्च । आहुरपि –

''जा जयमाणस्स भवे विराहणा सुत्तविहिसमग्गस्स ।
सा होइ णिज्जरफला अज्झत्थविसोहिजुत्तस्स'' ॥ इति C. मूलपाठः अधिकः ॥ २ या वि- इति श्राद्धविधिवृत्तौ ॥ ३. C. श्राद्धविधिवृत्तौ च । °लेशो° मु० ॥ ४. तद्विम्बं-इति षोडशके ॥

बिम्बकारणविधिस्त्वेवम् –

**''जिनबिम्बकारणविधिः, काले पूजा पुरस्सरं कर्त्तुः ।**
**विभवोचितमूल्यार्पणमनघस्य शुभेन भावेन''** ॥१॥ [ षोड.७/२ ]

काले तदुचितावसरे, कर्त्तुः सूत्रधारस्य, पूजापूर्वकम्, विभवोचितं स्वसमृद्ध्यनुरूपम्, यन्मूल्यं वेतनम्, तस्यार्पणं दानम्, अनघस्य –निर्दोषस्य कर्तुः शुभेन भावेन –उदारतया प्रवर्द्धमानप्रशस्ताध्यवसायेनेत्यर्थः । अनघशिल्पिनोऽभावे यद्विधेयं तदाह –

**''नार्पणमितरस्य तथा, युक्त्या वक्तव्यमेव मूल्यमिति ।**
**काले च दानमुचितं, शुभभावेनैव विधिपूर्वम्** ॥२॥ [ षोड.७/३ ]

इतरस्य सदोषस्य, तथा स्वविभवोचितमूलस्य नार्पणं –न दानम्, तदा कथं देयम्? इत्याह –मूल्यं बिम्बवेतनम्, युक्त्या वक्तव्यं यथेयता द्रव्येणेयद्बिम्बं विधातव्यं भवता, तथा भागशो मूल्यं दास्यामीति, काले च कालमाश्रित्य च, यदुचितं तस्य दानम्, क्वचित्काले लघावपि बिम्बे मूल्यं प्रचुरं स्यात्, कदाचिच्चाल्पमिति, शुभभावेनेति, बिम्बार्थं कल्पितद्रव्यभक्षणतो यद्बिम्बकर्त्तुः संसारगर्त्तपतनं तद्रक्षणलक्षणेनेत्यर्थः ।

तथा चैत्यप्रतिमादिविधापने च भावशुद्ध्यै गुरुसङ्घसमक्षमेवं वाच्यं –यदत्राविधिना किञ्चित् परवित्तमागतं तत् पुण्यं तस्य भूयात् । तदुक्तं **षोडशके** –

**''यद्यस्य सत्कमनुचितमिह वित्तं तस्य तज्जमिह पुण्यम् ।**
**भवतु शुभाशयकरणादित्येतद् भावशुद्धं स्यात्''** ॥१॥ [ षोड.७/१० ]

अत्र च मन्त्रन्यासो । यथा तत्रैवोक्तम् –

**''मन्त्रन्यासश्च तथा, प्रणवनमःपूर्वकं च तन्नाम ।**
**मन्त्रः परमो ज्ञेयो, मननत्राणे ह्यतो नियमात्''** ॥२॥ [ षोड.७/११ ]

इति बिम्बकारणविधिः । प्रतिमाश्च मणिस्वर्णादिमृत्तिकान्तद्रव्यनिष्पाद्या उत्कर्षतः पञ्चधनुःशतमाना जघन्यतोऽङ्गुष्ठमानाश्च यथाशक्ति विधाप्याः । तत्फलं च –

**''दालिद्दं दोहग्गं, कुजाइकुसरीरकुगइकुमईओ ।**
**अवमाणरोगसोगा, न हुंति जिणबिंबकारीणं** ॥१॥ [ ]

प्रतिमाश्च वास्तुशास्त्रोक्तविधिनिष्पन्नाः सुलक्षणा अत्राप्यभ्युदयगुणहेतुः । यतः –

---

१. L. सं० षोडशके च । विधिपूर्वः C.L. मू० ॥

D:\new/d-2.pm5\3rd proof

**"अन्यायद्रव्यनिष्पन्ना, परवास्तुदलोद्भवा ।**
**हीनाधिकाङ्गा[1]( ङ्गी ) प्रतिमा, स्वपरोन्नतिनाशिनी ॥१॥** [ ]
**मुहनक्कनयणनाहीकडिभंगे मूलनायगं चयह ।**
**आहरणवत्थपरिगरचिंधाउहभंगि पूइज्जा ॥२॥** [ बि.प./१६ ]
**वरिससयाओ उड्ढं, जं बिंबं उत्तमेहिँ[3] संठविअं ।**
**विअलंग[2] वि पूइज्जइ, तं बिंबं निक्क( प्फ )लं न जओ ॥३॥** [ बि.प./१५ ]
**बिंबपरिवारमज्झे, सेलस्स य वण्णसंकरं न सुहं ।**
**समअंगुलप्पमाणं, न सुंदरं होइ कइआ वि ॥४॥** [ बि.प./३ ]
**इक्कंगुलाइ पडिमा, इक्कारस जाव गेहि पूइज्जा ।**
**उड्ढं पासाइ पुणो, इअ भणिअं पुव्वसूरीहिं ॥५॥** [ बि.प./१९ ]
**निरयावलिसुत्ताओ, लेवोवलदंतकट्ठलोहाणं ।**
**परिवारमाणरहिअं, घरंमि नो पूअए बिंबं ॥६॥** [ ]
**गिहपडिमाणं पुरओ, बलिवित्थारो न चेव कायव्वो ।**
**निच्चं ण्हवण[4] तिसंझं मच्चणं भावओ कुज्जा"** ॥७॥ [ वि.सा./५९३ ]

प्रतिमा मुख्यवृत्त्या सपरिकराः सतिलकाद्याभरणाश्च कारयितव्याः, विशिष्य च मूलनायकः[5] तथैव विशेषशोभातज्जनितविशेषपुण्यानुबन्धिपुण्यादिसम्भवात् । उक्तं च –**"पासाईआ[6] पडिमा"** [ सं.प्र./३२२ ] इत्यादि द्वारम् ॥२॥

अथैवं निष्पन्नस्य बिम्बस्य सद्यः प्रतिष्ठा विधाप्या । यदुक्तं **षोडशके –**

**"निष्पन्नस्यैवं खलु , जिनबिम्बस्योदिता प्रतिष्ठाऽशु ।**
**दसदिवसाभ्यन्तरतः, सा च त्रिविधा समासेन"** ॥१॥ [ षोड.८/१ ]

**"व्यक्त्याख्या खल्वेका"** [ षोड.८/२ ] इत्यादि । **बृहद्भाष्येऽपि–**

**"वत्तपइट्ठा एगा, खित्तपइट्ठा महापइट्ठा य ।**
**एगचउवीससत्तरिसयाण सा होइ अणुकमसो"** ॥१॥ [ चै.बृ.भा./३५ ]

प्रतिष्ठाविधिश्च सर्वाङ्गीणतदुपकरणमीलन–नानास्थानश्रीसङ्घगुर्वाकारण–प्रौढप्रवेश–

---

१. °काङ्गी–इति–श्राद्धविधिवृत्तौ प० ३९ B ॥ २. °गु वि–इति श्राद्धविधिवृत्तौ ॥ ३. निप्फलं–इति श्राद्धविधिवृत्तौ ॥ ४. ण्हवणं तिअ संझमच्चणं–इति श्राद्धविधिवृत्तौ ॥ ण्हवण तिसंझं मज्जणं–मु० ॥ ५. °कस्य–इति वृत्तौ प० ३९ B ॥ ६. पासाईआ पडिमा, लक्खणजुत्ता समत्थलंकरणा । जह पल्हाएइ मणं तह णिज्जरमो विआणा हि । इति C. मूलपाठः ॥

महादितत्स्वागतकरण-भोजनवसनप्रदानादिसर्वाङ्गीणसत्कारण-बन्दिमोक्षकारण-मारिनिवारणा-ऽवारितसत्रवितरण-सूत्रधारसत्कारण-स्फीतसङ्गीताद्यभिनवाद्भुतोत्सवावतारणादिरष्टादशस्नात्रकारणादिश्च **प्रतिष्ठाकल्पादे**र्ज्ञेयः । किञ्चिच्च **पञ्चाशकत** उद्ध्रियते । तथाहि —

**"णिप्फण्णस्स य सम्मं, तस्स पइट्ठावणे विही एसो ।**
**सुहजोएण पवेसो, आयतणे ठाणठवणया[1]"** ॥१॥ [ पञ्चा.८/१६ ]

सम्यक् विधिवन्निष्पन्नस्य तस्यजिनबिम्बस्य, प्रतिष्ठापने, एष वक्ष्यमाणो, विधिर्ज्ञेयः, तमेवाह —शुभयोगेन साधकचन्द्रनक्षत्रादिसम्बन्धेन प्रशस्तमनःप्रभृतिव्यापारेण वा, प्रवेशो बिम्बस्य कर्त्तव्य इति शेषः, आयतने भवने, स्थानस्थापना उचितस्थानन्यासश्च, बिम्बस्यैवेति गाथार्थः ॥१॥

**"तेणेव खेत्तसुद्धी, हत्थसयादिविसया णिओगेणं ।**
**कायव्वो सक्कारो, गंधपुप्फाइएहिँ तहिं"** ॥२॥ [ पञ्चा.८/१७ ]

तथा तेन शुभयोगेन, क्षेत्रशुद्धिर्भूमिशोधनम् , अस्थिमांसाद्यशुचिद्रव्यापनयनेन, हस्तशतादिविषया आदिशब्दाद् बहुतरविषयापि, नियोगेनावश्यं कार्येति गम्यम् , तथा गन्धपुष्पादिभिर्जिनभवने प्रतिष्ठावसरे चेति गाथार्थः ॥२॥

**"दिसिदेवयाण पूआ, सव्वेसिं तह य लोगपालाणं ।**
**ओसरणकमेणण्णे, सव्वेसिं चेव देवाणं"** ॥३॥ [ पञ्चा.८/१८ ]

दिग्देवतानामिन्द्रादीनां पूजा कार्या, तथा लोकपालानां सोमादीनां खड्ग १ दण्ड २ पाश ३ गदा ४ हस्तानां अवसरक्रमेण[2] —समवसरणन्यायेन, अन्ये आचार्याः सर्वेषां देवानां पूजा कार्येत्येवमाहुरिति गाथार्थः ॥३॥

**"तत्तो सुहजोएणं, सट्ठाणे मंगलेहिं ठवणा उ ।**
**अहिवासणमुचिएणं, गंधोदगमाइणा एत्थ"** ॥४॥ [ पञ्च.८/२१ ]

ततो दिग्देवतादिपूजानन्तरं, शुभयोगेन प्रशस्तचन्द्रनक्षत्रलग्नादिसम्बन्धेन[3], स्वस्थाने-ऽधिवासनोचिते देशे, मङ्गलैर्गेयविशेषैश्चन्दनादिभिर्वा, स्थापना न्यासो, बिम्बस्य कार्येति गम्यम् , ततश्चाधिवासनशुद्धिविशेषापादनेन बिम्बप्रतिष्ठायोग्यताकारणं **प्रतिष्ठाकल्प**-

---

१. ठाणठवणा य-इति पञ्चाशके । स्थानस्थापना च-इति वृत्तौ तत्रैव ॥ २. अवसरक्र° P.C. । समवसरणरचनार्थं पञ्चाशकप्रकरणे [ २।१२ तः ] द्रष्टव्यम् ॥ ३. L.P.C. पञ्चाशकवृत्तौ च । °लग्नसं° मु० ॥

प्रसिद्धम्, उचितेन गन्धोदकादिना सद्गन्धमिश्रजलप्रभृतिना, आदिशब्दात् कषायमृत्तिकादि-परिग्रहः, अत्र प्रतिष्ठायामिति गाथार्थः ॥४॥

**''चत्तारि पुण्णकलसा, पहाणमुद्दाविचित्तकुसुमजुआ ।**
**सुहपुण्णचत्तचउतंतुगोत्थया होंति पासेसुं''** ॥५॥ [ पञ्चा.८/२२ ]

तथा चत्वारो जलपूर्णघटाः, प्रधानमुद्रया स्वर्णरूप्यादिमय्या विचित्रपुष्पैश्च युक्ताः, तथा शुभपूर्णचत्रचतुस्तन्तुकावस्तृताः, पूर्णं सूत्रकुर्कुटिकापूरितं यच्चत्रं-तर्कुस्तस्य सम्बन्धि यच्चतुस्तन्तुकं-तन्तुचतुष्टयं तत्तथा, शुभं च तत् पूर्णचत्रचतुस्तन्तुकं चेति समासस्तेनावस्तृता –आच्छादिताः कण्ठदेशा येषु ते तथा, विधेया इति शेषः, पार्श्वेषु चतसृषु दिक्षु प्रतिष्ठाप्यप्रतिमाया इति ॥५॥

**''मंगलदीवा य तहा, घयगुलपुण्णा सुभिक्खुभक्खा य ।**
**[1]जवयारयवण्णसत्थिगादि सव्वं महारम्भं''** ॥६॥ [ पञ्चा.८/२३ ]

तथा घृतगुडपूर्णा मङ्गलदीपाः, कीदृशास्ते ?–शुभा इक्षवः –इक्षुखण्डानि, भक्ष्याणि च खण्डकानि येषु ते, अथवा स्वतन्त्राण्येव शुभेक्षुभक्ष्याणि भवन्ति, तत्र शुभा इक्षवो, वृक्षाश्च कदल्यादयः, तथा [2]यवारकाः शरावादिरोपितयवाङ्कुराः, वर्णकश्चन्दन-श्रीखण्डादिः[3], स्वस्तिकः प्रसिद्ध एव, आदिशब्दान्नन्दावर्त्तादि सर्वं यथा रम्यं-रमणीयं विधेयमित्यन्वयः ॥६॥

**''मंगलपडिसरणाइं, चित्ताइं रिद्धिविद्धिजुत्ताइं ।**
**पढमदिअहंमि चंदणविलेवणं देवगंधड्ढं''** ॥७॥ [ पञ्चा.८/२४ ]

मङ्गलप्रतिसरणानि कङ्कणानि, चित्राणि विचित्राणि, ऋद्धिवृद्ध्यभिधानौषधीसनाथानि, प्रथमदिवसे अधिवासनादिने चन्दनविलेपनमेव गन्धाढ्यं कर्पूरकस्तूरिकादिभिः पूर्णं विधेयमिति ॥७॥

**''चउणारीओमिणणं, णिअमा अहिगासु णत्थि उ विरोहो ।**
**णेवत्थं च इमासिं, जं पवरं तं इहं सेअं''** ॥८॥ [ पञ्चा.८/२५ ]

चतुःसङ्ख्या नार्यः–स्त्रियस्ताभिर्मङ्गल्याभिः, 'ओमिणणं'ति अवमानं [4]प्रोङ्खणकं लोकशास्त्रसिद्धं, तच्चातुर्णार्यवमानम्, तत्र नियमात् कर्त्तव्यम्, चतसृभ्योऽधिकासु नास्त्येव विरोधः–शास्त्रबाधा, नेपथ्यं च वेषः, आसामवमानकारिनारीणाम्, यत्प्रवरं श्रेष्ठं तत्, इह प्रस्तावे, श्रेयः कल्याणभूतमिति ॥८॥

---

१. जववार॰ इति पञ्चाशके ॥ २. यववारकाः इतिपञ्चाशकवृत्तौ ॥ ३. ॰दि-मु॰ C. ॥ ४. प्रोङ्खनकं-पञ्चाशकवृत्तौ ॥

अधिवासनगतं विध्यन्तरमाह –

**"उक्कोसिआ य पूआ, पहाणदव्वेहिँ एत्थ कायव्वा ।**
**ओसहिफलवत्थसुवण्णमुत्तरयणाइएहिं च"** ॥९॥ [ पञ्चा.८/२९ ]

उत्कर्षिका पूजाऽर्हद्बिम्बस्य प्रधानद्रव्यैश्चन्दनागरुकर्पूरपुष्पादिभिः, अत्र –अधिवासनावसरे, कर्त्तव्या, तथा औषध्यादिभिश्च प्रतीतैः, परम् औषध्यो व्रीह्यादयः । फलानि नालिकेरदाडिमादीनीति ॥९॥

तथा- "[1]**चित्तबलिचित्तगंधेहिं चित्तकुसुमेहिं चित्तवासेहिं ।**
**चित्तेहिं विऊहेहिं, भावेहिं विहवसारेणं"** ॥१०॥ [ पञ्चा.८/३० ]

[2]चित्रबलिचित्रगन्धैः पूजा कर्त्तव्येति प्रकृतम्, 'चित्तेहिं विऊहेहिं'ति व्यूहै रचनाविशेषैः, भावैश्च रचनागतैः प्रक्रीडितप्रमुदितालिङ्गितादिभिर्भक्तिसारैर्विभवसारेण –विभूत्युत्कर्षेणेति ॥१०॥

पूजाद्यनन्तरं यत्कर्त्तव्यं तदाह –

**"चिइवंदण थुइवुड्डी, उस्सग्गो साहु सासणसुरीए ।**
**थयसरण पूअ काले, ठवणा मंगलगपुव्वा उ"** ॥११॥ [ पञ्चा.८/३२ ]

चैत्यवन्दना प्रतीता कर्त्तव्या, स्तुतिवृद्धिः प्रवर्द्धमानस्तुतिपाठरूपा कर्त्तव्या, कायोत्सर्गः, साधु यथा भवति असंमूढतयेत्यर्थः, कस्या आराधनाय ? इत्याह –शासनसुर्याः, स्तवस्मरणं चतुर्विंशतिस्तवानुचिन्तनं कायोत्सर्गे कार्यम्, अथवा चतुर्विंशतिस्तवः पठनीयः, स्मरणं चैषु गुर्वादीनामिति, ततः पूजा कार्या बिम्बस्य प्रतिष्ठाकारस्य वा, ततः काले प्रतिष्ठालग्नस्याभिमतांशे, स्थापना जिनबिम्बस्य, मङ्गलपूर्वा तु पञ्चनमस्कारपूर्वैव कर्त्तव्येति ॥११॥

ततश्च- "**पूआ वंदणमुस्सग्ग, पारणा भावथेज्जकरणं वा ।**
**सिद्धाचलदीवसमुद्दमंगलाणं च पाढो उ"** ॥१२॥ [ पञ्चा.८/३३ ]

पूजा प्रतिष्ठितबिम्बस्य विधेया, वन्दनं चैत्यवन्दनं, कायोत्सर्गः, पारणा च तस्य कार्या, तथा भावस्थैर्यकरणं चित्तस्थिरतासंपादनम् भावेन वा आशीर्वचनहेतुभूतेन प्रतिष्ठास्थैर्यकरणं च विधेयमत एवाह –सिद्धाचलद्विपसमुद्रमङ्गलानां च –सिद्धाद्युपमोपेतमङ्गलगाथानां वक्ष्यमाणरूपाणां, पाठोऽभिधानं विधेयः ॥१२॥ स यथा –

---

१. चित्त वि° C.P. ॥ २. चेष्ट–इति पञ्चाशकवृत्तौ ॥

"**जह सिद्धाण पसिद्धा[1] ( पइट्ठा ) तिलोगचूडामणिंमि सिद्धिपए ।**
**आचंदसूरिअं तह, होउ इमा सुप्पतिट्ठ त्ति**" ॥१३॥ [ पञ्चा.८/३४ ]

कण्ठ्या । शेषा मङ्गलगाथा अतिदेशत आह —

"**एवं अचलादिसु वि, मेरुप्पमुहेसु हुंति वत्तव्वं ।**
**एते मंगलसद्दा, तम्मि सुहनिबंधणा दिट्ठा**" ॥१४॥ [ पञ्चा.८/३५ ]

प्रतिष्ठायां च स्नात्रैर्जन्मावस्थां फलनैवेद्यपुष्पविलेपनसङ्गीताद्युपचारैः कौमारा-द्युत्तरोत्तरावस्थां छाद्मस्थ्यसूचकाच्छादनाच्छादितकायत्वाद्यधिवासनया शुद्धचारित्रावस्थां नेत्रोन्मीलनेन केवलोत्पत्त्यवस्थां सर्वाङ्गीणपूजोपचारैश्च समवसृत्यवस्थां चिन्तयेदिति **श्राद्धसमाचारीवृत्तौ** ।

अथ प्रतिष्ठानन्तरं यद्विधेयं तदाह —

"**सत्तीए संघपूजा, विसेसपूजा उ बहुगुणा एसा ।**
**जं एस सुए भणिओ, तित्थयराणंतरो संघो**" ॥१५॥ [ पञ्चा.८/३८ ]

तथा- "**उचिओ जणोवयारो, विसेसओ णवरि सयणवग्गंमि ।**
**साहम्मिअवग्गंमि अ, एअं खलु परमवच्छल्लं**" ॥१६॥ [ पञ्चा.८/४७ ]

तथा- "**अट्ठाहिआ य महिमा, सम्मं अणुबंधसाहिगा केई ।**
**अण्णे उ तिण्णि दिअहे, णिओगओ चेव कायव्वा**" ॥१७॥ [ पञ्चा.८/४८ ]

अष्टाहिका महिमा कार्या, सा ह्यनुबन्धसाधिका-पूजाऽविच्छेदगमिका भवतीति **केचिदा**चार्या आहुः, अन्ये तु त्रीन् दिवसान् यावत् महिमा नियोगत एव —नियमेनैव कार्येति ॥१७॥

**षोडशके**ऽपि —

"**अष्टौ दिवसान् यावत् , पूजाऽविच्छेदतोऽस्य कर्त्तव्या ।**
**दानं च यथाविभवं, दातव्यं सर्वसत्त्वेभ्यः**" ॥ [ षोड.८/१६ ] इति ।

ततो महिमानन्तरं कर्त्तव्यमाह —

"**तत्तो विसेसपूआपुव्वं विहिणा पडिस्सरोम्मुअणं ।**
**भूअबलिदीणदाणं, एत्थं पि ससत्तिओ किं पि**" ॥१८॥ [ पञ्चा.८/४९ ]

ततो विशेषपूजापूर्वं प्रतिसरोन्मोचनं —कङ्कणविमोचनं[2] विधेयम् , तथा भूतबलिः

---

१. पसिद्धा-C.P. । पइट्ठा-पञ्चाशके । [पसिद्धा] पइट्ठा-मु० ॥ २. L.P.C. । कङ्कणमो° मु० ॥

प्रेतोपहारः पत्रपुष्पफलाक्षताढ्यः[१] सुरभिगन्धोदकोन्मिश्रः सिद्धान्नप्रक्षेपरूपो, दीनदानं कृपणेभ्योऽनुकम्पावितरणमिति ॥१८॥

''**तत्तो पडिदिणपूआविहाणओ तह तहेव कायव्वं ।**
**विहिआणुट्ठाणं खलु , भवविरहफल जहा हुंति[२]**'' ॥१९॥ [ पञ्चा.८/५० ] इति ।

प्रतिष्ठानन्तरं च द्वादश मासान् विशिष्य च प्रतिष्ठादिने स्नात्रादि कृत्वा सम्पूर्णे वर्षेऽष्टाहिकादिविशेषपूजापूर्वमायुर्ग्रन्थिर्बन्धनीयः, उत्तरोत्तरं विशेषपूजा च कार्येति प्रतिष्ठाद्वारम् ३।

तथैव प्रौढोत्सवैः सुतादिनामादिशब्दात् पुत्र[३]भ्रातृभ्रातृव्यस्वजनसुहृत्परिजनादीनां दीक्षादापनम् , उपलक्षणत्वादुपस्थापनाकारणं च, श्रूयतेऽपि **कृष्ण-चेटक**नृपयोः स्वापत्यविवाहनेऽपि नियमवतोः स्वपुत्र्यादीनामन्येषां च **थावच्चापुत्रा**दीनां प्रौढोत्सवैः प्रव्राजना इयं च महाफला ४। यतः —

''**ते धन्ना कयपुण्णा, जणओ जणणी अ सयणवग्गो अ ।**
**जेसिं कुलम्मि जायइ, चारित्तधरो महापुत्तो**'' ॥१॥ [ ] इति । द्वारम् ४।

तथा पदस्थापना गणिवाचनाचार्यादिपदप्रतिष्ठापनम् , दीक्षितस्वपुत्रादीनामन्येषां वा पदार्हाणां शासनोन्नत्यादिनिमित्तं प्रौढोत्सवैर्विधाप्या । श्रूयते हि प्रथमेऽर्हतः समवसरणे सौधर्मेन्द्रेण गणधरपदस्थापनाकारणम् , मन्त्रि**वस्तुपालेना**प्येकविंशतिसूरीणां पदस्थापना कारितेति द्वारम् ५।

तथा पुस्तकानां श्री**कल्पा**द्यागमजिनचरित्रादिसत्कानां न्यायार्जितवित्तेन विशिष्ट[४]पत्र-विशुद्धाक्षरादियुक्त्या लेखनम् । तथा वाचनं संविग्नगीतार्थेभ्यः प्रौढाडम्बरैः प्रत्यहं पूजादिबहुमानपूर्वकं व्याख्यापनम् , उपलक्षणत्वात् तद्वाचनभणनादिकृतां वस्त्रादिभि-रुपष्टम्भदानम् । यतः —

''**ये लेखयन्ति जिनशासनपुस्तकानि, व्याख्यानयन्ति च पठन्ति च पाठयन्ति ।**
**शृण्वन्ति रक्षणविधौ च समाद्रियन्ते, ते मर्त्त्यदेवशिवशर्म नरा लभन्ते ॥१॥**

**[ उपदेशतरङ्गिणी श्लो.४० ]** इत्यादि ।

पूर्वं जिनागमे धनवपनाधिकारे प्रदर्शितमेवेति द्वारम् ६। तथा पौषधशालायां श्राद्धादीनां पौषधादिग्रहणार्थं साधारणस्थानस्य निरवद्यधर्मिजनाकीर्णस्थाने विधापनम् ,

---

१. P.C.L. पञ्चाशकटीका च । °ताद्यः(ढ्यः)-मु० ॥ २. हुंति (होर)-मु० । होति-पञ्चाशके ॥ ३. °पुत्री° इति श्राद्धविधिवृत्तौ प० ४१ A ॥ ४. °पत्रविशिष्टविशुद्ध° इति श्राद्धविधिवृत्तौ ॥

सा च धर्मिजनार्थं कारिता प्रगुणिता च निरवद्यार्हस्थानत्वेन यथावसरं साधूनामप्युपाश्रयत्वेन प्रदेया, तद्दानस्य च महाफलम् ७। यतः –

**''जो देइ उवस्सयं जइवराण तवणिअमजोगजुत्ताणं ।**
**तेणं दिण्णा [1]वत्थन्नपत्तसयणासणविगप्पा'' ॥१॥**

इति द्वारगाथा समाप्ता । **श्राद्धविधौ** तु गृहनिर्मापणादीन्यपि कर्माणि जन्मकृत्येषु न्यस्तानि, परं तानि सामान्यगृहिधर्माधिकारीयाणीति तत्रैव लिखितानि । व्रतादीन्यपि पूर्वं व्याख्यातत्वान्नात्र लिखितानि । प्रतिमानुष्ठानं च विशेषत उपयोगित्वात् स्वतन्त्रमेव मूले वक्ष्यत इति नात्रोक्तमिति जन्मकृत्यानि ॥६८॥

अथ प्रतिमापालनरूपं जन्मसंबन्ध्येव कृत्यं स्वातन्त्र्येणाह –

**विधिना दर्शनाद्यानां, प्रतिमानां प्रपालनम् ।**
**यासु स्थितो गृहस्थोऽपि, विशुद्ध्यति विशेषतः ॥६९॥**

**'विधिना' दशाश्रुतस्कन्धा**द्यागमप्रतिपादितेन, **दर्शनं** –सम्यक्त्वं तत्प्रधाना तेनोपलक्षिता वा प्रतिमापि दर्शनम् , सा आद्या –प्रथमा यासां प्रतिमानां ता **दर्शनाद्यास्तासाम् ,** एकादशसङ्ख्यानामित्यर्थः ।**'प्रतिमानाम्'** अभिग्रहविशेषाणां **'प्रपालनं'** प्रकर्षेण पालनम् , विशेषतो गृहिधर्मो भवतीत्यन्वयः । आसां पालने किं भवति ? इत्याह –**'यास्वित्यादि'** **'यासु'** प्रतिमासु **'स्थितो'** निष्ठः **'गृहस्थोऽपि'** यतितामप्राप्नुवन्नपि, आस्तां कृतसर्वसङ्गत्यागोऽनगार इत्यपिशब्दार्थः, **'विशेषतः'** असङ्ख्यगुणया गुणश्रेण्या **'विशुद्ध्यति'** क्षीणपापो भवति । अथ पुनः काः प्रतिमाः ? यासु स्थितो गृहस्थोऽपि विशेषतः शुद्ध्यति । उच्यते –

**''दंसण १ वय २ सामाइअ ३ पोसह ४ पडिमा ५ अबंभ ६ सच्चित्ते ७ ।**
**आरंभ ८ पेस ९ उद्दिट्ठ १०, वज्जए समणभूए अ'' ॥१॥ [ पञ्चा.१०/३ ]** इति ।

तत्र [2]शङ्कादिदोषरहितं प्रशमादिलिङ्गं स्थैर्यादिभूषणं मोक्षमार्गप्रासादपीठभूतं सम्यग्दर्शनं भयलोभलज्जादिभिरप्यनतिचरन् मासमात्रं सम्यक्त्वमनुपालयतीत्येषा प्रथमा प्रतिमा १।

द्वौ मासो यावदखण्डितान्यविराधितानि च पूर्वप्रतिमानुष्ठानसहितानि द्वादशापि व्रतानि पालयतीति द्वितीया २।

---

१. वत्थन्नपाणस° इति श्राद्धविधिवृत्तौ प० ४२ A ॥ २. तुला. योगशास्त्रवृत्तिः ३।१४८, प० ७६१तः ॥

त्रीन् मासानुभयकालमप्रमत्तः पूर्वोक्तप्रतिमानुष्ठानसहितः सामायिकमनुपालयतीति तृतीया ३।

चतुरो मासांश्चतुष्पर्व्यां पूर्वप्रतिमानुष्ठानसहितोऽखण्डितं पौषधं पालयतीति चतुर्थी ४।

पञ्च मासांश्चतुष्पर्व्यां गृहे तद्द्वारे चतुष्पथे वा परीषहोपसर्गादिनिष्कम्पकायोत्सर्गः पूर्वोक्तप्रतिमानुष्ठानं पालयन् सकलां रात्रिमास्त इति पञ्चमी ५।

एवं वक्ष्यमाणास्वपि प्रतिमासु पूर्वपूर्वप्रतिमानुष्ठाननिष्ठताऽवसेया, नवरं षण्मासान् ब्रह्मचारी भवतीति षष्ठी ६।

सप्त मासान् सचित्ताहारान् परिहरतीति सप्तमी ७।

अष्टौ मासान् स्वयमारम्भं न करोतीत्यष्टमी ८।

नव मासान् प्रेष्यैरप्यारम्भं न कारयतीति नवमी ९।

दश मासानात्मार्थं निष्पन्नमाहारं न भुङ्क्त इति दशमी १०।

एकादश मासांस्त्यक्तसङ्गो रजोहरणादिमुनिवेषधारी कृतकेशोत्पाटः स्वायत्तेषु गोकुलादिषु वसन् प्रतिमाप्रतिपन्नाय श्रमणोपासकाय भिक्षां दत्त' इति वदन् धर्मलाभ-शब्दोच्चारणरहितं सुसाधुवत् समाचरतीत्येकादशी ११। उक्तं च —

**''दंसणपडिमा नेया, सम्मत्तजुअस्स सा इहं बुंदी ।**
**कुग्गहकलंकरहिआ, मिच्छत्तखओवसमभावा ॥१॥ [ पञ्चा.१०/४ ]**
**[1]बीया पडिमा णेया, सुद्धाणुव्वयधारण ।**
**सामाइअपडिमा ऊ, सुद्धं सामाइअं पि अ ॥२॥ [ ]**
**अट्ठमीमाइपव्वेसु , सम्मं पोसहपालणं ।**
**सेसाणुट्ठाणजुत्तस्स, चउत्थी पडिमा इमा ॥३॥ [ ]**
**निक्कंपो काउस्सग्गं तु , पुव्वुत्तगुणसंजुओ ।**
**करेइ पव्वराईसुं , [2]पंचमि पडिवन्नओ ॥४॥ [ ]**

[3]तथा- **असिणाण विअडभोई, मउलिउडो दिवसबंभयारी अ ।**
**रत्तिं परिमाणकडो, पडिमावज्जेसु दिअएसु ॥५॥ [ पञ्चा.१०/१८ ]**

मउलिउड त्ति अबद्धकच्छः ।

---

१. L.P.C. । बीआ य-पञ्चाशके । बिईया-मु० ॥ २. C. योगशास्त्रवृत्तौ च । पंचमीं-मु० ॥ ३. L.P.C. । तथा मु० नास्ति ॥

''झायइ पडिमाइ ठिओ, तिलोगपुज्जे जिणे जिअकसाए ।
णिअदोसपच्चणीअं, अण्णे वा पंच जा मासा ॥६॥ [पञ्चा.१०/१९]

''छट्ठीए बंभयारी सो, फासुआहार सत्तमी ।
[१]वज्जिज्जा वज्जमाहारं, अट्ठमिं पडिवन्नओ'' ॥५॥ [ ]

षष्ठ्यां पुनरयं विशेषः –

पुव्वोइअगुणजुत्तो, विसेसओ विजिअमोहणिज्जो अ ।
वज्जइ अबंभमेगंतओ अ राइं पि थिरचित्तो ॥६॥ [पञ्चा.१०/२०]

सिंगारकहाविरओ, इत्थीओ समं रहम्मि णो ठाई ।
चयइ अ अतिप्पसंगं, तहा विभूसं च उक्कोसं ॥७॥ [पञ्चा.१०/२१]

एवं जा छम्मासा, एसोऽहिगओ इहरहा दिट्ठं ।
जावज्जीवं पि इमं, वज्जइ एअंमि लोगंमि ॥८॥ [पञ्चा.१०/२२]

अवरेण वि आरंभं, नवमीए नो करावए ।
दसमीए पुणोद्दिट्ठं, फासुअं पि न भुंजए ॥६॥ [ ]

*[२]दशम्यामिदमपि ज्ञेयं **पञ्चाशकोक्त**म् –

''पेसेहि वि आरंभं, सावज्जं कारवेइ णो गुरुअं ।
अत्थी वा संतुट्ठो, एसो पुण हुंति विण्णेओ'' ॥७॥* [पञ्चा.१०/२९]

णिक्खित्तभरो पायं, पुत्ताइसु अहव सेसपरिवारे ।
थेवममत्तो अ तहा, सव्वत्थ परिणओ नवरं ॥८॥ [पञ्चा.१०/३०]

लोगववहारविरओ, बहुसो संवेगभाविअमई अ ।
पुव्वोइअगुणजुत्तो, णव मासा जाव विहिणा उ ॥९॥ [पञ्चा.१०/३१]

दशम्यां पुनरयं विशेषोऽपि । यथा –

''उद्दिट्ठकडं [३]भत्तं, विवज्जए किमुअ सेसमारंभं ।
से होइ [४]अ खुरमुंडो, सिहलिं वा धारई कोई ॥१०॥ [पञ्चा.१०/३२]

जं णिहिअमत्थजायं, पुट्ठो णिअएहिं णवरि सो तत्थ ।
जइ जाणइ तो साहइ, अह ण वि तो बेइ ण वि जाणे ॥११॥ [पञ्चा.१०/३३]

---

१. वज्जे सावज्जमारंभं-इति योगशास्त्रवृत्तौ प० ७६३ ॥ २. L.P.C. । * * चिह्नद्वयमध्यवर्तिपाठः मु० नास्ति ॥ ३. भत्तं पि वज्जती पञ्चा०मु० ॥ ४. उ पञ्चा०मु० ॥

**जइपज्जवासणपरो, सुहुमपयत्थेसु णिच्चतल्लिच्छो ।**
**पुव्वोदिअगुणजुत्तो, दसमासा कालमासेण ॥१२॥ [ पञ्चा.१०/३४ ]**
**एकारसीसु निस्संगो, धरे लिंगं पडिग्गहं ।**
**कयलोओ सुसाहु व्व, पुव्वुत्तगुणसायरो ॥१३॥ [ ]**
**पुव्वाउत्तं कप्पइ, पच्छाउत्तं तु ण खलु एअस्स ।**
**ओयणभिलिंगसूआइ, सव्वमाहारजायं तु'' ॥१४॥ [ पञ्चा.१०/३७ ] इति ।**

**आवश्यकचूर्णौ**त्वित्थं —**राइभत्तपरिण्णा पंचमी, सच्चित्ताहारपरिण्णा इति षष्ठी, दिआ बंभचारी, राओ परिमाणकडे त्ति सत्तमी, दिया वि राओ वि, बंभयारी, असिणाणए वोसट्ठकेसमंसुरोमनहे त्ति अष्टमी, पेसारंभपरिण्णाए त्ति दशमी, उद्दिट्ठभत्तविवज्जए समण-भूए त्ति एकादशीति ॥६९॥ [ भा० २, प० १२० ]**

निरूपिता एकादश श्रावकप्रतिमाः, अथ गृहिधर्मोपवर्णनमुपसंहरन्नाह —

**प्ररूपितो जिनैरेवं गृहिधर्मो विशेषतः ।**
**सतामनुष्ठेयतया, चारित्रगिरिपद्यिका ॥७०॥**

'**एवम्**' उक्तनीत्या '**जिनैः**' अर्हद्भिः '**विशेषतः**' सामान्यगृहस्थधर्मवैलक्षण्येन **गृहिणो** —गृहस्थस्य **धर्मः** परमाप्तप्रणीतवचनानुसारी मैत्र्यादिभावभावितोऽनुष्ठानविशेषः, '**प्ररूपित**' उपदिष्टः, स च पृथ्वीधरसरित्समुद्रद्वीपादिसदावस्थितभाववत् केवलं ज्ञेयतया मिथ्यात्वाद्याश्रववद्धेयतया वोपदिष्टो भविष्यतीत्याशङ्कायामाह —'**सतामित्यादि**' 'सताम्' उत्तमानां मार्गानुसार्यादिभावापन्नानामित्यर्थः, '**अनुष्ठेयतया**' विधेयतया, सद्भिरयं विधेय इत्युपदिष्ट इति भावः । कीदृशोऽसौ ? इत्याह —'**चारित्रगिरिपद्यिका**' इति चारित्रं-सर्वसावद्ययोगपरिहारनिरवद्ययोगसमाचाररूपं तदेवगिरिः-पर्वतस्तस्य पद्यिकेव पद्यिका, पद्यारोहेण पुमान् यथा सुखेन महाशैलमारोहति तथा निष्कलङ्कानुपालितश्रमणोपासकाचारः सर्वविरतिं सुखेनावगाहत इति भावः । तदुक्तं **धर्मबिन्दौ** —

**''पदं पदेन मेधावी, यथाऽऽरोहति पर्वतम् ।**
**सम्यक् तथैव नियमाद्धीरश्चारित्रपर्वतम्'' ॥ [ अ.३ । प्रान्ते गा.१७ ]**

एवं च —स्तोकगुणाराधनानुपूर्व्या बहुगुणाराधनस्य न्याय्यत्वात् प्रथमं गृहस्थधर्मः प्रतिपादितः । तदुक्तं तदैव **धर्मबिन्दौ** —

---

१. आरंभपरिण्णाते पेसा° इति आवश्यकचूर्णौ प्रवचनसारोद्धारवृत्तौ [भा० २ प० २२८] द्रष्टव्यम् ॥

**''स्तोकान् गुणान् समाराध्य, बहूनामपि जायते ।**
**यस्मादाराधनायोग्यस्तस्मादादावयं मतः''** ॥१॥ [ अ.३ । प्रान्ते गा.१८ ] इति ।

अयं च पुरुषविशेषापेक्षो न्यायः । अन्यथा तथाविधाध्यवसायसामर्थ्याद्विरलीभूत-चारित्रमोहानां **स्थूलभद्रादी**नामेतत्क्रममन्तरेणापि परिशुद्धसर्वविरतिलाभस्य शास्त्रेषु श्रूयमाणत्वात् , कालविशेषापेक्षोऽप्ययमेव न्यायोऽनुसरणीयः । यतः पञ्चमारके प्रतिमा-परिपालनपर्यन्तश्राद्धधर्मानुगृहीतचित्तस्यैव यतिधर्मप्रतिपत्तिः **पञ्चाशके**ऽभिहिता । तथा च तद्वचः –

**''जुत्तो पुण एस कमो, ओहेणं सपयं विसेसेणं ।**
**जम्हा विसमो कालो, दुरणुचरो संजमो एत्थ''** ॥१॥ [ पञ्चा.१०।४९ ] इति ॥७१॥

• • •

**इति परमगुरुभट्टारकश्रीविजयानन्दसूरिशिष्यपण्डितश्रीशान्तिविजयगणि-चरणसेविमहोपाध्यायश्रीमानविजयगणिविरचितायां स्वोपज्ञधर्मसंग्रहवृत्तौ विशेषतो गृहिधर्मव्यावर्णनो नाम द्वितीयोऽधिकारः । ग्रन्थाग्रम् [१]८४२३**

**इति धर्मसंग्रहस्य द्वितीयोऽधिकारः ॥**

**इति श्री धर्मसंग्रहस्य पूर्वभागः ॥**

• • •

---

१. P.L.C. मूल. । ९४३२–मु० C. संशो० ॥

D:\new/d-2.pm5\3rd proof

# नवधा चैत्यवन्दना

[अयं पाठः धर्मसङ्ग्रहप्रथमभागे २३३ तमपृष्ठे नवमपङ्क्तौ 'उक्कोस त्ति' पाठपश्चात् 'अन्ने इत्येतत्पूर्वं योजनीयः]

[१] सङ्घाचारवृत्तौ [प० १८३] चैतद्गाथाव्याख्याने बृहद्भाष्यसंमत्या नवधा चैत्यवन्दना व्याख्याता । तथा च तत्पाठलेशः —

''एतावता 'तिहा उ वंदणये'त्यादिद्वारगाथागत —'तु'शब्दसूचितं नवविधत्वमप्युक्तं द्रष्टव्यम् । उक्तञ्च **बृहद्भाष्ये** —

**''चिइवंदणा तिभेआ जहन्निआ मा( म )ज्झिमा य उक्कोसा ।**
**इक्किक्का वि तिभेया जहन्न-मज्झिमिअ-उक्कोसा ॥१॥** [ १५३ ][२]
**नवकारेण जहन्ना इच्चाइ जं च वण्णिआ तिविहा ।**
**नवभेअणा इमेसिं नेअं उवलक्खणं तं तु ॥२॥**
**एसा नवप्पयारा आइण्णा वंदणा जिणमयंमि ।**
**कालोचिअकारीणं अणुग्गहत्थं सुहा सव्वा''** ॥३॥ [ १६३ ] इति ।

तथा **बृहद्भाष्ये** —

**''एगनमुक्कारेणं चिइवंदणया जहन्नयजहन्ना १ ।**
**बहुहिं नमुक्कारेहि अ नेआ उ जहन्नमज्झिमिआ २ ॥१॥**
**स च्चिअ सक्कत्थयंता जहन्नउक्कोसिआ मुणेअव्वा ३ ।**
**नमुकाराइ-चिइदंड-एगथुई मज्झिमजहन्ना ४ ॥२॥** [ १५४ ]
**मंगल-सक्कथयं चिइदंडग-थुईहि मज्झिममज्झिमिआ ५ ।**
**दंडगपंचग-थुइजुगलपाढओ मज्झिमुक्कोसा ६ ॥३॥**

---

१. सयन्त्रकोऽयं पाठः P. प्रतौ ११८तमपत्रे पार्श्वभागे वर्तते, मु० नास्ति । अत्र C. प्रतौ ९२A पत्रे पार्श्वभागे —''एवं जघन्याद्येकैकस्या अपि चैत्यवन्दनाया अधिकारित्रयसम्भवात् नवधा चैत्यवन्दनेति ज्ञेयम् ॥ २. अत्राङ्कानि सङ्घाचारभाष्यानुसारं दत्तानि इति ज्ञेयम् ॥

**उक्कोसजहन्ना पुण स च्चिअ सक्कत्थयाइपज्जंता ७ ।**
**थुइजुअलदुगेणं दुगुणिअ चिइवंदणाइ पुणो ॥४॥**
**उक्कोसमज्झिमा सा ८ उक्कोसुक्कोसिआ य पुण नेआ ।**
**पणिवायपणगपणिहाण तिअगथुत्ताइसंपुण्णा ९ ॥५॥**
**सक्कत्थओ अ इरिआ दुगुणिअचिइवंदणा तह तिन्नि ।**
**थुत्तपणिहाणसक्कत्थओ अ इअ पंचसक्कत्थया ॥६॥**
**उक्कोसा तिविहा वि हु कायव्वा सत्तिओ उभयकालं ।**
**सेसा पुण छब्भेया चेइअपरिवाडिमाईसु ॥७॥ [ १६३ ]**

इति नवधा चैत्यवन्दना । यन्त्रकं चेदम्—

## चैत्यवन्दना ९ यन्त्रकम् ॥

| | |
|---|---|
| जघन्यजघन्या १ | प्रणाममात्रेण यद्वा 'नमो अरिहंताणं' इति पाठेन यद्वा एकश्लोकेन नमस्काररूपेण । |
| जघन्यमध्यमा २ | बहुभिर्नमस्कारैर्मङ्गलवृत्तापराभिध्यातैः । |
| जघन्योत्कृष्टा ३ | नमस्कार १ शक्रस्तव २ प्रणिधानैः ३ । |
| मध्यमजघन्या ४ | नमस्काराः, चैत्यस्तवदण्डक एकः, स्तुतिरेका श्लोकादिरूपा इति । |
| मध्यममध्यमा ५ | नमस्काराः, चैत्यस्तव एकः, स्तुतिद्वयम्, एका अधिकृतजिन-विषया एकश्लोकरूपा, द्वितीया नामस्तवरूपा, यद्वा नमस्काराः, शक्रस्तव-चैत्यस्तवौ स्तुतिद्वयं तदेव । |
| मध्यमोत्कृष्टा ६ | ईर्या, नमस्काराः शक्रस्तव-चैत्यादिदण्डकः ४ स्तुति(तयः) ४ शक्रस्तवः । द्वितीयशक्रस्तवान्ताः स्तवप्रणिधानादिरहिता एकवार-वन्दनोच्यते । |
| उत्कृष्टजघन्या ७ | ईर्या, नमस्काराः दण्डक ५, स्तुति ४ नमोत्थुणं जावंति १ जावंत २ स्तवन १ जयवीयराय १। |
| उत्कृष्टमध्यमा ८ | ईर्या । नमस्काराः शक्रस्तवचैत्यस्तव(वौ) एवं स्तुति ८ शक्रस्तव जावंति १ जावंत २ स्तव ३ जयवीयराय ४। |
| उत्कृष्टोत्कृष्टा ९ | शक्रस्तव ईर्या स्तुति ४ शक्रस्तव स्तुति ४ शक्रस्तव । जावंति १ जावंत २ । स्तव जयवीयराय शक्रस्तव । |

● ● ●